This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Digitized by Google

Ind L 350.2

7 1899

Harvard College Library

FROM THE BEQUEST OF

MRS. ANNE E. P. SEVER,

OF BOSTON,

WIDOW OF COL. JAMES WARREN SEVER,

(Class of 1817)

17 Feb, 1898 – 3 Jan, 1899

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः ।

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Vol. XX.

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO.,

BENARES.

1898.

Digitized by Google

Digitized by Google

INDEX TO VOLUME XX. NEW SERIES.

Tattvamuktākalāpaḥ ... 1, 57, 113, 169, 225, 281, 337, 393, 449, 505, 561, 617.

Kāśikāvyākhyā Padamanjari ... 17, 73, 129, 185, 241, 297, 353, 409, 465, 521, 577, 633.

Jaiminisūtravṛittiḥ ... 41, 89, 145, 201, 257, 313, 369, 425, 481, 537, 593, 649.

Kāvya-prakāça ... ... 33, 105, 161, 217, 273, 329, 385, 441, 497, 553, 609, 665.

Digitized by Google

4°
~~Ik.60~~
IndL 350.2

1898, Feb. 17 – 1899, Jan. 3,
Sever fund

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1.] January, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

यद्यङ्कुराद्युत्पत्तौ कश्चित् कर्ता स कथन्न दृश्येत अतो यूपादित्यैक्यमिव प्रत्यक्षबाधितत्वान्न श्रुतिः प्रतिपादयतीत्याह । अप्रत्यक्ष । इति ॥

मू० अप्रत्यक्षः परमात्मा तदिह न घटते
धातुरध्यक्षबाधो योग्यादृष्टेरभावान्न खलु
न भवता स्वीकृतः स्वेतरात्मा ॥ तस्मिन्दे-
हानपेक्षे श्रुतिभिर*वसिते देहबाधान्न बाधो
वेदेभ्यो नानुमानं न च पुरुषवचस्तिष्ठ†ते
बद्धवैरम् ॥ २ ॥

सर्वेषां स्वव्यतिरिक्तस्यात्मनः प्रत्यक्षत्वासिद्धेः ईश्वरेऽपि योग्यानुपलब्ध्यभावान्नात्र प्रत्यक्षबाध इत्यर्थः । इह—दूर्वादिकार्योत्पत्तौ कर्त्तुरदृष्टस्य कथं सिद्धिरिति चार्वाकचोद्यं वारयति । न खल्विति । अयं भावः न तावद्बौद्धलोकायतिकैरद्वैतिभिरिवात्मभेदोऽनङ्गीकृतः । भिन्नाश्चात्मानः परस्परमप्रत्यक्षाः एवमीश्वरोऽपि स्वप्रत्यक्षोऽन्याप्रत्यक्षतया निषेद्धुं न शक्य इति । अनुमानादात्मान्तरस्वीकार इति चेत् आगमादीश्वरोऽपि स्वीकर्तव्यः प्रमाणत्वेन श्रद्धेयत्वाविशेषात् । परोक्षत्वेन न्यक्कारस्यानुमानेऽपि प्रसङ्गात् लोकायतिकानां तु यद्यपि भूतपरिणतिरूपः परमात्माऽपि प्रत्यक्षः तथाऽपि चैतन्यविशिष्टो न प्रत्यक्षेण गृह्यते यद्यन्यतस्तु कुतश्चित् तद्विशिष्टतया गृहीतः एवमीश्वरोऽपि किन्न गृह्येत बाधानर्हत्वात् शरीरतया परात्मग्रहणमिति चेत् आत्मनश्शरीरत्वे सिद्धे हि तथा

* अधिगते इति पा० ।

† प्रकाशनस्थेयाख्ययोश्चेति पाणिनीयेनात्मनेपदमिह साधु अर्थसङ्गतिश्चेह स्फुटैव ।

ग्रहणं तदन्यत्वसिद्धौ तु परशरीरेऽपि तथैव स्यादिति। अस्तु तर्हि व्यापकानुपलब्ध्या बाधः कर्त्तुर्हि शरीरं व्यापकम्। न चाङ्कुरोत्पत्तौ शरीरं दृश्यते अतीन्द्रियन्तच शरीरमस्त्विति चेन्न अङ्कुराद्युत्पादकतया तादृशशरीरानभ्युपगमात्। तदभ्युपगमेऽपि करणकलेवरसापेक्षस्य कर्त्तुः कथमीश्वरत्वं तत्राह। तस्मिन्निति। देहानपेक्ष इत्युपलक्षणम्। श्रूयते हि पश्यत्यचक्षुस्स शृणोत्यकर्णः अपाणिपादो जवनो ग्रहीतेति यदि सर्वशरीरत्वस्य श्रुतिस्मृतिसिद्धत्वात् सर्वेषु कार्य्येषु शरीरसापेक्षत्वमिति तथा सति न व्यापकाऽनुपलब्ध्या बाधः। सर्वकार्यानुगुणतत्तद्द्रव्यशरीरकतया शास्त्रेणोपलब्धेः। अथ विगीतमकर्तृकं कर्मवश्याजन्यत्वादित्याद्यनुमानैरीश्वरस्य बाध इत्युच्येत तत्राह। वेदेभ्य इति। अयं भावः आप्तशास्त्रस्यानुमानैर्विरोधे शास्त्रेणैव तेषां बाधोपपत्तिः अन्यथा स्वर्गनरकादीनामतीन्द्रियाणां कुतश्चिदनुमानाद् बाधप्रसङ्गात्। शक्यं हि विगीतं न दुःखासंभिन्नसुखसाधनं साधनत्वात् किलिविषवदिति। एवमन्यथाप्यूह्यम्। किञ्चात्र नैयायिकादिसम्मतैरीश्वरानुमानैर्बाधः प्रतिरोधो वा दुर्वारः विपक्षे बाधकसदसद्भावो समपक्षौ। अस्तु तर्ह्यादिविदुषस्सिद्धस्य कपिलस्यागमेन ब्रह्मकारणवादभङ्ग इत्यत्राह। न चेति। नित्यनिर्दोषश्रुतिविरोधे हि स्मृतेरेव बाध्यत्वं विरोधाधिकरणसिद्धम् अन्यथा बौद्धाद्यागमैरपि किन्न कृत्स्नवेदबाधः। तेषां भ्रमादिमूलत्वसंभावनयेति चेत् सममेतत्। सर्वज्ञस्सांख्याचार्य्यः परमाप्त इति चेन्न समाधिजनितसार्वज्ञ्यानामपि कर्मभेदैः कदाचिद् भ्रमसंभवात्। न च सार्वज्ञ्यप्रमाणमस्ति। आहुश्च—

कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा।
तावुभौ यदि सर्वज्ञौ मतभेदः कथं भवेत्॥ इति।

Digitized by Google

ननु ददृशुः कपिलन्तत्र वासुदेवं सनातनमित्यादिभिः स्वतस्सर्वज्ञपरमकारुणिकावतारतया सिद्धस्य कथमनाप्तत्वशङ्केति चेन्न बुद्धेऽपि समत्वात्, आविष्टत्वमात्रन्त्वेति चेदत्रापि तथा विरोधाभावात् अन्यथा बुद्धादीन् प्रेरयत ईश्वरस्यासुरादिषु विप्रलिप्सा दुस्त्यजा मोहयिष्यामि मानवानित्यादि च स्वयमेवाह अतः पौरुषेयवाक्यमार्षमपि वेदाविरोधेन नेतव्यमिति । एवं निरीश्वरमीमांसका अपि निर्मूला निगमान्तविद्भिरनुग्राह्याः ।

य एवं स्यादसर्वज्ञः सर्वज्ञं न स बुद्ध्यते ।
इति ब्रुवाणाः सार्वज्ञ्यं लभन्तां तन्निषेधतः ॥

इतीश्वरस्य निर्बाधत्वम् ।

ननु श्रुतिभिरधिगत इत्याद्ययुक्तं स्वयंप्रकाशतया तत्सिद्धेः अतो वेद्यत्वमेव न यत्र तत्र कथं शब्दवेद्यत्वं यतो वाचो निवर्तन्ते अप्राप्य मनसा सह यद्वाचाऽनभ्युदितमित्यादिभिश्च तदुभयं निषिध्यत इत्यत्राह । वाच्यत्वमिति ॥

मू० वाच्यत्वं वेद्यताञ्च स्वयमभिदधति ब्रह्मणोऽनुश्रवान्ता वाक्चित्तागोचरत्वश्रुतिरपि हि परिच्छित्त्यभावप्रयुक्ता । नो चेत् पूर्वापरोक्तिस्ववचनकलहस्सर्ववेदान्तबाधस्तत्सिद्धिर्हेतुभिश्चेत् प्रसजति विहतिर्धर्मिसाध्यादिशब्दैः ॥ ३ ॥

अयं भावः स्वप्रकाशत्वं तावन्निगमवेद्यत्वेऽपि घटते दर्शनस्पर्शनाभ्यामेकार्थग्रहणवदुपपत्तेः । अथाऽनन्यवेद्यत्वमेव स्वयंप्रकाशत्वं तदा कथन्ततस्तत्साध्यत्वमवेद्यत्वग्राहकात्तत् साध्यत इति

Digitized by Google

चेत् किन्तद्ग्राहकं, न तावद् ब्रह्मस्वरूपं तस्य स्ववेद्यत्वावेद्यत्वयो-रुदासीनत्वात् अन्यथा तव तत्संशयाद्यनुत्पत्तिप्रसङ्गात् । नापि वृत्ति-ज्ञानानि तद्ग्राहकत्वे तदभावे च तदवेद्यत्वसाधनायोगात् । एवं सामान्यप्यवेद्यत्वग्रहणायुक्तिर्भाव्या ग्राहकान्तरैरग्राह्यं गृह्यत इत्य-विरोध इति चेत्तर्हि घटादेरप्यवेद्यत्वं सिद्धं स्वग्राहकेतराग्राह्य-त्वात् । येश्च वय्यन्तेरवाच्यत्वादिकं सिसाधयिषसि ते एव स्वयं वा-च्यत्वादिकमभिदधति तस्योदिति नाम अथ नामधेयं सत्यमि-त्यादिषु तद्वाचकविधानात् । सर्वे वेदा यत्पदमामनन्ति यो वेद निहितं गुहायां परमे व्योमन् यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व येना-क्षरं पुरुषं वेद सत्यं प्रोवाच तान्तत्त्वतो ब्रह्मविद्यामित्यादिषु वा-क्यतोऽन्यतश्च वेद्यत्वप्रतिपादनादिति तर्हि यतो वाचो निवर्त्तन्त इत्यादेर्निर्विषयत्वप्रसङ्ग इत्यत आह । वाक्चित्तेति । सैषाऽऽनन्दस्य मीमांसा भवतीत्यादिना ब्रह्मानन्दस्यापरिच्छेद्यताप्रतिपादने हि वाक्यतात्पर्य्यं गम्यते अन्यथा ब्रह्मविदाप्नोति परम् आनन्दं ब्रह्मणो विद्वानित्यादिपूर्वापरविरोधः स्ववचनविरोधश्च स्यात् तदिदमाह । नोचेदिति । ब्रह्मप्रतिपादकभागश्च सर्वो निर्विषयः स्यादित्याह । सर्वैति । उपलक्षणमेतत् वेदोपबृंहणशतबाधस्य वेदैश्च सर्वैरहमेव वेद्यः । वचसां वाच्यमुत्तममित्यादिभि*श्च यतो वाचो निवर्त्तन्त इत्या-देरान्य†पर्य्यं ग्राह्यं मास्त्वेव श्रुतिभिरवाच्यत्वादिसिद्धिः अनुमा-नतस्तु स्यादिति शङ्कते । तत्सिद्धिरिति । श्रुतिवदेव विरोधप्रसक्त्या परिहरति । प्रसजतीति । ब्रह्मावाच्यमवेद्यं वा वस्तुत्वादिति हि प्रयो-क्तव्यं तत्र ब्रह्मपदं साध्याधारं ब्रूते न वा आद्ये कथन्तद्विरुद्धसाध्य‡-

* आदिपदेन तस्य वाचकः प्रणवः । इत्यादिपातञ्जलसूत्रमभिप्रेयते ।

† अन्यपरत्वमित्यर्थः । तच्छिन्नप्रयोगप्रिया दाक्षिणात्या इति प्राचामपि प्रवादः ।

‡ साध्यविधिरिति पा० ।

धीः । द्वितीये तु निरर्थे*कता निराश्रयसाध्योक्ति†श्च । एवं साध्यपदमपि धर्मिपदसमानाधिकरणं न वा पूर्वेण स्वस्य धर्मिणं ब्रूते स्वव्यापारविरुद्धञ्च ब्रूत इति विषमेतत् उत्तरेणानन्वयः । हेतुपदे च स्वपक्षधर्मत्ववाचिनि प्रकृत्यंशो धर्मिविषयः अन्यथा कथं प्रत्ययांशस्य तन्निष्ठभावाभिधायित्वम् अतो धर्म्युल्लेखनतद्भाववाचकं हेतुपदं न स्वप्रवृत्तिविरुद्धं साध्यं साधयेत् । एवमनुग्राहकतर्केऽपि धर्मिप्रसञ्जकप्रसञ्जनीयपदेषु विहतिरवधार्य्या । प्रतिप्रयोगोऽपि विगीतं वेद्यं वाच्यञ्च भासमानत्वादिति नात्र द्वितीय‡स्य व्यत्ययाऽनैकान्त्यं जातिवृत्तेरपि वाच्यत्वस्य वक्ष्यमाणत्वात् । युष्माकञ्च तत्र विमत्यभावात् । नन्वत्र धर्मिपदस्य धर्मिणि मुख्यवृत्तिरसिद्धा सिषाधयिषितावस्थत्वात् । उपचाराभ्युपगमे तु विवक्षितविरोधः स्यात् मेवं वृत्तिमात्रस्य स्वपरसम्मतत्वेन वाच्यत्वानिश्चयेऽपि प्रयोगोपपत्तेः ।

दुस्साधं क्वचिदप्येवमवाच्यत्वादि कस्यचित् ।
किं पुनस्सर्ववचसां प्रतिष्ठा यत्र तत्र तु ॥

इत्यवाच्यत्वावेद्यत्वादिपरिहारः ।

ननु लक्षणया धर्म्यादिपदानि प्रवर्त्तन्तां मुख्यवृत्तिविषयत्वाभावस्तु साध्यत इति को विरोध इत्यत्राह । नित्यमिति ॥

मू० नित्यं ब्रह्मादिशब्दा निरुपधिकसतो लक्षका इत्ययुक्तं मुख्यस्यान्यस्य हानेर्न्न च निपुणधियो मुख्यमिच्छन्ति लक्ष्यम् ॥ मुख्यत्वे बाधकञ्च क्वचिदपि न वयं किञ्चिदालोक-

---

* निरर्थकत्वानमेतदिति भावः । † पक्षाप्रसिद्धिरित्यर्थः ।
‡ प्रतिप्रयोगस्य ।

Digitized by Google

यामो मुख्यं लक्ष्यञ्च वाचः पदमिति न च तद्गोचरत्वातिपातः ॥ ४ ॥

अयुक्तत्वं कुत इत्यत्राह । मुख्यस्येति । तीरं गङ्गापदलक्ष्यमितिवन्मुख्यवृत्त्यनर्हं किञ्चिन्न लाक्षणिकं दृष्टं सामान्यतो विशेषतो वा स्ववाचकपदान्तरनिर्दिष्टं हि पदान्तरस्य लक्षणा वाच्या अन्यथा ब्रह्मादिशब्दा लक्षणया प्रवर्तन्त इत्युक्ते परेष्टमाषोक्तिः स्यात् । व्यक्तिविशेषमनिष्कृष्य ब्रह्मशब्दवेद्ये लक्षणया प्रवर्तन्त इत्युक्तेऽपि प्रकृत्यादौ तथा प्रवृत्तेरुक्तदोषो दुर्वारः । अथ सर्वेकारणत्वादिलक्षिते लक्षणावृत्तिर्ब्रह्मादिशब्दानां साध्येत तदा तत्र मुख्यवृत्तौ न काचिदनुपपत्तिः प्रवृत्तिनिमित्तपौष्कल्यादुपपत्तिरेव अन्यस्य तु मुख्यस्य हानिः तद्गुणलेशयोगात् प्रयोगोपपत्तेः, साध्यवाचकपदमप्यवाच्यसम्बन्धिनि लक्षणया वर्तत इति वक्तव्यं न चान्यत् किञ्चिदवाच्यं दृष्टमिष्टं वा तदभ्युपगमेऽप्यत्र ब्रह्मणस्तत्सम्बन्धित्वं साधितं स्यात् न त्ववाच्यत्वं स्वयंप्रकाशत्वादिति हेतुपदन्त्वत्र स्वयं प्रकाशसंबन्धिपरं स्यात् तथा सत्यन्यत् स्वयं प्रकाशं ब्रह्म तु तत्सम्बन्धिमात्रमिति साधु सिद्धान्तस्समर्थितः । अथ काल्पनिकमुख्यवृत्तिविषयत्वं ब्रह्मणः स्यादित्यत्राह । न चेति । अयं भावः त्वन्मतेऽन्येषामपि हि मुख्यत्वं काल्पनिकमेव तथा सति यस्य पदस्य यन्मुख्यं तत्तस्य लक्ष्यमिति तवैवेदं शोभते लक्षणानिमित्तञ्चात्र नास्तीत्याह । मुख्यत्व इति । क्वचिदपि सद्ब्रह्मादिशब्देषु कुत्रचिदपीत्यर्थः । किञ्च श्रुतिविरोधपरिहाराय मुख्यवृत्तिबाध इष्टः लक्षणावृत्त्यङ्गीकारेऽपि तद्विरोधस्ते स्थित एवेत्याह । मुख्यमिति । विरोधशमनन्त्वस्मदिष्टमेव साधीय इति भावः ॥ ४ ॥

Digitized by Google

इति सद्ब्रह्मादिशब्दानां नित्यलक्षकत्वानुपपत्तिः ।

एवमीश्वरस्य वय्यन्तवेद्यत्वं शब्दवाच्यत्वञ्च स्थापितं, स तु हिरण्यगर्भादिष्वन्यतम इति शङ्कायां पुरुषनिर्णयादि साधितं विशेषनिर्धारणं संगृह्णाति । निस्साधारण्येति ॥

मू० निस्साधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे सद्ब्रह्माद्यास्समानप्रकरणपठितास्तच्छङ्कितान्यार्थशब्दाः । अन्तर्य्यन्ता च नारायण इति कथितः कारणञ्चान्तरात्मेत्यस्मादप्यैककण्ठ्यं भवति निरुपधिस्तत्र शंभ्वादिशब्दः ॥ ५ ॥

साधकबाधकाभ्यामप्राप्ते शास्त्रमर्थवदित्यभिप्रायेणोक्तम् । अबाध इति । सदादिशब्दानां कथं शङ्कितान्यार्थत्वम् इत्थं सच्छब्दस्तावत् सत्तायोगिषु सर्वेषु *प्रवृत्ततया न विशेषनिर्धारणार्हः ब्रह्मशब्द एकरूढोऽपि बहुषु रूढवत् प्रयुक्ततयाऽन्यार्थत्वशङ्कार्हः स्यात् आत्मशब्दश्च जीवपरादिसाधारणप्रयोगः एवं पुरुषप्राणाक्षरादिशब्दा अपि । नारायणशब्दस्तु न जात्युपाधिवचनो न वाऽनेकरूढः अतस्तेनान्येषां विषयविशेषनिर्धारणं युक्तं तत्र च हेतुः समानप्रकरणपठितत्वमन्यथा पत्त्यधिकरणादेरपि भङ्गः स्यात् प्रकारान्तरेणापि निर्दिधारयिषुराह । अन्तर्य्यन्तेति । यथा सुबालोपनि-

---

* सर्वंजगत्सत्तावादिनां सिद्धान्तिनां स्वस्वरूपविश्रान्तस्यासद्वैलक्षण्यलक्षणसत्त्वस्य जगत्साधारण्यमिति भावः । श्रुतिरजनादेश्चानङ्गीकारपराहतत्वेन युक्तसत्त्वेन च न तत्र व्यभिचारः शक्यः प्रदर्शयितुमिति तु परमार्थः ।

† संज्ञायामेव पूर्वपदात्संज्ञायामग इति पाणिनीयेन णत्वानुशासनान्नारायणशब्दस्य च विष्णुसंज्ञारूपतायाः सुनिर्धारिततयाऽयमर्थः स्फुट इति भावः ।

यदि एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति एतेनान्तर्य्यामिब्राह्मणमप्येतद्विषयमिति निर्धारितम् । ततः किमित्यत्राह । कारणमिति । तत् सृष्ट्वा तदेवानुप्राविशदित्यादिना हि सर्वस्रष्टुस्सर्वान्तर्य्यामित्वमप्याम्नातम् । फलितमाह । अस्मादिति । नारायणशब्देन शिवादिशब्दानामिति शेषः । ननु कारणन्तु ध्येय इत्यत्र शम्भुराकाशमध्य इति समाख्यान्तरं दृष्टं ततः किं कारणानुवादेन ध्येयत्वविधिपरं हीदं वाक्यं पुरोवादे च नारायणत्वनिर्णये तस्मिन्निरुपाधिकावयवार्थभूम्ना तद्वृत्तिरुपपन्ना, तथा च नारायणानुवाकेऽपि विश्वशम्भवमित्युच्यते शाश्वतं शिवमिति च । अतोऽन्यपरवाक्यस्थसमाख्यामात्रमकिञ्चित्करमिति भावः ॥ ५ ॥

शिवशब्दस्य न केवलं शुद्ध्या*दिपौष्कल्यमात्रान्नारायणे वृत्तिः किन्तु नामतयाऽपीत्याह । विष्णोरिति ॥

मू० विष्णोरप्यस्त्वभिख्या शिव इति शुभता रूढि-
रत्रानुपाधिस्तस्माज्ज्ञेयः श्रुतोऽसौ शिव इह
शिव एवेति वाक्यन्त्वनुक्तिः । उक्तन्नाराय-
णाधिष्ठितमिति च तमोऽनेकबाधोऽन्यथा
स्यात् ब्रह्मेशादेर्महत्यामुपनिषदि लयाद्यु-
क्तमेवन्तु नात्र ॥ ६ ॥

सर्वश्शर्वश्शिवः स्थाणुरिति हि तन्नामसहस्रे पठ्यते । ननु शुभतया रुद्रस्य रूढिः स्यादित्यत्राह । शुभेति । शुभतया जनिता ह्यस्य रूढिः मङ्गलानाञ्च मङ्गलमित्यादिभिर्निरुपाधिकशुभत्वशालिनि भगवत्येव युक्ता । अन्यत्र तु तद्गुणयोगाद्वृत्तिः स्यात्, प्रसिद्धिप्रकर्षस्तु

* शुभादि इति पा० ।

प्रणववेदादिषु ब्रह्मशब्दवत् प्रचुरप्रयोगमात्रात् स्यात्, यत्र तु शिवस्य ध्येयत्वोक्तिस्तत्रापि शाश्वतशिवानुवादेन ध्यानं विधीयते नैतावता प्रसिद्धशिवस्य श्रुतिविरुद्धं कारणत्वं कल्पयितुं शक्यमित्याह । तस्मादिति । अतो—विष्णुरेव महापुरुषवेदनस्य हि मुक्तिहेतुत्वं प्रतिपाद्य नान्यः पन्था अयनाय विद्यत इति नियम्यते । ननु यदा तमस्तादिति वाक्ये शिव एव केवल इत्युच्यते अतः प्रसिद्धशिवः कारणमित्यत्राह । शिव इवेति । इदन्तावद्वाक्यं न कारणतमसः प्रतिपादकं यदेति कालविशेषप्राप्तानुवादात् । अव्यक्तमक्षरे लीयते अक्षरन्तमसि लीयत इति सुबालोपनिषद्वाक्येन तत्प्राप्तिः सा चोपनिषन्नारायणस्यैव कारणस्योपास्यत्वादिकं बहुधा वक्ति । अव्यक्ताक्षरक्रमेण तमःस्थाने यस्य मृत्युश्शरीरमिति पठ्यते अतो नारायणाधिष्ठिततमोवाक्यमिह पुरोवादः नासदासीन्नो सदासीत्तदानीन्तम आसीदित्यादिवाक्यमत्र पुरोवादः किन्न स्यादिति चेत्तथाऽपि तस्य सौबालवाक्यसमानार्थत्वं ग्राह्यम् अतः कारणतमोऽधिष्ठातृत्वेन प्रसिद्धो नारायण एवात्र शब्दान्तरपरामृ*ष्टः अनन्तरञ्च तदक्षरन्तत्सवितुर्वरेण्यमित्यादिना तत्प्रकारविशेषोपदेशः मानवे च आसीदिदन्तमोभूतमप्रज्ञातमित्यारभ्य तेन नारायणः स्मृत इत्यन्तेन स एव कारणतमोऽधिष्ठातेति स्पष्टमुक्तं, तदेतत्सर्वमभिप्रेत्याह । उक्तमिति । एवमनभ्युपगमे बहुश्रुतिस्मृतीतिहासादिबाधः स्यादित्याह । अनेकबाधेति । अपि च नारायणकारणत्वप्रतिपादिकायां महोपनिषदि न ब्रह्मा नेशानो नेमे द्यावापृथिवी इत्यादिना नारायणात् ब्रह्मेशानयोरुत्पत्त्यादिकं श्रुतं यदा तम इति वाक्ये न दिवा न रात्रिरित्येतावदुक्तम् एतेन हिरण्यगर्भस्समवर्तताग्रे इति वाक्यमपि

* प्रकरणान्तरपठितशब्दान्तरनिर्धारितस्वार्थविष्णुदेवताक इत्यर्थः ।

Digitized by Google

निरूढम् अद्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टाविति तद्विषयानुवाका-न्तरसमानार्थत्वसिद्धेश्चेति ॥ ६ ॥

ननु यस्मात् परं नापरमस्ति किञ्चिदित्यादिना तेनेदं पूर्णं पुरुषेण विश्वमित्यन्तेन पुरुषसूक्तादिप्रसिद्धं पुरुषमनूद्य ततो यदुत्त-रतरमित्यादिना तस्मात् परस्यैव वेदनममृतत्वादिसाधकमुक्तं स एव सर्वेश्वरः स्यादित्यत्राह । यः प्रोक्त इति ॥

मू० यः प्रोक्तस्सर्वकर्त्तुः परमखिलतनोर्नापरं
किञ्चिदस्तीत्यस्यैव स्यादनुक्त्योत्तरतरकथनं
न त्वितोऽन्यस्य बाधात् । विश्वव्याप्तस्य
तस्योचितमुपधिपरिच्छेदनादुन्मितत्वं स्व-
स्यैव प्रापकत्वादशिथिलचिदचिद्धारणा-
च्चैष सेतुः ॥ ७ ॥

सर्वकर्तृत्वं पुरुषसूक्तार्थप्रत्यभिज्ञया सिद्धम् । अखिलतनुत्वञ्च पुरुष एवेदं सर्वमितिवत् तेनेदं पूर्णं पुरुषेण सर्वमित्यनेन व्यञ्जितं यस्मात् अपरं किञ्चित् परन्नास्तीत्यन्वयः । तेन न तत्समस्याभ्यधि-कस्य दृश्यत इत्ययमर्थोऽनूदितो भवति एवं समाभ्यधिकदरिद्रस्य विश्वव्यापिनोऽस्यैव सहेतुकमतो यदुत्तरतरमित्यनुवादः । अत एव तद्रूपमनामयमित्यादिभिराकारान्तरोपदेशः प्रकारान्तरस्यासिद्ध-त्वाद्यदुत्तरतरमित्यनुवादायोगमभिप्रेत्याह । न त्वितोऽन्यस्येति । अयं भावः य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्तीति च तद्विषयमेव अन्यथा नान्यः पन्था अयनायेति पुंसूक्तवाक्येन व्याघातः । एकविषयत्व एव ह्युभयथान्यवेदनस्य मोक्षहेतुत्वाभा-वोक्तिस्संघटते । तच्च बहुधा विरोधमप्याह । बाधादिति । पूर्ववाक्ये

Digitized by Google

तावत् परान्तरनिषेधादुपक्रमनयेन तद्विरुद्धमुत्तरमुद्देतुं नालम्, उत्तरत्र सर्वाननशिरोग्रीवत्वादिना सहस्रशीर्षा पुरुषः सहस्रशीर्षं देवमित्याद्युक्तमिह प्रत्यभिज्ञानम् अतोऽपि न तदन्यस्योत्तरतरत्वोक्तिसंभवः । अन्यथा न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य इत्याद्युपबृंहणाबाधश्चेति । ननु पादोऽस्य विश्वा भूतानि एष त आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वेत्यादिभिः कारणपुरुषस्य परिच्छिन्नत्वोक्त्या ततोऽन्यदपरिच्छिन्नं परतरमित्यत्राह । विश्वव्याप्तस्येति । अयं भावः यत्रयत्र परिच्छेदोक्तिः तत्रतत्र विश्वव्याप्तत्वमुक्तम् अतस्तत्रतत्रोपासनार्थमौपाधिकः परिच्छेद उच्यत इति सेतुत्वश्रुत्या तेनोपायेन कूलान्तरवत् प्राप्यान्तरं गम्यत इति अत्राह । स्वस्यैवेति । अमृतस्यैष सेतुरित्यत्र तावदमृतशब्देन श्रुत्यन्तरवत् ब्रह्माभिधाने स्वप्राप्तेः स्वयमुपाय इत्येतावदेव सिद्ध्येत् मोक्षाभिधानेऽपि तदुपायतयाऽन्यः परतरो न कल्पयितुं शक्यते एष सेतुर्विधरण एषां लोकानामसंभेदायेत्यत्र तु सिञ् बन्धने इति धातोः स्वस्मिन्नाधारे विश्वमसङ्कीर्णं बध्नातीति सेतुः । तथापि न ततः परसंभवः एतं सेतुं तीर्त्वेत्यत्राप्यन्धस्सन्ननन्धोभवतीत्यादिषूत्तरवाक्येषु पुरुषस्य प्राप्यान्तरानभिधानात् तरतिः प्राप्तिवचनः एवं नेतं सेतुमित्यादावप्यनन्यथासिद्धसेतुपदव्यपदेशो न प्राप्यान्तरकल्पनक्षम इति ॥ ७ ॥

अथ पुरुषसूक्तस्य विनियोगविशेषान्नारायणपरत्वे सिद्धेऽपि शब्दसाधारण्यात् सन्दिहानानां प्राकरणिकादनन्यथासिद्धलिङ्गाद्विशेषनिश्चयमुत्पादयति । पुंसूक्तमिति ॥

मू० पुंसूक्तं सर्ववेदप्रपठनमहितं यत्परत्वैकतानं तस्यैव श्रीपतित्वं विशदमभिदधे ह्युत्तरत्रानुवाके । आम्नातश्चैष नारायण इति

Digitized by Google

निखिलब्रह्मविद्यासु वेद्यस्तत्तद्विद्याप्रदेश-
श्रुतविविधपदप्रत्यभिज्ञप्तिपूर्वम् ॥ ८ ॥

सर्ववेदप्रपठनमाहितमित्यनेन परतत्त्वविषयप्रमाणानाम्मिथो-विरोधस्फूर्त्तौ बलाबलचिन्तायां परिग्रहातिशयादेतस्य प्राबल्यं सूच्यते उक्तञ्च तदभिप्रायेण महाभारते । इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते । इत्युत्तरानुवाकः पुरुषसूक्तोक्तमहापुरुषविषयः सन्निध्यनुगुण-शब्दार्थप्रत्यभिज्ञानात् तच । ह्रीश्च ते लक्ष्मीश्च पत्न्याविति । तैत्ति-रीयास्समामनन्ति वाजसनेयिनस्तु । श्रीश्च ते लक्ष्मीश्च पत्न्या-विति । न चाचानुवाकद्वये धातृप्रजापतिशब्दाभ्यामन्यविषयत्वमा-शङ्कनीयं विश्वकर्मत्वष्टृशब्दाभ्यामपि प्रसङ्गात् । अतः प्रसिद्धतम-लिङ्गानुरोधेन धातृप्रभृतिशब्दानां योगत एव मुख्यत्वमेष्टव्यम् । किञ्च नारायणानुवाके सहस्रशीर्षं देवमित्यादिभिः पुरुषसूक्तप्रभृतिसर्व-परविद्यावेद्यं पुरुषं प्रत्यभिज्ञाप्य तस्य नारायणत्वं बहुशोऽभ्यस्तम् । अतो यत्रयत्र परब्रह्मपरतत्त्वपरज्योतिःपरमात्मादिशब्दा दृष्टास्तत्र सर्वत्र नारायण एव प्रतिपाद्य इति निश्चीयते । अतः परतत्त्वनिर्ण-येऽयमेवानुवाकः पर्य्याप्त इत्यभिप्रायेणाह । आम्नात । इति ॥ ८ ॥

तथाऽपि त्वाष्ट्रवधादिलिङ्गैः प्रसिद्धेन्द्रादिविषयासु मोक्षार्थ-विद्यासु का गतिरित्यत्राह । रुद्रेन्द्रादिरिति ॥

मू० रुद्रेन्द्रादिश्च यत्र स्फुरति परतयाऽनन्यथा-
सिद्धलिङ्गैस्तत्तत्तत्त्वैर्विशिष्टो हरिरखिल-
तनुस्तासु विद्यासु वेद्यः । पारम्यं त्वान्य-
पर्यान्न* न भवति न किरित्यादिभिः स्तोत्र-

* अन्यपरत्वादित्यर्थः ।

वाक्यैरन्याकूतैर्नमस्यादिभिरपि न परः स्या-
दनैकान्त्यदुःस्थैः ॥ ९ ॥

प्रसिद्धेन्द्रादिलिङ्गानां परमात्मलिङ्गानां चानन्यथासिद्धावुभयानुरोधेन सद्वारकमद्वारकञ्च तत्तद्विधिप्रसङ्गोपादानपरत्वं स्वीकर्तव्यमित्यर्थः । कर्मविधिप्रकरणेषु न किरिन्द्र त्वदुत्तर इत्यादिभिः प्राकरणिकदेवताप्रशंसापरैः न तासां परत्वसिद्धिरित्याह । वाक्यमिति । न किरिन्द्र इत्यस्य चस्यादित्यादिषु त्वदुत्तरो नास्तीति यथार्थ्यसिद्धिः एक एव रुद्रो न द्वितीयोऽवतस्थे इति इदमपि तपस्त्यपशुविशेषद्वितीयानन्वयपरमिति मीमांसाभाष्यकारादिभिर्व्याख्यातम् । एवमीदृशवाक्यान्तराणि यथार्हं नेतव्यानि । यस्तु नमस्कारमुन्ना बहुप्रदेशबहुवाक्यप्रतिपन्नतया तत्तद्वरप्रदानविशेषैश्चान्यच क्वचित्तत्परत्वं शङ्कते तम्प्रत्याह । अन्याकूतैरिति । नमस्कारस्तावत् बाधभीत्या सान्त्वनाभिप्रायेण लोकवद्वेदेऽपि दृष्टः नमस्ते अस्तु मा मा हिंसीरिति, तद्वयस्त्वञ्च भीतिभूयस्त्वादेरपि स्यात्, अस्ति च तेषुतेषु देवताविशेषेषु नमस्कारस्तद्वमा बहुप्रदेशपाठादिकमतिशयितापदानञ्च । अतो नैतेरेकः परः स्यात् सर्वेषाञ्च सर्वस्मात् परत्वं व्याख्यानदुःस्थमिति भावः ॥ ९ ॥

नन्ववतारेषु भगवतश्चास्त्रार्थानुष्ठानं तत्फलभोगश्च श्रुतिस्मृतिषु बहुधा दृश्यते अतस्तस्यापि कर्मवश्यत्वं स्यादित्यत आह । धर्माणामिति ॥

मू० धर्माणां स्थापनार्थं स्वयमपि भजते शास्त्रि-
ता शासनं स्वं स्वस्यापि प्रत्यवायानभिन-
यति न्टणां पापभीतिं विधित्सुः । शुद्धिस्त्वे-

च्छावतारैर्भजति सुलभतां तावतोत्पत्त्य-
नुक्तिः प्रोक्तो विष्णुश्रियखायामपि हि स
पुरुषः प्राप्ततारार्द्धमात्रः ॥ १० ॥

तदेतत् न मे पार्थाऽस्ति कर्तव्यं, धर्मसंस्थापनार्थायेत्यादिभिस्त्विदं यद्यपि जनितेन्द्रस्य जनितोत विष्णोरित्येतत्प्रीवानद्रव्यप्रयंसार्थे तथाऽप्यथर्वशिखायां ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते इति ब्रह्मादेरिव भगवतोऽपि प्रसूतिः श्रूयते अतस्तदतिरिक्तं कारणान्तरं ध्येयतयोच्यत इत्यत्राह । शुद्धेरिति । अकर्महेतुकेरप्राकृतेरित्यर्थः । सौलभ्यार्थावतारानुवादस्तस्यैव सर्वकारणस्य ध्येयत्वविधानार्थमिति भावः । तत्रैव प्रणवनिरूपणं स्वार्थस्थापनं व्यनक्ति । प्रोक्त । इति । प्रणवस्य तिसृणाम्मात्राणां वर्णभेदांस्त्रिमूर्तिदेवतात्वञ्चोक्त्वा तस्य चतुर्थ्या अर्द्धमात्रायास्सर्ववर्णत्वं पुरुषदेवताकत्वञ्चोक्तं स च पुरुषस्सृष्टिस्थित्यन्तकरणीमित्यादावुक्त एव जनार्दनः तस्य हैतस्य पुरुषस्य रूपं यथा महारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोप इत्यादिना च पुरुषस्य सुवर्णवर्णविग्रहः श्रुतः भारतादौ च विश्वरूपादिविग्रहे व्यक्तमेतत् ।

भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधिश्च वर्तेते वासुदेवे सनातने ॥

इति च स्मर्यते इति ॥ १० ॥

उक्तस्यार्थस्यानन्यथासिद्धस्थापकभूयस्त्वमाह । आद्यमिति ।

मू० आद्यं रामायणं तत्र च निगमगणे पञ्चमः पञ्चरात्रं सत्त्वोपज्ञं पुराणम्मनुमुखमुनिभिर्निर्मितं धर्मशास्त्रम् । त्यक्ताऽन्यो मूलवेदः कठ-

Digitized by Google

परिपठिता वल्लिकास्तापनीयं सौबालब्रह्म-
बिन्दुप्रभृतिकमपि नस्तत्परं तत्परत्वे ॥ ११ ॥

मानवादिभ्योऽपि पूर्वमित्यर्थः । तदिति परिग्रहप्रसिद्धिव्यञ्जनं, स चेत्यपि तथैव निगमगणे पञ्चमत्वं च वेदानध्यापयामास महाभारतपञ्चमानिति प्रदर्शितं, पञ्चरात्रस्य कात्स्न्र्येन प्रामाण्यं च महाभारतादिप्रसिद्धं शारीरके* स्थापितं च सत्त्वेन गुणेनादिभूतेन उपज्ञायमानत्वात् सत्त्वोपज्ञं वैष्णवादिपुराणं तेन मात्स्यादिषु विभक्तराजसतामसेभ्यः प्राबल्यं सूच्यते । मनुमुख्यमुनिभिरित्यनेन मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यत इत्युक्तं मानवप्राबल्यं व्यज्यते त्यक्ताऽन्यः परित्यक्तदेवतान्तरतद्धर्मः मूलवेदः अनन्यधर्ममूलभूतो वेदभागः कठवल्लीषु—विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति प्राप्यविशेषदर्शनात्तासु पुरुषादिशब्दोक्त उपास्यो विष्णुरेवेति युक्तम् । तापनीयोपनिषत्तु नृसिंहरूपभगवदवतारैकविषया । सुबालोपनिषच्च नारायणस्यैव परत्वं बहुधा प्रपञ्चयति ब्रह्मबिन्दूपनिषदप्यहं वासुदेव इत्यहंग्रहोपासनदर्शनाद्वासुदेवविषया प्रभृतिशब्देन नारायणोपनिषदादिसङ्ग्रहः तत्परत्वे तत्परं भगवत्पारम्ये प्रधानाभिप्रायवदित्यर्थः ॥ ११ ॥

तथाभ्युच्चययुक्तिमाह । मध्यस्थोक्तिरिति ॥

मू० मध्यस्थोक्तिर्विरुद्धे परमहिमपरे तत्र तत्रै-
तदुक्तिर्व्यक्तान्तास्ते विचित्राः स्वमतमभि-
हितं देवतातत्त्वविद्भिः । वैषम्यं शिल्पशा-
स्त्रप्रभृतिषु विविधं वैदिकस्वीकृतत्वं प्रज्ञा-

* वेदान्तद्वितीयाध्याये द्वितीयपादान्तस्याधिकरणसूत्रैः ।

Digitized by Google

संस्कारभाजां भवति भगवति स्वप्रधाने प्रमाणम् ॥ १२ ॥

राजसादिपुराणान्यतमेन सात्त्विकपुराणे विरुद्धे तदुभयमध्यस्थपुराणान्तरोक्तिसंवादान्निर्णयः स्यात् ब्रह्मरुद्राद्येकैकमहिमतत्परे च पुराणे बहुषु प्रदेशेषु भगवत्पारम्यं दृश्यते रक्त*दुष्टयोरपि दोषगुणोक्तौ प्रत्ययि†तत्त्वमाहुः । वृत्तान्ताः क्रान्त्वा निगीर्य पुनरुद्गिरतीत्या‡दिभिस्सङ्गृहीताः । देवतातत्त्वविद्भिः पराशरपा§राशर्य्यादिभिः विष्णोस्सका‖शादुद्भूतम् । आलोड्य सर्वशा¶स्त्राणि । सत्यं स**त्यं पुनस्सत्यमित्यादिभिः स्वमतमभिहितं शिल्पशास्त्रे च परावरभावेन वैषम्यं दृश्यते तत्र ह्युत्तममध्यमाधमविमानानि अधिकृत्योक्तम् ।

स्यान्नागरद्राविलवेसरस्तु क्रमेण वै सत्त्वरजस्तमांसि ।
महीसुरोर्वीपतिवैश्यकास्ते हरिर्विधाता हर आदिदेवः ॥ इति ।
विष्णोरन्ये राध्यमाना न साक्षाच्छीकरास्सुराः ।
सर्वदेवास्पदे विष्णौ धिष्ण्यं†† संपत्सुखावहम् ॥

इति । प्रभृतिशब्देनायुर्वेदादिसङ्ग्रहः पठ्यते हरिं हरीतकीञ्चैवेत्यादि ज्योतिषे च धन्यन्तदेवल‡‡ग्नमित्यादि वैदिकस्वी-

* रक्तोऽनुकूलः । दुष्टः प्रतिकूल इत्यर्थः, रक्तेन दोषोक्तौ दुष्टेन गुणोक्तौ प्रामाण्यावधारणमित्यर्थः ।

† विश्वसनीयत्वमित्यर्थः ।

‡ बालुवन्धाऽस्तवे संगृहीतोऽयं श्लोकः ।

§ पाराशर्यो व्यासः ।

‖ जगत्तत्रैव च स्थितम् । स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ।

¶ विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ।

** भुजमुत्थाप्य चोच्यते । न वेदात्परं शास्त्रं न देवः केशवात्परः ।

†† स्थानं धिष्ण्यं तच्च विष्णौ समर्पितं सर्वसुखसाधनमित्यर्थः ।

‡‡ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

Digitized by Google

चत्वारोपि पक्षा दुष्टाः, अथापरः पक्षः, अङ्गेन देविकादिभिश्चाचामादिर्विशेष्यते, अङ्गस्याचामादेराकारो भवति स चेद्देविकादीनां संबन्धी भवतीति, अत्र पक्षे केवलेषु तदादौ चाङ्गे नास्ति दोषः, नापि सौदेविकमित्यत्र पूर्वपदस्योत्तरपदस्य वा प्रसङ्गः किं तु प्राग्ग्रामे पूर्वशांशप इत्यादावुत्तरपदभूतानां देविकादीनामाकारो न स्यात्, नैष दोषः, प्राचां ग्रामनगराणामित्यत्रैतदनुवर्तिष्यते । तत्र च वाक्यभेदेन संबन्धः, प्राचां ग्रामनगराणामुत्तरपदस्याचामादेरचो वृद्धिर्भवति । देविकादीनामुत्तरपदानामचामादेराकार इति, अयमपि वृत्तिकारस्य पक्षो न भवति, यद्ययं पक्षो ऽभविष्यत् उत्तरपदवृद्धावप्येतदनुवर्तिष्यतइत्येवावक्ष्यत् ।

कस्तर्हि वृत्तिकारस्य पक्षो ऽ[1]यमभिधीयते ।
परिभाषेयमान्तर्यपरिभाषापवादिनी ॥
देविकादेरचामादेर्यत्र वृद्धिः प्रसज्यते ।
तत्रोपतिष्ठते, तेन सर्वमिष्टं प्रसिध्यति ॥

इति । अनारभ्यमाणे एतस्मिन्देविकादीनामादेरचो वृद्धिर्भवन्ती स्थानेन्तरतमवचनादैकारः प्राप्नोति, तदपवादेनाकारः प्राप्यते, तत्राङ्गं भवतु देविकादयः पूर्वपदमुत्तरपदं वा सर्वथा यत्र देविकादीनामचामादेरचो वृद्धिप्रसङ्गः तत्राकारो भवतीति परिभाष्यते । ननु च अङ्गस्येति वर्त्तते, सत्यं, नैवमस्याभिसंबन्धः, अङ्गस्याचामादेराकारो भवति स चेद्देविकादीनां संबन्धीति, किं तर्हि देविकादीनामचामादेराकारो भवति स चेदङ्गस्य संबन्धीति, अथैवमभिसंबन्धे किं व्यावर्त्यं, न किं चित्, अनुवृत्तस्य तु संबन्धो वक्तव्य इत्येतावत् । 'साप्याकार एव भवतीति' । उक्तोत्र हेतुः । 'वहीनरस्येति' । वहोऽस्यास्तीति वही, वही चासौ नरश्चेति वहीनरः, अन्येषामपि दृश्यतइति दीर्घत्वम् । 'वैहीनरिरिति' । अत्राकारवृद्धिः प्राप्ता इकारेण बाध्यते, तस्य त्वैकारवृद्धिर्भवत्येव, नहि तस्यां नाप्राप्तायामिकारो विधीयते, एवं च कृत्वा सूत्रेप्यकार एव विधेयस्तस्याकारवृद्धौ सिद्धमिष्टं तथा तु न कृतमित्येव । 'वो विस्त्विति' । विहीनो नरो विहीनरः, पृषोदरादित्वाद्वशब्दस्य लोपः ॥

[1] योयमधीयते इति १ पु० पा० ।

"केकयमित्रयुप्रलयानां यादेरियः" ॥ 'लौकिकं हि तत्र गोत्रं गृह्यत इति'। मित्रयुशब्दो ऽभेदोपचारात्तदपत्यसंताने यदा वर्तते न परं प्रकृतावेव तदेवमुच्यते, यदा तु गृष्ट्यादिभ्यष्ठञो यस्कादित्वाद् बहुषु लुक् क्रियते तदा पारिभाषिकेऽपि गोत्रे न दोषः, अत्र यद्यपि वृद्धिप्रसङ्गे य-मादेश उच्यते तथापि वृद्धिर्न बाध्यते विषयभेदात्, अचामादेर्वृद्धिः, यादेरियादेशः, अङ्गं तूभयोर्विशेषणं न कार्यं ॥

"न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्" ॥ अत्रार्थद्वयविधानाद्वाक्यभेदस्तस्यैव द्योतकस्तुशब्दः, पूर्वावित्यनेन संबन्धादैचाविति प्राप्ते एकवचनं सौत्रं, वृत्तौ तु क्रियाविशेषणत्वा[१]देकवचनम्। 'ताभ्यां तु पूर्वमिति'। 'ऐजागमो भवतीति'। टित्त्वाद्यागमलिङ्गाभावेऽपि पूर्वशब्देन देशविशेषे भवन्नागम इत्युच्यते, आगच्छतीत्यागम इति। 'वैयसनमिति'। गतिकारकोपपदानां प्राक् सुबुत्पत्तेः समास इत्युत्तरपदविषयमित्यवोचाम, तेन वैयसनादिषु य्वोः पदान्तत्वं, स्वश्वशब्दः शिवादिः। 'याष्टीक इति'। शक्तियष्ट्योरीकक्, ननु चात्राचामादेः स्थाने यो य्वौ ताभ्यामित्याश्रयणादेव न भविष्यति, तत्राह। 'यत इम[२]इति'। इण् गतौ, लटः शत्रादेशः, शपो लुक्, इणो यण्, इहासत्यपि प्रतिषेधे वैयसनमित्यादौ व्यसन अ इति स्थिते वृद्धिश्च प्राप्नोति ऐजागमश्च, तत्र वृद्धिरनित्या शब्दान्तरप्राप्तेः, सा ह्यैचि कृते तस्यैव प्राप्नोति तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्, ऐजागमस्तु नित्य इति स एव तावद्भवति, तत्र कृते यद्यपि पुनः प्रसंगविज्ञानाद् वृद्धिस्तथाप्यान्तर्यत ऐकारस्यैकार औकारस्यौकार इति न कश्चिद्दोषः किं प्रतिषेधेन। नन्वसति तस्मिन्वैयाकरणी भार्या अस्य वैयाकरणभार्य इति वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः स्यात्, सति तु प्रतिषेधे न भवति, कथं न भवति, यावता वृद्धेर्निमित्तं अणका यस्मिंस्तद्धितइति बहुव्रीहिः, विद्यते चात्र णकारः,

१ क्रियाविशेषणत्वान्नपुंसकैकवचनमिति इ॰ पु॰ पा॰।

२ मुद्रितमूलपुस्तके यतेश्छात्रा याता इति पाठः स पदमञ्जर्यसंमतः, यत इमे छात्रा इति पाठस्तु युक्तः।

Digitized by Google

सत्यं, विद्यते, निमित्तं तु न भवति, कुर्वद्रूपे हि निमित्तशब्दो मुख्य इत्युक्तं, ननु च मा भूत्तद्धितेष्वचामादेरित्यस्या वृद्धेर्निमित्तं य एव त्वसौ यित्तद्धिताश्रय ऐज्विधीयते तस्यैव वृद्धिसञ्ज्ञकस्य निमित्तं याकार इति स्यादेव पुंवद्भावप्रतिषेधः, उच्यते, नहि वस्तुतो या वृद्धिस्तस्या यन्निमित्तं अकारादिस्तद्वति प्रतिषेधः किं तर्हि वृद्धिरित्येवं या विधीयते तन्निमित्ते, अतः पुंवद्भावप्रतिषेधनिवृत्त्यर्थं वृद्धेः प्रतिषेधो वक्तव्य एव, न वक्तव्यः, एकस्मिन्नङ्गे विशेषविहितावैचौ सामान्यविहिताया वृद्धेर्बाधकौ भविष्यतः, सत्यपि सम्भवे बाधनं भवतीति न्यायात्, ततश्च पूर्ववत्पुंवद्भावप्रतिषेधो न भविष्यतीति य्वाभ्यां पूर्वमैजित्येवास्तु, नार्थः प्रतिषेधेनेत्यत आह। 'प्रतिषेधवचनमिति'। प्रतिषेधवचने सति याभ्यां य्वाभ्यां परस्य वृद्धिः प्राप्ता प्रतिषिध्यते, ताभ्यामेव पूर्वावैचौ भवत इत्यर्थो भवति, असति हि तस्मिन् यौ कौ चन य्वौ गृह्येयातां, तस्मादैचोर्विशिष्टो विषयः प्रक्लृप्तो यथा स्यादित्येवमर्थं प्रतिषेधवचनं क्रियत इत्यर्थः। 'दाध्यश्विमाध्वश्विरिति'। दधि प्रियो ऽश्वो यस्य स दध्यश्वः, एवं मध्वश्वः, ताभ्यामत इञ्। ननु वाचामादेरित्यनेन य्वौ विशेषयिष्यामः, अचामादेरचः स्थाने यौ य्वाविति, एवमपि द्वे अशीती अधीष्टः, तद्धितार्थ इति समासः, तमधीष्ट इति प्राग्वतेष्ठक्, द्व्याशीतिकः, अत्र प्राप्नोति। सति तु प्रतिषेधे तद्धितेष्वचामादेरित्यनुवृत्तेर्याभ्यां परस्य तद्धितेष्वचामादेरिति वृद्धिः प्राप्ता प्रतिषिध्यते, ताभ्यामिति विज्ञायते, अत्र तु संख्यायाः संवत्सरसंख्यस्य चेत्येवमुत्तरपदवृद्धिर्विधीयत इति तस्या निषेधाभावादैजागमाभावः सिद्धः। स्यादेतत्। अचामादेरित्यनुवृत्तं स्वरूपपरं सद्वृद्धेर्विशेषणम्, अचामादेरित्येवं या वृद्धिस्तस्याः प्रसङ्गे तदपवादो य्वाभ्यां पूर्वमैचौ भवत इत्यर्थः, इह तु नैवं वृद्धेः प्रसङ्ग इत्यैचौ न भविष्यत इति। एवमपि य्वावविशेषितौ स्यातां, ततश्च दाध्यश्वादौ प्रसङ्गः। न च सकृच्छ्रुतमचामादेरित्येतदेवोभयं विशेषयितुमर्हति येनाचामादेः स्थाने य्वौ ताभ्यां पूर्वावैचौ भवतः, सति तस्मिन्नचामादेरित्येवं वृद्धेः प्रसङ्ग इत्याश्रयणाच्च क्वापि दोषः स्यात्, न च तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणे

Digitized by Google

प्रमाणमस्ति, तस्मात्सुष्ठूक्तं प्रतिषेधवचनमैचोर्विषयप्रक्लृप्त्यर्थमिति । 'उत्तरपदवृद्धेरपीति'। एतच्च तत्रास्याधिकाराल्लभ्यते । 'यत्र त्विति'। एतदप्युत्तरपदेन य्वोर्विशेषणाल्लभ्यते, उत्तरपदस्य यौ य्वौ ताभ्यां परस्य वृद्धिर्न भवति ताभ्यां च पूर्वमैजागम इति । इह इश्च अजश्च यजौ, उश्च अजश्च वजौ, तयोरिदं ऐयजम्, औवजमिति, ऐचोरभक्तत्वादतन्मध्यपतितत्वाच्चाङ्ग्रहणेनाग्रहणादैयजीयमौवजीयमित्यादौ शेषनिघातो न स्यात्, शेषविवक्षायां च वृद्धाच्छो न स्यात्, प्रातिपदिकस्यावृद्धत्वात्, उच्यते । यद्येवंविधमभिधानमस्ति ततः पूर्वशब्द आवर्तयितव्यः, तत्रैको ऽवयववचनः, अपरो व्यवस्थावचनः, य्वाभ्यां पूर्वावैचौ भवतस्तौ चाङ्गस्यावयवाविति, अत्र संग्रहश्लोकौ ॥

नाप्राप्तायां हि वृद्धेः प्रतिपदविधिरैज्बाधको नञ् किमर्थो,
याभ्यां य्वाभ्यां परस्यैच् प्रसजति तत एवैव पूर्वौ यथा स्यात् ॥
मा दाण्ड्यश्वादिके भूदिति ननु विहितौ यावचां स्थानआदे-
र्य्वौ ताभ्यामैजिहैवं न भवति इति चेद् द्वे अशीती अधीष्टे ॥ १ ॥
स्यादैज् द्व्याशीतिकेऽङ्गात्स्वच इति विहितस्यैव ऐच्त्वेत्यसङ्गा-
द्व्यौ न स्यातां विशिष्टौ श्रुतमपि च सकृच्चोभयं भेत्तुमर्हम् ।
स्यादेतस्योत्तरत्राप्यधिकृतिरिह च य्वोः पदस्योत्तरस्यै-
वं पूर्वत्रैयलिन्दे भवति न च भवेद् द्वे अशती अधीष्टे ॥

"द्वारादीनां च" ॥ 'दौवारिक इति'। तत्र नियुक्त इति ठक् ।. 'द्वारपालस्येदं दौवारपालमिति'। सञ्ज्ञापूर्वको विधिरनित्य इति वृद्धलक्षणश्छो न भवति, कलापिनोऽणित्यत्राणग्रहणस्याधिकविधानार्थत्वाद्वा । कथं पुनर्द्वारशब्दस्य पाठे द्वारपालशब्दस्य विधिरयं भवति, तत्राह । 'तदादिविधिश्चात्र भवतीति'। अत्र च कारणं दैविकादिसूत्र एवोक्तं, ज्ञापकं चात्र वक्ष्यति । 'सौवरोध्याय इति'। स पुनः शन्तनुप्रणीतः, फिषित्यादिकं, सौवर्यः स्वप्तम्यस्तदन्तसप्तम्य इति भाष्ये । 'शोभनोध्यायः स्वाध्याय इति'। स्वाङ्गत्र मध्ये प्रक्षेप्तव्यः, अन्येषामपि दृश्यत इति वा उत्तरपदादेर्दीर्घत्वम् । 'एवमपीत्यादि'। यद्यत्र स्वशब्दः पठ्यते किमा-

Digitized by Google

यातं स्वाध्यायशब्दस्य तत्राह । 'तद्धादावपि हीति' । स्वार्थिकस्वा-भाविकादयस्तु भाष्यप्रयोगात्साधवः । 'स्फैयकृत इति' । चाषित्वादण् । 'शौवादंष्ट्रो मणिरिति' । शुनो दन्तदंष्ट्रेति दीर्घत्वं पूर्ववदण् ॥

"न्यग्रोधस्य च केवलस्य" ॥ 'नैयग्रोध इति' । नीचैर्गतो परोहैर्वर्द्धु-तइत्यर्थः । 'अव्युत्पत्तिपक्षे तु विध्यर्थमिति' । अपदान्तत्वाद्यकारस्य । अथास्मिन्नपि पक्षे केवलग्रहणं किमर्थं, यावता न्यग्रोधस्येत्युच्यते, तत्र कः प्रसङ्गो यत्तदादौ स्यात् । ज्ञापनार्थं तु । एतज्ज्ञापयति, अस्मिन्प्रकरणे यान्युपात्तानि तानि तदादिवृद्धिभाजोऽचो विशेषणानीति ॥

"न कर्मव्यतिहारे" ॥ 'कर्मव्यतिहारे यदुक्तमिति' । यदस्मिन्प्र-करणे उक्तं तत्कर्मव्यतिहारे न भवतीत्यर्थः ॥

"स्वागतादीनां च" ॥ व्यावक्रोशीत्यादौ व्यवपूर्वो धातुः कर्म-व्यतिहारे दृष्ट इति व्यवहारशब्दोऽपि कर्मव्यतिहारे वर्तते, ततश्च पूर्वयो-गात्र सिद्धेरत्रास्य पाठोऽनर्थक इत्याशङ्क्याह । 'व्यवहारशब्दोऽयमिति' । 'द्वारादिषु स्वशब्दस्य पाठादत्र प्रसङ्ग[1] इति' । तदादेरपि तत्र ग्रहणं भवतीत्युक्तमेव ॥

"श्वादेरिञि" ॥ 'तत्र चेत्यादि' । यदि तत्र तदादिविधिर्न स्यात् एतद्वचनमनर्थकं, कथं, केवलश्वन्शब्दो द्वारादिषु पठ्यते तत्र कः प्रसङ्गो यत्तदादेः स्यात् । 'तदादिविधिर्भवतीति' । अस्मिन्प्रकरणे यदुक्तं तद्वृद्धिभाजोऽचो विशेषणमित्यस्मिन्नर्थे ज्ञापकमित्यर्थः । 'इकारादि-ग्रहणं चेत्यादि' । श्वादेरितीति वक्तव्यमित्यर्थः । तत्र वर्णग्रहणे सप्त-मीनिर्देशात्तदादिविधिः । 'श्वागणिक इति' । श्वगणाट्ठञिति ठञ् । 'तद-न्तस्येति' । इञन्तस्य । 'श्वाभस्त्रमिति' । इञश्चेत्यण्, तन्निमित्तो वृद्धिप्र-तिषेध ऐजागमश्च भिन्नकर्तृत्वादशक्य इञाश्रयेण प्रतिषेधेन निवारयितु-मिति वचनारम्भः ॥

"उत्तरपदस्य" ॥ उत्तरत्राचामादेरित्यनुवृत्तेरुत्तरपदस्याचामादे-र्वृद्धिर्विदितव्या, ननु चावयवावृत्तेरित्यादौ अवयवादित्यादिका पञ्चमी,

[1] प्राप्तिरिति मुद्रितमूल पु॰ पाठः ।

Digitized by Google

तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति, अत आह। 'यत्रेति'। आदिप[1]देन हृद्भगसिन्ध्वन्ते पूर्वपदस्य च, अनुशतिकादीनां च, देवताद्वन्द्वे चेत्येतेषां ग्रहणम्, एषु योगेषु पञ्चमीनिर्देशाभावादसत्यस्मिन्नधिकारे ऽकृस्याचामादेरचो वृद्धिः स्यात् नोत्तरपदस्य, वचनं तु नियमार्थं स्यात्, जएव प्रोष्ठपदानां नान्यत्र, प्रोष्ठपदानामेव वा जइति, वचनसामर्थ्याद्वा पूर्वपदस्यैवानाद्यचो वृद्धिविधानार्थं स्यात्, तस्मादेतदर्थमेवायमधिकारः कर्त्तव्यः, किमिदानीं पञ्चमीनिर्देशेष्वस्यानुयोग एव, नेत्याह। 'पञ्चमीनिर्देशेष्वपीति'। 'वृद्धेश्च व्यपदेशार्थमिति'। उत्तरपदाधिकारे विहिता या वृद्धिरिति व्यपदेशो यथा स्यादित्येवमर्थमित्यर्थः। क्व पुनरेवंविधेन व्यपदेशेन प्रयोजनमित्यत आह। 'उत्तरपदवृद्धौ सर्वं चेत्यत्रेति'। सर्वभासः सर्वकार इत्यादौ माभूदित्येवमर्थं तत्रैवमाश्रितम्॥

"अवयवादृतोः"॥ 'ऋतोर्वृद्धिमद्विधावित्यादि'। ऋतोः ऋतुवाचिनः शब्दाद्वृद्धिमद्विधौ वृद्धिनिमित्ते प्रत्यये विधीयमाने तदन्तविधिः, ऋतुशब्दान्तादपि प्रत्ययो भवतीत्यर्थः। किं सर्वत्र, नेत्यत आह। 'अवयवादिति'। अवयववचनात्परो यदा ऋतुवचनस्तदेत्यर्थः। ये त्ववयवानामिति षष्ठीबहुवचनान्तं पठन्ति तेषां न समीचीनोऽर्थः। तथा च सुसर्वार्द्धदिक्शब्देभ्य इति पञ्चम्या निर[2]्देशि। 'पूर्वासु वर्षासु भव इति'। तद्धितार्थ इति समासः, अन्ये त्वदिक्शब्दत्वाद्विशेषणसमासं मन्यन्ते। अथात्रापि तदन्तविधिना वर्षाभ्यष्ठगेव कस्मान्न भवत्यत आह। 'अवयवपूर्वस्यैव हीति'॥

"सुसर्वार्द्धाज्जनपदस्य"॥ 'जनपदवाचिन इति'। स्वरूपग्रहणं तु न भवति, उत्तरसूत्रे मद्रप्रतिषेधात्। 'सुसर्वार्द्धेत्यादि'। जनपदवाचिनः शब्दस्यानन्तरे प्रत्यये विधीयमाने तदन्तस्यापि ग्रहणं भवति, यदि सुप्रभृतिभ्यः परः सम्भवतीत्यर्थः॥

१ शब्देनेति १। २। पु॰ पा॰।
२ निर्देशइति १-२-पु॰ पा॰।

Digitized by Google

"दिशोऽमद्राणाम्" ॥ 'पूर्वपाञ्चालक इति'। तद्धितार्थे समासः। 'पौर्वपञ्चालक इति'। अवयववाच्यत्र पूर्वशब्दः, एकदेशिसमासाद्वुञ्प्रत्ययः। अदिक्शब्दत्वादादिवृद्धिरेव भवति, यद्येवं वुञापि न भवितव्यमदिक्शब्दत्वादेव, अस्त्यत्र विशेषः, सुसर्वार्द्धाद्दिक्शब्देभ्य इति तदन्तविधौ शब्दग्रहणं क्रियते दिशि दृष्टः शब्दो दिक्शब्द इत्येवं यथा विज्ञायेत, वृद्धिविधौ तु दिश इत्येतावदुच्यते, अन्ये त्वणन्तमेव प्रत्युदाहरणं पठन्ति ॥

"प्राचां ग्रामनगराणाम्" ॥ प्राचामिति नाचार्यनिर्द्देशः, जनपदादिभिर्द्देशैः साहचर्यात्। 'पूर्वेषुकामशम इति'। पूर्वा चासाविषुकामशमी चेति दिक्संख्ये सञ्ज्ञायामिति समासः, ततो भवार्थे दिक्पूर्वपदादसञ्ज्ञायां ञ इति ञप्रत्ययः। 'पूर्वपाटलिपुत्रक इति'। पूर्ववत्समासः, रोपधेतोः प्राचामिति वुञ्, यद्यप्येकमेव पाटलिपुत्रं तथापि पाटलिपुत्रस्यैकदेशे पाटलिपुत्रशब्दस्य वृत्तेः पूर्वत्वविशेषणं युक्तमेव, जना यत्र सन्ति स ग्रामः, ततश्च नगरमपि ग्रामः, ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नगरेपि न क्रियन्ते, तद्यथा अभक्ष्यो ग्रामकुक्कुट इति सुतरां नागरोपि न भक्ष्यते, ग्रामे नाध्येयमिति साधीयो नगरेपि नाधीयते। शास्त्रेपि, उदीच्यग्रामाच्च बह्वचोन्तोदात्तात्, वाहीकग्रामेभ्यश्च, दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु, नगरमपि गृह्यते, तस्मादिहापि नार्थो नगरग्रहणेनेत्यत आह। 'ग्रामत्वादेवेति'। 'सम्बन्धभेदप्रतिपत्त्यर्थमिति'। अङ्गस्येति प्रकृतम्, उत्तरपदस्येति च, तत्र ग्रामाणामित्येतदङ्गस्येत्यनेन सम्बध्यते ग्रामवाचिनामङ्गानामिति, नगराणामित्येतदुत्तरपदस्येत्यनेन नगरवाचिनामुत्तरपदानामिति। न चायं सम्बन्धभेदः, सकृदुपात्ते ग्रामशब्दे सम्भवति तस्मान्नगरग्रहणं क्रियते, तत्र दिक्पूर्वपदो ह्रीत्यादिना सम्बन्धभेद आश्रयणीय इत्यत्र हेतुर्द्दर्शितः। तत्रेत्यादिना तु स एव सम्बन्धभेदः। इह पूर्वेषुकामशम इति समसनक्रियानन्तरं पूर्वोत्तरपदयोर्गुणः प्राप्नुवन्नन्तरङ्गः, उत्तरपदवृद्धिस्तु पश्चादुपनततद्धितापेक्षत्वाद्बहिरङ्गा, तत्र गुणे कृते पूर्वोत्तरयोर्व्यपवर्गाभावाद्वृद्धिर्न प्राप्नोति, अन्तादिवद्भावोप्युभयत

Digitized by Google

आश्रयणे प्रतिषिद्धः, अत्र हि दिग्वाचि पूर्वपदमुत्तरपदं च युगपदाश्रीयते तत्राह । 'पूर्वेषुकामशम इत्येवमादिष्विति' । यथा नेन्द्रस्य परस्येति ज्ञापकं तथा तत्रैव वक्ष्यामः ॥

"संख्यायाः संवत्सरसंख्यस्य च" ॥ संवत्सरश्च संख्या च संवत्सर-संख्यं, समाहारद्वन्द्वः । 'द्विसांवत्सरिक इति' । प्रभवतेष्ठञ्, तस्याध्यर्ध-पूर्वेति लुङ्न भवति, अनार्हीयत्वात् । 'द्विषाष्टिक इति' । ननु तमधी-ष्टो भृत इत्यत्र कालादिति वर्तते, तत्कथं द्विषष्ट्यादिशब्देभ्यः प्रत्यय इत्यत आह । 'द्विषष्ट्यादिशब्द इति' । [1]कालवृत्तिः शब्दस्तत्र गृह्यते न मासादय एवेति भावः । ननु च परिमाणान्तस्यासञ्ज्ञाशाणयोरित्यत्र परिच्छेदहेतुत्वमात्रं गृह्यते न त्वारोहतः परिणाहतश्च येन मीयते तदेव प्रस्थादि, अन्यथा शाणप्रतिषेधोऽनर्थकः स्यात्, कालश्चापि परिच्छे-दहेतुर्भवत्येव, ततश्च संवत्सरग्रहणमनर्थकं परिमाणान्तस्येत्येव सिद्ध-त्वादित्यत आह । 'संवत्सरग्रहणमिति' । 'द्वैसमिक इति' । अधी-ष्टादिषु समायाः खः, द्विगोर्वेति पक्षे ठञ्, न केवलं वृद्धिविषय-मेव ज्ञापकं किं तर्हि सार्वत्रिकमित्याह । 'द्विवर्षा माणविकेति' । द्वे वर्षे भूता इति पूर्ववट्ठञ्, तस्य वर्षाल्लुक्, चित्तवति नित्यमिति लुक् । 'पर्युदासो न भवतीति' । प्रतिषेधस्य, तेन प्रतिषेध एव भवति, अथ संख्याग्रहणं किमर्थं, यावता संख्ययापि परिच्छिद्यते, तत्र परिमा-णान्तस्येत्येव सिद्धं, केचिदाहुः । संख्याग्रहणमपि ज्ञापकार्थमेव परिमाणग्र-हणेन संख्यापि न गृह्यत इति, तथा चापरिमाणबिस्ताचितेत्यत्र वृत्तावुक्तं, कालः संख्या च परिमाणं न भवति । द्विवर्षा त्रिवर्षा द्विशता त्रिश-तेति । अपर आह, साक्षाच्छिष्टेन निमित्तभावेनानुमितं कार्यित्वं मा बाधीति परिमाणात्पूर्वमिह संख्याग्रहणं कृतमिति ॥

"वर्षस्याभविष्यति" ॥ 'यस्येत्यादि' । यस्य यियत्नोद्योगवशोद्या-रभ्य त्रीणि वर्षाणि धान्यं भावि तावन्तं कालं जीवनाय पर्याप्तं स सोमयागे-ऽधिकारी न न्यून इत्यर्थः । 'गम्यते हीति' । वाक्यार्थस्तत्र भविष्यत्ता न पदार्थे

१ कालवृत्तिशब्दः कालशब्द इति दे पु· पा· ।

इत्यर्थः । 'द्विवार्षिको मनुष्य इति' । वर्षाल्लुक्, चित्तवति नित्यमिति नित्यं लुङ्ग भवति, भूतार्थएव हि स इष्यते, अन्यत्र चित्तवत्यपि विकल्प एव ॥

"परिमाणान्तस्यासञ्ज्ञाशाणयोः" ॥ 'द्विकौडविक इति' । कुडेरवप्रत्यये कुडवः प्रस्थचतुर्थभाग इत्युणादिषु व्युत्पत्तिः, कुडवमित्येतदव्युत्पन्नं शब्दान्तरं द्रष्टव्यं, ततः प्राग्वतेष्ठञ्, अनार्हीयत्वाल्लुगभावः । 'द्वाभ्यां सुवर्णाभ्यामिति' । शाणप्रतिषेधात्परिच्छित्तिसाधनमिह परिमाणं तेनोन्मानस्यापि भवति, लोहिनी गुञ्जा, ताभिः पञ्चभिः परिमितमाकारविशेषयुक्तं हिरण्य पाञ्चलोहितिकं कलापः, कोशी धान्यविशेषः । 'योगविभागेनेति' । पूर्वासु वृत्तिषु तदस्य परिमाणं संख्यायाः सञ्ज्ञेत्येकयोगेन पठितत्वाद्भाष्ये तत्र योगविभागस्योक्तत्वादेवमुक्तम्, । 'तद्धितान्तस्यायमिति' । यथा त्वध्यर्धपूर्वद्विगोरित्यत्र वार्तिकं तथा तद्धितलुकि सति सञ्ज्ञेति तत्रैवावोचाम । 'द्वैशाण इति' । यद्यत्रोत्तरपदवृद्धिः स्यात् पूर्वपदस्य न स्यात्, कुलिजं धान्यमानम्, अन्तग्रहणं चिन्त्यप्रयोजनम् ॥

"जे प्रोष्ठपदानाम्" ॥ 'जइति जातार्थो निर्दिश्यतइति' । उपसरज इत्यादौ दृष्टस्य पदैकदेशस्य प्रयोगः, भीमसेनो भीम इतिवत् । 'बहुवचननिर्देशादिति' । यद्यपि ज्योतिषां बहुत्वाद्बहुवचनान्तप्रोष्ठपदाशब्दस्तथापि तस्यैव शब्दरूपापेक्षायामेकवचनं न्याय्यं मन्यते ॥

"हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" ॥ 'सुहृद इति' । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातितः सुहृच्छब्दः, यदा तु सुहृदयस्येदमिति पाठः, तदा हृदयस्य हृल्लेखेत्यादिना हृद्भावः । 'सौहार्द्यमिति' । वा शोकष्यञ्रोगेष्विति हृद्भावः, सिन्धवो जनपदः, नदीवचनस्यापि ग्रहणं, तथा समुद्रवचनस्यापि ॥

"अनुशतिकादीनां च" ॥ 'आनुशातिकमिति' । शतेन क्रीतं शतिकं, शताच्च ठन्यतावशतइति ठन्, अनुगतः शतिकेन अनुशतिकः, ततस्तस्येदमित्यण् । 'आनुहौडिक इति' । चरतीति ठक् । 'आनुसांवरणमिति' । तत्र च दीयते कार्यं भववदित्यण् । 'आनुसांवत्सरिकमिति' । बह्वचोन्तोदात्ताट्ठञ्, कुरुकतशब्दो गर्गादिः । 'सार्वलौकिक-

Digitized by Google

मिति'। लोकसर्वलोकाभ्यां ठञ्। 'सार्वभौमइति'। सर्वभूमिपृथिवीभ्यामणञौ, प्रयोगाधिदेवाधिभूतेत्यध्यात्मादयः। 'कुलटाया वेतीनङिति'। अपपाठोऽयं, तत्र हि स्वरूपग्रहणं, कल्याण्यादिषु परस्त्रीशब्दः पठ्यते, तस्मात्कल्याण्यादीनामिनङिति पाठः। 'चातुर्वर्ण्यमिति'। चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्, ताः पुनश्चतस्रो विद्याश्चत्वारो वेदाः॥

"देवताद्वन्द्वे च"॥ अग्निवरुणौ देवता अस्य आग्निवारुणम्, अग्निमरुतौ देवता यस्य आग्निमारुतम्, इद्वृद्धावित्यग्निशब्दस्य ह्रस्वम्। 'यो देवताद्वन्द्व इत्यादि'। यः सूक्तं भजते स्तुत्यतया स सूक्तसम्बन्धी, हविर्यस्मै निरुप्यते स हविःसम्बन्धी, अर्थद्वारकं चेदं द्वन्द्वस्य विशेषणम्। 'स्कान्दविशाख इति'। सास्य देवतेत्यण्। 'ब्राह्मप्रजापत्यमिति'। पत्युत्तरपदाद् ण्यः, ननु सास्य देवतेत्यत्र न जातिवचनो देवताशब्दः किं तर्हि यस्मै हविर्निरुप्यते या वा मन्त्रस्तुत्या सास्य देवता गृह्यते न चैवम्भूतोऽत्र द्वन्द्वार्थः, एवंभूतत्वे वा यथा तद्धिता भवन्ति तथायमपि विधिः प्राप्नोति। अत्राहुः। तद्धितः क्वचिदन्यत्रापि भवति त्रा देवतास्य त्रः[1] स्थालीपाक इति हि भाष्ये दृष्टमिति॥

"नेन्द्रस्य परस्य"॥ 'आग्नेन्द्रं सौमेन्द्रमिति'। अजाद्यदन्तमितीन्द्रशब्दस्य पूर्वनिपातो न भवति प्रायिकत्वात्तस्य। 'इन्द्रशब्द इत्यादि'। इन्द्रश्च मरुच्चेत्यादौ व्यञ्जनान्तेन सह [2]द्वन्द्वे इन्द्रशब्दस्य पूर्वनिपातेन भाव्यं, यथा ऐन्द्रामारुतौ मेढकामालभेतेति, वाय्विन्द्रावित्यादिकस्तु द्वन्द्वः सूक्तहविः सम्बन्धी न भवतीति भावः॥

"दीर्घाच्च वरुणस्य"॥ 'अत्र हीत्यादि'। उदाहरणेषु देवताद्वन्द्वे चेत्यानङि कृते दीर्घात्परो वरुणशब्दः॥

"प्राचां नगरान्ते"॥ 'प्राचां देशइति'। आचार्यग्रहणं तु न भवति, उत्तरसूत्रे विभाषितमिति वचनात्॥

१ यथा इन्द्रो देवता ऽस्यैन्द्र इत्यधिकम् इं· पु·।
२ इन्द्रशब्दस्येत्यधिकम् इं· पु·।

Digitized by Google

"जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्" ॥ जङ्गलं वनप्रायो देशः, कुरुषु जङ्गलं, कुरुजङ्गलं, धेनुर्नवप्रसूता, विश्वेषां धेनुर्विश्वधेनुः, सुवर्णविकारो वलजं सौवर्णवलजम्, उत्तरमित्युत्तरपदं लक्ष्यते, तस्य नित्यसन्निहितत्वात्स्वरूपेण विभाषितत्वानुपपत्तेर्विभाषितवृद्धिकत्वाद्विभाषितमिति गौणो वादः ॥

"अर्द्धात्परिमाणस्य पूर्वस्य तु वा" ॥ 'अर्द्धद्रौणिकमिति' । प्राग्वतेष्ठञ् । वावचनमनर्थकं, विभाषितमित्यनुवृत्तेः, तत्रैवं वक्तव्यं पूर्वे त्विति । तथा तु न कृतमित्येव ॥

"नातः परस्य" ॥ 'आर्द्धप्रस्थिकमार्द्धकंसिकमिति' । पूर्ववट्ठञ् । कंसाट्टिठंस्तु न भवति, तदन्तविधेरभावात्, प्राग्वतेः संख्यापूर्वपदानां तदन्तविधिः, न चार्द्धशब्दः संख्यावाची । 'किं च स्यादिति' । आकारो वृद्धिरेव तत्र सत्यसति वा वृद्धिप्रतिषेधे नास्ति विशेष इति मन्यते । किं पुनः कारणं पुंवद्भावप्रतिषेधो न स्यादित्यत आह । 'यत्र हीति' । तदुक्तं कुर्वद्रूपे निमित्तशब्दो मुख्य इति। परस्येति किं, पूर्वस्य माभूत्, अत इति विशेषणोपादानसामर्थ्यात्पूर्वस्य न भविष्यति, नहि पूर्वस्यार्द्धशब्दस्याकारादन्यो वृद्धिभागस्ति । किं च यदि पूर्वस्य प्रतिषेधः स्यात्पूर्वस्य तु वेत्येतदनर्थकं स्यात्, इदं तर्हि प्रयोजनं तदन्तविधिर्माभूदिति, अन्यथा ऽकारान्तस्योत्तरपदस्यैवं विज्ञायेत, तत्र को दोषः, इह प्रतिषेधः स्यात्, अर्द्धद्रौणिकमर्द्धकौडविकमिति, पूर्वस्तु त्रिधिरर्द्धमुष्टिना क्रीतोऽर्द्धमौष्टिक इत्यादौ चरितार्थः, तस्मात्तदन्तविधिनिरासार्थं परस्येत्युक्तम् ॥

"प्रवाहणस्य ढे" ॥ प्रवाहणशब्दस्य ढे परत उत्तरपदस्येति व्यधिकरणे षष्ठ्यौ, प्रवहणशब्दस्य अवयवभूतं यदुत्तरपदं तस्येत्यर्थः, ननु वृद्धिमदेवात्र स्वत एवोत्तरपदं, कस्मै प्रयोजनायास्य पुनर्वृद्धिर्विधीयते। उच्यते । यदा पूर्वपदे वृद्धिर्न भवति तदा यत्रुत्तरपदेपि वृद्धिर्न स्यात् वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न स्यात्, प्रवाहणेयीभार्य इति, माभूदेवं जातेश्चेत्येवं भविष्यति, गोत्रं च चरणैः सहेति जातित्वम्, एवं तर्ह्येतज्ज्ञापयति अनित्योयं प्रतिषेध इति, तेन हस्तिनीनां समूहो हास्तिक-

Digitized by Google

मित्यत्र भस्याढइति वा ठक्छसोश्चेति वा प्राप्तस्योपसंख्यानिकस्य पुंवद्भावस्य प्रतिषेधो न भवति, प्रवाहयतीति प्रवाहणः, ण्यन्ताद्बहेर्ल्युः, वोर्विभाषेति णत्वम् ॥

"तत्प्रत्ययस्य च" ॥ 'प्रवाहणेयिरिति' । यूऽन्यपत्येत इञ् । 'प्रवाहणेयकमिति' । गोत्रचरणाद्वुञ्, किमर्थमिदमुच्यते, ठे परतः पूर्वेण विकल्प उक्तः, ठान्तस्ये आदौ नित्यवृद्धिर्मा भूदिति । नैतदस्ति प्रयोजनम्, इञादिनिमित्ताया अपि वृद्धेठाश्रय एव विकल्पो बाधको भविष्यति, ठइति हि परसप्तमी न निमित्तसप्तमी, तेनान्यनिमित्ताया अपि वृद्धेठे परतः प्रतिषेधो लभ्यतएवात आह । 'बाह्यतद्धितनिमित्तेति' । अयमभिप्रायः । ठउत्पन्ने तदाश्रयां वृद्धिं बाधित्वा विकल्पस्तावत्प्रवृत्तः, पश्चादिञादिरुत्पन्नः, तन्निमित्ता च वृद्धिः प्राप्ता न त्विदानीं ठनिमित्तो विकल्पः, पूर्वमेव प्रवृत्तत्वादावृत्त्ययोगादिति ॥

"नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्" ॥ 'अप्राप्तैव वि'धीयतइति' । अप्राप्तिमेवोपपादयति । 'न नञ्पूर्वादिति' । 'उत्तरो भावप्रत्यय इति' । त्वतल्भ्यामुत्तरः ष्यञादिः, ततश्चोत्तरो भावप्रत्ययः प्रागेव नञ्समासात् शुच्यादिभ्य एव विधेयः, पश्चान्नञ्समासस्तत्र नञोऽङ्गेनन्तभावादप्राप्ता वृद्धिर्विधीयतइति । 'तत्परइत्यादि' । असति विषयेऽङ्गाधिकार उपप्लवः, अस्ति च विषयः, कः पुनरसौ, भाववचनादन्योपत्यादिषु विहितः प्रत्ययः, अथापि भाववचने अङ्गा सोपि शक्यतएव दर्शयितुमित्याह । 'बहुव्रीहेश्चेति' । उत्तरो भावप्रत्ययः प्रतिषिध्यतइत्येतदप्यत्र न सार्वत्रिकमित्याह । 'अक्षेत्रज्ञेति' । तदेवमङ्गाधिकारो न बाधनीय इति स्थितम्, एवं च तदुपस्पर्शादशौचमित्यादिप्रयोगोपपत्तिः, दण्डाहं भावमाशौचमित्यादौ त्विदमर्थेण द्रष्टव्यः ॥

"यथातथयथापुरयोः पर्यायेण" ॥ 'ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्याविति' । तेन न नञ्पूर्वादिति ष्यञः प्रतिषेधो न भवतीति भावः । 'यथा सादृश्यइत्यव्ययीभावसमासइति' । पदार्थानतिवृत्तौ, तथाभाव-

१ विभाषेत्यधिकं मुद्रितमूलपुस्तके ।

Digitized by Google

मनतिक्रान्तं यथातथं सत्यमुच्यते, यद्वस्तु पुरा यथाभूतं तदद्यापि तथाभावमनतिक्रान्तं यथापुरमुच्यते, किं पुनरव्ययीभावत्वे प्रमाणमित्यत आह । 'तथाहीति'। 'भाष्ये त्विति'। नहि ह्रस्वत्वमकृत्वा विग्रहप्रदर्शनमव्ययीभावस्योपपद्यते, अयं योगः शक्यो ऽवक्तुं, कथं, यदा पूर्वपदस्य वृद्धिः नञ्समासाद्भावप्रत्ययः, यदा तूत्तरपदस्य वृद्धिस्तदा ष्यञन्तेन नञ्समासः, स्वरेऽपि नास्ति विशेषः, अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वात्, प्रत्ययान्तरं चाभ्यां न भवत्यनभिधानात् ॥

"हनस्तोऽचिण्णलोः" ॥ 'तद्धितेष्विति निवृत्तमिति'। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् । 'तत्सम्बद्धं क्तितीत्यपीति'। निवृत्तमित्यपेक्षते, ङिण्ग्रहणं तु प्रत्ययमात्रेण संबद्धमतस्तद्धितेष्वित्यस्मिन्निवृत्तेऽपि तदनुवर्तत एव, उदाहरणेषु हो हन्तेर्ञ्णिन्नेष्विति कुत्वम् ॥

"आतो युक् चिण्कृतोः" ॥ चिण्ग्रहणमकृदर्थम् । 'ददौ दधाविति'। ननु चात औ णल इत्यौत्वमत्र बाधकम्भविष्यति, अनवकाशा हि विधयो बाधका भवन्ति, सावकाशं चौत्वं, कोऽवकाशो यदा उत्तमे णलि णित्त्वाभावः, एवं तर्ह्यचिण्णलोरित्यनुवर्तिष्यते, चिणि तु वचनाद्भविष्यति, तत्राह । 'चौडिर्बालाकिरिति'। बाह्वादित्वादिञ्, अत्र दात्यादौ चरितार्थं यस्येति लोपं बाधित्वा परत्वाद्युक् स्यात्, अचामादेरित्यनुवृत्तेर्न भविष्यति, अत आह । 'ज्ञादेवता अस्येति'। आदिवद्भावाच्च प्रसङ्गः । किं च अचामादेरित्यनुवृत्तौ दरिद्रायक इत्यत्र न स्यात् ॥

"नोदात्तोपदेशस्य मान्तस्यानाचमेः" ॥ उपदेशउदात्त उदात्तोपदेशः, अस्मादेव निपातनात्साधुः । 'किं चोक्तमिति'। सन्निहितस्य कस्यचिदप्रसङ्गात्प्रश्नः । 'अत उपधाया इति वृद्धिरिति'। चिण्कृदुपजीवनार्थं तु न तदनन्तरमिदमारब्धम् । 'निपातनादनुगन्तव्यमिति'। येषां त्वपाणिनीयो धातुपाठेर्थनिर्देश इति पक्षस्तेषामत्र सञ्ज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः । 'शमी तमीति'। शमित्यष्टाभ्यो घिनुण्, अत्र प्रत्ययस्वरे कृते सम्प्रति धातुरनुदात्तः । 'यामको रामक इति'। लित्स्वरे कृते भवत्ययं सम्प्रत्युदात्तः, अनाचमेरित्यल्पमिदमुच्यत इत्याह । 'अनाचमि-

Digitized by Google

कमिवमीनामिति वक्तव्यमिति'। टुवम् उद्गिरणे, कमु कान्तौ, चमु अदने, तत्र सूत्रे आङ्पूर्वस्य पर्युदासः, वाक्ये तु केवलस्य, वृत्तौ तु वाक्योदाहरणमप्याङ्पूर्वस्यैव दर्शितं, नाचाप्तैर्निरणायि। 'काम इति'। कमेरायादय आर्द्धधातुके वेति णिङभावपक्षे घञ् वृद्धिः। 'णिचि वृद्धौ सत्यामिति'। नहि तत्रायं प्रतिषेधः णिचो ऽकृत्स्वात्। ननु च सत्यामपि वृद्धौ जनीजृष्क्नसुरञ्जोऽमन्ताश्चेति मित्त्वे सति मितां ह्रस्व इति ह्रस्वेन भाव्यमत आह। 'तत्र हीति'। 'नान्ये मितो ऽहेताविति'। अहेतौ चुरादिणिच्यनुक्रान्तेभ्यो ऽन्ये ऽमन्तादयो मितो न भवन्तीत्यर्थः। 'अन्याय्यमेव मन्यन्तइति'। विश्रान्तिर्भूमिरिति पठितव्यमित्यर्थः। तेन विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुरिति व्याख्यातम्॥

"जनिवध्योश्च" 'वधिः प्रकृत्यन्तरमिति'। वध हिंसायामिति भूवादौ पाठात्। 'भक्षकश्चेदिति'। योऽपि मांसं क्रीत्वा भक्षयति तस्यापि हिंसानुषङ्गोऽस्तीत्येतदनेन प्रतिपाद्यते, यथाह मनुः।

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी।
संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः॥

इति। 'हनादेशस्येति'। अवधि भवता दस्युरित्यत्र। 'अजागर्भमिति'। व्यत्ययेन परस्मैपदम्, अन्तर्भावितण्यर्थत्वात्सकर्मकत्वम्॥

"अर्तिह्रीव्लीरीक्नूयिक्ष्माय्यातां पुङ् णौ"॥ व्लीङ् वरणे, क्नूयी शब्दे, क्ष्मायी विधूनने, उदाहरणेषु पुगन्तलक्षणो गुणः। 'द्वयोरपि ग्रहणमिति'। विशेषानुपादानात्। 'रीङित्यपीति'। यद्यपि प्रस्रवणार्थः सानुबन्धकस्तथापि तस्यापि ग्रहणमाचार्यैः स्मर्यतइति भावः। पूर्वान्तकरणं न यादृच्छिकं किं तर्हि विवक्षितमित्याह। 'पुकः पूर्वान्तकरणमिति'। 'अदीदपदिति'। यदि पुनर्णेः पुट् स्यात् तस्य णिग्रहणेन ग्रहणाण्णौ परतो यदङ्गं न तस्याकार उपधेति ह्रस्वो न स्यात्, दोषोपलक्षणं चैतद्वाप्यतइत्यादौ णेरनिटीति णेर्लोपेनापहृतत्वात्पकारस्य श्रवणं न स्यात्, नैव दोषः। नहि लोपः सर्वापहारी, अलोन्त्यस्येत्यन्त्यस्य लोपः, इह तर्हि क्नोपयतीतीडागमः प्राप्नोति॥

लाभेऽपि कश्चिन्नैवात्र परादौ सति दृश्यते ।
पुगन्तस्य गुणो वाच्यो वृद्धिः स्यादन्यथा यतः ॥

यत्किलेदमुच्यते पुटि सति गुणविधौ पुगन्तग्रहणं न कर्तव्यं सार्वधातुकार्धधातुकयोरित्येव सिद्धत्वादिति, तदप्याशावादमात्रं, यतः परादावप्यवश्यं पुटि गुणो विधेयः, अन्यथा अचो ञ्णितीतिवृद्धिप्रसङ्गात् ॥

"शाच्छासाह्वाव्यावेपां युक्" ॥ 'पाग्रहणमित्यादि' । इष्टिरेवेयं लाक्षणिकत्वात्पारूपस्य । 'लुगागमस्त्विति' । यद्यपि पालयतीति रूपं पाल रक्षण इत्यस्यैव चुरादिणिजन्तस्य, पुनर्हेतुमण्णिचि सिद्धं तथापि पातेः पुकि पापयति, युकि तु पाययति इति माभूदिति लुग्वचनम् । 'धूञ्प्रीञो-रिति'। धूञ् कम्पने, प्रीञ् तर्पणे, ञान्तस्यानुकरणं, तेन न दैवादिकस्य नुग्भवति । 'एतेपीति' । एते युगादयो वक्ष्यमाणाश्च नुगादयः । 'कृता-त्वानां ग्रहणमिति' । आकारान्तानां युकं विधाय तदनन्तरमोकारान्तेषु वक्ष्यमाणेषु युकः प्राप्तिराख्याता भवतीति भावः । 'एवमादीति' । आदिशब्देन ज्ञापयति, निजापयति, विलापयते, मुण्डो विस्मापयते, प्रियमाचष्टे प्रापयतीत्यादेर्ग्रहणम् ॥

"वो विधूनने जुक्" ॥ विधूननइत्ययमेव निर्देशो लिङ्गं धूञो वो नुग्भवतीति । 'वा इत्येतस्येति' । वा गतिगन्धनयोरित्यस्य । वज व्रज गतावित्यस्य णिचि रूपे वाजयतीति सिद्धे वातेः पुङ्निवृत्त्यर्थं जुको विधानम् ॥

"लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने" ॥ स्नेहो घृतादिः, तस्य विपातनं विगच्छतः काठिन्यं त्यजतः प्रयोजकव्यापारः, स्नेहविपातनं काठिन्यमुपगतस्याग्नौ निष्टपनादिना द्रवत्वापादानमित्यर्थः । 'न तु कृतात्वस्येति' । एकदेशविकृतस्यानन्यत्वात्प्रसङ्गः । 'जटाभिरालापयत-इति' । लियः संमाननशालीनीकरणयोश्चेत्यात्मनेपदम् । 'ली इति लीलीङोर्ग्रहणमिति' । क्रैयादिकदैवादिकयोः, निरनुबन्धकपरिभाषा तु नेष्यते । 'कृतात्वस्य च लीयतेरिति' । ग्रहणमित्यपेक्षते ॥

"भियो हेतुभये षुक्" ॥ हेतुः पारिभाषिकः, भीर्भयं, हेतोर्भयं हेतुभयं तच्च वर्तमानस्य । 'भीषयतइति' । भीस्म्योर्हेतुभयइत्यात्मनेपदम् । 'भापयतइति' । बिभेतेर्हेतुभयइत्यात्त्वम् ॥

"रुहः पोन्यतरस्याम्" ॥ अयं योगः शक्यो ऽवक्तुं, कथं, रुप मोहनइति दिवादौ पठ्यते, स ण्यन्तोच जन्मनि वर्तिष्यते, अनेकार्थत्वाद्धातूनां, तस्य रोपयतीति, रुहेस्त्वारोहयतीति ॥

"प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" ॥ अत्र यदि कादित्यत्राकारो विवक्षितः स्यात् एतिकाश्चरन्तीत्यत्रेत्वं न स्यात्, एतदोकचि जसि त्यदाद्यत्वे टापि च रूपमकचो ह्यन्त्योकार उच्चारणार्थो न श्रवणार्थः, भिन्धकि छिन्धकि इन्धकि इत्यादेरसिद्धिप्रसङ्गात्, ततश्च कशब्दस्याभावादेतिका इत्यत्र न स्यादेव, न यासयोरिति च प्रतिषेधः सङ्घातग्रहणेनर्थकः स्यात्, तस्मादुच्चारणार्थोकारो वर्णमात्रमेव विवक्षितमित्याह । 'प्रत्ययस्थात्ककारादिति' । 'स चेदिति' । स चेदाप् सुपः परस्तात्र भवति तदेत्वमित्यर्थः । प्रत्ययग्रहणपरिभाषया सुबन्तादिति द्रष्टव्यम् । 'जटिलिका मुण्डिकेति' । टाबन्ताभ्यामज्ञातादिषु प्रागिवात्कः, केण इति ह्रस्वत्वं, ततष्टाप्, तत इत्वं, यद्यप्ययमकारो लाक्षणिकः तथाप्युदीचामातः स्थानइति लिङ्गात्तस्यापि भवति । 'ककारमात्रं हीति' । उक्तमिदं कादितिवर्णमात्रं विवक्षितमिति, न ककारमात्रं कश्चित्प्रत्ययोस्ति तस्मात्कात्प्रत्ययादित्युच्यमानेपि प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यतइति किं स्थग्रहणेनेत्यर्थः । 'पटुका मृदुकेति' । पटुमृदुशब्दाभ्यां स्यधेर्वृत्तिभ्यां के कृते टाप् । असति पूर्वग्रहणे तस्मादित्युत्तरस्येति कात्परस्यैवाकारस्य वार्णादाङ्गं बलीय इत्येकादेशं बाधित्वा इत्वं स्यात्, यद्यपि जटिलिका मुण्डिकेत्यादावयं प्रसङ्गः शक्यो दर्शयितुं तथापि विस्पष्टार्थमुदाहरणान्तरमुपन्यस्तम् । 'राका धाकेति' । कृदाधाराचिंकलिभ्यः कः । 'अथापीत्यनेन किं विशेष्यतइति' । ककारः प्रत्ययो वेति संदेहात्प्रश्नः । 'ककार इति' । प्रत्यये तु विशेष्यमाणे रथकट्यादिष्वतिप्रसङ्ग इति भावः । यद्यपि प्रत्ययोपि श्रुतस्तथापि तस्योपसर्जनत्वात्ककार एव विशेष्यते ।

Çlesha too, consisting of a style whose relation tends to the non-manifestation of breaks in the uniformity, is merely a (*a*) flourish (of the poet's fancy).

Again "uniformity," consisting in the non-relinquishing of a subject taken up, is only the negation of a Defect, and not (itself) an (independent) Excellence; for who, in his senses, could describe another object, when he had already begun with one?

"Samādhi," consisting of the comprehension of meaning also (consisting in original and imitated idea) is not an independent Excellence; since without apprehending the originality or the imitatedness of the idea, there can be no poetry.

73. Hence the Excellences of Idea or Meaning should not be stated (separately).

73.—[*Page* 542.] Those that have been called Verbal Excellences—of these the suggesters are Letters, Compounds and Composition (or Diction).

Now it is stated which are the suggesters of what—

The Letters Suggestive of the Sweet.

74. The *sparça* letters, without the ट class, when combined (by having in the beginning) with the last letters of their class,—the short र and ण,—complete absence of compounds or short compounds,—and sweet diction,—are (suggestive) of Sweetness.

(1) The letters from क to म without ट, ठ, ड and ढ, combining with the last letters of their class,—(2) र and ण interposed with short accents,—(3) complete absence of compound, or middle-class compound, and (4) the style *Madhuryāvati* caused by combination with other words (*i. e.* in a *sandhi*);—all these are suggestive of Sweetness.

Example—

"अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि" ॥

(*a*) Inasmuch as it does not lend any peculiar charm to the existing *Rasa*.

Digitized by Google

["The body of the woman bowing down, resembling the sportiveness of Cupid, mixed with gestures, makes the inmost hearts of young man, think of things other than the quietistic."]

Letters Suggestive of the Florrid.

75. [*Page* 544.] The combination of the first and the third of a class, with the letters following them, or with र, or with themselves,—ट, &c., श and ष,—long compounds—and a bombastic style, of Florridity.

The combination—of the first and third letters of a class with those following them, *i. e.* the second and the fourth (respectively), with र, either over or below or both,—of similar ones, of letters with themselves, the ट class with the exception of ण, श and ष, long compounds and bombastic style,—are (suggestive) of Florridity.

[*Page* 545.] Example—

मूर्ध्ना &c. (p. 320, *Text.*)

Lucidity defined.

76. Lucidity is that form of excellence, common to all, by which the (complete) meaning is comprehended on mere hearing of the words.

Common to all, i. e., to all *Rasas* and styles.

Example—

"परिम्लानम् पीनस्तनजघनसंगादुभयतः
तनोर्मध्यस्यान्तःपरिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्" ॥

[*Ratnāvalī*, Act II.]

["The bedding of lotus leaves, shows the distress of the slender-bodied one—(the leaves) withered on both sides by the contact of the plump breasts and thighs; green in the middle, not having been in contact with the body; and ruffled by the throwing about of arms."]

[*Page* 546.] Though Diction, &c., are subservient to (dependent upon) Excellences, yet—

77. Sometimes the Diction, Compounds and Letters are made otherwise, in accordance with the speaker, the object described and the (form of the) work.

Sometimes Diction, &c., follow the speciality of the speaker, neglecting those of the object described and the form of the work, *e.g.*

"मन्थायस्तार्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्" ॥

[*Vēnisaṁhāra*, Act I]

["By whom has this trumpet been beaten—appearing as it does like the companion of my lion-roar, the messenger as it were of Draupadi's wrath, and the annahilative wind of the family of the Kurus, resembling on account of being struck with the sticks the sound made by the mutual clash of the clouds at the time of universal Dissolution, and having its sound calm as that issuing from the moving Mandara mount, having its caves filled with water of the ocean thrown to and fro by the churning rod."]

Here the object described is not suggestive of wrath, the work, a poetical one is one to be acted; and as such the bombastic style &c., are not in keeping with it; Notwithstanding all this, the speaker here is Bhīmasēna (and hence the propriety of the bombastic compound &c).

[*Page* 548.] Sometimes again the Diction, &c., are, in accordance with the object described, neglecting the specialities of the speaker and the form of the work,—*e. g.*

"प्रौढच्छेदानुरूपोच्छलनरयभवत्सैंहिकेयोपघात-
त्रासाकृष्टाश्वतिर्यग्वलितरविरथेनारुणेनेक्ष्यमाणम् ।
कुर्वत् काकुत्स्थवीर्यस्तुतिमिव मरुतां कन्धरारन्ध्रभाजाम्
भाङ्कारैर्भीममेतन्निपतति वियतः कुम्भकर्णोत्तमाङ्गम्" ॥

Digitized by Google

[" Here falls from the sky the head of Kumbhakarṇa, flying up in accordance with the force of the cut;—Terrible on account of the (curious) humming sound proceeding from the holes in his shoulders, and through these singing, as it were, the praises of Rāma, looked upon by Aruṇa (the driver of the Sun) turning aside the sun's chariot and pulling aside the horses, fearing it to be Rāhu.]

Sometimes the Diction, &c. are in accordance with the form of the work, neglecting the speciality of the speaker and the object described; *e.g.* an Ākhyāyikā, though Erotic, does not admit of soft letters; and the Kathā, even though abounding in the Furious, does not admit of very bombastic letters &c.; and Dramas, though Furious, do not admit of long compounds &c. Similarly the propriety may be followed elsewhere.

Thus ends Chapter VIII. of the *Kāvya-prakāça,* consisting of the determination of Excellence founded on the discrimation of Excellence and Figure of Speech.

Digitized by Google

CHAPTER IX.

OF VERBAL FIGURES OF SPEECH.

[*Page* 550.] The Excellences have been described; and now is the occasion for the Figures of Speech; hence the author begins with the Verbal Figures of Speech.

(1) *Vakrokti* or Equivoque defined.

78.—Equivoque or Homonym *(Vakrokti)* is that where the speech of one is construed differently by another, through paronomasia or intonation; and this is two-fold.

This, i. e. The Paronomatic Homonym and the Vocal or Intonational Homonym.

To exemplify the Homonym based upon the paronomatic breaking of words—

"नारीणामनुकूलमाचरसि चेज्जानासि, कश्चेतनो
वामानांप्रियमादधाति, हितकृन्नैवाबलानाम्भवान् ।
युक्तं किं हितकर्तनं ननु बलाभावप्रसिद्धात्मनः,
सामर्थ्यम्भवतः पुरन्दरमतच्छेदं विधातुं कुतः" ॥

["If you aot satisfactorily to women, then you know something;" [the man replies breaking up नारीणां (of women) into न + अरीणां (not of enemies)] "which intelligent man does good to an enemy;" [with a pun on वामानां which can mean both 'of enemies' and 'of women,' and the other person understands it in this latter sense, and replies] "then you are not a benefactor of the weaker sex;" [the man replies playing on the two meanings of हितकृत् which could be construed as हितं कृन्तति यः, one who cuts away a favour or advantage.] "The cutting of advantage or good of those known to be weak, is not proper; [playing upon बलाभावप्रसिद्धात्मनः which would also refer to the Destroyer of Bala, Indra; and in this sense the other replies] "wherefore thy ability to destroy the desirable of Indra?"]

Digitized by Google

[*Page* 552.] To exemplify the Homonym based on paronomatic use of an unbroken word—

"अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता ।
त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्" ॥

["Oh! who created this your intellect (or heart), so cruel?" [The other replies taking दारुणा = of wood] Intellect has always been heard to be made up of the triad of qualities, never of wood."]

To exemplify Homonym based on Intonation—

"गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् ।
अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ?" ॥

["He is prepared to go to a far-off country, being subordinate to his superiors. But, O friend! will he not come in the fragrant season (the spring) lovely through blackbees and cuckoos?"]

(Here 'will he not come?' = he will surely come.)

79 *(contd.)*—[*Page* 553.] Alliteration (Anuprāsa)

(2) Anuprāsa or Alliteration. (consists in) similarity of letters.

By *similarity of letters* here is meant that of the consonants, irrespective of the dissimilarity of the vowels.

79 *(contd.)*—(And this is) two-fold, being either

The two kinds of Alliteration. Isolated or Harmonious.

Chhēka means *expert* or *skilful*.

Vritti—is an action of certain fixed letters ministering to *Rasa*.

[*Page* 555.] What are the forms of these? He replies—

79 *(contd.)*—The former (Chhekā) is the single or

(*a*) The Chhekānuprāsa. isolated (similarity) of many (consonants).

Chhekānuprasa, Isolated Alliteration, consists in the single similarity (repetition) of many consonants.

Example—

"ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी ।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्" ॥

["The moon having his form eclipsed by the advent of the sun, bears the paleness of the cheeks of women lean and labouring under desire."]

Here we have the न and ठ repeated, as also ष and ढ.

79 *(concld.)*—[*Page* 556.] The other (Vrittyanuprāsa) is the repeated (similarity) of even one.

(*b*) Vrittyanuprāsa.

Vrittyanuprāsa, Harmonious Alliteration, consists in the similarity of one or more (this from the particle अपि) consonants repeated twice or more times.

Of this—

80 *(contd.)*—Some are called (1) Upanāgarikā through (the similarity being that of) letters suggesting Sweetness; and some exhibiting Florridity, are called the (2) Parushā or Harsh.

The *Upanāgarikā* and the *Parushā*, the two forms of (*b*).

These have been exemplified before (Vide *Text*, pp. 542—44).

80.—(The similarity being that) of others, (the Vritti or Diction) is called the (3) Komalā, Soft.

The Komalā.

Others—*i. e.* the remaining letters—(besides the sweet-sounding and the Florrid).

This is called *Vulgar* by some. Example—

'अपसारय, &c.' (Vide *Text*, p. 522.)

81.—These forms of Diction are by some (Vāmana and others) called Vaidarbhī, &c.

Vaidarbhi, &c., other names for the above-mentioned styles.

The three forms of Diction are according to Vāmana, and others called the (1) Vaidarbhī, (2) Gaudī and (3) Pānchālī respectively.

81.—Lātānuprāsa is verbal, the difference being only in the import.

(*c*) The Lātānuprāsa.

Digitized by Google

[*Page* 558.] Alliteration based on (the similarity of) words —though identical in meaning, yet differing in mere import—is called Lātānuprāsa, on account of its being much in favour with the Lātā (*a*) people.

This is by some, called the *Pādānuprāsa.*

82 *(contd.)*—This belongs to many words (a collection of words.)

This—Lātānuprāsa.

Example—

"यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य" ॥

["To him who has not his beloved near him, even the cool-rayed (moon) is like Fire; and to him who has his beloved near him, even fire becomes the cool-rayed moon."]

[In this the Subject and Predicate are transposed in the two halves].

82 *(contd.)*—also to a single word.

'*Also*'—connects the sentence with च of the last.

Example—

"वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः ।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत्" ॥

["The face of the fair-complexioned one is really the nectar-giver! where else could the moon be without the mark?"]

82 *(contd.)*—This (Lātānuprāsa) belongs to substantives (independently of their affixes, &c.) occurring (1) in a single compound, (2) in different compounds, and (3) in a compound and apart from any compound.

Another kind of (Lātānuprāsa) is the similarity of substantives, and not of *pada*, (*i. e.* independently of the terminations, &c.)—occurring (1) in one and the same compound, or (2) in different compounds, or (3) lastly one occurring in a compound and the other following independently.

(*a*) The Northern Part of S. India.

Digitized by Google

चरितार्थमित्युक्तं, तत्परिहरति । अधिकानां स्तोत्रशस्त्रादीनामग्रन्थत्वं नाम्ना अविहितत्वं, तत्र वचनादधिकागमो, न नामधेयेनेति भावः ॥ १५ ॥

लिङ्गं संघातधर्मः स्यादर्थापत्तेर्द्रव्यवत् ॥ १६ ॥

लिङ्गं साधकमुक्तं, तत् पूर्वपक्षिण आपाततः परिहरति । लिङ्गमिति । यद् द्वादशोपसद्विधानं तत्संघातस्य द्वादशाहे ऽहःसमुदायधर्मः स्यात् । तस्य गवामयने अर्थेन कार्यवशेनापत्तेः प्राप्तेः । अयं भावः । द्वादशाहः फलमुद्दिश्य विहितः । गवामयनमपि फलमुद्दिश्य विहितं सद् द्वादशाहस्थानापन्नम् । तत्स्थानापन्नः तद्धर्मं लभतइति न्यायेनैव द्वादशोपसल्लाभः न चोदकशास्त्रेणेति तत्र लिङ्गमिति । द्रव्यवद्, यथा व्रीह्यभावे प्रतिनिधिभूतनीवारेषु अवहननादयः तथा ॥ १६ ॥

न वा ऽर्थधर्मः स्यात्संघातस्य गुणत्वात् ॥ १७ ॥

इमं पक्षं दूषयति । न वेति । न वा पूर्वपक्ष्युक्तलिङ्गपरिहारे इदं समाधानम् । कुतः, द्वादशोपसदामर्थस्य प्रधानस्य धर्मत्वादङ्गत्वात् । संघातस्य समुदायत्वस्य अहर्गुणत्वात् । द्वादशत्वविशिष्टस्याह्नो ऽङ्गं द्वादशोपसदः, विशिष्टमुद्दिश्य विधीयमानं न विशेषणाङ्गम् । राजपुरुषमानयेत्युक्ते न राजानमानयति । अतः लिङ्गं संघातधर्मः स्यादित्यसंगतं पूर्वोक्तमिति भावः ॥ १७ ॥

अर्थापत्तेर्द्रव्येषु धर्मलाभः स्यात् ॥ १८ ॥

द्रव्येषु प्रतिनिधित्वेन प्राप्तनीवारादिषु अर्थे व्रीहिकार्ये पुरोडाशनिर्माणे आपत्तेः व्रीहिधर्मलाभः स्यात् । इह तु संघातकारणं नोपसद इत्युक्तं प्राक् । अतो वैषम्यमिति भावः ॥ १८ ॥

प्रवृत्त्या नियतस्य लिङ्गदर्शनम् ॥ १९ ॥

भवत्वेवं, तथा ऽपि गवामयने चोदकशास्त्रेण न प्राप्तिरित्याह । प्रवृत्त्येति । प्रवृत्त्या मुख्यप्रवृत्त्या गवामयने नियतस्य लिङ्गदर्शनं भवति । अयं भावः । गवामयने द्वादशाहिकप्रथममहः प्रायणीयमहः तस्य धर्मा द्वादशोपसदः । बहुपसदो जघन्यानामह्नामङ्गं ज्योतिर्गोरायुर्नामकानाम्

Digitized by Google

उभयोर्गवामयने सन्निपाते प्रथमातिक्रमे मानाभावात् द्वादशोपसदो नियता न चोदकशास्त्रेणेति, न चोदकप्राप्तौ लिङ्गमिति ॥ १९ ॥

विहारदर्शनं च शिष्टस्यानारभ्यवादानां प्रकृत्यर्थत्वात् ॥ २० ॥

विहारदर्शनमिति । विहारस्य एकादशपशुप्रचारस्य द्वादशाहगतस्य गवामयने दर्शनं तदपि तत्रैव शिष्टस्य तत्रैव विहितस्य दर्शनं न त्वतिदेशशास्त्रेण दर्शनम् । अनारभ्यवादानामप्रकृत्य पठितानां प्रकृत्यर्थत्वात् प्रकृतिगामित्वात् । अयं भावः । आग्नेयमेव प्रथमे ऽहन्यालभेरन् सारस्वतीं मेषीं द्वितीये सौम्यं बभ्रुं तृतीये वारुणमन्ततो ऽथ पुनः पर्यावर्तेष्वाग्नेयमेव प्रथमे ऽहन्यालभेरन् सारस्वतीं मेषीं द्वितीये सौम्यं बभ्रुं तृतीये वारुणमन्तत इति । इदमनारभ्याधीतं सर्वप्रकृतित्वाज्ज्योतिष्टोमं प्रवेष्टुं गतं तत्र द्वितीयतृतीयाद्यह्नामभावात् ततः परावृत्य अपरां प्रकृतिं द्वादशाहमगमत् । तत्रापि विधिवाक्यश्रुतपर्यावर्तानां ज्योतिर्गौरायुरिति अहःसु प्रसिद्धानामभावाद् गवामयनमगमदिति गवामयनार्थं उक्तविधिर्नातिदेशशास्त्रविषय इति ॥ २० ॥

इति श्रीजैमिनिसूत्रवृत्तौ सप्तमाध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्च सप्तमाध्यायः ॥ ७ ॥

Digitized by Google

विशेषातिदेशप्रतिज्ञा । अधि० १ ।

अथ विशेषलक्षणम् ॥ १ ॥

एतदध्यायप्रतिपाद्यार्थं प्रतिजानीते । अथेति । अथ सामान्यातिदेशनिरूपणानन्तरं विशेषस्य विशेषातिदेशस्य लक्षणं निरूपणं क्रियते ॥ १ ॥

विशेषकर्मणो धर्मातिदेशः । अधि० २ ।

यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥ २ ॥

अध्यायप्रतिपाद्यमर्थं संक्षेपेण प्रथमतो दर्शयति । यस्येति । यस्य विध्यन्तस्य लिङ्गं किं चिच्छब्दगतं अर्थगतं वा वैकृतकर्मचोदनायां तदङ्गवाक्ये वा दृश्यते तत्र स विध्यन्तः स्यात् । अर्थस्य तस्य लिङ्गस्य तेन विध्यन्तेन संयोगात् संबन्धात् । अभिधानवत् । अग्निहोत्रादिनामवत् । अयं भावः । सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्यत्र कथंभावाकाङ्क्षाशान्त्यर्थं वाक्ये प्रत्यक्षशब्दाभावाद्विधिवाक्ये निर्वपतिलिङ्गमोषधिद्रव्यलिङ्गमेकदेवतालिङ्गं स्वसंबन्धिनमाग्नेयविध्यन्तं स्मारयति । तद्विध्यन्तस्मृतौ तद्वाचकशब्दस्मृतिर्भवति । ततः तमेव शब्दं वाक्ये योजयति, सौर्यं चरुमाग्नेयवच्चिर्वपेदिति, आकाङ्क्षात्रयपूरकं वाक्यं संपन्नम् । एवं सोमादौ पश्वादौ च योज्यम् । अनेनैव निखिलाध्यायार्थसिद्धौ उत्तरप्रपञ्चः शिष्यबुद्धिवैशद्यार्थः ॥ २ ॥

सोमे ऐष्टिकधर्मानतिदेशः । अधि० ३ ।

प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः स्यात् ॥ ३ ॥

सोमे इष्टिधर्माः सन्ति न वेति संशये पूर्वपक्षमाह । प्रवृत्तत्वादिति । सोमे इष्टेः इष्टिधर्माणां प्रवृत्तिः स्यात् । प्रवृत्तत्वात् सोमाङ्गभूतदीक्षणीयादिषु प्रवृत्तत्वात् ॥ ३ ॥

लिङ्गदर्शनाच्च ॥ ४ ॥

लिङ्गेति । तस्यैकशतं प्रयाजानुयाजा इत्यैष्टिकधर्माः सोमे दृश्यन्ते अतो ऽपि तथा ॥ ४ ॥

कृत्स्नविधानाद्वा ऽपूर्वत्वम् ॥ ५ ॥

Digitized by Google

सिद्धान्तमाह । कृत्स्नेति । कृत्स्नस्य संपूर्णस्याङ्गकलापस्य विधानाद् अपूर्वत्वं धर्मानपेक्षत्वम् ॥ ५ ॥

स्रुगभिघारणाभावस्य च नित्यानुवादात् ॥ ६ ॥

ननु सोमे यदीष्टिधर्माः न स्युः तर्हि घृतं वै देवा वज्रं कृत्वा सोममघ्नन् स्रुचो बाहू तस्मात्स्रुचि सोमहविर्नासाद्यते न सोममाज्येनाभि-घारयन्तीति निषेधो ऽनुपपन्नः प्राप्तिपूर्वकत्वान्निषेधस्य तत्राह । स्रुगिति । स्रुचा हविरधारणमाज्येनाभिघारणाभावश्च नित्यानुवादः ॥ ६ ॥

विधिरिति चेत् ॥ ७ ॥

ऐष्टिकधर्मे सोमे ऽङ्गीकृत्य स्रुग्धारणाभिघारणयोः प्राप्तौ तन्निवृ-त्त्यर्थमेवेदं वचनं किं न स्यादित्याशङ्कते । विधिरिति । निषेधविधिः ॥ ७ ॥

न वाक्यशेषत्वात् ॥ ८ ॥

विधिपक्षं निराकुरुते । नेति । अस्य वाक्यस्यार्थवादरूपत्वात् । अवधिषुर्वा एतत्सोमं यदभिषुण्वन्ति यदस्य स्रुचो बाहू कुर्वन्ति यच्चा-ज्यमन्तिकमकार्षुः यदाह अंशुरंशुष्टे देव सोमाप्यायतामितिमन्त्रशेषार्थ-वादरूपत्वात् ॥ ८ ॥

शङ्कते चानुपोषणात् ॥ ९ ॥

इष्टिधर्माभावे साधकान्तरमाह । शङ्कते इति । यदनुपोष्य प्रया-याद्ग्रीवबद्धमेनममुष्मिँल्लोके निनीयेरन्नित्यनुपोषणं शङ्कते । इदमैष्टिकध-र्मत्वे इष्टावुपोषणस्य नियतत्वेन अनुपोषणशङ्का ऽनुपपन्नेति भावः ॥ ९ ॥

दर्शनमैष्टिकानां स्यात् ॥ १० ॥

एकशतं प्रयाजानुयाजा इत्यस्य गतिं चिन्तयति । दर्शनमिति । ऐष्टिकानां प्रयाजानुयाजदर्शनं तत्सोमाङ्गभूतदीक्षणीयाद्यवभृथान्तानां प्रयाजपरिगणनं स्यात् ॥ १० ॥

ऐन्द्राग्नादौ ऐष्टिकधर्मातिदेशः । अधि० ४ ।

इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ॥ ११ ॥

काम्येष्टयः नैमित्तिकाः अन्याश्चेष्टयः तासु दर्शपूर्णमासधर्मप्राप्तिः स्यात् । लिङ्गं प्रथमाधिकरणे दर्शितम् ॥ ११ ॥

Digitized by Google

अग्नीषोमीयपशौ दार्शिकधर्मातिदेशः । अधि· ५ ।

पशौ च लिङ्गदर्शनात् ॥ १२ ॥

पशौ अग्नीषोमीयपशौ च दर्शपूर्णमासधर्मः लिङ्गानामेकादश-प्रयाजानूयाजानां दर्शनात् ॥ १२ ॥

सवनीयादिपशौ अग्नीषोमीयधर्मातिदेशः । अधि· ६ ।

दैक्षस्य चेतरेषु ॥ १३ ॥

दैक्षस्य अग्नीषोमीयपशोः धर्मा इतरेषु तद्भिन्नपशुयागेषु । आल-भतिचोदनाचोदितत्वादिलिङ्गादिति पूरणीयम् ॥ १३ ॥

ऐकादशिनेषु सवनधर्मातिदेशः । अधि· ७ ।

ऐकादशिनेषु सौत्यस्य द्वैरशन्यदर्शनात् ॥ १४ ॥

ऐकादशिनाः पशव उदाहरणं, तेषु सौत्यस्य सवनीयपशोर्धर्माः । द्वैरशन्यस्य दर्शनात् । ऐकादशिनेषु द्वे द्वे रशने परिव्ययंतीति, सवनीयेऽपि रशनाद्वयमिति रशनाद्वयलिङ्गात् ॥ १४ ॥

पशुगणेषु ऐकादशिनधर्मातिदेशः । अधि· ८ ।

तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशु यूपदर्शनात् ॥ १५ ॥

त्रीन्वृषभानालभेतेत्यादिपशुगणेषु तत्प्रवृत्तिः ऐकादशिनधर्मप्रवृत्तिः स्यात् । प्रतिपशु सौत्रामण्याम् आश्विनं धूम्रमालभते सारस्वतं मेषमै-न्द्रमृषभमिति यागे यदित्रिषु यूपेष्वालभेत बहिर्धास्मादिन्द्रियं वीर्यं दध्या-दिति प्रतिपशु यूपमनूद्य दोषकथनदर्शनात् । यद्यग्नीषोमधर्मस्तत्र एक-यूपस्य नियतत्वेन तस्यैव नियमेन प्राप्तत्वेन यूपत्रयस्याप्राप्त्या तत्पक्षे दोषदानं विरुद्धम् । ऐकादशिने प्रत्येकं यूपस्य सत्त्वेन तद्धर्मप्राप्तौ तत्र दोष-कथनं युक्तमिति लिङ्गेन पशुगणे ऐकादशिनधर्मा इति भावः ॥ १५ ॥

अव्यक्तयागे सौमिकधर्मातिदेशः । अधि· ९ ।

अव्यक्तासु तु सोमस्य ॥ १६ ॥

विश्वजिता यजेतेति द्रव्यदेवतोभयवाचकपदरहितवाक्यप्रतिपा-द्ययागेषु सोमस्य धर्माः । सोमेन यजेतेत्यत्राप्युभयवाचकपदाभावात् । सो-मरूपद्रव्यसत्त्वेऽपि देवतावाचकपदाभावेनोभयाभावस्याविततत्वात् ॥ १६ ॥

Digitized by Google

अहर्गणेषु द्वादशाहिकधर्मातिदेशः । अधि० १० ।

गणेषु द्वादशाहस्य ॥ १७ ॥

गणेषु अहर्गणेषु सोमस्य धर्माः दिनगणसाध्यत्वदशोपसत्त्वलिङ्गात् ॥ १७ ॥

संवत्सरसत्रेषु गवामयनधर्मातिदेशः । अधि० ११ ।

गव्यस्य चैतदादिषु ॥ १८ ॥

एतदादिषु आदित्यानामयनं तपस्विनामयनमित्यादिषु संवत्सरसाध्यक्रतुषु गव्यस्य गवामयनस्य धर्माः संवत्सरसाध्यत्वेन सादृश्यात् ॥ १८ ॥

निकायिनामुत्तरेषु पूर्वनिकायिधर्मातिदेशः । अधि० १२ ।

निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिः स्यात् ॥ १९ ॥

साहस्राः साद्यस्क्रा इति एकनामकाः अहःसंघाः श्रूयन्ते । तेषां निकायिन इति संकेतः । तेषामह्नां मध्ये उत्तरेष्वहःसु पूर्वस्याह्नो धर्मप्रवृत्तिः स्यात् ॥ १९ ॥

फलादीनामनतिदेशः । अधि० १३ ।

कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्याननुवयस्तद्बन्धनत्वात् ॥ २० ॥

प्रकृतिवत्कर्तव्यमिति सौर्ययागवाक्ये पूरणमित्युक्तं प्राक् । तथा सति आग्नेयादिषण्णां प्रधानानां स्वर्गरूपफलस्य यावज्जीवहवननियमस्य कर्तुः स्वर्गकामकर्तृकत्वस्य च प्राप्तौ तावत्सौर्ययागाधिवारयति । कर्मणस्त्विति । सौर्ययागे कर्मणः प्रधानस्याकाङ्क्षाभावेनाप्रवृत्तत्वात् । अनतिदिष्टत्वात् फलादीनां त्रयाणां प्रधानेन सह बन्धनं संबन्धो येषां तत्त्वात्प्रधानानिवृत्तौ फलनियमकर्तृसमुदायस्याननुवयः अप्रवृत्तिः ॥ २० ॥

प्रवृत्तावपि तादर्थ्यात् ॥ २१ ॥

सौर्ययागे प्रधानकर्मणः उपकारकाकाङ्क्षामात्रमस्ति नान्यत् । यच्च प्रकृतौ प्रधानोपकारकत्वेन क्लृप्तं तस्यैवाकाङ्क्षया ग्रहणं वक्तव्यम् । एवं सति फलं पुरुषोपकारकं तथा यावज्जीवनियमो ऽपि पुरुषार्थः तथा

कर्मापि स्वर्गकामार्थे न स्वर्गकामः कर्मार्थः तथा प्रधानकर्मापि फलार्थम-मीषां मध्ये कस्यापि क्रत्वर्थत्वाभावादतिदिष्टमपि व्यर्थमेव स्यादित्याह । प्रवृत्ताविति । तादर्थ्याद् उक्तानां पुरुषार्थत्वात् । प्रवृत्तौ अतिदेशेन प्राप्तावपि, विफलं स्यादिति शेषः ॥ २१ ॥

अश्रुतित्वाच्च ॥ २२ ॥

ननु मासाग्निहोत्रे प्रधानातिदेशवदत्राप्यस्त्वित्यत आह । अश्रुतीति । अश्रुतित्वात् । अत्र प्रधानातिदेशस्याशास्त्रत्वात् । अग्निहोत्रवदिति साङ्गप्रधानातिदेशो नाम्ना, अत्र दर्शपूर्णमासोपकारवत्सौर्योपकारं संपादयेदित्येव, अतः प्रधानातिदेशो ऽश्रुत इति भावः ॥ २२ ॥

गुणकामानामप्यनतिदेशः । अधि॰ १४ ।

गुणकामेष्वाश्रितत्वात्प्रवृत्तिः स्यात् ॥ २३ ॥

प्रधानफलातिरिक्तपश्वादिसाधनानां गोदोहनादीनां सौर्ययागे अतिदेशोऽस्ति न वेति संशये पूर्वपक्षमाह । गुणकामेष्विति । गुणाद्गोदोहनात्कामः पश्वादीच्छायां सत्यां गोदोहनादेः प्रवृत्तिः स्यात् । आश्रितत्वात्प्रणयनाश्रितत्वात् । आश्रयसत्त्वे आश्रितसत्त्वमावश्यकं पटसत्त्वे पटाश्रितचित्रसत्त्वं तथा ॥ २३ ॥

निवृत्तिर्वा कर्मभेदात् ॥ २४ ॥

सिद्धान्तमाह । निवृत्तिरिति । निवृत्तिरिति । गोदोहनस्य विकृतौ निवृत्तिः कर्मभेदात् । चमसगोदोहनयोः फलभेदात् । चमसः क्रत्वर्थः गोदोहनं पुरुषार्थः क्रत्वर्थस्यैवाकाङ्क्षा ऽत्रेति भावः ॥ २४ ॥

अपि वा ऽतद्विकारत्वात्क्रत्वर्थत्वात्प्रवृत्तिः स्यात् ॥ २५ ॥

ननु खादिरं वीर्यकामस्य यूपं कुर्यादिति श्रुते खादिरप्रवृत्तिरपि विकृतौ न स्यादत आह । अपि वेति । खादिरप्रवृत्तिर्युक्ता अतद्विकारत्वात् । क्रत्वर्थो यः तद्विकारो यः, तद्विकारत्वं च क्रत्वर्थत्वाभावे सति क्रत्वर्थकार्यकारित्वं, यथा गोदोहनादेः चमसकार्यकारित्वं, तद्भिन्नत्वाद् अस्य खादिरत्वस्य क्रत्वर्थत्वाच्च ॥ २५ ॥

सौर्ये चरौ अभिमर्शनद्वयस्य विकल्पः । अधि० १५ ।

एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥ २६ ॥

चतुर्होत्रा पौर्णमास्यां हवींष्यासादयेत् पञ्चहोत्रा ऽमावस्यायामिति प्रकृतौ श्रुतम्। इदं सौर्ययागे अतिदेशेन प्राप्तं, तद्यथा प्रकृतौ कालद्वये मन्त्रद्वयं नियतं तथैव सौर्ययागे ऽपि नियतमिति पूर्वपक्षे सिद्धान्तमाह। एककर्मणीति। हि यतः सौर्ययागस्याविभागः भेदाभावः अविभागे हेतुः चोदनैकत्वात्। एकविधिविहितत्वात्। अत एककर्मणि विकल्पः। चतुर्होत्रा पौर्णमासीमिति वाक्ये पौर्णमासीशब्दो न कालपरः किं तु कर्मपरः। तत्र दर्शपूर्णमासयोः कर्मणोर्भिन्नत्वाद्व्यवस्था युक्ता। इह आग्नेरुभयत्र सत्त्वेन मन्त्रद्वयस्याप्याग्नेयधर्मत्वादत्रोभयोः प्राप्तौ एकार्थास्तु विकल्पेरन्निति विकल्प इति भावः ॥ २६ ॥

सौर्ये आग्नेयधर्मातिदेशः । अधि० १६ ।

लिङ्गसाधारण्याद्विकल्पः स्यात् ॥ २७ ॥

सौर्ययागे आग्नेयाग्नीषोमीयधर्मयोर्विकल्पेन प्राप्तिरिति पूर्वपक्षमाह। लिङ्गेति। उभयत्र लिङ्गसाधारण्यात्। ओषधिद्रव्यस्य तुल्यत्वाद्विकल्पः ॥ २७ ॥

ऐकार्थ्याद्विनियम्येत पूर्ववत्त्वाद्विकारो हि ॥ २८ ॥

सिद्धान्तमाह। ऐकार्थ्यादिति। हि यतः सौर्ययागः विकारो विकृतिः भवति पूर्ववत्त्वात्प्रकृतिधर्मसापेक्षत्वात्तत्रैकार्थ्यात्। एकदेवताकत्वात्। नियम्येत आग्नेयविध्यन्तो नियम्येत ॥ २८ ॥

अश्रुतत्वान्नेति चेत् ॥ २९ ॥

सौर्यमिति तद्धितान्तेन पदेन सूर्यो देवता ऽस्येति सूर्यो इति वा नियन्तुमशक्यत्वादश्रुतमेकदेवताकत्वमित्याशङ्कते। अश्रुतत्वादिति ॥ २९ ॥

स्याल्लिङ्गभावात् ॥ ३० ॥

अमुमेवादित्यं स्वेन भागधेयेनोपधावतीत्यर्थवादे सूर्यपर्यायादि-

त्यपदोत्तरमेकवचनलिङ्गम् एकदेवताकत्वनियामकमित्याह । स्यादिति । लिङ्गभावात् । उक्तलिङ्गसत्त्वात् ॥ ३० ॥

तथा चान्यार्थदर्शनम् ॥ ३१ ॥

अन्यस्मिन्, उदुत्यं, चित्रमिति मन्त्रद्वये अर्थस्य एकवचनस्य दर्शनम् ॥ ३१ ॥

हविर्देवतयोर्विकल्पे हविःसामान्यस्य बलीयस्त्वम् । अधि० १७ ।

विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात् ॥ ३२ ॥

ऐन्द्रमेकादशकपालं निर्वपेदिति श्रुतम् । अत्र देवतालिङ्गेन पयोधर्माः एकादशकपालादिलिङ्गेन पुरोडाशधर्माः इति विरोधे कथमनुष्ठानमिति चिन्तायां सिद्धान्तमाह । विप्रतिपत्ताविति । उक्तरीत्या विप्रतिपत्तौ विरोधे हविषा हविःसादृश्यादेव नियम्येत कर्मणः तदुपाख्यत्वाद् अन्तरङ्गत्वात् । कर्मोत्पत्तिवाक्येन कर्मणि बोध्ये कर्मबोधकपदेन साकं संनिहितं द्रव्यवाचकं पदम् । तथा हि, निर्वपतिधातुवाच्यं कर्म, द्रव्यवाचकः तद्धितः । तेन व्यवहितं देवतावाचकम् । अव्यवहितश्च तद्धितः । अतो देवता बहिरङ्गं द्रव्यं यागस्यान्तरङ्गं, विरोधे द्रव्यलिङ्गेन देवतालिङ्गं बाध्यतइति भावः ॥ ३२ ॥

तेन च कर्मसंयोगात् ॥ ३३ ॥

तेनेति । तेन हविषा संयुज्य कर्म चोद्यते, सोयं चरुमैन्द्रमेकादशकपालं निर्वपेदिति । हविः कर्मणि साक्षात्प्रकारः, देवता च हविर्द्वारा, अतो ऽपि हविर्लिङ्गं प्रबलम् ॥ ३३ ॥

गुणत्वेन देवताश्रुतिः ॥ ३४ ॥

गुणत्वेन देवताश्रुतिः हविषो विशेषणत्वेन देवताश्रुतिः । तद्धितार्थे प्रकृत्यर्थो विशेषणं, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात् । विशेषणापेक्षया विशेष्यस्य प्रबलत्वादिति भावः ॥ ३४ ॥

घृतकम्बलाख्यहिरण्ये औषधधर्मातिदेशः । अधि० १८ ।

हिरण्यमाज्यधर्मस्तेजस्त्वात् ॥ ३५ ॥

Digitized by Google

प्राजापत्यं शतकृष्णलं चरुर्निर्वपेदिति । शतकृष्णलं सुवर्णशकलशतम् । सुवर्णे आज्यधर्माः पुरोडाशधर्मा वेति संशये पूर्वपक्षमाह । हिरण्यमिति । आज्यधर्मः तेजस्त्वात् । प्रतिबिम्बाधिष्ठानाद् उभयोः सादृश्यमिति ॥ ३५ ॥

धर्मानुग्रहाच्च ॥ ३६ ॥

धर्माणां यजमानपत्न्यावेक्षणादिरूपाणामाज्यधर्माणामनुग्रहात् । अबाधात् । पुरोडाशधर्मत्वे वितुषीभावरूपद्वारलोपेनावहननादीनां बाध एव स्यादिति भावः ॥ ३६ ॥

औषधं वा विशदत्वात् ॥ ३७ ॥

सिद्धान्तमाह । ओषधमिति । ओषधिसंबन्धिनो धर्माः विशदत्वात् कठिनत्वात् ॥ ३७ ॥

चरुशब्दाच्च ॥ ३८ ॥

चरुशब्दाच्चेति । चरुशब्दश्चौषधिधर्मप्रापकः । आज्ये चरुव्यवहाराभावादिति भावः ॥ ३८ ॥

तस्मिंश्च श्रपणश्रुतेः ॥ ३९ ॥

तस्मिंश्चेति । तस्मिंश्चाज्ये श्रपणश्रवणात् । न हि आज्यधर्मः श्रपणं किं त्वौषधिधर्म इति भावः ॥ ३९ ॥

मधूदके उपांशुयाजीयाज्यधर्मातिदेशः । अधि० १६ ।

मधूदके द्रवसामान्यात्पयोविकारः स्यात् ॥ ४० ॥

चित्रायागे, दधि मधु घृतमापो धाना इति । अत्र मधूदकयोः पयोधर्मा आज्यधर्मा वेति संशये पूर्वपक्षमाह । मध्विति । मधूदके पयोविकारः पयोधर्मः स्याद् द्रवसामान्यात् । द्रवत्वेन साजात्यात् ॥ ४० ॥

आज्यं वा वर्णसामान्यात् ॥ ४१ ॥

सिद्धान्तमाह । आज्यमिति । आज्यमाज्यधर्मा एतयोः । वर्णेन साम्यात् ॥ ४१ ॥

धर्मानुग्रहाच्च ॥ ४२ ॥

Digitized by Google

अपरं साधकमाह । धर्मेति । आज्यधर्माणां बहूनामनुग्रहो भवति । पयोधर्मत्वे दोहनादिबहुधर्माणां बाधः स्याद् इति भावः ॥ ४२ ॥

पूर्वस्याविशिष्टत्वात् ॥ ४३ ॥

पूर्वपक्षसाधकहेतुरस्मदनुमत इत्याह । पूर्वस्येति । पूर्वस्य पूर्वपक्षोक्तस्य द्रवत्वेन सादृश्यस्य अविशिष्टत्वात् । आज्ये ऽपि सत्त्वाद् अविरोध इति भावः ॥ ४३ ॥

इति श्रीजैमिनिसूत्रवृत्तौ अष्टमाध्यायस्य प्रथमः पादः ॥ १ ॥

चातुर्मास्यसौत्रामण्योरैष्टिकधर्मातिदेशः । अधि० १ ।

वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥ १ ॥

चातुर्मास्ये वाजिभ्यो वाजिनमिति श्रुतम् । तथा सौत्रामण्यां सुराग्रहाः आश्विनं ग्रहं गृह्णातीति । अत्रोभयत्र ऐष्टिको विध्यन्त उत सौमिक इति संशये पूर्वपक्षमाह । वाजिनइति । सौत्रामण्यां वाजिने च सोमपूर्वत्वं सोमधर्मत्वम् । ताच्छब्द्यात् । सोमो वै सुरा सोमो वै वाजिनमिति शब्दात् । नात्र वाजिनसुरयोः सोमाभेदः प्रत्यक्षविरोधात् । अतः सोमपदस्य सोमधर्मके लक्षणेति भावः ॥ १ ॥

अनुवषट्काराच्च ॥ २ ॥

वाजिनस्याग्ने वीहीति सुराया वीहीति, अनुवषट्कारो ऽपि सोमधर्मप्राप्तौ लिङ्गमित्याह । अन्विति । स्पष्टम् ॥ २ ॥

समुपहूय भक्षणाच्च ॥ ३ ॥

शेषं समं विभज्य समुपहूय भक्षयन्तीति समुपहूय भक्षणमपि लिङ्गमित्याह । समुपहूयेति । समुपहूय अध्वर्य उपहूयस्व ब्रह्मन्नुपहूयस्वेत्यादिमन्त्रैरुपह्वानमन्त्रेणाहूय ॥ ३ ॥

क्रयणश्रपणपुरोरुगुपयामग्रहणासादनवासोपनहनं च तद्वत् ॥ ४ ॥

किं च क्रयादयः सोमधर्माः सुरायां दृश्यन्ते । अतो ऽपि सोमप्रकृतिक इत्याह । क्रयणेति । यथा सोमस्य क्रयः एवं सुरायाः, सीसेन क्लीबा-

Digitized by Google

च्छ्रयाणि श्रीणातीति श्रूयते । मैत्रावरुणं पयसा श्रीणातीतिवदाश्विनं सक्तुभिः श्रीणातीति श्रपणम् । एका पुरोरुक् एका याज्यैव न पुरोनुवाक्या । उपयामगृहीतो ऽस्यच्छिद्राय त्वेति उपयामयुक्तमन्त्रवत्त्वम् । आश्विनं ग्रहं गृह्णातीति ग्रहणलिङ्गम् । गृहीत्वा ऽऽसादयतीत्यासादनलिङ्गम् । चिरात्रं संहता वसन्ति क्षौमे वासस्युपनिबद्धा इति वासोपनहनम् । एतादृशलिङ्गानि सोमप्रकृतिकत्वमुपोद्बलयन्तीति भावः ॥ ४ ॥

हविषा वा नियम्येत तद्विकारत्वात् ॥ ५ ॥

सिद्धान्तमाह । हविषेति । हविषा हविःसादृश्येन नियम्येत ऐष्टिकधर्मा नियम्येत । तस्य दर्शपूर्णमासिकहविषः विकारौ सुरावाजिने । सुरा ओषधिद्रव्यविकारः । वाजिनं सान्नाय्यविकारः । अतः हविषा नियम्येत ॥ ५ ॥

प्रशंसा सोमशब्दः ॥ ६ ॥

ननु सोमो वै सुरेति वाक्यस्य का गतिरत्राह । प्रशंसेति । सोमशब्दः प्रशंसा स्तुत्यर्थः । अमात्ये राजशब्दवत् ॥ ६ ॥

वचनानीतराणि ॥ ७ ॥

वचनानीति । एवं द्रव्यसादृश्येन ऐष्टिकविध्यन्ते सिद्धे आमनहोमादिवद् विशेषधर्मत्वेन इतराणि क्रयादीनि तानि वाचनिकानि विधीयन्त । न हि वचनस्यातिभारो ऽस्तीति भावः ॥ ७ ॥

व्यपदेशश्च तद्वत् ॥ ८ ॥

व्यपदेशः इति । शष्पैरेव दीक्षणीयामाप्नोति तोक्मभिः प्रायणीयां सिंहलोमभिरातिथ्यामिति व्यपदेशो ऽपि तद्वत् । सोमशब्दवत् स्तुतिरूपः ॥ ८ ॥

पशुपुरोडाशस्य च लिङ्गदर्शनात् ॥ ९ ॥

लिङ्गं च दर्शयति । पश्विति । नैतेषां पशूनां पुरोडाशा भवन्ति ग्रहपुरोडाशा ह्येतइत्यनेन पुरोडाशप्रतिषेधं कृत्वा ग्रहपुरोडाशा ह्येतइत्यनेन ग्रहाणां पुरोडाशधर्मत्वेन पुरोडाशकार्ये ग्रहा एव कुर्युः इति स्तुतिः लिङ्गमिति भावः ॥ ९ ॥

पशोः सान्नाय्यधर्मातिदेशः । अधि० २ ।

पशुः पुरोडाशविकारः स्याद् देवतासामान्यात् ॥ १० ॥

अग्नीषोमीयः पशुः पुरोडाशधर्मा वा सान्नायधर्मा वेति संशये पूर्वपक्षमाह । पशुरिति । पशुः पशुयागः पुरोडाशविकारः स्याद्देवतासामान्यात् । अग्नीषोमीयदेवतासादृश्यात् ॥ १० ॥

प्रोक्षणाच्च ॥ ११ ॥

अग्नीस्त्वौषधीभ्यो जुष्टं प्रोक्षामीति पशुं प्रोक्षतीति प्रोक्षणस्य पुरोडाशधर्मस्य श्रवणमपि तथात्वे लिङ्गमित्याह । प्रोक्षणाच्चेति । स्पष्टम् ॥ ११ ॥

पर्यग्निकरणाच्च ॥ १२ ॥

पर्यग्नीति । व्याख्यातम् ॥ १२ ॥

सान्नाय्यं वा तत्प्रभवत्वात् ॥ १३ ॥

सिद्धान्तमाह । सान्नाय्यमिति । सान्नाय्यं सान्नायधर्मः स्यात् । तत्प्रभवत्वात् । पशुप्रभवत्वसाजात्यात् ॥ १३ ॥

तस्य च पात्रदर्शनात् ॥ १४ ॥

तस्य चेति । तस्य पशोः पात्रस्य कुम्भ्याः, कुम्भ्यां श्रपयतीति दर्शनात् ॥ १४ ॥

पशोः पयोधर्मातिदेशः । अधि० ३ ।

दध्नः स्यान्मूर्तिसामान्यात् ॥ १५ ॥

सान्नाय्यमध्ये दध्नो धर्माः पयसो वेति संशये पूर्वपक्षमाह । दध्न इति । दध्नो धर्मः स्यान्मूर्त्तेः घनीभावस्य सामान्यात् सादृश्यात् ॥ १५ ॥

पयो वा कालसामान्यात् ॥ १६ ॥

सिद्धान्तमाह । पय इति । कालसामान्यात् । एकाहसाध्यत्वरूपकालसामान्यात् ॥ १६ ॥

पश्चानन्तर्याच्च ॥ १७ ॥

पश्चानन्तर्यात् पशुप्रभवमध्ये प्रथमं पयः पश्चाद्दधीति पयः पशोरन्तरङ्गमिति भावः ॥ १७ ॥

द्रवत्वं चाविशिष्टम् ॥ १८ ॥

द्रवत्वं, पशुरपि द्रवति पयो ऽपि द्रवतीत्यविशेषं द्रवत्वेनापि साजात्यम् ॥ १८ ॥

आमिक्षायां पयोधर्मातिदेशः । अधि० ४ ।

आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥ १९ ॥

सा वैश्वदेव्यामिक्षेति श्रुतो यागः पयोदध्युभयधर्मः स्यादुभयभाव्यत्वात् । पयोदध्युभयजन्यत्वात् ॥ १९ ॥

एकं वा चोदनैकत्वात् ॥ २० ॥

द्वितीयपक्षमाह । एकमिति । एकं वा विकुर्यात् । एकविधिविहितत्वात् । एकविध्यन्तेन निराकाङ्क्षत्वान्नोभयमिति भावः ॥ २० ॥

दधि संघातसामान्यात् ॥ २१ ॥

पक्षान्तरमाह । दधिधर्मः । संघातसामान्याद् घनीभावेन तुल्यत्वात् ॥ २१ ॥

पयो वा तत्प्रधानत्वाल्लोकवद्दध्नः तदर्थत्वात् ॥ २२ ॥

सिद्धान्तमाह । पयो वेति। पयः पयोधर्माः तत्प्रधानत्वात् । पयसो भूयस्त्वात् । लोके पयसो घनीभावार्थं दध्यातञ्चनं क्रियते तद्वत्प्रकृते ऽपि दध्नः दधिनिक्षेपस्य तदर्थत्वात् पयसो घनीभावार्थत्वात् ॥ २२ ॥

धर्मानुग्रहाच्च ॥ २३ ॥

धर्मा एकाहसाध्यत्वादिधर्माः आमिक्षायागे लिङ्गान्तरेणान्तिमसूत्रे दर्शयिष्यमाणेन क्लृप्ताः । तदनुग्रहश्च भवति ॥ २३ ॥

सद्योभावं च दर्शयति ॥ २४ ॥

सद्योभावमिति । सद्योभावमेकाहसाध्यत्वं दर्शयति, शृपन्तां शुज्यं पय इति देवतायाः पयः सेवनं दर्शयति । इदं लिङ्गं दधिधर्मत्वे द्व्यहसाध्यदध्नः सेवनं न पयस इति लिङ्गं बाध्येत । अतः एकाहसाध्यत्वं लिङ्गं द्रढयति ॥ २४ ॥

Digitized by Google

द्वादशाहे सत्राहीनयोरुभयथा धर्मातिदेशः । अधि॰ ५ ।

सत्रमहीनश्च द्वादशाहस्तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ २५ ॥

अस्ति द्वादशाह इति क्रतुः । तस्य रूपद्वयं सत्रमहीनश्चेति । तयो-रूपयोर्धर्मभेदः । सत्रे ये यजमानास्त ऋत्विज इति । सर्वे ऽपि दीक्षेर-न्निति । अहीनस्य धर्मा द्वादशोपसत्त्वादयः । द्विरात्राद्यहीनानां गवाम-यनादिसत्राणां च द्वयो द्वादशाहः प्रकृतिरिति पूर्वमुक्तम् । एवं सति द्विरात्रादिषु अहीनेषु गवामयनादिसत्रेषु च प्रत्येकमुभयधर्माः प्रवर्तन्तउत सत्रे सत्रधर्मा अहीने अहीनधर्मा इति संशये पूर्वपक्षमाह । सत्रमिति । द्वादशाहः सत्रमहीनश्चेत्युभयस्वभावः । तस्य द्वादशाहधर्मस्य उभयथा उभयप्रकारैः प्रत्येकं प्रवृत्तिः । ऐककर्म्यात्कर्मण एकत्वात् ॥ २५ ॥

अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् ॥ २६ ॥

सिद्धान्तमाह । अपि वेति । यत्र यजतिः तत्र अहीनभूतस्य धर्मस्य प्रवृत्तिः स्यात् । प्रकृतौ द्वादशाहेन प्रजाकामं याजयेदिति यजतिश्रुतेः प्रकृत्या तुल्यशब्दत्वात् । य एवं विद्वान् द्विरात्रेण यजतइति प्रकृतिसदृ-शशब्दत्वात् । अहीनधर्मे अहीने क्लृप्ते तुल्यन्यायेन सत्रधर्मा अपि सत्रे इति सिद्धम् ॥ २६ ॥

द्विरात्रादीनामेकादशरात्रादहीनत्वं यजतिचोदनात् ॥ २७ ॥

अहर्गणमध्ये कियतामहीनत्वं सत्रत्वं कियतां तद्व्यवस्थामाह । द्विरात्रेति । द्विरात्रे द्विरात्राद्येकादशरात्रान्तानामहीनत्वं यजतिधातुपाठः तेन चोदनात् विधानात् ॥ २७ ॥

लिङ्गाच्च ॥ २८ ॥

अग्निष्टोमो वै प्रजापतिः स उत्तरानेकाहानसृजत तमेनं द्विरात्रा-दयो ऽहर्गणा ऊचुः त्वमस्मान्मा हासीरिति तदेषामहीनत्वमिति द्विरा-त्रादीनामहीनत्वे लिङ्गमित्याह । लिङ्गेति ॥ २८ ॥

पञ्चदशरात्रादिषु सत्रधर्मातिदेशः । अधि॰ ६ ।

अन्यतरतोऽतिरात्रत्वात् पञ्चदशरात्रस्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनत्वदर्शनात् ॥ २९ ॥

पञ्चदशरात्रः कुण्डपायिनामयनं च अहीनः सत्रं वेति संशये पूर्वपक्षमाह । अन्यतरेति । पञ्चदशरात्रस्य कुण्डपायिनामयनस्य चाहीनत्वमन्यतरतः आद्यन्तयोर्मध्ये अन्यतरदेशे अतिरात्रसंज्ञकस्य सत्त्वात् । तद्भूतेषु अन्यतरस्मिन् अतिरात्रवत्सु तेषु अहीनत्वदर्शनात् । यदन्यतरतोऽतिरात्रास्तेनाहीना इति श्रवणात् ॥ २९ ॥

अहीनवचनाच्च ॥ ३० ॥

उक्तवाक्ये अहीन इति प्रत्यक्षवचनाच्च ॥ ३० ॥

सत्रे वोपेयिचोदनात् ॥ ३१ ॥

सिद्धान्तमाह । सत्रइति । ते उभे सत्रे उपेयिचोदनात् । उपेयुरिति उपघटितेन पञ्चदशरात्रमुपेयुरिति वाक्येन विधेः ॥ ३१ ॥

सत्रलिङ्गं च दर्शयति ॥ ३२ ॥

कुण्डपायिनामयने सत्रलिङ्गं गृहपतिः सुब्रह्मण्यः सुब्रह्मण्य इति गृहपतिर्लिङ्गं, सत्रएव गृहपतिरिति व्यवहारो नान्यत्र । अतः सत्रलिङ्गमिति भावः ॥ ३२ ॥

इति जैमिनिसूत्रवृत्तौ अष्टमाध्यायस्य द्वितीयः पादः ॥ २ ॥

शुचिदेवते आग्नेयस्याग्नावैष्णवे चाग्नीषोमीयस्य धर्मातिदेशः । अधि॰ १ ।

हविर्गणे परमुत्तरस्य देशसामान्यात् ॥ १ ॥

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुरिति । तथा ऽग्नये पवमानायाष्टाकपालमग्नये पावकायाग्नये शुचयइति । आग्नावैष्णवयागस्याग्नेययागः प्रकृतिः उताग्नीषोमीय इति संशये पूर्वपक्षमाह । हविरिति । हविर्गणे द्वितीये उक्तोदाहरणे उत्तरस्याग्नेः पावकस्य पर उपांशुयागः प्रकृतिः तथा प्रथमोदाहरणे प्रथ-

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता श्री तै॰ रामशास्त्रिणा संशोधितः	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≡)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी,	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४)
मानवधर्म्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका,	१)
अमरकोशः सटीकः	४)
श्लोकवार्तिकम्	३॥≡)
शीतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्प-णीसहितम्	५॥।)
श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतश्रुतप्रकाशिकाविषमपदटिप्पणीसमेतः	७।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	६)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	३≡)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः ।	२।)
वेदपूर्त्तः प्रथमो बिन्दुः सत्संप्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥≡)
वेदपूर्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता,	७॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstri, Professor, Sanskrit College, Benares. 1

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 17

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 33

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 41

Digitized by Google

काशीविद्यासुधानिधिः

THE PAṆḌIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 2.] February, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

कृतत्वं-वेदविदुत्तमैः सर्वैर्बोधायन-टङ्क-द्रमिड-गुहदेव-कपर्दि-भारुचिप्रभृतिभिर्भगवत एव परत्वेनाङ्गीकृतत्वम् । एतत्सर्वं सदाचार्य्यशिक्षाजनितप्रज्ञासंस्कारभाजाम् आत्मेश्वरमिति स्वप्रधानतयाऽधीते भगवति प्रमाणं भवतीति ॥ १२ ॥

कश्चिदाह ईश्वरशब्दो निर्विशेषणो महत्परमशब्दविशेषितश्च कस्यचित् समाख्या अन्यस्य त्वेवं विविधः पुरुषशब्दः अतस्तयोरवसीयते परावरभाव इति अपेन्द्रप्रतिबन्दिं सहोक्त्या सूचयन् प्रतिवक्ति । इन्द्रेशानादीति ।

मू० इन्द्रेशानाद्यभिख्या स्वयमिह महदाद्युक्ति-
भिर्वा विशिष्टा तत्तत्पारम्यमानं न भवति
बलवद्भूमिमानोपरोधात् । नो चेत्स्यान्नैक
ईशो न भवति यदि वा कश्चिदन्योन्यबा-
धाल्लोकेऽप्यन्वर्थभावं न हि दधति महाबृ-
हमुख्यास्समाख्याः ॥ १३ ॥

टी० अयं भावः इन्द्रशब्दो हि परमैश्वर्य्यवाचिधातुनिष्पन्नः केवलोऽपि परमेश्वरत्वं ब्रूते किमुत महत्पूर्वः तथाऽपि येन तत्र समाख्यासङ्कोचः स रुद्रेऽपि समः कार्य्यत्वकर्मवश्यत्वयोस्समत्वादिति । समाख्यातः श्रुत्यादेर्बलीयस्त्वं सूचयन् हेतुमाह । बलवदिति । एवमनभ्युपगमे बाधकप्रसङ्गद्वयमाह । नो चेदिति । समाख्यामात्रावलम्बने रुद्रेन्द्रादयो बहव ईश्वराः स्युः न वा कश्चित्तुल्ययोगक्षेमत्वादिति भावः । समाख्याबाधकत्वं सर्वसम्प्रतिपत्त्या दर्शयति । लोकेऽपीति । महौषधमहानद्यादिसंग्रहाय मुख्यशब्दः ॥ १३ ॥

इति भगवत्परत्वम् ।

Digitized by Google

अथात्र न्यायाभावमूलानि मतान्तराण्यनूद्य तेषां दत्तोत्तरत्वमाह । एकमिति ।

मू० एकं त्रेधा विभक्तं त्रितयसमधिकं तत्त्वमीशास्त्रयस्ते विष्णवन्या मूर्त्तिरीष्टे प्रभवननियमः कल्पभेदात्त्रयाणाम् । इन्द्रादीनामिव स्यान्निजसुकृतवशादीश्वराणां प्रवाहः स्यादेकस्येश्वरत्वं प्रतिफलनवदित्यादि चैवं परास्तम् ॥ १४ ॥

टी० एकस्यैव रामकृष्णादिवत् साक्षादवतारे त्रिधा विभाग इति पक्षः एकैव मूर्त्तिर्बिभिदे त्रिधा*ऽस्येत्यादिषु विवक्षितः, तत्र मूलभूतानां विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते । सृष्टिस्थित्यन्तकरणीमित्यादीनां तवान्तरात्मा मम चेत्यादिवाक्यान्तरानुविधानात् शेषद्व्यवधानेन द्वयोरेकव्यवधानेन च †प्रतीतिं व्याचख्युः त्रिमूर्त्युत्तीर्णं पुरुषान्तरं सच्चिन्मात्रं वा परतत्त्वमिति पक्षे स संज्ञां याति भगवानेक एव जनार्दनः इत्यादिभिरपि बाधः परस्परं भिन्ना ईश्वरास्त्रय इति पक्षस्त्वेकस्य सर्वप्रशासितृत्वादिभिर्निरस्तः विष्णोरन्य एव ब्रह्मा रुद्र आदित्यो वा कश्चिदीश्वर इति वादोऽपि विष्णोरेव सर्वेश्वरत्वस्थापनादपास्तः । त्रय ईश्वरास्तत्त्वादिगुणोन्मेषभिदुरकल्पभेदाच्चक्रनेमिनीत्या निम्नोन्नतैश्वर्य्या इति कल्पनाऽपि निरस्ता प्रवाहेश्वरपक्षश्च न कर्मणा वर्द्धते नो कनीयान् स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्यादिश्रुतिभिरवधूतः । अस्त्वेक एवेश्वरः तस्येश्वरत्वं नित्यसत्त्वविशेष-

* त्रिधा सेति पा० । † वृत्तिमिति पा० ।

Digitized by Google

सन्निधाननिबन्धनं प्रतिफलनकल्पमिति योगराद्धान्तश्च पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिभिरपोढः आदिशब्देन नित्यचिकीर्षाप्रयत्नाश्रयश्चिकीर्षारहितोऽपि वा ज्ञानप्रयत्नमात्रवानित्यादिमतभेदसङ्ग्रहः । एवं-श्रुतिलिङ्गादिप्राबल्यस्थापनप्रकारेणेत्यर्थः ॥ १४ ॥

इति त्रिमूर्त्यैक्यादिपक्षनिरासः ।

श्रुतिसिद्ध ईश्वर इत्युक्तम् । अनुमानतोऽपि सिद्ध इति वदन्तः प्रतिवक्तव्याः तत्र तावदुपदेशलिङ्गं दूष्यते । सर्गादीनामिति ।

मू० सर्गादीनामसिद्धौ न हि निगमगिरां भज्यते सम्प्रदायस्तत्सिद्धौ नानुमानं प्रभवति यदिदं बाधशून्यं विपक्षे । आप्तेभ्यस्तत्प्रसिद्धौ सह परिपठनाद्विश्वकर्त्ताऽपि सिद्ध्येद्धर्मानुष्ठापनार्थं तदनुमितिरतो नैव शक्या कदाचित् ॥ १५ ॥

टी० किमस्मदादीनां धर्मोपदेशार्थमीश्वरः कल्प्यते उत कल्पादिसंभवानां पुरुषविशेषाणां नाद्यः पित्रादिक्रमेण सम्प्रदायप्रवृत्तेरीश्वरनैरपेक्ष्यात् पित्रादिप्रेरणार्थमीश्वरोऽपेक्षित इति चेन्न तर्हीदमुपदेशलिङ्गं कार्य्यलिङ्गानुप्रवेशात् । न द्वितीयः सर्गाद्यसिद्धाविदानीमिवानादिसम्प्रदायाविच्छेदेन तत्प्रवर्त्तकानपेक्षणात् सिद्धिस्तु सर्गादेरनुमानात् आगमाद्वेति विकल्पे पूर्वं दूषयति । तत्सिद्धाविति । अयं भावः विश्वसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवदित्यनुमानं तावत्सर्वात्ममोक्षमिच्छतामन्त्यमुक्तिसमयभाविना सर्वकार्य्योच्छेदेन चरितार्थं स्यात्, वर्त्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादि-

Digitized by Google

तत्सजातीयसन्तानान्तराः नित्यत्वे सति तदारम्भकत्वात् घटादि-परमाणुवदिति । अथाप्युपचयापचयभिदुरब्रह्माण्डभेदेन तत्तत्पर-मूनां प्रागपि ब्रह्माण्डसन्तत्यन्तरारम्भसंभवेनार्थान्तरत्वापातादिति साधारणदोषमाह । यद्विदमिति । न तावत् सर्गाद्यभावे काचिदनु-पपत्तिः यद्यप्यारब्धानां भावानां नश्वरत्वमात्रं गम्यते तथाऽपि तत्सन्ततीनामनुच्छेदोक्तौ न विरोधः । यदुक्तम् ।

> प्रमायाः परतन्त्रत्वात् सर्गप्रलयसंभवात् ।
> तदन्यस्मिन्ननाश्वासान्न विधातुरसंभवः ॥

इति । तत्राद्यो हेतुर्बुद्धिसरे दूषयिष्यते द्वितीयस्त्विदानीं दूषितः । तृतीयोऽपि विमतः संभवन्ति हि सर्गादिकाले प्राचीनसु-कृतसञ्चयविपाकवै*चित्र्यात् प्रतिबुद्धवेदराशयो देवा महर्षयश्च ते युष्माभिरपि वेदवक्तुराप्तिख्यापनाय तदुपदेशग्रहणप्रवचनाद्यर्थेषु स्वीकृताः ऋषित्वमपि सुप्तप्रबुद्धन्यायेन सुकृतवशात् प्रागधीत-प्रस्मृतवेदभागप्रत्यक्षीकरणमेव, श्रूयते हि अजान्हवै पृश्नींस्तपस्य-मानान् ब्रह्म स्वयंभ्वभ्यानर्षत् त ऋषयोऽभवँस्तदृषीणामृषित्व-मिति । अतस्तैरेव सर्गोपपत्तौ किमन्येन । एतेन बहुपरिग्रहगौरवं चापास्तं विजातीयक्लृप्तावेव हि गौरवं, न च बहुष्वनाश्वासः एक-स्मिन्निव तेष्वपि तत्परिहारस्य समत्वादिति । आगमात्सर्गादि-सिद्धौ सर्वकर्तुरपि तत एव सिद्धिमाह । शास्त्रेभ्य इति । सर्वकर्तारं पुरस्कृत्यैव हि सर्गादिकथनमतोऽनुमेयं नावशिष्यत इति भावः । विमतं प्रतिप्रयोगसंभवेऽप्यनुमानासामर्थ्यं दर्शितम् । सांख्यागमैः सर्गादिसिद्धिः स्यादिति चेन्न श्रुतिविरोधे बाधात् अन्यथा सेश्वर-

* वैजात्यादिति पा॰ ।

Digitized by Google

सांख्येऽनुमेयाभाव एवेति । अनुमानान्तरेऽपि सर्गाद्यसिद्धं तत एवोपदेशलिङ्गस्य निर्मूलताञ्चाभिप्रेत्य निगमयति । धर्मेति ॥ १५ ॥

इत्युपदेशानुमानभङ्गः ॥

यानि च बहून्यनुमानानि संजगृहुः ।
कार्य्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्व*विदव्ययः ॥
इति तथान्वयिषु साधारण्यमाह । साध्यमिति ॥

मू० साध्यं यादृक् सपक्षे नियतमवगतं स्याद्धि पक्षेऽपि तादृक् तस्मात् कर्मादियुक्तः प्रसजति विमते कार्य्यताद्यैस्तु कर्त्ता । एतत्तत्सिद्ध्यसिद्ध्योर्न्न घटत इति न क्ष्मादिपक्षे सपक्षव्याप्ताकारप्रसङ्गात्तदनुपगमने न क्वाचित् स्यात् प्रसङ्गः ॥ १६ ॥

टी० यादृक्सपक्षे नियतमवगतं येनाकारेण व्याप्तं प्रमितमित्यर्थः स्याद्धि पक्षेऽपि तादृक् न हि पर्वते वह्निरनुमीयमानः उष्णत्वमपहाय सिध्येदिति भावः । व्यवहितेऽपि पश्चादुष्णत्वदर्शनात् तत्सिद्धिरिति चेन्न प्रालेयमर्म्मरितैः पद्मपत्रादिभिः प्रालेयसन्निहितानुद्भूतरूपहुतवहानुमाने तदसिद्धेः । न च तथानुष्णो वह्निरनुमीयेत मर्म्मरीभावस्यैवासिद्धिप्रसङ्गात् । यद्यनुष्णो वह्निः कश्चित् पचेत् अन्वयव्यतिरेकवान्नीहार एव पाचकः किन्न कल्प्येत, एवं सामान्यतश्शिक्षितया व्याप्त्या प्रस्तुतेऽनिष्टप्रसङ्गमाह । तस्मादिति । कार्य्यत्वादिभिरुर्वीदूर्वादेः कर्ता यदि सिद्ध्येत् कर्तृव्यापककायकरणकर्म्मादिमान् स्यात् तथा च नाभ्युपगम्यत इत्यनिष्टता विपर्य्यये

* विश्वसृडव्ययः इति पा० ।

Digitized by Google

विभ्रमश्च । नन्वनुमानवत्तर्कोऽपि धर्मिसिद्ध्यसिद्धिव्याघातः अन्यथा प्रस-ञ्जकं कुत्राहार्यम् । अनिष्टं कुत्र वा प्रसञ्जनीयं, तदिहेश्वरसिद्धौ विदेहतयैव तत्सिद्धेः तद्विरुद्धप्रसङ्गानुत्थानं, तदसिद्धौ निराश्रय-स्तर्कः कुत्र किं प्रसञ्जयेदित्यभिप्रायेण चोदयति । एतदिति । परोक्तहेत्वाश्रय एव प्रतिकूलतर्काश्रय इत्यभिप्रायेण प्रतिवक्ति । नेति । विवृणोति । इमादीति । अयं भावः यदि वयमीश्वरे धर्मिणि प्रसङ्गमवतारयामः तदा सिद्ध्यसिद्धिविकल्पदोःस्थ्यं स्यात् । यदि च पृथिव्यादावाश्रये कार्य्यत्वहेतुना कर्त्तारं देहादिमन्तमुपस्थापयेम तदा दूर्वादौ व्यभिचारात् न प्रतिसाधनं न प्रतितर्कश्चेति स्यात् किन्तु संप्रतिपन्नपृथिव्यादौ धर्मिणि साध्यधर्मस्वभावानङ्गापकप्रसक्तिं ब्रूमः अतो न कश्चिद्विरोध इति । अथ साक्षात्परसाध्यमाश्रयीकृत्य प्रसङ्गः प्रयोक्तव्य इति मन्येत तदा प्रसङ्गस्यैवोच्छेद इति प्रसञ्ज-यति । तदनुपगमन इति । परेष्टसाध्यविशेषस्य स्वीकारे बहिष्कारे च व्याघातस्य दुष्परिहरत्वादिति शेषः ॥ १६ ॥

ननु कार्य्योत्पत्तौ कर्त्तुर्ज्ञानचिकीर्षाप्रयत्नमात्रमुपयुज्यते देहादेः कार्य्यव्यापकत्वादर्शनात् कार्य्यविशेषे तदुपयोगो दृष्ट इति चेद् यत्र दृष्टस्तत्र तथाऽस्तु न सर्वत्रातिप्रसङ्गादित्यभिप्रायेण शङ्कते । यदिति ।

मू० यत्कार्य्यस्योपयुक्तं तदिह भवतु नः किं परे-
णेति चेन्न ज्ञानादेरुद्भवे तद्विषयनियमने-
ऽप्यर्थनादिन्द्रियादेः । नित्यं ज्ञानं विभोस्तन्न
नियतविषयं तेन नान्यार्थनञ्चेन्नानित्यस्यैव
दृष्टेस्तव कथमजसंयोगभङ्गो ऽन्यथा स्या-
त् ॥ १७ ॥

टी० उपयुक्तं—ज्ञानचिकीर्षादिकं परेण कार्य्योत्पत्त्यनुपयुक्तेने-त्यर्थः । अनुपयोगो दुर्वचन इत्यभिप्रायेणाह । नेति । तत्साधयति । ज्ञानादेरिति । सपक्षव्याप्तप्रकारेण पक्षेऽपि कर्त्तुर्ज्ञानादिना कार्य्येण भवितव्यं ततस्तत्कारणतया कार्य्यकारणकर्मादियोगोऽपि दुस्त्यजः प्रयत्नस्य विषयनियमश्चिकीर्षया तस्याश्च प्रियाप्रियप्राप्तिपरिहारव्यापारकारणेन तावद् बुद्ध्या, सा च तत्तत्सामग्रीनियतविषयेति विषयनियमे स्थिते सामग्रीशून्यं ज्ञानं कथं सविषयं निर्विषये च तस्मिन् किञ्चिकीर्षेत अचिकीर्षुश्च कुतः प्रयतेत । ननु कार्य्यस्यैव सामग्र्यपेक्षणं नित्यस्य तु स्वतस्सर्वविषयस्योत्पत्तिविषयनियत्योरभावात् किं सामग्र्येति शङ्कते । नित्यमिति । चय्यन्तिनामिव नित्यज्ञानसिद्धावेतद्वक्तव्यं नान्यथेति स्थापयितुमाह । नेति । अहेतुकं ज्ञानं किं दृष्टमुत कल्पितं नाद्यः असिद्धेः, न द्वितीयः दृष्टविजातीयक्लृप्त्ययोगादित्यभिप्रायेणाह । अनित्यस्येति । तादृशज्ञानक्लृप्तौ परस्येष्टविरोधमाह । तवेति । मूर्त्तवद् द्रव्यत्वादिना विभूनां विभुना संयोगे कल्प्यमाने संयोगकारणानामन्यतरकर्मोभयकर्मसंयोगानामसंभवात्तन्निषेधः कृतः तथेहापि विज्ञानकारणानामिन्द्रियलिङ्गादीनामभावात्तदभावः स्यात् नित्यत्वान्निरपेक्ष्यमजसंयोगेऽपि सुवचं विभूनां मिथस्संयोगाभावे न किञ्चित्साधकमिति चेन्नित्यज्ञानाभावेऽपि किमस्मदाद्यशक्यकार्य्यानुत्पत्तिप्रसङ्ग इति चेत् न कारणान्तरैरेव तदुत्पत्त्युपपत्तेः कर्त्तृनिरपेक्षैः कारणान्तरैः कार्य्योत्पत्तिर्न दृष्टेति चेत् अन्यथादृष्टाऽप्यत्र तथा स्यात् प्रध्वंसस्येव निमित्तमात्रजन्यत्वं, परं हि कल्पितस्य ज्ञानादेः कारणनैरपेक्ष्यकल्पनात् सिद्धस्य हेतुवर्गस्य क्वचित् कर्त्तृनैरपेक्ष्याङ्गीकारः अजसंयोगस्वीकारो वेति स्वीक्रियतां का हानिरिति चेत् सिद्धान्तहानिरिति ॥ १० ॥

Digitized by Google

नन्वहेतुकसंयोगमिच्छद्भिरहेतुकज्ञानं न दूष्यं तद्दूषणे वा सिद्धान्तहानिः स्यादित्यत्राह । किं वेति ॥

मू० किं वा धीच्छे गृहीते विषयनियतये ते हि यत्नोऽत्र नेच्छेन्निर्हेतुस्तत्प्रमेष्टा भवतु विषयवानेष तद्वत्स्वतस्ते । प्रोक्ते यत्ने स्वभावाद्विषयवति सधीः स्यादितीदं क्व दृष्टं यद्वा धीस्तं हि नित्यं न तु जनयति ते सा कथन्तन्नियन्त्री ॥ १८ ॥

टी० कर्त्तुरनुमाने ऽपि प्रयत्नमात्राधारत्वमनुमीयतां प्रयत्नव्यापकतया ते अपि सिद्ध्येतामिति चेन्न जीवनपूर्वकप्रयत्नमन्विच्छतां तत्र व्याप्तिभङ्गात् अतः प्रयत्नकृप्तावपि ज्ञानचिकीर्षानैरपेक्ष्यमाह । विषयेति । सर्वकार्य्यविषयस्य हि प्रयत्नस्य विषयनियमाभावादेव न तदर्थं चिकीर्षाद्यपेक्षा । उक्तमर्थं प्रतिबन्दिगतं बिवृणोति । निर्हेतुरिति । अयं भावः । अन्यत्र ज्ञानं सर्वं सकारणकं तत्प्रामाण्यञ्च कारणगुणाधीनमिति स्थापयद्भिरीश्वरज्ञानं तत्प्रामाण्यञ्च निष्कारणकमिति दृष्टविपरीतं कल्प्यते अत्र ज्ञानचिकीर्षाव्यवधानकॢप्तिमपहाय प्रयत्नमात्रेऽन्यनिरपेक्षं विषयित्वमङ्गीकर्त्तुं युक्तम् ।

नित्या चेश्वरबुद्धिस्ते नानुभूतिर्न च स्मृतिः ।
न प्रमा न भ्रमश्च स्यात्तत्कारणवर्जनात् ॥
अनुभूत्यादिहेतूनामभावे ऽपि तथा यदि ।
स्मृतिहेतोरभावेऽपि स्मृतिरेषा न किं भवेत् ॥

कुतश्चित् प्रमात्वादिकल्पनेऽपि तद्वदेव यत्नस्य विषयित्वेऽन्यनैरपेक्ष्यमपरिहार्यमिति । अत्र परोक्तं प्रसङ्गमनूद्य प्रतिषे-

Digitized by Google

ध्यति । प्रोक्तः । इति । ज्ञानस्य स्वत एव सविषयित्वमित्येतदेव क्व दृष्टं सर्वेष ज्ञाने सामग्रीनियतविषयत्वदर्शनात् नित्यस्य चेश्वरप्रयत्नस्य कार्य्यविशेषानुगुणसहकारिलाभमन्तरेण कार्य्यविषयत्वं नाम न किञ्चित् संभवति । न च विषयित्वमेव ज्ञानलक्षणं यत्नादीनामपि विषयधर्माणां धीत्वप्रसङ्गात् यस्त्विच्छामनङ्गीकृत्य बुद्धिप्रयत्नावीश्वरस्य ब्रूते सोऽपि प्रत्युत्पन्नवादी नित्यप्रयत्नमात्रेणापि सर्वकार्य्यसिद्धेरुक्तत्वादबुद्धिपूर्वप्रवृत्तस्य कथं स्वतन्त्रः कर्त्तेति लक्षणयोगः कथन्तरामीश्वरत्वयोग इति चेदनिच्छापूर्वप्रवृत्तस्यापि सममेतत् । अत एव कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोक्तृत्वस्वरूपं कर्तृत्वं कथमचेतनस्येत्यपि निरस्तं, प्रयत्न एव प्रयोक्तृत्वसंभवात् तन्नित्यतया प्रयोज्यत्वाभावाच्च । ननु चेतनत्वमात्मलक्षणं तदभावे तत्त्वन्न स्यादिति चेत् मैवं प्रयत्नवत्त्वेन तल्लक्षणसिद्धेः । अन्यथेच्छाविरहेऽपि तदसिद्धिप्रसङ्गः । इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मलिङ्गमित्याक्षपादौ सह पठितिः । क्रियावद् गुणवत्समवायिकारणमिति द्रव्यलक्षणमिति काणभक्षीव कथंचिन्नेया ज्ञानाद्यत्यन्तायोगव्यवच्छेदवन्निष्ठद्रव्यत्वावान्तरजात्याधार आत्मेति । अस्तु तर्हि प्रयत्नमात्रवानीश्वरः तथाऽप्यनुमानं न प्रतिक्षिप्तमिति चेन्न यस्सर्वज्ञस्सर्ववित् तदैक्षत बहु स्यां प्रजायेय सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुतिशतविरोधादिति । दूषणान्तरमाह । यद्वेति । धीर्हि जनयित्री चिकीर्षाया विषयं नियच्छेत् साऽपि तादृशी यत्नस्य इह तु जनकत्वाभावान्न ततस्तद्विषयनियमः, सामानाधिकरण्यमात्रात्तन्नियमे जीवेश्वरगुणान्तराणामपि सविषयत्वप्रसङ्ग इति भावः ॥ १८ ॥

अस्तु नित्यप्रयत्नवानीश्वरोऽनुमेयः संप्रत्यभ्युपगमादवशिष्टमागमिकं स्यादित्यत्राह । निश्वासेति ।

मू० निश्वासादिप्रयत्नक्रम इह भवतां जीव एवा-
स्त्वदृष्टैर्यद्वा तैरेव सर्वं घटत इति भवेत्त-
त्कृता सिद्धसाध्यम् । क्लृप्तावन्यस्य कर्त्तुर्द्वयमु-
पनमति त्वत्सपक्षे तथा स्यात् पक्षेऽपीत्यव्य-
वस्था यदि विफलतया त्यक्तिराद्येऽपि सा
स्यात् ॥ १९ ॥

टी० जीवनपूर्वकप्रयत्नन्यायाददृष्टविशेषजनितयत्नवद्भिर्जीवैः क्षित्यादेः सकर्तृकत्वसम्भवे किं नित्ययत्नतदाधारकल्पनागौरवेण यादृशैरेवादृष्टैः शरीरादिनिरपेक्षैस्सहकृत ईश्वरस्स्रष्टेति मन्यसे तादृशैरेव तत्फलभोक्तृष्वेव यत्नक्लृप्तेर्लघुत्वात् । एतेन मनःकरणकागन्तुकज्ञानादिमानीश्वर इति मतान्तरमपि निरस्तं, तत्रापि देहादिनिरपेक्षमनःप्रवृत्तिक्लृप्तेर्गुरुत्वात् । अथवा कल्पनीये हि यत्ने सर्वमिदं चिन्त्यं तत्कल्पनैव न युक्तेत्याह । यद्वेति । व्यवस्थापकैरदृष्टैरेव यत्नादिनिरपेक्षैरित्यर्थः । सर्वं द्व्यणुकादि पर्वतादि च घटते उत्पत्तुमर्हति । एतेनानुमानस्य किमायातमित्यत्राह । भवेदिति । तत्कृता चोदितमनुतिष्ठता तत एव फलद्वारभूतादृष्टकर्त्रा जीवेनेत्यर्थः, न च क्रियाहेतुगुणेष्वन्यतमेन कार्य्यसंभवे तत्र गुणान्तरमपि हेतुतया कल्प्यम् अदृष्टस्य च सर्वकार्य्यनिमित्तत्वे ऽपि विशेषतः क्वचित् क्रियाहेतुगुणत्वं ब्रूथ अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्य्यक् पवनमणुमनसो-श्चाद्यं कर्मेत्यदृष्टकारितानीति तत्कस्य हेतोः नूनं क्रियाहेतुगुणान्तरनिवृत्त्यै स्यात् एवं सति यत्रादृष्टप्रागल्भ्यं तत्र मुधा तत्पूर्वक्षणवर्तिज्ञानचिकीर्षाप्रयत्नक्लृप्तिः प्राचीनैरेव तैर्जीवस्य तत्कर्तृत्वोपपत्तेः अन्यथा शराभिचारकृष्यादिप्रयोगे वेधपीडादिकर्तृत्वं प्रयोक्तुर्न स्यात् माभूदिति चेन्न लौकिकवैदिकचित्तविसंवादात् ।

नन्वदृष्टमचेतनं चेतनानधिष्ठितं कथं प्रवर्त्तेत इत्थं स्वकारणोपनीतसहकारिसम्पन्नतातिरिक्ततत्प्रवृत्त्यभावात्कारणानामपि तत्तत्करणोपनेयत्वात् तान्यप्यचेतनानि चेतनाधिष्ठेयानीति चेन्न ईश्वरप्रयत्ने तदभावात् चैतन्यायोगव्यवच्छेदवन्निष्ठतामात्रेण तस्यापि तदधिष्ठितत्वमिति चेन्न तावतोऽधिष्ठानशब्दार्थतया केश्चिदप्यनङ्गीकारात् मयैवमङ्गीकृतमिति चेत् अन्यैरपि तर्हि चैतन्यात्यन्तायोगव्यवच्छेदवन्निष्ठत्वमेव चेतनाधिष्ठितत्वमदृष्टानामित्यङ्गीक्रियेत ईश्वरधीविशेषमदृष्टमिच्छता त्वया नैवमङ्गीकार्य्यमिति चेन्न तथाविधादृष्टे त्वयाऽपि चेतनाधिष्ठेयत्वस्याबाध्यत्वात् तन्मतेऽपि कारणवर्गानुप्रवेशिनो नित्यस्येश्वरज्ञानस्याचेतनस्य चेतनाधिष्ठितत्वकल्पने तादृशचेतनान्तरक्लृप्तिप्रसङ्गः ।

ईश्वराकूतभेदं च प्रोतादृष्टं यदीच्छसि ।
नृगुणापूर्वक्लृप्तिस्ते निष्फलैव तदा भवेत् ॥

नन्वीश्वरप्रयत्नादेरसिद्धो न त्वयाऽत्र व्यभिचार उदाहार्य्यः तत्सिद्धौ तद्व्यतिरिक्ताचेतनेषु चेतनाधिष्ठाननियमसिद्धिरिति चेदन्येषामपि तर्ह्यदृष्टादिव्यतिरिक्तविषये तन्नियमः स्यादतोऽदृष्टवद्भिर्जीवैरेव जगदुत्पत्तिसिद्धिरिति सिद्धसाधनता दुर्वारा जीवातिरिक्तकर्तृकल्पनेऽनिष्टं प्रसञ्जयति । क्लृप्ताविति । एककर्तृकतया प्रसिद्धे सपक्षे कर्तृद्वयं स्यात् । अनेककर्तृकेऽपि संप्रतिपन्नातिरिक्तकर्तृकत्वं कल्प्यमानो हि न केवलं क्षित्यादिमात्रकर्तृत्वेन कल्प्यते तत्प्रयत्नस्य परिच्छेदकाभावेन सर्वविषयत्वात् । ततः किमित्यत्राह । तथेति । अयं भावः क्षित्यादिकर्त्तरि साध्यमाने विश्वकर्त्ता तेन घटादेर्द्विकर्तृकत्वमायातं ततस्तद्दृष्टान्तेन पक्षस्य द्विकर्तृकत्वमापतेत् ततस्सप-

Digitized by Google

त्तस्य चिकर्तृकत्वं स्यात् एवं क्रमेणाप्युपरि क्रुप्तावनन्तेश्वरापत्त्या द्यावापृथिवी जनयन् देव एकः एकश्शास्ता न द्वितीय इति व्यवस्था भज्येतेति। अथ परोक्तं कल्पनागौरवं शङ्कते। यदीति। एकेनेश्वरेण विश्वकार्य्यसिद्धौ द्वितीयक्रुप्तेर्निष्फलत्वात् तत्परित्याग इति तथ गौरवभिया त्याग एकस्मिन्नपि स्यादित्याह। आद्योऽपीति। उक्तं हि जीवैरेव कर्तृभिरदृष्टद्वारा सर्वकार्य्यं सिद्ध्येदिति ॥ १९ ॥

पुनरपि विकल्पमुखेनानिष्टमाह। साध्य इति।

मू० साध्यो हेत्वादिवेदी मत इह कलया सर्वथा वा तवासौ पूर्वत्रेशो न सिद्धेन्न कथमपि भवेद्व्याप्तिसिद्धिः परत्र। पक्षस्पर्शाद्विशेषान्न खलु समधिकं पक्षधर्मत्वलभ्यं कल्प्योऽन्यस्ते विशेषः सुकृतविषमिता जीवशक्तिस्तु सिद्धा ॥ २० ॥

टी० किमशेषोपादानादिज्ञानवन्मात्रं विसाधयिषितमुतोपादानादिकृत्स्नगोचरज्ञानवानिति विकल्पः। तत्राद्यं दूषयति। पूर्वत्रेति। जानन्ति हि जीवा जगदुपादानं पृथिव्यादिद्रव्यं कुम्भाद्युपयोगिपरमाणुद्व्यणुकादिज्ञानाभावेऽपि कुम्भादिकर्तृत्वं सर्वानुमतं द्व्यणुकप्रभृतिजगदुपकरणं च यागादि जानन्त्येव जीवाः तच्छक्तेर्द्वारस्य वा साक्षात्काराभावेऽपि कुम्भादिन्यायाद्यागादिप्रवृत्तिरिष्टा सम्प्रदानञ्च भोक्तारं स्वात्मानमात्मीयान् वा प्रयोजनञ्चेष्टप्राप्तिमनिष्टनिवृत्तिं वा न हि ते न जानीयुः, अतः तेषामेव क्षित्यादिकर्तृत्वमविरुद्धम्। उत्तरं दूषयति। न कथमपीति। न हि कुम्भादिसामग्र्यन्तर्गतं सर्वं कुम्भकारादयो जानन्ति योगिनां स्वकार्य्यसामग्रीसाकल्य-

Digitized by Google

ज्ञानमस्तीति चेत् किमतः योगसिद्धसार्वज्ञ्या अपि हि न कुतश्चित् कल्पयितुं शक्यन्ते अतो न तत्कार्यस्य पक्षसिद्धिः, आगमतस्सिद्धौ तु तदीश्वरोऽपि तदनुविधेयस्सिद्ध इति नानुमेयं किञ्चित् अस्तु व्याप्त्या कर्तृमात्रमुपस्थाप्यं पक्षधर्मताबलात् सार्वज्ञ्यादिविशेषसिद्धिरित्यत्राह । पक्षेति । व्याप्यस्य पक्षधर्मतया हि व्यापकस्य प्रागविदितो धर्मिविशेषसम्बन्धस्सिद्ध्येत् ।

न तु सदपि सपक्षदृष्टवैजात्यम् अन्यथा धूमानुमिते वह्नौ तार्णतादिविषयविलोपप्रसङ्गात् सपक्षदृष्टाऽन्यतामात्रमपि नानुमेयनियतं जातिव्याप्येजात्यनुमाने तदनभ्युपगमात् । अतो नात्र व्याप्यपक्षधर्मतया विवक्षितविशेषसिद्धिः परिशेषात्तर्हि तत्सिद्धिरिति चेन्न परिशेषानुमानमपि हि क्षित्यादिकं सामान्यतस्सिद्धं तत्कर्तारं वा पक्षीकृत्य स्यात् आद्ये किञ्चित्कर्तृकत्वनिषेधो वा स्वतस्सर्वज्ञकर्तृकत्वं वा साध्यं नाद्यः तत्संभवस्य स्थापितत्वान्न द्वितीयः तद्धि कृत्स्नकार्य्यं पक्षीकृत्य कार्य्यत्वलिङ्गेन वा साध्यं प्रकृतपक्षमात्रनिष्ठेन वा केनचित्पूर्वत्र किमन्वयिपुरस्कारेण व्यतिरेकिण एवास्य युष्माभिः पृथगुपन्यासात् । अत एव कार्य्यविशेषतोऽपि सर्वज्ञानुमाने तेनैवालं किमन्वयिना कार्यलिङ्गेन क्षित्यादिकर्तृपक्षीकारेण जीवासंभावितविशेषसाधनन्तु दुश्शकं तादृशविशेषसंभवेऽपि जीवानामेव तत्कर्तृत्वस्य दर्शितत्वात् तेषामेव तद्धेतुतद्विशेषानुमानयोगाच्च । ननु घटादिकर्तृव्यावृत्तो विशेषः क्षित्यादिकर्तॄणां स्वीकार्य्यः तदुत्पत्त्याऽऽसन्नपूर्वकाले तेषां तदनुगुणबुद्ध्यादिरहितत्वात् अतो दृष्टविपरीतकृत्यविशेषे किमीश्वरकॢप्तिप्रद्वेषेणेत्यत्राह । कल्प्य इति । अयं भावः निश्वासादावपि पूर्वयत्नेनापि कर्तृत्वं त्वयेष्टव्यं कालविप्रकृष्टबुद्ध्यापि कर्तृत्वमाभिचारिकशरपीडादौ लोकवेदसिद्धं कुम्भा-

द्युत्पत्तावपि कुम्भकारादेश्चक्रचीवरदण्डसूत्रादिव्यापारहेतुभूतस्वस्व-देहादिव्यापारे ह्यव्यवहितप्रवृत्त्युपयोगः नान्यथा समवायिनिष्पत्तौ वयं दृष्टान्तानुरोधेन व्यवहितव्यापारादपि कर्तृत्वं ब्रूमः भवद्भि-स्त्वदृष्टचरमेव वैषम्यं कल्प्यत इति अथ स्यात् कुम्भादिकृदसंभावि-तो गोपुरादिकर्तृषु बुद्धिशक्तिप्रकर्षो दृष्टः मनुष्यासंभावितश्च शकुन्त-लूतादिजन्त्वन्तरेषु मनुष्येषु च विश्वामित्रादिषु एवं देवासुरसिद्धा-दिषु पितामहपर्य्यन्तेष्विति स्थिते बुद्धिशक्तिप्रकर्षतारतम्यस्य क्वचि-द्विश्रमाद्यत्रासौ स ईश्वरस्स्येद्धुमर्हतीति तत्राह । सुकृतेति । कर्म-भेदतन्त्रमेव तारतम्यन्त्वया निदर्शितं जन्मौषधिमन्त्रतपःसमा-धिजाश्च सर्वास्सिद्धयः तत्तददृष्टेष्वायतन्ते एवं सत्यदृष्टाधीनधी-शक्तिप्रकर्षतारतम्यं कालभेदेन कर्मवश्येष्वेव केषुचिद्भवतु न विश्र-मस्थानान्तरं मृग्यमिति भावः ॥ २० ॥

अथात्र परेष्टं विपक्षे बाधं दूषयति । कार्य्यमिति ।

मू० कार्य्यं स्यात् कर्त्रभावेऽप्यवधिभिरितरैः कालवत्स ह्यसिद्धस्ते चादृष्टप्रयुक्तास्त-दपि पतनवत्स्यात्तु यत्नानपेक्षम् । एक-त्यागेऽन्यहेतुत्यजनमिति च न ध्वंसवत्साव-धित्वात्तस्माद्धेतोरभावे न फलमिति गति-स्तद्विशेषे विशेषः ॥ २१ ॥

टी० एवं हि मन्यते कारणाभावे कार्य्याभाव उभयाभ्युपेतः कारणान्तराणि च कर्त्रुपहितमर्य्यादानि कथं कर्त्रभावे व्याप्रियेरन् अतः कार्य्यस्य सांख्यसौगतचार्वाकवर्त्मन्या नित्यत्वमसत्त्वमाकस्मिकत्वं वा स्यादिति तत्रेदमुत्तरम् । कार्य्यमिति । अयं प्रतिविधिः कारणाभावे

कार्य्यं न स्यान्न तु कारणविशेषाभावे अन्यथा क्वचिद् दृष्टस्य कर्मकारकादेरभावेऽपि क्रियाऽनुत्पत्तिप्रसङ्गात् । अतः कर्षाभावेऽपि कारणान्तरैः कार्य्यसिद्ध्युपपत्तिरिति ।

ननु कालो यथा सर्वकार्य्यनिमित्तं तथेश्वरोऽपि तत्परित्यागे समानन्यायः कालोऽपि त्यज्यतामित्यत्राह । कालवदिति । कालोऽप्युपाधिविशेषातिरिक्तो न वेति यथामतमस्तु स तावल्लोकशास्त्रसिद्धः कालप्रतीक्षया कर्षकादिप्रवृत्तेः काले कर्मचोदनात् शुभाशुभकालविभागे च कस्यचिद्दैवज्ञ*स्य व्यापारात् । नन्वत्रचेतनानामप्यचेतनानाञ्चेतनानधिष्ठितत्वे प्रवृत्तिर्न स्यादित्यत्राह । ते चेति । अदृष्टप्रेरितानामेव प्रवृत्त्युपपत्तौ किन्तत्र प्रयत्नगवेषणेन अदृष्टस्याप्यचेतनस्य प्रवृत्तौ चेतनाधिष्ठानमपेक्षितमित्यत्राह । तदपीति । ईश्वरप्रयत्नो ह्यचेतनोऽपि जगत्स्रष्टौ न प्रयोजकप्रयत्नाधिष्ठितः, न च कुम्भारम्भ इव जीवप्रयत्नसहकृतः । अतस्तत्र व्याप्तिसङ्कोचावश्यंभावादत्राट्टष्टेऽपि क्वचित्संकोचः स्यात् । अन्यथा गौरवात्, ईश्वरप्रयत्नस्य नित्यत्वात् प्रयत्नानधिष्ठितत्वमिति चेन्न नित्यानामपि परमाण्वादीनां तदपेक्षाङ्गीकारात् । अन्यत्रान्वयव्यतिरेकनियमवतामन्यतमस्य त्यागे सर्वहेतुत्यागोऽपि स्यादिति शङ्कते । एकेति । सर्वहेतुत्यागे कादाचित्कत्वविरोधं प्रकृते तदभावञ्चाभिप्रेत्याह । नेति । प्रतिबन्दिं सूचयन् अन्यहेत्वपरित्यागे हेतुमाह । ध्वंसवदिति । ध्वंसो ह्यभूत्वा भवन् हेतुमपेक्षमाणस्समवाय्यसमवायिनोरसंभवान्निमित्तमात्रनिष्पाद्यस्त्वया स्वीकृतः, तथा पक्षेऽपि जीवातिरिक्तस्य कर्तुः कल्पयितुमशक्यत्वात् कथञ्चिज्जीवकर्तृकत्वं कर्तृनिरपेक्षत्वं वा स्वीक्रियतामिति

---

* ज्योतिश्शास्त्रस्य व्यापारात् ।

भावः । विपक्षे बाधकाभावं निगमयति । तस्मादिति । हेत्वभावे कार्य्यं न स्यात्, न तु कार्य्यमात्रानपेक्षितहेतुविशेषाभावे, तत्र तु कार्य्यविशेषनिवृत्तिर्वा यथा कलमबीजाभावे कलमाङ्कुरस्य हेत्वभावे फलाभावो विशेषस्तु विशेषवानिति न्यायात् । अथवा कारणान्तरैरेव कार्य्यसिद्धिः यथा ध्वंसस्येति विशेषः । सोपाधिकत्वमपि दर्शयितुमाह । धर्म इति ॥

मू० धर्मो यावत्सपक्षानुगत उपधिरित्यभ्युपेतस्त्वयाऽपि त्यागे तस्यात्र तद्वच्छिथिलितनियमाः क्वापि नोपाधयः स्युः । तादृग्धर्मात्ययाच्च प्रकरणसमता स्यान्न चातिप्रसङ्गः पक्षादिस्वित्यबाधान्निरुपधिकतया स्यात्परात्मानुमा तु ॥ २२ ॥

टी० यावत्सपक्षानुगतः पक्षे विपक्षे चावर्तमानस्सपक्षाभिव्याप्त इत्यर्थः । अस्ति चात्र तादृशो धर्मः शरीरजन्यत्वं यद्यप्यसौ पक्षीकृते शरीरगुणादिविशेषे वर्तते तथाऽपि साधनव्यापकत्वाभावात् स्वनिवृत्त्या साध्यनिवर्तनशक्तिश्चोपाधिः स्यादेव तादृशस्य धर्मस्याचोपाधित्वानङ्गीकारेऽतिप्रसङ्गमाह । त्याग इति । न हि निषिद्धत्वादीनामेतस्य च विशेषोऽस्ति येन त एव तत्रतत्रोपाधयः स्युः, नासावेवेति नियम्येत । एवं सोपाधिकत्वे मतभेदेन व्याप्यत्वासिद्धिः व्यापकनिवृत्त्या व्याप्यनिवृत्तिर्वा स्यादिति भावः । शरीराजन्यत्वसमबलत्वाभिमाने प्रतिरोधमाह । तादृगिति । ननूपाधौ प्रतिसाधने च शरीरोपादानं व्यर्थम् । आत्मादिषु जन्यत्वनिवृत्तिमात्रेण सकर्तृकत्वनिवृत्तावुपपन्नायां विशिष्टनिवृत्त्यनपेक्षणात् । अतो

'कारिकेत्यत्रापि न स्या[1]दिति'। अतिप्रसङ्गस्तिष्ठतु तावत्, इष्टमपि न सिध्यतीत्यपिशब्दस्यार्थः। आपि परतो यः ककार इत्येवं विज्ञायमाने कारिकेत्यपि न स्यात्, एकादेशस्य यो द्वितीयोऽकारस्तेन व्यवधानात्। 'वचनाद्व्यवधानमीदृशमिति'। आश्रीयतइति वक्ष्यमाणेन संबन्धः, ईदृश-मित्येतद्व्याचष्टे। 'स्थानिवद्भावकृतमिति'। एकेन वर्णेनेत्युपलक्षणं, स्थानि-वद्भावकृतमित्येतावति तात्पर्यम्, अन्यथा एतिकेत्यत्र द्वाभ्यामकाराभ्यां व्यवधानादित्वं न स्यात्। एक एतदः सम्बन्धी, द्वितीयस्त्यदादीनाम इत्यकारः, तत्राकारयोर्यः पररूपमेकादेशः यश्च टापा सह दीर्घः, द्वयोरपि तयोः स्थानिवद्भावः। अन्ये त्वाहुः। अत्रापि टापा सह य एकादेश-स्तस्यैव स्थानिवद्भावः, न त्वकारयोः कृतस्य पररूपस्य, सकृत्प्रवृत्त्या लक्ष-णस्य चरितार्थत्वात्, तेनात्राप्येकेनैव व्यवधानमिति, वचनाद्व्यवधानेपि भविष्यतीति वक्तव्य ईदृशं व्यवधानमिति यदुक्तं तस्य व्यावर्त्यं दर्शयति। 'रथकट्यादिष्विति'। रथानां समूहो रथकट्या, इनित्रकट्यचश्च, आदिशब्देन गर्गकाम्यादेर्ग्रहणं, गर्गमिच्छत्यात्मन इति काम्यजन्तादप्र-त्ययः, ततष्टाप्, एतदुक्तं भवति। आपीति सप्तम्या यदानन्तर्यमुपात्तं तदात्यन्ताय त्यज्यते किं तु यावत्सम्भवमाश्रीयतइति। 'सुबन्तादयं परि-व्राजकशब्दादिति'। प्रत्ययलक्षणेन सुबन्तत्वम्। 'पर्युदासे हीति'। सुपो-न्योऽसुप्, ततश्चेदाप्यर इत्याश्रीयमाणइत्यर्थः। 'समुदायादसुबन्ता-दिति'। अवयवात्परिव्राजकशब्दात्सुबुत्पन्नो न समुदायादिति तस्यासु-बन्तत्वम्। 'एवमपि नाश्रीयतइति'। बहुव्रीहिरपि नाश्रीयतइत्यर्थः। किं कारणमित्यत आह। 'तथा हीति'। 'बहुचर्मिकेति'। बहूनि चर्माण्यस्यामिति बहुव्रीहिः, शेषाद्विभाषेति कप्, तत्पुरुषे तस्मि-न्नात्र सुबन्तात्परष्टाब् भवति कपा व्यवहितत्वात्। 'मामिकेति'। ममेयमित्यण्, तवकममकावेकवचनइति ममकादेशः। 'दाक्षिणात्यि-केति'। दक्षिणादाच्, दक्षिणा, ततो भवादौ दक्षिणापश्चात्पुरसस्त्यक्। 'इहत्यिकेति'। अव्ययात् त्यप्॥

१ प्राप्नोतीति मुद्रितमूलपुस्तके पा॰।

Digitized by Google

"न यासयोः" ॥ पूर्वेण नित्यमित्त्वे प्राप्ते निषेधोयमुच्यते, प्राप्तिपूर्वकत्वात्प्रतिषेधस्य, यदा यत्तदोरकजभवति तदा प्रतिषेधः । 'यका सकेति' । यत्तदोरकच्, सो त्यदाद्यत्वे टाप् । या सेति प्रथमैकवचनान्तयोरुपादानाद्विभक्त्यन्तरे प्रतिषेधो न स्यादित्यत आह । 'या सेति निर्देशो न तन्त्रमिति' । 'यत्तदोरुपलक्षणमिति' । यद्येवं यत्तदोरित्येव वक्तव्यं, सत्यं, तथा तु न कृतं किं कुर्मः । 'यकांयकामधीमहइति' । ऋचं गाथां च । 'तकांतकाम्पचामहइति' । ओषधीं शाकिनीं वा, द्वावेतौ प्रयोगौ । 'उपत्यकेति' । उपाधिभ्यां त्यकन्नासन्नारूढयोः, अत्र कश्चिदाह । स्त्रीविषयोयं त्यकन्प्रत्ययान्तस्ततश्च प्रक्रियालाघवाय त्यिकचिति वक्तव्ये त्यकन्नित्यकारोच्चारणसामर्थ्यादित्त्वाभाव इति । तदयुक्तं, पञ्चभिरुपत्यकाभिः क्रीतः पञ्चोपत्यक इत्यादावार्हीयस्य ठको ऽध्यर्द्धपूर्वेति लुकि कृते लुक् तद्धितलुकीति टापो लुकि निमित्ताभावादित्त्वं न स्यादिति तद्धितलुगर्थमेतत्स्यात्, बहिरङ्गो लुक्, अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते, ननु च सुपो धातुप्रातिपदिकयोरित्येतद्विषयमेतत्, नेत्याह, यश्च यावांश्च लुग्यामः सर्वोप्यन्तरङ्गान्विधीन्बाधते यथा सनीस्रंस इत्यादौ नलोपो न भवति, पञ्चखट्व इत्यादौ टापा सहैकादेशो न भवति, यदि स्यादादिवद्भावादाद्ग्रहणेन ग्रहणाल्लुकि सति अकारोच्च न श्रूयेत । 'पावका इति' । पुनन्ति पावयन्तीति वा पावकाः । 'अलोमका इति' । बहुव्रीहेः कप् । 'जीवकेति' । आशिषि चेति वुन् । 'देवकेति' । देवदत्तशब्दादनुकम्पायां कन्, अनजादौ च विभाषा लोपो वक्तव्य इति दत्तशब्दस्य लोपः । 'क्षिपकेति' । क्षिपेरिगुपधात्कः, ध्रु गतिस्थैर्ययोः, पचाद्यचि कुटादित्वागुणाभावे उवङ्, उभाभ्यामज्ञातादिषु प्रागिवात्कः, तरतेर्ण्वुल्, तारका । वर्णयति महत्वादिकं कुर्णामिति वर्णका, प्रावारविशेषः, तन्तूनां विकारस्तान्तवमौरत्र् । 'वर्णकेति' । भागुरी, व्याख्या टीकाविशेषः, वृतेर्ण्यन्तात् ण्वुल्, वर्त्तिका । 'अष्टकेति' । अश्नन्ति ब्राह्मणा ओदनमस्यामित्यष्टका, इष्यशिभ्यां तकचिति तकन्, पितरश्च ता देवताश्च पितृदेवता, तदर्थं कर्म पितृदैवत्यं, देवतान्तात्तादर्थ्ये यदिति यत् । 'अष्टिकेति' ।

Digitized by Google

अष्टौ परिमाणमस्याः, संख्याया अतिशदन्तायाः कन् । 'सूतकेति' । न सामिवचनइतिप्रतिषेधेन ज्ञापितः स्वार्थे कन् । 'पुत्रिकेति' । शार्ङ्गरवादित्वान्ङीनि कृते स्वार्थिकः कन्, केण इति ह्रस्व इकारः, तस्य पक्षे ऽत्वं विधीयते । 'वृन्दारिकेति' । शृङ्गवृन्दाभ्यामारकन् वक्तव्य इत्यारकन् ॥

"उदीचामातः स्थाने यकपूर्वायाः" ॥ यकौ पूर्वौ यस्याः सा यकपूर्वा, कोन्यपदार्थ आकारः, अर्थगतं स्त्रीत्वं शब्दे समारोप्य स्त्रीलिङ्गनिर्देशः, पूर्वशब्दो व्यवस्थावचनः । 'इभ्यिकेति' । इभमर्हतीति, दण्डादिभ्यो यः, इभ्या, ततः पूर्ववत्कः, ह्रस्वत्वं च, चटकमूषकशब्दाभ्यामजादित्वाट्टाप् । 'सांकाश्यिकेति' । संकाशे निर्वृत्तं सांकाश्यं, संकाशादिभ्यो ण्यः, ततो भवार्थे धन्वयोपधाद्वुञिति वुञ्, स्थानग्रहणमनर्थकं षष्ठीस्थाने योगेति सिद्धत्वादित्यत आह । 'स्थानग्रहणमित्यादि' । परिभाषाया विधिशेषत्वादनुवादे उपस्थानं न स्यादिति भावः । अनुवादत्वमेव स्पष्टयति । 'आत इत्यनेन हीति' । अतो योकारस्तस्येत्वं भवतीति वचनव्यक्तौ नाकारस्य विधिस्पर्शः कश्चिदस्तीत्यर्थः । 'स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थं इति' । यः स्त्रियामित्यधिकृत्य विहितष्टाबादिः स स्त्रीप्रत्ययः, तस्य प्रतिपत्तिर्यथा स्यादित्येवमर्थमित्यर्थः । असति हि स्त्रीलिङ्गे यः कश्चनाकारो गृह्येत । 'शुभं याति भ[1]द्रं यातीति' । क्विप्, शुभंभद्रमितिमकारान्तौ निपातितौ, पूर्ववत्को ह्रस्वत्वं च । 'प्रतिषेध इति' । तेन विधिरेव भवति । 'सुनयिका सुशयिकेति' । नीशीभ्यामेरच्, सुशब्देन बहुव्रीहिः, टाबादि पूर्ववत् । 'सुपाकिका सुशोकिकेति' । पचिशुचिभ्यां घञ्, चजोः कु घिण्ण्यतोरिति कुत्वं, शेषं पूर्ववत् ॥

"भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि" ॥ स्वा इति षष्ठ्याः स्थाने प्रथमा, एषेति कृतषत्वनिर्देशस्तन्त्रं, तथा च एतिकाश्चरन्तीति क्वचि नित्यमित्युदाहृतम् ॥

अत्रातः स्थानइत्येतत् स्वशब्दस्य विशेषणम् ।
संभवव्यभिचारौ हि तत्र स्तः काकचोः सतोः ॥

---

१ भद्रं यातीति मुद्रितमूलपुस्तके नास्ति ।

Digitized by Google

द्वितदोः संभवो नास्ति, नान्यत्र व्यभिचारिता ।
सर्वनाम्नः स्वशब्दस्य तेन नायं विधिर्भवेत् ॥

'द्वके इति' । द्विकशब्दाद् द्विवचने त्यदाद्यत्वे टापि अोङः शी-भावः । 'तस्यां सत्या[1]मिति' । समासार्थान्तु या विभक्तिस्तस्यां त्यदाद्यत्वं न भवत्यन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधतइति वचनात् । 'सोन्तर्वर्ति-न्या विभक्त्या सुबन्तात्पर इति' । प्रत्ययलक्षणेन सुबन्तत्वं, स्वशब्दोपि तर्ह्यनयैव युक्त्या नञ्पूर्वो न प्रयोजयेदित्यत आह । 'स्वशब्दस्त्विति' । स्वशब्दो हि 'स्वमज्ञातिधनाख्याया'मिति वचनाज्ज्ञातिधनयोरसर्वना-मसंज्ञकस्तेन तस्मात्कप्रत्ययेनैव भवितव्यं नाकचा, तत्र यदा नञ्समासे कप्रत्ययः क्रियते तदन्ताच्च टाप् तदासौ सुपः परो न भवति, केन व्यवहितत्वात्, तेनासर्वनामसंज्ञकः स्वशब्दो नञ्पूर्वोपि भवत्येव प्रयो-जकः । 'अभस्त्रका अभस्त्रिकेति' । अल्पइति प्रागिवात्कः । असति तु भस्त्राग्रहणे यथा न सिध्यति तथा दर्शयति । 'अत्रेति' । बहुव्रीहिः पुंस्यपि वर्त्तते, अभस्त्रः पुरुष इति, विहितग्रहणेनैतद्दर्शयति यद्यप्य-भाषितपुंस्काद्भस्त्राशब्दात्परो भवति तथापि तस्माद्विहितो न भवति, विहितविशेषणं चोत्तरत्रापि भाषितपुंस्कग्रहणम्, अन्यथा न विद्यते खट्वा यस्याः सा ऽखट्वा ततो ऽखट्विकेत्यादावपि प्रसङ्गादिति, अपिग्रहणेन केवलानामेव भस्त्रादीनां समुच्चयो नान्यपूर्वाणामिति शङ्कमानं प्रत्याह । 'नञ्पूर्वाणामपीत्यपिशब्दादिति' । इष्यतइत्यनेन नेयं स्वतः प्राप्तिरिति दर्शयति, यदि तर्हि सर्वत्रेष्यत नञ्पूर्वाणापीति न वक्तव्यमङ्गाधिकारे तस्य च तदुत्तरपदस्य चेत्येव सर्वत्र भविष्यत्यत आह । 'तत्रेति' ॥

"अभाषितपुंस्काच्च" ॥ अभाषितपुंस्कादिति विहितविशेषण-मित्याह । 'अभाषितपुंस्काद्विहितस्येति' । खट्वाशब्दः स्त्रियामेव नियत इत्यभाषितपुंस्कः, बहुव्रीहेरभिधेयलिङ्गत्वादभाषितपुंस्कत्वाभा-वादनेन विकल्पेन न भवितव्यमिति मन्यमानं प्रत्याह । 'बहुव्रीहाविति' ।

[1] सत्यामिति मुद्रितमूलपुस्तके नास्ति ।

Digitized by Google

कथं भवतीत्यत आह । 'तत्रापीति' । इतिकरणो हेतौ । 'यदा त्विति' । कबभावपक्ष एतत्, अखट्वा इति स्थितउपसर्जनह्रस्वत्वं, टाप्, पुनः केण इति ह्रस्वः, स च समासाद्भाषितपुंस्कादुत्पन्नस्य टाप इति न भवत्ययं विकल्पः, अभाषितपुंस्कात्परस्यात इति विज्ञायमाने स्यादेवाच विकल्पः । 'अतिखट्विकेति' । अत्रापि समासाद्भाषितपुंस्काट्टाबुत्पन्नः ॥

"आदाचार्याणाम्" ॥ इत्वापवादोऽयं योगः, केण इति ह्रस्वापवादश्च । 'आचार्याणामिति' । उदीचामित्युक्तं ततोऽन्येषामाचार्याणामित्यर्थः । अपर आह । आचार्यस्य पाणिनेर्य आचार्यः स इहाचार्यः, गुरुत्वात्तु बहुवचनमिति, सर्वथाऽभाषितपुंस्केषु त्रैरूप्यम् । अखट्वका अखट्विका अखट्वाकेति ॥

"ठस्येकः" ॥ अत्र द्वौ पक्षौ, । ठेति व्यञ्जनमात्रं स्थानित्वेन निर्दिश्यते, अकारस्तूच्चारणार्थं, एवं ठगादिष्वपीत्येकः पक्षः । संघातः प्रत्ययः स्थान्यप्यत्र स एवेति द्वितीयः, तत्राद्ये पक्षे पठिता पठितुमित्यादौ धात्वन्तस्यापि प्रसङ्गः, द्वितीये तु अठचि कर्मठ इत्यत्रापि प्राप्नोति, तत्र द्वयोरपि पक्षयोर्यथा दोषो न भवति तथा दर्शयन्नाह । 'अङ्गस्य निमित्तं यष्ठ इति' । संबन्धस्तत्र नावयवावयविभावलक्षणः, पठितेत्यादावपि प्रसङ्गात्, किं तर्हि, निमित्तनिमित्तिभावलक्षणः, अङ्गस्य संबन्धीत्युक्ते तद्रूपसंबन्ध्येव प्रतीयते, प्रत्ययश्च तद्रूपसंबन्धी, तदायत्तत्वादङ्गव्यपदेशस्य, तदेवमङ्गव्यपदेशनिमित्तस्य प्रत्ययस्य ग्रहणादुभयोरपि पक्षयोर्दोषाभावः, किं च सङ्घातपक्षे अर्थवतष्ठशब्दस्य ग्रहणान्न भवति कर्मठ इत्यत्र प्रसङ्गः, वर्णग्रहणे त्वर्थवत्परिभाषा न प्रवर्तते, तत्र सङ्घातपक्षे दोषान्तरमाशङ्क्य परिहरति । 'तत्रेति' । पुनरपि तस्मिन्नेव पक्षे चोदयति । 'मथितं पण्यमस्येति' । वर्णग्रहणे त्वनल्विधाविति स्थानिवत्त्वनिषेधादिकस्य कादेशाप्रसङ्गः । 'कादेशः प्राप्नोतीति' । ननु तान्तादङ्गादित्युच्यते, न चात्र तान्तमङ्गं, ततः प्रत्ययस्याविधानात्, नैतदस्ति । एकदेशविकृतस्यानन्यत्वादङ्गं भवति, तान्तं च, ततश्च यथानुकम्पितो भानुदत्त इति ठचि द्वितीयादच ऊर्ध्वस्य लोपे कादेशो भवति भानुक

Digitized by Google

इति, तथात्रापि प्रसङ्गः । परिहरति । 'संनिपातेति' । अजादिसंनिपातेन तान्तत्वमुपजायते, ततश्च तद्विघातस्य निमित्तं नोपपद्यते । परिहारान्तरमाह । 'यस्येति लोपस्येति' । स्थानिवद्भावस्त्वचः परस्मिन्पूर्वविधावित्यनेन, ननु पूर्वस्य विधावित्युच्यते परस्यायं तत्राह । 'पूर्वस्मादपि हीति' । पञ्चमीसमासेपि तत्राश्रीयतइत्यर्थः । अन्ये त्वाहुः । वर्णग्रहणादेव तदन्तविधौ सिद्धे ऽन्तग्रहणं प्रत्ययोपदेशकाले तान्तप्रतिपत्त्यर्थमिति ॥

"इसुसुक्तान्तात्कः" ॥ 'सार्पिष्क इति' । तदस्य पण्यमिति ठक्, इणः ष इति विसर्जनीयस्य षत्वम् । 'धानुष्क इति' । प्रहरणमिति ठक् । 'याजुष्क इति' । दीव्यत्यर्थे ठक् । 'नैषादकर्षुकः शाबरजम्बुक इति' । भवादावर्थे ऽपोर्देशे ठञ्, कादेशे कृते केण इति ह्रस्वत्वम् । 'मातृकं पैतृकमिति' । तत आगतः, ऋतष्ठञ् । 'औदश्वित्क इति' । संस्कृतं भक्षाः, दध्नष्ठक् उदश्वितोन्यतरस्यामिति सप्तम्यन्ताट्ठक् । 'शाकृत्को याकृत्क इति' । संसृष्टइति ठञ् । 'आशिषेति' । आङः शासु इच्छायामित्यस्मादाशासनमाशीरिति संपदादित्वाद्भावे क्विप्, आशासः क्वावुपसंख्यानमितीत्वम् । 'उषेति' । वसेः क्विप्, यजादित्वात्सम्प्रसारणे लाक्षणिकं रूपमिति । सर्पिरादौ तु अर्चिशुचिहुसृपिछादिभ्य इसिः, जनेरुसिः, अर्तिपृवपियजितनिधनिभ्यो निदिति प्रतिपदोक्तमिसुसो रूपम् । 'दोष उपसंख्यानमिति' । वर्णैकदेशानां वर्णग्रहणेनाग्रहणादोकारे य उकारस्तस्य उकारग्रहणेनाग्रहणादुपसंख्यानम् ॥

"चजोः कु घिण्ण्यतोः" ॥ पाक इत्यादौ भावे घञ्, पाक्यमित्यादौ कर्मणि ऋहलोर्ण्यत्, यथासंख्यमत्र न भवति घिति चकारस्य ण्यति जकारस्येति, भुजन्युब्जौ पाण्युपतापयोः, प्रयाजानुयाजौ यज्ञाङ्गे, वचोशब्दसञ्ज्ञायामित्यादेर्लिङ्गात्, क्वचित्तु पठ्यते यथासंख्यमत्र नेष्यते, तेन रक्तं रागादिति लिङ्गादिति ॥

"न्यङ्क्वादीनां च" ॥ 'न्यङ्कु इत्येवमादीनां चेति' । सिद्ध्यर्थइति शेषः, कृतकुत्वानामेव गणे पाठात्, किमर्थं तर्हि सूत्रं, यावता यथैव कुत्वादन्यदपि घत्वगुणदीर्घत्वादिकं निपातनाद्भवति तथा कुत्वमपि

भविष्यति, सत्यम्, असति तस्मिन् अनुवादे गणस्य क्वचिदप्यनुपयोगात्प्रमादपाठः शङ्क्येत । 'पचाद्यचीति' । घञि कुत्वस्यासिद्धत्वात् सञ्ज्ञायां मेघ इत्यादि, मेघः पयोधरः, निदाघो घर्मः, अवदाघोऽपि स एव, अर्घो विक्रीयमाणस्य धान्यादेरियत्ता, मूल्यमित्यन्ये । 'वीरुदिति' । निपातनादुपसर्गस्य दीर्घत्वम् ॥

"हो हन्तेर्ञ्णिन्नेषु" ॥ ञश्च णश्च ञ्णौ, तावितौ ययोस्तौ ञ्णितौ, तौ च नश्च ञ्णिन्नाः, तेषु ञ्णिन्नेषु, नकारे ऽकार उच्चारणार्थः, तेन वृत्रघ्नि वृत्रघ्नोरित्यादावपि भवति, घ्नन्तीत्यादौ गमहनेत्युपधालोपः, किमिदं ञ्णिन्ग्रहणं हन्तिविशेषणं ञ्णिन्परस्य हन्तेर्यो हकार इति, आहो स्विद्धकारविशेषणं ञ्णिन्परस्य हकारस्य स चेद्धन्तेरिति, तत्राद्ये पक्षे घ्नन्नासिद्धिः, घ्नन्ति घ्नन्तु, नहि स्वावयव एव स्वस्मात्परो भवति, द्वितीये तु न क्वचित्स्यात्, नहि ञ्णिन्नकारपरता हकारस्य क्वापि संभवति, घातयतीत्यादौ तावदकारेण नकारेण व्यवधानं, घ्नन्तीत्यादावुपधालोपस्य स्थानिवद्भावाद्व्यवधानमेव, अथ वचनाद्व्यवधानेऽपि भविष्यति, इहापि तर्हि प्राप्नोति हतमिच्छति हतीयति, हतीयतेर्ण्वुल्, हतायक इति, नकारेऽपि हन्ता हननमित्यादावपि प्रसङ्गः, नकारग्रहणमिदानीं किमर्थं स्यात्, यत्र नकारः श्रूयते तत्र यथा स्यात्, इह माभूत् हतो हथ इति, तदेवं द्वयोरपि पक्षयोर्दोषं दृष्ट्वा पक्षान्तरं दर्शयति । 'ञ्णि'त्प्रत्यय-इत्यादि' । यद्यपि द्वन्द्वनिर्दिष्टानामेकयोगक्षेमता न्याय्या तथापि सम्भवव्यभिचारो हि विशेषणविशेष्यभावस्याङ्गमित्ययमेव प्रकार आश्रीयते । ननु च स्थानिवद्भावादानन्तर्यं नकारस्य न सम्भवतीत्युक्तमत आह । 'तच्चेति' । 'संनिपातकृतमिति' । श्रुतिकृतमित्यर्थः । अथ वा पुनरस्तु द्वितीयः पक्षः, तत्रापि दोषः सुप्रतिविधान इत्याह । 'यदापाति' । धात्ववयवेन नकारेण व्यवधानमव्यभिचारीति तदेवाश्रीयते न शब्दान्तरेणेति ञ्णित्ययं परिहारः, नकारे तूक्त एव ॥

१ ञिति णितीति मुद्रितमूलपुस्तके पाठः ।

Digitized by Google

"अभ्यासाच्च" ॥ 'अहं जघनेति'। णित्त्वाभावउदाहरणं, णित्त्वपक्षे पूर्वेणैव सिद्धम्, एवं जघनिथ जघन्य जघन्वानित्युदाहरणम्। 'अभ्यासनिमित्ते प्रत्ययइत्यादि'। अङ्गाधिकारेणाभ्यासेन च प्रत्ययस्याक्षेपादयमर्थो लभ्यते। 'जिहननीयिषतीति'। अत्र यस्मिन्हनिरङ्गं ल्युटि न तस्याभ्यासनिमित्तत्वं यश्चाभ्यासस्य निमित्तं सन् न तस्मिन् हन्तिरङ्गम् ॥

"हेरचङि" ॥ 'प्राजीहयदिति'। णयन्तात्लुङ्, चङ्, णिलोपः, उपधाह्रस्वत्वं, चङीति द्विर्वचनं, कुहोश्चुरिति कुत्वं, दीर्घो लघोरिति दीर्घः। अचङीत्येतत्प्रत्याचष्टे। 'अचङीति शक्यमकर्तुमिति'। कथमित्यत आह। 'चङ्यभ्यासेति'। यथा पूर्वसूत्रे जिहननीयिषतीत्यत्र न भवति एवं प्राजीहयदित्यत्रापि न भविष्यति किमचङीत्यनेनेत्यर्थः, [1]तत्क्रियतइत्यादिपरिहारः, किमेतस्य ज्ञापने प्रयोजनमित्यत आह। 'तेनेति' ॥

"सन्लिटोर्जेः" ॥ ज्या वयोहानावित्यस्य किति ग्रहिज्यादिसूत्रेण सम्प्रसारणे कृते पूर्वत्वे च जिरूपस्य भावाद्धल इति दीर्घत्वं बाधित्वा कुत्वं प्राप्नोति, कृतेपि वा दीर्घत्वएकदेशविकृतस्यानन्यत्वात्कुत्वप्रसङ्गः, यथा जिगीषतीत्यत्रेत्यत आह। 'जिनातेरित्यादि'। एरनेकाच इति यणादेशः ॥

"न क्वादेः" ॥ 'कूज इत्यादि'। कूज अव्यक्ते शब्दे, खर्ज व्यथने, गर्ज शब्दे, अत्र वार्तिकं 'क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनादिति'। अस्यार्थः। चजोः कुघिण्ण्यतोर्निष्ठायामनिड् इति सूत्रं कर्तव्यं, तेनैव क्वाद्यजादीनां कुत्वनिवृत्तेः सिद्धत्वाचार्थः प्रतिषेधवचनेनेति, नन्वेवं गुचुग्लुचुकुजुखुजूनां निष्ठायामनिट्त्वात्कुत्वं प्राप्नोति, तथा अर्जिसर्जितर्जीनां निष्ठायां सेट्त्वात्कुत्वाप्रसंगः, यथा तु सूत्रं तथा विपर्ययः। उच्यते। यथोत्तरं मुनीनां प्रामाण्यमिति वार्ति-

[1] तत्क्रियतइत्ययं ग्रन्थो मुद्रितमूलपुस्तके नास्ति।

कानुसारेण कुत्वस्य भावाभावौ व्यवस्थाप्यौ । नन्वसत्यजेः प्रतिषेधे निवीत इति निष्ठायामनिट्त्वात्समान इति कुत्वप्रसङ्गः, नैतदस्ति, व्यादेशो निष्ठायामनिट् न त्वजिः, स तु वलाद्यार्द्धधातुके विकल्पेनेष्यतइति वीभावाभावपक्षे अजित इति सेड्ढेव, कथं शोकः समुद्ग इति, यावता शुच्युब्जी निष्ठायां सेटौ, एवं तर्हि शुच्युब्ज्योर्घञीति वक्ष्यामि, तच्च यथान्यासेपि वक्तव्यं, घञ्येव यथा स्याद् ण्यति माभूदिति, अशोच्यानव्शोच्यस्त्वमिति, तदेव वार्त्तिककारपक्षे विध्यर्थं भविष्यति ॥

"अजिव्रज्योश्च" ॥ 'समाज उदाज इति' । पशुभ्योन्यत्र हलश्चेति घञ्, पशुषु तु समुदो रजः पशुष्वित्यप् भवति ॥

"भुजन्युब्जौ पाण्युपतापयोः" ॥ पाणिशब्देन तद्वान्बाहुर्लक्ष्यते, न तु मणिबन्धस्याधः पञ्चशाखाप्रदेश उच्यते, लोकेपि बाहुपर्यायो भुजशब्दः । 'भुज्यतइति' । भुज पालनाभ्यवहारयोः । 'न्युब्जिता इति' । अधोमुखाः निश्चेष्टाः, वस्तुकथनं चैतत्, विग्रहस्तु न्युब्जन्त्यस्मिन्निति दर्शयितव्यः, न्युब्जोपतापग्रहणं शक्यमकर्त्तुं, कथं, यस्मिन्व्याधौ न्युब्जिताः शेरते स तान् न्युब्जयति तत्र ण्यन्तात्पचाद्यचि न्युब्ज इति सिद्धं, न चात्र घञचोः स्वरे विशेषः, णाद्यादिसूत्रेण घञ्यप्यन्तोदात्तत्वविधानात्, भुजशब्दस्तु घञ्याद्युदात्तो भवति, इगुपधलक्षणे तु के ऽन्तोदात्तः ॥

"प्रयाजानुयाजौ यज्ञाङ्गे" ॥ 'पञ्चानुयाजा इति' । दर्शपूर्णमासयोस्त्रयोनुयाजाः, चातुर्मास्येषु नव,पशुष्वेकादश,पञ्चत्वं न क्वापि दृष्टं तस्मात्त्रयोनुयाजा इति पाठः । 'प्रदर्शनार्थमिति' । एतच्च यज्ञग्रहणाल्लभ्यते, उपात्तयोर्हि यज्ञाङ्गविषयत्वं निपातनादेव सिद्धमुपांशुयागस्य चानुयाजानां च यज्ञसमुदायं प्रत्यवयवत्वाद्यज्ञाङ्गत्वं, प्रधानयागा ह्येते इतरेषां तु फलवत्संनिधावफलं तदङ्गमित्यङ्गत्वम् ॥

"वञ्चेर्गतौ" ॥ 'वञ्च्यं वञ्चन्तीति' । गन्तव्यं गच्छन्तीत्यर्थः । 'वङ्कमिति'[१] । गुणशब्दोयम्भावे घञ्, अभेदोपचाराद्गुणिनि वृत्तिः ॥

१ वङ्क्यमिति मुद्रितमूलपुस्तके पाठः ।

Digitized by Google

"न्योक उचः के" ॥ उच समवाये । 'न्योकः शकुन्त इति' । न्युचति समवैति नीडादाविति कृत्वा । 'न्योको गृहमिति' । न्युचन्ति समवयन्ति वसन्ति तस्मिन्निति कृत्वा । 'असुनि प्रत्ययइति' । अयमेव लोके साधीयः प्रयुज्यते ॥

"ण्यआवश्यके" ॥ उदाहरणेषु आवश्यकाधमर्ण्ययोर्णिनिः, कृत्याश्चेति ण्यत्, मयूरव्यंसकादित्वात्समासः, लुम्पेदवश्यमः कृत्यइति मलोपः ॥

यजयाचरुचप्रवचर्चश्च" ॥ 'अर्च्यमिति' । ऋच स्तुतौ । प्रवाच्यो नामेति' । प्रकर्षेणोच्यतइति प्रवाच्यः, पाठविशेषोपलक्षितो ग्रन्थविशेषः । 'अपरे पुनरिति' । ते मन्यन्ते प्रपूर्वो वचिरशब्दसंज्ञायामेव वर्त्तते, तत्र विधेयासम्भवान्नियम इति । 'एतच्चेति' । अविवाक्यमित्येतावच्छब्दरूपं, कः पुनरसौ विशेष इत्यत आह । 'दशरात्रस्येति' । द्वादशाहेभितो द्विरात्रो मध्ये दशरात्रः, तस्य दशममहरविवाक्यम् । 'अन्यत्रेति' । तथा च नास्मिन्नहनि केन चित्कस्य चिद्विवाच्यमविवाक्यमित्येतदाचक्षते, संशये बहिर्वेदिस्वाध्यायप्रयोगोन्तर्वेदीत्येकइत्यहर्विशेषे कुत्वम् । अन्यत्र तदभावः प्रयुक्त आश्वलायनेन । एवमन्योपसर्गपूर्वस्यापि प्रतिषेध एवेष्यते न नियमः, एवञ्च कृत्वा प्रवचियहर्णं[1] शक्यमकर्तुमहर्विशेषे पृषोदरादित्वात्कुत्वम्, अन्यत्र प्रतिषेध इति सिद्धमिष्टम् । अन्यथा नियमे हि बहु प्रतिविधेयं स्यात् ॥

"प्रयोज्यनियोज्यौ शक्यार्थे" ॥ इह प्रयुजनियुजः शक्यार्थइति वक्तव्यं, ण्यइत्येव, एवं सिद्धे निपातनाश्रयणं रूढ्यर्थं गुणभूतएवैतयोः प्रयोगो यथा स्यात् प्रयोज्यो भृत्यो नियोज्यो दास इति, स्वामिनि प्रयोज्यनियोज्यशब्दौ न भवतः ॥

"भोज्यं भक्ष्ये" ॥ 'भोज्या यवागूरिति' । ननु भक्षिरयं खरविशदेभ्यवहार्ये वर्त्ततइति संस्कृतं भक्षा इत्यत्रोक्तं तत्कथं द्रवद्रव्ये भवती-

१ वचइति मुद्रितमूलपुस्तके पाठः ।
२ मुद्रितमूलपुस्तके एतत्त्विति पाठः ।

त्यत आह । 'इहेति' । एवं मन्यते, नात्र भक्षिः खरविशदएव वर्त्तते अब्भक्षो वायुभक्ष इत्यत्रापि दर्शनादिति शब्दान्तरसंनिधिबलादेतदेवं भवति स्वभावतस्तु भक्षिः खरविशदएव वर्त्तते इति वार्त्तिककारस्य पक्षः, यदाह भोज्यमभ्यवहार्यइति वक्तव्यमिति ॥

"घोर्लोपो लेटि वा" ॥ 'दधदिति' । दधातेर्लेट्, तिप्, इत-श्च लोपः परस्मैपदेष्विती्कारलोपः, दाशुषे यजमानाय रत्नानि, दद्यादि-त्यर्थः । अन्ये त्वाहुः । दधदिति शत्रन्तमेतत्, ददिति दाञो रूपं, वाव-चनं प्रत्याचिख्यासुराह । 'आडागमे सतीति' । अस्त्वत्र लोपः, आटः श्रवणं भविष्यतीत्यर्थः, किमर्थं तर्हि वावचनमित्यत आह । 'तत्रेति' । किमत्र विस्पष्टनीयमत आह । 'एवा हीति' । अन्ये त्वाहुः, ज्ञापकार्थं वाग्रहणम्, एतज्ज्ञापयति अनित्यमागमशासनमिति, अनित्यत्वे स्वात्प्र-सति ददादिति न स्यादिति तत्सिद्धये वाग्रहणं कर्त्तव्यमिति ॥

"ओतः श्यनि" ॥ 'श्यतीत्यादि' । शो तनूकरणे, छो छेदने, दो अवखण्डने, षोन्तकर्मणि, इह ओतः शितीति वक्तव्यं, न च ओका-रान्तानां श्यनोऽन्यः शित्संभवति, अर्द्धमात्रया च लाघवं भवति, तत्राय-मप्यर्थः, ष्ठिवुक्लमुचमां शितीति शिद्ग्रहणं न कर्त्तव्यं भवति, इदमेवा-नुवर्तिष्यते । ननु श्यन्ग्रहणमुत्तरार्थं कर्त्तव्यं शमामष्टानामिति, तत्राप्यस्तु शितीत्येव, यदि शितीत्युच्यते भ्रमेर्वा भ्राशेति पक्षे शब् भ्रमति अत्रापि प्राप्नोति, शमादिभिः शितं विशेषयिष्यामः, शमादिभ्यो यो विहितः शिदि-ति, श्यनेव च सर्वेभ्यः शमादिभ्यो विहितः, एवमपि शिद्विशेषणत्वेन शमा-दीनामुपयोगात्कार्यिनिर्द्देशाभावाच्छ्यतीत्यादावपि प्रसङ्गः, नैष दोषः, अष्टानामित्यनेन संख्येयाः कार्यिणो निर्द्दिश्यन्ते, ते च संनिधानात् शमा-दय एव विज्ञास्यन्ते ॥

"क्सस्याचि" ॥ 'अधुक्षातामिति' । दुहेः स्वरितेत्त्वेनात्मनेप-दमाताम् । अत्रासति लोपे आतो ङित इति इयादेशः प्राप्नोति 'अधुक्षीति' । इटि लोपः, ककारवतः सशब्दस्य ग्रहणादिह न भवति वत्सौ, तृणादिभ्यः सः, तृणसौ तृणसः ॥

Digitized by Google

"लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये" ॥ 'एतेषामङ्गानां क्सस्येति'। एतेषां संबन्धी यो निमित्तत्वेन क्सः तस्येत्यर्थः। 'सर्वादेशार्थमिति'। लुक्शब्दोऽपहारीति संज्ञाविधावुक्तम्। 'बह्वर्थमिति'। उत्तमपुरुषद्विवचनार्थमित्यर्थः। अथान्यार्थे कस्मान्न भवति, तत्राह। 'अन्यचेति'। 'अलोन्त्यस्येति'। आदेःपरस्येत्येतत्तु न भवति पञ्चमीनिर्देशाभावात्। 'झलो झलीति लोपेनेति'। धि सकारे सिचो लोप इति नाश्रीयते, इत्यादेशोपलक्षणं वा तत्र सिज्ग्रहणमिति भावः। 'अकारस्येति'। अकारलोपस्येत्यर्थः। तथैव वा पाठः। ननु च क्रियमाणेपि लुग्ग्रहणे वहो लुका न भवितव्यमेव अदन्तत्वात्, दन्त्यौष्ठ्यो ह्यसौ, अत आह। दन्त्योष्ठ्योपीत्यादि'। दन्तान्वयोत्र विवक्षितो नेतरव्यावृत्तिरिति भावः। एवं न्यायसिद्धेप्यर्थे वचनसामर्थ्यमपि दर्शयति। 'यदि चेति'। 'ताविति'। तवर्गादावित्यर्थः, वहेरन्यानि हि दन्त्यादीनि सर्वाण्यात्मनेपदानि तवर्गादीनि ॥

"शमामष्टानां दीर्घः श्यनि" ॥

शमुस्तमुः अमुदमू भमुक्षमुमदक्लमः।
शमादयोमी पठिता दिवादिष्वष्ट सूरिभिः ॥

"ष्ठिवुक्लम्याचमां शिति" ॥ 'क्लामतीति'। वा भ्राशेत्यादिना शप्। 'क्लमिग्रहणं शबर्थमिति'। श्यनि पूर्वेणैव सिद्धत्वात्। शमादिषु पाठश्चिन्त्यप्रयोजनः, श्यन्यप्यनेनैव सिद्धत्वात्, तत्र सप्तग्रहणमेवास्तु, चमेराङ्पूर्वस्य ग्रहणं तन्त्रं, न तूपेयिवानित्यादिवदविवक्षितमित्याह। 'चमेराङिति'। दीर्घत्वमाङि चम इति वार्तिकस्याप्ययमेवार्थः ॥

"क्रमः परस्मैपदेषु" ॥ 'इहेत्यादि'। चोद्यम्। 'हेर्लुकि कृत इति'। अतो हेरित्यनेन, नैष दोष इत्यादि परिहारः, न लुमताङ्गस्येत्यत्र हि प्रत्यासत्तेरयमर्थो व्यवस्थापितः, लुमता लुप्ते प्रत्यये यदङ्गं तन्निबन्धनं कार्यं न भवतीति, ततः किमित्यत्राह। 'न चेति' ॥

"इषुगमियमां छः" ॥ इच्छतीति'। तुदादित्वाच्छः। 'इष्य-

Digitized by Google

तीति'। इष गतौ। 'इष्यतीति'। इष आभीक्ष्ण्ये। 'ये[1] पुनरुदितस्मिषं नाधीयतइति'। धातुपाठे। 'इ[2]ह च सूत्रे अचीत्यनुवर्त्तयन्तीति'। अस्याचीत्यतः। नन्वचीत्यनुवृत्तावपि हलः श्नः शानज्झाविति शानजादेशे इषाणेत्यत्र छत्वं स्यादेव अजादित्वादित्यत आह। 'तत्रेति'। स्यादे- तदेवं यद्यचीत्यनेन शिद्विशेष्येत, शिति छो भवति, किं विशिष्टे, अचि अजादाविति, इह तु शिता अज्विशेष्यते, अचि छो भवति, किं विशिष्टे शितीति, तेन तदादिविधिर्न भवति, किं कारणमित्यत आह। 'यस्मिन्विधिरिति'। न केवलं तदन्तविधौ विशेषणत्वापेक्षा ऽपि तर्हि तदादिविधावपीत्यपिशब्दस्यार्थः। 'इषाणेत्यत्रापीति'। न केव- लमिष्यतीष्णातीत्यत्रैवेत्यपिशब्दार्थः। 'नह्ययमजेवेति'। अज्मात्रस्याच शित्त्वं नास्तीत्यर्थः। इतिकरणो हेतौ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमन- यच्छपश्यर्च्छधौशीयसीदाः"॥ पा पाने, पा रक्षणइत्यस्य तु ग्रहणं न भवति लुग्विकरणत्वात् शितश्चासम्भवात्, घ्रा गन्धोपादाने, ध्मा शब्दा- ग्निसंयोगयोः, ष्ठा गतिनिवृत्तौ, म्ना अभ्यासे, दाण् दाने, दृशिर् प्रेक्षणे, ऋ गतिप्रापणयोः, सृ गतौ, भौवादिकौ, ऋ सृ गताविति जौहोत्यादिक- योस्तु ग्रहणं न भवति शितोसम्भवात्। नन्वेशः सम्भव इति चेत्। उक्तमत्र 'वर्णो यस्यात्तच्च विद्यात्तदादाविति,' शितीति हि कर्मधारयः, शश्चासाविच्चेति, शद्लृ शातने भूवादिः, शद्लृ विशरणे तुदादिः, षद्लृ विशरणगत्यवसादनेषु। 'आद्युदात्तो निपात्यतइति'। यदि न निपा- त्यते ततो धातोरित्यन्तोदात्तत्वे सति शपा सहैकादेशे कृते एकादेश उदा- त्तेनोदात्त इति पिबतीति पदं मध्योदात्तमापद्येत, आद्युदात्तं चेष्यते। 'वेगितायामिति'। सञ्जातवेगायामित्यर्थः, यद्वा वेगिनो भावो वेगिता, तस्यां च सत्यां गतौ वर्त्तमानस्येत्यर्थः॥

१ ये इषिमुदितमिति पाठः मु० मू० पु०।
२ ते ऽचीत्यनुवर्तयन्तीति मु० मू० पु० पाठः।

Digitized by Google

"ज्ञाजनोर्जा" ॥ 'दैवादिकस्य ग्रहणमिति'। न जोहोत्यादिकस्य, श्नितोऽसम्भवात्, दीर्घोच्चारणस्य प्रयोजनमुत्तरसूत्रे वक्ष्यते ॥

"प्वादीनां ह्रस्वः" ॥ 'प्वादयः क्र्यादौ पठ्यन्तइति'। ये तु भूवादौ पठ्यन्ते पूञ् पवनइत्यादयस्तेषां ग्रहणं न भवति, कतिपये हि तत्र ह्रस्वभाविनः, तेषामपि शपि गुणेन भवितव्यं, किञ्च क्रैयादिकस्य जानातेर्ह्रस्वनिवृत्त्यर्थं पूर्वसूत्रे दीर्घोच्चारणं तदपि क्रैयादिकानां ग्रहणे प्रमाणम्। 'वृत्करणमित्यादि'। नह्युभयार्थत्वे वृत्करणस्य कश्चिद्द्वार इति भावः। 'अपरे त्विति'। ल्वादीनामनन्तरत्वादिति भावः। तथा वॄ वरणे, वॄ भयइत्येतयोरपि वृत्करणात्परस्तात्पठितयोरपि ह्रस्वो भवति, यः वृणाति स ह देवेषु गच्छति, वृणीयादिबाधमानाय, वृणन्तं च पपुरिं श्रवस्यवः। आदृणातीति। पूर्वस्मिन्पक्षे ह्रस्वान्तावेतौ पठन्ति। चोदयति। 'येषामिति'। आगता गणान्तमागणान्ताः, परिहरति। 'ज्ञाजनोर्जा इति'। यदि जानातीत्यत्र ह्रस्वत्वं स्यात्. ह्रस्वान्तमेवादेशं विदध्यात्। ननु चान्यार्थं दीर्घान्तादेशविधानं स्यात्, नह्यन्यथा जायतइति सिध्यति अत आह। 'न इत्यपीति'। ह्रस्वान्तादेशविधानेपि अतो दीर्घो यञीति दीर्घत्वे जायतइति सिद्धं, तत्र हि तुरुस्तुशम्यमः सार्वधातुकइत्यतः सार्वधातुकग्रहणमनुवर्त्तते, न पुनस्तिङीति, अत एवाने मुक् पूर्वान्तः कृतो न परादिर्दीर्घप्रसङ्गात्, ये तर्हि वृत्करणमुभयव्यावृत्त्यर्थं वर्णयन्ति तेषां दीर्घोच्चारणं किमर्थं, जानातीत्यत्र दीर्घो यथा स्यात्। अतो दीर्घो यञीत्येव दीर्घो भविष्यति, न सिध्यति, अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य, न जादेशमात्रेण निष्ठितमङ्गं भवति, तन्नेदं दीर्घोच्चारणमेव लिङ्गमागणान्ताः प्वादय इति ॥

"मिदेर्गुणः" ॥ 'मेद्यतीति'। श्यन्। 'मिद्यतइति'। भावे यक् ॥

"जुसि च" ॥ उदाहरणेषु लङि शपः श्लुः, द्विर्वचनमभ्यासकार्यं, सिजभ्यस्तविदिभ्यश्चेति झेर्जुस्। 'अयेत्यादि'। जुस्भक्तस्य यासुट-

स्तद्ग्रहणेन ग्रहणात्प्रसङ्गः। 'सार्वधातुकाश्रयङित्त्वनिमित्तइति'। सार्वधातुकमाश्रयो यस्य तत्सार्वधातुकाश्रयं तत् ङित्त्वं निमित्तं यस्य प्रतिषेधस्य स तथोक्तः, एतेन यासुडाश्रयङित्त्वनिमित्तमिति व्याख्यातम्। 'तत्र हि प्राप्ते चाप्राप्ते चेति'। चिनुयुरित्यादौ प्राप्ते, अनुहवुरित्यादावप्राप्ते। 'अस्याचीत्यनुवर्त्ततइति'। परिहारान्तरं, जकारोच्चारणं तु चक्रुरित्यादौ लिटि माभूत्॥

"सार्वधातुकार्धधातुकयोः" ॥ 'सार्वधातुकार्धधातुकयोरिति किमिति'। एवं मन्यते प्रत्ययइति वक्तव्यम्। एवमपि ह्यौष्ट्र विषये सिध्यतीति, सङिति प्रत्याहारः सनः सशब्दादारभ्या महिङो ङकारात्। 'अग्नित्वमिति'। प्रत्ययइत्युच्यमाने अत्रापि प्राप्नोति। 'अग्निकाम्यतीति'। सङीत्युच्यमानेऽत्रापि प्राप्नोति॥

"जाग्रोऽविचिण्णल्ङित्सु" ॥ 'अविचिण्णल्ङित्सु परत इति'। विचिण्णल्ङिद्भ्योन्ये ये प्रत्ययास्तेषु परत इत्यर्थः। जागरयतीत्यादीनि वृद्धिविषये उदाहरणानि, जागरितः जागरितवानिति प्रतिषेधविषये। किं पुनः कारणं वृद्धिप्रतिषेधविषयावेवोदाहरणानि उपन्यस्तानि, तत्राह। 'वृद्धिविषये प्रतिषेधविषये चेति'। अन्यत्र पूर्वेणैव गुणस्य सिद्धत्वादेतद्विषय एवायं गुणः, तत्राप्युभयविषयः, कथं, चिण्णलोः प्रतिषेधात् वृद्धिविषये तावद्भवति, ङित्प्रतिषेधात्प्रतिषेधविषयेपीति। 'तस्मिन्कृतइति'। अङ्गवृत्ते पुनर्वृत्तावित्येतदनाश्रित्योच्यते। 'सा न भवतीति'। किं कारणमित्याह। 'यदि हीति'। यद्यपि जागरितः जागरितवानित्यत्र गुणविधिश्चरितार्थः, तथापि वृद्धिविषयेप्येतद्विधानमित्युक्तं, तत्रास्यानर्थक्यमुच्यते। किं चेत्याह। 'चिण्णलोश्चेति'। यदि गुणे कृते अत उपधाया इति वृद्धिः स्याच्चिण्णलोर्गुणप्रतिषेधोनर्थकः स्यात्, अस्तु तत्रापि गुणः, वृद्धौ सत्यामजागारि जजागारेति सिद्धम्। 'जाग्रत इति'। लट्, तस्, अदादित्वाच्छपो लुक्, सार्वधातुकमपिदिति ङित्त्वम्। '[1]अत्र

[1] अत्रेति मु० मू० पु० नास्ति।

Digitized by Google

वीति केचिदिति'। अविचिण्णल्ङित्स्वित्यत्र यो वकारात्पर इकारस्त-मुच्चारणार्थं वर्णयन्ति, तत्र यस्मिन्विधिरिति वकारादौ प्रतिषेधः। किमर्थं पुनस्तदेवं वर्णयन्तीत्यत आह। 'क्सावपीति'। 'अजागृवा-निति'। नेड्वशि कृतीति इट् प्रतिषेधः, तत्र क्रादिनियमादिट् प्राप्तो वस्वेकाजाद्घसामिति नियमाच्च भवति, ये तु क्विपो लोपाद्गुणाश्रये प्रत्यय-लक्षणप्रतिषेधाच्च पर्युदासं नेच्छन्ति, तेषां जागरिति गुणो भवत्येव, अन्ये त्वाहुः। यथा ऽतृणेडिति प्रत्ययलक्षणेनेमागमो भवति वर्णस्य प्रत्ययविशेषणत्वात्, एवं क्विपोऽपि पर्युदासः, ततस्तु जागृदिति भवति। चोदयति। 'कथमजागरुरिति'[२]। एवं मन्यते। प्रसज्यप्रतिषेधोऽयं विचि-ण्णल्ङित्सु न भवतीति, ततश्च जुसि चेत्यस्यापि गुणस्य प्रतिषेधः स्यात्, तथोत्तमे णलि णित्त्वाभावपक्षे गुण इष्यते सार्वधातुकार्द्धधातुक-योरिति तस्यापि प्रतिषेधः प्राप्नोतीति। परिहरति। 'नाप्रतिषेधा-दिति'। नायं दोषः, कुतः, अप्रतिषेधात्, नायं प्रसज्यप्रतिषेधः, कस्त-र्ह्ययमित्याह। 'विचिण्णल्ङित्स्वति पर्युदासोऽयमिति'। पर्युदासे हि विचिण्णल्ङित्सु न विधिर्न प्रतिषेधः, ततोऽन्यत्र विधानं तेन जुसि णलि च लक्षणान्तरेण प्राप्तो गुणो भवत्येव, प्रसज्यप्रतिषेधेऽप्याह। 'अथ-वेति'। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति भावः। केचिज्जागृवि-रित्यत्र गुणदर्शनादौणादिकं विच्प्रत्ययं वर्णयन्ति, तेषां जागृविरित्यत्र गुणः प्राप्नोति, न च वेः प्रतिषेधवैयर्थ्यं, क्विपि क्सौ च चरितार्थत्वात्, तस्माज्जागर्तेः किद्वक्तव्यः॥

"पुगन्तलघूपधस्य च"॥ 'भेत्ता छेत्तेति'। कथं पुनरत्र गुणः, यावता धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये संयोगे गुर्विति गुरुसंज्ञया लघुसं-ज्ञाया बाधनाच्च प्राप्नोति, भेदनमित्यादौ सावकाशो गुणोऽत आह। 'प्रत्ययादेरिति'। 'क्सनोः कित्करणेनेति'। त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नोः कित्करणस्यैतत्प्रयोजनं गृध्नुरित्यादौ गुणो माभूदिति, यदि चैवं विधे विषये गुरूपधत्वाद्गुणो न स्यात् क्नोः कित्करणमनर्थकं स्यात्,

२ कथमिति मु॰ मू॰ पु॰ नास्ति।

Digitized by Google

मस्य प्रथममिति पूरणीयम् । आग्नावैष्णवयागस्य आग्नेयः प्रकृतिरिति तदर्थः । देशसामान्यात् । प्रथमस्य प्रथमः द्वितीयस्य द्वितीय इति स्थानसादृश्यात् ॥ १ ॥

देवतया वा नियम्येत शब्दवत्त्वादितरस्याश्रुतित्वात् ॥ २ ॥

सिद्धान्तमाह । देवतयेति । देवतया देवतासादृश्येन नियम्येत प्रकृतिर्नियम्येत । शब्दवत्त्वात् । देवतावाचकस्य आग्नावैष्णव: अग्निः पावक इति प्रत्यक्षशब्दवत्त्वादितरस्य स्थानवाचकशब्दस्याश्रुतत्वात् ॥ २ ॥

जनकसप्तरात्रे त्रिवृत्स्वहःसु द्वादशाहधर्मातिदेशः । अधि० २ ।

गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताग्नेयवत् ॥ ३ ॥

जनकसप्तरात्रे श्रूयते, चत्वारि त्रिवृन्त्यहानि भवन्तीति । तत्र प्रथमस्याह्नः त्रिवृत्स्तोमत्वात् तस्यैवावृत्तिर्विधीयते उत नाना ऽह्नां द्वादशाहिकानामह्नां स्तोमो विधीयतइति संशये पूर्वपक्षमाह । गणेति । गणचोदनायामुक्तोदाहरणे यस्य प्रथमस्याह्नो लिङ्गं त्रिवृत्त्वं तस्य प्रथमस्याह्नः आवृत्तिः प्रतीयेत आग्नेयविध्यन्ताभ्यासवत् । अयं भावः । अग्नये पवमानायाग्नये पावकायाग्नये शुचये देवतैक्याच्चोदनासादृश्याच्च यथा ऽऽग्नेयविध्यन्ताभ्यासस्तथेति ॥ ३ ॥

नाना ऽहानि वा संघातत्वात्प्रवृत्तिलिङ्गेन चोदनात् ॥ ४ ॥

सिद्धान्तमाह । नानेति । द्वादशाहसम्बन्धीनि नाना ऽहानि संघातत्वात् चत्वार्यहानीति संख्यया अह्नां समुदायविधानात् । ननु चत्वारि त्रिवृन्त्यहानीत्यस्य का गतिरत आह । प्रवृत्तिलिङ्गेन द्वादशाहिकाहश्चतुष्टयानुवादेन चोदनात् त्रिवृत्त्वविधानाद्वचनस्य चारितार्थ्यमिति भावः ॥ ४ ॥

तथा चान्यार्थदर्शनम् ॥ ५ ॥

उक्तार्थसाधकं लिङ्गमाह । तथा चेति । तेषामग्निष्टोमः प्रथमो न अग्निष्टोमा इतरइत्यनेन भिन्नधर्मकत्वमह्नां सूचितम् ॥ ५ ॥

षट्त्रिंशद्रात्रे षडहधर्मातिदेशः । अधि॰ ३ ।

कालाभ्यासे च बादरिः कर्मभेदात् ॥ ६ ॥

षट्त्रिंशद्रात्रे श्रूयते, षडहा भवन्तीति पठित्वा चत्वारः षडहा भवन्तीति । अनेन षडहकालाभ्यासः उत षडहरूपकर्माभ्यास इति संशये पूर्वपक्षरूपं बादरिमतमाह । कालेति । कालाभ्यासे वाक्यं बादरिर्मनुते । तथा च चतुर्विंशतिरहानि । तथा चाहर्गणसाध्यत्वाद् द्वादशाहधर्मप्रवृत्तिरिति भावः ॥ ६ ॥

तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसंख्यत्वात् ॥ ७ ॥

सिद्धान्तमाह । तदिति । तदावृत्तिं षडहावृत्तिं जैमिनिर्मनुते अह्नां चतुर्विंशतिसंख्याविशिष्टानामह्नामप्रत्यक्षसंख्यत्वात् । आनुमानिकसंख्याकत्वात् । अयं भावः । प्रथमं षडहं ज्ञात्वा तत्र चतुष्ट्वसंख्याज्ञानेन चतुर्विंशतिसंख्या ऽनुमेया । ततः प्रथमज्ञातषडहसाध्यकर्मण एवात्र चतुष्ट्वसंख्याऽन्वये तदभ्यासेन संख्यापूरणमिति षडहधर्मप्रवृत्तिरिति ॥ ७ ॥

तस्मात्षडहाभ्यासः ॥ ८ ॥

उक्तार्थमुपसंहरति । तस्मादिति ॥ ८ ॥

संस्थागणेषु द्वादशाहिकधर्मातिदेशः । अधि॰ ४ ।

संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षणग्रहणात् ॥ ९ ॥

शतोक्थ्यं भवति शतातिरात्रं भवतीति, किं ज्योतिष्टोमस्याभ्यासः किं वा संस्थाविशिष्टस्याह्न इति संशये पूर्वपक्षमाह । संस्थेति । संस्थागणेषु विधीयमानेषु तदभ्यासः ज्योतिष्टोमाभ्यासः प्रतीयेत यतः ज्योतिष्टोमस्यैव उक्थ्यः अतिरात्र इति नाम अतः कृतलक्षणस्य कृतनाम्नः ज्योतिष्टोमस्यैव ग्रहणात् ॥ ९ ॥

अधिकाराद्वा प्रकृतिः तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ॥ १० ॥

सिद्धान्तमाह । अधीति । तद्विशिष्टा उक्थ्यादिसंस्थाविशिष्टा प्रकृतिः द्वादशाहसंबन्धीनि अहानि विधीयन्ते अधिकारात् । चोदक

Digitized by Google

शास्त्रेण अधिकृतत्वादिति शेषः । प्राप्तत्वादित्यर्थः । उक्थ्यादिशब्दाः ज्योतिष्टोमनामानीति यदुक्तं तत्राह । अभिधानस्य उक्थ्यादिनाम्नः तन्निमित्तत्वात् । यत्साम्ना क्रतुसमाप्तिस्तन्निमित्तत्वात् । तथा च द्वादशाहिकाहर्गणेष्वपि तन्निमित्तस्याबाधादिति भावः ॥ १० ॥

शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयः । अधि० ५ ।

गणादुपचयः तत्प्रकृतित्वात् ॥ ११ ॥

शतोक्थ्यं भवतीत्यत्र द्वादशाहसंबन्धिदशरात्रावृत्तिरिति पूर्वाधिकरणे स्थितम् । तानि च द्वादशाहदशाहानि च प्रायेणोक्थ्यसंस्थानि । तत्रोक्थ्यस्तोत्रे ज्योतिष्टोमोक्थ्यस्तोत्राद् अधिकाः के चन धर्मा आम्नाताः । इत्थं च शतोक्थ्ये स्तोत्रे द्वादशरात्रोक्थ्यधर्मा उत ज्योतिष्टोमोक्थ्यस्तोत्रधर्मा इति संशये पूर्वपक्षमाह । गणादिति । गणाद् द्वादशाहगणादुपचयः धर्मप्राप्तिः तस्य शतोक्थ्यस्य प्रकृतित्वाद् द्वादशाहस्य ॥ ११ ॥

एकाहाद्वा तेषां समत्वात्स्यात् ॥ १२ ॥

सिद्धान्तमाह । एकाहाद्वेति । एकाहाज् ज्योतिष्टोमाद् धर्मग्रहणम् । तेषां शतोक्थ्यानां द्वादशाहिकानामह्नां च समत्वात् । भिक्षुकत्वेन तुल्यत्वात् । अयं भावः । द्वादशाहसंबन्धीन्यहान्यपि स्तोत्रशस्त्राणां स्वधर्माणां भिक्षामन्यत इच्छन्ति, शतोक्थ्यान्यप्यन्यत एव भिक्षामिच्छन्तीति तुल्यम् । ज्योतिष्टोमसमीपे तेषां पठितत्वेन ज्योतिष्टोमो न हि भिक्षामपेक्षतइति अभिक्षुकः । तथा च न हि भिक्षुको भिक्षुकं याचते अभिक्षुके सतीति लोकन्यायेन ज्योतिष्टोमधर्मा इति भावः ॥ १२ ॥

गायत्रमेतदहर्भवतीत्यादौ उत्पत्तिगायत्रीणामागमः । अधि० ६ ।

गायत्रीषु प्राकृतीनामवच्छेदः प्रकृत्यधिकारात्संख्यात्वादग्निष्टोमवद्व्यतिरेकात्तदाख्यत्वम् ॥ १३ ॥

वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति श्रुते बृहस्पतिसवे गायत्रमेतदहर्भवतीति श्रुतम् । अत्र ज्योतिष्टोमादागतत्रिष्टुबनुष्टुबादिच्छन्दस्कानामृचामक्षरलोपं कृत्वा सर्वासां गायत्रीत्वं संपाद्यमुत दाशतयीभ्यः

Digitized by Google

गायत्रच्छन्दस्कानामृचां ग्रहणमिति संशये पूर्वपक्षमाह । गायत्रीति । गायत्रीषु श्रूयमाणासु प्राकृतीनां त्रिष्टुब्जगत्यादीनां व्यवच्छेदः अधिकारलोपः प्रकृत्यधिकारात् प्रकृतिचोदनानुग्रहात् । गायत्र्यक्षराणां चतुर्विंशतिसंख्यत्वात् । कथमेतज्ज्ञायतइत्यत्राह । अव्यतिरेकात् । गायत्रीत्वस्य चतुर्विंशतिसंख्याऽव्यभिचारात् तदाख्यत्वं गायत्र्याख्यत्वं चतुर्विंशतिसंख्यायाः । अग्निष्टोमवत् । पूर्वाधिकरणसिद्धान्तवत् । यथा शताग्निष्टोमः कार्य इत्युक्ते द्वादशाहगतोक्थ्यस्य लोपः तथा ॥ १३ ॥

नित्यवच्च पृथक्सतीषु तद्वचनम् ॥ १४ ॥

चतुर्विंशतिसंख्याया गायत्रीपदप्रवृत्तिनिमित्तत्वे साधकान्तरमाह । नित्यवदिति । गायत्र्यपेक्षया पृथक्सतीषु भिन्नासु जगतीषु, ये हि द्वे गायत्र्यौ सैका जगतीति नित्यवच्च तद्वचनं गायत्रीवचनं संगच्छते । द्वे गायत्र्यौ अष्टचत्वारिंशत्संख्या भवन्ति । जगत्यपि तावत्संख्याकेति गायत्रीशब्दस्य च्छन्दःपरत्वे द्वे गायत्र्यौ जगतीति वचनमनुपपन्नमृग्द्वयस्य जगतीत्वाभावात् ॥ १४ ॥

न विंशतौ दशेति चेत् ॥ १५ ॥

शते पञ्चाशदितिवज् जगत्यामष्टाचत्वारिंशत्संख्यायां चतुर्विंशतिसंख्या ऽस्त्येवेति जगत्यामृचि कार्ये कृते तदन्तर्वर्तिगायत्र्यामपि कृतं भवतीति नाक्षरलोप इत्याशङ्क्य दूषयति । नेति । विंशतौ दश यथा तथा जगती गायत्रीतीति चेत् ॥ १५ ॥

ऐकसंख्यमेव स्यात् ॥ १६ ॥

एवं सति परार्धसंख्या एकैव स्यात् । इतरासां यावत्संख्यानां परार्धान्तःपातित्वादिति समाधत्ते । ऐकेति ॥ १६ ॥

गुणाद्वा द्रव्यशब्दः स्यादसर्वविषयत्वात् ॥ १७ ॥

पक्षान्तरमुत्थापयति । गुणादिति । गुणात्पृथक्संख्यारूपगुणात्पृथग्द्रव्यशब्दः द्रव्यवाचकशब्दः चतुर्विंशतिवर्णपरः स्यात् । असर्वविषयत्वात् । यावच्चतुर्विंशतिसंख्याऽविषयत्वात् । यदि केवलं यावच्चतुर्विंशति-

Digitized by Google

संख्यापरः तर्हि घटवृत्तिचतुर्विंशतिसंख्यायामपि गायत्रीति व्यवहारः स्यादिति भावः ॥ १७ ॥

गोत्ववच्च समन्वयः ॥ १८ ॥

ननु द्रव्यपरत्वे ऽप्येष दोष इत्यत आह। गोत्ववदिति। यथा गच्छतीति गौरिति गमनकर्तृत्वनिमित्तस्य पुरुषादौ सत्त्वे ऽपि सास्नादिमति रूढिशक्तिं स्वीकृत्य सास्नादिमत्येव समन्वयो नान्यत्रेति, तथा द्रव्यसामान्ये गायत्रीशब्दप्रवृत्तिनिमित्तचतुर्विंशतिसंख्यासत्त्वे ऽपि तत्संख्याविशिष्टवर्णमात्रे समन्वयो न तु पटादाविति भावः ॥ १८ ॥

संख्यायाश्च शब्दवत्त्वात् ॥ १९ ॥

किं च, संख्यायाश्चतुर्विंशतिरित्येकं नाम व्यवहारसंपादकमस्ति गायत्रीति तस्यैव नामान्तरत्वे निष्फलमित्याह। संख्याया इति। संख्यायाः उक्तसंख्यायाः शब्दवत्त्वात्। चतुर्विंशतिरितिशब्दवत्त्वात् ॥ १९ ॥

इतरस्याश्रुतित्वाच्च ॥ २० ॥

इतरस्य ऋग्रूपद्रव्यस्य अश्रुतित्वाद् नामरहितत्वात्। ऋचो गायत्रीति नाम सार्थकमिति भावः ॥ २० ॥

द्रव्यान्तरे ऽनिवेशादुक्थ्यलोपे विशिष्टं स्यात् ॥ २१ ॥

यदुक्तमग्निष्टोमवदिति तस्य उत्तरमाह। द्रव्येति। अग्निष्टोमशब्दस्य द्रव्यान्तरे ऽनिवेशात्। द्वादशाहिके अहर्गणे चरमस्तोत्रे उक्थ्यलोपं कृत्वा अग्निष्टोमसाम्ना क्रतुसमाप्तौ कृतायामेव विशिष्टमग्निष्टोमनामविशिष्टं स्यात् ॥ २१ ॥

अशास्त्रलक्षणत्वात् ॥ २२ ॥

अशास्त्रलक्षणत्वादुक्थ्यस्य यथा ज्ञताग्निष्टोम इत्यत्र अग्निष्टोमान्तत्वस्य प्रत्यक्षशास्त्रगम्यत्वं तथोक्थ्यस्यानुमानिकत्वेन प्रत्यक्षशास्त्रागम्यत्वादुक्थ्यबाधो युक्त इति भावः ॥ २२ ॥

उत्पत्तिनामधेयत्वाद्भक्त्या पृथक्सतीषु ॥ २३ ॥

यदुक्तं द्वे गायत्र्यौ एका जगतीति लिङ्गमुक्तं तदुत्तरमाह। उत्प-

Digitized by Google

त्रीति । ऋचः गायत्रीति उत्पत्तिनामधेयत्वात् स्वभावसिद्धनामत्वात् । पृथक्सतीषु जगत्यवयवेषु भक्त्या लक्षणया गायत्रीशब्दप्रयोगः ॥ २३ ॥

वचनमिति चेत् ॥ २४ ॥

अनुवादे लक्षणा युक्ता, इह तु द्वाभ्यां गायत्रीभ्यां वैश्यस्य क्रियते जगत्येव कृतं भवतीत्यत्र विध्यंशे लक्षणा अयुक्तेति शङ्कते । वचनमिति । कथमिति पूरणीयम् । लक्षणया वचनं विधिः कथमिति चेत् ॥ २४ ॥

यावदुक्तम् ॥ २५ ॥

समाधत्ते । यावदिति । यावद्भिः समयैर्वृत्तिभिः उक्तं विधानं भवति । अत एव पृष्ठैरुपतिष्ठत इत्यत्र पृष्ठशब्दार्थस्य मन्त्रस्य विधेयत्वेऽपि लक्षणा पृष्ठशब्दस्य ॥ २५ ॥

अपूर्वे च विकल्पः स्याद्यदि संख्याभिधानम् ॥ २६ ॥

गायत्रीशब्दस्य संख्यापरत्वे दूषणान्तरमाह । अपूर्वेति । अपूर्वे प्रकृतौ दर्शपूर्णमासे जगत्या परिदध्यादित्युक्त्वा गायत्र्या परिदध्यादित्युक्तं, जगत्या अक्षरलोपेन गायत्रीत्वसंपादनम् । आजुहोतादुवस्यतेति ऋग् अनयोर्विकल्पः स्याद् यदि संख्याभिधानम् ॥ २६ ॥

ऋग्गुणत्वान्नेति चेत् ॥ २७ ॥

पञ्चदशानुब्रूयादिति ऋचां पञ्चदशानां विहितत्वाद्गायत्र्या परिदध्यादिति परिधानस्य ऋग्धर्मत्वाज् जगत्या अक्षरलोपे ऋगेकदेशस्य ऋक्त्वाभावात्परिधानस्य ऋग्धर्मत्वं भज्येत अतः आजुहोतादुवस्यतेत्यनेनैव परिधानं न विकल्प इत्याशङ्कते । ऋगिति । परिधानस्य ऋग्गुणत्वाच्च विकल्पः ॥ २७ ॥

तथा पूर्ववति स्यात् ॥ २८ ॥

बृहस्पतिसवेऽपि तुल्यमित्याह । तथेति । पूर्ववति विकृतौ बृहस्पतिसवेऽपि तथा स्याद् गानादिकार्यमृग्गुणः स्यात् । ज्योतिष्टोमे ऋक्ष्वेव गानस्य क्लृप्तत्वेन चोदकशास्त्रेण तथैव प्राप्तौ गायत्रीछन्दःसु कृते चोदकशास्त्रमनुगृहीतं भवतीति भावः ॥ २८ ॥

गुणावेशश्च सर्वत्र ॥ २९ ॥

किं च गुणस्य चतुर्विंशतिसंख्याया आवेशः समावेशः सर्वत्र ग्रहचमसादावपि स्यात् । ग्रहचमसादिशुत्तिसंख्यायामपि गायत्रीव्यवहारः स्यादिति भावः ॥ २९ ॥

निष्पन्नग्रहणमिति चेत् ॥ ३० ॥

यादृशसंख्यायां रूढिः गायत्रीशब्दस्य तस्यैव गायत्रीशब्देन ग्रहणमिति उक्तदोषं परिहरति । निष्पन्नेति । निष्पन्नस्य रूढ्यर्थस्य ग्रहणमिति चेत् ॥ ३० ॥

तथेहापि स्यात् ॥ ३१ ॥

यथा ऽक्षरगणनायामेव संख्यायां गायत्रीव्यवहारः तथा ऋगतिरिक्ते गायत्रीव्यवहाराभावात्संख्याविशिष्टा ऋक् तद्वाच्येत्युत्तरयति । तथेति ॥ ३१ ॥

यदि वा ऽविशये नियमः प्रकृत्युपबन्धनाच्छरेष्वपि प्रसिद्धः स्यात् ॥ ३२ ॥

यदीति । अविशये ऽपि गायत्रीशब्दस्य संख्याविशिष्टऋगर्थत्वे असंशये ऽपि प्रकृत्युपबन्धनाच्चोदकानुग्रहाद् नियमः गायत्र्यां गायत्रीशब्दार्थरूपनियमः यदि वा, तर्हि शरमयं बर्हिरित्यत्र शरशब्दः कुशेष्वपि प्रसिद्ध इति कल्प्यतां प्रकृत्यनुग्रहात् ॥ ३२ ॥

दृष्टः प्रयोग इति चेत् ॥ ३३ ॥

द्वे गायत्र्यौ एका जगतीति संख्यायां व्यवहारो दृष्टः शरस्य कुशे व्यवहारो नास्तीत्याशङ्कते । दृष्ट इति ॥ ३३ ॥

तथा शरेष्वपि ॥ ३४ ॥

शरवणमेवेदं कुशवनमिति व्यवहारो ऽत्राप्यस्तीत्याह । तथेति ॥ ३४ ॥

भक्त्येति चेत् ॥ ३५ ॥

शरशब्दस्य दर्शितस्थले लक्षणेत्याह । भक्त्येति ॥ ३५ ॥

Digitized by Google

तथेतरस्मिन् ॥ ३६ ॥

गायत्रीशब्दस्याप्युक्तस्थले लक्षणेति समाधत्ते। तथेति। इतरस्मिन् गायत्रीशब्देऽपि तथा लक्षणा ॥ ३६ ॥

अर्थस्य चासमाप्तत्वान्न तासामेकदेशे स्यात् ॥ ३७ ॥

अर्थस्येति। अक्षरलोपे वाक्यघटकीभूतपूर्वपदसाकाङ्क्षाणामुत्तरपदानां लुप्तत्वेन अर्थस्य वाक्यस्य असमाप्तत्वाच्छाब्दबोधोपधायकत्वाभावात्। तासां प्राकृतर्चानामेकदेशे गानादि न स्यात्। किं तु चतुर्विंशत्यक्षराणामन्यर्चानामेव ग्रहणमिति ॥ ३७ ॥

इति श्रीजैमिनिसूत्रवृत्तौ अष्टमाध्यायस्य तृतीयः पादः ॥ ३ ॥

दर्विहोमशब्दस्य नामधेयत्वम्। अधि० १।

दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥ १ ॥

यदेकया जुहुयाद्दर्विहोमं कुर्यादित्यत्र दर्विहोम इत्यत्र दर्विरूपगुणविधिः कर्मनाम वेति चिन्तायां गुणविधिरिति पूर्वपक्षे सिद्धान्तमाह। दर्वीति। दर्विहोमशब्दः यज्ञाभिधानं यागनाम होमसंयोगाद् होमशब्दार्थेन साकमभेदसंबन्धात् ॥ १ ॥

दर्विहोमशब्दस्य लौकिकवैदिकोभयकर्मनामधेयत्वम्। अधि० २।

स लौकिकानां स्यात्कर्त्तुस्तदाख्यत्वात् ॥ २ ॥

एवमपरिपूर्णे अधिकरणे इदं नाम स्मार्तकर्मण एव उत स्मार्तवैदिकानामिति संशये पूर्वपक्षमाह। स इति। स सङ्केतः लौकिकानां स्थालीपाकादिकर्मणां स्यात्कर्तुः दर्विहोमकर्तुः तदाख्यत्वात्। शिनीनां दार्विहोमिको ब्राह्मण इति स्मृतत्वात् ॥ २ ॥

सर्वेषां वा दर्शनाद्वास्तुहोमे ॥ ३ ॥

सिद्धान्तमाह। सर्वेषामिति। सर्वेषां श्रौतस्मार्तानां संज्ञा स्यात्। वास्तुहोमे वैदिके यदेकया जुहुयाद्दर्विहोमं कुर्यादिति प्रयोगदर्शनात् ॥ ३ ॥

दर्विहोमशब्दस्य होमनामधेयत्वम्। अधि० ३।

जुहोतिचोदनानां वा तत्संयोगात् ॥ ४ ॥

सर्वेषां संज्ञा चेदपि जुहोतिचोदनाचोदितानामेव सा संज्ञा न यजतिचोदनाचोदितानाम् । दर्विहोम इति नाम्नि जुहोतिधातुयोगात् ॥ ४ ॥

द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ॥ ५ ॥

पूर्वमपर्यवसितं स्थितमधिकरणशेषं समापयन् पूर्वोक्तसिद्धान्तमाक्षिपति । द्रव्येति । द्रव्योपदेशात् । दर्विरूपद्रव्योपदेशात् । गुणाभिधानं गुणस्य दर्विरूपस्य विधिः ॥ ५ ॥

न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ॥ ६ ॥

दूषयति । नेति । न दर्विरूपगुणविधिः लौकिकानां स्मार्तकर्मणां स्मृत्या स्वञ्जलया मूलदण्डया दर्व्या जुहोतीत्याचारग्रहणत्वात् । आचारेण ग्रहणं यत्र तत्त्वात् । शब्दवतां वैदिकानामन्यार्थस्य स्रुवेण जुहोति जुह्वा नारिष्टाञ्जुहोतीति जुह्वादेर्विधानात् ॥ ६ ॥

दर्शनाच्चान्यपात्रस्य ॥ ७ ॥

दर्शनाच्चेति । भूतेभ्यस्त्वा स्रुचमुद्गृह्णातीति पात्रान्तरदर्शनात् ॥ ७ ॥

तथाऽग्निहविषोः ॥ ८ ॥

ननु माऽस्तु पात्रविधिः तथाऽपि दर्व्यां होम इति अधिकरणकारकविधानम् । यद्वा, होमद्रव्यत्वेन दर्विविधानमत्राह । तथेति । अग्नेः आहवनीयादेः हविषश्च पुरोडाशादेः श्रुतानां दर्व्या विधानम् ॥ ८ ॥

उक्तश्चार्थे ऽसंबन्धः ॥ ९ ॥

अग्निकार्ये दाहादौ दर्व्या असंबन्धः असामर्थ्यमतोऽप्यग्निकार्ये दर्व्या न विधानमित्याह । उक्त इति । अर्थे अग्निकार्ये ॥ ९ ॥

दर्विहोमशब्दस्यापूर्वत्वम् । अधि० ४ ।

तस्मिन्त्सोमः प्रवर्तेताव्यक्तत्वात् ॥ १० ॥

दर्विहोमनामके कर्मणि धर्माः कस्मादानेया इति विचिकित्सायां पूर्वपक्षमाह । तस्मिन्निति । तस्मिन्दर्विहोमे सोमः सोमधर्मः प्रवर्तेत अव्यक्तत्वात् ॥ १० ॥

न वा स्वाहाकारेण संयोगाद्वषट्कारस्य च निर्देशात्तन्त्रे तेन विप्रतिषेधात् ॥ ११ ॥

सिद्धान्तमाह। न वेति। दर्विहोमस्य स्वाहाकारेण संयोगात्। अग्नये स्वाहा सोमाय स्वाहेति, तत्र सोमादितन्त्रे वषट्कारस्य निर्देशात्तेन स्वाहाकारेण सह वषट्कारस्य विप्रतिषेधाद् विरोधात् ॥ ११ ॥

शब्दान्तरत्वात् ॥ १२ ॥

शब्दान्तरत्वात्। सोमेन यजेतेति यजतिधातुचोदितत्वं सोमस्य, नारिष्टाञ् जुहोतीतिजुहोतिचोदनाचोदितत्वं चेति शब्दभेदात् ॥ १२ ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

सोमघृतेन द्यावापृथिवी आपृणेथामित्यौदुम्बर्यां जुहोतीति औदुम्बरीहोमे आमूलादवस्रावयति भूमिगते स्वाहा करोतीति, यदि जुहोतिचोदनाचोदिते दर्विहोमे सौमिका विधयन्तः तर्हि वषट्कारमेव विदध्याद् न भूमिगते स्वाहा करोतीति ब्रूयादिति भावः ॥ १३ ॥

उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिर्लिङ्गदर्शनात्पशुवत् ॥ १४ ॥

यदुक्तमौदुम्बरीहोमे लिङ्गदर्शनं स्वमतसाधकं तदाक्षिपति। उत्तरेति। स्वाहाकारः स्वाहाकारविधिः उत्तरार्थः प्रकृतिभिन्नार्थः यथा साप्तदश्यम्। यथा ऽनारभ्यपठितं सप्तदशानुब्रूयादिति वाक्यं पर्णमयीन्यायेन दर्शपूर्णमासं प्रति गतं तत्र श्रूयमाणपाञ्चदश्येन प्रकरणपठितेन बलवता निवारितं सद् विकृतिभूतेषु पशुमित्रविन्दादिषु सप्तदश सामिधेनीरन्वाहेति श्रूयमाणसाप्तदश्यकेषु निविशते, तथा स्वाहाकारेण वषट्कारेण वा देवेभ्यो हविर्दीयतइति वाक्ये स्वाहाकारेण दानविधिः प्रकृतिभूतदर्शपूर्णमाससोमयोर्वषट्काराक्रान्तयोरनिविशमानः यत्र स्वाहाकारेण होमः श्रुतः तत्रोपसंहारं प्राप्नोति। इत्थं च प्रवृत्तिलिङ्गात् स्वाहाकारप्रवृत्तिलिङ्गात् पूर्वोक्तात्सौमिकधर्मस्य अविप्रतिषेधः अविरोधः। पशुवत्। पशौ सप्तदश सामिधेनीरन्वाहेति साप्तदश्यविधाने ऽपि यथा दर्शपू-

र्णमासधर्माः प्रयाजानुयाजादयो न विरुध्यन्ते तथा स्वाहाकारविधानेऽपि न सोमधर्मविरोध इति भावः ॥ १४ ॥

अनुत्तरार्थौ वा अर्थवत्त्वादानर्थक्याद्धि प्राकृतस्योपरोधः स्यात् ॥ १५ ॥

अस्योत्तरं दृष्टान्तवैषम्येण दर्शयति । अनुत्तरेति । स्वाहाकारप्रदानविधिः अनारभ्याधीतः अनुत्तरार्थः दर्शपूर्णमासरूपप्रकृत्यर्थः नारिष्टपार्वणहोमादौ निवेशसंभवेन प्रकृतार्थत्वात् सफलत्वात् । साप्तदश्यस्य आनर्थक्यात् क्वापि निवेशासंभवेन निष्फलत्वात् प्राकृतस्य पाञ्चदश्यस्य उपरोधः निवारकत्वं स्यात् । यतो न प्रकृतावानर्थक्यमतः नोत्तरार्थं, न चेदुत्तरार्थं तर्हि सोमधर्माभावे लिङ्गं सुवचम् ॥ १५ ॥

न प्रकृतावपीति चेत् ॥ १६ ॥

द्व्युत्तरो वषट्कार एष वै सप्तदशः प्रजापतिरिति दर्शपूर्णमासप्रकरणेऽनुवषट्कारविधानप्रकरणेन साङ्गप्रधानार्थत्वेन नारिष्टहोमादिष्वपि वषट्कारस्य निवेशे तत्रापि स्वाहाकारसमावेशो न संभवतीति शङ्कते । नेति । प्रकृतौ नारिष्टहोमादिष्वपि न स्वाहाकार इति चेत् ॥ १६ ॥

उक्तं समवाये पारदौर्बल्यम् ॥ १७ ॥

एतद्दूषणं परिहरति । उक्तमिति । दश ते तनुवो यज्ञयज्ञिया इति नारिष्टहोममन्त्रे यजमानो मृतोऽभूत्स्वाहेति मन्त्रे समवाये प्रकरणेन वषट्कारः प्राप्तः । स्वाहाकारपाठेन शेषवाक्येण स्वाहाकारः एकवाक्यतामापन्न इति वाक्येन स्वाहाकारप्राप्तिः । एवं प्रमाणद्वयेन उभयोः समवाये प्राप्ते पारदौर्बल्यं वाक्यात्परस्य प्रकरणस्य दौर्बल्यमुक्तं तृतीये । तस्मात्स्वाहाकार एवेति भावः ॥ १७ ॥

तच्चोदना वेष्टेः प्रवृत्तत्वात्तद्विधिः स्यात् ॥ १८ ॥

पक्षान्तरमुत्थापयति । तदिति । तच्चोदनाः नारिष्टहोमचोदनाः नारिष्टधर्माः दर्विहोमेषु अग्निहोत्रादिषु प्रवर्तेरन् । इष्टेः दर्शपूर्णमासादीष्टिसामान्ये यावत्पशुयागेषु च बहुषु प्रधानोपकाराय प्रवृत्तत्वात् ।

Digitized by Google

ननु अग्निहोत्रादौ तत्प्रापको विधेर्नेत्यत्राह । तद्विधिः अग्निहोत्रादौ नारिष्टादिधर्मप्रवर्तको विधिः स्यादेव । अयं भावः । यः राजधान्यां स्थित्वा बहूनामुपकारं करोति इति नूतनो जानाति स्वस्याप्ययमुपकारं करिष्यतीति निश्चयं संपादयति इति लोकानुभवः, तथा इष्टिपश्वादीनुपकुर्वन् अग्निहोत्रादिकमप्युपकुर्यादित्येवं विधिः कल्प्यते ॥ १८ ॥

शब्दसामर्थ्याच्च ॥ १९ ॥

शब्दसामर्थ्यात् । जुहोतिचोदनाचोदितत्वसामर्थ्यात् । यथा निर्वपतिचोदनाचोदितत्वसामर्थ्यान्निर्वापादयः सौर्ययागे प्रवर्तन्ते तथा नारिष्टाञ्जुहोति अग्निहोत्रं जुहोतीति चोदनासाम्यादपि तद्धर्माणां प्रवृत्तिरिति भावः ॥ १९ ॥

लिङ्गदर्शनाच्च ॥ २० ॥

लिङ्गेति । दर्शपूर्णमासयोः परिधयः अन्तर्वेदिश्च साङ्गप्रधानाङ्गमिति तृतीये स्थितम् । तथा च परिधिरन्तर्वेदिश्च नारिष्टानामप्यङ्गम् । इत्थं चाग्निहोत्रे यत्कीटावपन्नेन जुहुयाद् अप्रजा अपशुर्यजमानः स्यादिति कीटयुक्तहविषा होमे दोषमुक्त्वा मध्यमेन पर्णेन द्यावापृथिव्यर्चा ऽन्तःपरिधि निनयेदिति हविषो ऽन्यत्र विनियोगविधौ अन्तःपरिधिदेशनिधानात्परिधयः क्लृप्ताः इति नारिष्टधर्मप्राप्तौ लिङ्गम् । एवमग्नौ अन्तर्वेदि तिष्ठन् सावित्राणि जुहोतीति । यदि नारिष्टप्रकृतिकत्वं दर्विहोमे न स्यात् तर्हि अन्तःपरिधि निनयति अन्तर्वेदि तिष्ठन्नित्यसंगतं स्यात् । अन्तर्वेदिपरिध्योरप्राप्तेरिति भावः ॥ २० ॥

तत्राभावस्य हेतुत्वाद्गुणार्थे स्याददर्शनम् ॥ २१ ॥

उत्थापितपक्षान्तरं दूषयति । तत्रेति । गुणार्थे अग्निहोत्रे नारिष्टगुणसाधनार्थे साधनविषये यद्दर्शनं हेतुरुक्तः प्रवृत्तत्वादिति । तद्दर्शनमसाधकम् । तत्र उक्तहेतुरसाधक इति प्रतिज्ञावाक्ये अभावस्य क्व चिन्नारिष्टधर्माणामिध्माबर्हिषामभावस्य हेतुत्वात् । अयं भावः । चातुर्मास्ये महापितृयज्ञानन्तरं त्र्यम्बकेष्टिं चतुष्पथे जुहोतीति दर्विहोमत्वेन विधा-

य तस्मिन् नेध्माबर्हिर्भवति न प्रयाजा इज्यन्ते नानूयाजा इत्यप्रतिष्ठित इत्यादित्यं चरुं पुनरेत्य निर्वपेदिति दोषमुद्भाव्यादित्येष्टिरुक्ता । इध्माबर्हिषोरङ्गप्रधानार्थत्वेन इध्माबर्हिषोरभावेन हेतुना त्र्यम्बकया अप्रतिष्ठितत्वं यत उक्तमतः त्र्यम्बके इध्माबर्हिषोर्नारिष्टधर्मयोरभावः । चतुष्पथे जुहोतीति जुहोतिचोदनया दर्विहोमत्वमस्ति । अतो न नारिष्टहोमप्रकृतिकत्वं दर्विहोमानामिति ॥ २१ ॥

विधिरिति चेत् ॥ २२ ॥

ननु यथा निर्वपतिचोदनाचोदितत्वेन लिङ्गेन महापितृयज्ञे प्रयाजानां प्राप्तौ न प्रयाजा इज्यन्तइत्यनेन निवृत्तिः तथा नारिष्टधर्माणां जुहोतिचोदनया प्राप्तौ तदङ्गानामिध्माबर्हीरूपाणां निवृत्त्यर्थमेवेदं वचनमित्याशङ्कते । विधिरिति । निवर्तकविधिः ॥ २२ ॥

न वाक्यशेषत्वाद्गुणार्थे च समाधानं नानात्वेनोपपद्यते ॥ २३ ॥

समाधत्ते । नेति । न विधिः किं त्वादित्ययागस्तावकवाक्यशेषत्वाद् अर्थवादत्वात् । चतुर्विंशत्यक्षरा गायत्रीत्यत्र यथा गायत्र्या चतुर्विंशतिवर्णाः । कृप्तस्यैवानुवादो ऽयं कृप्तत्वादेव नारिष्टधर्माभावसाधक इति भावः । ननु उक्तरीत्या प्राप्तयोरिध्माबर्हिषोर्निवर्तक एवास्त्वित्यत आह । गुणार्थेति । गुणार्थे उक्तवाक्यस्य गुणविध्यर्थत्वे तत्पक्षदूषकं समाधानं नानात्वेन नानावाक्यत्वेन वक्तुमुपपद्यते शक्यते । यदीध्माबर्हिषोरभावरूपगुणविध्यर्थमेवेदं वाक्यमिति वदेत्, तर्हि इध्माबर्हिर्निषेधकवाक्यमेकं, न प्रयाजा इत्येकं, नानुयाजा इत्येकम्, आदित्यं चरुं निर्वपेदित्येकं, नानावाक्यानि स्युः । अर्थवादत्वे आदित्ययागविध्येकवाक्यतापत्तेः सत्येकं वाक्यं भवतीति अर्थवाद एव युक्त इति भावः ॥ २३ ॥

एषां वा ऽपरयोर्होमस्तेषां स्यादविरोधात् ॥ २४ ॥

ननु अवदानवानारिष्टधर्मान् भजन्तु दर्विहोमाः तथा ऽपि गार्हपत्यदक्षिणाग्निहोमधर्मान् लभन्तां, तयोर्होमे इध्माबर्हिषोरनङ्गत्वेन उक्त-

Digitized by Google

दोषाभावादित्याशङ्कते। एवमिति। एवं यागानां पत्नीसंयाजपिष्टलेपफलीकरणहोमरूपाणामपरयोर्गार्हपत्यदक्षिणाग्न्योर्होमस्तेषां धर्मप्राप्तिः स्यात् पूर्वोक्तप्रवृत्तत्वहेतोः ॥ २४ ॥

तत्रौषधानि चोद्यन्ते तानि स्थानेन गम्येरन् ॥ २५ ॥

इममपि पक्षं दूषयति। तत्रेति। तत्र दर्विहोमविशेषत्रौषधानि त्रोषधिद्रव्याणि व्रीह्यादीनि चोद्यन्ते विधीयन्ते, यथा त्र्यम्बके प्रतिपूरुषमेककपालान्निर्वपतीति पुरोडाशविधिः। तानि व्रीह्यादिद्रव्याणि स्थानेन तद्धर्मान् लभेरन्। यथा सौम्यं श्यामाकं चरुमिति विहितो व्रीहिस्थाने विहितो व्रीहिधर्मान् लभते निर्वापादीन्, तथा प्रकृतितः पत्नीसंयाजात् त्र्यम्बके तद्विकृतावाज्यप्राप्तौ तस्य स्थाने विहितः पुरोडाश आज्यधर्मान् प्राप्नुयात्। इदमयुक्तमतो न पत्नीसंयाजप्रकृतिकत्वं दर्विहोमानामिति भावः ॥ २५ ॥

लिङ्गाद्वा शेषहोमयोः ॥ २६ ॥

ननु मा ऽस्तु पत्नीसंयाजप्रकृतिकत्वं तथा ऽपि पिष्टलेपफलीकरणहोमधर्मं लभतामित्याशङ्कते। लिङ्गादिति। लिङ्गात् पिष्टलेपफलीकरणहोमौ जुहोतीति जुहोतिचोदनालिङ्गाच् शेषयोः उलूखलादौ प्रधानार्थं ग्रहणानन्तरमुर्वरितयोः होमयोः पिष्टलेपफलीकरणयोः, धर्माल्लँभन्तां दर्विहोमा इति पूरणीयम्। तयोरोषधिद्रव्यकत्वेन पूर्वोक्तदोषादिति भावः ॥ २६ ॥

प्रतिपत्ती तु ते भवतस्तस्मादतद्विकारत्वम् ॥ २७ ॥

इममपि पक्षं परिहरति। प्रतिपत्ती इति। ते पिष्टलेपफलीकरणहोमकर्मणी प्रतिपत्ती गुणकर्मणी शेषद्रव्यसंस्काररूपे यतो भवतः तस्मादतद्विकारत्वं तत्प्रकृतिकत्वाभाववान् दर्विहोमः। प्रतिपत्तिकर्मणो न क्वापि प्रकृतित्वं दृष्टं, तथा तद्धर्माणामतिदेशो ऽपि न दृष्टः अतः दर्विहोमा अपूर्वा एवेति भावः ॥ २७ ॥

सन्निपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वाद्वचनादतिदेशः स्यात् ॥ २८ ॥

Digitized by Google

उक्तार्थमुपसंहरति । सन्निपातइति । विरोधिनां दोषयुक्तानां पूर्वोक्तानां प्रवृत्तत्वादित्यादिहेतूनां सन्निपाते साधकत्वेनोपन्यासे ऽपि साध्यस्य नारिष्टहोमधर्मप्राप्तिरूपस्य अप्रवृत्तिः असिद्धिः इति प्रतीयेत ज्ञातव्यः । नारिष्टहोमतद्धर्मविधीनामुत्पत्तेः पाठस्य दर्शपूर्णमासप्रकरणएवेति व्यवस्थानानियमात् दर्शपूर्णमाससन्निधिपठितानन्यधर्मान्विहाय केवलस्य अर्थस्य नारिष्टधर्मस्य अपरिणेयत्वात् अनतिदेश्यत्वात् दर्विहोमा अपूर्वाः । ननु राष्ट्रभृदादीनां ज्योतिष्टोमसंनिधौ पठितानां विवाहादौ कथमतिदेशो ऽत आह । वचनात् प्रत्यक्षवचनात्, जयाभ्यातानान् राष्ट्रभृतश्च हुत्वेति वचनात् क्वचिदतिदेशः, न त्वानुमानिक इति भावः ॥ २८ ॥

इति श्रीजैमिनिसूत्रवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्च अष्टमाध्यायः ॥ ८ ॥

Digitized by Google

अग्निहोत्रादिधर्माणामपूर्वप्रयुक्तत्वम् । अधि० १ ।

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारः तत्प्रयुक्तस्तदर्थत्वात् ॥ १ ॥

सप्तमाष्टमयोर्विचारितो सामान्यविशेषातिदेशो । इत्थमतिदेशे सिद्धे सौर्ययागे अग्नये जुष्टं निर्वपामीति मन्त्रस्यातिदेशेन प्राप्तौ अग्निपदस्थाने सूर्यपदस्योहः कार्यो न वेति चिन्ताया अतिदेशमूलकत्वात्तदनन्तरं नवमे ऊहः चिन्त्यते । प्रयाजाद्यङ्गकलापः दर्शपूर्णमाससन्निधौ पठितः यज्ञिप्रयुक्त उतापूर्वप्रयुक्त इति । यज्ञिप्रयुक्तत्वे यागत्वावच्छिन्नमुद्दिश्याङ्गकलापविधानात्सर्वयागार्था इमे इति, यथा प्रकृतौ पाठस्तथैव यावद्यागे पाठो मनोतामन्त्रवत् । अपूर्वप्रयुक्तत्वे दर्शपूर्णमासापूर्वप्रयुक्तत्वस्य प्रकरणेन क्लृप्तत्वेनान्यापूर्वाप्रयुक्तत्वेन धर्माणामन्यत्राकाङ्क्षया ऽतिदेशादतिदेशमूलः ऊहो ऽपि सिध्यति, इति तच्चिन्तनमावश्यकम् । अत उक्तसंशये करणस्य व्यापाराकाङ्क्षत्वादाकाङ्क्षया यज्ञिप्रयुक्ता धर्मा इति पूर्वपक्षे सिद्धान्तमाह । यज्ञेति । यज्ञस्य दर्शपूर्णमासयागस्य यत्कर्म कार्यमपूर्वं तत्प्रधानमतः तत्प्रयुक्ता धर्माः अपूर्वस्य प्राधान्ये हेतुमाह । तद्धीति । हि यस्मात्तदपूर्वं कर्तव्यं तथा चोदनाभूतं कार्यत्वेन विधिगम्यमतः प्रधानं यत्कर्तव्यत्वेन ज्ञातं तस्यैव केन कथमित्याकाङ्क्षा । यागकर्तव्यताया लोकतः अवगतत्वेन शास्त्रापेक्षाभावात् । यागेनापूर्वं कर्तव्यमित्युक्ते अपूर्वस्यातीन्द्रियतया तदितिकर्तव्यताया लोकतो ज्ञातुमशक्यतया भवत्याकाङ्क्षा शास्त्रेणैवेति । समिधो यजतीत्यादिवाक्यानां तत्पूरकत्वमतः तदपूर्वेणान्वये तत्रैव चरितार्थमतः अपूर्वान्तरं न प्रसरतीति तत्र चोदकशास्त्रेणैव तत्र प्राप्तिरिति सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्यत्र ब्रह्मवर्चसापूर्वं सौर्ययागेनाग्नेययागवत्कर्तव्यमिति विधिवाक्ये आग्नेययागवदिति कल्प्यते । आग्नेययागतुल्यतया सौर्ययागानुष्ठानं प्राप्तमाग्नेययागे अग्नये जुष्टं निर्वपामीत्यत्र अपूर्वसंबन्धिदेवतास्मरणं देवतावाचकाग्निपदेनेति क्लृप्तं तस्यापि सौर्ययागे प्राप्तौ मन्त्रे तथाबोधकपदाभावेनागत्या ऊह एव शरणीकार्य इत्यूहविचार आवश्यक इति भावः । ननु अवहन-

(*a*) **Example—**

सितकर &c. (Vide *Text*, p. 483.)

Yamaka refined.

82-83.—[*Page* 561.] Thus it is said to be five-fold. The repetition, in a similar manner, of Letters, having their sense—if there be sense—different, is called (*b*) *Yamaka*, Rhyme (or Chime).

In समरसमरसो the first समर having meaning and the following समर being meaningless, they could not be said to be of different meanings, hence it is said '*if there be* sense;' and it is said '*in a similar manner*,'—*i. e.* existing in the same order—in order to distinguish it from such cases as सरोरस (where the repetition of स and र is not in the same order as before).

83 (*concld.*)—This becomes innumerable, according as ocurring in (different) feet and their parts.

(1), (2) and (3) The first feet (repeated) in each of the following three; (4) and (5) The second (repeated) in each of the following two; (6) The third (repeated in) the fourth; (7) The first, &c. (repeated) simultaneously in all the rest; (8) The first repeated in the second, and the third in the fourth; (9) The first repeated in fourth, and the second in the third;—these nine divisions accruing from the feet; there are two more kinds—(9) Repetition of half, and (10) Repetition of whole. Each foot being bisected would give rise to twenty (*c*) divisions—the first half of the first

(*a*) (1) The कर and कर (occurring in the same compound), (2) विभा and विभा (in the different compounds), (3) कमला and कमला (where the first कमला occurs in a compound, while the latter stands by itself).

(*b*) Thus defined by the *Pradipa*—Yamaka consists in the existence of many letters repeated in the same order,—(the various repetitions) not having identical meanings.

(*c*) Of the various combinations of the whole foot there have been eleven kinds—of these, the last, the श्लोकावृत्ति, is not possible here; hence there are only ten and these having become two-fold by the bisection of each foot, the divisions become 20.

Digitized by Google

foot &c., being, as before (with regard to the whole foot) the first half of the second, &c.; and similarly the second half of the first, &c., being the second half of the second, &c. This partial repetition does not apply to different Çlokas (and hence under this head there can be no श्लोकावृत्ति). The trisection of each foot would lead to thirty kinds, the quadrusection to forty, and so on.

The latter end of the second half of the first foot chiming with the former half of the first half of the second foot, and so on, would give rise to innumerable divisions:—

End-beginning (the latter half of the first chiming with the former half of the second and so on), *Beginning-end* (the former half of the first chiming with the latter half of the second foot, and so on), and the combination of these two; the *Middle-beginning* (the feet being trisected and quadrusected, the middle of the first foot chiming with the beginning of the second, and so on.) The *Beginning-end*, The *End-middle*, the *Middle-end*, and the combination of these. And again, similarly, there may be chiming of the former portion of a foot with the middle of the same foot. And thus the place of repetition being indefinite, an infinite number of divisions results. But these are not of much avail in poetry; and the various kinds are not severally defined; hence they are only partially exemplified:—

"सचारीभरणोमायमाराध्य विधुशेखरम् ।
सचारीभरणोऽमायस्ततस्त्वम् पृथिवीं जय" ॥

[Having worshipped the moon-crested (Çiva) who obtains Umā, the protectoress of virtuous women, you win the earth,—you the undeceitful, in whose fight were killed the enemy's elephants.]

[*Page* 566.]

(*a*) "विना यमेनोदयता ऽसुखाद्विना विनायमेनोनयता सुखाद्विना ।
महाजनो ऽदीयत मानसादरम् महाजनोदी यतमानसादरम्" ॥

(*a*) अन्वय:-अयम् विना मानसात् अरं अदीयत। (कथम्भूतः विना,) महाजनः, महाजनोदी। (केन अदीयत) यमेन (कथम्भूतेन) एनो विना नयता, असुखाद्विना, सुखाद्विना ऊनयता, । (कथं अदीयत) यतमानसादरम् (यथास्यात्तथा)।

Digitized by Google

[The bird-soul was soon bifurcated, from the mind, thus giving pain to those trying (to save it)—the Soul, which was a great one, capable of removing the troublers of great and good men—by the Death-God, carrying without fault, the eater or devourer of life, stripping off all pleasure.]

(*a*) " सत्त्वारम्भरतोऽवश्यमवलं विततारवम् ।
सर्वेदारणमानैषीद्दवानलसमस्थितः ॥
संत्वारम्भरतोऽवश्यमवलम्बिततारवम् ।
सर्वदा रणमानैषो दवानलसमस्थितः " ॥

[He (the king) always and certainly brought his enemies to great battles—(the enemies) weak (devoid of force) making great noise,—the king not moving slowly, dedicating himself up to Vishnu, attached to good actions,—the enemies not yet subdued, thus appearing like (unlowered) trees,—the king even desiring to pierce the (heart of all people), and as such having existence equal to the Submarine fire."]

"अनन्तमहिमव्याप्तविश्वां वेधा न वेदयाम् ।
याच मातेव भजते प्रणते मानवे दयाम्
यदा नतो ऽयदानतो नयात्ययं न यात्ययम् ।
शिवेहितां शिवे हितां स्मरामितां स्मरामिताम् " ॥

[I contemplate her whose all-pervading greatness Brahmā knows not, and who bears kindness towards suppliants, bowing to her this person goes not beyond the bounds of propriety of behaviour, having been auspiciously favoured (by her),—Pārvatī who was asked for by Çiva and who is favourable towards (our) prosperity."]

(*a*) अन्वयः–स (कथम्भूतः) अलसम् अवान्, मस्थितः, सत्त्वारम्भरतः, सर्वदारणमानैषी, दावानलसमस्थितः । आरम् (कथम्भूतम्) अवलम्, विततारवम्, अवशम् अवलम्बिततारवम्, । (किमकरोत्) अवश्यम् भरतः रणम् आनैषीत् ।

Digitized by Google

[*Page* 568.] "सरस्वति प्रसादं मे स्थितिं चित्तसरस्वति ।
सर स्वति कुरु क्षेत्र-कुरुक्षेत्रसरस्वति" ॥

[O Saraswati! be propitiated! make the ocean of my heart thy splendid residence.—Saraswati, who art the Saraswati of Kurukshētra, in the shape of the body.]

"ससार साकं दर्पेण कंदर्पेण ससारसा ।
शरन्नवाना विभ्राणा नाविभ्राणा शरन्नवा" ॥

[The *Çarat* season disappeared, supplied as she was with lotus, and accompanied by the haughty Cupid—the season being such as having fresh carts; helping the growth of grass, not without the sound of birds; and fresh.]

[*Page* 569.]

"मधुपराजिपराजितमानिनीजनमनः सुमनः सुरभि श्रियम् ।
अभृतवारितवारिजविप्लवम् स्फुटितताम्रतताम्रवनं जगत्" ॥

[The universe took a resplendence (upon itself)—fragrant with the flower-like hearts of indignant woman subjugated by the line of blackbees, and with blooming, red, and wide-spreading mango groves, and with the destruction of lotuses stopped.]

Similarly the thousands of kinds should be understood.

(4) Çlesha—Paronomasia.

84.—[*Page* 570.] When words—though different through difference of meaning, yet being uttered together—coalesce, it is Çlesha, Paronomasia or Coalescence. And this is eight-fold, in accordance with Letters, &c.

Though different words are distinct in accordance with the law 'difference of words (arrises from) difference in meaning,' and 'accent is not taken into account in poetry;' yet they coalesce, (*i. e.* screen their real form) by being pronounced together; and this is Paronomasia or Coalescence. This is eight-fold—according as (based on) (1) Letter, (2) Word, (3) Gender, (4) Language, (5) Crude Form of Roots, (6) Affixes. (7) Case-Ending, and (8) Number.

Digitized by Google

[*Page* 573.] Respective examples :—

(1) "अलङ्कारः शङ्काकरनरकपालं परिजनो
विशीर्णाङ्गो भृङ्गी, वसु च वृष एको बहुवयाः ।
अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोः
विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी" ॥

["Çiva has for his ornament the suspicious human skull, for his attendant Bhringī, with his body split up; and for his wealth a single old ox—when such is the condition of Çiva, the revered of all the Gods, when he has the curved moon (untoward Fate) on his forehead, then what are we? (*a*)]

(2) (*b*) पृथुकार्तस्वर &c. [*Text*, p. 476.]

(3) and (8) "भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये ।
लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः" ॥

["May the eyes or body of Vishnu pacify your world-pain—the eyes tenderly looking on suppliants, and the body looking on which are the suppliants attached; both rivalling the blue lotus; contemplated by Yogis for attainment of their ends, the ocean of beauty, producing emotions in the eyes of Lakshmī].

[*Page* 575]. Here we have the *coalescence of number* (प्रणयिनी being in the singular number with regard to the तनु and in the dual with regard to the eyes).

[And the above also forms an example of *coalescence of gender* प्रणयिनी &c. being in the feminine gender when taken with तनु, and in the neuter (dual) when taken with नेत्रे].

(*a*) Here though विधि and विधु differ in their final mātrās (इ and उ) yet they have the same form in the Locative (विधौ); and as such they coalesce, forming an instance of *coalescence of letters*.

(*b*) Here in the first instance (the case of the poor Brāhmana) the compound is made up of पृथुक+आर्त+स्वर; whereas in the second case (that of the Royal Palace) it is made up of पृथु+कार्तस्वर. But both of these coalesce into one compound पृथुकार्तस्वर; thus forming an instance of *coalescence of words*.

Digitized by Google

(4) "महदेसुरसंधम्मे तमवसमासंगमाहरणे ।
हरबहुसरणं तं चित्तमोहमवसरउमे सहसा" ॥

(This couplet can be construed both as Sanskrit and Prākrita; in the former the translation would be thus:—

"Oh pleasure-giving Uma! protect my attachment to Vaidika studies, capable of bringing about union with Gods; and opportunely remove the spreading delusion of my heart."

In the latter, the couplet would be thus translated—

'O consort of Çiva! produce in me attachment to virtue, and destroy my desire for birth and death, accruing from the quality of Darkness. Thou art my shelter, and so remove the delusion of my heart."]

[This is an instance of the *coalescence of Language*].

[*Page* 576.] (5) "अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः" ॥

[This son of the kings holds all the sciences in his heart, and discourses on them with learned men; and he is the power-giver of friends and of enemies the power-killer.]

[Here, the roots वह and वच both have the same form वक्ष्यति in लृट्; and so have the roots कृन्तति and करोति with the affix क्विप् (कृत्). So here in the two instances the crude roots are different and coalesce, forming examples of the *soulescence of the crude form of roots.*]

(6) "रजनिरमणमौलेः पादपद्मावलोक-
क्षणसमयपराप्तापूर्वसंपत्सहस्रम् ।
प्रमथनिवहमध्ये जातुचित्त्वत्प्रसादा-
दहमुचितरुचिः स्यान्नन्दिता सा तथा मे" ॥

["May I through your kindness be the pleaser among the Elementals (or may Nandiness, the position of Nandi, belong to me)—having proper love, and having attained to a thousand-fold splendour on the happy occasion of looking on the lotus-feet of the Moon-crested."]

(Here स्यावन्दिता=स्यात् (3rd person)+नन्दिता and also स्याम् (1st person)+नन्दिता. Thus this is an example of the *coalescence of persons.* Further नन्दिता=नन्दि (root)+तृच् and also नन्दी (noun)+तल्. Thus this also forms an example of *coalesеenсe of verbal and nominal affixes.*

[*Page* 577.] (7) "सर्वस्वं हर सर्वस्य त्वं, भवच्छेदतत्परः।
नयोपकारसाम्मुख्यमायासि तनुवर्तनम्" ॥

[This may be construed as being addressed by a devotee to Çiva, or by a thief to his son. In the former case, the translation would stand thus—

"O Çiva! you are all-in-all of all; since you are given to the destruction of the world (birth and death); hence have you a body from which emanates all possibility of virtue and good (in the shape of the allayment of worldly pain).

In the latter, however, the couplet would be thus translated—

"O son! take away the all of all; employ yourself in cutting (the walls); remove (the idea of) returning good for good; extend your livelihood by troubling others."

(Here हर+भव=शिव and संसार and also हृ+लोट् and भू+लोट् thus forming examples of *the coalescence of* सुप् *and* तिङ् *affixes.*

85 *(Contd.)*—Even on the non-difference of the crude form of roots, &c., (we have) the ninth (form of Paronomasia).

The Ninth Form of Çlesha.

[*Page* 578.] अपि should be construed with नवम. Example—

(9) "योऽसकृत्परगोत्राणाम् पक्षच्छेदक्षणक्षमः।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते" ॥

There being no restriction of the context here, the couplet could be equally applicable to a king and to Indra. In the former case the translation would be—

"The king is resplendent, bearing as medals the possibility of cutting off the enemies like the thunder and who is capable of

Digitized by Google

many times destroying in a moment the part of his enemies." And in the latter case the couplet would be thus translated—"Indra is resplendent, capable as he is of cutting off the wings of great mountains in a moment; and destroying the demons with his thunderbolt."

Objection: Different words are pronounced by different efforts, when differing from one another on the ground of being स्वरित &c., and are pronounced with similar efforts when identical, with regard to स्वरित, &c.; and in the composition of these words exist both the Verbal and Sense Coalescence, being the means of the idea of the Semblance of other Figures of Speech; and (*a*) as such both these kinds of Coalescense are included by some among the Ideal Figures of Speech. How then can this be called a Verbal Figure?

[*Page* 581.] To the above it is replied: The classification of Defects, Excellences and Figures of Speech based on Words and Meanings, stands either by invariable concomitance, or by invariable negation. Because *obscurity, floridity,* and *alliteration, &c.* (belonging to words), and *meaninglessness, boldness of meaning,* and *simile, &c.* (belonging to meaning) are said to belong respectively to Word and Meaning, since the presence or absence of these (*obscurity,* &c.) follows respectively the presence or absence of Words and Meanings. (*b*)

In the following—

"स्वयञ्च पल्लवाताम्रभास्वत्करविराजिता ।
प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा" ॥

(*a*) *Çlesha* is twofold: *Sabhanja* (broken) (in पृथुकार्तस्वर, &c.) and *Abhanja* (unbroken) (योऽसकृत्, &c) The former consists in the coalescence of dissimilar words, and as such is called Verbal Coalescense. The words being dissimilar ones, their efforts are dissimilar, and as such their pronunciation cannot be similar, hence they could not coalesce. But a rule has already been laid down (see above) that Accent (*Swara*) is not taken into account in Poetry. Hence even dissimilar words can coalesce. The unbroken *Çlesha* is only ideal; and as such the effort of pronunciation being the same, the words are not dissimilar; only the meanings are so.

(*b*) The decision finally arrived at is that a Figure is called *Verbal* or *Ideal* according as its existence depends on Word or on Meaning.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

चित्रमीमांसा, अप्पयदीक्षितकृता श्री ते· रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।≡)॥

गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतडाक्तरबालण्टेनाचार्य्येणेङ्गलण्डीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीमद्गङ्गाधरशास्त्रिणा निरूपितः ≡)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम् .. .. ४)

मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

शाश्वतधर्मदीपिका, ... १)

अमरकोशः सटीकः .. .. ४)

योगवार्त्तिकम् .. .. २॥≡)

शोनपदार्थनिर्वचनम् .. .. ३)

वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरशास्त्रि- संशोधिता .. .. ४)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. ५)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्प- णीसहितम् .. .. ५।।।)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र- शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३≡)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः। .. .. २।)

स्नेहपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्य पं· स्वामिश्रीराममिश्रशास्त्रि- प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥≡)

स्नेहपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३।।।)

शास्त्रदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच- न्द्रिकोपेतम्, पं· स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम्। १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर- शास्त्रिणा संशोधिता पूर्वारूपा .. .. ५।।।)

• माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता, ... ७॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 57

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 73

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityânandapanta, Scholar, Sanskrit College, Benares. 89

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 105

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 3.] March, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

निरुपाधिकं निष्प्रतिसाधनञ्च विश्वकृदनुमानम् । एवं क्षित्यादिकं सकर्तृकमित्यत्र न हि कर्तृसम्बन्धमात्रं साध्यं सिद्धसाधनत्वात् सन्ति हि त्वन्मते कुम्भादिकर्तारश्चेतनाः स्वरूपतस्सर्वेत्र संबद्धाश्च तैः क्षित्यादयः अस्मन्मतेऽपि ।

अङ्गुलस्याष्टभागोऽपि न सोऽस्ति द्विजसत्तम ।
न सन्ति प्राणिनो यत्र कर्मबन्धनिबन्धनाः ॥

दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपीत्यादिभिस्सर्वमचेतनं पुण्यपापकर्तृचेतनमिश्रमतस्सकर्तृकमिति चेतनव्यापारपूर्वकत्वं साध्यं तत्र व्यापारपूर्वकत्वनिवृत्तिमात्रेण कादाचित्कत्वनिवृत्त्युपपत्तौ तद्विशेषणवैयर्थ्यं स्यात्, व्याप्त्युपयोगाभावे ऽपि सिद्धसाधनत्वनिवृत्त्यै तदुपादानमिति चेत्तर्हि शरीराजन्यत्वेऽप्यसिद्धिपरिहारे विशेषणं समर्थमाशङ्क्य एकामसिद्धिं परिहरतो द्वितीयापत्तेरित्युक्तं वितथं स्यात् ।

ननु ज्ञानादित्रिकवान् कर्ता तत्पूर्वकत्वे साध्ये व्यापारगर्भतया न पृथग्व्यापारपदोपादानं येन विशेषणवैयर्थ्यापत्तिरिति चेन्न अन्यतमनिवृत्तिमात्रेण कार्य्यत्वनिवृत्त्युपपत्तौ त्रिकोपादानवैयर्थ्यात् अन्यतमसाधने त्वदिष्टमसाधितं स्यात्, शेषं शास्त्रतः सेत्स्यतीति चेन्न कार्य्यत्वनिवृत्तेर्हेतुपूर्वकत्वनिवृत्तिप्रयुक्ततया प्रयत्नादिनिवृत्तेरप्रयोजकताऽऽपातात् । तदिह तत्तद्विशेषव्यतिरेकस्यापि व्याप्तिनिवेशाङ्गीकारे शरीरजन्यत्वव्यतिरेकेऽपि न वैयर्थ्यं वाच्यमिति ।

नन्वेवमदृष्टचरसौ*धादिदर्शने सावयवत्वात् कार्य्यत्वमनुमाय तत एव तदुचितकर्तृमत्त्वानुमानं कुलालादिपूर्वकत्वनिवृत्त्या बाध्येत प्रतिरुध्येत वेति मन्दशङ्कां वारयति । न चेति । व्याप्तितदभा-

* सुधया संस्कृतं प्रासादि तद्दर्शने ।

Digitized by Google

साध्यं विशेषादिति शेषः । यद्यव्यापकधर्मस्य निवर्त्यतया प्रत्यवस्थीयेत तदा सर्वत्र तस्याः सुलभत्वात् क्वचिदप्यनुमाने पक्षो न स्यात् साध्यवत्तया वर्ण्यमानो हि पक्षः तदभावे तत्सापेक्षौ सपक्षविपक्षावपि न स्यातां ततोऽनुमानकथैवोत्सीदेत् । प्रस्तुतेऽपि नैवं प्रसङ्गः तद्व्याप्तेरुक्तत्वादित्यभिप्रायेणाह । पक्षादीति । यद्वा शरीरजन्यत्वमुपाधिरित्यत्र पक्षव्यवच्छेदार्थं हि विशेषणं तथा सति पक्षेतरत्वमप्युपाधिः स्यादित्यपोक्तं न चेति नात्र पक्षान्यत्वेऽतिप्रसङ्गः उपाधेस्साध्यसमव्याप्तिस्वीकारपक्षे अन्वयव्यतिरेकिणि पक्षेतरत्वस्य साध्यातिव्याप्तित्वात्, केवलान्वयिनि साध्यसमव्याप्तत्वेऽपि पक्षेतरत्वान्यत्वेनाप्युपाधेर्विशेषणात् अन्यथाऽनुमानोच्छेदप्रसङ्गात् स्वयमेव साध्यव्यापित्वमात्रमुपाधेरपेक्षितमिति पक्षेऽपि गतिः । ईदृशं चेदं शरीरजन्यत्वमिहोपाधिः स्यादेवेति । पक्षेतरत्वे तूपाधौ पूर्ववदेव पक्षादिव्यवस्था भज्येत । इह तु न तथेत्याह । पक्षादीति । ईश्वरानुमानाभावे तद्वत्स्वेतरात्मानुमानमपि न स्यात् स्वात्मसाध्येष्वेव व्याप्तिनियमप्रसक्तेरित्यत्राह । निरुपाधिकतयेति । यदि परशरीरस्थलिङ्गैः कर्तुर्भोक्तुश्चानुमाने स्वशरीरस्थतया स्वकर्तृकतया वा व्याप्तिरवच्छिद्येत तदा हृदयविसंवादः, चेतनान्तरानुमानाभावे व्युत्पत्तिरेव न स्यात् कुतश्शिष्याचार्यवादिप्रतिवादिशत्रुमित्रादिसंव्यवहारः ।

न च स्वेनान्यदेहादेरधिष्ठानादिसम्भवः ।
सौभरिन्या*यतस्तत्तत्प्रतिबन्दिप्रसङ्गतः ॥

* सौभरिर्महर्षी राजकन्यकासहस्रोद्वाहार्थं यथा तावन्त्येव शरीराणि परिजग्राहेति हि पौराणिकाः ।

न च स्वान्यानुमानेऽपि विजातीयत्वकल्पना ।

निरुपाधिकता तत्र भवेदनुमितेस्ततः ॥

तुशब्दः कल्पनागौरवनिवृत्त्यर्थः । उक्तबाधकतर्कसूचनार्थो वा । किञ्च ॥ २२ ॥

परदेहस्थलिङ्गानामन्यथासिद्धिकल्पने ।

स्वदेहेऽपि तथैवेति नैरात्म्यमवशिष्यते ॥

आगमाद्यात्मनां सिद्धावीश्वरस्य तु किं पुनः ।

परमात्मनिश्चयाभावे त्वागमोऽपि न सेत्स्यति ॥ इति ।

अथ स्यात् अन्वयिनि हेतौ यावत्सपक्षान्वयिधर्मसम्भवेन सोपाधिकता शङ्क्येत केवलव्यतिरेकिणि तु सपक्षाभावान्न तच्छङ्क्यत आह । सर्वस्येति ।

मू० सर्वस्यावीतहेतोरपि च निरसनं द्रक्ष्यसि स्वप्रसङ्गे श्रुत्याऽत्र व्याप्तिसिद्धावलमनुमितिभिर्निष्फलस्संप्लवोऽपि । तस्मादुल्लोकभूमा सकथमनुमया विश्वकर्ता प्रसिद्ध्येच्छास्त्रानुक्तित्वबाधद्वयपरिहृतये शास्त्रयोनित्वसूत्रम् ॥ २३ ॥

टी० स्वप्रसङ्गे—हेतुचिन्तावसरे, अयं भावः व्यर्थविशेषणत्वमर्थान्तरत्वञ्च केवलव्यतिरेकिणां सर्वेषां द्योत्यते तथा हि क्षवे कार्य्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वादित्यत्र व्यतिरेके कर्तृपूर्वकत्वनिवृत्त्यैव कादाचित्कत्वनिवृत्तावुपपन्नायां किं सर्वविद्विशेषणेन सिद्धसाधनत्वनिवृत्त्यै तदुह इति चेन्न शरीराजन्यत्वहेतावसिद्धिपरिहारे विशेषणं समर्थमिति वदन्तं प्रति पक्षासिद्धिं परिहरतो द्वितीया-

Digitized by Google

पत्तेरिति युष्मदुक्तस्याच दुर्वारत्वात् । तर्हि कर्तृपदं हित्वा सर्व-वित्पूर्वकमित्येतावदुक्तौ न वैयर्थ्यमिति चेत् तथाऽपि वित्पूर्वकत्व-निवृत्त्या व्याप्तिसिद्धौ सर्वविशेषणवैयर्थ्यमेव । एवं नित्यज्ञानपूर्व-कत्वादिनिर्देशेऽपि द्रष्टव्यं, न च विशेषणेऽपि सिद्धसाधनतापरिहारः सर्वेषाञ्चेतनानां सर्वशब्दार्थवेदिनामसर्ववित्त्वायोगादन्यथा सर्व-वित्साधनस्यापि दुश्शकत्वात् विशेषतस्सर्वे न सर्वे विजानन्तीति चेन्न विशेषणानामपि सर्वशब्दसङ्ग्रहात् सर्वसाक्षात्कर्तृपूर्वकत्वं साध-याम इति चेन्न योगिभिरर्थान्तरताऽऽपातात् नित्यसाक्षात्कारिपूर्व-कत्वं साध्यमिति चेत्, एवमपि व्याप्तौ नित्यविशेषणवैयर्थ्यमेव मन्यते। विशेषणसाफल्ये शरीराजन्यत्वेऽपि साफल्यं सिद्धेदेव वेदा-स्सर्वज्ञप्रणीताः वेदत्वादित्यत्राप्येवमर्थान्तरत्वविशेषणवैयर्थ्ये बोद्ध-व्ये प्रणीतत्वनिवृत्तिमात्रेण सर्वज्ञप्रणीतत्वनिवृत्तिमात्रेण वा व्याप्ति-ग्रहोपपत्तेः । अपि च केवलव्यतिरेकिणस्सपक्षे सत्याभासत्वं सङ्गि-रध्वे, सन्ति चानन्तानि सर्वज्ञप्रणीतानि वेदेतरवाक्यानि भारतादि-मध्यपातीनि स्मृतितन्त्ररूपाणि कल्पादिषु लोकवेदसंव्यवहारप्रवर्त-नोपयिकानि च । न च तेषु वेदत्वं, प्रसिद्धिविरोधात् अवेदत्वेनैव महर्षिप्रभृतिभिर्व्यपदेशाच्च । अतस्तेषां न वेदत्वेन पक्षीकरणं शक्यं संग्राहकान्तरञ्च दुर्वचं, जीवप्रणीतेतरवाक्यत्वमीश्वरप्रोक्तत्वं वा नान्यतस्सिद्धम् इत एव तत्साधनेऽन्योन्याश्रयः तदिह तेषां पक्षीकारे तदभावे वा वेदत्वहेतुस्तेष्वसिद्धन् हेत्वाभा*सत्वं नाति-क्रामेत् । एवं वक्ष्यमाणैश्च वेदनित्यत्वसाधकैर्बाधोऽप्यत्र मन्तव्यः एवं घटः सर्वज्ञकर्तृकः घटत्वात् यजुस्सर्वज्ञप्रणीतं यजुष्ट्वादित्या-दिविशेषपक्षीकारेण प्रयोगाश्च निरस्ता वेदितव्याः ।

* हेत्वाभासकतामिति पा० ।

Digitized by Google

ननु कार्य्याणां सर्वेषां सर्वज्ञपूर्वकत्वव्याप्तिः श्रुत्या सिध्यति अविदितनिगमवृत्तान्तानां नालिकेरद्वीपवासिनामिव सह्लो महेश्वरे माभूदनुमानम् अन्येषान्तु तत्प्रवृत्तिसम्भव इत्यत आह । श्रुत्येति । व्याप्तिग्राहकेणैव साध्यसिद्धौ किमत्रानुमितिसाध्यमित्यर्थः संप्लव*वादे सिद्धेऽपि मानान्तरस्य प्रवृत्तिः स्यादित्यत आह । निष्फल इति । मानान्तरसिद्ध वस्तुन्याकारान्तरसमर्पणे हि संप्लवश्शोभेत अन्यथा सिद्धसाधनत्वं वा सर्वत्र सिद्धसाधनत्वदोषोच्छेदो वा स्यादिति भावः । अत्र ।

कार्य्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥

इति न्यायाचार्य्यसंगृहीतानां सर्वेषां हेतूनां स्थालीपुलाकन्यायेन निरस्तप्रायत्वं निगमनव्याजेन निश†मयति । तस्मादिति । नन्वनिरस्तेऽपि जगत्कर्त्तुरनुमाने परतत्त्वपरमहितपरमपुरुषार्थेषु शारीरकं निष्पतिघातम् अतः किमत्र तन्निरासप्रयासेन इत्यत आह शास्त्रेति । यदि जगत्कर्त्तुरनुमानं न प्रतिषिध्येत तदा मतान्तरप्रामाण्यव्यवसायिनः कस्यचित् इदं सर्वमसृजत यतो वा इमानि भूतानि जायन्त इत्यादिवाक्यानामनुमानसिद्धानुवादित्वं मन्यमानस्य जगत्कर्तृवादिवाक्यानामनुमानविरुद्धोपस्थापकत्वे मूलघातित्वात् तत्सिद्धमात्रबोधने नैरपेक्ष्यात् सिद्धांशेऽनुमानानाघ्रातासम्भवाच्च सिद्धपरवाक्यविमर्शेन कार्य्यं इति मोहः स्यात् अतस्तदनुजिघृक्षयाऽनुमानं निरसनीयम् । किञ्च विश्वकर्त्तुरनुमेयत्वम्मन्यमानस्य तत्तद्वादिकल्पितैर्हेतुभिर्बाधद्वयमापद्येत ब्रह्मण आनन्द इत्याद्युक्तप्रामाणिकत्यागात् अप्रामाणिका यथा पूर्ववेदकल्पनस्वीकाराच्च यद्वा प्रागुक्ताभ्यां प्रतिप्रमाणतर्काभ्यां बाधद्व-

* एकस्य घटादिलक्षणपदार्थस्यानेकप्रत्यक्षानुमितिशाब्दगम्यत्वाभ्युपगमवादे इत्यर्थः ।

† नियमयतीति द्राविड़ पाठः ।

Digitized by Google

पत्तेरिति युष्मदुक्तस्याच [illegible]
वित्पूर्वकमित्येतावदुक्तो न [illegible]
निवृत्त्या व्याप्तिसिद्धौ स [illegible]
कत्वादिनिर्देशेऽपि द्रष्टव्य [illegible]
सर्वेषामुत्पन्नानां सर्वश [illegible]
वित्साधनस्यापि दुश्शा [illegible]
चेन्न विशेषणानामपि स [illegible]
याम इति चेन्न योगि [illegible]
कत्वं साध्यमिति [illegible]
मन्यते। विशेषणसाफ [illegible]
स्सर्वस्वप्रणीताः वेद [illegible]
व्ये प्रणीतत्वनिवृत्ति [illegible]
यद्दोपपत्तेः । अपि [illegible]
रध्वे, सन्ति चान [illegible]
मध्यपातीनि स्मृ [illegible]
नोपयिकानि च । [illegible]
महर्षिप्रभृतिभिर्व्य [illegible]
संग्राहकान्तरञ्च [illegible]
मान्यतस्सिद्धम् [illegible]
पक्षीकारे तदभा [illegible]
क्रामेत् । एवं घ [illegible]
एवं घटः सर्वे [illegible]
दिविशेषपक्षीका [illegible]

* हेत्वाभा [illegible]

प्रागाधिष्ठानशून्यं न तु परिणमितुं शक्त-मव्यक्ततत्त्वं वास्यादौ व्याप्तिसिद्धेरिति यद-भिहितं सांख्यसिद्धान्तभङ्गे । सोऽपि प्राग्व्यु-दासेऽप्यनुमितिशरणात् प्रत्युपात्तः प्रसङ्गो नेष्टे तत्सिद्ध्यसिद्ध्योरनुमितिरिति खल्वाग-शयस्सूत्रकर्तुः ॥ २४ ॥

टी० तात्पर्य्यवृत्त्या विरोधं शमयति । सोऽपीति । तात्प-र्य्यभेदं विवृणोति । नेति । प्रागाधिष्ठितत्वमनुमातुं न शक्यमिति सांख्याधिकरणतात्पर्य्यं शास्त्रयोन्यधिकरणस्य त्वधिष्ठितत्वं नानु-मातुं शक्यमिति ग्रतस्साधकबाधकाभावे शास्त्रं निरङ्कुशप्रसरमिति सूत्रकाराभिप्राय एव भाष्ये दर्शित इति ॥ २४ ॥

इति शास्त्रयोन्यधिकरणसांख्याधिकरणविरोधपरिहारः ।

श्रुतिसिद्धस्य विश्वकर्तुः श्रौतमुपादानत्वमपि प्रस्तौति ।

अस्येति ॥

मू० अस्यैवाचिन्त्यशक्तेरखिलजनयितुस्स्यादुपा-दानभावस्सूक्ष्माव्यक्तादिदेहः परिणमति यतोऽनेकधा स्थूलवृत्त्या । निष्कृष्टेऽस्मिन् शरीरिण्यमल*गुणगणालङ्कृतानन्दरूपे स-म्पद्यन्ते समस्तास्समुचितगतयो निर्विका-रादिवादाः ॥ २५ ॥

टी० अखिलजनयितुरस्यैवेति विरोधशङ्कासूचनम्, अचिन्त्य-शक्तेरिति परिहारनिदानगर्भं, विकारापुरुषार्थनिषेधकशास्त्रविरोध-

* वयखिलगुणगणालङ्कृत इति पा· ।

यमर्थः अनुमितेरसौपाधिकत्वादिकारणदोषात् बाधादकर्तृत्वानुमानेन साध्यप्रतिषेधाच्च अपि वा विश्वकर्त्रनुमानं प्रवर्तमानं स्वयन्त्राचरितन्यप्रयत्नं समानन्यायतया स्वोपस्थापितानुमानेन नित्यशरीरादिरहितत्वस्यैवोपस्थापनादागमविषयमपहरेत् । तस्मादेवंविधानेकबाधग्रस्ताऽपनुतये नित्यनिर्दोषशास्त्रैकवेद्यत्वमिह सूचितम् ।

शब्दप्रमाणके तस्मिन् यथाशास्त्रं व्यवस्थितिः ।
सर्वैरनतिलङ्घ्येति न शङ्कातङ्कसम्भवः ॥

नन्वीश्वरानुमानदूषणे ।

विद्याचोरो गुरुद्रोही वेदेश्वरविदूषकः ।
त एते बहुपाप्मानस्सद्योदण्ड्या इति श्रुतिः ॥

इति शास्त्रविरोधः स्यादिति चेन्न अनुमानदूषणेऽप्यागमात् तत्सिद्धेः । अन्यथाऽस्मदादिप्रत्यक्षवेद्यत्वनिषेधेन तथापि तद्दूषकत्वप्रसङ्गः । आगमेनानुमानेन ध्यानाभ्यासरसे*न च । त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तममित्याप्तोक्तिः कथम् इत्थं श्रवणमननध्यानानां योगहेतुत्वस्य विवक्षितत्वात् मननशब्दानुग्राहकयुक्तिभिः स्थिरीकरणं तदेव च श्रवणानन्तरभावितयाऽनुमानशब्देन गृहीतमुचितमनुग्राहकयुक्तय एव वा यस्तर्केणानुसन्धत्त इति स्मरणात् तर्कानुमानयोरदूरविप्रकर्षात् समाख्याविपर्य्यासश्च दृष्ट इति ॥ २३ ॥

ईश्वरानुमानभङ्गः ।

तथाऽपि सांख्याधिकरणविरोधः स्यात्, तत्र हि परोक्तानां पक्षदृष्टान्तभूतानामचेतनानां सम्प्रतिपन्नवत् प्राज्ञाधिष्ठितत्वं सूत्रभाष्याभ्यां साध्यते अतश्शास्त्रयोनित्वसूत्रमन्यपरं न नेतव्यमिति शङ्कायां तावद्विरुद्धोक्तिमनुवदति । प्राज्ञेति ।

* ध्यानाभ्यासरसेनेति पा० ।

सू० प्राणाधिष्ठानशून्यं न तु परिणमितुं शक्त-
मव्यक्ततत्त्वं वास्यादौ व्याप्तिसिद्धेरिति यद-
भिहितं सांख्यसिद्धान्तभङ्गे । सोऽपि प्राणव्यु-
दासेऽप्यनुमितिशरणात् प्रत्युपात्तः प्रसङ्गो
नेष्टे तत्सिद्ध्यसिद्ध्योरनुमितिरिति खल्वाश-
यस्सूत्रकर्तुः ॥ २४ ॥

टी० तात्पर्य्यवृत्त्या विरोधं शमयति । सोऽपीति । तात्प-
र्य्यभेदं विवृणोति । नेति । प्राणाधिष्ठितत्वमनुमातुं न शक्यमिति
सांख्याधिकरणतात्पर्य्यं शास्त्रयोन्यधिकरणस्य त्वधिष्ठितत्वं नानु-
मातुं शक्यमिति अतस्साधकबाधकाभावे शास्त्रं निरङ्कुशप्रसरमिति
सूत्रकाराभिप्राय एव भाष्ये दर्शित इति ॥ २४ ॥

इति शास्त्रयोन्यधिकरणसांख्याधिकरणविरोधपरिहारः ।

श्रुतिसिद्धस्य विश्वकर्तुः श्रौतमुपादानत्वमपि प्रस्तौति ।

अस्यैवेति ॥

सू० अस्यैवाचिन्त्यशक्तेरखिलजनयितुस्स्यादुपा-
दानभावस्सूक्ष्माव्यक्तादिदेहः परिणमति
यतोऽनेकधा स्थूलवृत्त्या । निष्कृष्टेऽस्मिन्
शरीरिण्यमल*गुणगणालङ्कृतानन्दरूपे स-
म्पद्यन्ते समस्तास्समुचितगतयो निर्विका-
रादिवादाः ॥ २५ ॥

टी० अखिलजनयितुरस्यैवेति विरोधशङ्कासूचनम्, अचिन्त्य-
शक्तेरिति परिहारनिदानगर्भं, विकारापुरुषार्थनिषेधकशास्त्रविरोध-

* वयखिलगुणगणालङ्कृत इति पा० ।

शान्त्यै सर्वोपादानत्वं बालयुवपरिणतिवत् सद्वारकमित्याह । सूक्ष्मेति । सूक्ष्मस्थूलत्वोक्तिर्हेतुकार्य्यभावघटनार्था अनेकधेत्युक्त्या तम एकीभवतीत्यादिप्रसिद्धः प्राच्यावस्थातो वैषम्यं व्यज्यते उपादानतया विकाराद्याश्रयस्य कथन्तदभावोपदेश इत्यत्राह । निष्कृष्ट इति ॥ २५ ॥

ननु यद्यस्य निमित्तं न तत्तस्योपादानमिति स्थिते साक्षात्सद्वारकं वा कथमुपादानत्वमित्यत्र परप्रक्रिययैव विरोधं परिहरति । कर्त्रेति ।

मू० कर्त्तोपादानमेव स्वसुखमुखगुणे स्वप्रयत्नप्रसूते संयोगं स्वस्य मूर्त्तैस्स्वयमुपजनयन्नीश्वरोऽप्येवमिष्टः । सर्वोपादानभावस्तत इह घटते सर्वकर्तर्य्यमुष्मिन् सर्वश्रुत्यैकरस्यप्रणयिभिरुचितं द्वारमत्राभ्युपेतम् ॥ २६ ॥

टी० जीवस्तावत्तैस्तैरुपायैः स्वसुखादीन् उत्पादयति तेषां समवायिकारणञ्च भवतीति मन्यसे तावदेव च निमित्तोपादानत्वमीश्वरेऽपि तदुभयं क्वचिदङ्गीकरोषीत्याह । संयोगमिति । न चात्रोपादानत्वं भाक्तं विपरिवर्त्तस्य सुवचत्वात्, अतः प्रकृत्यधिकरणबाधितं न प्रतिक्षेप्तुं शक्यमित्याह । सर्वेति । तर्हि सोऽकामयत तदात्मानं स्वयमकुरुत इत्यादिकं स्वरूपपरिणामवादिब्रह्मदत्तभास्करादिमतभेदैरव्यवहितमेव किन्न निरूह्यत इत्यत्राह । सर्वश्रुतीति । अन्यथा जीवानां प्रतिकल्पमुत्पत्तिप्रलयौ स्याताम् अकृताभ्यागमः कृतविप्रणाशो विषमसृष्ट्यादिभङ्गश्च भवेयुः, ब्रह्मणस्तदंशस्य वा सर्वेश्वरस्य वा बहु स्यामिति सङ्कल्पयतोऽनादिजीवद्वारा

क्लेशाद्यन्वयः त्रिगुणांशद्वारविकारान्वय इति पक्षेऽपि सर्वदोषाकरत्व विरुद्धधर्माध्यासस्य दुस्त्यजः अतश्चिदचिच्छरीरद्वारा ब्रह्मभवना-दिकमिति कृत्स्नविद्भिर्निरूह्यत इति ॥ २६ ॥

इतीश्वरस्य जगन्निमित्तोपादानत्वोपपत्तिः ।

एवं वैशिष्ट्यदुपादानमपि कर्तैव अन्येरपि त्रय्यन्तवादि-भिर्यत्किञ्चिद्वैशिष्ट्यमङ्गीकृतमित्याह । साविद्यमिति ।

मू० साविद्यं कोऽपि सोपाधिकमथ कतिचिच्छ-
क्तिभिर्जुष्टमन्ये स्वीकृत्यैकाद्वितीयश्रुतिमपि
जगदुस्तद्विशिष्टैक्यनिष्ठाम् । नित्यत्वं विग्र-
हत्वं प्रकृतिपुरुषयोर्हेतुतां विश्वकर्तुस्तद्वै-
शिष्ट्यञ्च शास्त्रप्रथितमजहतां कोऽपराधो-
ऽतिरिक्तः ॥ २७ ॥

टी० अद्वैतव्याख्यायिनः* खल्वाहुः ।

अनिर्वाच्याऽविद्याद्वितयसचिवस्य प्रभवतो ।
विवर्ता यस्यैते वियदनिलतेजोऽबवनयः ॥ इति ।

भास्करीयास्तु चिदचिदंशविभक्तं ब्रह्मद्रव्यमचिदंशेन विक्रियते तद्विकारोपहितेन संसरतीति । यादवप्रकाशीयास्तु सर्वात्मकं सद्रूपं ब्रह्म चिदचिदीश्वरस्वरूपांशत्रयशक्तिविशिष्टं समुद्र इव फेनबुद्बुदतरङ्गप्रभेदेन सांशान्तरभेदत्रिविधव्यष्टिभावेन परिणमते इति । एवमद्वितीयश्रुत्यविरुद्धान्यविद्योपाधिशक्तिरूपविशेषणानि चेद्विषद्भिश्चिदचिदुपादानतोपयोगीनि स्वीक्रियन्ते श्रुतिस्मृतिशतसिद्धस्वरूपविशेषणाभ्युपक्रमे कः प्रद्वेषः स्वपक्षस्य प्रमाणतस्सिद्धिं विरोधाभावा-

* भामत्यामादिमः श्लोकः ।

दोषित्यानिश्चयं च प्रपञ्चयति । नित्यत्वमिति । कोऽपराधोऽतिरिक्त इत्यनेन विशेषणपरिच्छेदमात्रमपराधश्चेत् सर्वेषामपि समानदोषत्वमिति रिक्तापराधोऽपि तेषामेवेति व्यज्यते ॥ २७ ॥

इति जगत्कारणसर्वेश्वरब्रह्मावश्यम्भावः ।

नन्वेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृत्कार्यदृष्टान्तेन तदुपपादनादीश्वराव्याकृतप्राज्ञविराट्हिरण्यगर्भसूर्मिभिः यत्प्रनृत्य द्विधा भाति तस्मै सद्ब्रह्मणे नमः इति कात्यायनकारिकया च सद्ब्रह्मोदन्वदूर्मिभेदाच्चिदचिदीश्वरा इति निर्धार्यते तदेतदनुवदति । ब्रह्मेति ।

मू० ब्रह्मोपात्तान् विकारान् कतिचिदभिदधुश्चेतनाचेतनेशान्नैतद्युक्तं यदीशादनधिकमनघं निर्विकारं श्रुतन्तत् । भिन्नाया ब्रह्मशक्तेर्विकृतय इति चेद् ब्रह्मजन्यत्वभङ्गो भेदाभेदोपपाद्यं सकलमिति मते सप्तभङ्गी न दूष्या ॥ २८ ॥

टी० अथ प्रतिज्ञाया अनन्यथासिद्धबहुश्रुत्यविरोधाद्विशिष्टैकानेकविषयविज्ञानार्थत्वात् दृष्टान्तानामप्युपादानोपादेयैक्यसम्भवार्थत्वादृषिवचनस्यापि न चानृषेर्दर्शनमस्ति किञ्चिदिति न्यायेन विरोधाधिकरणनीत्या चानपेक्ष्यत्वात् नित्यो नित्यानाञ्चेतनश्चेतनानामेको बहूनां, न त्वेवाहं जातु नासं, प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादिश्रुतिस्मृतिशतदृष्टेश्चापन्यायमूलमेतदित्यभिप्रायेणाह । नैतद्युक्तमिति । चिच्चिदपि त्रिष्वारतयाऽभिमतेषु श्रुतिविरोधादयुक्तिमुपपादयति । यदीति । नारायणः परं ब्रह्मेत्यादिभिरीश्वरस्यैव परब्रह्मत्वं सिद्धम् अतो न ततदुपादानमवतारपरिहात्याऽपि नेश्व-

रस्योपादेयत्वं, स एव सूक्ष्म इत्यादिकमपि विशिष्टविषयं स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान् न कर्मणा वर्द्धते नो कनीयानित्यादिभिरकर्मवश्यतया प्रसिद्धस्य न खलु निरयनिपातादिदुरत्यमदुःखकारणदुरितपराधीनानन्तजीवभावेन परिणामः, नास्य जरामेतज्जीर्यति, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिर्विकारजात्यादिविधुरतया श्रुतस्य कथन्तद्विपरीतविकारागमः, तच परोक्तं परिहाराभासं खण्डते । भिन्नाया इति । अभिन्नत्वे परिहारमन्याभावात् भिन्नत्वानुवादः, यदि ब्रह्मव्यतिरिक्ता तच्छक्तिर्विक्रियते तदा ब्रह्मण उपादानत्वं न स्यात्, अनादितया श्रुतस्य चिज्जस्य जन्यत्वायोगश्च न परिहृत इत्यभिप्रायेणाह । ब्रह्मजन्यत्वभङ्ग इति । अथ शक्तिशक्तिमतोरभेदाद् ब्रह्मणद् उपादानत्वं निर्विकारत्वादिकमिति परेष्टमनुवदति । भेदाभेदेति । अपानिष्टमाह । सप्तभङ्गीति । स्यादस्ति स्यान्नास्तीत्यादीनां विरोधस्फोटयानदुक्तिः सर्वोऽपि परपक्षो न दूष्यः कथञ्चिद्भेदात् स्वपक्षस्य परपक्षत्वेऽपि विरोधस्य दुर्वचत्वादिति तात्पर्य्यम् ॥ २८ ॥

इति ब्रह्मणश्चिदचिद्दीश्वरविकारवत्त्वभङ्गः ।

अथ सच्चित्सुखस्वरूपं ब्रह्म सर्वत्र तादात्म्येनानुवृत्तमित्येतदनूद्य प्रत्याह । विश्वमिति ।

मू० विश्वं चित्तद्गुणानुद्भव इह घटते स्त्रगन्यादिनीत्या सर्वं ब्रह्मेत्यधीतं त्रिविधमिति च तद्वाग्यतादात्म्य चोक्तम् । तस्मात् सर्वानुवृत्तं सदनवधिदशाचिन्त्रमित्यप्ययुक्तं प्रत्यक्षागोचरत्वप्रभृतिबहुभिदावादिसर्वोक्तिबाधात् ॥ २९ ॥

Digitized by Google

टी० चिच्छब्देन स्वप्रकाशत्वं चेतनत्वं च तन्त्रेण गृह्येते उपलम्भविरोधनिवृत्त्यर्थमाह । तद्गुणानुद्भव इति । एतेन गन्धस्य नित्यानुपलम्भात्तन्निदर्शनम् । न हि नित्यगन्धानुपलम्भेऽपि रसस्य पृथिवीत्वं नाङ्गीकृतम् एवमिहापि । अयं भावः विश्वस्य स्वप्रकाशत्वं तावन्न निषेद्धुं शक्यं प्रत्यात्मं स्वप्रकाशत्वस्य परैरनुपलम्भेऽप्यङ्गीकारात्, चेतनत्वमपि घटादेः न प्रत्यक्षतः प्रतिक्षेप्तुं युक्तं परचैतन्ये सर्वेष योग्यानुपलम्भाभावात् कार्य्याभावादपि न तत्प्रतिक्षेपः सुषुप्त्यादिनयेन कार्य्याभावोपपत्तेः स्वभावभेदाच्च नित्यानुद्भवोपपत्तिरिति चिद्रूपत्वे सिद्धे हि चैतन्यानुद्भवः कल्प्यः तदेव तु कथमित्यत्राह । सर्वमिति । सर्वं खल्विति श्रुत्या सर्वस्य ब्रह्मत्वं विधीयते तच्च ज्ञानादिस्वभावगर्भं भोक्तृभोग्यादीन् प्रक्रम्य सर्वं प्रोक्तं त्रिविधं ब्रह्मैतदिति श्रूयते अत्र हि स्वरूपवैविध्यं स्वारसिकं ब्रह्मदाशा ब्रह्मदासा इत्यादौ च ब्रह्मण एव दाशत्वादिकमाम्नातं तत्र व्यवधानकॢप्तिस्तु गुर्वी तस्मात् स्वरूपतादात्म्येन चिदचिदीश्वरानुवृत्तं सद् ब्रह्मैकं तदेव चितयपूर्वावान्तरव्यष्टिभिरनन्तविषमावस्थाविशिष्टमिति भावः । व्यात्मके ब्रह्मणि चित्रपटन्यायसूचनार्थः चित्रशब्दः । एतदपि दूषयति । इत्यप्ययुक्तमिति । श्रुतस्य कथमयुक्तिरित्यत्राह । प्रत्यक्षेति । अद्रेश्यमग्राह्यं निष्कलं निष्क्रियं शान्तमित्यादिभिः श्रुतिभिस्तावद्बाधस्सिद्धः । भेदश्रुतयश्च नाभेदं सहन्ते शरीरात्मभावश्रुतयश्च भेदगर्भाः । अत एवाभेदश्रुतयोऽपि विशिष्टैक्यविषयाः स्थापनीयाः । किञ्चाचेतनस्य चेतनस्य वा कस्यचिद्ब्रह्मत्वविधौ किमत्रेदं विधेयं सत्त्वमिति चेतन्न सर्वेष सर्वेषां सुप्रसिद्धत्वेन तदुपदेशायोगात् कारणत्वमिति चेत् तत्प्रातिस्विककार्य्यं प्रति प्रसिद्धमेव आदिकारणत्वन्तु कार्य्यस्य विरुद्धं कार्य्यस्य कारणद्रव्यतादात्म्य-

मुपदिश्यत इति चेन्न श्रुतिसिद्धविशिष्टकारणतादात्म्ये त्वदिष्टा-सिद्धेः प्रदर्शितत्वञ्च विशिष्टपरिणामस्य युष्माभिरपि दुस्त्यजत्वम् ईश्व-रत्वमणान्तरयोरुपदिश्यत इति चेन्न प्रत्यक्षाद्यशेषप्रमाणविरोधात् न च परागादेः पर्वतत्वं शरावादेर्वा मणिकत्वं संव्यवहरन्ति साजात्यविवक्षया तथा संव्यवहारः स्यादिति चेतह्येव सत्ताजात्यै-वेश्वरसाजात्यमुपदिष्टं स्यात् तच चानुपदेश्यत्वमुक्तमेव एवं सर्व-श्रुतिबाधात् ब्रह्मसामानाधिकरण्यचैविध्यश्रुतिश्चाविरुद्धविषयतया नीयेतेति ।

यदपि कल्पयन्ति जीवव्यष्टिवदीश्वरव्यष्टयोऽप्यनन्ताः तच प्राणमयमनोमयवाङ्मयरूपः प्रथमो विभागः, तिस्रश्च ब्रह्मादिमूर्त-यस्तद्व्यष्टय इति इदमप्येकस्यैव चैतन्यस्य स्वमायाकल्पितविचि-चान्तःकरणदर्पणप्रतिविम्बिततया विश्वतैजसप्राज्ञरूपविभाग इति क्षुप्रिवदनादत्तेव्यम् ॥ २६ ॥

इति सर्वानुवृत्तसन्मात्रब्रह्मत्वभङ्गः ।

अन्ये तु भेदाभेदिन आहुः निष्कलचिदानन्दजलनिधिर-पारस्वानन्दानुभवप्रीतिजनितनानाविकार एव स्वल्पमंशं जडरूपं संकल्प्य तमेवाजडेन चिदंशान्तरेण संयोज्यानन्तविविधसुखदुःखा-नुभवभागिनं कृत्वा तद्दर्शनेन प्रीयत इति यथोक्तम् ।

त्वं चिन्महोदधिरणुं तव बिन्दुमेकं कृत्वा जडं तमजडेन नियोज्येत्यादि ।

दृश्यन्ते जगति कतिचिदात्मपीडावहां क्रीडां सादरमनु-तिष्ठन्तः अन्यथा कथमवतारेषु तादृशा विहाराः कथञ्च स्वेच्छया कर्मफलान्यनुभवेदिति । एतदनुभाषते । अव्यक्तमिति ।

Digitized by Google

मू० अव्यक्तं त्वन्मतेऽपि ह्यनवयवमथाऽप्येतदंशा
विकारास्ते चान्योन्यं विभिन्नाः पुनरपि
विलयं तत्र तत्त्वेन यान्ति । इत्थं ब्रह्मापि
जीवः परिणमति विहृत्यर्थमित्यप्यसारं स्वा-
नर्थैकप्रवृत्तेः प्रसजति च तदा सर्वशास्त्रो-
पघातः ॥ ३० ॥

टी० तदिदमवमञ्जवृत्तान्तादप्यधिकं जुगुप्सनीयतममि-
त्याह । असारमिति । अव्यक्तनिदर्शनमिह मन्दप्रलोभनमिति कृत्वा
तद्दूषयितुं परोक्तप्रक्रियामेव हेतुमाह । स्वानर्थेति । अयम्भावः
यद्यपि दुःखप्रायेष्वपायेषु प्रभूतसुखार्थिनः प्रवर्तन्ते यद्यपि भ्रान्ति-
ज्ञानवतां पुंसां प्रहारोऽपि सुखायत इत्यादिन्यायेन बालिशैस्ताड-
नादिभिः क्रीडारस उपादीयते तथाऽपि सर्वज्ञस्य सर्वशक्तेः स्वदुःख-
लवोत्पादनमपि न युक्तं किं पुनरनन्तजीवात्मभावेन दुर्विषह-
दुःखोत्पादनमतः क्रीडारसकारिणि का सत्यपि निरवधिकस्वानर्थ-
निमित्तनिर्मितेति अथ स्वानर्थैकप्रवृत्त ईश्वरः स्यात् अवतार-
वृत्तान्ताः शैलूषन्यायेन निह्नुता इति । अस्मन्मते तु विशेषणग-
तादोषा न विशेष्यं स्पृशन्ति ऐक्यभेदाभेदानङ्गीकारात् अकर्मवश्य-
संसर्गजदोषाणामसम्भवाच्चेति ॥ ३० ॥

इति ब्रह्मणः स्वलीलार्थं जीवादिपरिणामवादभङ्गः ।

उक्तपक्षापन्नं भास्करपक्षमुपालभते । ब्रह्मैवेति ।

मू० ब्रह्मैवोपाधिभिन्नं भजति बहुविधां संसृतिं
सोऽप्यनादिस्तस्मान्नात्यन्तभिन्नो जड इति
तु मते दुःखमद्वारकं स्यात् । सोभर्यादौ

व्यवस्था न कथमुपधिभिः स्वावतारेषु चैषा सर्वज्ञः स्वैक्यवेदी कथमनवधिभिर्जीवदुःखैर्न दुःख्येत् ॥ ३१ ॥

टी० एवकारो विरोधं व्यनक्ति महाकाशघटाकाशादिनयादीश्वरान्मिथश्च जीवानां भेदेन गुणदोषसंकरपरिजिहीर्षया उपाधिभिन्नत्वे स्वीकृतेऽपि प्रलयदशायामुपाधिविलयेन भेदाभावे मुक्तिप्रसङ्गः । ततश्च प्राग्वदकृताभ्यागमादिः स्यादित्यत आह । सोऽपीति । उपाधिभेद इत्यर्थः । प्रलयेऽपि प्रतिजीवमुपाधयः सूक्ष्मरूपेण तिष्ठन्ति ततस्तदवच्छिन्नजीवभेदस्थितिरुपपद्यत इति भावः । अनाद्युपाधिभेदस्वीकारे ब्रह्मव्यतिरिक्ताङ्गीकारः स्यादित्यत आह । तस्मादिति । बहुधा भिन्नोऽपि ह्युपाधिर्ब्रह्माभिन्नः तस्मान्नाब्रह्मतत्त्वाङ्गीकृतिरिति भावः । ब्रह्मतादात्म्याविशेषेऽपि उपाधेस्तद्गतो वैषम्यमाह । जड इति । पूर्वापरदूष्येभ्यो विशेषं व्यनक्ति । इति तु मत इति । दुःखमद्वारकं स्यात् न ह्यस्मन्मतवद्विशेषद्वारकं न च त्वन्मते विकारवदुपाध्यंशद्वारकमित्यर्थः । औपाधिक्यां व्यवस्थितावतिप्रसङ्गमाह । सौभर्य्यादीति । अस्ति हि योगिनां युगपदनेकदेहभृतां तद्देहोपाधिकृतभोगप्रतिसन्धानं, स्मर्य्यते हि आत्मनो वै शरीराणि बहूनि मनुजेश्वर प्राप्य योगी बलं कुर्य्यादित्यादि । अवतारेषु चैकालिकावतारान्तरवृत्तान्तव्यवहारास्तत्र तत्र दृश्यन्ते तथाऽपि कर्मोपरोधादप्रतिसन्धानमित्यत आह । सर्वज्ञ इति । न हि नित्यसर्वज्ञतयाऽभ्युपगत ईश्वरांशः स्वात्मगतमुपाधिं तत्परिच्छिन्नस्वांशं च स्वेनाभिन्नं न वेत्ति ततश्चाहमेवोपाधिपरवशतयाऽनन्तदुःखमनुभवामीति न कथं दुःख्येत् । ३१ ।

Digitized by Google

अपि चोपाध्यवच्छिन्नं ब्रह्म जीव इति पक्षे किमुपाधिसंयोगमात्रविशेषितं ब्रह्मस्वरूपमेव जीव उत घटाकाशवदविच्छेदेन विभक्तो भागः । अथ घटोदकवद्विच्छेदेन । यद्वा विदारितदारुन्यायात् किञ्चिद्विदलनेन । यद्वा उपाधिसंयोगव्यञ्जितविभागः कश्चित्सरूपोंऽशः घटाद्यवच्छिन्नपृथिव्यंशवदुपाधिभावेन परिच्छिन्न एव वा कश्चिद् ब्रह्मांश इति विकल्पं विभाव्य प्रथमे दोषमाह । बन्ध इति ।

मू० बन्धो ब्रह्मण्यशेषे प्रसजति स यदोपाधिसंयोगमात्रात् सादेश्याच्चेदुपाधौ व्यभिचरति भवेद्बन्धमोक्षाव्यवस्था । अच्छेद्यच्छेदनादेर्विहित उपधिभिर्न स्वतोंऽशस्तथास्मिन्नोपाधिर्जीवतामप्यनुभवितुमलं ब्रह्मरूपोऽप्यचित्त्वात् ॥ ३२ ॥

टी० अत्र नित्यमुक्त ईश्वरांशो निष्कष्टुं न शक्यो बद्धमुक्तविभागश्च न स्यादिति भावः । द्वितीयमनुवक्ति । सादेश्याच्चेदिति । तत्रोपाधिसञ्चारदशायां घटाकाशनीत्यैव नियतजीवांशासम्भवात् बद्धमुक्तप्रदेशनियमाभावमाह । उपाधाविति । कर्मनिरपेक्षो बन्धः तत्कालसमुचितविद्यानिरपेक्षो मोक्षश्च स्यादित्याकूतम् एवं सति ।

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमान् ॥

इति स्मृतिः कथमिति चेदित्थमाकाशोऽपि पृथिव्यादिवत् सभागः पञ्चीकरणप्रक्रियया तत्सिद्धेः तद्भागानान्त्वेकरूपाणामपि यथा घटादिसंयोगभेदैरेव मिथोवैषम्यम् एवमात्मनां

तथा हलन्ताच्चेति सनः कित्त्वविधानस्यैतत्प्रयोजनं पित्सतीत्यादौ गुणो माभूदिति, तदपि ज्ञापकमुक्तार्थस्य, इदं तु ज्ञापकं नोपपद्यते । सिस्त्वति विवृत्ततरइत्यत्र सृजिदृशोरित्यमागमो माभूदित्येवमर्थमेतत्स्यात्, तथा धिप्सतीत्यत्र नलोपार्थं तत्स्यात्, तस्मात्ककारेव कित्करणं ज्ञापकं भिनत्ति छिनत्तीत्यत्र श्नमोऽकारेण लघूपधमङ्गं तत्र धातोरिकारस्य गुणः प्राप्नोति, अत आह । 'उपधाचेति' । नह्यत्र या कां चिदुपधा गृह्यते किं तर्हीको गुणवृद्धी इत्यस्योपस्थानात्स्थानित्वेन संनिहित इगेव । 'अपरे त्विति' । वर्णयन्तीति संबन्धः । 'पुकि अन्त इति' । अन्तशब्दः समीपवचनः, यद्यपि पुगन्तेत्यत्र बहुव्रीहावपि न दोषस्तथाप्येकरूप्येण विशेषणार्थमयमपि तत्पुरुष एव व्याख्यातः । 'लघ्वी उपधेति' । कर्मधारयः, अत्र पक्षे शाब्द एवोपधाया इका संबन्धः । 'लघ्व्या उपधाया इक इति' । पुगन्तलघूपधमिति समाहारद्वन्द्वः, क्व चिदुपधात्रेत्यादेर्धन्यस्य पुरस्तात्संयोगे गुरुसंज्ञायामिति श्लोकत्रयं पठ्यते । धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये सति गुरुसंज्ञायां सत्यां गुणो भेत्तुर्भेत्तृशब्दस्य न सिध्यति । परिहरति । 'विध्यपेक्षमिति' । इदं विधानमिति शेषः, लघूपधाद्ये विहिते सार्वधातुकार्धधातुके तयोरङ्गस्य गुण इत्यर्थः, ननु पञ्चम्यभावात् कथं विधानमुपपद्यते, उच्यते, षष्ठीपक्षेऽपि विशेष्यतइति चेत्को दोषः, लघूपधस्य ये सार्वधातुकार्धधातुके, के च ते, ये तस्माद्विहिते इत्युपपद्यते, लघोश्चासाविति पाठे लघूपधाव्यासौ मृज्विहित इत्यर्थः । उपधाशब्दस्तु वृत्तभङ्गभयाच्च प्रयुक्तः । 'कथं कुण्डिरिति' । अङ्गाधिकारे नुमो विधानादङ्गतएव नुमि प्रत्ययो लघूपधाद्विहितस्तत्र परतो निमित्ते स्थिते कुण्डितेत्यादौ गुणः प्राप्नोति यदि विधानं विशेष्यतइत्यर्थः । परिहरति । 'धातोर्नुम इति'[1] । हेतौ पञ्चमी, यस्मात्तत्र धातोर्नुमङ्गस्य तस्मादित्यर्थः । उक्तं हि तत्र धातुग्रहणस्य प्रयोजनं धातूपदेशावस्थायामेव नुम् यथा स्यादिति, ततश्च प्रागेव नुम् पश्चात्प्रत्ययः, न चासौ लघूपधाद्विहितो भवति । 'कथं रञ्जेरिति' । यदि षष्ठीनि-

[1] धातोर्हि नुमिति मु॰ मू॰ पु॰ पाठः ।

Digitized by Google

र्द्देशेपि विधानं विशेष्यते तदान्यत्रापि प्रसङ्गः, ततश्चात उपधाया इत्यकारोपधाद्विहिते प्रत्यये विधीयमाना वृद्धी रञ्जेर्न स्यात्, प्राक् प्रत्ययोत्पत्तेर्नकारोपधत्वात्, राग इति । घञि च भावकरणयोरिति नकारलोपः, यद्यप्युपधाया अकारस्य वृद्धिरुच्यते, न च ततः प्रत्ययस्य विधानं संभवति, तथाप्यकारोपधाद्वृद्धिविधानं तदेवोपधाया विधानं मन्यते । 'स्यन्दिश्रन्थ्योरिति' । यदयं स्यदो जवे, अवोदैधौद्मप्रश्रथहिमश्रथा, इति स्यन्दिश्रन्थ्योर्वृद्ध्यभावं निपातयति तज्ज्ञापयति भवत्येवंजातीयकानां वृद्धिरिति, तत्र हि नलोपार्थं वृद्ध्यभावार्थं च निपातनमाश्रयणीयं, यदि च वृद्धिविषये विधानं विशेष्येत ततो वृद्धिप्रसङ्गाभावान्निपातनाश्रयणमनर्थकं स्यात्, नलोपस्य सिद्धये विधिरेवाश्रयणीयः, अनेकप्रयोजनसिद्धये हि निपातनाश्रयणम् । 'अनल्लोपेति' । अनन्तस्य योऽल्लोपः सोऽनल्लोपः, शौ दीर्घत्वं शिदीर्घत्वं, तयोर्द्वन्द्वः, अनल्लोपशिदीर्घत्वे विध्यपेक्षे न सिद्ध्यतः, यदि च षष्ठीनिर्द्देशेपि विधानं विशेष्येत अल्लोपो राज्ञ इत्यादावेव स्यात्, अस्थ्ना अस्थ्ने दध्ना दध्ने इत्यादौ न स्यात्, शौ दीर्घत्वं च सामानि इत्यादावेव स्यात्कुण्डानीत्यादौ तु न स्यात्, तस्मात्षष्ठीनिर्द्देशेषु विहितविशेषणग्रहणे दोषप्रसङ्गाद्गुणो भेत्तुं न सिद्ध्यतीति, एवं तर्हि ज्ञापकात्सिद्धं, यदयं नाभ्यस्तस्याचीत्यज्ग्रहणं करोति तज्ज्ञापयति भवत्येवं जातीयके विषये गुण इति, तस्य हि प्रयोजनं नेनेकीत्यादौ हलादौ गुणप्रतिषेधो माभूदिति, यदि च हलादावलघूपधत्वाद्गुणो न स्यात् तदा गुणस्य प्राप्त्यभावात्किं तन्निवारणार्थेनाज्ग्रहणेन, नैतदस्ति ज्ञापकम् । 'अभ्यस्तस्य यदाहाचि लङर्थं तत्कृतं भवेत्' । अभ्यस्तस्याजादौ प्रतिषेधमाहेति यत् तल्लङर्थं कृतं भवेत्, यत्र हलादिर्लुप्यते, अनेनेर्गिति, तस्मान्न ज्ञापकम्, एवं तर्हि । 'कुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे' । व्याख्यातमेतत् ॥

"नाभ्यस्तस्याचि पिति सार्वधातुके" ॥ 'नेनिजानीत्यादि' । लोट्, मेर्निः, आडुत्तमस्य पिच्च, शपः श्लुर्द्विर्वचनं, निजां त्रयाणां गुणः श्लौ, 'अनेनिजमित्यादि' । लङ्, मिपोऽम्भावः । 'वेदानीति' । विद ज्ञाने,

Digitized by Google

लोडादि यथायोगं पूर्ववत्, शपो लुक्। 'नेनेक्ति' । लट्, तिप्, कुत्वम्। 'पिद्ग्रहणमुत्तरार्थमिति'। तृणह इम् पिति यथा स्यात्, इह तु पितोऽन्यत्रापि सार्वधातुकमपिदिति ङित्त्वाद्गुणस्याप्राप्तत्वादिति ङित्वाद्गुणाप्राप्तेरेव प्रतिषेधेन। 'निनेजेति'। णल्, स च लिट् चेत्यार्धधातुकसंज्ञः। 'जुजोषदिति'। जुषी प्रीतिसेवनयोः, लेट्, व्यत्ययेन परस्मैपदं, तिप्, इतश्च लोपः परस्मैपदेषु, लेटोऽडाटावित्यट्, व्यत्ययेन शपः श्लुः, द्विर्वचनं, यद्यत्र गुणप्रतिषेध इष्यते पस्पशाते इत्यादौ उपधाह्रस्वत्वमिष्यते तच्च प्राप्नोति, तस्मादभ्यस्तानामुपधाया ह्रस्वत्वमेव विधेयं न गुणप्रतिषेधः। कथं नेनिज्यानीत्यादि, गुणे कृते उपधाह्रस्वत्वम्, एच इग्घ्रस्वादेशे, सिद्धमिष्टमत आह। 'पस्पशाते इत्यादि'। स्पशिर्वार्त्तिककारवचनादपठितोऽपि धातुः, तस्माल्लेट्, व्यत्ययेनात्मनेपदं, टेरेत्वे लेटोऽडाटावित्याट्, शपो बहुलं छन्दसीति श्लुः, द्विर्वचनम्। अथ वा यङ्लुकि छान्दसमभ्यासस्य ह्रस्वत्वम्। 'चाकशीनीति'। काशृ दीप्तौ, यङ्लुक्, लट्, तिप्, यङो वेतीडागमः। 'वावशीतीरि[1]ति'। वाशृ दीप्तौ, यङ्लुक्, लट्, शत्रादेशः, ङीप्, शस्। 'छान्दसं [2]ह्रस्वत्वमिति'। यदि तु गुणनिषेधं प्रत्याख्यायोपधाह्रस्वत्वमुच्येत तदा नर्नृतीतीत्यादौ ऋदुपधे रपरे गुणे कृते ह्रस्वभाविन्युपधा नास्तीति रूपं न सिध्येत्, तस्माच्छान्दसमेव ह्रस्वत्वमेष्टव्यमिति भावः। 'प्रकृत्यन्तराणामेवेति'। स्पश बाधनस्पर्शनयोः, कश गतिशासनयोः, वश कान्तौ॥

"भुसुवोस्तिङि"॥ 'अभूदिति'। लुङ्, गातिस्थेत्यादिना सिचो लुक्। 'सुवै सुवावहै सुवामहै इति'। षूङ् प्राणिगर्भविमोचने, लोट्, टेरेत्वम्, एत ऐ, आडुत्तमस्य पिच्च, शपो लुक्, उवङादेशः। 'सुवतिसूयत्योस्त्विति'। षू प्रेरणे तुदादिः, षूङ् प्राणिप्रसवे दिवादिः। 'भवतीति'। शपि गुणः। 'व्यतिभविषीष्टेति'। आशिषि लिङ्, लिङाशिषीत्यार्धधातुकसंज्ञा, कर्तरि कर्मव्यतिहार इत्यात्मनेपदम्। 'अयेति'। प्रकृति-

---

१ चाकशीतीति मु॰ मू॰ पुस्तकस्थपाठस्तु पदमञ्जर्यसंमतः।
२ छान्दसमदीर्घत्वमिति–२-३-पुस्तकयोः पाठः स मु॰ मू॰ पुस्तकानुगुणः।

Digitized by Google

ग्रहणे यङ्लुगन्तस्यापि ग्रहणात्प्रसङ्गः । 'ज्ञापकादिति' । सूतेस्तु निपातनाभावाद्गुणनिषेधो भवत्येव सोषुवीतीति ॥

"उतो वृद्धिर्लुकि हलि" ॥ 'यवानीति' । लोडुत्तमैकवचनम् । 'अपि स्तुयादिति' । अपिः संभावने कर्मप्रवचनीय इत्युपसर्गात्सुनोतीत्यादिना षत्वं न भवति । 'ङिच्च पिन्न भवतीति' । यासुडादेः सार्वधातुकस्य साक्षाद्विहितं ङित्त्वमनवकाशं, तिबादीनां तु पित्त्वं लकारान्तरेषु सावकाशं, तेन ङिच्च पिन्न भवतीति पिच्च ङिन्न भवतीति वचनद्वयसद्भावेऽपि ङिच्च पिन्न भवतीत्येतदेवात्र प्रवर्त्ततइति भावः, क्ङिति चेति प्रतिषेधस्त्वत्र न लभ्यते, किं कारणम्, इक इत्येवमिक्संशब्दनेन या वृद्धिस्तस्याः स प्रतिषेधः, इह तु उत इति निर्दिष्टस्थानिकत्वादिक्परिभाषा नोपतिष्ठते ॥

"गुणोऽपृक्ते" ॥ ननु च हलीति वर्त्तते पितीति च, अङ्गेन च प्रत्यय उपस्थाप्यते । तत्र हलात्मके प्रत्यये पिति विधीयमानो गुणोऽपृक्तएव भविष्यति नार्थोऽपृक्तग्रहणेनेत्यत आह । 'हलीति वर्त्तमानइति' । अपृक्तग्रहणं ह्येवमर्थं क्रियते हलादौ माभूदिति, यदि चेयं परिभाषा न स्यादपृक्तग्रहणं न कुर्यात्कृतं तु ज्ञापयति भवत्येषा परिभाषेति, इदं त्वत्र वक्तव्यं, तदन्तविधिनिवृत्त्यर्थमपृक्तग्रहणं कस्मान्न भवतीति, तदन्तविधौ हि लङि मिपोऽभावेऽपि प्रसङ्गः स्यात् । ननु भवत्येव तत्र गुणः, कथं भवति, यदा पूर्वेण वृद्धिविधावपि तदन्तविधिरेव भवति, तदेतदपृक्तग्रहणं कथं तदादिविधेर्ज्ञापकमिति चिन्त्यं, नापृक्तइत्युच्यमाने ऽनन्तराया विभाषिताया वृद्धेः प्रतिषेधः स्यान्नित्या तु वृद्धिः स्यादेव तस्माद्गुणग्रहणम् ॥

"तृणह इम्" ॥ 'तृणेढीति इति' । इमि कृते श्नमोऽकारेण सहाद्गुणः, हो ढः, झष स्तथोर्धोधः, ष्टुत्वं, ढलोपः । 'तृणेक्षीति' । षढोः कः सि । 'अतृणेडिति' । लङ्, तिप्सिपोरन्यतरः, हल्ङ्यादिलोपः, ढत्वजश्त्वचर्त्वानि । ननु च हलादावित्युच्यते न चात्र हलादिं पश्यामः, प्रत्ययलक्षणेन, वर्णाश्रये नास्ति प्रत्ययलक्षणमत आह । 'वर्णाश्रयेप्यत्रेति' ।

Digitized by Google

यत्र केवलो वर्ण एव निमित्तं यस्य स वर्णाश्रयः, यथा गवे हितं गोहितमित्यवादेशः, इह तु पिति सार्वधातुक इति प्रत्ययश्च निमित्तं, हल् तस्य विशेषणं, तेनासौ प्रत्ययनिमित्तत्वाद्भवत्येवेत्यर्थः । 'तृणहानीति' । लोट्, मेर्निः । 'तृण्ढ इति' । तस्, ढत्वादि पूर्ववत्, श्नसोरल्लोपः, अनुस्वारपरसवर्णौ । अथ किमर्थं तृहिरागतश्नम्को गृह्यते, रौधादिकस्य तृह हिंसायामित्यस्य ग्रहणं यथा स्यात् तृहि हिंसायामित्यस्य तौदादिकस्य ग्रहणं माभूत्, नास्य पिद्धलादिसार्वधातुकमनन्तरं संभवति, विकरणेन व्यवधानात् । ननु द्वास्यापि यङ्लुगन्तस्य संभवति, एवं तर्हि सानुबन्धकत्वात्तस्य ग्रहणं न भविष्यत्यत आह । 'तृणह इतीत्यादि' । यद्यागतश्नम्को न गृह्येत ततो नाप्राप्ते श्नम्यारभ्यमाण इम् तस्य बाधकः स्यात्, अथापि न बाधक एवमपि श्नमि कृते इमितीष्टव्यवस्था न स्यात्, विपर्ययोपि स्यात् पूर्वमिमागमः पश्चाच्छ्नमिति, सश्नम्कनिर्देशे तु न श्नमो निवृत्तिर्भवति, इष्टा च व्यवस्था सिध्यति, पूर्वं श्नम् पश्चादिमिति, अतस्तदर्थमागतश्नम्को गृह्यते, किं च रौधादिकस्यापि यङ्लुगन्तस्य ग्रहणं भवति सश्नम्कनिर्देशादेव ॥

"ब्रुव ईट्" ॥ ब्रुव इति पञ्चमी, न षष्ठी, व्याख्यानात्, तया ऽचरितार्थया पूर्वत्र कृतार्थायाः सार्वधातुक इति सप्तम्याः षष्ठी प्रकल्प्यते तदाह । 'ब्रुव इत्येतस्मादुत्तरस्येति' । इह ब्रूतावब्रवानिति तातङ औपदेशिकेन ङित्त्वेन स्थानिवद्भावकृतं पित्त्वं बाध्यते, ङिच्च पिन्न भवतीति, तेनेड् न भवति ॥

"यङो वा" ॥ 'लालपीतीत्यादि' । लपिवदिरौतिभ्यो यङ्लुक्, द्विर्वचनं, रौतेरभ्यासस्य गुणः, इतरयोर्दीर्घत्वम् । 'वर्वर्तीति' । वृतेरूपं, रुग्रिकौ च लुकीत्यभ्यासस्य रुक्, किं पुनः कारणं यङ्लुगन्तमेवोदाहृतं न पुनर्यङन्तं, तत्राह । 'हलादेरिति' । यङन्ते हि शपा भवितव्यं स च हलादिर्न भवति ॥

१ तृणु इति मुद्रितमूलपुस्तकस्थपाठस्तु पदमञ्जर्यसंमतः ।

Digitized by Google

"तुरुस्तुशम्यमः सार्वधातुके" ॥ 'तु इति सौत्रोऽयं धातुरिति'। स च वृद्धौ वर्त्तते, गत्यर्थे इत्यन्ये, हिंसार्थे इत्यपरे। 'उत्तवीतीति'। बहुलं छन्दसीति शपो लुक्। 'शमीध्वमिति'। शमेरन्तर्भावितण्यर्थात्मेवे लोट्, व्यत्ययेनात्मनेपदं, शप्, तस्य बहुलं छन्दसीति लुक्। 'आपिशला इति'। आपिशलेः शिष्याः। 'सार्वधातुकास्विति'। टाबन्तं, तत्र संज्ञात्वेन विनियुक्तं सार्वधातुकग्रहणमनर्थकं, नाभ्यस्तस्येत्यादेः सूत्रादनुवृत्तेरत आह। 'सार्वधातुकइति वर्तमानइति'। तद्धि सार्वधातुकग्रहणं पितीत्यनेन संबद्धमतस्तदनुवृत्तौ तदप्यनुवर्तेत तन्मानुवृत्ततदित्येवमर्थं पुनः सार्वधातुकग्रहणमिति, हलीत्येतत्त्वनुवर्त्ततएव, नहि तत्सार्वधातुकग्रहणेन संबद्धम् ॥

"अस्तिसिचोऽपृक्ते" ॥ अपृक्तइति षष्ठ्यर्थे सप्तमी, तेनापृक्तस्यैवायमागमः। 'आसीदिति'। अस् भुवि, शपो लुक्, तिप ईट्। 'अ[1]लावीदिति'। लुङ्, इट ईटीति सिचो लोपः। 'आहिभुवोरीट्प्रतिषेध इत्यादि'। स्थानिवत्सूत्रएतद्वार्तिकम्। आहिभुवोः स्थानिवद्भावस्य प्रतिषेधो वक्तव्यः, ईट्प्रतिषेधः प्रयोजनमित्यर्थः। 'आत्थेति'। ब्रुवः पञ्चानामित्यादिना सिप स्थल्, ब्रुव आहादेशः। आहस्थ इति हकारस्य थत्वं, तस्य खरि चेति चर्त्वं तकारः। 'अभूदिति'। लुङ्, अस्तेर्भूः, गातिस्थेत्यादिना सिचो लुक्, अत्र स्थानिवद्भावप्रतिषेधादस्त्याश्रयस्तावदीटन भवति, सिजाश्रयोऽपि न भवति, स्थानिवद्भावप्रतिषेधसामर्थ्यात्, अस्त्वेवमस्त्यादेशे भुवि, शुद्धे तु भवतौ सिजाश्रय ईट् प्राप्नोति, तस्मादीड्वाच प्रतिषेध्यः, आहिविषये परिहारान्तरं ज्ञापकात्सिद्धं, यदयं झलादिप्रकरणे आहस्थ इति थत्वं शास्ति, ननु च भूतपूर्वगत्यर्थमेतत्स्यात् झलादिर्यो भूतपूर्वस्तत्रेति, नैतदस्ति, एवं तर्हि पञ्चानामपि तिबादीनां भूतपूर्वझलादित्वमिति सर्वत्र थत्वप्रसङ्गः, ततश्चायमेव विदध्यात् ॥

"बहुलं छन्दसि" ॥ 'आ इति'। अस्तेर्लङ्, तिप्, शपो लुक्, रुत्वविसर्जनीयौ। 'अह्वारत्सारिति'। ह्वृ संवलने, त्सर छद्मगतौ, लुङ्,

१ अलावीदिति मु॰ मू॰ टिप्पण्यां द्रष्टव्यम्।

तिपो हल्ङ्यादिलोपः, रात्सस्येति सिचो लोपः, धातुरेफस्य विसर्जनीयः । 'छान्दसत्वादिति'। बहुलं छन्दस्यमाङ्योगेपीत्यनेन न केवलममाङ्योगेडाटोरभावः क्रियते किं तर्हि माङ्योगे तत्सद्भावोपीति भावः । 'इ॰इभावश्च सिच इति'। छान्दसत्वादित्यपेक्षते ॥

"हदश्च पञ्चभ्यः" ॥ रुदिः स्वपिः श्वसिरनिजक्षिः पञ्च रुदादयः । रुद इति बहुवचनस्यानएकवचनम् । पञ्चभ्य इति निर्देशादाद्यर्थावगतिः ॥

"अड्गार्ग्यगालवयोः" ॥ 'गार्ग्यगालवयोर्ग्रहणं पूजार्थमिति' । न विकल्पार्थं विधानसामर्थ्यादेवाडीटोर्विकल्पस्य सिद्धत्वात्, अनेकाचार्यग्रहणमप्यत एव ॥

"अदः सर्वेषाम्" ॥ सर्वेषांग्रहणं नित्यार्थमन्यथा गार्ग्यगालवग्रहणमिह विकल्पार्थं संभाव्येत ॥

"अतो दीर्घो यञि" ॥ 'केचिदत्र तिङीत्यनुवर्त्तयन्तीति'। भूसुवोस्तिङीत्यतः । 'भवत्रानिति'। भवतेः क्वसुः, तस्य छन्दस्युभयथेति सार्वधातुकत्वाच्छप्, लिटि धातोरित्यत्र धातुग्रहणाच्छबन्तस्य द्विर्वचनाभावः, ये तु सार्वधातुकइत्येवानुवर्त्तयन्ति तेषां छान्दसत्वाद्दीर्घाभावः । अथ प्रकृतोडागम एव कस्मान्न विधीयते, अतो यञीति, अकारान्तादङ्गादुत्तरस्य यञादेस्तिङोडागमो भवति, पच अवस्, सवर्णदीर्घत्वे पचाव इति सिद्धं, विधानसामर्थ्याच्चातो गुणइति पररूपत्वं न भविष्यति, नैवं शक्यम् । इह अधुवावअधुवामहीति क्वस्याचीति लोपः प्रसज्येत, इह चातिजराभ्यामिति जरसभावः, एवमपि दीर्घग्रहणमनर्थकं, आदित्याकार एव विधेयः, इह तर्हि प्रयोजनम् अपाचीरोदनं देवदत्त । ननु पचामि भोरित्यत्रापि अनन्त्यस्यापि प्रश्नाख्यानयोरिति प्लुतः प्राप्नोति, स माभूद्दीर्घ एव यथा स्यादिति दीर्घग्रहणम्, अत इति तपरकरणमुत्तरार्थं, बहुवचने झल्येदित्येत्वं वृक्षैरित्यत्र माभूत्

१ वि च इडभाव इति मु॰ मू॰ पु॰ पा॰ ।

Digitized by Google

"सुपि च" ॥ 'वृक्षायेति' । संनिपातपरिभाषाया अनित्यत्वादत्र दीर्घत्वम्, अनित्यत्वं च कष्टायेति निर्देशादवसितम् ॥

"बहुवचने झल्येत्" ॥ 'वृक्षाणामिति' । झलीत्यनुच्यमानेऽग्नीनामित्यादौ सावकाशं नामीति दीर्घत्वं बाधित्वेदमेत्वमकारान्तेषु स्यादिति भावः ॥

"आङि चापः" ॥ खट्वया खट्वयोरित्यादीनि टाबडाप्चापां क्रमेणोदाहरणानि। 'कीलालपेति'। कीलालं पिबतीति आतो मनिन्क्वनिब्वनिपश्चेति विच्, तृतीयैकवचने आतो धातोरित्यालोपः, असति तु पिद्विशिष्टस्य ग्रहणे कीलालपः पश्येत्यादौ चरितार्थं लोपं बाधित्वा परत्वादाङ्गोसोरिदमेवैत्वं स्यात् । 'ङ्याब्ग्रहणेऽदीर्घग्रहणादिति' । यत्र ङ्यापौ गृह्येते तत्र दीर्घयोर्ग्रहणं न ह्रस्वयोः, स्थानिवद्भावे तु प्रसङ्गः, तत्र स्थानिवत्प्रतिषेधसूत्रप्रस्तावे वार्तिकं ङ्याब्ग्रहणेऽदीर्घ इति, ङ्यापोर्ग्रहणेऽदीर्घ आदेशो न स्थानिवदिति, तत्रार्थादिदमुक्तं भवति ङ्यापोर्ग्रहणे दीर्घयोर्ग्रहणमिति, तदिदं वृत्तिकारेण दर्शितम् ॥

"अम्बार्थनद्योर्ह्रस्वः" ॥ अम्बार्था मात्रर्थाः। 'हलकवतीनामिति'। अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः, शुत्यपेक्षो वा स्त्रीलिङ्गनिर्देशः। 'हलकवतीनां शुनीनामित्यर्थ इति'। असंयुक्ताश्च डलका गृह्यन्ते तेनाक्क अल्लेति ह्रस्वो भवत्येव। 'देवते भक्तिरिति'। ह्रस्वत्वे कृते ङ्याब्ग्रहणेऽदीर्घ इति स्थानिवत्त्वनिषेधाद्याडागमो ङेरामपि न भवतः। 'मातॄणामिति'। पूर्वपदभेदेन बहवो मातृशब्दा इति बहुवचनम्। 'पुत्रार्थमिति'। पुत्रमभिधातुं यो मातृशब्द उपादीयत इत्यर्थः। बहुव्रीहौ च वर्तिपदैरन्यपदार्थोऽभिधीयत इति तत्रैवायमादेशः, कीदृशाय पुत्रायेति समासे गुणीभूतस्यापि पुत्रस्य बुद्ध्या प्रविभज्य निर्देशः, यथाथ शब्दानुशासनं केषां शब्दानामिति। 'मात्रा व्यपदेशमर्हतीति'। यः पुत्रः श्लाघ्यगुणत्वात्कुलसंभूतया मात्रा व्यपदेशमर्हतीत्यर्थः, यत्र तु पितुरसंविज्ञानेन मात्रा व्यपदेशस्तत्र न भवति, एतच्चार्हत इति प्रशंसायां लटः शत्रादेशविधानाल्लभ्यते। 'समासान्तापवाद इति'। नाप्राप्ते तस्मिन्नस्यारम्भात्।

"ह्रस्वस्य गुणः" ॥ 'ह्रस्वविधानसामर्थ्यादिति'। ननु ह्रस्वविधानं तस्य गुणविधानार्थमेव स्यादन्यथा ह्रस्वत्वाभावाद्गुणो न स्यादत आह। 'यदीति'। ह्रस्वं विधाय गुणे विधीयमाने प्रक्रियागौरवं भवतीति, लाघवार्थं साक्षादेव गुणं विदध्यादित्यर्थः। ननु नदीह्रस्वयोर्गुण इत्युच्यमाने जसि चेत्यत्र नद्या अप्यनुवृत्तिः स्यात्, एकसमासनिर्दिष्टत्वात्। नैष दोषः। एकसमासनिर्दिष्टयोरप्येकदेशोऽनुवर्त्तते, तद्यथा संख्याव्ययादेर्ङीप्, दामहायनान्ताच्चेत्यत्र संख्याग्रहणमनुवर्त्तते नाव्ययग्रहणम् ॥

"जसि च" ॥ 'जसादिष्विति'। आदिशब्दः प्रकारे, तेन पूर्वयोगनिर्दिष्टानामपि ग्रहणम्। 'दर्वीति'। कृदिकारादक्तिन इति ङीष्विकल्पमनपेक्ष्यैतदुक्तं, तत एव तु सिद्धं रूपद्वयम्। 'शतक्रत्व इति'। जसि चेति गुणाभावपक्षे प्रथमयोरिति पूर्वसवर्णदीर्घोऽपि वा छन्दसीति वचनान्न भवतीति यणादेशः प्रवर्त्तते। 'किंकिदीव्येति'। आङो नास्त्रियामिति नाभावो न भवति। किंकिदीविशब्दः कविधूपित्यणादिषु निपातितः ॥

"ऋतो ङिसर्वनामस्थानयोः" ॥ 'तपरकरणं मुखसुखार्थमिति'[1]। ङिसर्वनामस्थानयोर्दीर्घान्तस्यासंभवात्, धात्वनुकरणमपि न संभवति, ऋत इद्धातोरितीत्वविधानात् कर्तृणीत्यादावपि नुमः पूर्वान्तत्वादसंभवः ॥

"घेर्ङिति" ॥ 'घ्यन्तस्याङ्गस्येति'। वर्णमात्रस्य घिसंज्ञेत्याश्रित्येदमुक्तं, तदन्तस्य संज्ञेत्यत्र तु पक्षे घ्येकदेशे वर्णे घिशब्दो द्रष्टव्यः। एतेन नद्यन्तादिति व्याख्यातम्। 'सुपीत्येवेति'। सुपि चेत्यतः। 'पट्वीति'। वोतो गुणवचनादिति ङीष्। 'कुरुतरेति'। यस्य नदीसंज्ञा नास्ति स सर्वोऽपि घिसंज्ञो न लिङ्गवदेवेति। कुरुशब्दस्य घिसंज्ञा, तस्य तसि ङिति गुणो न भवति, एतच्च हिक्कच्छे बहुव्रीहिमाश्रित्योच्यते, यदि तु ङश्चासाविच्चेति कर्मधारयस्तदा नैवात्र प्रसङ्गः, सार्वधातुकमपिद-

१ इदं मु० पु० पुस्तकस्थटिप्पण्यां दृष्टव्यम्।

त्यनेन हि बहुव्रीहौ ङितो यत्कार्यं तदतिदिश्यते, न चैतावता तसे-ङ्कार आविर्भवति ॥

"आण्नद्याः" । नद्या इति पञ्चम्यन्तार्थो ङितीति सप्तम्याः षष्ठीं प्रकल्पयति, तेन ङित एवायमागमो विज्ञायतइत्याह । 'नद्यन्ता-दङ्गादुत्तरस्येति' । 'कुमार्या इति' । आटश्चेति वृद्धिः, अथ दीर्घोच्चारणं किमर्थमडेवोच्येत, वृद्धिरेचीति वृद्ध्या सवर्णदीर्घत्वेन च कुमार्यै कुमार्या इति सिद्धं, न सिद्ध्यति, अतो गुणे पररूपत्वं प्राप्नोति, अड्वचनसामर्थ्याच्च भविष्यति, अस्त्यड्वचने प्रयोजनं, किं, श्रियै श्रिया इत्यत्र सावेकाच इत्या-द्युदात्तत्वं मा भूदागमानुदात्तत्वं यथा स्यादिति, आगमानुदात्तत्वं हि प्रत्ययस्वरमिव विभक्तिस्वरमपि बाधते, विशेषतोऽत्राड्वचनसामर्थ्यात् ॥

"याडापः" ॥ दीर्घोच्चारणं किमर्थं, न यडेवोच्येत, वृद्धौ कृतायां सवर्णदीर्घत्वे च खट्वायै खट्वाया इति सिद्धं, न सिध्यति, अतो गुणे पररूपत्वं प्राप्नोति, अकारोच्चारणसामर्थ्याच्च भविष्यति, अस्त्यन्यदका-रोच्चारणस्य प्रयोजनं ज्ञायै ज्ञाया इत्यत्र सावेकाच इत्याद्युदात्तत्वं माभूत्, आगमानुदात्तत्वं यथा स्यादिति, किञ्च उच्चारणार्थोऽप्यकारः संभाव्येत, इह खट्वामतिक्रान्त इति प्रादिसमासे ह्रस्वत्वे च तस्य स्थानि-वद्भावात्ततः परस्य चतुर्थ्येकवचनस्य ङेर्य इति यादेशं बाधित्वानेन याट् प्राप्नोति, तत्र कृते दीर्घत्वे चातिखट्वायै देवदत्तायेति प्रसङ्गस्तत्राह । 'अतिखट्वायेत्यत्रेति' । 'अकृते दीर्घत्वइति' । यादेशात्प्रागवस्थायामि-दमुक्तं, कृते तर्हि यादेशे दीर्घत्वे च ङिच्चासौ भूतपूर्व इति याट् प्राप्नो-त्यत आह । 'कृते च लाक्षणिकत्वादिति' ॥

"सर्वनाम्नः स्याड्ढ्रस्वश्च" ॥ दीर्घोच्चारणं सर्वस्या इत्यत्र वृद्धि-र्यथा स्यादतो गुणे पररूपत्वं माभूत्, अकारोच्चारणं तु अस्या इत्यत्रो-ङिदंपदादीति विभक्तेराद्युदात्तत्वं माभूत् आगमानुदात्तत्वं यथा स्यादे-वमर्थं स्यात्, किञ्च उच्चारणार्थोऽप्यकारः संभाव्येत ॥

"विभाषा द्वितीयातृतीयाभ्याम्" ॥ अप्राप्तविभाषेयमसर्वनाम-त्वात् । ननु च तीयस्य वा ङित्सूपसंख्यानमित्यनेनैव सिद्धत्वाच्चार्थे

एतेन, तच्चावश्यं वक्तव्यं लिङ्गान्तरेपि स्मायाद्वयो विकल्पेन यथा स्युरिति, नैतद्युक्तमुच्यते, यद्धि सूत्रेणासिद्धं तदुपसंख्यानेन साधनीयं न पुनरुपसंख्यानाश्रयणेन सूत्रस्य प्रत्याख्यानं युज्यते, यदि पुनरत्र ह्रस्वयोर्ग्रहणं कृत्वा स्याड्ग्रहणं च निवर्त्य सर्वनाम्नइत्येवानुवर्त्यातिदेश आश्रीयते, सर्वनाम्नो यदुक्तं तद्विभाषा भवति द्वितीयतृतीययोरिति तदोपसंख्यानं शक्यमकर्त्तुम् ॥

"ङेराम्नद्याम्नीभ्यः" ॥ ङेरिति सप्तम्येकवचनग्रहणम्, इच्छायां स्त्रियामित्यादि निर्देशात् । 'ग्रामण्यामिति' । सत्सूद्विषेत्यादिना क्विप्, अग्रग्रामाभ्यामिति णत्वम्, एरनेकाच इति यण् ॥

"इदुद्भ्याम्" ॥ नदीग्रहणमिहानुवर्त्तते, यद्येवमपार्थकमिदं पूर्वेणैव सिद्धत्वात्, ततश्चेदुद्भ्यामौदित्येकयोग एव कर्त्तव्यः, नैवं शक्यमोकारो हि स्यात्, नदीलक्षणस्यामोऽवकाशः कुमार्यामिति, औत्वस्यावकाशः पत्यौ सख्याविति, कृत्यामित्यत्र यदा नदीसंज्ञा तदा परत्वादौत्वं प्राप्नोति ॥

"औत्" ॥ 'यत्र नदीसंज्ञमित्यादि' । नदीसंज्ञके पूर्वेणाम् विहितः, घिसंज्ञेष्वुत्तरेणात्वसंयुक्तमौत्वं वक्ष्यति, तस्मादाभ्यामन्यदेवोदाहरणं, तच्च पूर्वत्र घ्यन्तादच्यन्तादित्युक्तम्, इह त्विकारोकारान्तमित्युक्तं, संज्ञाविधौ च पक्षद्वयं दर्शितं, वर्णमात्रस्य संज्ञा तदन्तस्य वेति, तेन नास्ति विरोधः, ॥

"अच्च घेः" ॥ 'कृतौ धेनाविति' । अथात्रात्वे कृते ऽजाद्यतष्टाविति टाप् कस्मान्न भवति, अस्तु को दोषः, ङेराम्नद्याम्नीभ्यो, याडाप इत्येतौ विधी प्राप्नुतः, औत्वविधानं तु पुंसि चरितार्थमत आह । 'तपरकरणं स्त्रियामापो निवृत्त्यर्थमिति' । इह हि स्थानिनो मात्रिकत्वाद्व्राक्षमानत्वाच्चाणो दीर्घस्य प्रसङ्गो नास्ति यस्य निवृत्त्यर्थं तपरकरणं स्यात्, तस्मात्कास्वान्तरेणापि दीर्घो माभूदित्येवमर्थं तपरकरणं क्रियते, एतच्च संनिपातपरिभाषामनाश्रित्योक्तं, ङिसंनिपातकृतं ह्यात्वन्तद्विघातकस्य टापो निमित्तं न भवति । 'औदच्चघेरिति येषामित्यादि' । इह के चिदौदच्च घेरित्येकयोगमेवाधीयते, तत्र यदि समुच्चये चशब्दः स्यादत्रात्वं

Digitized by Google

तथैवौत्वं स्यात् घेनाविति, घेरौत्वमित्यघौ सख्यौ पत्यावित्यत्रौत्वमपि न स्यात्, अस्य दोषस्य निवृत्तये प्रधानशिष्टमौत्वमन्वाचयशिष्टमत्व-मिति वर्णयन्ति, तत्र यथा कर्त्तुः क्यङ् स लोपश्चेत्यत्र सलोपस्यान्वाचय-शिष्टस्याभावेपि श्येनायत इत्यादौ क्यङ् भवति, तथाचापि सख्यौ पत्या-वित्यत्वाभावेपि औत्वं भवतीत्यर्थः ॥

"आङो नाऽस्त्रियाम्" ॥ आङ इति स्थान्यन्तरस्योपादानाद्घेरिति षष्ठी पञ्चम्या विपरिणम्यत इत्याह । 'घेरुत्तरस्येति' । अथ किमर्थमस्त्रि-यामित्युच्यते, नाङो ना पुंसीत्येवोच्येत, एवं हि मात्रया लाघवं भव-तीष्टं च सिध्यति, एवमुच्यमाने त्रपुणा जतुनेत्यत्र नपुंसके न प्राप्नोति, माभू-न्नाभाव इकोचि विभक्ताविति नुमि कृते सिद्धमिष्टमत आह । 'पुंसीति नोक्तमित्यादि' । 'अमुना ब्राह्मणकुलेनेति' । पुंसीत्युच्यमाने नाभावो न स्यात्, नुमपीग्लक्षणो नास्ति मुत्वस्यासिद्धत्वात्, अस्त्रियामित्युच्यमाने न-पुंसकेपि नाभावो भवति, नाभावे कर्त्तव्ये मुत्वस्यासिद्धत्वं नास्ति न मु नेति प्रतिषेधादिति नपुंसक इत्युच्यमानेपि न सिध्यति, तस्मादस्त्रिया-मित्येव वक्तव्यमिति ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां सप्तमस्या-
ध्यायस्य तृतीयः पादः समाप्तः ॥ ३ ॥

"णौ चङ्युपधाया ह्रस्वः" ॥ णाविति चङ्ङपेक्षया परसप्तमी, चङी-ति णयपेक्षया, उदाहरणेषु कृहलूपूभ्यो णिच्, लुङ्, चङ्, णिलोपः, ह्रस्वत्वं, द्विर्वचनं, तत्र णौ कृतं स्थानिवद्भवतीति कृ इत्यादि धातुरूपं द्विरुच्यते, कृहृ इत्येतयोरुरदत्वं, सन्वल्लघुनीति सन्वद्भावादित्वम्, इतरयोरप्योः पुयण्ज्यपर इतीत्वं, सर्वत्र दीर्घो लघोरिति दीर्घः । 'अत्रेति' । अनन्तरो-दाहृतेषु । 'परत्वादिति' । चङीति द्विर्वचनस्याशिश्रयदित्यादिरवकाशः, ह्रस्वस्य तु कृतद्विर्वचनमवकाशः, अकृते तु द्विर्वचने विप्रतिषेधः । 'तत्र कृते द्विर्वचनमिति' । ततश्च सन्वद्भावे कर्त्तव्ये ह्रस्वत्वं न स्थानिवद्भवति, अभ्यासस्याविष्टादयः पूर्वत्वादिति भावः । चोदयति । 'इह त्विति' । माङ्प्रयोग आट् माभूदिति । 'नित्यत्वादिति' । द्विर्वचनं हि कृतेपि

Digitized by Google

ह्रस्वत्वे प्राप्नोत्यकृतेऽपि, ततश्च तदेव स्यात्तत्र को दोष इत्यत आह । 'तथा सतीति' । परिहरति । 'नैष दोष इति' । 'ओणेरिति' । ओणृ अपनयनइत्यस्य ऋदित्करणएतत्प्रयोजनम् ऋदितो नेति प्रतिषेधो यथा स्यात्, यदि चात्र द्विर्वचनं स्यादृदित्करणमनर्थकं स्याद्, द्विर्वचने कृते पररूपेण व्यवहितत्वादेव ह्रस्वत्वं न भविष्यति, पश्यति त्वाचार्यो द्विर्वचनाद् ह्रस्वत्वं बलीय इति तत ओणिमृदितं करोति । 'णाविति किमिति' । ह्रस्वश्रुत्याच्परिभाषोपस्थानादच उपधाया ह्रस्वेन भाव्यं, न चाण्यन्तानां चङि उपधा ह्रस्वभाविनी संभवति, नहि श्रिद्रुस्रुधेट्श्वीना-मजुपधा, कमिगुप्योस्तु ह्रस्व एवोपधा, ततश्च चङि यः प्रत्ययस्तस्मि-न्नुपधाया ह्रस्वो [1]भवति स च णिरेव, तत्र णावन्तरङ्गत्वाद्वृद्ध्यादिषु कृतेषु उपधाया ह्रस्व इति सिद्धमिष्टमिति प्रश्नः । इतरो यथाश्रुतसंब-न्धसंभवे चङि यः प्रत्यय इत्यध्याहारो न युक्त इति वचनादन्तरङ्गमपि वृद्ध्यादिकं बाधेनेति मत्वाह । 'चङ्युपधाया इति' । 'ह्रस्वः स्यादिति' । ननु च ऊकारस्य ह्रस्वः, तस्मिंश्च कृते बाधितत्वान्माभूद्वृद्धिः, गुणस्तु केन चिदबाधितत्वाद्भविष्यति, ततो ऽवादेशे सिद्धमलीलवदिति, नैत-दस्ति, गुणस्य वृद्ध्या बाधितत्वाद्वृद्धेश्च ह्रस्वेनेति भ्रष्टावसरस्य गुणस्य कुतः पुनः प्रवृत्तिरित्युवङ् प्रसज्येत । अस्तु वा तत्र गुणः, दोषान्तर-माह । 'अदीदपदित्यत्रेति' । यदा तु चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेध-स्तदा वृद्ध्यावादेशयोः कृतयोः पुकि च णिलोपस्य स्थानिवद्भावाभावा-च्चङि यदङ्गं तस्यैवोपधा ह्रस्वभाविनी संभवतीति णाविति न वक्तव्यं, सूत्रकारेण स्थानिवत्त्वनिषेधो न कृत इति णावित्युक्तम् । 'चङीति किमिति' । मितां ह्रस्वविधानादनेन णौ सर्वत्र ह्रस्वो न भविष्यति; प्रयो-गदर्शनाच्चेष्टतो व्यवस्थाश्रयिष्यते इति प्रश्नः । इतरो नान्तरेणवचनमिष्टा-निष्टविभागः सुज्ञान इति मत्वाह । 'कारयति हारयतीति' । किं च मितां ह्रस्ववचनमसिद्धवदत्राभादित्येतदर्थं स्यात् । 'उपधाया इति किमिति' । ह्रस्वश्रुत्या ऽच इत्युपतिष्ठते तत्र विशेषणविशेष्यभावे

[1] विद्यास्यतइति पा० २-३ पुस्तकयोः ।

Digitized by Google

कामचारादङ्गेनाज्विशेष्यते, अङ्गस्य यत्र तत्र[1] स्थितस्याचो ह्रस्वो भवति, तेनोपधायास्तावत्सिद्धं ह्रस्वत्वमिति प्रश्नः। इतरोऽप्यतिप्रसङ्गमुदाहरति। 'अचकाङ्क्षदिति'। ननु णावित्यनेनाचं विशेषयिष्यामः, णौ परतोऽङ्गस्य योऽजिति, तत्र सामर्थ्यादेकवर्णव्यवधानमवश्यं भावित्वादाश्रयिष्यते. इत्याह। 'तदेतदिति'। 'उत्तरार्थमिति'। लोपः पिबतेरीच्चाभ्यासस्य, उपधाया यथा स्यादन्त्यस्य मा भूदित्येवमर्थमवश्यमुपधाग्रहणं कर्त्तव्यं, यद्युत्तरार्थमुपधाग्रहणं तत्रैवं[2] कर्त्तव्यम्, यद्येवं तत्रैव क्रियतामत आह। 'तदिहापीति'। आल्लोपः पिबतेरिति, एवमुच्यमाने ऽन्तरङ्गमपि युक्[3]मनवकाशत्वादाल्लोपो बाधते, उपधाग्रहणे त्वन्तरङ्गत्वाद्युकि कृते आकारस्य उपधाया लोप इति न कश्चिद् दोषः, तस्मादुत्तरार्थमुपधाग्रहणम्, अपर आह। इहार्थमप्युपधाग्रहणम्, अन्यथा णावनन्तरस्य ह्रस्वो विधीयमानोऽन्तरङ्गमपि वृद्ध्यादिकं बाधित्वा लू इ अत् इति स्थिते उकारस्यादेशः प्राप्नोति, नैष दोषः। यदयं नाग्लोपिशास्वृदितामितिप्रतिषेधं शास्ति तज्ज्ञापयति नान्त्यस्यैव ह्रस्वत्वमिति। 'णौ णिच्युपसंख्यानमिति'। णौ परतो यो णिस्तस्मिन्नित्यर्थः। णेर्णिचीति पाठे ण्यन्तात्परे णिचि विहितइत्यर्थः। 'वादितवन्तं प्रयोजितवानिति'। लुङो भूतकालत्वात्प्रयोजितवानिति भूतकालेन विग्रहः। वादितवन्तमित्यत्र तु कथं, यद्यसौ वादितवान् कथं प्रयुक्तिः, कुर्वतो हि प्रयुक्तिः करिष्यतो वा न तु कृतवतः, न ब्रूमः प्रयुक्तिकालापेक्षयात्र भूतकालत्वमिति, किं तर्हि, यथा शब्दप्रयोगकालापेक्षया, प्रयोजितवानित्यत्र भूतकालत्वं तदपेक्षयैव प्रयोज्यव्यापारस्यापीति। 'अत्रीवददिति'। वदेर्ण्यन्तात्णिचि लुङादि, किं पुनः कारणं न सिध्यत्यत आह। 'णेरसाविति'। स्थानिवद्भावे हि सति यश्चङ्परो णिर्न तत्रोपधा ह्रस्वभाविनी यत्रोपधा ह्रस्वभाविनी न स चङ्परो

---

१ तत्रस्थस्येति २-३ पु॰ पाठः।

२ तत्रैवेवं वक्तव्यमिति २-३ पु॰ पाठः।

३ अनवकाशत्वादिति २-३ पुस्तकयोर्नास्ति।

द्वितीयेन णिचा व्यवहितत्वात् । 'तेन[1] चेति' । णिलोपेन । 'अग्लोपित्वादिति' । ननु च णयन्तात्णिचि विहिते णिलोपश्च प्राप्नोति अचोऽञ्णितीति वृद्धिश्च, तत्र लोपः शब्दान्तरे प्राप्तेरनित्यः, वृद्धिस्तु लोपे कृते ऽत्यन्ताप्राप्तिरित्युभयोरनित्ययोः परत्वाद्वृद्धौ कृतायामैकारस्य लोपः, तत्राग्लोपित्वं भवति । एवं तर्हि यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयति वृद्धेर्लोपो बलीयानित्यन्यथा सर्वत्राको वृद्धौ कृतायामैकारौकारयोर्लोपो न त्वकः, नैतदस्ति ज्ञापकं, यत्र वृद्धावपि कृतायामगेव लुप्यते तदर्थमेतत्स्याद्राज्ञानमतिक्रान्तवाचत्यरराजत्, यत्तर्हि प्रत्याहारग्रहणं करोति, अन्यथाल्लोपिनां नेत्येव ब्रूयादेतदपि नास्ति ज्ञापकं, स्वामिनमाख्यदसस्वामत्, गोमुचमाख्यदजुगोमत्, प्रावृषमाख्यदपप्रावत्, यादृशमाख्यदययादत्, इत्येवमाद्यर्थमेतत्स्यात् । अत्राहुः । णिजत्र नास्ति अनभिधानात्, एतच्च भाष्यकारेण ज्ञापकत्वसमर्थनादवसितमिति, यत्र तर्ह्यभिधानमङ्गीकृतं तदर्थमेतस्याद्विन्मतोर्लुक् भास्वन्तमाख्यत् अबभासत्, नैतत्प्रत्याहारग्रहणस्य प्रयोजनमकार एव ह्यत्र मतुपो लुप्यते, यत्र तर्हि विनो लुक् स्त्रग्विणमाख्यदससजत्, अत्रापि नोपधा ह्रस्वभाविनी, तस्मात्प्रत्याहारग्रहणं ज्ञापकमिति स्थितमेतत् । एवमपि हलिकल्योरत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति यदुक्तं तेनैत द्विरुध्यते । तथाहि । असत्यप्यत्वनिपातने वृद्धिं बाधित्वा इकारस्य लोपे सति नैव सन्वद्भावस्य प्रसङ्गस्तस्मादग्लोपित्वादिति नायं स्वपक्षः, परमतेन त्वेतदुक्तं द्रष्टव्यम् ॥

भाष्यस्याप्येवमेवात्र निर्वाहो दृश्यतां बुधैः ।
विपर्यये तूच्यमाने युक्तिः काचिन्न दृश्यते ॥

एवं च पटुमाख्यद्बलिमाख्यत् अपीपटत् अबीबलदिति भवति, यथा त्वत्र भाष्यं तथा अपपटत् अबबलदिति भवतीत्यलमियता । उपसंख्यानं प्रत्याचष्टे । 'ण्याकृतिनिर्देशात्सिद्धमिति' । आकृतिरत्र जातिर्निर्दिश्यते चक्षुःपरा या ण्याकृतिर्जातिस्तत्रेति । ततश्च सत्यपि स्थानि-

१ योऽसौ णौ णिलोपस्तस्य स्थानिवद्भावेनाग्लोपित्वादिति मु० मू० पाठस्तत्र योऽसौ णौ णिलोपस्तेन चाग्लोपित्वादिति पाठः पदमञ्जरीसंमतः ।

चस्वे ण्याकृतेरेकत्वाद्यश्चङ्परो णिः स एव पूर्वः, यश्च पूर्वः स एव चङ्-पर इति सिद्धं ह्रस्वत्वं, यदप्युक्तमग्लोपित्वादिति तदपि न, आकृतिनिर्देशे हि ह्रस्वस्य न ण्याकृतिर्निमित्तत्वेनाश्रीयते, तत्र गोबलीवर्दन्यायेन तस्या ण्याकृतेरन्यस्याको लोपः प्रतिषेधविषयत्वेनाश्रीयत इति सर्वमवदातम् ॥

"नाग्लोपिशास्वृदिताम्" ॥

यत्र णौ परतो ऽग्लोपस्तदिहाग्लोपि गृह्यते ।
दीव्यतिप्रभृतेर्नायं निषेधः शास्त्रदिदृहात् ॥
शक्यः शासिग्रहोऽकर्तुमृदिदेव पठिष्यते ।
आशासु अनुशिष्टावित्येवमेके प्रचक्षते ॥
वदन्त्यन्ये तु सूत्रेऽस्मिन् शासिं निरनुबन्धकम् ।
पठन्तः प्रतिषेधोऽस्य यङ्लुक्यपि भवेदिति ॥

'तत्र स्थानिवद्भावादपि सिद्धमिति'। स्थानिवद्भावे हि सति ह्रस्वभाविन्युपधा न संभवति। 'हलचोरादेशे तु न सिद्ध्यतीति'। यथा सुधातुरकङ् चेति समुदायस्यादेशत्वे ऽवयवस्यानादेशत्वादणो रपरत्वं न भवति सौधातकिरिति तथा समुदाये स्थानिन्यवयवस्यास्थानित्वादजादेशत्वाभावान्नास्ति स्थानिवद्भावः, इह त्वग्लोपिग्रहणसामर्थ्यात्समुदायलोपो ऽप्यग्लोप आश्रीयते ॥

"भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" ॥ भ्राज दीप्तौ, भासृ दीप्तौ, भाष व्यक्तायां वाचि भौवादिकाः, दीपि दीप्तौ, दैवादिकः, सर्वेऽनुदात्तेतः, जीव प्राणधारणे, भौवादिः, मील निमेषणे, पीड अवबाधने, चुरादौ। 'भ्राजभासोरित्यादि'। अवश्यमनयोरनुदात्तानुबन्ध आसङ्क्त्यः, ऋकारानुरोधस्त्वपाणिनीय इत्युच्यते, ऋकारानुबन्धे प्राप्ते विभाषा, वर्णान्तरे त्वप्राप्ते विभाषेति, ऋकारानुरोधे फलविशेषाभावादपाणिनीयत्वम् । 'काण्यादीनामिति' । काणिवाणिराणिहेठिलोपिप्रभृतयः काण्यादयः, आदिशब्दः प्रकारे ॥

"लोपः पिबतेरीच्चाभ्यासस्य" ॥ 'अपीप्यदिति' । ननु च परत्वाण्णित्यत्वादुपधालोपे कृते ऽनच्कत्वाद् द्विर्वचनं न प्राप्नोति अत

Digitized by Google

नादीनां तण्डुलादिनिष्पत्तिद्वारा यागसाधनत्वं प्रत्यक्षगम्यं कथमपूर्वार्थं भवेदत्राह । तस्येत्यादि । तस्य अपूर्वस्य तदपूर्वसंबन्धिद्रव्येषु व्रीह्यादिषु संस्कारः अवहननादिसंस्कारः। सो ऽपि तत्प्रयुक्तः अपूर्वप्रयुक्तः, अवहननस्य तदर्थत्वात्। अपूर्वार्थत्वात्। अवहतव्रीहीणां फलं न वितुषीभावपूर्वकतण्डुलनिष्पत्तिः । तस्य लोकतो ज्ञातुं शक्यत्वात् । किं त्ववहतव्रीहीणामुद्देश्यतावच्छेदकमपूर्वसाधनत्वमवहतव्रीहिभिः अपूर्वसाधनमुत्पादयेदित्यपूर्वसाधनत्वेन रूपेणैवावघातोद्देश्यतावच्छेदकत्वम्। तस्य नैवारं चरुं निर्वपेदित्यत्र नीवारेष्वपि सत्त्वेनावघातादीनामूहः सिद्ध इति भावः ॥ १ ॥

प्रोक्षणस्यापूर्वप्रयुक्तत्वम् । अधि० २ ।

संस्कारे युज्यमानानां तादर्थ्यात्तत्प्रयुक्तं स्यात् ॥ २ ॥

प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति दर्शपूर्णमासयोः श्रुतम् । तत्र प्रोक्षणमवहननप्रयुक्तमपूर्वप्रयुक्तं वेति संशये पूर्वपक्षमाह । संस्कार इति । संस्कारे अवहननाख्यसंस्कारे युज्यमानानां जनकताख्यसंबन्धेन संबध्यमानानां प्रोक्षणादीनां तादर्थ्यादवहननार्थत्वात्तत्प्रयुक्तम् अवहननप्रयुक्तं प्रोक्षणं स्यात् । प्रोक्षिताभ्यां हन्तीति वाक्येन उलूखलमुसलद्वारा हन्त्यर्थत्वं प्रतीयमानं त्यक्तुमशक्यमिति तदर्थत्वे हन्तिप्रयुक्तत्वं सिद्धम् । इत्थं च राजसूये नैर्ऋतं चरुं परिवृत्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणेति कर्मणि नखविदलनस्य विहितत्वेनावहननिवृत्तौ नखेषु प्रोक्षणनिवृत्तिरित्यभिप्रायः ॥ २ ॥

तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसंबन्धस्तस्माद् यज्ञप्रयुक्तं स्यात्संस्कारस्य तदर्थत्वात् ॥ ३ ॥

सिद्धान्तमाह । तेनेति । तेनार्थेन अवहननरूपकार्येण यज्ञस्य अपूर्वस्य संयोगात् । अवहननस्यापि पूर्वोक्तन्यायेन अवहननसंस्कृतव्रीहिभिः तण्डुले अपूर्वजनकत्वं भावयेदिति अपूर्वेणैव संबन्धात् । तस्मादेव हेतोर्धर्मस्य उलूखलमुसलधर्मस्य प्रोक्षणस्य संबन्धः प्रयोगसंबन्धः प्रयोगे अनुष्ठानमिति यावत् । यज्ञप्रयुक्तमपूर्वप्रयुक्तं स्यात् । संस्कारस्य प्रोक्षणस्यापि अपूर्वार्थत्वात् । अयं भावः । प्रोक्षणस्य अवहननार्थत्वे प्रोक्षणं विना ऽपि

Digitized by Google

अवहननस्योत्पत्त्या व्यभिचारेण तदर्थत्वासंभवेन प्रयमाणामपि अवहननं परित्यज्य लक्षणया अवहननसाध्यतण्डुलनिष्ठापूर्वजनकत्वं प्रोक्षणस्यापि भाव्यमित्यगत्या वाच्यम्। तथा प्रोक्षिताभ्यामित्यस्य प्रोक्षितयाऽऽश्रद्रव्यव्यापारेण तण्डुले अपूर्वजनकत्वं सिध्येत् तं व्यापारं कुर्यादिति। इत्थं च प्रोक्षणस्याप्यपूर्वप्रयुक्तत्वाद्राजसूयेष्टावपि तण्डुलवृत्त्यपूर्वजनकत्वस्य प्रोक्षणप्रयोजकस्य सत्त्वाच्चरुषु प्रोक्षणस्येह आवश्यक इति।

स्वरस्य दीक्षणीयापूर्वप्रयुक्तत्वम्। वर्णकान्तरम्।

यद्वा ज्योतिष्टोमे दीक्षणीयासन्निधौ यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयादिति श्रुतम्। अयं धर्मः परमापूर्वप्रयुक्त उत दीक्षणीयापूर्वप्रयुक्त इति संशये पूर्वपक्षमाह। संस्कारइति। संस्कारे दीक्षणीयारूपे यजमानसंस्कारभूते कर्मणि युज्यमानानां विधीयमानानामुक्तस्वरविशेषाणां तादर्थ्यात्पारमापूर्वार्थ्यात् तत्प्रयुक्तत्वं परमापूर्वप्रयुक्तत्वं दीक्षणीयापूर्वद्वारा परमापूर्वसंबन्धाद्वरं साक्षादेव परमापूर्वसंबन्धकल्पनम्। तथा चाश्वमेधे दीक्षणीयाऽभावे ऽपि परमापूर्वरूपप्रयोजकसत्त्वात् तत्रापि स्वरविशेषस्य यावत्या वाचा कामयेतेत्यस्य प्रवृत्तिरिति भावः। इति पूर्वपक्षः। सिद्धान्तमाह। तेनेति। तेन दीक्षणीयापूर्वरूपेणार्थेन यज्ञस्य दीक्षणीयाऽपूर्वस्य संयोगाज्जन्यजनकभावसंबन्धात्। संस्कारस्य यजमानसंस्काररूपस्य दीक्षणीयारूपस्येति फलितम्। यो यज्ञः अपूर्वं तत्प्रयुक्तं स्यात् संस्कारस्य दीक्षणीयायास्तदर्थत्वात्। दीक्षणीयापूर्वार्थत्वात्। अयं भावः। स्वरस्य दीक्षणीयास्वरूपार्थता न संभवति। तेन विना ऽप्युपपत्तेः। अतः दीक्षणीयापदस्य दीक्षणीयापूर्वार्थे लक्षणां स्वीकृत्य स्वरविध्युद्देश्यत्वं, परमापूर्वार्थत्वपक्षे दीक्षणीयापदेन दीक्षणीयापूर्वं लक्षणीयं, पुनश्च तस्य दीक्षणीयापूर्वजन्ये परमापूर्वे लक्षणेति लक्षितलक्षणाकल्पनं, तच्चायुक्तमतः दीक्षणीयापूर्वप्रयुक्तम्। अश्वमेधे तदभावाद् न स्वरोह इति भावः॥ ३॥

फलदेवतासंबद्धधर्माणामप्यपूर्वप्रयुक्तत्वम्। अधि॰ ३।

फलदेवतयोश्च ॥ ४॥

दर्शपूर्णमासयोः, अगन्म सुवः सुवरगन्मेति, अग्नेरहमुज्जितिमनूज्जेषमिति मन्त्रौ पठितौ। तत्र द्वाभ्यां मन्त्राभ्यां दर्शपूर्णमासजन्यस्वर्गस्य

Digitized by Google

तत्संबन्धिदेवतायाश्च प्रकाशो लिङ्गेन भवति। अनयोर्मन्त्रयोः स्वर्गयागीयदेवताप्रकाशप्रयुक्तत्वमुतापूर्वप्रयुक्तत्वमिति संशये पूर्वपक्षमाह। फलेति। फलदेवतयोः मन्त्रोच्चारणप्रयोजकत्वम्। तथा च सौर्ययागे स्वर्गरूपफलस्य अग्निरूपदेवतायाश्चाभावेन प्रयोजकाभावाद् मन्त्रनिवृत्तौ तत्रोहाप्रसक्तिरिति भावः॥ ४॥

न चोदनातो हि ताद्गुण्यम्॥ ५॥

सिद्धान्तमाह। नेति। न मन्त्रोच्चारणस्य फलदेवतास्वरूपप्रकाशनं प्रयोजकं, स्वरूपतः तस्य प्रकाशस्य आनर्थक्यात्। किं तु अपूर्वस्य कर्तव्यतया चोदनातः फलदेवतास्वरूपप्रकाशद्वारा अपूर्वार्थत्वात्ताद्गुण्यमपूर्वाङ्गत्वम्। लिङ्गेन कल्पितमन्त्रविध्योः मन्त्राभ्यां फलदेवताप्रकाशनद्वारकमपूर्वं कुर्यादित्यर्थः संपन्नः। अपूर्वार्थत्वे विकृतावपि प्रयोजकापूर्वसत्त्वान्मन्त्रयोरतिदेशसिद्धौ अगन्म ब्रह्मवर्चसमित्याद्यूहसिद्धिरिति भावः॥ ५॥

धर्माणां देवताप्रयुक्तत्वाभावः। अधि॰ ४।

देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्॥ ६॥

यदुक्तं फलस्य स्वरूपस्य स्मरणं व्यर्थमिति तदङ्गीकुर्मः। देवतायाः स्मरणं व्यर्थमिति वक्तुमशक्यं, सर्वस्य यागस्य तदर्थत्वेन मन्त्रस्य तदर्थत्वे किमु वक्तव्यमिति पूर्वाधिकरणसिद्धान्तमाक्षिपन् पूर्वपक्षमाह। देवता वेति। देवता इन्द्रादिः सर्वान्सांगप्रधानरूपान् कर्माणि प्रयोजयेत्। भोजनस्य देवताभोजनरूपस्य यागस्य तदर्थत्वाद् देवतार्थत्वात्। अतिथिवत्। यथा अतिथये दीयमानमन्नं तदर्थं, तथा कर्तुः प्रियतमं कर्म, संप्रदानं कर्मणः प्रियतमम्। तथा च यत्कर्तुः प्रियतमं तस्य प्रियतमं कर्तुरपि परम्परया प्रियतममेवेति तदर्थत्वं युक्तमिति भावः॥ ६॥

अर्थापत्त्या च॥ ७॥

अर्थापत्त्या च अर्थानां निखिलफलानामापत्तिः स्वामित्वाद्देवतायाः। उक्तार्थे मन्त्रः प्रब्रूते। इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम्। इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्र

Digitized by Google

इति । सर्वाधिपत्यमिन्द्रे दर्शयति । यस्य स्वर्गादेः पतिरिन्द्रः तत्प्रसादं विना तल्लाभासंभवात्कर्मणो देवता प्रधानमिति भावः ॥ ७ ॥

ततश्च तेन संबन्धः ॥ ८ ॥

यतः सर्वफलानां स्वामी ततः देवतायाः सकाशादेव तेन स्वर्गादिना कर्तुः संबन्धः । देवताप्रसादेन तद्दत्तमेव फलं लभतइति भावः ॥ ८ ॥

अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वे देवताश्रुतिः ॥ ९ ॥

सिद्धान्तमाह । अपि वेति । शब्दपूर्वत्वाद् एकपदश्रुतिगम्यत्वात् । यागेन स्वर्गं भावयेदित्येव बोधात् । यज्ञस्य यागस्य कर्म कार्यमपूर्वं प्रधानं तत्प्रति गुणत्वेन देवताश्रुतिः । अपूर्वप्रधानत्वेन तदर्थत्वं देवतानां युक्तमतः देवता अङ्गभूता न प्रधानमिति भावः ॥ ९ ॥

अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीतिप्रधानत्वात् ॥ १० ॥

यच्चोक्तमतिथिवदिति तत्परिहरति । अतिथाविति । अतिथौ भोजनादिदाने तत्प्रधानत्वमतिथिप्रधानत्वं तस्यातिथ्यस्य प्रीतिप्रधानत्वात् । प्रीतिप्रधानत्वस्य शब्दगम्यत्वात् । "अतिथिर्येन संतुष्टः तथा कुर्यात्प्रयत्नत" इतिवचनगम्यत्वात् । कर्मणि देवताप्रीतिविधानस्याभावोऽतो विषमो दृष्टान्तः । इतोऽधिकसाधनानि मत्कृतविहारवाप्यां द्रष्टव्यानि ॥ १० ॥

प्रोक्षणादीनामपूर्वप्रयुक्तत्वम् । अधि० ५ ।

द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥ ११ ॥

दर्शपूर्णमासयोः व्रीहीन्प्रोक्षतीति । तथा त्रीन्परिधीँस्त्रिसः समिधः इति मन्त्रः । शूर्पेण जुहोति, तेन ह्यन्नं क्रियतइति । चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रा ऽमावास्यामिति । एवं रीत्या श्रुतेषु वाक्येषु प्रथमवाक्ये व्रीहीनिति द्वितीयाश्रुत्या व्रीहीणां प्रोक्षणप्रयोजकत्वं त्रीन्परिधीनित्यत्र त्रित्वविशिष्टपरिधयः मन्त्रोच्चारणे । तृतीये शूर्पेणेत्यत्र शूर्पे-

Digitized by Google

मिति विभक्तिविपरिणाम इति शूर्पे होमेन संस्कुर्यादिति क्रत्वर्थचिन्त्यैदाहरणम् । तत्र शूर्पार्थे होमः । चतुर्थे दर्शत्रिकं पूर्णमासत्रिकं समुदायः अभिमर्शनप्रयोजक इत्यभिप्रायेण पूर्वपक्षमात्र । द्रव्येति । द्रव्यं व्रीह्यादिः संख्या परिधिगतत्रित्वादिः होमे शूर्पगतमन्त्रहेतुत्वं चतुर्होत्राऽभिमर्शने पौर्णमासीयागगतं समुदायत्वं प्रयोजकं श्रुतिसंयोगात् । द्वितीयाश्रुतिसंयोगात् । यत्रोक्तानि प्रयोजकानि न सन्ति तत्र न तत्प्रयोज्यानां प्रवृत्तिरिति भावः ॥ ११ ॥

अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ॥ १२ ॥

उक्तार्थे हेत्वन्तरमाह । अर्थेति । अर्थेन कारिते प्रयोजिते उक्तप्रोक्षणादिरूपे धर्मे सति द्रव्येण मैत्रावरुणग्रहणसंयुक्तसोमरसेन पयःसंयोगरूपव्यवस्था न स्यात् । मैत्रावरुणं पयसा श्रीणातीति वाक्ये पयसा श्रयणं प्रयोजकमपि तुल्ययुक्त्या अपूर्वसाधनत्वप्रयुक्तमपूर्वसाधनत्वं दशसु ग्रहेषु चमसेषु च तुल्यम् । तथा च सर्वत्र पयःसंयोगापत्तिरिति द्रव्यादीनामेव प्रयोजकत्वमिति भावः ॥ १२ ॥

अर्थो वा स्यात् प्रयोजनमितरेषामचोदनात्तस्य गुणभूतत्वात् ॥ १३ ॥

सिद्धान्तमाह । अर्थो वेति । अर्थः अपूर्वं प्रयोजनम् उक्तधर्मप्रयोजकं स्यात् । इतरेषां द्रव्यादीनां कर्तव्यत्वेनाचोदनात् । यस्य कर्तव्यतया विधानं तस्य धर्माकाङ्क्षा नान्यस्य । अतः तस्य द्रव्यादेरपूर्वं प्रति गुणभूतत्वात् । अङ्गभूतत्वात् । इतरं प्रति गुणभूतस्य न प्रयोजकत्वसंभव इति भावः ॥ १३ ॥

अपूर्वत्वाद् व्यवस्था स्यात् ॥ १४ ॥

यदुक्तमपूर्वार्थत्वपक्षे पयसा मैत्रावरुणं श्रीणातीति धर्मव्यवस्था न स्यादिति तदुत्तरमाह । अपूर्वत्वादिति । अपूर्वत्वाद् मैत्रावरुणसंबन्ध्यपूर्वत्वात् तदीयापूर्वत्वस्योद्देश्यतावच्छेदकत्वाद् व्यवस्था स्यात् । न हि मैत्रावरुणापूर्वत्वं ग्रहान्तरापूर्वेऽस्ति यतोऽव्यवस्था स्यादिति भावः ॥ १४ ॥

Digitized by Google

तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् ॥ १५ ॥

अपूर्वप्रयुक्तत्वे यो ऽयमतिप्रसङ्गो दर्शितः स द्रव्यप्रयुक्तत्वे धर्मस्य प्रोक्षणादेः सर्व एवेत्याह । तदिति । तत्प्रयुक्तत्वे उक्तधर्माणां द्रव्यप्रयुक्तत्वे धर्मस्य प्रोक्षणादेः सर्वविषयत्वमापणस्थव्रीह्यादिसर्वव्रीहीणां प्रोक्षणविधिविषयत्वं स्यात् । आपणव्रीहीणामपि प्रोक्षणापत्तिरिति भावः ॥ १५ ॥

तद्युक्तस्येति चेत् ॥ १६ ॥

पूर्वपक्षी स्वदोषं परिहरति । तद्युक्तस्येति । तद्युक्तस्य प्रकरणयुक्तस्योद्देश्यत्वमापणस्थाश्च न यागोद्देशेन परिगृहीता इत्यदोष इति भावः ॥ १६ ॥

नाश्रुतित्वात् ॥ १७ ॥

सिद्धान्ती पुनर्दोषं दृढीकरोति । नेति । न प्रकृतव्रीहीणामेवोद्देश्यत्वमश्रुतत्वात् । तथा चोद्देश्यतावच्छेदकसंकोचे मानाभाव इति भावः ॥ १७ ॥

अधिकारादिति चेत् ॥ १८ ॥

पुनः परिहरति । अधिकारादिति । अधिकाराद् यागाधिकाराद् अविशेषश्रवणे ऽपि यागाधिकाराद् यागीयव्रीहीणामेव प्रोक्षणमिति भावः ॥ १८ ॥

तुल्येषु नाधिकारः स्यादचोदितश्च संबन्धः पृथक् सतां यज्ञार्थेनाभिसंबन्धस्तस्माद् यज्ञप्रयोजनम् ॥ १९ ॥

दूषयति । तुल्येष्विति । ये भोगार्थाः तएव यागार्था अपि भवितुमर्हन्तीति तुल्येषु अविशेषेषु नाधिकारः स्यात् । यतो यज्ञार्थत्वसंबन्धः अचोदितः शास्त्रेणानिर्दिष्टः पृथक् सतामुपभोगसाधनव्रीहिभ्यः पृथग् जातिं, लोकतो ऽपि नोपलभामहे इति योज्यम् । अतः सर्वेषां व्रीहीणां यज्ञेनाभिसंबन्धः । अतो यज्ञस्य यज्ञान्तःपातिप्रोक्षणस्य प्रयोजनम् उद्देश्यं सर्वे व्रीहयः स्युः । मन्मते पुरोडाशनिष्पादनद्वारा ऽपूर्वजनकत्वं येषु तेष्वेव प्रोक्षणं नान्यत्रेति भावः ॥ १९ ॥

अग्निष्टोमे उपांशुत्वस्य प्राचीनपदार्थप्रयुक्तत्वम् । अधि॰ ८ ।

देशबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशा-त्तस्य च तत्र भावात् ॥ २० ॥

त्सरा वा एष यज्ञस्य तस्माद्यत्किं चित्प्राचीनमग्नीषोमीयात्तेनो-पांशु प्रचरन्तीति । तत्र प्रागग्नीषोमीयाद्दीक्षणीयाद्यङ्गापूर्वे तत्प्रयुक्तमुपां-शुत्वमुत परमापूर्वप्रयुक्तमिति संशये सिद्धान्तेनोपक्रमते । देशेति । अग्नी षोमीयात्प्राग् रूपो यो देशः तेन निबद्धमुपांशुत्वं तत्तेषां देशलक्षित-दीक्षणीयादीनां स्यात् । तथा चाग्नीषोमीयात्प्राग् यानि प्रधानापूर्वस्या-रादुपकारकाणि यच्च प्रधानद्रव्यसंस्कारकं तत्प्रयुक्तमिति फलितम् । श्रुति-निर्देशाद् उक्तवाक्येन निर्देशात् । ननु देशेन कर्म कथं लक्ष्यं संबन्धाभावा-दत आह । तस्य कर्मणः तत्र देशे सत्त्वात् । आधाराधेयभावः शक्यसंबन्ध इति भावः ॥ २० ॥

यज्ञस्य वा तत्संयोगात् ॥ २१ ॥

पूर्वपक्षमाह । यज्ञस्येति । यज्ञस्य प्रधानापूर्वस्य प्रयोजकत्वं स्यात् । तस्य च यज्ञशब्दस्य संयोगाद् वाक्ये सत्त्वात् । वाक्ये श्रूयमाणयज्ञशब्दस्य त्सरेत्यनेन संबन्धे अर्थवादघटकत्वं, यज्ञस्य प्राचीनमिति योजने विधि-घटकत्वं, विधिवाक्यं प्रधानम् । अर्थवादः तच्छेषः । प्रधानसम्बन्धेच्छा सर्वेषामेवास्तीति विधिवाक्यघटकत्वमेव युक्तमिति कुण्डपायिनामयने प्रागग्नीषोमीयात् मासाग्निहोत्रादीनां सत्त्वात्तत्रापि उपांशुधर्मः ऊह्यः । तत्प्रयोजकपरमापूर्वसत्त्वादिति भावः ॥ २१ ॥

अनुवादश्च तदर्थवत् ॥ २२ ॥

यज्ञस्येति षष्ठ्यन्तस्य अर्थवादकुक्षिप्रवेशमङ्गीकृत्यापि परमापूर्वप्र-युक्तत्वं साधयति । अन्विति । अनुवादश्च अर्थवादश्चेदपि यज्ञस्य त्सरे-त्यन्वये ऽपीत्यर्थः । तदर्थवाक्यमर्थवत् परमापूर्वप्रयोजकत्वज्ञापकम् । तथा हि, त्सरा वा एष यज्ञस्येत्यत्र त्सराशब्दः छद्मगत्यर्थकः । पक्षिणः ग्रहणार्थे-मशब्दं पादं क्षिपति शकुनिग्राही वा त्सरा गतिः । तत्र मन्दं व्याधस्य

Digitized by Google

पादक्षेपः शकुनिग्रहार्थः सा शकुनेः त्वरा । अत्र शकुनिस्थानापन्नो यज्ञः इदमुपांशुत्वं यज्ञस्य त्वरा । अतो यज्ञार्थं इति भावः ॥ २२ ॥

वाङ्नियमस्यावान्तरापूर्वप्रयुक्तत्वम् । अधि० ७ ।

प्रणीतादि तथेति चेत् ॥ २३ ॥

एवं स्थिते पूर्वपक्षे मध्ये विचारान्तरम् । यज्ञं तनिष्यन्तावध्वर्युयजमानौ वाचं यच्छतः तां वाचं हविष्कृता विसृजेयातामिति । अत्र वाग्नियमः परमापूर्वप्रयुक्तो ऽवान्तरापूर्वप्रयुक्तो वेति संशये पूर्वपक्षमाह । प्रणीतादीति । प्रणीतादि प्रणीताप्रणयनादिसंबन्धिवाङ्नियमो ऽपि तथा परमापूर्वप्रयुक्तः यज्ञशब्दश्रवणात् ॥ २३ ॥

न यज्ञस्याश्रुतित्वात् ॥ २४ ॥

सिद्धान्तमाह । नेति । न परमापूर्वप्रयुक्तः यज्ञस्याश्रुतित्वादविवक्षितत्वात् । वाङ्नियमस्योद्देश्यौ अध्वर्युयजमानौ तत्र विशेषणं यज्ञं तनिष्यन्ताविति उद्देश्यविशेषणमविवक्षितमिति भावः । वाग्यमस्तुत्यर्थं पाठः ॥ २४ ॥

तद्देशानां वा संघातस्याचोदितत्वात् ॥ २५ ॥

पूर्वस्थितस्य पूर्वपक्षस्योत्तरमाह । तदिति । सः अग्नीषोमीयप्रायूपः देशो येषां तेषां पूर्वोक्तानामुपांशुत्वप्रयुक्तत्वं न परमापूर्वप्राक्सङ्घातः तस्य सङ्घातस्याचोदितत्वात् । यदि यज्ञस्य प्राचीनः सङ्घातो यदर्थः, तदा बहुपदव्यवहितेन साकमन्वयः अग्नीषोमीयादिति पञ्चम्यन्तस्यानन्वयप्रसङ्गश्च । तस्मात्पूर्वपक्षो न युक्त इति भावः ॥ २५ ॥

इष्टकासु सकृद् विकर्षणाद्यनुष्ठानम् । अधि० ८ ।

अग्निधर्मः प्रतीष्टकं संघातात्पौर्णमासीवत् ॥ २६ ॥

अग्नौ श्रूयते, मण्डूकेनाग्निं विकर्षतीति । अत्र कर्षणं प्रतीष्टकमुत समुदायस्य सकृदिति संशये पूर्वपक्षमाह । अग्निधर्म इति । अग्निधर्मः कर्षणादिरूपं प्रतीष्टकं स्यात् । अग्निपदवाच्यस्य इष्टकासमुदायरूपत्वात् । पौर्णमासीवत् । यथा आग्नेयोपांश्वग्नीषोमीयसङ्घाते पौर्णमासशब्दः । सङ्घातस्तु न अवयवादतिरिक्त इति इष्टकानामेव प्राधान्यात्प्रतिप्रधानमङ्गावृत्तिन्यायेन कर्षणावृत्तिरिति भावः ॥ २६ ॥

Digitized by Google

अग्नेर्वा स्याद् द्रव्यैकत्वादितरासां तदर्थत्वात् ॥ २७ ॥

सिद्धान्तमाह । अग्नेरिति । अग्नेः इष्टकाभ्यो ऽतिरिक्तस्य इष्टकाभ्यो जातस्य अग्निपदवाच्यस्य कर्षणं संस्कारः स्यात् । द्रव्यस्य अग्निपदवाच्यस्यैकत्वात्सकृदेव कर्षणम् । नन्विष्टकाभ्यो ऽग्नेरतिरिक्तत्वे किं मानमित्यत्राह । इतरासामिष्टकानामन्यर्थत्वात् । यदिष्टकाभिरग्निं चिनुतइत्यत्र द्वितीयातृतीयाभ्यां साध्यसाधनभावप्रतीतेः तयोर्भेद आवश्यक इति भावः ॥ २७ ॥

चोदनासमुदायात्तु पौर्णमास्यां तथात्वं स्यात् ॥ २८ ॥

पौर्णमासीवदिति दर्शितदृष्टान्तं निराकरोति । चोदनेति । पौर्णमास्यां तथात्वं समुदायवाचकत्वं युक्तम् । चोदनानां विधीनां समुदायात् । यथा ऽवयवावयविनो साध्यसाधकभावापन्नौ उक्तश्रुतिभ्यामवगतौ तथा ऽवयवावयविनोः तथात्वप्रतिपादकं मानमस्ति । अतो वैषम्यमिति भावः ॥ २८ ॥

उत्तमान्येवाहानि पत्नीसंयाजान्तत्वम् । अधि० ६ ।

पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥ २९ ॥

द्वादशाहे श्रूयते, पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते । अत्र यावदह्नां पत्नीसंयाजान्तत्वमुत केषां चिदिति संशये पूर्वपक्षमाह । पत्नीति । स्पष्टो ऽर्थः ॥ २९ ॥

लिङ्गाद्वा प्रागुत्तमात् ॥ ३० ॥

सिद्धान्तमाह । लिङ्गादिति । प्रागुत्तमाच्चरमदिनात्प्राग् अह्नां तथात्वं लिङ्गाद् अर्थवादस्थलिङ्गात् । पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते न बर्हिरनुप्रहरत्यसंस्थितो हि यज्ञ इति । असंस्थितः असमाप्तः । एतेन यस्मिन्नहन्यसंस्थितो यज्ञः तस्मिन्नहनि पत्नीसंयाजान्तत्वमिति सिद्धम् । इत्थं च चरमे ऽहनि यज्ञस्य संस्थितत्वात्तत्र न तथात्वमिति भावः ॥ ३० ॥

अनुवादो वा दीक्षा यथा नक्तं संस्थापनस्य ॥ ३१ ॥

उक्तलिङ्गमन्यथोपपादयन् सिद्धान्तमाक्षिपति । अनुवाद इति । अनुवादः असंस्थित इत्यर्थवादः यथा दीक्षा दीक्षोन्मोचनवचनं नक्तसंस्थाप-

Digitized by Google

नविध्यर्थवादः एवमेतद् द्रष्टव्यम् । वरुणपाशाभ्यां वा एष बध्यते यो दीक्षितः अहोरात्रे वै वरुणपाशौ यद्दिवा संस्थापयेदमुन्मुक्तो वरुणपाशाभ्यां स्यान्नक्तं संस्थाप्यो वरुणपाशाभ्यामेवोन्मुच्यतआत्मनो हिंसाया इति । अनुन्मुक्तः स वरुणपाशाभ्यां न तावद्दीक्षया मुच्यते । अवभृथो हि दीक्षामोचनार्थः । अथ वोच्यते । वरुणपाशाभ्यामेव निर्मुच्यतइति बहवो नियमाः तदानीं विसृज्यन्ते यानालोच्यैष वादो भवति । एवमिहापि चिरेण संस्थामालोच्यासंस्थितिवचनं भवतीति । ननु यद्यप्ययमर्थवादः तथा ऽपि चरमे ऽहनि अवभृथाद्यनुष्ठाने तस्याह्नः संस्थितत्वादसंस्थित इति स्तुतिः निरालम्बना स्याद् इति चेव । द्वादशाहेन प्रजाकामं याजयेदिति वाक्येन द्वादशयागानां सह अनुष्ठानं सिद्धम् । तत्र सहानुष्ठानं नाम यत्र पूर्वोत्तराङ्गानां तन्त्रेणानुष्ठानं प्रधानमात्रस्य पृथगनुष्ठानं, तत्सहानुष्ठानं द्वादशाहे दीक्षणीयाद्यग्नीषोमीयान्तानां पूर्वाङ्गानामवभृथादीनामुत्तराङ्गानां तन्त्रेणानुष्ठानमिति मध्यतनानामभ्यासः । एवं सति इह अहर्भेदेन आग्नेयाद्यङ्गवद्युतिवङ्गेणानुष्ठानासंभवात् कानि चिदुत्तराङ्गानि सहानुष्ठानसिद्ध्यर्थमेकादशस्वहःसु स्थापनीयान्येवेति अनियमेन कस्य चित् स्थापनप्राप्तौ पत्नीसंयाजान्तान्यहानि इति पत्नीसंयाजान्ते पूर्वस्याह्नो विरामनियमः । चरमे ऽहनि तु चिद्विरामस्यानपेक्षितत्वादखिलानामनुष्ठानप्राप्तौ अपूर्वमेव पत्नीसंयाजान्तत्वं विधीयते । तेन पत्नीसंयाजोत्तरवर्तिनां हारियोजनग्रहान्तानां निवृत्तिः अवभृथादीनामुदवसानीयान्तानामनुष्ठानन्तन्त्रेण सहानुष्ठानं च सिध्यतीति । इत्थं च चरमे ऽहन्यपि केषां चित्पूर्वं दर्शितानां हारियोजनान्तानां लुप्तत्वात्तत्राप्यसंस्थितत्वोपचारेण स्तुतिसंभवात् पत्नीसंयाजान्तान्यहानीति सामान्यश्रुतस्य सङ्कोचो ऽपि न कार्य इति पूर्वपक्षिणां भावः ॥ ३१ ॥

स्याद्वा ऽनारभ्यविधानादन्त्ये लिङ्गविरोधात् ॥ ३२ ॥

उत्तमे ऽह्नि हारियोजनान्तनिवृत्तिपक्षं दूषयति । स्यादिति । प्रागुत्तमात्पत्नीसंयाजान्तता स्यात् । अन्त्ये लिङ्गस्य असंस्थितत्वस्य विरोधात् । ननु अन्त्ये लिङ्गविरोधः परिहृतो ऽत्राह । अनारभ्येति । अनारभ्य

Digitized by Google

उत्तमाहमनारभ्य अनुद्दिश्य विधानात्तत्रापूर्वविध्यसंभवः । अयं भावः । उत्तमेऽह्नि अपूर्वविधाने एकेनैव विधिना क्वचिन्नियमः क्वचिदपूर्वमिति विधिवैरूप्यं, किंचिदङ्गनिवृत्तेः फलमपूर्वं कल्पनीयं शेषनिवृत्त्यर्थं लक्षणा चेत्यनेकदोषग्रस्तत्वेन तस्य त्याज्यतया चरमात्प्रागिति सङ्कोच एव न्याय्य इति ॥ ३२ ॥

त्रिः प्रथमामन्वाहेत्यादिषु स्थानधर्मता । अधि० १० ।

अभ्यासः सामिधेनीनां प्राथम्यात् स्थानधर्मः स्यात् ॥ ३३ ॥

दर्शपूर्णमासयोः श्रुतं, सामिधेनीषु त्रिः प्रथमामन्वाह त्रिरुत्तमामिति । अयमभ्यासः ऋग्धर्म उत स्थानधर्म इति संशये प्रथमं वर्तमानायाः प्र वो वाजा इत्यृचो ऽभ्यासः स्त्रीलिङ्गेन ऋच एवोपस्थितेः इतिपूर्वपक्षे सिद्धान्तमाह । अभ्यास इति । सामिधेनीनामभ्यासः स्थानधर्मः प्राथम्यात् । स्थानस्य प्रथममुपस्थितत्वात् स्थानस्याभ्यासासंभवेन लक्षणायां स्थानसंबन्धित्वेन रूपेण लक्षणा न तु प्र वो वाजा इतिऋक्त्वेन । जहत्स्वार्थलक्षणायां शक्यार्थस्यात्यन्तं बाधापत्तेः । स्त्रीलिङ्गनिर्देशस्तु मत्पक्षे ऽप्यनुपपन्नो न । संबन्धित्वेन ऋच एव ग्रहणात् । तस्माद्या या प्रथमसंबन्धिनी ऋक् सा अभ्यसितव्येति भावः ॥ ३३ ॥

यावज्जीवदर्शपूर्णमासयोः आरम्भणीयेष्टेः सकृदनुष्ठानम् । अधि० ११ ।

इष्ट्यावृत्तौ प्रयाजवदावर्तेतारम्भणीया ॥ ३४ ॥

आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारप्स्यमान इति इष्टिः प्रतिप्रयोगमावर्तते उत सकृदिति संदेहे पूर्वपक्षमाह । इष्ट्यावृत्ताविति । इष्ट्यावृत्तौ दर्शपूर्णमासावृत्तौ आरम्भणीया आवर्तते प्रयाजवदङ्गत्वात् ॥ ३४ ॥

सकृद्वा ऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥

सिद्धान्तमाह । सकृदिति । यावज्जीवप्रयोगाद् यावज्जीवं यक्ष्ये इति संकल्पात् प्राक् सकृदेव आरभ्यमाण इति वाक्ये आरम्भसंयोगाद् आरम्भश्रवणात् । न प्रयाजादिवत्साक्षादङ्गं किं तु आरम्भद्वारा । स चारम्भः यावज्जीवसंकल्परूपः एकः न प्रतिप्रयोगमतः सकृदेवेति ॥ ३५ ॥

Digitized by Google

निर्वापमन्त्रे सवित्रादिशब्दानामनूहः । अधि० १२ ।

अर्थाभिधानसंयोगाद् मन्त्रेषु शेषभावः स्यात्तत्रा-चोदितमप्राप्तं चोदिताभिधानात् ॥ ३६ ॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति दर्शपूर्णमासे निर्वापमन्त्रः समाम्नातः । अत्र सवित्रादिदेवतावाचकाः ये शब्दाः ते कर्मसमवेतदेवताप्रकाशनार्था एते शब्दाः उत असमवेतस्वार्थद्वारं निर्वापमेव प्रशंसितं प्रकाशयन्तीति संशये स्यादित्यन्तेनार्धसूत्रेण पूर्वपक्षमाह । अर्थेति । मन्त्रेषु शेषभावः अङ्गत्वमर्थाभिधानमर्थप्रकाशनं तत्संबन्धात् । कर्मसमवेतार्थस्मारकतयैव मन्त्राणामङ्गत्वं यतोऽतः सवितुर्जुष्टं निर्वपामीत्येको मन्त्रः । एवमश्विनोर्जुष्टं निर्वपामीत्यादिनानावाक्यानि । मान्त्रवर्णिकलिङ्गेन सवित्रादिदेवताकत्वमपि कल्प्यते । तथा चाग्न्यादिभिः सह विकल्प एतेषां सवित्रादीनाम् । अस्य मन्त्रस्य सौर्ययागे प्राप्तौ सवितृपदस्थाने सूर्यपदप्रक्षेपरूप ऊहः कार्य इति भावः । शेषसूत्रेण सिद्धान्तमाह । तत्रेति । मन्त्रस्य चोदितार्थाभिधानाद् विधिविहितो यो ऽर्थः तत्प्रकाशनमिति नियमात् । तत्र दर्शपूर्णमासयोः सवितृदेवताकादियागः अचोदितः अत एवाप्राप्तः स इति । अयं भावः । प्रकृतौ मन्त्रलिङ्गेन कल्पितदेवताभिः सहाग्न्यादीनां विकल्प इति न शक्यते वक्तुम्, एकवाक्यताभङ्गात् । उत्पत्तिशिष्टाग्न्यादेः प्रबलत्वेन पक्षे ऽपि तेषां बाधासंभवादगत्या प्राशित्रभक्षणादौ अग्नेष्ट्वा ऽऽस्येन प्राश्नामीत्यादिवत् स्तावकत्वेनैव गतिश्चिन्त्या । विकृतावपि तैरेव शब्दैर्निर्वापस्तुतिसंभवात्तेषां नोह इति * ॥ ३६ ॥

अग्नये जुष्टमित्यग्निपदस्योहो विकृतौ । अधि० १३ ।

गुणशब्दस्तथेति चेत् ॥ ३७ ॥

अस्मिन्नेव निर्वापमन्त्रे अग्निपदं समवेतार्थप्रकाशकमुत सवित्रादिवत् स्तावकमितिसंशये पूर्वपक्षमाह । गुणेति । गुणशब्दः जुष्टशब्दार्थे

---

* ततश्चावचनं तेषामितरार्थं प्रयुज्यते, इति सूत्रमत्र न व्याख्यातं तद्व्याख्यानं भाष्ये द्रष्टव्यम् ।

Digitized by Google

गुणभूताग्न्यादिवाचकः शब्दः तथा सविचारादिशब्दवत् स्तावकः । जुष-धातोः कर्मणि भूतार्थे निष्ठा विहिता । तथा च जुषधातोर्भक्षणमर्थः । अग्नये इति तादर्थ्ये चतुर्थी । अग्निकर्तृकभूतकालीनभक्षणकर्मीभूतहविष्कर्मकनिर्वापं भावयामीति वाक्यार्थो वाच्यः । स च बाधितः । निर्वापकाले अग्निकर्तृकभक्षणस्य भूतत्वाभावादतः स्तुत्यर्थ इति विकृतौ तस्यापि नोह इति भावः ॥ ३७ ॥

न समवायात् ॥ ३८ ॥

सिद्धान्तमाह । नेति । न स्तावकः समवायाद् अर्थस्याबाधितत्वात् । अग्नये जुष्टमित्यस्य न पूर्वोक्तार्थः किं तु यथा अग्निना जुष्टं स्यात्तथा निर्वापेण करोमीत्यर्थः । अग्निसेवितत्वस्य निर्वापसाध्यत्वाच्च पूर्वोक्तदोष इति भावः ।

तण्डुलावापमन्त्रे धान्यशब्दस्योहः । वर्णकान्तरम् ।

यद्वा दर्शपूर्णमासयोः धान्यमसि धिनुहि देवानिति ब्रुवन् तण्डुलानावपतीति मन्त्रः । तत्र धान्यशब्दः समवेतार्थकः उतासमवेतार्थक इति संशये पूर्वपक्षमाह । गुणेति । गुणशब्दः मन्त्रघटकधान्यशब्दः तथा ऽसमवेतार्थकः सविचारादिशब्दवत् स्तावकः । धान्यशब्दस्य सतुषेषु व्रीहिष्वेव रूढत्वेन तण्डुलार्थत्वादसमवेतार्थत्वम् । इत्थं च शाक्यानामयने षट्त्रिंशद्वत्सरसाध्ये, संस्थिते ऽहनि गृहपतिर्मृगयां याति स तत्र यान्मृगान्हन्ति तेषां मांसानि तरसाः सवनीयाः पुरोडाशा भवन्तीत्यत्र धान्यमसीत्यत्र मांसमसीति नोहः, स्तावकत्वादिति भावः । नेति । ऊहेनैव तत्र मन्त्रपाठः समवायात् । अबाधितार्थत्वात् । यद्यपि धान्यशब्दः शक्त्या व्रीहीन् ब्रूते तथा ऽपि शक्तितुल्यया निरूढलक्षणया तण्डुलानपि बोधयति । काश्यां व्रीहीनेव भक्षयन्तीति व्यवहारात् । निरूढलक्षणया प्रतिपाद्यार्थस्थले ऽप्यूह इति भावः । इदं तु मांसस्य पेषणार्थमधिवापो ऽस्तीति कृत्वाचिन्तया विचारात्मकमधिकरणं ज्ञेयम् ॥ ३८ ॥

इडोपह्वानमन्त्रे यजमानशब्दस्यानूहः । अधि० १४ ।

चोदिते तु परार्थत्वाद्विधिवदविकारः स्यात् ॥ ३९ ॥

Digitized by Google

दर्शपूर्णमासयोरिडाह्वानमन्त्रे, ये यज्ञपतिं वर्द्धानिति श्रुतम्। अस्य सत्रे बहुयजमानके अतिदेशेन प्राप्तौ यज्ञपतिशब्दोत्तरं बहुवचनस्योहो न वेति संशये यजमानबहुत्वादूह इति पूर्वपक्षे सिद्धान्तमाह। चोदितेति। यज्ञपतिशब्दे चोदिते ऽपि पठिते ऽपि परार्थत्वादिडास्तुत्यर्थत्वादविकारः अनूहः स्यात्। विधिवत्। यथा शुक्रं यजमानो ऽन्वारभतइत्यत्र एकान्वारम्भणेन चारितार्थ्यं तथा एकयजमानस्तुतिद्वारा ऽपि इडास्तुतिसंभवाद् इडास्तुत्यर्थं च ऋत्विजः यज्ञं वर्द्धान्यज्ञं वर्द्धयन्ति ये च यज्ञपतिं वर्द्धान् ते अध्वर्यवः अध्वर्युप्रभृत्यृत्विजः हे इडे त्वया उपहूताः आहूताः अतः तव सामर्थ्यं विलक्षणमिति यज्ञपतिशब्दः इडास्तावकः परार्थो ऽतः नोह इति निर्गलिततात्पर्यं बोध्यम् ॥ ३९ ॥

सूक्तवाके यजमानशब्दस्योहः। अधि॰ १५।

विकारस्तत्प्रधाने स्यात् ॥ ४० ॥

दर्शपूर्णमासयोः सूक्तवाके, अयं यजमान आयुराशास्ते इत्यत्र अयं यजमानः आयूरूपफलं प्रति प्रधानत्वेनावगतः अतः सत्रे इमे यजमाना इत्याद्यूहो ऽस्तीति पूर्वापवादरूपं सिद्धान्तमाह। विकार इति। तत्प्रधाने यजमानप्रधाने उक्तमन्त्रे विकार ऊहः स्यात् ॥ ४० ॥

सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दस्यानूहः। अधि॰ १६।

असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४१ ॥

ज्योतिष्टोमे सुब्रह्मण्याह्वाने इन्द्रागच्छ हरिव आगच्छ मेधातिथेः इत्यादिमन्त्र आम्नातः। अग्निष्टुन्नामके अयमतिदिष्टः। अत्राग्नेयी सुब्रह्मण्येति विधानेन इन्द्रपदस्थाने अग्नआगच्छेति प्राप्तम्। एवं हरिवत्पदमेधातिथ्यादिपदानामूहो ऽस्ति न वेति संशये सिद्धान्तमाह। असंयोगादिति। हरिवदादिशब्दानां हरिवदादिष्वर्थेष्वसंयोगादसंबन्धात्तेषामसमवेतार्थत्वादिति यावत्। तद्विशिष्टं हरिवदादिशब्दविशिष्टमेव विकृतौ प्रतीयेत, न रोहिताश्ववायुसखेत्याद्यूहः। हरिवदादिधर्माणामिन्द्रे सत्त्वे प्रमाणाभावेन अविद्यमानैरेव गुणैर्यथेन्द्रस्तुतिः तथा ऽग्नेरपि तैरेव स्तुतिसंभवाच्च तेषां पदानामूह इति भावः ॥ ४१ ॥

Digitized by Google

कर्माभावादेवमिति चेत् ॥ ४२ ॥

सिद्धान्तमाक्षिपति । कर्मेति । कर्मणः हरिवदादिशब्दप्रयोगनिमित्तकर्मणः इन्द्रे अभावे सति हरिवदादिशब्दः असमवेतार्थकः स्यात्तदेव न । अहोरात्रे वा इन्द्रस्य हरी ताभ्यामेष सर्वं हरतीति अर्थवादप्रामाण्येन हरिवच्छब्दप्रवृत्तिनिमित्तक्रियाया इन्द्रे सिद्धौ पाचकादिपदस्य पाककर्तरीवेन्द्रे इमे समवेतार्थका अनावसमवेतार्थका इत्यूह आवश्यकः । एवमेव मेधातिथ्यादीनामप्यर्थवादाः सन्ति । अतः ते सर्वे ऽप्यूह्या इति भावः ॥ ४२ ॥

न परार्थत्वात् ॥ ४३ ॥

कहं निराकरोति । नेति । नोहः उक्तार्थवादस्य केवलेन्द्रस्तुत्यर्थत्वात् । यदन्तरिते चिन्वीतेतिवदसमवेतार्थकाः सन्त एव स्तावकाः अर्थवादा मन्त्रे हरिवदादयश्च । तथा विकृतावपि तथा स्तुतिसंभवान्नोह इति भावः ।

तस्यै घृतमिति मन्त्रे ऽनूहः । वर्णकान्तरम् ।

यद्वा ज्योतिष्टोमे सोमक्रयणे एकहायन्या गवा क्रीणातीति विधाय तत्सन्निधौ इयं गौस्तया ते क्रीणामि तस्यै पयः तस्यै दधि तस्यै घृतमित्यादि । साद्यस्क्रे त्रिवत्सः साण्डः सोमक्रयण इति । त्रिवत्सः त्रिवत्सर इत्यर्थः । अत्र पूर्वमन्त्रो ऽतिदेशेन प्राप्तः । तत्रेयं गौरिति स्थाने अयं वृषभ इत्येतावन्मात्रमूह्यम् उत तस्यै पय इत्यादिस्थाने तस्मै रेत इत्याद्यप्यूह्यमिति संशये सिद्धान्तेनोपक्रमते । असंयोगादिति । घृतादिभिरर्थैः एकहायन्या अप्यसंबन्धात् । न ह्येकहायन्यां गवि तत्काले पयोदध्यादिकमस्ति अतः केवलस्तावकत्वमेव । त्रिवत्से साण्डे तदर्थेषु पयोदध्यादिभिरर्थैरसंयोगे ऽपि स्तुतिसंभवात्तद्विशिष्टं गोवाचकपदभिन्नानि दधिपयःप्रभृतीनि पदानि तद्विशिष्टं वाक्यं प्रतीयेत । गोवाचकपदानां तु लिङ्गविरोधात् तस्यै इत्यत्र तस्मादित्यूह इति भावः । सिद्धान्तमाक्षिपति । कर्मेति । एकहायन्यां कालत्रये ऽपि कर्माभावेन गोकार्यपयोदध्याद्यभावेन असमवेतार्थकः पयोदध्यादिशब्दः प्रकृतौ स्यात्तदेव न । भाविनि काले

Digitized by Google

तेष्वर्थेषु समवेतत्वात् । साण्डे कालत्रये ऽपि असमवायात् प्रकृतिवैष-म्यादस्त्यूह इति द्वितीयसूत्रस्य भावः । दूषयति । नेति । न ऊहः परा-र्थत्वात् स्तुत्यर्थत्वात् । एकहायनीकार्यं पयोदध्यादि कालान्तरे भवि-ष्यति तर्हि साण्डस्यापि स्वसजातीयस्त्रीव्यक्त्यां स्त्रीव्यक्तिमुत्पाद्य तद्द्वारा पयोदध्यादीनां भाविकाले उत्पादकत्वसंभवादिति भावः ॥ ४३ ॥

सारस्वत्यां मेष्यामध्रिगुवचनाभावः । अधि॰ १७ ।

लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ ४४ ॥

ये पाशुका धर्माः ते सर्वे पश्वर्था इति कृत्वाचिन्तयेदमधिक-रणम् । अस्त्यग्नीषोमीयः पशुः । तत्र दैव्याः शमितार इत्याद्यध्रिगुप्रैषः समाम्नातः । स, सारस्वतीं मेषीमालभतेत्यत्र प्रवर्तते न वेति संशये सिद्धान्तमाह । लिङ्गेति । समानविधिषु पशुयागसामान्यमुद्दिश्य पशु-धर्मविधिषु सत्सु प्रैषे प्रास्मा अग्निं भरतेति अस्मा इत्यत्र पुल्लिङ्गनिर्दे-शात् । सारस्वती, मेषीद्रव्यकसरस्वतीदेवताको यागः अप्राप्ता अध्रिगुप्रैष-मप्राप्ता स्त्रीत्वात् । मेष्याः स्त्रीत्वात् । न च पुंवचनः स्त्रियमभिवदितु-मलम् । मेषीयागस्यापि प्रकृतित्वेन न प्रकृतावूह इति निषेधान्मन्त्रस्यैव निवृत्तिरिति भावः ॥ ४४ ॥

पश्वभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ॥ ४५ ॥

पूर्वपक्षमाह । पश्विति । सारस्वत्यप्यध्रिगुप्रैषपठने पुंलिङ्गमविरु-द्धम् । अग्नीषोमीयं पशुमालभेतेत्यत्र पश्वभिधानात् । तत्पशुपदं विधि-घटकीभूतं प्रैषमन्त्रे अस्मा इति पुंविषयं पुंलिङ्गान्तविशेष्यीभूतं पशुत्वं पशुत्ववाचकं पशवे इति पदम् । यथा पुरुषे ऽपि कदा चिदिदं वस्तु दुर्मिलमिति वस्तुतात्पर्येण इदमिति क्लीबेन निर्देशः, यथा व्यक्तितात्पर्येण स्त्रिया निर्देशः, इयं व्यक्तिरिति, तथा मेष्यामपि पशुत्वसत्त्वात् तत्ता-त्पर्येणास्मा इति पुंलिङ्गनिर्देश इति भावः ॥ ४५ ॥

Digitized by Google

[Gauri (or morning) beautiful owing to the naturally leafy-red hands (beautiful through the leafy-red rays of the sun), the fulfiller of the desires of those wishing for beatitude (of those desirous of performing rites after sleep)]—where the first half is undivided and the latter, a divided coalescence—both lines depend upon the Words, and as such both are Verbal Coalescence. The first half cannot be said to be an instance of Ideal Coalescence; for the subject of Ideal Coalescence is that where the coalescence is not broken even on the change of words; *e. g.* in

"स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च" ॥

[Rising with little and falling with little—the character of the evil man is similar to that of the balance-beam.]

Çlesha is not a mere means of producing an idea of Simile; (it is quite the reverse) since similarity is the cause of the notion of Çlesha. For instance, in

"कमलमिव मुखम्मनोज्ञमेतत्कचतितराम्" ॥

(The face blooms like the lotus), we have Simile based on the similarity of property, of action or of both; so in

"सकलकलम् पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव" ॥

(The city became full of noise, like the moon with all his brightness), Similarity could be asserted as being based on mere verbal similarity. As says Rudrata—

"Upamā and Samuchchaya both are clearly Ideal Figures of Speech. They are possible here also (in verbal Figure) (being as they are, based) on the similarity of words."

(*a*) Nor can it be asserted that only such sentences as 'face like the lotus'—, without the mention of the common property—are

(*a*) This is said in anticipation of the following objection: Çlesha without Simile is not possible; whereas Simile is possible without *Çlesha;* hence according to the rule of the special and the general, *Çlesha* (the special) must be called the *Bādhaka* of Simile, and as such the sentence कमलमिवमुखम् मनोज्ञम् would be an example of Ideal *Çlesha* and not of Simile. The "charming character" (manojnatva)

Digitized by Google

instances of Simile; since in that case there would be no (*a*) instance of complete and perfect Simile.

In such instances as—

[*Page* 586] "देव त्वमेव पातालमाशानां त्वं निबन्धनम् ।
त्वं चामरमरुद्भूमिरेको लोकत्रयात्मकः"

(*b*) we have Çlesha independently of the Figures Simile &c. [the double meaning of the couplet being—(i) *with reference to Vishnu*—"O Vishnu, you are the nether world, the boundary of space, and the land of the Immortals—thus centralising in yourself the three regions;" (ii) *with reference to the king*—"O king, you alone are the sufficient protector; the end of all desire; the object of the wind of chowries; thus though one, you are three-fold—(being the protector, giver and enjoyer)."] Wherever we find both (Paronomasia and Simile) mixed up, we shall have a *Commixture*; though on (*b*) due reasoning and consideration, we shall find the above to be an instance of Simile; otherwise we shall have no instance of perfect similarity.

In the example:—

[*Page* 588.] "सविन्दुसुन्दरी नित्यं गलल्लावण्यबिन्दुका"—

(She, beautiful as the moon reflected in water, (not-drop) and dropping loveliness)—Paronomasia is not the means of the notion of Contradiction (Virodha), but quite the reverse. Nor can it be said to be an instance of verbal Paronomasia giving double

---

of the face and the lotus being different, they coalesce together and form an example of Ideal Coalescence. Where, howveer, the common property (like मनोज्ञत्व here) is not mentioned, there would be nothing to coalesce, and as such there being no coalescence, such cases alone would form instances of Simile."

(*a*) Says the *Prudipa*: "*objection*:—सकलकलम् &c. is not an instance of Simile though there is possibility of common property; because such instances as कमलमिव मुखम् &c. and the like, devoid of all mention of common property, are the only examples of Simile. *Reply*:—no: because then there would be no Complete Simile, that would stand in need of the mention of the common property."

(*b*) In accordance with the rule that a certain thing is named in accordance with the name of its predominating element; (and in the given instance the predominating element is Simile).

sense; since of the second meaning (अबिन्दु = no-drop) there is a mere glimpse, and it is not complete.

Nor can we give to mere semblance of Paromonasia the name of Paronomasia, as we do to mere semblance of Contradiction, the name of Contradiction. (Because in the case of Coutradiction, actual contradiction is a defect, and as such it is only its semblance that is called a Figure; actual Paronomasia, on the other hand, not being of defect, is Figure in itself.)

Thus among similar instances different Figures of Speech are the means of bringing about the recognition of Paronomasia, *e. g.*

I. सद्वंशमुक्तामणिः ।

[The pearl gem of good family (bamboo).]

II. नाल्पः कविरिव स्वल्पश्लोको देव महान् भवान् ।

[O king you are not like inferior poets, with little fame (poems).]

III. "अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथा ऽपि न समागमः" ॥

[The evening is red (affectionate), the day too goes before it (waiting in suppliance); yet—such are the curious ways of destiny—they do not meet.]

IV. "आदाय चापमचलं, कृत्वाऽहीनं गुणं, विषमदृष्टिः ।
यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै" ॥

[Having taken up the mountain for his bow (having his bow unmoved), making the Lord of Serpents his string (his string old and worn out), the Three-eyed one (one having eyes away from the mark), and having Vishnu for his arrow (his arrow not leaving the bow)—he who curiously shattered his mark, reverence to Him.]

In the above four instances, we have the Figures—*Metaphor*, *Çlesha-Vyatirka*, *Samâsokti* and *Contradiction* respectively, and no Paronomasia. (That is to say it is these various Figures that owe their fulfilment to Çlesha, which is always independent and self-sufficient.)

Digitized by Google

(Refuting the third part of the objection, the Author continues)—

You call it verbal Paronomasia and yet you include it among Ideal Figures,—what law is this? Further, Figure consisting in elegance and euphony, –the point (be it either Word or Meaning) where the imagination of the poet attains perfection is the place (in the Word or in the Meaning) where the elegance lies; and which (Word or Meaning) therefore is the ground of embellishment. (That is to say since Figure consists in elegance, where-ever we have elegance there alone can we naturally have Figure. And as such, in both kinds of Paronomasia, verbal as well as ideal, the elegance lies in the Word; and consequently Paronomasia must belong to the Word, and as such must be called "Verbal"—as the Author has called them.)

If it be objected that Words too are dependent upon the Mēaning (and so the Paronomasia based on the Word must also depend on the Meaning, and as such must be called an Ideal Figure instead of a Verbal one),—then (we reply)—, the same being the case with Alliteration &c., why not call these also Ideal Figures of Speech? Since Alliteration &c., in order to be proper Figures of Speech, depend upon Words as well as Meanings, signifying *Rasa*, &c. (and these latter are not possible without Meaning. Consequently Alliteration, equally with Paronomasia, depends upon Meaning.) The faultiness and excellence of verbal Defects and Excellences too depend on Meaning; and similarly the Defects and Excellences of Sense also are based on Words, and as such you may as well attribute these to Words (and call them *Verbal*).

(*a*) In विधौ वक्त्रे &c. विधौ (the locative of विधि) and विधौ (that of विधु) completely resembling in pronunciation, we would

(*a*) It was said by the objector before that the means of Ideal Paronomasia is merely the capability of co-pronunciation. This, says the author, is not proper; since in that case we shall have to call विधौ वक्त्रे &c. an Ideal Paronomasia; where actually we have a difference of letters (in विधि and विधु) on which the Paronomasia is based, and which therefore cannot but be Verbal.

have Ideal Paronomasia (according to your tenet of making co-pronouncibility the ground of Ideal Paronomasia); though, in reality we have here two entirely different words (विधि and विधु), and as such it is an instance of Paronomasia based on Letters, &c. This point we leave to your intelligent consideration.

(5) The Chitra or the Pictorial.

85 *(concld.)* That is the *Pictorial* where the letters form a sword, &c.

Pictorial Poetry is that where the letters, being arranged or placed in a particular way, form a sword, a drum, lotus, &c.

This kind of Poetry is hard (not charming), and hence it is only partially exemplified.

Examples—

I.—The Sword:

मारारिशक्ररामेभमुखैरासाररंहसा
साराब्धस्तवानित्यं तदार्तिहरणक्षमा ।
माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा
मान्या च सीमा रामाणां शं मे दिश्यादुमादिमा ॥

(For Figures, see Appendix.)

"May Umā eloquently eulogised by Çiva, Indra and Rāma, ever removing their troubles, the centre of majesty, free from anxiety, esteemed the best of women, the primeval—ordain our prosperity."

II.—The Drum:

[*Page* 595.] "सरला बहुलारम्भतरलालिबलारवा ।
वारलाबहुलामन्दकरलाबहुलामला" ॥

III.—The *Lotus:*

[*Page* 596.] भासते प्रतिभासार रसाभाताहताविभा ।
भावितात्मा शुभा वादे देवाभा बत ते सभा ॥

IV.—The *Sarvatobhadra* (the four-doored Room):

[*Page* 597.] रसासार रसा सारसायताक्ष क्षतायसा ।
सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ॥

Digitized by Google

[*Page* 598.] There are many other forms—but they merely show the (aberrated) ingenuity (of the poet) and do not attain to the degree of poetry; and as such they are not exemplified any further.

86 *(contd.)*—The Semblance of Repetition is the appearance of one and the same meaning in words differing in form.

(6) The Punaruktavadābhāsa.

The Semblance of Repetition is that where a meaning appears as if signified by two words of different forms—the one giving sense and the other giving no sense (unless either broken up or made to signify a different meaning altogether).

This—

86 *(contd.)*—belongs to the Word.

That is, existing in Words—broken or compact.

Examples—

(1) Of Broken Words—

अरिवधदेहशरीरः सहसारथिसूततुरगपादातः ।
भाति सदानत्यागः स्थिरतायामवनितलतिलकः ॥

["The king, the ornament of the earth, is glorious, through his meekness, being the urger of archers longing for the destruction of enemies, whose cavalry and infantry are kept well compact by charioteers, and quite a mountain in his firmness."]

Here the words देह and शरीर, सारथि and सूत, दान and त्याग appear as repetitions; but they cease to be so when broken up.]

(2) The Compact.

चकासत्यङ्गनारामाः कौतुकानन्दहेतवः ।
तस्य राज्ञः सुमनसो विबुधाः पार्श्ववर्तिनः ॥

["Resplendent are the king's attendants,—enjoying themselves at home, the means of his enjoyment through music, &c., well-inclined and learned."]

[Here the word अंगना and रामा, कौतुक and आनन्द, सुमनसः and विबुधा appear as repetitions, unless explained as above.]

Both these kinds are *verbal*, since (the punning) will not allow of a change of words].

86 *(concld.)*—[*Page* 601.] As does this also belong to both Word and Meaning.

[*Page* 602.] *e. g.*—

"तनुवपुरजघन्योऽसौ करिकुञ्जररुधिररक्तखरनखरः।
तेजोधाम महःपृथुमनसामिन्द्रो हरिर्जिष्णुः" ॥

["This lion though slim, is yet supreme (over other lions)—having his sharp nails reddened with the blood of the chief of elephants, the receptacle of glory, the master of the glorious and the brave or high-minded, and victorious."]

Here, one word being altered, there ceases to be any Figure; and as such it lies in the Word; but there is no harm done to the Figure by the alteration of the other word; and in this respect the Figure lies in the Meaning. Consequently the couplet is an instance of both *Verbal* and *Ideal* Figure of Speech (*a*).

Thus ends Chapter IX., of the *Kāvya-prakāça* in which are determined the Verbal Figures of Speech.

(*a*) [Here the words तनु and वपु, करि and कुञ्जर, रुधिर and रक्त, तेजस्, धाम and महः, इन्द्र. हरि and जिष्णु appear as repetitions. This couplet is *verbal* in as much as the pun will not allow of the change of some of the above words, such as तनु, कुञ्जर, रक्त, धाम, हरि and जिष्णु. And it may be said to belong to Meaning also, since the pun is not affected by the change of some words, such as वपु, करि, रुधिर and इन्द्र. And consequently this couplet partaking of the peculiarities of both, is rightly said to belong to both Word and Meaning.]

Digitized by Google

CHAPTER X.

OF IDEAL FIGURES OF SPEECH.

The author now describes the Ideal Embellishments or Figures of Speech.

Upamā or Simile.

87.—Simile is the concurrence or resemblance of properties, (of two substances, otherwise) different.

The (relation of) co-attributeness can subsist only between the two objects compared and not between cause and effect; consequently the relation of the objects compared with the common property, constitutes Simile.

The qualification '*different*' is added in order to differentiate (Simile) from Comparison Absolute.

Two forms of Simile.

87.—(This is) Complete and Elliptical.

It is complete when the object compared to, the object compared, the common property, and the terms signifying similitude, are all mentioned.

And it is Elliptical when either one or two or three of these are left out.

The two forms of Complete Simile.

87.—The former is Direct and Indirect or Implied,—and can occur in a sentence, a compound, or a nominal affix.

Though the words यथा, इव &c. are adjuncts to the object compared to, since we have an idea of the object just preceding these, to be the object compared to; yet they signify a relation, on being merely heard, like the 6th case-termination, through the potency of words; where it is so, the Simile is Direct (a);—as

(a) The meaning is this: In "राज्ञो राज्यम्" the genitive ending in राज्ञः denotes the possessiveness of राजा, and as such is its विशेषण; and yet it expresses the relation of the possessor and the possessed between the राजा and the राज्य. Similarly, the words यथा, &c, though denoting the fact of the object compared to being the Upamāna, yet imply the relation of similitude between the two members of the Simile,—on the mere utterance thereof.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम्।

मूल्यम्

विधिमीमांसा, अप्पय्यदीक्षितकृता श्री ते॰ रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।=)॥

गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतडाक्तरबालन्टैनाचार्य्येणाङ्ग्लदेशीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः =)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणाङ्ग्लदेशीयभाषायां कृतम् .. .. ४)

मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

शाश्वतधर्मदीपिका, ... १)

अमरकोशः सटीकः .. .. ४)

तन्त्रवार्तिकम् .. .. २॥=)

दीनपदार्थनिर्वचनम् .. .. ३)

वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूकशास्त्रि-
संशोधिता .. .. ४)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम् १॥)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः। .. .. २।)

वेदपूर्त्तिः प्रथमो बिन्दुः सत्संप्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

वेदपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥)

शास्त्रदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम्। १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धा .. .. ५॥)

• माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता, ... ७॥)

काशिका .. .. ६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 113

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 129

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 145

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 161

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4.] April, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अंशुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

देहादिपिण्डसंयोगभेदैरिति जीवविषयत्वे निर्वाहः, परमात्मविषयत्वेऽपि ब्रूमः अत्र तत्तत्संसर्गप्रयुक्तविकारादिराहित्ये तात्पर्य्यम् एतच्च वृद्धिह्रासादिसूत्रभाष्ये व्यक्तमनुसन्धेयमिति ।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥

इत्यपि गतार्थं घटध्वंसे घटाकाशो न भिन्नो नभसो यथेति मुक्तविषयस्मृतिरप्यौपाधिकविशेषनिवृत्तिपरा न ह्यत्र घटाकाशस्य नभस्तत्त्वतादात्म्यं नि*र्दिश्यते तस्य घटसंयोगदशायामप्यवस्थानात् । नापि बहिर्भूतमहाकाशादितादात्म्यं तस्य घटध्वंसदशायामप्यसम्भवात् तत्समानतापत्तिः स्वैक्यविरोधिन्येव । तृतीयचतुर्थौ दूषयति । अच्छेद्य इति । पञ्चमेऽपसिद्धान्तमाह । स्वत इति । षष्ठे क्वचिदंशकृप्तिव्याघातमाह । नोपाधिरिति । भूतेन्द्रियचैतन्यवादसमोऽयं पक्ष इति भावः ॥ ३२ ॥

इति ब्रह्मण औपाधिकजीववादभङ्गः ।

एवमिह जैनगन्धिनां जल्पितानि निराकारिषत । अथ सौगतगन्धिनां निराक्रियन्ते तत्र प्रत्यस्तमितसमस्तभेदकूटस्थविज्ञानैकरसं ब्रह्मानाद्यनिर्वचनीयाविद्यातिरोहितस्वरूपमनन्तभेदप्रपञ्चात्मना विवर्त्तत इति मृषावादस्तावदपोह्यते । नापीति ।

मू० नापि ब्रह्मण्यविद्यास्थगितनिजतनौ विश्वमेतद्विवृत्तं तस्मिन् सा स्वप्रकाशे कथमिव विलगेत्तत्प्रकाशैकबाध्या । न ह्येतस्मिन्नविद्याविलयकृदधिको वृत्तिवेद्यो विशेषो बाधो

---

* निदर्श्यंते इति पा० ।

वृत्तिस्वरूपाद्यदि भवति तदा ज्ञानबाध्यत्व-
भङ्गः ॥ ३३ ॥

टी० आस्तां तिरोधानमालोकसन्निधावन्धकारस्येवानादिस्व-प्रकाशब्रह्मसंनिधौ तदज्ञानस्य स्वरूपलब्धिरेव न स्यादित्यभिप्राये-णाह । तस्मिन्निति । प्रदीपकज्जलन्यायशङ्काऽपनुत्त्यै विरोधं व्यनक्ति । तत्प्रकाशैकबाध्येति ।

ननु ब्रह्मस्वरूपप्रकाशो नाज्ञानं बाधते किन्तु साक्षित्वेनाव-स्थाय साधयत्येव तत्त्वावेदकवाक्यजन्यन्तु वृत्तिज्ञानं तद्बाधकमित्यत्र वृत्तेर्बाधकत्वं विषयस्य विशेषप्रकाशनशतया स्वरूपशतया वेति विकल्पं सङ्कल्प्य प्रथमं प्रतिक्षिपति । न हीति । अधिकः—स्वरूपादन्यः, विशेष-स्याविद्याविलयहेतुत्वं स्वधीद्वारा यदि तु वृत्तिः कल्पितविशेषविषयतया ब्रह्माज्ञानं बाधेत तर्हि तत्त्वधीबाध्यत्वं तस्य न स्यात् । द्वितीयमनु-वदति । बाध इति । वृत्तिस्वरूपात्प्रदीपवह्निमुद्गरादिवत् किञ्चित्प्रका-शनिरपेक्षादिति यावत् । दूषयति । तदेति । अज्ञानस्य ज्ञाननिवर्त्यत्वं न स्यात् तत एव मिथ्यात्वलक्षणातिक्रम इति भावः ॥ ३३ ॥

इति साविद्यब्रह्मविवर्तवादभङ्गः ।

तिरोधिमपि दूषयति । छन्नत्व इति ।

मू० छन्नत्वे स्वप्रकाशादनधिकवपुषो ब्रह्मणः
स्यादभावो भावानां छादनं हि स्फुरणवि-
लयनं तस्य चोत्पत्तिरोधः । मिथ्या दोषाद्
भ्रमोक्तौ कथमधिकरणं सत्यमित्येव वाच्यं
नाधिष्ठानानवस्था भवतु तव यथा ना-
स्त्यविद्याऽनवस्था ॥ ३४ ॥

Digitized by Google

टी० घटादीनां स्वस्वरूपातिरिक्तप्रकाशवत्त्वात्तन्निवर्तकोऽस्ति-
रोधानं युक्तं ब्रह्मवस्तु न तथेत्याशय: । अभावापत्तिं तिरोधानविक-
ल्पेन व्यनक्ति । भावानामिति । स्फुरणविलयनं चिद्रूपस्य प्रकाशस्य
नाश: । तस्य—स्फुरणस्येत्यर्थ: अचिद्रूपस्येत्यर्थापन्नम् । ननु वृत्त्यधीन-
स्वप्रकाशान्तरापेक्षया तिरोधानं चिद्रूपेतन्न तस्यापि ह्यनुत्पन्नस्य नाश-
त्वायोगादुत्पत्तिरोध इत्येष्टव्यं ततश्च सत्यामविद्यायां कथन्तद्बाधिका
वृत्तिरुत्पद्यते अन्यतस्तन्निवृत्तौ किं पुनरेषा वृत्तिस्साधयेत् स्वयमेवा-
विद्यां निवर्त्त्योत्पद्यत इति चेन्न परस्पराश्रयापत्ते:, स्वोत्पत्त्या प्रति-
बन्धकनिवृत्ति: तया च सेति । एवन्तिरोधानं दूषितम् । तदधीनं
विक्षेपमपि विक्षिपति । मिथ्येति । सर्वासु भ्रान्तिष्वधिष्ठानदोषयो-
स्सत्यत्वमारोप्यस्य च मिथ्यात्वं दृष्टं ततश्च माध्यमिकं प्रति निर-
धिष्ठानभ्रमानुपपत्तिं वदन् भ्रममूलस्य दोषस्य कथं मिथ्यात्वं ब्रवीषि,
यद्यधिष्ठानं मिथ्या तदा तदध्यासस्याधिष्ठानान्तरं वाच्यम् एव-
ञ्चानवस्था स्यादिति चेत् दोषमिथ्यात्वेऽपि तदध्यासार्थे दोषान्तरा-
पेक्षयाऽनवस्था स्यादेव यदि दोषस्य स्वरूपत: प्रवाहतो वाऽनादि-
त्वान्नानवस्था दोष इति मन्यसे एवमधिष्ठानमिथ्यात्वेऽप्यधिष्ठानस्य
दोषवदुभयथाऽनादित्वान्न दोष: स्यात् । अथ स्यान्न वयं निरधि-
ष्ठानभ्रमभीत्याऽधिष्ठानस्य सत्यत्वं ब्रूम: अपि तु सत्यं ज्ञानम-
नन्तं ब्रह्मेत्यादिश्रुतिसिद्धमङ्गीकुर्म इति तर्हि दोषत्वाभिमताया
जगत्प्रकृतेरपि गौरनाद्यन्तवती सा जनित्री भूतभाविनी । अव्यक्तं
कारणं यत्तन्नित्यं सदसदात्मकमित्यादिभिरन*वयवत्ववचनात् सर्व-
कालानुवृत्त्या सत्यत्वमङ्गीकार्य्यं भूयश्चान्ते विश्वमायानिवृत्तिरिति

* रनश्वरत्ववचनादिति पा० ।

तद्विनाशः श्रुत इति चेन्न पुरुषस्य मायासंबन्धनिवृत्तौ तच्च तात्पर्य्यात् मायाशब्द एव मिथ्यात्वं बोधयतीति चेन्न आश्चर्य्यसृष्टिहेतुतया तदुपपत्तेरन्यथा देवमायेव निर्मितेत्या । तेन मायाबहुमन्तादित्यादिविरोधात् । न च शुक्तिरूप्यादिषु क्वचिदपि मायाशब्दो दृष्टः । नापि मिथ्याशब्दपर्य्यायतया मायाशब्दं लोकवेदनिघण्टुकाराः पठन्ति अनृतेन हि प्रत्यूढा इत्यत्रानृतशब्दो न जगत्प्रकृतिविषयः किन्तु कृतेतरदुष्कर्मपरः, ऋतं चात्र फलाभिसन्धिरहितं कर्म स्यात् कारणविषयत्वेऽपि ब्रह्मविषयासच्छब्दवदान्यपर्य्यमवसेयम् । एतेन नासदासीन्नोसदासीत्तदानीन्न सतन्नासदुच्यत इत्याद्यपि सदसच्छब्दाभिप्रेतव्यष्टिभेदप्रलयपरतया न तद्वैलक्षण्याय योज्यमिति ॥ ३४ ॥

इति तिरोधानाद्यनुपपत्तिः ॥

अथाविद्यास्वरूपविषद्विरूपन्नलब्धस्त-स्वाश्रित्वं दोषनिरपेक्षं तत्सापेक्षं वेति विकल्पे पूर्वानुवादेनानिष्टमाह । दोषेति ॥

मू० दोषाभावेऽप्यविद्या स्फुरति यदि ततः किन्न
विश्वं तथा स्यात् सा चान्यां कल्पितां
चेदभिलषति तथा साऽपि चेत्यव्यवस्था ।
नापेक्षा चेदनादेरकलुषधिषणागोचरत्वात्
सती स्यात् ब्रह्मैवास्यास्तु दोषो यदि न तु
विरमेद् ब्रह्मणो नित्यभावात् ॥ ३५ ॥

टी० मिथ्याभूतस्य कस्यचिद् दोषनिरपेक्षप्रकाशत्वे वियदादिप्रपञ्चस्यापि तथात्वं लाघवात् स्वीकार्य्यमेव न चासौ प्रपञ्चप्रतिभासहेतुर्दृष्टः येन लोकविद्दुदोषवन्न त्यज्येतेति भावः । अनु-

मानन्तु निरसिष्यते । उत्तरानुवादेनानवस्थामाह । सेति । अनवस्था-परिहारं शङ्कते । नापेक्षेति । स्वरूपानादेस्तावदविद्याया न कल्प-कापेक्षा प्रवाहानादेर्नानवस्था दोषः स्वकारणातिरिक्तानपेक्षणादिति भावः । पक्षद्वयेऽप्यनिष्टमाह । अकलुषेति । स्वरूपानादिरविद्या निर्दोषया संविदा भाति अन्यथाऽनवस्थानात् तथा च सत्यत्वं दुस्त्यजम् । अविद्या स्वप्रकाशे स्वकार्य्यप्रकाशे च स्वयमेव दोष इति मन्यसे तर्हि सर्वमप्यनिर्वचनीयं दोषान्तरमनपेक्ष्यावभासेत अवि-शेषात्, अन्यदनिर्वचनीयं कादाचित्कत्वात् कारणमपेक्षत इति चेत् किमतः, न हि मृदादयो घटादीनां हेतवोऽपि दोषा इति व्यवह्रि-यन्ते न च स्वेष्टमुक्तिहेतोर्दोषत्वं ब्रूषे । भवन्तु वा हेतवो दोषाः अवि-द्याप्रवाहादिभिः पूर्वनिवृत्तावप्युत्तरस्य स्थैर्य्यमङ्गीकृतं चिरप्रकाशश्च तत्र दोषनिवृत्तावपि सिध्यता प्रकाशेन प्राग्वद्विषयस्य सत्यत्वं प्रसज्येत सामग्र्यवस्थपूर्वदोषचरमक्षणजनितावुत्तरप्रकाशो चिरमनुवर्तते इति चेन्न विषयस्थैर्य्येऽपि वृत्तिप्रकाशानामाशुतरविनाशित्वाभ्युपगमात् सा-मग्रीवन्तत्या धारावाहिकदृष्टेश्च । न चाध्यासकाल एवाविद्या भाति पश्चात्तु स्वरूपेणैवावतिष्ठत इति वाच्यं संविदधीनस्वसिद्धेस्तस्या अप्रकाशमानतयावस्थानायोगात् । ईश्वरस्य भातीति चेन्न ईश्वरस्य बुद्धेरप्यदोषायत्तप्रकाशत्वे तद्विषयस्य सत्यत्वं सिद्ध्येत् दोषायत्तत्वे तु तद्दोषप्रकाशो निर्दोषस्य सदोषस्य वेति विकल्पदोषःस्यं प्राग्वत् । अथान्यनिरपेक्षं ब्रह्मैवाविद्याप्रकाशप्रयोजको दोष इति शङ्कते । ब्रह्मे-ति । एवं सति स्वरूपतः स्वभा*वतो वा ऽनादिरविद्या नोच्छिद्यत इत्याह । न त्विति । तत्र निरपेक्षदोषानुवृत्तिं हेतुमाह । ब्रह्मण इति ।

* प्रवाहतो वेति पा० ।

तत्त्वधीप्रागभावविशिष्टस्य दोषत्वात् तदभावे कथमविद्या भासेतेति चेत् हन्तैवं प्राप्ताप्राप्तविवेकेन तत्त्वधीप्रागभावस्यैव दोषत्वमायातम् अलं भावरूपाविद्यादोहलेनेति ॥ ३५ ॥

इत्यविद्यादर्शनानुपपत्तिः ।

ननु यदज्ञानमात्मसाक्षिकं भाति तद्भावरूपमेव स्यात् ज्ञानप्रागभावस्य दुर्ग्रहत्वादिति शङ्कते । ज्ञात इति ।

मू० ज्ञाते ऽज्ञाते ऽप्यभावः खलु दुरवगमस्संविदस्ते न* वेद्यं स्यादज्ञानं यदीहाप्यपरिहृतमिदं तद्विरोधादिसाम्यात् । तुल्येवाकारभेदात् परिहृतिरुभयोः क्लृप्तिरत्राधिका ते मुग्धोऽस्मीत्यादिसाक्षात्कृतिरपि नियतं तत्प्रतिद्वन्द्विगर्भा ॥ ३६ ॥

टी० अयं भावः अभावो ह्याश्रयप्रतियोगिनिरूप्यः प्रतियोगि च ज्ञानं तच सर्वज्ञानाभावस्तावन्न कदाचिदपि ग्राह्यः अभावज्ञानस्य तदाश्रयप्रतियोगिज्ञानस्य च विद्यमानत्वात् ।

अथ विषयविशेषावच्छिन्नस्य ज्ञानान्तरस्य प्रागभावः सुग्रह इत्युच्येत तदपि न विषयविशेषज्ञानसदसद्भावयोस्तज्ज्ञानाभावस्य दुर्ग्रहत्वात् षष्ठप्रमाणवेद्यस्याभावः कथमपरोक्षधीविषयः स्यात्, भावरूपाज्ञाने तु न तावद्भावाभावरूपत्वविरोधः न चान्यत् किञ्चिदिह स्यादिति, अतः स्वेष्टस्य फलितत्वमाह । तेनेति । ईदृशं दुर्ग्रहत्वं

* न भाव इति पा० ।

Digitized by Google

त्वद्दिष्टे ऽपि स्यादिति प्रत्याह । इहापीति । तत्र तदुक्तमेव हेतु-
माह । तद्विरोधेति । भावरूपस्याप्यज्ञानस्य ज्ञानविरोधित्वं समानं
तस्य तद्बाध्यत्वाभ्युपगमात् आदिशब्देन विषयविशेषनिरूप्यप्रतिसं-
बन्ध्यादिसापेक्षत्वग्रहः अपरोक्षधीविषयत्वञ्च मतान्तरेण भावस्या-
प्यस्ति वस्तुप्रमाणवेद्यत्वेऽपि विरोधस्समः तथापि प्रमाणतयाऽभिमत
उपलब्ध्यभावः केनचित् प्रमाणेन निर्धार्य्यते तेन च ज्ञानप्रागभावो
ऽपि गृह्यमाण आश्रयप्रतियोगिस्वधीसद्भावे कथं सिद्ध्येत् माभूत्ततो-
ऽपि ज्ञानाभावग्रह इति चेतन्न ज्ञानाभावस्य दुर्ग्रहत्वं साधयताऽपि
हि गृहीत एव ज्ञानाभावः, अन्यथा कथं प्रमाणज्ञानं पक्षीकृत्य स्वप्रा-
गभावव्यतिरिक्तेत्यादि वक्ष्यसि देवदत्तप्रमापक्षीकारेण तत्स्थप्रमाभा-
वातिरेकिण इत्यादि च ।

ननु भावरूपाज्ञानग्रहणे किं तदितरज्ञानेन प्रतियोग्यादिनि-
रपेक्षत्वादिति चेन्न अज्ञानमिति गृह्यमाणस्य तदन्यतया तद्विरोधि-
तया तदभावतया वा प्रतीतौ प्रतियोग्यादिभिन्नैरपेक्ष्यायोगात् ।

नन्वज्ञानावच्छेदकतया सामान्यतः किञ्चिद्विषयः प्रतियोगि-
साक्षिचैतन्येन ज्ञाताज्ञातसर्वग्राहिणा विषयीक्रियते विशेषतस्तु
गृह्णत् प्रमाणज्ञानञ्ज्ञानादिभावरूपाज्ञानबाधकमिति तत्राह । तुल्येति ।
अभावरूपेऽप्यज्ञाने तथैव प्रतियोगिधीर्व्यवस्थितेति न विरोध
इत्यर्थः । तुल्यत्वे कथमितरप्रद्वेष इत्यत्राह । क्लृप्तिरिति । लाघवा-
दभावपक्ष एव ग्राह्य इति भावः । स्यादेतत् प्रतिसंबन्ध्यपेक्षानियमे
हि प्रतिबन्द्यवतारः स्वरूपेण तु मुग्धोऽस्मि मूढोऽस्मीत्यज्ञानं
साक्षिणा प्रकाश्यते अतो न विरोध इति तत्राह । मुग्ध इति ।
अयं भावः । मोहादिशब्दाः खल्वेते बुद्ध्यभावरूढास्स्वविषयप्रतियोग्य-

Digitized by Google

वच्छिन्नमेव स्वार्थमुपस्थापयन्ति प्रलया*दिशब्दवत्तच्च प्रयोगाभावमात्रान्निरपेक्षत्वा†भिमान इति ॥ ३६ ॥

इति भावरूपाज्ञानप्रत्यक्षत्वभङ्गः ।

अथ पञ्चपादिकाविवरणोक्तमनुमानमनुभाषते । स्वाजन्मेति ।

मू० स्वाजन्मान्यस्वदेशस्वविषयप्रतिकृत्स्वव्यपो-
ह्यर्थपूर्वाक्रान्तोऽर्थाद्यप्रभावद्विमतमतिरि-
हापूर्वनिर्भासनाच्चेत् । अज्ञानाज्ञानभेत्री
किमियमनुमितिः स्वेष्टभङ्गोऽन्यथा तु व्य-
र्थाऽसाविन्द्रियादिष्वतिचरणमसिद्ध्यादि च
स्याद्विकल्पे ॥ ३७ ॥

टी० विप्रतिपन्नं मानज्ञानं स्वप्रागभावव्यतिरिक्तस्वदेशगतस्वविषयावरणस्वनिवर्त्यवस्त्वन्तरपूर्वकमप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति प्रयोगः । अथैतदनुमानज्ञानं स्वविषयावरणनिवर्तकं न वेति विकल्पे प्रथममनुयुङ्क्ते । अज्ञानेति । तदभ्युपगमेऽनिष्टमाह । स्वेष्टभङ्ग इति । अज्ञानस्याज्ञानान्तरावृतत्वे तदपि तथेत्यनन्ताविद्याक्लृप्तिगौरवं स्यात् आवृता च साविद्या न दृश्येत तत्कटाक्षविरहादलब्धस्वरूपा वन्ध्यासुतेव न प्रपञ्चं प्रजनयेदिति भावः । द्वितीयमनूद्य दूषयति । अन्यथा त्विति । यद्यज्ञानविषयाज्ञानमनयाऽनुमित्या न निरस्येत निष्फलैवासौ । प्रस-

* यथा प्रलयशब्दे प्रतियोगिभूतस्य जगतः स्वातन्त्र्येणानुल्लेखेऽपि तदभावबोधस्ततस्तथेत्यर्थः । यथा वा तमःशब्दे तेजोऽभावस्वरूपत्वेऽपि स्वातन्त्र्येण तेजोऽनुल्लेखेऽपि च तमोग्रहस्तथेत्यर्थः ।

† अयं भावः-सिद्धान्ते तमोद्रव्यान्तरमेव न तेजोऽभावस्वरूपं प्रलयादिशब्दे च नञादिशब्दवन्निरूपकानभिधानेऽपि भवत्येव तत्सापेक्षत्वं न हि नञित्यभिहिते निरूपकनिरपेक्षबोधस्तत्रास्तीत्यर्थः ।

Digitized by Google

ज्येत निरसनीयाभावात् प्रकाशितमात्रप्रकाशकत्वाद्वा । अपि चेयमनु-
मितिः पक्षकोटिस्तदन्या वा आद्येऽंशतो बाधः द्वितीये तस्यामति-
चारः । हेतुविकल्पे च दोषानाह । इन्द्रियादिष्विति । अयं भावः
प्रकाशहेतुत्वमिह ज्ञानहेतुत्वं ज्ञानकरणत्वं तदनुग्राहकत्वं ज्ञानत्वं
विषयविस्फुरणरूपत्वं स्वविषयावरणनिरासकत्वमन्यद्वा किञ्चित् नाद्यः
आत्मादृष्टादिभिरनैकान्त्यात्, ज्ञानस्य च ज्ञानहेतुत्वनियमाभावात्
अत एव न द्वितीयतृतीयो इन्द्रियादिष्वतिचाराच्च । नापि चतुर्थः,
दृष्टान्तस्य साधनविकलत्वात् साक्षिज्ञाने च विपक्षे हेतुवृत्तेस्सपक्ष-
वृत्त्यभावाच्च विरुद्धत्वापत्तेः । नापि पञ्चमः पक्षसपक्षयोर्हेतुवृत्त्य-
भावादेव । नापि षष्ठः तस्य साध्यानुप्रविष्टत्वात् सप्तमस्तु कश्चिन्न
दृश्यत एवेति । चकाराद् दोषान्तराण्यपि द्योत्यन्ते तथा हि स्वप्रा-
गभावव्यतिरिक्तेति स्वदेशगतेति च पृथगुपादानं निरर्थकम् अभाव-
व्यतिरिक्तेत्येतावतैव वेद्यगतवृत्त्यभिव्यक्तिप्रागभावस्यापि व्यवच्छित्तेः
स्वविषयावरणे च स्थिते स्वोत्पत्तिरेव न संभवतीत्युक्तं प्रकाशाश्रय-
तया चाभ्युगतस्य विश्वप्रकृतेः तदज्ञानस्य न घटाद्यज्ञानवत् प्रमा-
णज्ञानदेशगतत्वं युक्तमिति ॥ ३० ॥

इति पञ्चपादिकाविवरणोक्तभावरूपज्ञानानुमानभङ्गः ।

यत्तु कश्चिदाह देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः अना-
देर्ध्वंसिनी मात्वाद् यज्ञदत्तप्रमा यथेति तदनुभाषते । यज्ञेति ॥

**मू० यज्ञोस्तं देवदत्ती मितिरितरमितिन्यायतो
हन्त्यनादिं मात्वात्तन्मित्यभावादिकमिति
तदपि स्याद्बाधं विपक्षे । नाभावो भाव-
तोऽन्यो न च पुरुषभिदाऽस्त्येकजीवत्ववादे**

Digitized by Google

दृष्टान्ते ध्वंसकत्वं न च विदितमिदं ध्वंसतामात्रसिद्धेः ॥ ३८ ॥

टी० दूषयति । तदिति । अपिना पूर्वानुमानेऽप्ययं दोषोऽस्तीति व्याप्यते विपक्षे बाधकमेव हि प्रतिबन्धरहस्यमाहुः । न चेह तदस्ति अतो नेदं बाधकमिति भावः । भावा*न्तराभावनयेन दूषणमाह । न भाव इति । यद्यभावो भावातिरिक्तः स्यात्तदा ह्यन्याभावव्यवच्छेदार्थं विशेषणं स्यात् न च भावातिरिक्तोऽभाव इति वक्ष्यते माभूत्तर्हि विशेषणमिति चेन्न परसंमतमात्रसाधने सिद्धसाधनात्तावदुक्त्या च त्वद्दिष्टासिद्धेः तदतिरिक्तस्य चानुपस्थानात् परस्य पक्षदृष्टान्तविभागायोगमप्याह । न चेति । ये ह्यद्वैतिनो जीवमप्येकमेवेच्छन्ति तन्मते देवदत्त एव यज्ञदत्त इत्यपि कल्पते । लोकव्यवहारमात्रात् परसम्मत्या वा पक्षादिभेदक्लृप्तिरिति चेन्न स्वानभ्युपगतस्य साधनाङ्गत्वेनो†पादानायोगात् । अस्तु नानाजीवमतेन दृष्टान्तोक्तिरिति चेत् न तन्मतेऽपि जीवानां प्रमाधारत्वासिद्धेः, न हि स्वरूपचैतन्यं वा साक्षिचैतन्यं वा जीवतया कल्पितं वा जीवाश्रितमिति युष्माभिः कल्प्यते वृत्तिरूपा प्रमाऽन्तःकरणनिष्ठा कथ्यते अतः पुरुषस्थतया प्रमानिर्देशो न युक्तः कृपाणादिप्रतिफलितमुखमलिनिमादिन्यायेन प्रातीतिकतया पुरुषस्थत्वोक्तिरिति चेन्न प्रातीतिकसत्तायामर्थक्रियाकारित्वानभ्युपगमादन्तःकरणवृत्तिद्वयमेव पक्षदृष्टान्ताविति चेत् न तस्य परसम्मत्यभावेन परान् प्रति प्रयोगायोगात् । किञ्च देवदत्तनिष्ठधारावाहिकद्वितीयादिज्ञानेषु देवदत्तप्रमा भावा-

---

* भावान्तरमभावो हि कयाचित्तु व्यपेक्षया ।

† स्वानभ्युपगतस्य साधनाङ्गत्वाङ्गीकारे परेण स्वसिद्धान्तमात्रमवलम्ब्य यथाकथंचित्किंचिद्धागात्मनि दूषणेऽभिहिते कस्य जयो व्यवतिष्ठेतेति भावः ।

तिरिक्ताऽनादिनिवर्तकत्वाभावेऽपि प्रमात्वं दृष्टं तद्व्यवच्छेदाय पूर्ववदप्रकाशितार्थप्रमात्वादिति विशेषणेऽपि देवदत्तप्रमान्तराभावातिरिक्तानादिस्वप्रागभावध्वंसनात् सिद्धसाधनत्वं देवदत्तप्रमाभावत्वात्यन्ताभाववदनादिध्वंसकत्वं साध्यमिति चेत् इदमपि स्वजन्यसंस्कारप्रागभावध्वंसनेन दत्तोत्तरमेव । किञ्चानादेर्ध्वंसिनीत्यत्र ध्वंसरूपत्वमात्रं वा ध्वंससंबन्धित्वं वा ध्वंसहेतुत्वं वा विवक्षितं, नाद्यः अनभ्युपगमात् । न च ध्वंसो घातक इति युज्यते । न द्वितीयः विवक्षितस्याज्ञाननिवर्तकत्वस्यानुक्तेः, अस्ति स्वजन्यसंस्कारप्रागभावोऽनादिः तस्य च ध्वंसरूपः संस्कार एकाश्रयत्वादिना स्वसंबन्धी च । दृष्टान्ते चानादिप्रतियोगिकध्वंससंबन्धित्वासिद्धेः अतस्तृतीयः परिशिष्यते । अत्रापि दृष्टान्तस्य साध्यविकलत्वमाह । दृष्टान्त इति । उक्तं हि पूर्वमेव प्रागभावस्य कार्यस्य चैकक्षणसंपातायोगात् तयोर्वध्यघातकभावो न संभवतीति । एतदेवाभिप्रेत्याह । ध्वंसतामात्रसिद्धेरिति । अपि चात्र स्वप्रागभावातिरिक्तानादिध्वंसकत्वसाधने तद्दूषणीयमनादिकिञ्चिदभावरूपमिति कुतस्सिद्धं न तावद्व्याप्त्या दृष्टान्ते तदसिद्धेः । नापि पक्षधर्मताबलात् पक्षस्थस्य हेतोस्तादृशबलादृष्टेः दृष्टस्य च तादृशपक्षधर्मसंबन्धमात्ररूपस्य पक्षसाध्यसंबन्धमात्रार्थत्वान्न च परिशेषात् अभावान्तरनिवर्तकत्वेऽपि विरोधाभावात् । दण्डचक्रादयो हि स्वाभावातिरिक्तं घटाभावं निवर्तयन्ति तद्वदेव देवदत्तप्रमापि संस्कारोत्पत्तिहेतुभूता स्वसंस्कारप्रागभावं ध्वंसयत्येव एतत्परिहाराय अभावव्यतिरिक्तानादिध्वंसिनीत्येतावन्मात्रमुपाददीमहीति चेत् हन्त तर्हि सिद्धसाधनत्वं परिजिहीर्षता दृष्टान्तस्य साध्यविकलत्वापत्तौ न दृष्टिर्दीयते ॥ ३८ ॥

इति चित्सुखोक्तभावरूपाज्ञानानुमानभङ्गः ॥

Digitized by Google

अथ ब्रह्माज्ञानकल्पनां श्रुतिविरोधेन निर्मूलयति अस्पृष्टेति ।

मू० अस्पृष्टावद्यतोक्तेर्न खलु विषयतामभ्युपेयादविद्या न क्षेत्रज्ञोऽपि तापत्रयपरितपनान्नापि तद् ब्रह्म मौग्ध्यात् । मिथ्यात्वाद्दोषभावो न भवति यदि किं तन्निरासप्रयासैरुच्छेत्तव्या पुमर्थान्वयत इह परः कोऽभिलप्येत दोषः ॥ ३९ ॥

टी० न तावन्निरवद्यत्वश्रुतिरनादर्तव्या सर्वश्रुत्यनादरप्रसङ्गेन निष्क*ञ्चुकबाह्यत्वापातात् न चासौ स्तोभवन्निरर्थिका स्वबोधितेऽर्थे स्वतःप्रामाण्यात् । अतस्तद्विषयत्वे केवलमविद्यैव वा तद्विषयस्तत्कल्पितो जीवो वा तदवच्छिन्नं ब्रह्म वेति विकल्पं विभाव्य प्रथमं प्रतिक्षिपति । न खल्विति । निरवद्यमिति श्रुतिर्ब्रह्मैव विशिनष्टि न त्वविद्यां त्वन्मतेऽप्यविद्यान्तराभावात् निरवद्यत्वश्रुतिस्तद्विषया स्यादित्युपलम्भिकाकूतिरियमतो नाघाभागिप्रतिषेधः । द्वितीयं दूषयति । न क्षेत्रज्ञ इति । न हि त्वन्मते प्रतिबिम्बप्रायस्य जीवस्यावस्थान्तरेणापि निर्दोषत्वमिति भावः । तथैव तृतीयमपि निरस्यति । नापीति । तच्छब्देन सर्वाध्यासाधिष्ठानत्वादिसूचनं मौग्ध्यादविद्यातिरोहितस्वप्रकाशत्वादित्याशयः ।

ननु कल्पिते जीवे कल्पनाधिष्ठाने ब्रह्मणि वा निरवद्यत्वादिश्रुतिस्संबोभवीति अविद्यातत्कार्याणामसत्यतया दोषत्वाभावादिति शङ्कते । मिथ्यात्वादिति । परिहरति । किमिति । यद्यविद्यादीनां स्वरूपा-

* कञ्चुकपदेनेह मायाहेतुविवक्षणेन सर्वथा मायाकार्यवेदानङ्गीकारे शुद्धहेतुकत्वापत्त्या प्रपञ्चनस्यैवापेक्ष्यत्वापात इत्यर्थः ।

लसत्वं दोषत्वञ्च न स्यात् तर्हि किं तन्निरासार्थसाधनचतुष्टयसम्पत्तिपूर्वकश्रवणमननिदिध्यासनप्रयासैः अविद्यानिरासकदर्शनार्थमेव हि तद्विधिमातिष्ठध्वे अन्वसत्यस्य दोषत्वमप्यसत्यं तादृशदोषसत्त्वेऽपि तात्त्विकदोषात्यन्ताभावान्निर्दोषत्वश्रुतिरर्थवती स्यादित्यत्राह । उच्छेत्तव्येति । असत्योऽपि दोषः उच्छेत्तव्यो न वा पूर्वत्र तादृशापुरुषार्थान्वयादतिरिक्तः को नाम दोषशब्दार्थः उत्तरत्र तन्निरासप्रयासनैरर्थक्यमेवेति भावः । अनिर्वचनीयस्य नित्यनिवृत्तस्वरूपस्य किं निवर्तनेनात्यन्ताभावस्यासंपाद्यत्वात्तत्प्रतिभासोऽप्यनिर्वचनीय एवेति सोऽपि नित्यनिवृत्तित्वान्न संपाद्यनिवृत्तिः । किञ्च तात्त्विकदोषः श्रुत्या निरस्यत इति वदता स दोषः किं ब्रह्मस्वरूपमेवेत्यभिमतमन्यद्वा किञ्चित् पूर्वत्र किन्तदधीनसत्ताकया विद्यया तेन च सर्वोपपत्तेः दोषभूतस्वाधीनप्रकाशतया ब्रह्मापि मिथ्या स्यात् उत्तरत्र द्वैतापत्तिः यत्र क्वचिद्विद्यमानत्वाभावे तात्त्विकत्वविरोधात् भावाद्वैतिनो ब्रह्मस्वरूपातिरिक्ततात्त्विकाभावरूपदोषसंभवात् तन्निषेधिका श्रुतिरिति चेन्न अभावनिषेधे तत्प्रतियोगिभावसंबन्धापातात्तत्त्वाद्वैतवादो निरुद्ध्येत । दोषस्य परमार्थत्वं नास्तीति निरवद्यत्वश्रुत्यर्थ इति चेन्न दोषस्वरूपनिषेधके तदनुषया तत्सत्यत्वनिषेधकशब्दाभावात्तत्परत्वकॢप्तेश्च गुरुत्वात् अतो भावमभावं वा सत्यमसत्यं वा ब्रह्मणि निरसनीयं किञ्चिदिच्छता निर्विषयैव निरवद्यत्वश्रुतिरापादितेवेति ॥ ३९ ॥

इति ब्रह्मासानानुमानानां नित्यनिर्दोषश्रुतिबाध्यत्वम् ।

यदि निरवद्यत्वश्रुतिविषये ब्रह्मणि अविद्या कदाचिदपि न स्यादित्युच्यते तर्हि तस्य जीवैक्योपदेशो न घटेत तस्मान्निर्दोषत्वश्रुतिस्त्वदभिमतजीववन्निवृत्ताविद्यस्वरूपपरतया निरूह्येतेति शङ्कते । शुद्ध इति ॥

Digitized by Google

मू० शुद्धे ब्रह्मण्यविद्या न यदि न घटते तस्य जी-
वैक्यवादस्तस्मान्निर्दोषतोक्तं निरुपधिदयया
निर्वहेदित्ययुक्तम्। प्रत्यक्षादिप्रमाणानुगुण-
बहुविधश्रुत्यबाधेन नेतुं शक्येऽप्यैक्यादिवाक्ये
बहुगुणनिधये ब्रह्मणेऽसूयसि त्वम् ॥ ४० ॥

टी० अथ स एव देवः कृतभूतभावनः स्वयं विशुद्धो
विरजाः प्रकाशत इत्यादिभिर्बद्धमुक्तावस्थाद्वयभागिनः कर्मवश्या-
दन्यत्वेन प्रमितस्य परस्य ब्रह्मणस्सदोषावस्थाद्वयक्लृप्तिस्साहसमित्य-
भिप्रायेणाह । इत्ययुक्तमिति । तत्त्वमस्ययमात्मा ब्रह्मेत्युपदेशोऽभेद-
निषेधश्च कथमित्यत्राह । प्रत्यक्षादीति । अयं भावः । यद्यपि
जीवपरभेदश्रुतिमात्रमवस्थाद्वयविषयमिति शङ्कितुं शक्येत तथा-
ऽप्येकैकस्यामेवावस्थायां जीवादन्यः परः प्रतिपाद्यते जागरे ताव-
त्तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति तथा च सूत्रं
स्थित्यदनाभ्यां चेति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति
मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक
इति चोच्यते स्वप्ने च य एष सुप्तेषु जागर्ति कामं पुरुषो निर्मिमाण
इति तत्र च स्वतन्त्रपरतन्त्रविभागव्यञ्जकं सूत्रं पराभिध्यानात्तु
तिरोहितं. ततो ह्यस्य बन्धविपर्ययाविति सुषुप्तिप्राज्ञयोश्च प्राज्ञे-
नात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति प्राज्ञेनात्म-
नान्वारूढः उत्सर्जन् यातीति च तत्रापि सूत्रं सुषुप्त्युत्क्रान्त्योर्भेदेनेति
मुक्तावस्थायामपि सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चि-
तेति अत्र यदि भोक्तृसाहित्यमभिप्रेतं तदा सुव्यक्त एव भेदः, यदा
तु प्रस्तुतब्राह्मणपदविवरणक्रमेण भोगसाहित्ये तात्पर्यं तदापि

भोक्तृभोग्यस्य च स्वाभाविकी भेदधीर्न बाधमर्हति ब्राह्मणस्यपरशब्दानुग्रहाच्च । एवं परात्परं पुरुषमुपैति दिव्यमितीत्यादि । एतदपि सूचितं मुक्तोपसृप्यव्यपदेशाच्चेति । ब्रह्म वेद ब्रह्मैव भवतीत्यादिवाक्यन्तु निरञ्जनः परमं साम्यमुपैतीति मुक्तविषयतयैव प्राकरणिकेन वाक्येन परमसाम्यतत्परतया स्थापितार्थं, परमसाम्यञ्च भोगमात्रसाम्यलिङ्गाच्चेति सूत्रेण नियमितं, श्रुत्यन्तरे च तादृगेव भवतीति निर्दर्शितं विष्णुरेव भूत्वेत्यादिन्यायाच्च मोक्षधर्मे च । परेण परधर्मा च भवत्येष समेत्य वै । इत्यादिभिः परमसाम्यमेव प्रदर्शितम् अनेन साम्यं यास्यामीति च मुमुक्षोरभिसन्धिरप्यधीयते स्वयञ्चागीयत मम साधर्म्यमागता इति । इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरिति जीवब्रह्मतादात्म्योक्त्याऽनिष्टप्रसङ्गमाशङ्क्य अधिकन्तु भेदनिर्देशादिति च प्रत्युक्तं स्रष्टृस्रज्यस्य भेदः श्रुत्यैव हि निर्दिश्यते अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति एवं प्रस्पष्टार्थसूत्रप्रतिष्ठापितश्वरसार्थानां भेदश्रुतीनां न त्वदभीष्टवत् प्रत्यक्षादिविरोधः प्रत्युतानुगुण्यमेव तस्मादेवं विधनिर्बाधानन्यपरबहुविधश्रुत्यनुसारेण जीवपरसामानाधिकरण्यस्य भेदनिषेधस्य च निर्वाहे संभवति निर्दोषकल्याणगुणाकरे ब्रह्मण्यविद्यादिदोषमाविष्कुर्वन्नात्मीयामसूयामेवाविष्करोषि तन्निर्णीतञ्च मोक्षधर्मान्ते परस्य बन्धप्रसङ्गरहितत्वमितरस्य बन्धमोक्षभागित्वञ्च ।

तत्र यः परमात्मा तु स नित्यो निर्गुणो मतः ।
स तु नारायणो ज्ञेयस्सर्वात्मा पुरुषो हि सः ॥
न लिप्यते कर्मफलैः पद्मपत्रमिवाम्भसा ।
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैस्स युज्यते ॥ इति ॥ ४० ॥

इत्यविद्याकल्पकश्रुतार्थापत्तिभङ्गः ।

Digitized by Google

आम्नां श्रुतार्थापत्तिः श्रुतिभिरेव भावरूपत्वानं सिध्यतीत्यथाह । मायेति ।

मू० मायाविद्यादिशब्दैः प्रकृतिरभिमता* ज्ञानकर्मादयो वेत्येतत्तत्तत्प्रदेशे स्फुटविदितमतो न त्वदिष्टास्त्यविद्या । किञ्चाविद्यादिशून्यः पर इति विविधाम्नायकण्ठोक्तमर्थं क्षेप्तुं मायादिशब्दः भ्रम इति वदतः स्यादविद्या तवैव ॥ ४१ ॥

टी० मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरमित्यत्र प्रकृतेर्मिथ्यात्वं प्रतिपाद्यते यथाक्रममुद्देश्योपादेयस्थापनोपपत्तेः । अत्र हि पूर्ववाक्यस्थमायामायिशब्दार्थबुभुत्सायां प्रसिद्धार्थप्रकृतिमहेश्वरशब्दाभ्यां संशयादिरपाचिकीर्ष्येत अन्यथा उद्देश्योपादेयक्रमविपर्यासः तथा चाहुः यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमिति न च मायाशब्दो मिथ्यावाची लोकवेदनिघण्टुपाठाभावात् क्वचित्प्रयोगस्तु भाक्तः स्यात् अन्यथा देवमायेव निर्मिता । स्वमायया सांप्रतमागतं वा । ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम् । तेन माया सहस्रं तदित्यादिभिर्विरुध्येत । नीतिशास्त्रेषु च मुख्यामुख्यसंकलनेन सप्तविधोपायपरिगणने मायेन्द्रजालयोरन्यथा करणान्यथाप्रतिभावनसामर्थ्यरूपतया विभागसिद्धेः । मन्त्रौषधादिविशेषवति च मायावीति प्रयोगः । न तु क्वचिदपि मिथ्यार्थसंबन्धिनि तिमिरादिभावितरज्जुसर्पादौ च मायाशब्दो न दृष्टचरः स्वमतव्यामोहितानां प्रयोगस्त्वनादेयः मायां न सेवे भद्रन्ते न वृथा धर्ममाचरे । मायाविनं मायया

* रभिहितेति पा० ।

आह। 'उपधालोपे कृतइति'। उपधाया एव पर्यायेणेत्त्वं माभूदिति अभ्यासस्य ग्रहणम्, आकारलोपेनाङ्गस्याग्लोपित्वाल्लघुनश्च परस्यासंभवात्सन्वल्लघुनीतीत्त्वदीर्घत्वयोरभावादीत्त्वविधिः, तिपा निर्देशो यङ्लुग्निवृत्त्यर्थः॥

"तिष्ठतेरित्"॥ 'अतिष्ठिपदिति'। णौ कृतस्येत्त्वस्य स्थानिवद्भावात्स्थाशब्दस्य द्विर्वचनं, सन्वद्भावादभ्यासस्येत्त्वं, तिपा निर्देशः पूर्ववत्॥

"ऊर्ऋत्"॥ 'उपधाया ऋवर्णस्येति'। यथात्तर्हि तीर्थग्रहणं कस्मान्न भवति, माभवानर्पिपदिति यथा स्यादिति, तपरकरणात्, तर्हि दीर्घेऽपि स्थानिनि ह्रस्व एव यथा स्यादिति। 'इररारामपवाद इति'। कृत संशब्दने इत्यस्य ऋत इद्धातोरितीत्त्वं प्राप्नोति, वृतु वर्त्तनइत्यादीनां गुणः, मृजेर्वृद्धिस्ते च रपराः सन्त इररारा भवन्ति। 'अचिकीर्त्तदिति'। णौ कृतमपीत्त्वं न स्थानिवद्भवति, यत्र द्विरुक्ते परभागस्याऽऽदेशाद्यवर्णस्तत्र स्थानिवत्त्वं, तथा च ओः पुयण्ज्यपरइति ज्ञापकमप्येतादृशमेव, ननु चान्तरङ्गा इररारः, णिज्माचापेक्षत्वात्, ऋकारस्तु बहिरङ्गः, स हि पश्चाद्भाविनं चङमपेक्षते, तत्कथं तेनैते बाध्यन्ते ऽत आह। 'वचनसामर्थ्यादिति'। यद्यन्तरङ्गत्वादिररारः स्युर्व्यर्थमेवेदं वचनं स्यात्। 'तपरकरणमित्यादि'। असति तस्मिन्यत्र स्थानी दीर्घस्तत्रान्तरतम्याद्दीर्घ एव स्यात्। ननु भाव्यमानोण् सवर्णान्न गृह्णाति, तत्कथं दीर्घस्य प्रसङ्गो ऽत आह। 'न चायमिति'। असति तपरकरणइति भावः। कथमभाव्यमानोत आह। 'आदेशान्तरेति'। अयमभिप्रायः। प्राप्तप्रतिषेधस्य प्रतिप्रसवे संभवति नापूर्वविधानं युक्तमिति तावन्न्यायः, ततश्चासति तपरकरणे आदेशान्तराणामिररारां निवृत्त्यर्थं यथावस्थितमृवर्णस्वरूपमेवाभ्यनुज्ञायेत, संभावने लिङ्, संभवति च सवर्णग्रहणे सति स्वरूपाभ्यनुज्ञानं, तत्र स्वरूपमेवाभ्यनुज्ञायतामिति सवर्णग्रहणं स्यात्तपरकरणे तु सति स्वरूपाभ्यनुज्ञानं न संभवति, अतो भाव्यमानत्वसंपत्तये तपरकरणमिति। प्रायेण त्वभ्यनुज्ञायतइति लङन्तं पठ्यते, न तत्र समीचीनोऽर्थः, क्रियमाणानुवादे हि

लङ् भवति, अन्ये तु व्याचक्षते आदेशान्तरनिवृत्त्यर्थं स्वरूपमेवाभ्यनुज्ञायतइति एवमापद्येतेति ॥

"दयतेर्दिगि लिटि" ॥ 'अवदिग्यइति' । देङ् रक्षणे, ङित्त्वादात्मनेपदम्, एरनेकाच इति यण् । न तु दयतेर्[1]त्यस्येति । दय दानगतिरक्षणेष्वित्यस्य । 'तस्य लिट्याम्विहित इति' । दयायासश्चेत्यनेन । 'दिग्यादेशेन द्विर्वचनस्य बाधनमिष्यतइति' । नाप्राप्ते तस्मिन्नस्यारम्भात् । ननु दयतेः प्राप्तं द्विर्वचनं बाध्यतां दिग्यादेशस्य तु स्थानिवद्भावेन द्विर्वचनं प्राप्नोति तत्कथं बाध्यते, नहि तस्मिन्नप्राप्ते तस्यारम्भः । उच्यते । बाध्यबाधकभावे हि द्वैतं, लक्ष्यं वा लक्षणेन बाध्यते[2] लक्षणं वा तेनेति, तत्राद्ये पक्षे स्यादेतच्चोद्यं, द्विर्वचनशास्त्रस्याबाधितत्वात्, द्वितीये तु द्विर्वचनशास्त्रमेवास्मिन् विषये दिग्यादेशशास्त्रेण बाधितमिति कृतेपि दिग्यादेशे नास्ति द्विर्वचनस्य प्रसङ्गः, यद्येवमस्तेर्भूः, बभूव, अत्र द्विर्वचनं न स्यात्, अनवकाशा हि विधयो बाधका भवन्ति, सावकाशश्चायं, कोऽवकाशः, भविता भवितुं. यस्तर्हि लिट्येव विधीयते चक्षिङः ख्याञ्, वा लिटीति, तत्र द्विर्वचनं न प्राप्नोति आचख्यौ । नैष दोषः । आर्द्धधातुके लिटीति विषयसप्तमी, ततश्च द्विर्वचननिमित्तस्य लिट उत्पत्तेः प्रागेव ख्याञादेशः, पश्चाल्लिटि परतो द्विर्वचनम्, इह तु परसप्तम्याश्रयणाच्चाप्राप्ते द्विर्वचने दिगिरारभ्यमाणस्तद्बाधते, एवमन्यत्रापि, यत्र बाधो नेष्यते तत्र लक्ष्यबाधो वक्तव्यः, विषयसप्तमी वाश्रयणीया ॥

"ऋतश्च संयोगादेर्गुणः" ॥ 'सस्वरतुरित्यादि' । स्वृ शब्दोपतापयोः, ध्वृ हूर्च्छने, स्मृ चिन्तायाम्, अत्र परत्वाद्गुणे कृते पश्चाद् द्विर्वचनमिति गुणविधानसमये संयोगादित्वमङ्गस्य, यद्वा द्विर्वचने हलादिःशेषे कृते सांप्रतिकासंभवाद्भूतपूर्वसंयोगादित्वमाश्रित्य गुणः । 'प्रतिषेधविषयइति' । णलि उत्तमे णलि णित्त्वाभावपक्षे च सामान्यलक्षणो नैव गुणः सिद्धः, सस्वर्थ, अहं किल सस्वर । वृद्धिविषये तर्हि परत्वादयमेव गुणः

१ दय दानइत्यस्येति मु· मू· पु· पा· ।
२ परत्वादित्येवेति पा· २-३ पु· ।

प्राप्नोति तत्राह । 'वृद्धिविषये स्वित्यादि' । गुणस्यावकाशः सस्वरतुः । णिति वृद्धेरवकाशः कारको हारकः, सस्वारेत्यादौ वृद्धिविषये पूर्वविप्रतिषेधः, ननु च परत्वाद्गुणेऽपि कृते तस्मिन्नत उपधाया इति सिद्धं, सत्यं, परिहारान्तरं त्विदं द्रष्टव्यं, तपरकरणं निर्देशार्थं दीर्घस्य स्वातस्तहरित्यादावुत्तरसूत्रेण गुणो भवत्येव, न च तस्या अपि प्राप्तेः संयोगादिषु तपरकरणसामर्थ्याद्व्यावृत्तिर्निर्देशार्थतया तस्योपपत्तेः । 'संयोगादेरित्यादि' । अङ्गस्यासंयोगादित्वाद्वचनम् । उपधाग्रहणं देशविशेषोपलक्षणम्, अल्मात्रस्योपधासंज्ञाविधानात्संयोगस्योपधात्वासंभवात्, संयोगावयवे वा संयोगशब्दो वर्त्तते, उपधात्वं तु मुख्यम् । 'सञ्चस्करतुरिति'। संपर्युपेभ्यः करोतौ भूषणे, अडभ्यासव्यवायेपीति सुट्, यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन, इहापि सस्वरतुः सस्वहरिति, संयोगोपधस्येत्येव सिद्धं, भवेत्सिद्धं सस्वरतुः सस्वहरिति, इदं तु न सिद्ध्यति सञ्चस्करतुः सञ्चस्कहरिति, किं कारणं, बहिरङ्गलक्षणत्वात्, बहिरङ्गः सुट्, अन्तरङ्गो गुणः, कथं सुटो बहिरङ्गत्वमत आह । 'अत्र हीति' । अत्र दर्शने साधनाभिधायी लिट् तावद्भवति, ततश्च तावत्येव निमित्तमस्तीति गुणः प्राप्नोति, सुट् तु पश्चादुपनतमुपसर्गमपेक्षतइति बहिरङ्गः, तेनासौ गुणे कर्त्तव्ये ऽसिद्ध इति असंयोगोपधत्वाद्गुणो न स्यात्, सस्वरतुरित्यादौ च सावकाशं वचनं संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्रहणस्यानन्यार्थत्वादसिद्धत्वं बाध्यतइति गुणसिद्धिः, अवश्यं च सुटो बहिरङ्गत्वमेषितव्यमित्याह । 'एवं च कृत्वेति' । सुट्कात्पूर्व इत्यत्रोक्तं कात्पूर्वग्रहणं सुटो ऽभक्तत्वज्ञापनार्थमिति, इह तु भाष्यकारपक्षावलम्बनेन भक्तत्वेपि परिहार उक्त इति न विरोधः ॥

"ऋच्छत्यृताम्" ॥ ऋच्छ गत्यादिषु, ऋर्त्तेरप्यत्र प्रश्लेषः, यदाह । 'ऋ इत्येतस्येति' । एतच्च बहुवचननिर्देशादवसीयते, ऋवर्णस्य ग्रहणं तु न भवति, ऋकारान्तानां पृथग्ग्रहणात्, किमर्थं पुनरर्त्तेः प्रश्लिष्यते, आरतुरारुरिति यथा स्यात्, अन्यथा ऋ अतुस् ऋ उस् इति स्थिते द्विर्वचनम्, उरदत्वं च बाधित्वा वार्णत्वात्सवर्णदीर्घत्वं, तत्र यद्यभ्यासग्रह-

Digitized by Google

णेन ग्रहणमुरदत्वं हलादिशेषः, अत आदेरिति दीर्घत्वम्। आतो लोप इटि च, आतुरिति[1] वचनमेव ब्रूयेत, अथ धातुग्रहणेन ग्रहणं, तत ऋकारान्तत्वाद्गुणे कृते आरतुरारुरिति रूपं स्यात्, तथा क्वसौ गुणे कृते अरित्यस्य द्विर्वचनं हलादिशेषः, अत आदेः, सवर्णदीर्घत्वं, वस्वेकाजाद्घसामितीट्, आरिवानिति भवति। 'ऋच्छतेरलघूपधत्वाद् गुण इति'। अन्तरङ्गत्वाच्छे चेति तुकि कृते संयोगे गुर्विति ऋकारो गुरुर्भवति, न च लघुः नाप्युपधा। 'ऋतां त्विति'। सूत्रवदत्राप्यर्तिप्रश्लेषः। 'वृद्धिविषये त्विति'। अस्तु वा परत्वाद्गुणः, अत उपधाया इति सिद्धमिति परिहारान्तरम्॥

"शॄदॄपॄां ह्रस्वो वा"॥ शॄ हिंसायां, दॄ विदारणे, पॄ पालनपूरणयोः। 'विशशरतुरित्यादि'। न शसददवादिगुणानामित्येत्वाभ्यासलोपयोः प्रतिषेधः। अथ किमर्थं ह्रस्वो विकल्प्यते, न प्रकृत एव गुणो विकल्प्यते, गुणाभावपक्षे यणादेशेन विशश्रतुरित्यादिरूपसिद्धिरित्यत आह। 'ह्रस्ववचनमित्त्वनिवृत्त्यर्थमिति'। अन्यथा वार्णादाङ्गं बलीय इति वर्णाश्रयमन्तरङ्गमपि यणं बाधित्वा इत्वं स्यात्। 'केचिदित्यादि'। कथं पुनरस्य प्रत्याख्याने विशश्रतुरित्यादिरूपसिद्धिरित्यत आह। 'आ पाक इत्यादि'। ननु चार्थभेदो नेत्याह। 'अनेकार्था इति'। तथा सतीत्यादिना प्रत्याख्यानं प्रत्याचष्टे, तत्र शृणातेः क्वसौ विशशर्वानिति श्रातेस्तु विशश्रिवानिति, तस्माद् ह्रस्व एव विकल्पनीय इत्यर्थः॥

"केऽणः"॥ 'ज्ञकेति'। भस्त्रैषाजाज्ञेतीत्वप्रतिषेधः। 'गोकेति'। अणिति पूर्वेण णकारेण प्रत्याहार इति लणित्यत्र प्रतिपादितम्। 'राका धाकेति'। कृदाधारार्चिकलिभ्यः कः। 'कनोपीति'। सानुबन्धकस्योपलक्षणमेतत्, धोर्दुङ्खे ठञ्, नैषादकर्षुकः॥

"न कपि"॥ बहुकुमारीक इत्यादौ नद्यृतश्चेति कप्, अथाप्यस्मिन्प्रतिषिद्धे उपसर्जनह्रस्वत्वं कस्मान्न भवति, अत एव प्रतिषेधात्,

१ आतुरिति द्विर्वचनमेव ब्रूयेत इति· ग· ३· पु· पाठः।

Digitized by Google

नायमस्य ह्रस्वस्य प्रतिषेधः, किन्तर्ह्यनन्तरस्य केवा इत्यस्य, कुत एतत्, अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति, एवं तर्ह्याह । 'अयं कपि ह्रस्वो न भवतीति'। यदि चोपसर्जनह्रस्वत्वं स्यात् वचनमिदमनर्थकं स्यादतो वचनसामर्थ्यादाद्यश्च यावच्च ह्रस्वत्वं तस्य सर्वस्य प्रतिषेधो भविष्यति, अस्ति वचनस्यावकाशो यत्रोपसर्जनह्रस्वत्वं न प्राप्नोति, अस्त्रीप्रत्यये बहुयवागूको बहुलक्ष्मीक इति, स्त्रीप्रत्यये उपसर्जनह्रस्वत्वं स्यादेव तथाह । 'गोस्त्रियोरुपसर्जनस्येत्ययमपीति'। कुत इत्यत आह । 'समासार्थे हीति'। समासान्ता इत्यत्रान्तशब्दोवयववचनः, कथं च कप्समासावयवो भवति, यदि तेन सह समासो भवति, कथं च तेन समासो भवति, यद्यकृतएव समासे, तदर्थादुत्तरपदात्कप् भवति पश्चात्तदन्तेन समासः । ननु च कपः पूर्वं सुबन्तं तत्कथं कबन्तेन समासः, वचनात्समासान्तेष्वसुबन्तेन समासः । अपर आह । उत्तरपदे या विभक्तिस्तस्याश्च या प्रकृतिस्तयोर्मध्ये विकरणवत्समासान्तः, तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्सुबन्तेन समास इति, एवं वदतो दोषः, बहुचर्मिकेत्यादौ प्रत्ययस्थादितीत्वं न स्यात्, किं कारणं, कात्परः सुप्ततः परष्टाप्, यथा बहुपरिव्राजका मथुरेति, यदि कपि कृते पश्चात्तदन्तेन समासः किमायातमित्यत आह । 'स्त्रीप्रत्ययान्तं समासप्रातिपदिकं न भवतीति'। गोस्त्रियोरित्यत्र प्रातिपदिकस्येति वर्तते, स्त्रीप्रत्ययान्तस्य च प्रातिपदिकत्वं समासे सति, न चोक्ते प्रकारे कपः पूर्वभागस्य समासत्वं प्रातिपदिकत्वं वा समस्ति, तस्मान्नोपसर्जनह्रस्वत्वमिति ॥

"ऋदृशोऽङि गुणः" ॥ ऋ इति वर्णग्रहणं, व्याख्यानात्, अकरदित्यादौ कृमृदृरुहिभ्यश्छन्दसीति च्लेरङ् । 'असरदिति'। सर्तिशास्त्यर्तिभ्यश्चेत्यङ् । 'अदर्शदिति'। इरितो वेत्यङ्, गुणग्रहणं किं, नाकार एवोच्येत ऋदृशोऽङ इति, नैवं शक्यं, दृशेरन्त्यस्यात्वं स्यात्, गुणग्रहणात्त्विको भवति, यदि त्वत्र इत्यनुवर्तते शक्यं गुणग्रहणमकर्तुं, तथा तु न कृतमित्येव ॥

"अस्यतेस्थुक्" ॥ 'आस्थदिति'। अस्यतिवक्तिख्यातिभ्योऽङ् ॥

"श्वयतेरः" ॥ 'अश्वदिति'। जृस्तम्भ्वित्यादिनाङ् ॥

"पतः पुम्" ॥ 'अपप्तदिति' लृदित्वादङ् ॥

"शीङः सार्वधातुके गुणः" ॥ अनुबन्धनिर्देशो यङ्लुकि माभूदिति, शेशीतः, शेश्यतीति, शीङ एरित्युच्यमाने सानुबन्धकात् षष्ठ्युच्चारिता, अनुबन्धश्च निवृत्तिधर्मा, तस्य लोपेन निवृत्तो प्राप्तायामयमन्यः प्रकारो विज्ञायेत, नास्य लोपो निवर्त्तकः किं तर्ह्येकार इति, गुणग्रहणं त्वेकं निवर्त्तयति, ङकारस्तु स्वेनैव हेतुना निवर्त्तते, तस्माद्गुणग्रहणम् ॥

"अयङ् यि क्ङिति" ॥ 'शय्यतइति'। यक्। 'शाशय्यतइति'। यङ्, परत्वान्नित्यत्वाच्चायङादेशे कृते द्विर्वचनम्। 'प्रशय्येति'। ल्यप् ॥

"उपसर्गाद् ध्रस्व ऊहतेः" ॥ ङितोसंभवादुदाहरणं न प्रदर्शितं, यङस्तावदजादित्वादसम्भवः, यासुटोपि शपा व्यवधानात्, आशिषि तु किदेव यासुट्, एवं चोहतेर्दीर्घप्रयोगनिवृत्त्यर्थं वचनम्, समुह्यतइत्यादि कं तु रूपं वहेरेव संप्रसारणे कृते सिद्धमनेकार्थत्वाद्धातूनामर्थभेदोप्यकिंचित्करः। 'आ ऊह्यतइति'। नेदं लौकिकं वाक्यं प्रयोगार्हं, नहि तत्र धातूपसर्गयोरसंहितास्ति। संहितैकपदेनित्या नित्याधातूपसर्गयोरिति स्मरणात्। तस्मादलौकिकेन प्रक्रियावाक्येनाङःप्रश्लेषः प्रदर्श्यतइति ह्रस्वत्वं न कृतं, लौकिकप्रयोगसंपादनपरत्वाच्छास्त्रस्य, अन्ये त्वत्रापि ह्रस्वत्वं पठन्ति। 'ओह्यतइति'। अत्रैकादेशे कृते व्यपवर्गाभावाद् ध्रस्वाभावः, उपसर्गादूहतेरित्युभयत आश्रयणादन्तादिवद्भावोपि नास्ति। 'समोह्यतइति'। अत्रैकादेशस्यादिवद्भावात्समः परस्य ह्रस्वत्वप्रसङ्गः, अण इत्यनुवृत्तेस्तु न भवति, पूर्वणैव णकारेण प्रत्याहारः, एवं च रूपाश्रयोयं विधिरिति तादूप्यानतिदेशाद् ध्रस्वाभावः ॥

"एतेर्लिङि" ॥ आशिषि लिङीत्यादिना सूत्रस्य विषयं दर्शयति, सार्वधातुके हि लिङि दीर्घत्वमिणो न सम्भवति। ननु च सवर्णदीर्घत्वे सति संभवति अभीयात् प्रतीयात् परीयादिति, नात्र ह्रस्वत्वेन भवितव्यं, किं कारणम्, उपसर्गादेतेरित्युभयत आश्रयणादन्तादिवद्भावाभावात्। आईयादित्याद्याऊह्यतइत्यादिना व्याख्यातम् ॥

Digitized by Google

"अकृत्सार्वधातुकयोर्दीर्घः" ॥ 'अकृद्यकार इति' । यकारमात्रस्य प्रत्ययस्यासंभवादकृति असार्वधातुके च यकारादावित्यर्थः । 'भृशायतइति' । भृशादिभ्यो भुव्यच्वेरिति क्यङ् । 'सुखायतइति' । सुखादिभ्यः कर्तृवेदनायाम् । 'चीयतइति' । यक् । 'चेचीयतइति' । यङ् । 'तोष्टूयतइति' । शर्पूर्वाः खयः । 'चीयादिति' । आशिषि लिङ् । 'निश्चित्य प्रस्तुत्येति' । ल्यबयं कृत्संज्ञकः । ननु चाजन्तस्य दीर्घो विधीयते, इह च तुकि कृतेनजन्तत्वाद्दीर्घो न भविष्यत्यत आह । 'परत्वादिति' । तुकोवकाशः, अग्निचित्सोमसुत्, दीर्घस्यावकाशः, चीयते स्तूयते, निश्चित्य प्रस्तुत्येत्यत्र परत्वात्तुग् दीर्घत्वेन बाध्यते, प्रायेण तु प्रकृत्य प्रहृत्येति पाठस्तत्रोत्तरसूत्रेण रीङः प्रसङ्गाद् दीर्घत्वेन तुको बाधः स्यादित्ययुक्तं स्यात्, आद्यप्राप्त्यभिप्रायेण वा व्याख्येयम् । 'चिनुयादिति' । विध्यादिलिङि । 'उरुया धृष्णुयेति' । सुपां सुलुगित्यादिना यादेशः ॥

"रीङ् ऋतः" ॥ 'पित्र्यमिति' । पितुर्यच्चेति यत्प्रत्ययः, रीङादेशे कृते यस्येति लोपः । कथं पुनः क्ङितीत्यनुवर्त्तमानेऽत्र रीङादेशो भवत्यत आह । 'क्ङितीत्येतदिह निवृत्तमिति' । 'चेक्रीयतइति' । कृ विक्षेपे, यङ्, ऋत इद्धातोः, हलि चेति दीर्घः । १ 'जेगिल्यतइति' । अत्र ग्रो यङीति लत्वे कृते रेफाभावाद् दीर्घाभावः, अथ रीङिति किमर्थं, न रिङेवोच्येत, अकृत्सार्वधातुकयोः च्वौ चेति दीर्घो भविष्यति, तत्रायमप्यर्थः, उत्तरत्र रिङ्ग्रहणं न कर्तव्यं भवति, तथा यग्लिङोरपि ग्रहणं न कर्त्तव्यं भवति, शे चेत्येव वक्तव्यं, चकारादकृत्सार्वधातुकयकारे च, यद्येवं यथा मात्रीयतीत्यादौ दीर्घो भवति तथा यग्लिङोरपि स्यात्, क्रियते, क्रियादिति, अथ तत्र नाप्राप्ते दीर्घे रिङ् विधीयमानो दीर्घत्वं बाधतइति उच्येत तर्हि क्यजादिष्वपि बाधेत, अथ मतम्, ऋवर्णदीर्घत्वं तावद्बाध्यतां रिङस्तु कथं बाध्यते, नहि तत्र नाप्राप्ते दीर्घे स आरभ्यतइति, यग्लिङोरपि तर्हि न बाधेत, तस्मात्क्यजादिषु दीर्घस्य यग्लिङोस्तु ह्रस्वस्य श्रवणं यथा स्यादिति पृथगादेशद्वयं वक्तव्यम् ॥

१ जेगिल्यतइत्यारभ्य दीर्घाभाव इत्यन्तं पाठः २-३-पुस्तकयोर्नास्ति ।

Digitized by Google

"रिङ् शयग्लिङ्क्षु" ॥ यिग्रहणमकृत्सार्वधातुकग्रहणं चानुवर्त्तमानं संभवव्यभिचाराभ्यां लिङ एव विशेषणं न शयकोः । 'आद्रियते आध्रियतइति' । दृङ् आदरे, धृङ् अवस्थाने, तुदादित्वाच्छः, रिङि कृते इयङादेशः । [1]'रिङ्वचनं दीर्घनिवृत्त्यर्थमिति' । रिङि कृते अकृत्सार्वधातुकयोरिति दीर्घत्वं प्राप्नोति तस्यापि निवृत्त्यर्थमिति भावः ॥

"गुणोऽर्त्तिसंयोगाद्योः" ॥ ऋ गतिप्रापणयोः भ्वादिः, ऋ सृ गतौ जौहोत्यादिकः, द्वयोरप्ययं छान्दसत्वाल्लुका निर्देशः, ऋच्छतीति निर्देशे इयर्त्तेर्न स्यात्, इयर्त्तीति निर्देशे ऋच्छतेर्न स्यात्, ऋग्रहणमेव तु न कृतं वैचित्र्यार्थं, न चैवमुच्यमाने वर्णग्रहणशङ्का, ऋत इत्यनुवृत्तेः । 'श इत्येतद्वि[2]हासंभवान्निवृत्तमिति' । नह्यर्त्तिः संयोगादिर्वा धातुस्तुदादिषु पठ्यते, संस्क्रियते संस्क्रियादित्यत्र सुटि कृते संयोगाद्यङ्गमिति गुणप्रसङ्ग इत्यत आह । 'इहेति' । बहिरङ्गत्वं सुटो द्विपदाश्रयत्वात्, इदं तु पूर्वं धातुः साधनेनयुज्यतइत्याश्रित्योक्तं, पक्षान्तरेण्याह । 'अभक्तत्वाद्वेति' । 'इयृयादिति' । विध्यादिलिङ्, शपः श्लुः, द्विर्वचनम्, अर्त्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम्, अभ्यासस्यासवर्णे इतीयङ्, अकारएव वक्तव्ये गुणग्रहणं चिन्त्यप्रयोजनम् ॥

"यङि च" ॥ 'घ्नीभाव इति' । प्रक्रियालाघवाय घकारोच्चारणं, ह्नीभावविधावभ्यासाच्चेति कुत्वे गौरवप्रसङ्गात् । 'जेघ्नीयतइति' । द्वियादेशेनैव घ्नीभावेन द्विर्वचनं न बाध्यते, विषयभेदात्, यङन्तस्य द्विर्वचनं प्रकृतिमात्रस्य घ्नीभावः । 'जङ्घन्यतइति' । गत्यर्थोऽयम् ।

"ई घ्राध्मोः" ॥ ईकार विधावप्यकृत्सार्वधातुकयोर्दीर्घः ।

"अस्य च्वौ" ॥ च्वौ चेति दीर्घे सिद्धे ईकारविधानं प्रक्रियालाघवार्थम् ।

"क्यचि च" ॥ 'पृथग्योगकरणमुत्तरार्थमिति' । न छन्दस्यपुत्रस्येत्यादि क्यच्यत्र यथास्यात् च्वौ माभूदिति ।

१ असंभवाचानुवर्त्तते इति मुद्रितमूलपुस्तके पाठः ।
२ अयं ग्रन्थो मुद्रि॰ मू॰ पु॰ नोपलभ्यते ।

Digitized by Google

"अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु" ॥ 'एतेष्वर्थेष्विति'। गम्यमानेषु यस्तदानीमेव बुभुक्षमाणोऽशनमिच्छति तद्विषयमुदाहरणं, यस्तु तदानीं सुहित एव कालान्तरार्थमशनमिच्छति तदत्र प्रत्युदाहरणम्। 'उदकीयतीति'। स्नानाद्यर्थमुदकमिच्छतीत्यर्थः। 'धनायतीति'। अभिलाषातिरेको गर्धः, सत्येव धने भूयोऽपि धनमिच्छतीत्यर्थः। 'धनीयतीति'। दरिद्रः सन्धनमिच्छति।

"न छन्दस्यपुत्रस्य" ॥ इहानन्तर्यादीत्वस्यैव प्रतिषेधः प्राप्नोति, ततश्चापवादेऽपनीते उत्सर्गोऽकृत्सार्वधातुकयोरिति दीर्घः प्राप्नोतीत्याशङ्क्याह। 'क्यचि यदुक्तं तन्न भवतीति'। किं पुनस्तदित्यत आह। 'दीर्घत्वमीत्वं चेति'। एवं मन्यते, यदयमश्वाघस्यादित्यात्वं शास्ति तज्ज्ञापयति दीर्घस्याप्ययं प्रतिषेध इति, अन्यथा दीर्घेणैव सिद्धत्वादात्ववचनमनर्थकं स्यादिति, मित्रयुरित्यादौ क्याच्छन्दसीत्युप्रत्ययः, पुत्रमिच्छन्तः पुत्रीयन्तः, जनमिच्छन्तो जनीयन्तः, लटः शत्रादेशः, उगिदचामिति नुम्, अपरे त्वाहुः। जनीमिच्छन्तो जनीयन्तः, जनीति वधूवच्यतइति, तथाविग्रहस्य प्रयोजनान्तरं मृग्यम् ॥

"दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति" ॥ 'दुष्टीयितेति प्राप्ते इति'। भाषायां प्राप्तिरुच्यते, तत्र उप्रत्ययाभावात् तत्समानार्थस्तृच् प्रयुक्तः, प्रायेण तु लडन्तं पठ्यते, तत्र प्रकृतिमात्रे तात्पर्यम् ॥

"अश्वाघस्यात्" ॥ 'एतदेवेत्यादि'। पूर्वमेवैतद्व्याख्यातम् ॥

"देवसुम्नयोर्यजुषि काठके" ॥ वेदवचनोऽत्र यजुःशब्दः, न मन्त्रवचनः, कठानामिदं काठकं, गोत्रचरणाद्वुञ्, काठके यजुषि कठशाखायामित्यर्थः, एवं च कृत्वा ऋगात्मके यजुषि मन्त्रे कठशाखायामात्वं भवति, तथा ऋग्वेदेऽपि भवति स चेन्मन्त्रः काठके दृष्टः। 'देवान् जिगाति सुम्नयुरिति'[1]। बह्वृचानामप्यस्ति कठशाखा, ततो भवति प्रत्युदाहरणम्। अनन्ता वै वेदाः ॥

---

१ तदात्वइति पाठः २-३ पुस्तकयोः।

"द्यतिस्यतिमास्थामित्ति किति" ॥ दोऽवखण्डने, षोऽन्तकर्मणि, मा माने, माङ् माने, मेङ् प्रणिदाने, त्रयाणामपि ग्रहणं, गामादाग्रहणेष्वविशेषात्। 'अवदा²येति'। ल्यप्। 'अवदातेति'। तृच्, द्यतिस्यतीति श्तिपा निर्देशो धातुविशेषणार्थः॥

"शाछोरन्यतरस्याम्" ॥ शो तनूकरणे, छो छेदने। 'श्यतेरिति'। व्रतइति विषयो निर्दिश्यते, नोत्तरं पदं, तेन संशितो ब्राह्मण इत्यत्रापि नित्यमित्वं भवति। 'संशित इति'। व्रतविषये यवषानुच्यते। 'संशितव्रत इति'। बहुव्रीहिः। सम्यक्संपादितव्रत इत्यर्थः। व्रतादन्यत्रापीत्वं भवति, व्रते तु नित्यमिति, संशितशब्दस्य सामान्यशब्दत्वाद्विहृतो व्रतशब्दस्य प्रयोगः। 'व्यवस्थितविभाषाविज्ञानात्सिद्धमिति'। क्वचिन्नित्यं प्रवृत्तिः, क्वचिद्विकल्पेन, क्वचिन्नैव प्रवृत्तिरित्येवं विविधमवस्थिता विभाषा व्यवस्थितविभाषा, व्यवस्थितविभाषाणां दिङ्मात्रं श्लोकेन दर्शयति। 'देवत्रात इति'। क्तिच्क्तौ च संज्ञायामिति क्तः, नुदविदोन्दत्रेति नत्वं संज्ञायां न भवति, देवग्रहणस्योपलक्षणत्वाद्भवत्रात इत्यादावपि संज्ञायां नत्वाभावः, क्रियाशब्दे तु त्रातं त्राणमित्युभयं भवति। 'गल इति'। अचि विभाषेति लत्वम्, प्राण्यङ्गे नित्यं भवति, गिरत्यन्नमिति गलः, विषे तु नैव भवति, गीर्यते शरीरार्थिभिरिति गरः, क्रियाशब्दे तूभयं भवति गरो गल इति। 'ग्राह इति'। विभाषा ग्रह इति जलचरादिषु पचाद्यजेव भवति। ग्रहणइति क्रियाशब्दे तु पूर्ववत्। 'इतियोगइति'। हन्तीति पलायते, वर्षतीति धावतीत्यादाविति-प्रयोगे लक्षणहेत्वोः क्रियाया इति शतृशानचौ न भवतः। 'मिथ इति'। एकस्मिन्विषये न विकल्प्यन्ते किं तु विषयभेदेन, एतच्चाकृतिपक्षउपपद्यते, तत्र हि सर्वं लक्ष्यजातं युगपदभिसमीक्ष्य द्वयमुपदिश्यते भावोऽभावश्च, तत्र तयोर्विषयभेदेन प्रवृत्तावपि समुदाये द्वयं प्रवृत्तं भवति, असङ्कीर्णत्वं तु प्रयोगवशात्प्रत्येतव्यम्। 'गवाक्ष इति'। वातायने अवङ्

२ २-३ पुस्तकयोस्त्ववदायेति पाठः।

Digitized by Google

स्फोटायनस्येति नित्यमवङ् भवति, प्राप्तयङ्के गोऽग्रमित्यत्र न भवति, अन्यत्र विकल्पो गवाग्रं गोऽग्रमिति ॥

"दधातेर्हिः" ॥ यद्यपि हिनोतेर्हित इत्यादि सिद्धं दधातेस्तु धीत इत्यादिनिवृत्तये सूत्रारम्भः, श्तिपा निर्देशो घेटो माभूदिति । ध इत्युच्यमाने घेटोऽप्यनुकरणं संभाव्येत, यथा दाधाघ्वदाबित्यत्र, यङ्लुकि त्विटि सति दाधित इति भवति ॥

"जहातेश्च क्त्वि" ॥ इदमपि वचनं जहातेर्हात्वेति माभूदिति, श्तिपा निर्देशस्य तु प्रयोजनं वृत्तावेव दर्शितं, यङ्लुकि जाहित्वेति भवति ॥

"विभाषा छन्दसि" ॥ पूर्वसूत्रारम्भादयमारम्भः, अन्यथा हिनोतिजहात्यो रूपद्वयं सिद्धम् । 'हात्वेति' । छान्दसत्वादीत्वाभावः ॥

"सुधितवसुधितनेमधितधिष्वधिषीय च" ॥ 'इडागमो वेति' । यदा इडागमस्तदा आतो लोप इटि चेत्याकारलोपः । 'वसुधितमिति' । कर्मधारयः, क्तिन्यपि दृश्यते, उत त्वेतं वसुधितिं निरेके । 'नेमधितमिति' । अयमपि कर्मधारयः । 'धत्स्वेति' । श्नाभ्यस्तयोरात इत्याकारलोपः, दधस्तथोश्चेति भष्भावः ॥

"दो दद् घोः" ॥ 'धीत इति' । घुमास्थादिसूत्रेणेत्वम्, । 'घेट एतद्रूपमिति' । दधातेस्तु दधातेर्हिरिति हिरादेशो भवति । 'दातमिति' । दाप् लवने, लूनमित्यर्थः । 'अवदातमिति' । दैप् शोधने । 'अयमादेशस्यान्त इष्यत इति' । कुत इत्याह । 'एवं ह्युक्तमिति' । यद्यपि दकारः श्रूयते तथापि संहितायां तकारादीनामपि जश्त्वे कृते एतस्य रूपस्य संभवाच्चतुर्णां पक्षाणां संभवः, यद्ययमादेशस्तकारान्तः स्यात्सुदत्तमित्यत्र दस्तीति दीर्घत्वं स्यात्, दा इत्येतस्य यस्तस्मिन्निति हि तत्रार्थः, अथ दकारान्तः, रदाभ्यामिति नत्वं प्रसज्येत, अथ धकारान्तः, झषस्तथोर्धोऽध इति धत्वमापद्येत । 'थान्तेदोष इति' । नञोऽत्र प्रश्लेषः, तस्मात्थान्त इति निगमनात् । 'यदि त्विति' । दस्तीत्यत्र द्वौ पक्षौ, दाइत्येतस्य यस्तकारान्त आदेशस्तकारादिर्वेति, तत्र द्वितीयपक्षे नायं दोषः । 'दान्तधान्तयोरपीति' । तकारादिप्रत्ययसंनिपातेन भवन्द्वावो

न तद्विघातस्य निमित्तं भवति । 'अवदत्तमित्यादि' । आदिकर्मणीत्येतत्प्रदत्तमित्येतस्य विशेषणं, नेतरेषामसंभवात् । 'इति चेष्यतइति' । चकारश्चयथाप्राप्तं च, तेन अवत्तं वित्तं प्रत्तमित्याद्यपि भवति । 'अनुपसर्गा वा एतइति' । कथमनुपसर्गत्वमित्यत आह । 'क्रियान्तरविषया इति' । अवगतं दत्तमिति गमिना ऽवादीनां योगः, ततश्च यत्क्रियायुक्ताः प्रादयः तं प्रति गत्युपसर्गसंज्ञा भवन्तीति ददातिं प्रत्यनुपसर्गत्वम् ॥

"अच उपसर्गात्तः" ॥ 'त इत्ययमिति' । तकारेकार उच्चारणार्थः । 'प्रत्तमिति' । तत्राकारस्य तकारे दकारस्य चर्त्वम् । 'नीत्तमिति' । दस्तीति दीर्घत्वम् । 'आदेरलः प्राप्नोतीति' । आदेः परस्येति वचनात् । 'अच इत्येतदावर्त्ततइति' । यद्वास्येति वर्त्तते, क प्रकृतम्, अस्य घ्वाविति, दो दद्घोरित्ययमपि दद्भावो ऽवर्णस्य प्राप्नोति, ततश्च दत्तमिति संयोगादि श्रूयेत, एवं तर्ह्येवं वक्ष्यामि दो ऽद्घोरिति, दो य आकारस्तस्याद्भवतीति । 'द्वितकारको वेति' । अलोन्त्यस्येत्येतस्य द्वावपवादौ, आदेः परस्य अनेकाल्शित्सर्वस्येति, तयोर्विप्रतिषेधे परः प्रवर्त्तते, अपो भीत्यत्रापि तर्हि सर्वादेशप्रसंगात आह । 'अपो भीत्यत्रेति' । अत्र द्वयोस्तकारयोरन्त्यस्य संयोगान्तलोपः, पूर्वस्य जश्त्वम्, अत्र के चिदाहुः । अवश्यमत्राच इत्यनुवर्त्यमन्यथा लूञ् छेदोरप्, लवाभ्यामित्यत्रापि स्यादिति, तच्च । लुप्ते पकारे नाप्शब्द इति नात्र भविष्यति ॥

भूतपूर्वगतिर्युक्ता न सांप्रतिकसंभवः ।
न प्रत्ययाप्रत्यययोरित्यस्याप्यत्र[1] संभवः ॥
द्वयोरतुल्यकक्षत्वात्प्रत्ययेपो नहि भुतः ।

"अपो भि" ॥ 'स्वश्रद्भिरिति' । अवतेरसुन्, शोभनमवो येषां ते स्ववसः, तु इति सौत्रो धातुः, स्वन्तवो येषां ते स्वतवसः । 'माद्भिरिति' । पद्दन्नोमास्विति मासशब्दस्य मासादेशः । 'उषद्भिरिति' । मिथुने ऽसिर्वसेः क्विब्वेत्यसिप्रत्ययः ॥

[1] तस्याप्यस्ति संभव-इति-पाठः ७-३ पुस्तकयोः ।

"सः स्यार्द्धधातुके" ॥ 'वत्स्यतीत्यादि'। वस निवासे, लृट् । 'जिघत्सतीति'। लुङ्सनोर्घस्लृ । 'आस्से वस्सइति'। आस् उपवेशने, वस आच्छादने अदादी अनुदात्तेतौ, अतङीत्युच्यमाने व्यति[1]वत्सीष्टेत्यत्रापि न स्यात् ॥

"तासस्त्योर्लोपः" ॥ 'व्यतिसइति'। कर्तरि कर्मव्यतिहारइत्यात्मनेपदं, शपो लुक्, श्नसोरल्लोप इत्यकारलोपः । 'प्रत्ययमात्रमेतत्पदमिति'। तेन सात्पदाद्योरिति षत्वप्रतिषेध इति भावः ॥

"रि च" ॥ अस्तेरुदाहरणं न प्रदर्शितं, रेफादेरसंभवात् ॥

"ह एति" ॥ एधि हकारो न भवति एधामासे इति, किं कारणं, तासेर्य एकारः संभवति तत्रैवास्तेरपि, कश्च तासेः संभवति, उत्तमैकवचनम् । अपर आह । उत्तमैकवचनं सार्वधातुकं चेति, तेन सुप्तोहं त्वां प्रेक्षामासे, उत्तमेप्यार्द्धधातुके न भवतीति ॥

"यीवर्णयोर्दीधीवेव्योः" ॥ यकारे इकार उच्चारणार्थः, । 'लोपो भवतीति'। इकारस्त्वनन्तरोप्यस्वरितत्वान्नानुवर्त्तते । 'आदीध्येति'। ल्यप् । 'आदीध्यक इति'। यक् । 'आदीधितेति'। तृच्, इट् । 'आदीध्यनमिति'। ल्युट्, दीधीवेवीटामिति गुणप्रतिषेधः, इहादीधयतेर्ण्वुल् आदीध्यक इति । श्रूयमाणएव यो ण्वुलुत्पत्तेः प्रागेव प्राप्तोपि लोपो न भवति, वर्णग्रहणात्, किं वर्णग्रहणमतिरिच्यतइत्यतो न भवति, नेत्याह । अक्षरार्थ एवायं, कथं, वर्ण वर्णने चुरादिः, वर्ण्यते उपलभ्यतइति वर्णः, वर्णश्चासाविश्चेति विशेषणसमासे विशेषणस्य निपातनात्परनिपातः ॥

"सनि मीमाघुरभलभशकपतपदामच इस्" ॥ सीत्येतदिहानुवृत्तं सनो विशेषणम् । 'मीनातिमिनोत्योरिति'। मीञ् हिंसायां, डुमिञ् प्रक्षेपणे । 'उभयोरपि ग्रहणमिति'। मिनोतेरप्यज्झनगमां सनीति दीर्घे कृते मी इति रूपसंभवात् । नन्वसौ लाक्षणिकः, सत्यम्, इष्टिरेवैयं यदाह ।

[1] व्यतीति नास्ति २-पुस्तके ।

'इष्यतइति' । मा माने, माङ् माने, मेङ् प्रणिदाने, त्रयाणामपि ग्रहणं, मीनाति मिनोत्योः सनः कित्त्वे सति अनेज्विषयत्वान्नात्त्वप्रसंभवात्पृथग्ग्रहणम्, घु इति घुसंज्ञका दाधा गृह्यन्ते, रभ राभस्ये, डुलभष् प्राप्तौ, शक्लृ शक्तौ, पत्लृ गतौ, पद गतौ । 'मित्सतीति' । सः स्यार्द्धधातुक इति सकारस्य तकारः, अत्र लोपोऽभ्यासस्य, आत्मनेपदिषु पूर्ववत्सनः, आदिप्सतइत्यादौ स्कोःसंयोगाद्योरिति सलोपः ॥

"आप्ज्ञप्यृधामीत्" ॥ आप्लृ व्याप्तौ, ज्ञा अवबोधने, णिचि पुक्, मारणतोषणनिशामनेषु ज्ञा मित्त्वेति मित्संज्ञायां मितां ह्रस्वः, ऋध् वृद्धौ । 'ईप्सतीति' । रपर ईकारः, धकारस्य चर्त्वम् । 'ज्ञपेरित्यादि' । इहाच इत्यनुवर्त्तते, तेन च ज्ञपौ विशिष्यमाणे अजन्तस्य ज्ञपेरित्वं विधीयमानमलोऽन्त्यस्येत्यन्त्यस्य स्यात् । अजन्तस्येति च विशेषणं व्यर्थं, व्यभिचाराभावात्, तेन ज्ञपिनाऽज्विशेष्यते, ज्ञपेरचो यत्र तत्रस्थस्येति, यथाऽऽवृधिभ्याम्, एवं चैकप्रकारो विशेषणविशेष्यभावो भवति, तच्चानन्त्येचि सावकाशमीत्त्वमन्त्येचि पूर्वविप्रतिषेधेन णिलोपो बाधते, तदिदमुक्तम् । 'णेर्लोप इति' । 'इतरस्य त्विति' । अपर आह । अस्तु णेरपीत्वं, तस्य स्थानिवद्भावाण्णिलोपो भविष्यति, ईत्ववचनं त्वनन्त्ये अवणार्थमिति । 'अर्द्दिधिषतीति' । सनि इटि लघूपधगुणे रपरे कृते न न्द्राः इति प्रतिषेधाद्रेफवर्जितद्वितीयस्यैकाचो द्विर्वचनम् ॥

"दम्भ इच्च" ॥ 'धिप्सति धीप्सतीति' । हलन्ताच्चेति सनः कित्त्वादुपधालोपः, भकारस्य चर्त्वम्, इत्वं शक्यमविधातुम्, एवं वक्ष्यामि, सनिमीमादीनामच इस्, दम्भ ईच्च, चकारादिस्भावश्च, तत आप्ज्ञप्यृधामिदित्येव ॥

"मुचोऽकर्मकस्य गुणो वा" ॥ 'मुमुक्षतइति' । भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदादिति कर्मकर्त्तरि यगभावः, अतिदेशेन स्वाश्रयस्यानिवृत्तेः कर्त्तरि शब् भवति, यथा नमते दण्डः स्वयमेवेति । 'कर्मविशेषस्याविवक्षितत्वाद्वेति' । उक्तं हि ऽप्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति ॥

"अत्र लोपोऽभ्यासस्य" ॥ अत्रशब्दस्यार्थं दर्शयति। 'यदेतदिति'। अथात्रग्रहणं किमर्थमत्र सनिमीमेत्यादौ प्रकरणे यथा स्याद् ददौ ददातीत्यत्र माभूदिति, नैतदस्ति प्रयोजनमेवं वक्ष्यामि, सनि मीमाघुरभलभशकपतपदामच इस्, अभ्यासलोपश्चेति, उत्तरत्राप्यभ्यासलोपश्चेत्येव तत्राह। 'सनि मीमाघ्वित्यादि'। विषयावधारणं, विषयनियमः, कः पुनरसावित्यत आह। 'अत्रैवेत्यादि'। अवधारणस्य व्यवच्छेद्यं दर्शयति। 'सन्वद्भावविषये न भवतीति'। 'अमीमपदिति'। मिञो णिचि मीनातिमिनोतीत्यात्त्वं, पुक्, लुङ्, चङि द्विर्वचनं, सन्वद्भावादित्वं, दीर्घो लघोः, कथं पुनः सनीत्युच्यमानस्याभ्यासलोपस्यात्र प्रसङ्ग इत्यत आह। 'सन्वल्लघुनीति'। यथैव हि सन्वद्भावेनेत्त्वं भवति तथाभ्यासलोपोऽपि स्यात्, अलोन्त्यस्य लोपेन भवितव्यमित्याशङ्कायामाह। 'सर्वस्येति'। कथं पुनः सर्वस्य लभ्यते ऽत आह। 'तदर्थमेवेति'। इतराथोऽपि दृश्यन्तइति षष्ठ्यन्तात्कल्, योयमभ्यासः प्रसिद्धो ऽस्य लोपो न तदन्तस्येत्यर्थः, विषयावधारणं त्वन्यथापि सिद्धं, सन्वल्लघुनीति न कार्यमतिदिश्यते, किं तर्हि रूपं, लोपश्चाभावभावरूपो न रूपमिति नातिदिश्यते, नानर्थकेलोन्त्यविधिरित्यपरे। 'सर्वस्य कुर्वन्तीति'। अनभ्यासविकारेष्विति तु प्रतिषेधो न भवति लोपस्याविकारत्वात्, तथा च पस्पशायां लोपागमवर्णविकारज्ञ इति पृथग्ग्रहणं, द्वौ चापरौ वर्णविकारनाशाविति च पृषोदरादिसूत्रे, अन्वयव्यतिरेकाभ्यामर्थवत्तावधार्यते, न चाभ्यासस्योपजनने कश्चिदर्थः प्रतीयतइत्यभ्यासस्यानर्थक्यम् ॥

"ह्रस्वः" ॥ 'हलादिशेषो न भवतीति'। न चागमविधानसामर्थ्याद्धलादिशेषाभावः, अन्यथा ऽऽदेशमेवाकारं विदध्यादिति वाच्यं, सत्यपि वा हलादिशेषे विगृहीतश्रवणार्थत्वादाकारस्य, चक्राचलमिति ॥

"हलादिः शेषः" ॥ शिष्यते ऽवस्थाप्यतइति शेषः, कर्मणि घञ्, हलादिरित्यसमासः, समासे तु

कर्मधारयपक्षे स्यादादिशब्दस्य पूर्वता।
षष्ठीसमासे त्वानक्षित्यादौ शेषः प्रसज्यते ॥

कर्मधारये हि विशेषणत्वादादिशब्दस्य पूर्वनिपातः प्राप्नोति, षष्ठीसमासे हलन्तरापेक्षं हल आदित्वं नाभ्यासापेक्षमिति अत्रार्थिष्वपि प्रसङ्गः, अतु व्याप्तौ लिट्, आनश, अत्र ककारस्य शेषःप्राप्नोति, आटतुरि-त्यादावप्यादिवद्भावात्प्रसङ्गः, कर्मधारयासमासयोस्तु अभ्यासापेक्षमादि-त्वमिति नायं दोषः। 'अनादिर्लुप्यतइति'। हलित्यपेक्षते, एतेनास-मासपक्षो दर्शितः, समासे ह्युपसमस्तस्यापेक्षाऽयोगादनादिर्हलिति पुनश्च लग्रहणं कर्तव्यम् । ननु शेषोवस्थानं तत्त्वादेः प्राप्तमेव तत्किमेतेनात आह। 'आदिशेषनिमित्तोयमिति'। सत्यं, सिद्धे सत्यारम्भो नियमार्थः, आदिरेव शिष्यते न त्वनादिरिति, ततश्चादिशेषनिमित्तोयमनादेर्लोपो विधीयतइति नास्यानर्थक्यमित्यर्थः, यद्यादिशेषो निमित्तमनादिलोपस्य पपाचेत्यादौ यत्रादेर्हलोवस्थानं तत्रैवान्यस्य निवृत्तिः स्यात्, आटतुरि-त्यादौ तु न स्यादित्यत आह। 'तत्रेति'। जातिपक्षे अभ्यासजातावे-वादेरवस्थानमपेक्षितं न प्रतिव्यक्तीति दोषाभावः। 'अपरे त्विति'। पूर्वत्र पक्षे ऽवस्थानमेव शब्दार्थो नियमाश्रयणात्त्वितरव्यावृत्तिः, अत्र तु पक्षे निवृत्तिरपि गुणभूतशेषशब्देनैवोच्यते। ततः किमित्यत आह। 'तदव-स्थानमित्यादि'। उक्तितः, शब्दव्यापारतः। 'अविधेयत्वात्त्विति'। आर्थमप्राधान्यं दर्शयति, निवृत्तिस्तु विपरीतेत्याह। 'निवृत्तेरेव त्विति'। लोकेपि वक्ष्यमाणोधीष्वात्र अपंश्चङ्क्रमणं कुरु इत्येवमर्थाभेदेपि शब्दा-द्भेदः प्रतीयते, ततः किमित्यत आह। 'तत्रेति'। साविधेयत्वात्प्रधान-भूता सती निवृत्तिः, किमित्यादेरनिवृत्तिमपेक्षते, किं भूताम्, अविधेयां स-तीम्, अविधेयत्वादप्रधानभूतां सतीमित्यर्थः। न प्रधानं गुणानुवर्तिस्तस्मा-दपेक्षाकारणं नास्तीत्यर्थः। भाष्ये परिहारान्तरं, हलित्येको योगः, अत्र लोप इति वर्तते, स च कर्मसाधनः, यथा हल्ङ्याब्भ्यो दीर्घादित्यत्र, अभ्या-सस्य हल् लुप्यते, तत आदिः शेषः, यद्वा ह्रस्वो हलादिः शेष इति संहि-तापाठ एव, तत्राहलिति पदच्छेदः, अभ्यासोऽहल् भवति, अविद्यमा-नहल्को भवति, तत आदिः शेष इति ॥

"शर्पूर्वाः खयः" ॥ पूर्वेण शरां शेषे प्राप्ते खयां शेषो विधीयते,

Digitized by Google

विशेषो वा तदर्थनिर्देशात् ॥ ४६ ॥

पूर्वपक्षं दूषयित्वा प्रथमपक्षं व्यवस्थापयति । विशेष इति । विशेषः मेषी अधिगुप्रैषं लभतइति यः पूर्वसूत्रोक्तः पक्षः तस्माद्विशेषः तद्विरुद्ध-कल्पः, न लभते मेषीति फलितं, तदर्थस्य मेष्यामवृत्त्यर्थस्य पुंस्त्वस्य निर्देशात् । मन्त्रे इति शेषः ॥ ४६ ॥

पशुत्वं चैकशब्द्यात् ॥ ४७ ॥

लिङ्गस्योपपत्तिर्द्वितीयसूत्रे दर्शितेति पूर्वपक्षी पुनः शङ्कते । पशु-त्वमिति । पशुत्वं पशुत्ववाचकं पदं पशुपदं विशेष्यमैकशब्द्यात् पुंलि-ङ्गान्तत्वेनैकजातीयशब्दत्वात् ॥ ४७ ॥

यथोक्तं वा सन्निधानात् ॥ ४८ ॥

इमां युक्तिं परिहरति । यथेति । यथोक्तम् । अधिगुप्रैषो मेषीं न प्राप्नोतीति यदुक्तं तथैव । सन्निधानात् । अनुष्ठानवेलायां विधिवाक्य-गतशब्दस्यैव बुद्धौ परिवर्तितत्वात् । स च मेषीशब्दो न पशुशब्द इति न स शब्दो विशेष्यं सर्वनाम्ना निर्देशः संभवति । तथा सति नीलो घटः तामानयेतिप्रयोगापत्तेरिति भावः ॥ ४८ ॥

यज्ञायज्ञीये गिरापदस्थाने इरापदस्यैव कर्तव्यत्वम् । अधि० १८ ।

आम्नातादन्यदधिकारे वचनाद्विकारः स्यात् ॥ ४९ ॥

ज्योतिष्टोमे यज्ञायज्ञीयस्तोत्रे, न गिरागिरेति ब्रूयादैरं कृत्वोद्गेय-मिति श्रुतम् । अत्र इरापदगिरापदयोर्विकल्पः उतेरापदमेव नियमेन योज्यमिति संशये सिद्धान्तेनोपक्रमते । आम्नातादिति । अधिकारे एका-धिकारे आम्नातात्साम्नः योनिभूतायामृचि पठिताद् अन्यद्विकारः । ऋचि पठितवर्णानां नित्यं बाधकं स्यात् । वचनाद् विशेषविधानात् । ऋचि पठितवर्णबाधकत्वेन प्रयोगकाले विकारेणैव पाठ इति भावः ॥ ४९ ॥

द्वैधं वा तुल्यहेतुत्वात्सामान्याद्विकल्पः स्यात् ॥ ५० ॥

पूर्वपक्षमाह । द्वैधमिति । तुल्यहेतुत्वात् । ज्योतिष्टोमप्रकरणे गिरापदस्य योनिभूतायामृचि पाठो दृश्यते । अतः पठितवर्णानामपि

Digitized by Google

ज्योतिष्टोमापूर्वसाधकत्वमित्येको हेतुः । ऐरं कृत्वोद्गेयमिति विधेरपि तत्प्रकरणस्थत्वेन इरापदमपि तदपूर्वेण संबद्धमित्यपरो हेतुः । एवं तुल्यबलाभ्यां द्वाभ्यां हेतुभ्यामनुष्ठानं द्वैधं द्विप्रकारम् । एवं सति द्वयो रपि सामान्यात् । एकं सामान्यशास्त्रमपरं विशेषशास्त्रमिति वक्तुम शक्यत्वाद्विकल्पः स्यात् ॥ ५० ॥

उपदेशाच्च साम्नः ॥ ५१ ॥

ननु गिरापदस्य पाठेन विधिरनुमेय, इरापदविधिः प्रत्यक्ष, इति प्रबलः । अतो न विकल्पः अत्राह । उपदेशादिति । साम्नः उपदेशाद् यज्ञायज्ञीयेन स्तुवीतेति विधानात् । अयं भावः । यज्ञायज्ञीयेन स्तुवीते त्यस्य यज्ञायज्ञीयेन स्वयोनिभूतर्ग्वर्णाः यथासंस्कृताः स्युः तथा स्तुवी तेति तात्पर्यं, तस्यामृचि गिरेति वर्णाः पठिताः सन्ति । तत्संस्कारः यज्ञायज्ञीयेन स्तुवीतेति प्रत्यक्षविधिविषय इति तुल्यबलत्वमव्याहत मिति भावः ॥ ५१ ॥

नियमो वा श्रुतिविशेषादितरत्साप्तदश्यवत् ॥ ५२ ॥

पूर्वपक्षं निराकरोति । नियम इति । नियमः इरापदनियमः श्रुतिवि शेषात् । ऐरं कृत्वोद्गेयमिति श्रुतिविशेषात् । न हि केवलमैरं भवतीति । किं तु ऐरं कृत्वेति श्रूयते कर्तव्यतया । गिरापदस्य पाठमात्रं न तु कर्त व्यतया श्रुतिः । तथा सति यज्ञायज्ञीयेन स्तुवीतेत्यत्रेतिकर्तव्यताकाङ्क्षायां गिरापदस्थाने इरापदं कृत्वा स्तुवीतेति वाक्यैकवाक्यतायां न यज्ञाय ज्ञीयेन स्तुवीत्यनेन पूर्वोक्तरीत्या गिरापदघटितर्चा स्तुतिविधिः, किं तु पाठेन कल्प्योऽतः प्रत्यक्षश्रुत्या तस्य नित्यं बाध इति भावः । ननु गिरा पदपाठानर्थक्येन, आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन तुल्यबलत्वं स्यादत आह । इतरन्मन्त्रघटकं गिरापदं साप्तदश्यवत् प्रकृतित उत्कृष्टं सद् अन्यत्र निविशते । यथा सप्तदश सामिधेनी रन्वाहेत्यनारभ्यपठितं साप्तदश्यं प्रकृतौ निवेशाभावमागतं सत्प्रकरणपठि तेन पाञ्चदश्येन प्रतिबद्धं सन्मित्रविन्दादौ निविशते, तथा ऐरं कृत्वो द्गेयमित्यनेनैकवाक्यतापन्नेन यज्ञायज्ञीयेन स्तुवीतेति विधिना यज्ञाय

ज्ञीयस्तोत्रोद्देशेनेरापदघटितमन्त्रसिद्धौ चातिदेशेन विकृतिसामान्ये ऽपि यज्ञायज्ञीयस्तोत्रे तथैव प्राप्तौ गिरापदघटितमन्त्रस्तु महाग्निचयने गायत्रेण पुरस्तादुपतिष्ठते बृहद्रथन्तराभ्यां पक्षौ यज्ञायज्ञीयेन पुच्छमित्यत्र प्रविशति । इरापदस्य स्तोत्रोद्देशेन विधानेन उपस्थानस्य तदुद्देश्यतावच्छेदकानाक्रान्तत्वादिति भावः ॥ ५२ ॥

इरापदस्य प्रगीतत्वम् । अधि॰ १६ ।

अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशः स्यात् ॥ ५३ ॥

ऐरं कृत्वोद्गेयमिति विहितेरापदमप्रगीतमुत प्रगीतमिति संशये पूर्वपक्षमाह । अप्रेति । पाठेन श्रूयमाणशब्दात् गिरापदात् विधीयमानस्य इरापदस्यान्यत्वे सति अप्रगाणात् अप्रगीतशब्दस्यैव तत्र विधानात् तथाभूतोपदेशः स्यात् । यथा विहितं तथा पठितव्यम् । यदि च इरापदं गानविशिष्टं विधितात्पर्यविषयः तर्हि गानशास्त्रपरिभाषया ईकारस्यार्इभावः । आइरेति प्रकृतितः वृद्धाच्छ इति छप्रत्यये आइरीयं कृत्वोद्गेयमिति पठेत् । ऐरं कृत्वोद्गेयमिति यतः पठितमतः गानरहितपाठ एवेति भावः ॥ ५३ ॥

यत्स्थाने वा तद्गीतिः स्यात् पदान्यत्वप्रधानत्वात् ॥ ५४ ॥

सिद्धान्तमाह । यत्स्थाने इति । येषां वर्णानां स्थाने ये वर्णाः तेषु तद्धर्मवृत्तिमानं स्यात् । तत्स्थानापन्नस्तद्धर्मं लभतइति न्यायात् । ननु ऐरमित्यत्र तद्धितो विकारार्थे विहितः । साम्नो योनिभूतऋग्वर्णानां विकारश्च गानमेव । तथा च गानविशिष्टवर्णविधानात् कथं न्यायलभ्यत्वं गानस्येति शङ्कायामाह । पदान्यत्वप्रधानत्वाद्विधेः श्रूयमाणपदाद्गिरापदात्पदप्रतियोगिकमन्यत्वं भेदो यस्मिन् पदे तत्पदान्यत्वमिरेतिपदं तत्प्रधानत्वात् । विधितात्पर्यविषयत्वात् । न विशिष्टविधिरित्यर्थः । उपायान्तरलभ्ये ऽर्थे विधिसंबन्धासंभवादिति भावः । तथा च न्यायप्राप्तानुवादक एव तद्धित इति यावत् । गानस्यान्यलभ्यत्वेन विध्यभावादेव न छप्रत्ययापत्तिरपीति सारम् ॥ ५४ ॥

Digitized by Google

गानसंयोगाच्च ॥ ५५ ॥

साधकान्तरं स्पष्टमाह । गानेति । क्व चित्तदीयग्रन्थे उद्गेयमा इरा चा इाचासा इति इरावर्णगानेन संयुक्तमपि दृश्यते । अतो ऽपि इरापदं गानविशिष्टमेव प्रयोक्तव्यमिति भावः ॥ ५५ ॥

वचनमिति चेत् ॥ ५६ ॥

नन्वीदृशगानप्रतिपादकशास्त्रसत्त्वे गानस्थानेन वचनेन विधि- रेव किमिति नाङ्गीक्रियते । न्यायप्राप्तमिति कस्मादुच्यते इत्याशङ्कते । वचनमिति । वचनं विधिरित्यर्थः ॥ ५६ ॥

न तत्प्रधानत्वात् ॥ ५७ ॥

विधिपक्षं दूषयति । नेति । न विधिः तत्प्रधानत्वात् । तस्य इरापदस्य प्रधानत्वाद् विधितात्पर्यविषयत्वात् । अन्यलभ्ये विधिसंब- न्धासंभवादिति भावः । ननु पक्षद्वये ऽपि प्रकृते गानमस्ति न अनु- ष्ठानवैषम्यं, तथा सति वचनमित्यादिसूत्रं किमित्यारब्धमिति चेत् । आरम्भफलं तन्त्ररत्ने स्पष्टम् । विस्तरभयान्नात्र लिख्यते ॥ ५७ ॥

इति जैमिनिसूत्रवृत्तौ नवमाध्यायस्य प्रथमः पादः ॥ १ ॥

गीतीनां सामनामता । अधि० १ ।

सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् ॥ १ ॥

सप्तमद्वितीयपादे साधितमर्थं वक्ष्यमाणसामोहोपोद्घातरूपत्वात् पुनः स्मारयन्पूर्वपक्षसूत्रमाह । सामानीति । सामानि रथन्तरादिशब्दवा- च्यानि मन्त्रं गानविशिष्टामृचं के चन आचार्याः प्राहुः । तत्र मानं प्रगीतमन्त्रः सामेति स्मृतिः । रथन्तरं पठेति गुरुणा नियुक्तः गुरूपदेशेन गानविशिष्टामृचं पठति च । अतः स्मृत्युपदेशाभ्यामुक्तार्थसिद्धिः ॥ १ ॥

तदुक्तदोषम् ॥ २ ॥

सिद्धान्तमाह । तदिति । तत्पूर्वपक्षिणा उक्तं सप्तमद्वितीयपादे उक्ता दोषा यस्मिन्पक्षे तदुक्तदोषम् । स पक्षो निरस्तः किं तु गानवि- शेष एव रथन्तरादिवाच्य इति भावः ।

Digitized by Google

ऊहग्रन्थस्य पौरुषेयत्वम् । वर्णाकान्तरम् ।

यद्वा सप्तमद्वितीयपादादन्य एवार्थो विचार्यते। तथा हि। कवतीषु कया नश्चित्र इत्यृचि रथन्तरपदवाच्यस्य गानविशेषस्य य ऊहः कया नश्चित्र आभुवो वा इति। किमयं नित्यः पौरुषेय इति संशये पूर्वपक्षमाह। सामानीति । मन्त्रं मन्त्रभूतानि सामानि ऊहितसामानि नित्यानीति एके आहुः । स्मृतिः मन्त्रभूतान्यार्षेयाणि नित्यानीति उपदेशः अभि त्वा शूरेत्यादौ गीयमानानि सामानि कया नश्चित्रेत्यत्र योजयेत्युपदेशस्ताभ्याम् । सिद्धान्तमाह । तदिति । तत् त्वदुक्तमुपदेशलिङ्गं त्वयैव दर्शितदोषकम् । योजयेति तूपदेशरूपो हेतुर्वर्णितः । युज्धात्वर्थः पुरुषप्रयत्नजन्यत्वघटितः। तस्योपदेशे कथं नित्यत्वसिद्धिरिति । यथा सौर्ययागे निर्वापमन्त्रे सूर्यपदं योजयेत्युक्ते, पश्चात्तथा कृते मन्त्रे कथं नित्यत्वं सिध्येदिति भावः ॥ २ ॥

साम्नः ऋक्संस्कारकर्मत्वम् । अधि॰ २ ।

कर्म वा विधिलक्षणम् ॥ ३ ॥

रथन्तरादिशब्दवाच्या गीतिः ऋचः प्रधानमुताङ्गमिति संशये पूर्वपक्षमाह। कर्मेति। द्वितीये प्रतिपादितयोर्गुणप्रधानकर्मणोर्मध्ये प्रधानकर्म आरादुपकारकम्। यतः रथन्तरं गायतीत्यत्र प्रयाजान्यजतीतिवत्प्रधानकर्मलक्षणं द्वितीयाश्रवणमतः ॥ ३ ॥

तदृग्द्रव्यं वचनात् पाकयज्ञवत् ॥ ४ ॥

ननु प्रधानकर्मत्वे रथन्तरादिनिष्ठं यद् द्वितीयया श्रूयमाणं प्राधान्यं तत्किंनिरूपितमित्याशङ्कायामाह । तदिति । सा चासौ ऋक् चेति व्युत्पत्त्या तदृक्साम्नो योनिभूता ऋक् द्रव्यमिवेति तदृग्द्रव्यम् । मुखं चन्द्र इवेति मुखचन्द्र इतिवत् । सादृश्यं च गुणत्वेन । तथा च यथा द्रव्यनिरूपितं प्राधान्यं यागे तथा ऋङ्निरूपितं प्राधान्यं साम्नः किंप्रमाणमित्याकाङ्क्षायामाह । वचनात् । ऋचि साम गायतीति पाकयज्ञवत् । यथा पाकयज्ञेषु लाजैर्जुहोतीत्यादिवचनैर्द्रव्याणां यागाङ्गत्वम् । पाकयज्ञशब्दो ऽङ्गभूतयागमात्रपरः ॥ ४ ॥

तत्राविप्रतिषिद्धो द्रव्यान्तरे व्यतिरेकः प्रदेशश्च ॥ ५ ॥

ननु साम्नां रथन्तरादीनामभि त्वेत्याद्याः ऋचः यदि कारणं तर्हि तस्य रथंतरापूर्वसाधनत्वेन कार्यत्वं वाच्यम् । अभि त्वेत्यृचि रथंतरं साम गायतीति वाक्यस्यायमेवार्थः । अभि त्वेत्यृचा विना तेन रूपेणोत्पत्ति-र्नास्तीति नियमरूपो वाच्यः । तथा सति कवतीषु रथंतरं गायतीति कया नश्चित्र इत्यृचि अतिदेशशास्त्रं बाधितं स्यात् । अभि त्वेत्यृचा विना तदपूर्वसाधनत्वेन रथंन्तरसाम्न उत्पत्तेरभावस्य पूर्ववाक्येन दर्शित-त्वाद् इत्यत आह । तत्रेति । तत्र क्रतुविशेषे द्रव्यान्तरे ऋगन्तरे प्रदेशः अतिदेशशास्त्रं कवतीष्विति तन्मूलः व्यतिरेकः अभि त्वेत्यृगभावः । तदु-त्पत्तौ अविप्रतिषिद्धः अविरुद्धः । अभि त्वेत्यृचि रथंतरं गायतीति शास्त्रस्य सामान्यशास्त्रत्वेन कवतीषु क्रतुविशेषे रथन्तरमित्यस्य विशेषशास्त्रत्वेन कार्यतावच्छेदकसंकोचेन द्वयोः कारणयोः समावेशसंभवात् । तस्मात्प्र-धानकर्मत्वे न को ऽपि दोषः ॥ ५ ॥

शब्दार्थत्वात्तु नैवं स्यात् ॥ ६ ॥

सिद्धान्तमाह । शब्दार्थेति । एवं प्रधानकर्मेति न स्यात् । गीति-रूपाणां रथन्तरादीनां शब्दार्थत्वात् । ऋगर्थत्वात् । ऋग्वर्णसंस्कारः वर्णाभिव्यक्तिः गीतिकार्ये दृष्टं फलं संभवति । एवं सत्यदृष्टकल्पनमन्या-य्यमिति भावः ॥ ६ ॥

परार्थत्वाच्च शब्दानाम् ॥ ७ ॥

शब्दानामृचां परार्थत्वात् स्तुत्यर्थत्वात् । साम्ना गानरूपेणाक्ष-राभिव्यक्तिः ऋगक्षरैः देवतास्तुतिरिति उभयं दृष्टं फलं, परमते साम्नः फलकल्पनापत्तेः आज्यैःस्तुवते पृष्ठैः स्तुवते इति साम्नः ऋगक्षराभिव्य-क्तिद्वारा स्तोत्रार्थत्वं प्रतिपादितं विरुध्येतेष्टापत्तौ ॥ ७ ॥

असंबन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ॥ ८ ॥

किं च कर्मणा स्तोत्ररूपकर्मणा साम्नः असंबन्धः स्याद् ऋचः प्रकृत्वे । पूर्वपक्षिमते रथन्तरं पृष्ठं भवतीति वाक्ये शब्दयोः रथन्तरपृष्ठश-

Digitized by Google

ब्दयोः पृथगर्थत्वात् । अयं भावः । रथन्तरं पृष्ठं भवतीत्यत्र रथन्तरश-ब्दस्य गीतिवाचकत्वं पृष्ठशब्दस्य स्तोत्रवाचकत्वेन भिन्नार्थयोरभेदान्वयो बाधितः पूर्वपक्षे । सिद्धान्ते रथन्तरशब्दस्य रथन्तरगुणके लक्षणा, ततः अभेदेनान्वयः । रथन्तरगुणकत्वं स्तोत्रसाधनभूतवर्णाभिव्यक्तिद्वारेति ॥ ८ ॥

संस्कारश्चाप्रकरणे ऽग्निवत्स्यात्प्रयुक्तत्वात् ॥ ९ ॥

साम्नः ऋगर्थत्वं स्वीकृत्य पक्षान्तरमुत्थापयति । संस्कारेति । अप्रकरणे प्रयोगाद्बहिः अध्ययनकाले प्रयुक्तत्वात्संस्कारः संपन्नः न ज्योतिष्टोमप्रयोगमध्ये पुनः संस्कारः । यथा ऽग्निः प्रयोगाद्बहिराधानेन संस्कृतः प्रयोगमध्ये न पुनस्तथा ॥ ९ ॥

अकार्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत ॥ १० ॥

इमं पक्षं दूषयति । अकार्यत्वादिति । यदि प्रयोगाद् बहिः पठिता मन्त्राः गानेन संस्कृताः प्रयोगकाले अग्निवद्, उपलभ्येरन्निति सूत्रे पूरणीयं, तर्हि अकार्यत्वात् पूर्वसंस्कृतानां सत्त्वेनाकार्यत्वात्पुनरनुत्पाद्य-त्वात्पुनः पाठे फलाभावाद् अप्रयोगः प्रयोगकाले पाठाभावः प्रतीयेत । तदेव न । अतः पुनः पठितव्यम् ॥ १० ॥

आश्रितत्वाच्च ॥ ११ ॥

किं च औदुम्बरीं स्पृष्ट्वोद्गायेदिति विधिना ऽपि प्रयोगकाले पाठः सिध्यतीत्याह । आश्रितेति । आश्रितत्वाद् औदुम्बरीस्पर्शमाश्रित्य गानविधानादिति । प्रयोगाद्बहिरौदुम्बर्या अभावादिति भावः ॥ ११ ॥

प्रयुज्यतइति चेत् ॥ १२ ॥

तर्हि प्रयोगाद्बहिः पाठो व्यर्थ इति शङ्कते । प्रयुज्यतइति । अत्र कुतः इति शेषः ॥ १२ ॥

ग्रहणार्थं प्रतीयेत ॥ १३ ॥

बहिःपाठफलं दर्शयति । ग्रहणेति । अभ्यासार्थमित्यर्थः ॥ १३ ॥

तृचे प्रत्यृचं कृत्स्नसाम्नः समापनम् । अधि॰ ३ ।

तृचे स्याच्छ्रुतिनिर्देशात् ॥ १४ ॥

ज्योतिष्टोमे, एकं साम तृचे क्रियतइति श्रुतम् । तत्र एकं साम

विभज्य त्रिषु गेयमुत प्रत्येकं परिसमाप्तिरिति संशये पूर्वपक्षमाह। तृचे इति। तृचे विभज्य निर्देशः स्यात्। श्रुतिनिर्देशात्। एकसंख्यावच्छिन्नसाम्नः त्रित्वावच्छिन्ने विधानादित्यर्थः॥ १४॥

शब्दार्थत्वाद्विकारस्य॥ १५॥

विकारस्य साम्नः शब्दार्थत्वाच्च श्रूयमाणावच्छेदकावच्छिन्नत्वग. र्थत्वात्। त्रिभ्यः एकमुद्रा देयेत्यत्रैकमुद्रायाः समवाया दातुमशक्य. तया विभज्यैव दीयते तथेति भावः॥ १५॥

दर्शयति च॥ १६॥

उक्तार्थे लिङ्गं दर्शयति। दर्शयतीति। अर्थवादः विभज्य गानं दर्शयति। ऋक्सामोवाच मिथुनीसंभवावेति सो ऽब्रवीन्न वै त्वं ममाल. मसि जायायै, ततस्ते द्वे भूत्वोचतुः संभवामेति सो ऽब्रवीन्न युवां ममालमिति ततः तिस्रो भूत्वोचुर्मिथुनीसंभवामेति सो ऽब्रवीत्संभ. वामेति। तस्मादेकं साम तृचे क्रियतइत्येका साम्नः संभोगाय नालमिति विभज्य गाने लिङ्गम्॥ १६॥

वाक्यानां तु विभक्तत्वात्प्रतिशब्दं समाप्तिः स्यात्संस्कारस्य तदर्थत्वात्॥ १७॥

सिद्धान्तमाह। वाक्यानामिति। प्रतिशब्दं प्रत्यृचं समाप्तिः साम्नः स्यात् साम्ना संस्कारस्याक्षराभिव्यक्तिरूपस्य तदर्थत्वाद् ऋगर्थत्वात्। ऋग्रूपवाक्यानां विभक्तत्वाद् भिन्नत्वात्। ऋचो भिन्नत्वेन स्तोत्र. स्यापि भेदः। न हि तिसृभिर्ऋग्भिरेकं स्तोत्रं लोके क्व चित्प्रसिद्धम्। ऋचा स्तुतिर्निर्वर्तते अक्षराभिव्यक्तिद्वारा सामोपकारकं विभज्य स्तुतो सामाव. यवः स्तोत्रउपकारकः स्याच्च साम। अतः प्रत्यृचं परिसमाप्तिरिति भावः॥ १७॥

तथा चान्यार्थदर्शनम्॥ १८॥

साधकान्तरमाह। तथा चेति। तथा च प्रत्यृचं साम्नः परिसमाप्तिसिद्धौ च अन्यार्थस्य अष्टाक्षरेण प्रथमायामृचि स्तौति द्व्यक्षरेणोत्तर.

Digitized by Google

योरिति प्रस्तावभेददर्शनमुपपन्नम् । प्रस्तावो नाम साम्नः भक्तिराद्या । स तु एकस्यैकः यदि एकस्यैव साम्नो विभज्य विनियोगस्तदा प्रस्तावभेदविधानमनुपपन्नमिति भावः ॥ १८ ॥

अनवानोपदेशश्च तद्वत् ॥ १९ ॥

अनवानं गायतीत्यप्यस्मन्मते उपपन्नमित्याह । अनवानेति । न हि तिसृषु विभज्य गाने अनवानतोपपद्यतइति भावः ॥ १९ ॥

अभ्यासेनेतरा श्रुतिः ॥ २० ॥

या च तिसृषु गायतीति श्रुतिः पूर्वपक्षिणा दर्शिता सा गानस्य संपूर्णस्याभ्यासेनाप्युपपन्नेत्याह । अभ्यासेनेति । इतरा श्रुतिः तिसृष्विति श्रुतिः । यथा त्रिषु गृहेषु देवदत्तो भोज्य इत्यत्राभ्यासः तथेति भावः ॥ २० ॥

समास्वेव तिसृषु ऋक्षु गानम् । अधि॰ ४ ।

तदभ्यासः समासु स्यात् ॥ २१ ॥

एकं साम तृचे क्रियतइत्यत्र ऋक्त्रयं समाक्षरमिति नियमः उतानियम इति संशये नियमे मानाभाव इति पूर्वपक्षे सिद्धान्तमाह । तदिति । तस्य साम्नो ऽभ्यासः समासु समच्छन्दस्कासु । संशरविलेशदोषात् । यत्र योनिभूता ऋगधिकाक्षरा उत्तरे न्यूनवर्णे तत्र अधिकाक्षरे गीयमानसाम्नः अल्पाक्षरे गानासंभवेन शेषसाम्नो लोपः कार्यः स्यादयं संशरदोषः । यत्र योनिभूता ऋचः अल्पाक्षराः उत्तरे अनल्पाक्षरे तत्र अल्पाक्षरसाम्नः बह्वक्षरायामृचि मध्ये परिसमाप्तत्वेन शेषाक्षराण्यसंस्कृतानि स्युः अयं विलेशदोषः ॥ २१ ॥

लिङ्गदर्शनाच्च ॥ २२ ॥

उक्तार्थे लिङ्गमप्याह । लिङ्गेति । स्याल्यां शक्यमवधीयतइत्यादुर्येद्बृहद् गायत्रीषु क्रियते ऋक्तेनानुव्रजतीति अल्पाक्षरासु बह्वक्षरासंबन्धिगाने दोषश्रवणं लिङ्गम् ॥ २२ ॥

Digitized by Google

उत्तरयोर्गायतीत्यत्र उत्तराग्रन्थपठितयोरेव ऋचोर्ग्रहणम् । अधि॰ ५ ।

नैमित्तिकं तूत्तरात्वमानन्तर्यात् प्रतीयेत ॥ २३ ॥

सामगानां ग्रन्थद्वयं छन्द उत्तरा चेति । छन्दसि निखिलसाम्नां योनिभूता ऋचः पठिताः । उत्तरायां सूक्तानि पठितानि । एवं सति यद्योन्यां तदुत्तरयोर्गायतीत्यत्र उत्तरयोरित्यनेन द्वयोरन्यतरस्मादिच्छया ग्राह्यमुतोत्तराग्रन्थे योनिभूतऋगुत्तरयोरेव ग्रहणमिति संशये नियामकाभावादिच्छयेति पूर्वपक्षे सिद्धान्तमाह । नैमित्तिकं त्विति । नैमित्तिकं यद्योन्यां तदुत्तरयोरिति वचनप्राप्तमुत्तरात्वमुत्तरापदग्राह्यत्वमुत्तराग्रन्थसमधीतासु प्रतीयेत । आनन्तर्याद् उत्तराशब्दोपस्थितेः शब्दश्रवणानन्तर्यात् । अयं भावः । उत्तरशब्दः एकः कालदेशान्यतरवाचकः । एकः संज्ञारूपः घटादिवत् । यदि कालवाचको देशवाचको गृह्यते कस्मादित्यवधिवाचकपदान्तरमपेक्ष्योपस्थितिं जनयेत् । छन्दोग्रन्थस्थयोन्युत्तरासु गृह्यमाणासु उत्तराग्रन्थे उत्तराशब्दस्य घटादिवत्सङ्केतरूपत्वेन उत्तरयोरिति श्रवणेन अव्यवहितोत्तरक्षणे स्वसंबन्धिसंबन्ध्यृग्द्वयमुपस्थापयतीति लाघवादुत्तराग्रन्थस्थयोर्ऋचोर्ग्रहणं नान्ययोरिति ॥ २३ ॥

ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥

उक्तार्थे पुनर्द्रढयति । ऐकेति । तासु उत्तरासंबन्धिषु त्रिषु अभ्यासः ऐकार्थ्यात् । एकापूर्वार्थत्वेन पाठात् । अन्यथा च तिसृणामेकत्र पाठवैयर्थ्यादिति भावः ।

अतिजगत्यामभ्यस्यमानायां त्रैशोकगानम् । वर्णकान्तरम् ।

यद्वा तदभ्यासः इत्यारभ्य सूत्रचतुष्टयात्मकमेकमधिकरणम् । तथा हि द्वादशाहे चतुर्थेऽहनि त्रैशोकं नाम साम विहितम् । तदतिजगत्यामुत्पन्नमुत्तराग्रन्थे योनिभूताया ऋचः उत्तरे द्वे बृहत्यौ । एवं स्थिते एवं सति अतिजगत्यामुत्पन्नत्वादुत्तरे द्वे अपि अन्यत आनेये उत पठिते एव ते ग्राह्ये इति संशये पूर्वपक्षमाह । तदिति । सूत्रार्थस्तु पूर्ववत् । लिङ्गेति । अतिजगतीषु स्तुवन्तीति विधिवाक्ये बहुवचनं लिङ्गम् । यथोक्तपाठे अतिजगत्या ऋच एकत्वाद् बहुवचनं बाध्येतेति भावः ।

Digitized by Google

सिद्धान्तमाह । नैमित्तिकमिति । आनन्तर्याद् अव्यवहितपाठात् । शेषं पूर्ववत् । ऐकार्थ्यादिति । एकदेवताके त्रैशोके तृचदर्शित शब्दस्वारस्याच्च । ननु बहुवचनस्य पूर्वोक्तस्य का गतिरत आह । तदभ्यासः त्रैशोकसाम्नः एकविंशतिकृत्वोऽभ्यासः तत्रैव विहितः । एवं सति तासां तिसृणामृचामे-कविंशतित्वसंपत्तये सप्तवारमावृत्तिः कार्या । तासामावृत्तौ अतिजगत्या अपि सप्तवारमावृत्तिरिति तत्र बहुत्वान्वय उपपन्न इति भावः ॥ २४ ॥

बृहतीपङ्क्त्योरेव प्रग्रथनेन रथन्तरस्य गानम् । अधि० ६ ।

प्रागाथिकं तु ॥ २५ ॥

ज्योतिष्टोमे माध्यन्दिनसवने बृहद्रथंतरमिति सामनी विहिते । उभे अपि बृहतीछन्दस्कयोरुत्पन्ने । रथंतरयोनिः अभि त्वा शूरेति । उत्तरा न त्वावाँ अन्यः इति पङ्क्तिच्छन्दस्का । बृहतो योनिर्बृहत्येव त्वामिधि हवा-महइति । उत्तरा पङ्क्तिः स त्वन्नश्चित्रेति । तत्रैवमाम्नायते । न वै बृहद्र-थंतरमेकछन्दो यच्चैतयोः पूर्वा बृहती ककुभाउत्तरे इति । अस्यार्थः । बृह-द्रथंतरे सामनी ये तदीयास्तिस्र ऋचः एकच्छन्दस्का न, किं तु बृहती-छन्दस्का पूर्वा उत्तरे ककुप्छन्दस्के इति । अत्र स्वतःसिद्धककुप्छन्दस्के उत्तरपठितपङ्क्तिच्छन्दस्के अपहाय तत्स्थाने योज्ये उत पूर्वोत्तरयोः प्रग्रथ-नेन ककुभौ संपाद्य तयोर्गानमिति संशये उत्पत्तावेव ककुभौ योज्यौ । अन्यथा ककुप्छन्दस्कर्चानामुत्पत्तेर्निरर्थकत्वं स्यादिति पूर्वपक्षे सिद्धान्त-माह । प्रेति । प्रागाथिकं प्रथमाया ऋचः अविकृतं गानं ततः प्रथमर्च-पादमीशानमिन्द्रेति पुनरुपादाय उत्तरायाः पङ्क्तेः पूर्वार्द्धेन, न त्वावाँ अनेन मेलनेन अष्टाविंशत्यक्षरा त्रिपाद् भवति । सा चैका ककुप्संपन्ना । तथा न त्वामित्यस्या द्वितीयपादः, न जात इत्यष्टाक्षरः । अश्वायन्त इति पङ्-क्त्युत्तरार्द्धेन योजने सा ऽप्येका ककुबिति । एवं प्रागाथिकं कृत्वा, गात-व्यमिति शेषः ॥ २५ ॥

स्वे च ॥ २६ ॥

एवं कृते स्वे ककुभि, गानं कृतं भवतीति शेषः ॥ २६ ॥

प्रगाथे च ॥ २७ ॥

Digitized by Google

प्रगाथे पूर्वेषामृग्वर्णानां पुनर्यदृषो, प्रगाथशब्दप्रयोगो ऽप्युपपद्य इति शेषः। उपपत्तिश्चेत्थं, प्रकर्षेण गानं प्रगाथः। प्रकर्षश्च तेषां वर्णानां पुनः पुनर्गानमेव। अन्यासामौत्पत्तिकानां ककुभामानयने पुनः पुनर्गानानुपपत्तिरिति भावः॥ २७॥

लिङ्गदर्शनाव्यतिरेकाच्च॥ २८॥

लिङ्गदर्शनस्य, एषा वै प्रतिष्ठिता बृहती यत्पादं पुनरारभते इति बृहत्यर्थवादे पुनः पादारम्भलिङ्गदर्शनस्य अव्यतिरेकात्। गत्यन्तराभावात्।

बृहतीविष्टारपङ्क्त्योः प्रग्रथनेन रौरवयौधाजयसाम्नोर्गानम्। द्वितीयवर्णकम्।

यद्वा क्व चिद् रौरवयौधाजयौ बार्हते तृचे भवत इति। रौरवयौधाजयौ सामविशेषौ बार्हते बृहतीछन्दस्के तृचे भवत इत्यर्थः। तयोः पूर्वा बृहती उत्तरा विष्टारपङ्क्तिः। तत्र पूर्ववत्पूर्वपक्षे सिद्धान्तमाह। प्रागाथिकं कार्यं, बार्हतः प्रगाथ इति स्मृतेः। स्वे च। समीपपठिते गीतं भवति। तृतीयसूत्रार्थः पूर्ववत्। लिङ्गदर्शनं षष्टिः त्रिष्टुभ इति। त्रिष्टुभः माध्यन्दिनसवनसंबन्धिनः ऋचः षष्टिसंख्याका इति। इदं संख्यारूपलिङ्गदर्शनं तस्य अव्यतिरेकाद् अनन्यगतिकत्वात्। प्रग्रथने षष्टिसंख्याकं भवति स्वाभाविकबृहतां योजने अधिकसंख्याकं भवतीति भावः। यथा ऽधिकसंख्या भवति तद्विस्तारो भाष्यादवगन्तव्यो विस्तरभयान्नेह लिख्यते।

अनुष्टुब्गायत्र्योः प्रग्रथनेन श्यावाश्वान्धीगवयोर्गानम्। तृतीयवर्णकम्।

यद्वा क्व चिच्छ्रूयते श्यावाश्वान्धीगवे आनुष्टुभे तृचे भवत इति। योनिभूता ऽनुष्टुब् उत्तरे गायत्री पाठक्रमे स्तः। गायत्री अपहाय अनुष्टुभावानेयाविति पूर्वपक्षे सिद्धान्तमाह। प्रेति। प्रागाथिकमनुष्टुभः पादं योजयित्वा गायत्र्यां प्रागाथिकं कार्यमानुष्टुभः प्रगाथ इति स्मृतेः। द्वितीयं स्वे चेति सूत्रं प्रगाथे चेति तृतीयं पूर्ववत्। लिङ्गेत्यत्र संख्याविशेषविरोधस्य विस्तरो भाष्ये ऽस्ति तत एवागन्तव्यः।

पादप्रग्रथनेन ब्रह्मसामगानम्। चतुर्थवर्णकम्।

यद्वा गवामयने चतुःशतमैन्द्राबार्हताः प्रगाथा इति श्रुतम्। चतुः शतं चतुरुत्तरं शतम्। पठितेष्वेव खलु प्रथममेकस्मिन् तृचे गानं कृत्वा

Digitized by Google

पश्चात्पूर्वतृचसंबन्धिनीमेकामुत्तरे द्वे । एवमृक्प्रग्रथनं कृत्वा चतुःशतं संपादनीयमुत पादं पुनरारभतइति न्यायेन पूर्ववदेव ग्रथनमिति संशये ऋक्प्रग्रथनेनापि प्रगाथविध्युपपत्तेः ऋक्प्रग्रथनमेव कार्यमिति बहिः पूर्वपक्षे सिद्धान्तमाह । प्रागाथिकं पादयोजनया प्रागाथिकं कार्यम् । तत्र हेतुः । स्वे च । पठितसर्वर्तु प्रगाथः संभवति । ऋक्प्रगाथे तिसृणां पूर्वर्चामेकस्या एव प्रगाथः संभवति न द्वयोरिति भावः । प्रगाथे च । पादग्रथने एव याज्ञिकानां व्यवहारः अतो ऽपि सः । लिङ्गदर्शनम्, अन्या अन्या ऋचो भवन्तीति । पादग्रथने पूर्वर्चः पादमुत्तरऋचो ऽर्धमुभयोर्योजने संपद्या ऋक्, पठितऋचो अन्या भवतीति । पूर्वतृचात् संपूर्णाया ऋच उत्तरत्र ग्रहणे पठितान्या न भवतीति पादग्रथनलिङ्गमनन्यगतिकमिति भावः ॥ २८ ॥

गीतिसंपाठकानामक्षरविकारादीनां विकल्पः । अधि० ७ ।

अर्थैकत्वाद्विकल्पः स्यात् ॥ २९ ॥

सामवेदे गीत्युपाया बहवः सन्ति ते समुच्चिता इति पूर्वपक्षे सिद्धान्तमाह । अर्थेति । अर्थैकत्वात् कार्यैकत्वात् ॥ २९ ॥

साम्ना स्तुवते इत्यस्यैव विधित्वम् । अधि० ८ ।

अर्थैकत्वाद्विकल्पः स्यादृक्सामयोस्तदर्थत्वात् ॥ ३० ॥

ऋचा स्तुवते साम्ना स्तुवते यदृचा स्तुवते तदसुरा अन्ववायन्त्साम्ना स्तुवते तदसुरा नान्ववायन् इति । अत्रोभयमृचा स्तुवते साम्ना स्तुवतइति तुल्यविधिः उत साम्ना स्तुवतइत्येव विधिः शेषो ऽर्थवाद इति संशये पूर्वपक्षमाह । अर्थेति । तदर्थत्वात्तुल्यतया स्तुत्यर्थत्वश्रवणात् । शेषं स्पष्टम् ॥ ३० ॥

वचनाद्विनियोगः स्यात् ॥ ३१ ॥

सिद्धान्तमाह । वचनादिति । वचनाद् एकवाक्यत्वाद् विनियोगः साम्न एव नियमेन विनियोगः । असुरा अन्ववायन् इति निन्दया साम्नः स्तुतिसंभवादर्थवादत्वमिति भावः ।

Digitized by Google

अयं सहस्रेति ऋचा प्रगीतयैवोपस्थानम् । द्वितीयवर्णकम् ।

यद्वा अयं सहस्रमानव इत्येतया ऽऽहवनीयमुपतिष्ठतइति श्रुतम् । सामवेदे इयं ऋक् प्रगीता अप्रगीता च पठिता ऽस्ति । एवं सति अर्थैक-त्वाद् उपस्थानरूपकार्यैकत्वाद्विकल्पः । ऋग् अप्रगीता साम प्रगीता तयोः द्वयोरुपस्थानार्थत्वाद् इति पूर्वपक्षसूत्रार्थः । वचनाद् उपस्थानविधिवाक्ये एतयेति सन्निहितबोधकवचनात् । प्रगीतमन्त्रस्यैव विनियोगः सिद्धान्तसू-त्रार्थः । प्रगीतमन्त्रस्यैव सन्निहितत्वादिति भावः ।

अग्निर्मूर्धेत्यादियाज्यादीनां तानेन विनियोगः । तृतीयवर्णम् ।

यद्वा निखिलवेदे उदात्तानुदात्तादिस्वरविशेषा दृश्यन्ते एकस्वरता ऽपि दृश्यते । अत्र ऋक्सामयोरिति वेदमात्रोपलक्षणम् । तदर्थत्वाद् यज्ञार्थत्वात् स्वरयोरपि तदर्थत्वादैकार्थ्याद्विकल्प इति पूर्वपक्षसूत्रार्थः । वचनात् । यज्ञकर्मण्यजपन्यूङ्खसामस्विति पाणिनीयवचनान्नियमेन स्वर-विनियोग इति सिद्धान्तसूत्रार्थः ॥ ३१ ॥

रथंतरमुत्तरयोर्गायतीत्यादौ उत्तरावर्णवशेन गानम् । अधि० ६ ।

सामप्रदेशे विकारस्तदपेक्षत्वाच्छास्त्रकृतत्वात् ॥ ३२ ॥

एवं सामोहापोद्घातं समाप्य साम्न ऊहविचारमारब्धवान् । यद्यो-न्यां तदुत्तरयोर्गायतीति श्रुतः ऋगन्तरे सामातिदेशः अतिदेशेन प्राप्यमाणं साम ऋगन्तरे ऊह्यं न वेति संशयः । तत्र पुनः संशयः । उत्तरस्यामृच्य-तिदिश्यमानं साम योनिवर्णानुसारेण गेयम् उतोत्तरावशेनेति । तत्र पूर्व-पक्षमाह । सामेति । सामप्रदेशे सामातिदेशे विकारः आरेभावादिल-क्षणो विकारस्तदपेक्षः योन्यपेक्षः स्याच्च शास्त्रकृतत्वात् । यद्योन्यां तदुत्त-रयोरिति शास्त्रेण प्रतिपादितत्वात् । यत्र योनिभूता का चिद् ऋक् तत्र चतुर्थवर्ण इति तत्र एकारस्थाने आरेभावः क्रियते । एवमेवोत्तरस्या-मृचि यो इति चतुर्थाक्षरम् । तत्र चतुर्थाक्षरोत्तरमोकारलोपं कृत्वा तत्रापि आरेभावो योज्यः । एवं सति योनिवद्गानं भविष्यति । तथा च प्रकृति-वदेव गानं नोहप्रसक्तिरिति भावः ॥ ३२ ॥

Digitized by Google

वर्णे तु बादरिर्यथा द्रव्यं द्रव्यव्यतिरेकात् ॥ ३३ ॥

सिद्धान्तमाह । वर्णइति । बादरिराचार्यः वर्णे उत्तरायामृचि यत्र एकार आयाति एकाररूपवर्णएव आईभावं मनुते । तथा क्रियमाणे वर्णव्यतिरेकाद् वर्णस्य एकारस्यव्यतिरेकाद् आई इति वर्णस्य सन्धिरूपत्वात् यथाद्रव्यं संन्धिरूपस्य पूर्ववर्णस्य विवरणं कृतं भवति । अयं भावः । एकारः अवर्णमिवर्णं चाश्रित्य संहितारूपः तत्स्थाने प्रवृत्तः । यथोपेन्द्र इत्यत्र प्रकृतिरूप इन्द्र इति तथा ऋच्यपि एकारो यत्र तत्र तत्प्रकृतिभूतौ अकारेकारौ ऋचो घटकौ साम्नः आवर्णाभिव्यक्तिफलत्वात् । उत्तरत्रापि यत्र एकारः तत्र आई इत्यूहः । न तु पूर्वस्यचि यस्मिन्देशे आईभावः तत्र उत्तरत्रापि तस्मिन्नेव देशइति न नियमः । अतः सामोहः सिद्ध इति ॥ ३३ ॥

उत्तरयोः स्तोभातिदेशः । अधि० । १० ।

स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत् ॥ ३४ ॥

क्व चिद् योनिभूतायामृचि स्तोभरूपा वर्णाः सन्ति ते उत्तरर्चे अतिदिश्यन्ते न वेति संशये पूर्वपक्षमाह । स्तोभस्येति । द्रव्यान्तरे उत्तरस्यामृचि स्तोभस्य निवृत्तिमेके आचार्या आहुः । ऋग्वत् ऋगक्षरवत् ॥ ३४ ॥

सर्वातिदेशस्तु सामान्याल्लोकवद्विकारः स्यात् ॥ ३५ ॥

सिद्धान्तमाह । सर्वेति । सर्वातिदेशः स्तोभसहितस्य साम्नः अतिदेशः स्यात् । सामान्यात् स्तोभस्वरकालाभ्यासविशिष्टे सामान्यात् । लोकव्यवहारात् । ननु ऋक्शब्दार्थैरसंबध्यमानाः स्तोभवर्णाः किमित्युच्चारयेयुरुत्तरस्यामृचीत्याशङ्कायामाह । लोकवद्विकारः स्यात् । यथा लोके गायकैः मध्ये गानशोभार्थमनर्थकवर्णा अपि प्रयुज्यन्ते तथोत्तरस्यामप्यपि स्तोभवर्णप्रक्षेपरूपो विकारः स्यात् ॥ ३५ ॥

अन्वयं चापि दर्शयति ॥ ३६ ॥

अन्वयमिति । स्तोभाक्षराणामुत्तरस्वन्वयं दर्शयति वाक्यविशेषः । स्तोभा गेष्णास्वानुयन्तीति । गेष्णाः स्वराः स्तोभाश्च अनुयन्ति उत्तरत्रानुवर्तन्तइति ॥ ३६ ॥

Digitized by Google

निवृत्तिर्वा ऽर्थलोपात् ॥ ३७ ॥

सिद्धान्तमाक्षिपति । निवृत्तिरिति । निवृत्तिरगिनष्टपतीत्येवंजातीयकानां स्तोभानाम् । शीतकर्मा हीन्द्रो वाक्यशेषउपलभ्यते । अतः अर्थस्य शीतकर्मणः लोपाद् एवंजातीयकानां निवृत्तिः ॥ ३७ ॥

अन्वयो वा ऽर्थवादः स्यात् ॥ ३८ ॥

सिद्धान्तं व्यवस्थापयति । अन्वय इति । एवंजातीयकानामपि स्तोभानामन्वयः अनुवृत्तिर्न निवृत्तिः । शीतकर्मा हीन्द्र इत्यर्थवादो न स्वार्थे न प्रमाणं यतो ऽर्थलोपः स्यात् । न हि वयमिन्द्ररूपं प्रत्यक्षमुपलभामहे । अतः स्तोत्रमात्रस्यानुवृत्तिः ॥ ३८ ॥

स्तोभलक्षणम् । अधि० ११ ।

अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात् ॥ ३९ ॥

स्तोभलक्षणमाह । अधिकमिति । ऋगक्षरेभ्यो ऽधिकं विवर्णं च ऋक्पाठदशायामविद्यमानं च वस्तु स्तोभपदवाच्यं स्तोभशब्दत्वात् । देवदत्तेन सभायां प्रलपता बहुस्तोभं कथितमिति निरुक्तशब्द एव स्तोभशब्दव्यवहारात् ॥ ३९ ॥

नीवारादिषु प्रोक्षणावघाताादिधर्मानुष्ठानम् । अधि० १२ ।

धर्मस्यार्थकृतत्वाद् द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायात् ॥ ४० ॥

क्व चिन्नैवारं चरुं निर्वपेद् इति । तत्र नीवारे प्रोक्षणमस्ति न वा । तथा संस्थिते बहहे मध्वाशयेद् घृतं वेत्यत्र मध्वाशने बहहधर्माः सन्ति न वा । तथा क्व चिन्नखनिर्भिन्नश्चरुर्विहितः । तत्र नखेषु प्रोक्षणमस्ति न वा । क्व चित्परिधौ पशुं नियुञ्जीतेति । तत्र परिधौ यूपधर्माः सन्ति न वा । तथा न गिरागिरेति ब्रूयाद् ऐरं कृत्वोद्गेयमित्यत्रैरापदे गिरावर्णधर्माः सन्ति न वेत्यादिषु संशयेषु पूर्वपक्षस्य शिथिलत्वाद् उपेत्य सिद्धान्तमाह । धर्मस्येति । द्रव्ये नीवारादौ गुणे च मध्वशनादौ विकारे नखादौ व्यतिक्रमे परिध्यादौ प्रतिषेधे प्रतिषिध्य विहितैरापदादौ चोदनानुबन्धः विधीयमानप्रोक्षणादिधर्मसंबन्धः स्यात् । समवायाद् व्रीह्यादिस्थानसंबन्धात् ।

Digitized by Google

also when the affix वति is used in the sense of similitude in accordance with the aphorism 'तत्र तस्येव.'

[Page 610.] (a) The Simile is Indirect when such words as तुल्य, &c. are used, in which case the similitude is implied by the meaning; since the idea of तुल्यता or equality is arrived at only by a due in spection of the similitude; for in 'तेन तुल्यम् मुखम्' (the face is equal to the lotus) the import of equality rests in the object compared (the face); in 'तत्तुल्यमस्य' (the lotus is equal to the face), it rests in the object compared to; and lastly in चंद्रं च तच्च तुल्यम्. (The lotus and the face are equal) it rests in both. And the Simile is Indirect when the affix वति is used in accordance with the aphorism 'तेन तुल्यं क्रिया चेद्वतिः' (i. e. in the sense of equality of action).

(The Verbal or Direct) occurs in a compound (of such a character as the two members cannot be used separately to convey its meaning) when it is in accordance with the tenet (of the Mahābhāshya)—

"इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च" ।

[Page 612.] Examples in order—

(1) The Direct in a Sentence—

"स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा" ॥

["The glory of victory leaves you not in battle even in dream, as a woman having her lord subservient to her leaves him not—he being the receptacle of dignity and grace."]

Here the *woman* is the object compared to, *glory* the object compared; *non-abandoning* the common attribute; and यथा the word signifying similitude; and here we have no compound.

(a) "The particles *iva*, &c. implying as they do nothing else but resemblance in the abstract, directly express a comparison. While the words *like*, *equal* (सम, तुल्य), &c. being concrete terms do not directly convey the abstract notion of resemblance, but through calling up the idea of *something resembling*, which has to be apprehended in identity with what they are put in apposition to (any one of the objects compared or both), before the comparison can be perceived."—*Mirror of Composition*, p. 358, F. N.

Digitized by Google

[*Page* 613.] (2) The Indirect in a Sentence—

"चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति ।
सरसिजमिदमाननं च तस्याः सममिति चेतसि सम्मदं विधत्ते" ॥

["He goes into raptures on seeing the lotus and her face equal,—she of eyes like that of a frightened fawn—the face, reddened in anger, (and as such) shining brilliantly like a deep-red pearl necklace."]

Here the identity or sameness of the *face* and the *lotus* is first signified; and then follows, by implication, the idea of their having a common property (here, the *red brightness*).

(3) The Direct in a Compound—

"अत्यायतैर्नियमकारिभिरुद्धतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं बभार" ॥

["The king who protected the world by means of the four expedients, like Vishnu by means of his four arms—the arms, long (the expedients strong and pure), the suppressors of the proud (the Rākshasas for Vishnu, and common proud people for the king) heavenly (excellent), resplendent and always successful."]

Here in भुजैरिव, we have the नित्यसमास; and thus the Direct Simile here lies in the compound.

[*Page* 614.] (4) The Indirect in Compound—

"अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः ।
सुरतरुसदृशः स भवान् अभिलषणीयः क्षितीश्वर न कस्य" ॥

["O Lord of the Earth! by whom are you not desired—you who are like the celestial tree, having your great excellence sung as lying in opening the way for fulfilled desires or longings."]

(5) and (6) The Direct and the Indirect, occuring in the Nominal Affix—

"गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत्" ॥

Digitized by Google

[" The profoundity of his character is really like the Lord of Gangā (the ocean); and he is hard to be looked at like the summer sun."]

Here, in the first half we have the Direct; for गङ्गाभुजङ्गवत् = गङ्गाभुजङ्गस्य इव, the affix वति being in the sense of इव, in the place of the genitive ending. In the second half, however, in रविवत्, the affix is in accordance with तेनतुल्यं, &c.

Though (in the example विजयश्रीर्नमुज्ज्वति, &c.) if we have no idea such as—'as a woman having her lord subservient to her, appears super-humanly brilliant, so does glory also by residing in you,"—if we have no such like idea, there is no charm—and in charm consists the Figure; yet these are not divided under the classes of Poetry Suggestive or of Subordinate Suggestion; because the cognition of charm does not necessarily depend on the reflection of the touch of suggestion; but it is due merely to the consideration of figurativeness of the denoted meanings (of the words इव, &c.)

[*Page* 617.] (*a*) *Rasa*, &c., as the suggested meaning, and different Figures, are found everywhere without any contradiction; hence in exemplifying, no notice is taken of them.

If examples devoid of all this (*Rasa*) were cited,—these would be distasteful. Hence contradiction with former assertions should not be brought forward as an objection.

Forms of Elliptical Simile.

88 *(contd.)*—[*Page* 619.] The (common) attribute being left out, (the elliptical) is as before (the complete); but (in this case) the Direct does not occur in a nominal affix.

(*a*) *Objection:* In Chapter VI., it was said that the examples of Figures were those of Fanciful Poetry; but here we find this impossible, the examples quoted being those of Suggestive Poetry; and as such these cannot be called Fanciful Poetry which has been defined as *non-suggestive*. *Reply:* In the present case we are dealing with Figures *exclusively*, and as such must consider these alone. As for the suggested meanings in the shape of *Rasa*, &c.—these are possible in each and all instances of poetry. In the above examples, if you consider the sentiments with reference to the king, &c., to be explicit, then these become examples of Suggestive Poetry; if on the contrary you consider them to be inexplicit, then they are Fanciful. For the *non-suggestiveness* of Fanciful Poetry has already been explained as consisting in the fact of the *suggestion not being explicit*.

Digitized by Google

'*Attribute*'—the common attribute, *Nominal Affix*—where the affixes कल्प &c., are used, we have the Indirect.

Examples—

(1) The Elliptical (attribute) Direct in a Sentence—

"धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा" ॥

["His words like the Ambrosia—is really fit to be followed—he, the virtuous, and endowed with uncommon gentlemanly qualities.]

Here the common attribute of *ambrosia* and *his words*—the final sweetness—is left out.

[*Page* 620.] (2) The Elliptical (in attribute) Indirect—

"आकृष्टकरवालोऽसौ सम्पराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः" ॥

["He wandering in the battle with his drawn sword was seen by the enemy's forces, as if equal to the Death-God."]

Here *cruelty*—the common attribute—is left out.

(3) (4) and (5) The Elliptical (attribute)—Direct in Compound, Indirect in Compound and the Indirect in Nominal Affix—

"करवालवदाचारस्तस्य वागमृतोपमा ।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे" ॥

["You will live if you know that his actions are like the sword, like ambrosia his words, and his heart resembling poison."]

Herein करवालवत्, the common attribute is *killing;* and this being a नित्यसमास with वत्, it is Direct; in अमृतोपमा, the common attribute is *sweetness;* and here उपमा standing for property, this is an instance of the Indirect; and in विषकल्पम् the common attribute is *killing*—the affix कल्प being used in the sense of *almost.*

Digitized by Google

88 (*concld.*)—[*Page* 621.] On the non-mention of the object compared to, (the Simile) occurs in a sentence and a compound—*e. g.*

"सअलकरणपरवीसामसिरिवितरणं ण सरसकव्वस्स।
दीसइ अहवा णिसम्मइ सरिसं अंसंसमेत्तेण" ॥

["Nothing is either known or seen to equal charming poetry —even in its smallest part—in affording the pleasurableness of the highest senses."]

[*Page* 622.] Here the object to which the poetry is compared is not mentioned. By changing कव्वस्स into कव्वसमम् and सरिसम् to गुणम् we get a Simle in a compound.

89 (*contd.*)—[*Page* 623.] On the non-mention of the term signifying similitude, it occurs in compound and in the affixes: क्यच् (in an accusative as well as a locative sense), क्यङ् (used in a nominative sense), and णमुल् (having its preceding substantive accusatively or nominatively used).

On the non-mention of the terms signifying similitude—such as वा—the simile is six-fold: (1) through compound, (2 and 3) through the affix क्यच् produced from the accusative and the locative, (4) through क्यङ्, from the nominative, and (5 and 6) lastly through णमुल—from accusative and nominative antecedents.

[*Page* 624.] Examples—

(1) Compounds—

"ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता" ॥

["The eastern quarter was ornamented by the moon—the lord of Kumuda, joy to the eyes, and pale as the cheeks of a woman."]

Here in कामिनी &c.

And—

"असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत्" ॥

Digitized by Google

[“This (king) seeing the prowess of his opponents, became horripilated, and hence the freshness of his cheeks manifesting itself, and he having his sword-leaf terrible as a black snake, and having his movements extraordinary and hasty through strong anxiety (to fight)”].

[Here in श्यामित &c.]

[*Page* 625.] (2) and (3) क्यच् used objectively and locatively and (4) क्यङ्—nominatively.

“पौरं सुतीयति जनं, समरान्तरेऽसावन्तःपुरीयति विचित्रचरित्रचुञ्चुः ।
नारीयते समरसीम्नि कृपाणपाणेरालोक्य तस्य चरितानि सपत्नसेना ” ॥

[“He treats the citizens as children, and known to be of extraordinary character spends his time in the harem, in the intervals of battle. And the forces of his enemy act as females (through fear) on seeing him sword in hand (performing) extraordinary feats in battle”].

Here in सुतीयति we have सुत and क्यच् in the accusative sense; in अन्तःपुरीयति, it is in the locative sense; as in नारीयते we have नारी and क्यङ् in a nominative sense.

(5) and (6) णमुल् with objective and nominative antecedents—

[*Page* 627.] “मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे ।
स पुनः पार्थसंचारं संचरत्यवनीपतिः ” ॥

[“In battle his enemies see him as they would the summer Hot-rayed One (Sun). He, the Lord of the earth, on the other hand, moves like Arjuna”].

[Here in निदाघघर्मांशुदर्शं—we have णमुल् having for its antecedent निदाघघर्मांशु, used accusatively in the compound; and in पार्थसंचारं we have the same affix preceded by पार्थ which occupies the position of the nominative in the compound].

89 (*concld.*)—[*Page* 628.] On the non-mention of these two, it occurs in the affix क्विप् and in a compound.

Digitized by Google

'*Of these two*'—*i. e.* of the common attribute and the term signifying similitude.

Example—(1) of क्विप्.

"सविता विधवति, विधुरपि सवितरति, तथा दिनन्ति यामिन्यः।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि" ॥

["The mind being subjugated by pleasure, the sun becomes the moon, nights (bright as day); when however the mind is suppressed by pain, the moon becomes the sun, and days (dark) as night."]

[Here in "विधवति &c."]

(2) Of Compound—

"परिपन्थिमनोराज्यशतैरपि दुराक्रमः।
सम्परायप्रवृत्तो ऽसौ राजते राजकुञ्जरः" ॥

["The elephant of the king shines resplendent, when engaged in battle, unapproachable as he is by even the dreaming desires of his enemies"].

[Here in राजकुञ्जरः.]

90 (*contd.*)—[*Page* 630.] On the non-mention of the common attribute and the object compared to, it is found in Compound and Sentence.

Example—

"ढुण्ढुल्लन्तो मरिहिसि कण्टअकलिआइँ केअइवणाइं।
मालइकुसुमसरिच्छं भमर भमन्तो ण पाविहिसि" ॥

["O black-bee! thou shalt die of wandering among *kētaki* bowers; howsoever much thou mayst wander, thou shalt never find any thing similar to the Mālatī."]

[Here in "मालती, &c."]

By changing कुसुमसदृशं into कुसुमेण समम् we shall get a simile in a sentence.

90 (*contd.*)—[*Page* 631.] On the suppression of the object compared, (it occurs) in क्यच्.

आसे = निरासे, *i. e.* suppression.

Example—

"अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति" ॥

["He appears as the thousand-weaponed,—having his eyes full open on seeing the valour and prosperity of his enemies, and having his arm terrible through the sword."]

(*a*) Here *self* is the object compared, occurring in the word सहस्रायुधीयति which means, when broken into its component parts, "behaves himself like Sahasrāyudha."

90 (*concld.*)—[*Page* 630.] When all the three are suppressed, it occurs in a compound.

[*Page* 633.] On the suppression of the three, *i. e.* the term signifying Similitude, the common attribute, and the object compared to.

Example—

"तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा ।
स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः" ॥

["The fawn-eyed one captivates the hearts of ascetics—she having a (full) glimpse into youth, having her body given up to pleasant enjoyment, her heart pervaded with a heap of Cupid's arrows."]

Here if we make (मृगनयना) an instance of compound and suppression (of a member of the compound) then it shall be the example (not if we make मृग indicate मृगलोचन, in accordance with the Kātantra).

[*Page* 635.] In "आयःशूलिकः" which is equivalent to अयः शूलेन अन्विच्छति (acts like a spear), cruelty of action (क्रूराचार) is indicated by the "Spear" (अयः शूल); and as such this is an instance of अतिशयोक्ति,

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

विधिमीमांसा, अप्पय्यदीक्षितकृता श्री ते· रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।≡)॥

भक्तितरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम् .. .. ४)

मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

शाश्वतधर्मदीपिका, ... १)

अमरकोशः सटीकः .. .. ४)

योगवार्तिकम् .. .. २॥≡)

श्रौतपदार्थनिर्वचनम् .. .. ३)

भावार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूरशास्त्रि-
संशोधिता .. .. ४)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम् ५॥)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३≡)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः । .. .. २।)

वेदपूर्त्तिः प्रथमो बिन्दुः सत्संप्रदायाचार्य पं· स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥≡)

वेदपूर्त्तिर्द्वितीयो वेदार्थसंग्रहः .. .. ३॥)

शास्त्रदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं· स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-
शास्त्रिणा संशोधिता पूर्वारूपा .. .. ५॥)

• माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता, ... ७॥)

काशिका .. .. ६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 169

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 185

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 201

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 217

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 5.] May, 1898. [VOL. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

वर्त्तमानमित्यत्र च व्यामोहनमात्रं विवक्षितं तेन वञ्चयते लोकान् मा-यायोगेन केशवः । इत्येतदप्यसुरवञ्चनार्थशक्तियोगपरम् इन्द्रो मायाभिः पुरुरूप ईयते । इत्येतच्च शक्तिविशेषैः प्रभूतरूपप्रकाशनपरमन्यथा-ऽनन्वयात् । न चेदमिन्द्रभ्रान्तिपरं वाक्यं प्रशंसार्थप्रकरणविरोधात् कथमन्यथा युक्ता ह्यस्य हरयश्शतादश भूरि त्वष्टेह राजतीत्यादिकं घटते संभवाम्यात्ममाययेत्येतदप्यौचित्यात् स्वच्छन्दावतारहेतु-भूतबुद्धिविशेषविषयं माया वयुनं ज्ञानमिति च नैघण्टुकाः । एवं सतीच्छागृहीताभिमतोरुदेहः । समस्तशक्तिरूपाणि तत्करोति जने-श्वरः । देवतिर्य्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलयेत्यादिभिरैकार्थ्यं स्यात् मम माया दुरत्ययेत्यादिषु गुणमयीति विशेषणात् त्रिगुण-द्रव्यविषयत्वमेव कण्ठोक्तं तथा च तन्नामपाठः एतेन भ्रामयन् सर्वभू-तानि यन्त्रारूढानि माययेत्यपि गतार्थं, भूयश्चान्ते विश्वमायानिवृत्ति-रित्येतदपि प्रस्तुतयोगबलान्निश्शेषमायातरणमेव निर्दिशति एवं विष्णु-मायामहावर्त्तम् । विष्णोर्विचित्राः प्रभवन्ति मायाः । इत्या*दिकमपि सत्यविषयमेव सम्मन्तव्यं माया†मात्रन्त्विति शेषं पदमपि स्वत-न्त्रसंक‡ल्पमूलत्वात्प्रसर्गस्याश्चर्य्यतमत्वपरं जीवकर्तृकसृष्टिव्यवच्छेद

* आदिपदेन हरेश्चैषा महामाया यया संमोह्यते जगदित्यादिपरिग्रहः ।

† कार्त्स्न्येनानभिव्यक्तस्वरूपत्वेनैव मायामात्रत्वव्यपदेशो न तु मायाशब्देनास-त्स्वरूपताऽप्यभिधित्सिता देवमायेव निर्मितेत्यादौ मायाशब्दस्यासत्स्वरूपवाचकताया अदृष्टत्वात् । शेषं मात्रपदं त्वस्याश्चर्यरूपत्वमनुबोधयिषया एकस्या अपि तस्या विचि-त्रानन्तकार्यजनकत्वेन सर्वाश्चर्यमूलत्वात् । तच्च सर्वोपभोगयोग्यत्वाभावेनैव न च तन्मिथ्यात्वमावहति गिरिगह्वरान्तर्गतानां केषांचिदङ्कुरविशेषाणां कदाऽपि कस्यापि च भोगाजनकत्वेऽपि कदाचिदेव कस्यचिदेवोपभोगजनकत्वेऽपि वा तेषां घटादिसमा-नयोगक्षेमत्वाङ्गीकारात् । अमुमेवार्थं सूचयितुमाचार्याः सुसूत्रन् मायामात्रमिति इतरथा तु मायामात्रं तु संकल्पप्रभवत्वादित्येव सूत्रयितुमुचितमिति स्पष्टमपक्षपातिनां शास्त्र-निष्णातधियामिति कृतमत्राधिकप्रयासेन ।

‡ साक्षाद्भगवत्संकल्पमूला स्वाप्नसृष्टिरिति हि विशिष्टाद्वैतसिद्धान्तः जीवसृ-ष्टिरिति तु पूर्वपक्षिणः ।

Digitized by Google

एव ह्यधिकरणे युज्येत प्रागेव हि स्थापितप्रपञ्चमिथ्यात्वानामिह पुनस्तुप्रसिद्धे स्वप्नविषये विशेषतश्शङ्का नाङ्कुरति येन वा जागरप्रपञ्चसत्यत्वमभ्युनुज्ञायैव चिन्ता न स्यात् अविद्याशब्दोऽपि न क्वचिदप्यनिर्वचनीयजगदुपादानविषयः तथा हि चरन्त्वविद्या ह्यमृतन्त्वविद्येत्यादौ चरं प्रधानमित्यादिप्राकरणिकवाक्यैकार्थ्यात् प्रधानविषयत्वमेव युक्तम् । अत्र च विद्याशब्दोक्तात् पुरुषादन्यतामात्रेण प्रकृतावविद्याशब्दः न च सा मिथ्या, गौरनाद्यन्तवती । सा जनित्री भूतभाविनी । त्रिगुणन्तज्जगद्योनिरनादिप्रभवाप्ययम् । अचेतना परार्था च नित्या सततविक्रियेत्यादिभिस्तन्नित्यत्वसिद्धेः । कथन्तर्हि मृत्युर्वै परे देव एकीभवति तमः परे देव एकीभवतीति वाक्ययोर्निर्वाहः, इत्थं सर्वाधारभूते परस्मिन् देवे विभक्तावस्थात्यागेनैकत्वदशावस्थानमात्रं ह्यत्राभिप्रेतम् । एतेन प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनीत्येतदपि व्याख्यातम् । अविद्यया मृत्युं तीर्त्वेत्यत्राविद्याशब्दस्तत्त्वज्ञानविरोधिनिवर्तकस्वकर्मविषयतया भाष्ये व्याख्यातः अनुवाके प्रकृतयोर्विद्याकर्मणोरेव विद्याञ्चाविद्यां च यस्तद्वेदोभयं सहेति परामर्शात् पर्युदासवृत्तेनञश्चात्रतन्नविषयत्वोपपत्तेः । अविद्यया मृत्युं प्राप्य स्थित इति निर्वाहस्य चातिक्लिष्टत्वात् बाधाभावे च स्वरसपरित्यागायोगात् ब्रह्मविद्यामधिष्ठाय तत्तु मृत्युमविद्ययेत्युपबृंहणानुगुण्याच्च अविद्या कर्मसंज्ञाऽन्येत्यत्र बन्धककर्मविषयत्वं वाक्यशेषसिद्धम् अविद्यायामन्तरे वर्तमानाः सोऽविद्याग्रन्थिं विकिरतीह सौम्य अविद्यासञ्चितं कर्म अविद्यातरुसंभूतिबीजमेतद् द्विधा स्थितमित्यादौ प्रकरणानुगुणतत्तदर्थविषयत्वं ग्राह्यम् । आदिशब्देन अनृतेन हि प्रत्यूढास्त इमे सत्याः कामाः अनृतापिधानाः तेषां सत्यानां सतामनृतमपिधानमित्याम्नातो-

Digitized by Google

ऽनृतशब्दश्च संगृहीतः सत्कर्मणि कृतशब्ददर्शनात्तदितरवृत्त्या दुष्क-र्मविषयोऽत्रानृतशब्दः, दुष्कृतस्य च ज्ञानपिधायित्वं श्रुतिस्मृतिसिद्धं त्वयाऽपि दुस्त्यजञ्च । एवमसदव्याकृतशब्दैरपि न मिथ्याऽर्थग्रहः अवस्थाविशेषवैशिष्ट्यपरत्वात्तदत्र फलितमाह । मत इति । त्वदि-ष्टानिर्वचनीयत्वादिविशिष्टेत्यर्थः । अनन्यथासिद्धबहुश्रुतिप्रतिहतेश्च मायादिशब्दैर्न ब्रह्मणा*नक्तृप्तिरित्याह । किञ्चेति । निरवद्य इति सामान्येनत्याऽप्यज्ञानरूपमवद्यं निरस्यते अस्ति चाकर्मवश्यत्व-स्वतस्सर्वज्ञत्वश्रुतिः सकला न यत्र क्लेशादयस्सन्ति परावरेशे इत्या-द्युपबृंहणशतं च मोक्षप्रदत्वश्रुत्या च स्वयं न मायासंबद्धः तत्प्र-सादाधीनं ह्येषां मायातरणं गीयते ।

ननु त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारय-सीति कर्मवश्यस्य योगसिद्धस्य गुरोरविद्यातारकत्वमाम्नातमिति चेत् अस्तु तच्चार्थस्वभावात् परम्परया तारकत्वं ब्रह्मण एव साक्षान्मो-क्षप्रदत्वेन प्रतिपादनात् । एवमविद्याप्रसङ्गरहिते ब्रह्मणि अज्ञाधच-तमैः शब्दविशेषैरविद्यां वदतस्तवैवाप्रतिपत्तिविप्रतिपत्तिभ्यां निग्रहः स्यादित्यभिप्रायेण उक्तम् । स्यादविद्या तवैवेति ॥ ४१ ॥

इति मायादिशब्दानां ब्रह्मदोषप्रतिपादकत्वानुपपत्तिः ॥

अत्र केचिन्निर्दोषश्रुत्यविरोधमाकाङ्क्षन्त एवं व्यभाङ्क्षुः अविद्या किल स्वकल्पितानां स्वप्नानां सत्यन्तिरोधायासत्यं सत्यत्वेन प्रका-

* कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः इत्यादिवचसां तु कार्यमुपाधिर्भा-ग्यभूतं यस्य स तथा । कारणं जगत्कारणं प्रधानमुपाधिर्धर्म उपसर्जनीभूतं शरीरस्व-रूपं यस्य स तथा । प्रधानादेर्भगवच्छरीरस्वरूपत्वं च तत्रतत्र बहुधोपलभ्यते श्रुति-ष्विति किं तदुपपादनसंरम्भेण कृतकरेण नः । एतेनेमामेव श्रुतिमवष्टभ्य भगवतो मायावेशवशंवदतां ब्रह्मणश्च तदतिरिक्ततामातिष्ठमानाः परास्ताः, जन्माद्यधिकरणे जगज्जन्मादिकारणस्यैव ब्रह्मलक्षणत्वाभिधानात् । अवशिष्टवक्तव्यमिहत्यमस्माभिः वेद-पूर्वौ सिद्धान्ततेजोविपक्षपक्षावक्षरेऽभिहितमिति ततोऽवधेयम् ।

शयति दुःखाधिकञ्च दोग्धि, माया तु ब्रह्मणः सत्यमसत्यञ्च सम्यगेव दर्शयन्ती दुःखादिकञ्चानुत्पादयन्ती विश्वव्यापारलीलारसं प्रसूत इति इमं विभागमनुभाष्य दूषयति । निर्दोष इति ॥

मू० निर्दोषश्रुत्यबाधप्रणयिभिरुदितो ब्रह्मजीवानुबन्धी मायाऽविद्याविभागोऽप्यफल इह परोन्मोहनार्था हि माया । मिथ्याऽर्थान् दर्शयित्वा विहरणमपि तैस्तादृशं भावयन्ती मायैव स्यादविद्या न कथमितरथा स्यादनुच्छेदनीया ॥ ४२ ॥

टी० अफलत्वं विवृणोति । परेति । अयं भावः ये नाम केचिन्मायया क्रीडन्ति न तेऽनया मोमुह्यन्ते परानेव व्यामोहयन्ति अत्र तु न वस्तुतस्सन्ति भवतां परे मोहनीयाः कल्पितांस्तु तेषियाः कल्पितानि च मोहकरणोपकरणानि स्वयं सर्ववित्परमेश्वरो मायावी यदि कल्पितत्वेन पश्येत् कथं तान् मुमुमोहयिषेत् कथं च तैश्चिक्रीडिषेत् । अत ईदृशोपाधिविभागेन जीवेश्वरयोस्सदोषनिर्दोषत्वविभागोदुस्साध इति । अथ पराविद्याकल्पितानि जीवाद्युपकरणानि ब्रह्मापि स्वमायया परमार्थवत्पश्यतीति मन्वीत तत्राह । मिथ्याऽर्थानिति । दर्शयित्वा सत्यत्वेनेति शेषः, तादृशं मिथ्याभूतमित्यर्थः । इयं स्वयमसत्यैव माया स्वसिद्धान्यविद्यासिद्धानि वा मिथ्याभूतानि विहारोपकरणानि तत्साध्यं विहरणं च यदि सत्यत्वेन दर्शयन्ती अर्भकादीनामिव प्रतिबिम्बकल्पैर्जीवैस्संव्यवहारमारभेत सैव कथमविद्या न स्यात्, सुखजनकत्वादिति चेन्न अविद्यायामपि तस्याभ्युपगमात् । दुःखाजनकत्वे सतीति चेत्तत्राह ।

Digitized by Google

इतरथेति । इतरथा–दुःखासंभिन्नसुखजनकत्वेनाविद्यात्मकत्वाभावे सतीत्यर्थः । नन्वनादित्ववन्मायया ऽनुच्छेद्यत्वमप्यस्तु का नो हानिरिति चेत् प्रथमं तावदसत्यस्य सर्वस्यानित्यत्वाभ्युपगमविरोधः । अथ च ब्रह्मस्वरूपवन्निर्बाधस्य नित्यस्य भावरूपस्यासत्यत्वकॢप्तिविरोधः । अथवा विश्वमायानिवृत्तिरिति स्वाभीष्टपरतया व्याख्यातश्रुतिविरोधः नित्यानित्यवस्तुविवेकवेतथ्यञ्चेति ॥ ४२ ॥

इति मायाविद्याविभागवादभङ्गः ।

यत्तु मिथ्याभूतस्य प्रपञ्चस्य तादृशमेवोपादानं भवितुमर्हतीत्याहुस्तदनुभाषते । मिथ्येति ।

मू० मिथ्याभूतस्य सत्यं निरुपधि भजते न ह्युपादानभावं तस्योपाधिश्च मिथ्याऽऽत्मक इति निरधिष्ठानता नास्य युक्ता । तस्मात्सत्यानृते द्वे मिथुनमिति न सद्विश्वसत्ता ह्यबाध्या सद्विद्यायाञ्च कार्यं ननु कथमसतस्सद् भवेदित्युपात्तम् ॥ ४३ ॥

टी० अयं भावः यद्यपि ब्रह्मोपादानकमशेषं कार्य्यमाम्नातं तथाऽपि तस्य न स्वरूपतस्तदुपादानत्वं युक्तं निर्विकारत्वात् विरूपत्वाच्च अत उपाध्यपेक्षायां ब्रह्मण उपादानत्वघटकतया प्राप्त उपाधिः स्वकार्य्यवन्मिथ्याभूत एष्टव्यः स च स्वरूपसत्यत्वाभावान्निरधिष्ठानो न सिद्ध्येत् अतो ब्रह्मण उपादानत्वार्थमुपाधेः स्वरूपसिद्ध्यर्थं मिथःकरम्बितसत्यानृतमिथुनसंभवः सर्गः स्वीकार्य्य इति अत्र लोकसिद्धोपादानप्रक्रियाविरोधमभिप्रेत्याह इति न सदिति । सत्ययोरेव हि प्रकृतिविकृतित्वं दृष्टं न च कल्पितरजताद्युपहितस्य तत्त-

Digitized by Google

दर्थक्रियाकारित्वम् अतो मिथ्योपादानतयाऽपि ब्रह्मण उपादानत्वं मृग्यमिति भावः। उपादानमिथ्यात्वकल्पकासिद्धिमाह । विश्वेति। प्रपञ्चस्य सत्यत्वं तावद्व्यावहारिकव्यपदेशेन त्वयाऽपि संगृह्यते बाधश्च परिहरिष्यत इति भावः। श्रुतिविरुद्धं च कार्य्यमिथ्यात्वमित्याह। सद्विद्यायामिति। तद्ध्येक आहुः असदेवेदमग्र आसीदिति परमतमनूद्य स्वमतेन तत्प्रतिक्षेपे कुतस्तु खलु सोम्यैवं स्यात् कथमसतः सज्जायेत इति कार्यसत्यत्वं सम्प्रतिपन्नत्वेनोपात्तम् अतः प्रथमप्रतीतानुसारेण वाचारम्भणं विकारो नामधेयम्। अपागादग्नेरग्नित्वमित्यादिकमसत्कार्य्यवादनिरासार्थतया नेतव्यमिति भावः। एवं मृत्तिकेत्येव सत्यं त्रीणि रूपाणीत्येव सत्यमित्यादौ च श्रुत्युपात्तमृत्तिकादिसत्यत्वानुरोधेनोपादानोपादेयद्रव्यतादात्म्यपरत्वसंग्रह एव साधीयान्। अथ नामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमित्यत्र च प्रकृत्यवगतप्राणसत्यत्वाबाधेन संबन्धविभक्तेरुचितविशेषसंभवे विपरीतविवक्षाकल्पनमन्याय्यं यदि च प्राणेषु व्यावहारिकं सत्यत्वमिहानूद्येत तदा मिथ्याभूतानामेष सत्यमिति किन्नाम त्वदिष्टं निर्दिष्टं स्यात् प्रत्युत समभिव्याहारसामर्थ्यात् ब्रह्मणोऽपि सत्यत्वम् अविशिष्टोपात्ततया व्यावहारिकमित्येव सिध्येत् स्वरूपेऽधिकसत्यत्वविधौ च तस्य नीलादिवन्निष्प्रतियोगिकत्वान्न षष्ठी समन्वीयेत अतो यथाभाष्यमिहार्थः ॥ ४३ ॥

इत्यविद्याकल्पककार्य्यमिथ्यात्वानुपपत्तिभङ्गः ।

अथ यदुपजीवनेन मिथ्याभूतस्य मिथ्याभूतमेवोपादानमिति कल्प्यते तमेव प्रकृतिविकृत्यैकरूप्यनियमं निरस्यति । कार्य्याणामिति ॥

मू० कार्य्याणां यत्स्वरूपं किमपि गुणमयं कारणं कापिलोक्तं तत्सिद्धं माक्षिकादेः कृमिमुखिजनिना सूत्रकारैर्द्वितीये । तस्मान्मिथ्यात्मकस्य स्वयमनुपधिकं सत्यमेवास्तु सूतिः सत्योपादानवादे जगदपि न मृषा स्यादितीष्टं त्विदं नः ॥ ४४ ॥

टी० न विलक्षणत्वाधिकरणे हि सत्त्वरजस्तमोमयस्य जगतस्तादृशमेवोपादानं युक्तम् । न तु निर्गुणं ब्रह्मेति वदतस्सांख्यस्य द्वितीयेऽध्याये सूत्रकारैरुत्तरं दत्तं दृश्यते त्विति । कथञ्चित्साररूप्यं ब्रह्मणोऽपि सिद्धं सर्वथा सारूप्यं न ते प्रकृतेरपि स्यात् भेदाभेदाङ्गीकारेऽपि समविषमदशाभेदव्यवस्थापनात् अतः कार्यान्तरकारणव्यावर्तकाकारेण सारूप्यमपेक्षितमिति वक्तव्यं तच माक्षिकगोमयादिभ्यः कृमिवृश्चिकाद्युत्पत्तिदर्शनाद् व्यभिचारः एष्वपि पार्थिवत्वाकारेण सारूप्यमस्तीति चेत् किमतः, तेनाकारेण तेषां तत्कारणत्वे पार्थिवान्तरेभ्योऽपि तज्जातीयोत्पत्तिप्रसङ्गात् । यदि चासजातीयोत्पादकव्यावर्तकाकारेण सारूप्यमिष्येत कथमिदं प्रकृतौ संभाव्येत सर्वस्याप्यन्ततःप्रकृतिकार्य्यत्वाभ्युपगमात्तद्व्यतिरिक्तोपादानानङ्गीकाराच्च । एवं कार्य्यस्य विजातीयकार्य्यव्यावर्तकाकारेण सरूपमुपादानमित्यपि नियमो दूष्यः सारूप्यविकल्पदोःस्थ्यस्य दुर्वारत्वात् शरावादिजातीयव्यावर्तकघटत्वादिना मृदस्सारूप्यायोगात् अतस्सारूप्येण वा वैरूप्येण वा अन्वयव्यतिरेकवता धर्मिग्राहकसिद्धेन वा केनचिदाकारेण निमित्तवदुपादानत्वमपीति नियमः एवं स्थिते सत्यकारणत्वं कार्य्या-

णामसत्यत्वं च स्थापयतस्ते निरुपाधिकात् सतो जगदुत्पत्तो न विरोध इत्याह । तस्मादिति । निर्विकारश्रुतिविरोधात् उपहित-यह इति चेन्न विकारमिथ्यात्वेन युष्माभिस्तत्समाधानात् । सूतिः अध्यासाधिष्ठानतया उपादानमित्यर्थः । अथ प्रसङ्गान्तरमाशङ्क्य परिहरति । सत्येति । तु—शब्देनन केवलमिष्टप्रसङ्गता व्याप्तिसापेक्ष प्रसङ्गे पूर्ववत्साध्यनियमभङ्गोऽप्यस्तीति द्योत्यते ॥ ४४ ॥

इत्युपादानोपादेयसालक्षण्यवादभङ्गः ॥

अथ कार्य्यमिथ्यात्वासिद्धिरेवासिद्धा अनुमानतस्तत्सिद्धेरि-त्यत्राह । दृश्यत्वादिति ।

मू० दृश्यत्वाद्विश्वमिथ्यावचसि विहतयोऽसिद्धि-
यश्चात्र वह्न्यः पक्षादेस्सिद्ध्यसिद्ध्योर्न हि
गतिरितरा नापि वादाङ्गमीदृक् । मर्य्यादां
लोकसिद्धां विजहत इह ते नापरा सा प्रसि-
द्धेर्निर्मर्यादोक्तिमात्राज्जगदपलपतः किन्न
सत्यं ततस्तत् ॥ ४५ ॥

टी० मिथ्याशब्दोऽत्र श्लोकयोरिनिवद् भावप्रधानः विगीतं मिथ्या दृश्यत्वात् यद् दृश्यं तन्मिथ्या यथा शुक्तिरूप्यमित्यत्र सर्वे दोषास्समाह्रियन्ते । विहतयस्तावद् विगीतपदं किञ्चिन्निष्ठं विगीत-त्वमुपस्थापयति तस्यापि पक्षीकरणात् तन्निष्ठात्यन्ताभावो मिथ्या-पदेनोपस्थाप्यत इति प्रतिज्ञापदयोर्व्याघातः, द्वयोरपि पदयोस्त-त्वतः स्वार्थसमर्पकत्वाभावान्न व्याघात इति चेत् एवं सति त्वन्मते क्वचिदपि प्रतिज्ञाविरोधो न स्यादिति विशृङ्खलविह-द्भाषितेन भवता भवितव्यम् ईदृशतत्त्ववेदिना च त्वया प्रति-

वादिनोऽपि विरुद्धं वदन्तो न निग्राह्याः परबुद्धिसिद्धविरोधान्निग्रह इति न परबुद्धिसिद्धेऽपि त्वया तत्त्वशून्यत्वावधारणात् । किञ्च विगीतत्वं यदि मिथ्या स्यात् तदा सत्यत्वेन वा मिथ्यात्वेन वा संप्रतिपत्तिः स्यात् तत्राद्ये मिथ्यात्वसाधनव्याघातः । द्वितीये साध्यत्वव्याघातः मिथ्यापदस्य सत्यमसत्यमनिर्धारितविशेषद्वयं वा मिथ्यात्वमु*पाददीत प्रथमे तस्य मिथ्यावृत्तित्वव्याघातः, न हि सत्यं रूप्यत्वं शुक्तिरूप्ये वत्स्यति सिद्धान्तव्याघातश्च ब्रह्मस्वरूपस्य सत्यस्य निराधारस्या सत्यवृत्तित्वे व्याघातः, तदतिरिक्तस्वीकारे सत्याद्वैतव्याघातः । हेतुपदेन च पक्षधर्मतयोस्थाप्यमानं लिङ्गं साध्यपदेनापह्रियत इति प्रतिज्ञाहेतुविरोधः, शुक्तिरूप्यगतयोश्च साध्यसाधनयोस्सत्यत्वेन ग्रहणे प्राग्वद्विरोधः, असत्यत्वेन ग्रहणे तूदाहरणवाक्येन व्याप्तिप्रदर्शनविरोधः, दृष्टान्ते च मिथ्यात्वेन प्रदर्शितस्य साध्यस्य पक्षे सत्यत्वेनोपसंहारे प्रतिज्ञोदाहरणविरोधः, असत्यत्वेनोपसंहारे च विधायकमेव निषेधकमिति व्याघातः । एवमसिद्धयश्च तथा हि यद्यपि तर्कस्यारोपितलिङ्गधीरङ्गं तथाऽपि साधने तु न तथा तथैवोभयव्यवस्थादृष्टेः, अन्यथा स्वबुद्धिकल्पितधेनुपर्वतादिषु कल्पितैरेव कैश्चिल्लिङ्गैः पयःपावकादीननुमाय तदर्थिनां तत्र प्रवृत्तिप्रसङ्गात् व्यावहारिकसदेव साधनाङ्गं न प्रातिभासिकमिति चेन्न । शुक्तिरूप्यस्य त्वया दृष्टान्ततयोपादानात् । अत एव प्रमितत्वेन लोकबुद्ध्यारूढमाश्रयादि भवतीत्यपि निरस्तम् । प्रतिवादिसम्मतत्वमात्रेण पक्षीकारादिः स्यादिति चेन्न स्वार्थानुमाने तदयोगात् तत्पूर्वकत्वात् परार्थप्रयोगस्यान्यतरासिद्धत्वलोपप्रसङ्गाच्च तदिह पक्षादीनां प्रमाणतस्सिद्धौ तन्मिथ्यात्वसाधनव्याघातः । असिद्धौ चाश्रयाद्यसिद्धयो बहुशस्समन्तव्याः । विरुद्धद्वयसमुच्चय-

* मिथ्यात्वमुपस्थापयतीति पा० ।

निषेधोऽतु मुहुर्वचावित्यभिप्रायेणाह। पक्षादेरिति। यदि ह्यसिद्ध्यादिदोषदुष्टमपि साधकमङ्गीक्रियेत तदा क्वेव कथा कथायास्तत्फलव्यवस्थायाश्चेत्यभिप्रायेणाह। नापीति। दुष्टमपि जल्पवितण्डयोरङ्गमिति चेन्न। तयोर्निग्रहस्थाननिवृत्तिप्रसङ्गात् न हि कथाङ्गस्वीकर्तुः कश्चिदपराधः स्यात् अतः प्रतिभाजये परव्यामोहनेन पाक्षिकावष्टम्भविजयावहतया तयोस्तदनुष्ठानं न त्वङ्गतयाऽवश्यप्रयोक्तव्यत्वप्रसङ्गाच्च न च दुष्टानां कथाङ्गत्वं कोऽश्चिदनुशिष्टमतिक्रान्तमर्य्यादानामभिमतिहन्मदिष्णूनामिवोपेक्षणीया माध्यमिकादयोऽप्येतादृग्घेतुभिस्त्वदनिष्टं तत्तत्साध्यं साधयन्तस्त्वया न निगृह्येरन्। विमतमसाधकं दृश्यत्वात् सम्मतवदिति त्वदुक्तोपालम्भे च किं वक्ष्यसि केन चान्यदपि किञ्चित्स्वयं प्रकाशत्वादिकं साधयिष्यसि स्वव्याघातदुष्टतया माध्यमिकादिप्रयोगोऽनास्थेय इति चेत् स्वोक्तमपि तथाऽवधारय स्वपरनिर्वाहकत्वसमाधिरस्मत्प्रयोगे त्विष्ट इति चेत् अन्येषामपि तथा किन्न स्यात् अविशेषात्।

नन्वाभिमानिकसिद्धिभिः प्रमाणैस्सर्वे सिद्धान्ताः स्थाप्यन्त अत ईदृशमपि कथायामङ्गत्वं भवतीति मर्य्यादान्तरं मया कल्प्यत इत्यत्र सेयं कल्पना प्रमाणतर्कसिद्धेत्यभिमता उत स्ववाङ्मात्रसिद्धेति विकल्पे पूर्वस्य निर्मूलतयाऽनुदयमाह। मर्य्यादामिति। स्वाभीष्टमर्यादायाः प्रमाणादिसिद्धत्वं हि लोकमर्य्यादानुरोधेन वक्तव्यम् अन्यथा तत्साधकासिद्धेः। अतः स्वमर्य्यादासिद्ध्यर्थं लोकमर्यादाऽनतिक्रमणीयेति भावः। उत्तरत्र विपरीतप्रसक्तिमाह। निर्मर्य्यादेति। स्वोक्तिमात्रसिद्धमर्यादया जगन्मिथ्यात्वाभिधाने त्वदुक्तिमात्रसिद्धमर्यादया सत्यत्वसाधकप्रमाणाभावेऽपि जगत्सत्यमिति प्रत्युक्तिमात्रेण सिद्धौ बाधितविषयं त्वदनुमानं स्यादिति भावः॥ ४५॥

मिथ्याशब्दविवक्षितञ्च विकल्पासहत्वेन दूषयति। साध्य इति।

Digitized by Google

मू० साध्ये सत्येतरत्वे कथित इह भवेत् स्वस्य हि स्वान्यभावो नान्यत्सत्यन्तु दुष्टं तद-वधिकभिदासाधने चेष्टसिद्धिः । सत्यत्वञ्चे-न्निषेध्यं प्रसजति दहनेऽप्युष्णताया निषे-धस्साध्यं त्वबाध्यबाध्यं यदि किमपि परं तेन न व्याप्तिसिद्धिः ॥ ४६ ॥

टी० अयं भावः किं यतः कुतश्चिदन्यत्वं सिषाधयिषितम् । उत सर्वस्मात् आद्ये सत्यानां पृथिव्यादीनां परस्परान्यत्वेन सिद्ध-साधनता, द्वितीये सर्वेषां प्रत्येकं सत्यशब्दवाच्यतया स्वस्मादप्य-न्यत्वं सर्वेषां प्रतिज्ञातं स्यात् तथा च व्याघातः, तत्त्वातत्त्वयोरेक-स्मिन्नसंभवात् अन्यथा कथमनेकान्तवादनिस्तार इति ।

ननु विगीतानां व्यावहारिकसत्यत्वनिबन्धनं मिथस्सत्ये-तरत्वं न साधयामः किन्त्वस्ति किञ्चिदशेषकल्पनारहितं परमार्थ-सत्यं ततोऽन्यत्वं त्विहातिष्ठामहे तत्राह । नान्यदिति । अशेष-विशेषोज्झितं किञ्चित्परमार्थसत्यं न प्रत्यक्षादिषु कुतश्चित्प्रमाणात् सिद्धं न च तथा स्वयं प्रकाशते तत्रापि हृदयविसंवादादिति भावः । ननु त्वयाऽपि परमार्थे सद्ब्रह्माङ्गीकृतम् अतस्तदन्यत्वसाधनमनु-पालम्भनीयमित्येतदपि दूषयति । तदवधिकेति । न हि वयं जगतो वेनगन्धिवत् ब्रह्मानन्यत्वमङ्गीकुर्म इति भावः । अथ मिथ्याशब्दस्य सत्यत्वशून्यत्वमर्थ इति शङ्कते । सत्यत्वमिति । अत्र कालातीतत्वं निदर्शने प्रसक्तया निर्धारयति । प्रसजतीति । अयं भावः, इह हि प्रातीतिकं व्यावहारिकं पारमार्थिकं वा सत्यत्वन्निषिध्येत तत्राद्यः परानिष्टोपालम्भ इत्यन्यौ शिष्येते तयोश्च व्यावहारिकसत्यत्वनि-

Digitized by Google

षेधे यथैव यस्य प्रसिद्धिं मन्यसे तथैव तन्निषेधसीति न कथं कालातीतेन चापसिद्धान्तेन च निगृह्येथाः, व्यावहारिकन्तु मिथ्येति त्वद्दृष्टिः मिथ्याभूतसत्यत्वनिषेधेऽपि परेष्टमेव त्वया प्रतिष्ठापितं स्यादिति सत्यत्वान्तरनिषेधमनुवक्ति । साध्यमिति । तुः—परेष्टविशेषनिषेधद्योतकः परमन्यत् परमार्थसत्यत्वं हि लोकदृष्टादन्यत् ब्रह्मनिष्ठं तद्वैधुर्य्यञ्चाप बाधयोग्यादन्यदेव अतः कथं बाधादिप्रसङ्ग इति भावः । तद् दूषयति । तेनेति । परमार्थसत्यत्वं हि व्यावहारिकादेव प्रमाणात् सिद्ध्येत् पारमार्थिकाद्वा, नाद्यः प्रपञ्चस्यापि तत एव तत्सिद्धौ बाधस्य दुर्वार*त्वात् क्वचित्तस्य तत्साधकत्वं क्वचिन्नेति नियामकाभावात् । द्वितीये त्वपसिद्धान्तः व्यावहारिकप्रमाणागोचरसत्यत्वनिरूपिताभावेन सह व्यावहारिकप्रमाणेन कथं व्याप्तिर्गृह्येत तथापि पारमार्थिकप्रमाणाद् ग्रहणे सिद्धान्तादिविरोधदोषस्तदवस्थः शुक्तिरूप्यशब्देन च किं रूप्यत्वाश्रयतया रूप्यतादात्म्येन वा प्रतीतं भास्वरं द्रव्यं निर्दिश्यते एतन्निष्ठतया प्रतीतं रूप्यत्वं वा इदन्त्वेन भातरूप्यं वा रूप्यत्वसंसर्गो वा रूप्यतादात्म्यं वा विकल्पभेदारूढमतत्त्वावृत्तिरूपमलीकं वा रजतसरूपबुद्ध्याकारविशेषो वा शुक्त्यवच्छिन्नाविद्याकृतचैतन्यविवर्त्तो वा शुक्तिरजतव्यवहारगोचरमात्रं वा किञ्चित् । आद्येषु चतुर्ष्वन्यथाख्यातिस्वीकारप्रसङ्गः । तत्र च निरुपाधिकमिथ्यात्वं न दृष्टं सोपाधिकमिथ्यात्वसाधने सर्वस्यापि प्रपञ्चस्य परस्परारोपयोग्यस्य देशकालान्तराद्युपधानेन मिथ्यात्वसाधनात् सिद्धसाधनता । न पञ्चमषष्ठौ तयोरपि स्वस्थाने सम्यक्त्वात् शुक्तिनिष्ठयोरस्मदनभ्युपगतयोस्त्वयोदाहर्त्तुमशक्यत्वात् । अत एव न सप्तमः व्यावहारिकसत्यानामपि तथात्वाभ्युपगमप्रसङ्गाच्च ।

* दुर्वचत्वादिति पा॰

Digitized by Google

नाप्यष्टमः, न हि सत्याया बुद्धेराकारो मिथ्या स्यात् अन्यतया अनन्यतया वा प्रमितस्य तदयोगात् अप्रमितस्य चानुदाहर्तव्यत्वात् अन्यथाऽतिप्रसङ्गात् भ्रान्तिज्ञाने बुद्धिस्तदाकारावसत्याविति तदाकारनिदर्शनोपपत्तिरिति चेन्न बाधाभावात् परानभ्युपगतेश्च । नवमोऽप्यत्यन्ताप्रसिद्धेरपास्तः । अपाकरिष्यते चानिर्वचनीयोत्पत्त्यादिः । नापि दशमः सत्येषु शुक्त्यादिषु अन्यतमस्यैव कयाचिद्विवक्षया शुक्तिरजतव्यवहारविषयत्वात् । अन्यथा वर्णक्रमनिर्देशवन्निरर्थकत्वापातात् तथा चाश्रयहीनमुदाहरणमिति न कथञ्चिदपि व्याप्तिसिद्धिरिति ॥ ४६ ॥

पुनस्साध्यविकल्पे कोट्यन्तरमनुवक्ति । स्वात्यन्त इति ।

मू० स्वात्यन्ताभावदेशे विदितमिति यदि स्याप्यमिष्टं क्वचित्तत्तत्रैवेति त्वशक्यं क्वचिदपि न तथा ह्यस्ति सिद्धान्तसिद्धिः । बाधश्चास्मिन्नुपाधिस्समधिगतदशादेशकालाद्युपाधौ नासौ साध्यो ऽत्र मानं निखिलमपि यतस्तद्विधानैकतानम् ॥ ४७ ॥

टी० स्याप्यं—साध्यं, तच सिद्धसाधनतामाह । इष्टमिति । क्वचिद्योग्यस्थले सर्वेऽपि हि पदार्थास्सामग्रीविशेषैः स्वात्यन्ताभाववत्स्वध्यस्यन्ते तत एव हि सर्वेच पूर्वपक्षोदयः आहार्य्यलिङ्गत्वा च तर्कधीस्सार्वेचिकी निरनिष्टे*ऽनिष्टमुल्लेढि अत एव हि विपर्य्यये पर्य्यवस्यति । ननु स्वस्यात्यन्ताभावदेश एव विदितमिति साध्यं स्यात् तथा च न सिद्धसाध्यतेत्यचाह । तत्रैवेतीति । अच

* तर्को बाधो ऽनुगुण इति हि तद्विदः ।

Digitized by Google

ह्यवधारणं स्वदेशव्यवच्छेदार्थं तदिदं स्वदेशसदसद्भावयोरशक्यमेव स्वदेशे एव स्वात्यन्ताभावदेशे इति प्रस्तुतप्रतिज्ञाभिप्राय इत्यच व्याप्तिग्रहणाभावमाह । क्वचिदपीति । यच क्वचिद्देशे काले वा जागरस्वप्नावस्थयोर्व्यावहारिकप्रातिभासिकयोर्वेत्यर्थः शुक्तिरूप्योदाहरणं त्वसिद्धिप्रदर्शनेन प्रत्युक्तम्, एतेन स्वात्यन्ताभावप्रदेशवर्त्तित्वं साध्यमित्यपि निरस्तं विरुद्धसाध्यत्वपरिहारेऽपि व्याघातादेरपरिहार्य्यत्वात् ।

न हि वस्तुविकल्प्येत न विरुद्धसमुच्चयः ।
न चोभयपरित्यागो विहतिं जहतः क्वचित् ॥

न हि तदेव तचैव तदानीमेव विद्यते न विद्यते वेति विरुद्धानियतरूपता, ईदृशस्यानियमस्य जैनैर*प्यनङ्गीकारात् न च तदङ्गीकृतविरुद्धसमुच्चयः स्वपरपक्षसमुच्चये सर्वकथोच्छेदापत्तेः । अत एव नोभयमिथ्यात्वेनोभयत्यागः विरुद्धान्यतरविधिनिषेधयोरितरनिषेध†विधिनान्तरीयकत्वात् स्वात्यन्ताभावसामानाधिकरण्यसाधनायोगाच्च । अस्तु वा कश्चिन्मिथ्याशब्दार्थः तच दृश्यत्वस्याप्रयोजकत्वमाह । बाधश्चेति । मिथ्याशब्दवाच्यत्वे हि प्रतिपन्नोपाधौ बाधितत्वं प्रयोजकम् । अत एव न तदेव तदित्यनुपाधित्वम् । ननु बाध एवाच साध्यः स्यात्तच च नोपाधिरशक्योवक्तुं तचाह । नासाविति । अयं भावः किमच यस्य कस्यचित् पुरुषस्य यच कुचचिद्देशे काले वा बाधोऽस्तीत्येतावन्मात्रं साध्यम् । उतानेन प्रमाणेनास्य बाधो दृश्यत इति । न प्रथमः एतावन्मात्रसाधनस्य

* स्यादस्ति स्यान्नास्तीति कक्षयद्भिस्सप्तभङ्गीनयैरित्यर्थः ।

† विरोधविधिनिषेधयोः शेषविधिनिषेधाभ्यनुज्ञाफलकत्वामिति हि न्यायस्वरूपम् ।

Digitized by Google

ब्रह्मण्यपि सुवचत्वात्, यतोऽयं हि साहसिकस्य भासमानत्वमात्रेण सर्वमिथ्यात्वं साधयितुम् । किञ्च ब्रह्मव्यतिरिक्तकृत्स्नपक्षीकारेण बाधं साधयतस्तद्बहिर्भूतपुरुषदेशकालानामभावात् कस्यचित् पुरुषस्येत्यादिनिर्देशो निर्विषयः तदन्तर्गतपुरुषदेशकालविवक्षया प्रयोगे तु विद्यमानेऽप्यविद्यमानभ्रमवतः कस्यचित् क्वचित् कदाचित्तत्र तन्नास्तीति धीसंभवात् सिद्धसाध्यता । मन्यते च माध्यमिकः सांप्रतेन मानेन सर्वमिथ्यात्वं तथा तस्य विश्वबाधकज्ञानं जातमिति च वयमपि विद्मः अप्रमाणमूलत्वादपारमार्थिकस्तदुक्तो बाध इति चेत् त्वदुक्तोऽप्येवमेव । व्यावहारिकप्रमाणतो मदुक्तसिद्धिरिति चेत्तदुक्तसिद्धिरपि तथैव संवृत्तादिसमाख्यावैषम्यञ्चाकिञ्चित्करम् । नापि द्वितीयः प्रत्यक्षेण तावदस्तीत्येव प्रपञ्चः प्रतीयते यदा च कुत्रचिन्नास्तीति मनुषे तदाऽपि तत्रैव तदभावस्य सत्यत्वम् अन्यत्र च तत्सत्यत्वमध्यवस्यामः । आह च न्यायभाष्यकारः सत्सदिति गृह्यमाणं तथाभूतमविपरीतञ्च तत्त्वमिति असच्चासदिति गृह्यमाणं तथा भूतं विपरीतञ्च तत्त्वमिति अनुमानन्त्वद्याप्यलब्धजीवितम् आगमिकस्तु निषेधो विध्यनुरोधेन नेतव्यः अन्यथाऽतिप्रसङ्गात् वाचारम्भणादिशब्दाश्च द्रव्यान्तरनिरासपरा दर्शिताः । नन्वनन्तपदेनासंकोचादवस्तुपरिच्छेदराहित्यमपि गृह्यते सति वस्त्वन्तरे तत्परिच्छेदाभावो दुर्वच इति चेन्न यथा देशकालसद्भावो न कस्यचिद्देशकालपरिच्छेदः किन्तु परिमितदेशकालवर्तित्वं तथा न वस्त्वन्तरसद्भावो वस्तुपरिच्छेदः अपि तर्हि परिमितवस्त्वन्तरप्रकारित्वं यथा गोः शुक्लो गच्छतीत्यादौ न तथाऽत्र सर्वं खल्विदं ब्रह्म पुरुष एवेदं सर्वमिति विश्वरूपतया व्यपदेशात् ततश्चायं सर्वाविरुद्धसंग्रहः ।

Digitized by Google

अविधेयमनाधेयमशेषमधिकं समम् ।
नेति वस्तुपरिच्छेदाभावः स्याद्विश्वदेहिनः ॥
यस्तु वस्त्वन्तराभावमपरिच्छित्तिमिच्छति ।
कथितोऽसौ कथाऽनर्हः क्षीबोन्मत्तेडमूकवत् ॥
किञ्च संख्यापरिच्छेदराहित्यं किं न दृश्यते ।
मानबाधाद्यदिसमं निर्बाधेऽर्थे स्थितिः स्थिता ॥

पराभिमतैरुपमानार्थापत्त्यादिभिरपि न जगद्बाधः तेषामन्तर्भावबहिर्भावयोरुक्तानतिरिक्तशक्तित्वादिति तदेतत्सर्वमभिप्रयन्नाह । मानमिति । निखिलं स्वपराभ्युपेतं सर्वं तद्विधानेकतानं ब्रह्मण इव तद्विभूतिप्रपञ्चस्याप्यस्तीति बोधने नियमेन प्रवृत्तत्वान्न तद्बाधकमित्यर्थः ॥ ४७ ॥

पुनरप्यसंभवतोऽपि रागद्वाद्यभिमानात् संभवत इव साध्यविकल्पभेदाननूद्य दूषयति । तुच्छत्वमिति ॥

मू० तुच्छत्वं ते न हीष्टं सदसदितरताऽप्याह
तत्त्वादिदुःस्था सिद्धा चासौ परेषां भवदन-
भिमतोऽनात्मना वेद्यतादिः । विश्वं हीदं
मृषा नस्तदितरवपुषा त्वन्मतारोपितैश्च
स्यादेवं दूरतस्ते ध्रुवमपसरतोऽप्युक्तदोषा-
नुषङ्गः ॥ ४८ ॥

टी० तुच्छत्वं खपुष्पादिवदसत्त्वं ते माध्यमिकसमाख्यामनिच्छत इति भावः । न हीष्टम्—एतत्साधनेऽपसिद्धान्त इति भावः । अस्तु मिथ्यात्वं सदसत्कोटिबहिर्भूतत्वमित्यत्राह । सदसदितरतेति । आदिशब्देनार्थान्तरत्वादिसंग्रहः अयं भावः सदसद्विलक्षणत्वं

तथैकाभ्यासविषयेणानादिशेषेणादिशेषो बाध्यते, सत्यपि संभवे बाधनं भवतीति न्यायात्, किं चासंभवोऽप्यत्र शक्यते वक्तुं, कथं, शेषशब्दोऽयं निवृत्तिमदवस्थानमाह, न चोभयोरवस्थाने निवृत्त्या विशिष्टमवस्थानं संभवति । 'चुश्च्योतिषतीति' । श्च्युतिर् क्षरणे । 'पिस्पन्दिषत इति' । स्पदि किञ्चिच्चलने, अनुदात्तेत् । 'सस्नाविति' । ष्णा शौचे । 'खर्पूर्वा इति' । सूत्रे शर्ग्रहणमपनीय खर्ग्रहणं कर्त्तव्यमित्यर्थः । 'उचिच्छिषतीति' । उछी विवासे । 'अन्तरङ्गत्वादिति' । उपदेशानन्तरमेव प्राप्तत्वादन्तरङ्गत्वात्तुकि कृते द्विर्वचनमिति । तच्च पूर्वत्रासिद्धमिति चुत्वस्यासिद्धत्वात्तुक एव भवति, तत्र कृते यद्यत्र हलादिशेषः स्यादभ्यासे तकारः श्रूयेत, एतच्च पूर्वत्रासिद्धीयमद्विर्वचन इत्येतदनाश्रित्योक्तं, तदाश्रयणे तु चुत्वे कृते तस्य सिद्धत्वात् च्छिस्शब्दस्य द्विर्वचने चकारशेषेणैव रूपं सिध्यति, न चैवमस्ति, निमित्ताभावे नैमित्तिकस्याप्यभाव इति येन चुत्वं निवर्त्तते ॥

"कुहोश्चुः" ॥ 'चखानेति' । खकारस्य छकारः, तस्याभ्यासे चर्त्वेति चकारः । 'जघासेति' । घकारस्य झकारः, तस्य जश्त्वेञ्जकारः । 'जिहीर्षतीति' । इको झलिति सनः कित्त्वं, हकारस्यापि झकारः, तस्य जश्त्वम् ॥

"न कवतेर्यङि" ॥ 'कवतेरित्यादि' । कूङ् शब्द इति तुदादिः, कु शब्द इत्यदादिः, कुङ् खुङ् इति भ्वादिः शब्दार्थ एव, तत्रासति विकरणनिर्देशे कोरित्युच्यमाने त्रयाणामपि ग्रहणं स्यादथ तौदादिको दीर्घान्तः, एवमपि द्वयोर्ग्रहणं स्यात्, न च निरनुबन्धकत्वाददादिकस्यैव ग्रहणं, लुग्विकरणत्वात्, तस्माद्भौवादिकस्यैव यथा स्यादिति विकरणनिर्देशः ॥

"दाधर्त्तिदर्धर्त्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च" ॥ 'धारयतेरिति' । धृङ् अवस्थाने ण्यन्तः । 'धृङो वेति' । स एव प्रकृत्यन्तरम् । 'अलो यङ्लुकि चेति' । अलर्षीत्येत-

Digitized by Google

द्धारयतेर्धृङो वेत्युभाभ्यां संबध्यते, यङ्लुकि चेत्येतत्तु धृङो वेत्यनेनैव, तदयमर्थः । दाधर्तीति धारयतेः श्लौ णिलुगभ्यासदीर्घत्वं च निपात्यते, धृङो वा श्लावभ्यासस्य दीर्घत्वमत्र परस्मैपदमपि निपात्यं, तस्यैव वा यङ्लुकि अभ्यासदीर्घत्वं निपात्यतइति, दर्धर्तीत्यत्र तु यङ्लुक्, पक्षे दाधर्तीति, निपातनेन प्राप्तस्य दीर्घत्वस्याभावो निपात्यते, रुग्रिकौ च लुकीत्येव रुक् सिद्धः, श्लुपक्षे तु रुगपि निपात्यः, दर्धर्षीत्यत्र यङ्लुक्, पक्षे न किंचिन्निपात्यम् । 'बोभूत्विति' । यङ्लुगन्ताल्लोट् । 'बोभवतीति' । लट्, यङो वेति पक्षे ईट् । 'प्रत्ययलक्षणेनेति' । यद्यप्यनुदात्तङित इति ङित्त्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं, तथापि लोलूयतइत्यादौ यङन्तादात्मनेपदं तत्प्रत्ययस्य ङित्त्वादिति प्रत्ययलक्षणं भवत्येव, एवं चार्वादिषु चर्कुरीतं परस्मैपदमिति परस्मैपदग्रहणमनुवादः । 'कर्त्तर्येव चेदमात्मनेपदं नियम्यतइति' । भावकर्मणोर्यङ्लुन्तादात्मनेपदं भवत्येव । 'करिक्रदिति' । अत्र चुत्वाभाव एव निपात्यः, रिगागमस्तु रुग्रिकौ चेत्येव सिद्धः । 'तथा चास्येति' । अस्य मन्त्रपदस्य ब्राह्मणे विवरणम् । 'भरिभ्रदिति' । अत्रापि जश्त्वाभाव एव निपात्यः । 'जसिरूपमिति' । नाभ्यस्ताच्छतुरिति नुमः प्रतिषेधः ॥

"उरत्" ॥ ववृतइत्यादौ हलादिशेषे कृते ऋकारान्ततायामुपजातायामद्भावः, रपरत्वे पुनर्हलादिः शेषः, नर्नर्तीत्यादौ रुगादिषु कृतेषु ऋकारान्तत्वाभावादत्वं न स्यादित्याशङ्क्याह । 'नर्नर्त्तीत्यादाविति' । यथा चाभ्यासविकारेषु बाधका न बाधन्ते तथा दीर्घाकित इत्यत्रैव वक्ष्यते ॥

"द्युतिस्वाप्योः संप्रसारणम्" ॥ 'विदिद्युतइति' । द्युत दीप्तौ अनुदात्तेत् । 'व्यदिद्युतदिति' । णयन्ताल्लुङ्, चङि द्विर्वचनम् । 'विदिद्योतिषते विदिद्युतिषतइति' । रलो व्युपधादिति सनःकित्त्वविकल्पः । 'स्वापिर्ण्यन्तो गृह्यतइति' । स्वपेर्यो णिज्विहितस्तदन्तस्य ग्रहणं, तेन स्वापं करोतीति णिचि कृते यः स्वापिस्तस्य ग्रहणं न भवति, एतच्च स्वापिरित्युक्ते सहसा प्रथमं तस्यैव प्रतीतेर्लभ्यते, अण्यन्तस्यैव योभ्यास-

त्तस्यानेनैव संप्रसारणं सिद्धं, तथाहि । लिटि सार्वत्कित वचिस्वपिय-जादीनां कितीति कृतसंप्रसारणमेव द्विरुच्यते, अकित्यपि लिट्यभ्यासस्यो-भयेषामित्यस्ति संप्रसारणं, सन्यपि रुदविदमुषग्रहिस्वपीति किदेव, यङ्यपि स्वपिस्यमिव्येञां यङीति कृतसंप्रसारणमेव द्विरुच्यते, अथापि यङ्लुक्यभ्यासस्य संप्रसारणं न केन चित्प्राप्तं तथापि स्वापेरिति निर्दे-शादेव ण्यन्तस्य ग्रहणम् । 'तस्येत्यादि' । अभ्यासेनात्र स्वनिमित्तं प्रत्ययः संनिधापितस्तेन स्वापिरङ्गं विशेष्यते, अभ्यासनिमित्ते प्रत्यये यदङ्गं स्वापिस्तस्येति, सिस्वापकीयिषतीत्यत्र चाभ्यासनिमित्तं यः प्रत्ययः सन् न तस्मिन्स्वापिरङ्गं, यस्मिंश्च स्वापिरङ्गं ण्वुलि न तदभ्यासस्य निमित्तं, व्युतेस्तु ण्यादिव्यर्तादिति, अत्राभ्यासस्य निमित्तं यश्चङ् स यद्यपि णिचा व्यवहितस्तथापि संप्रसारणमिष्यते ।

दुर्न्दुर्निर्दिष्टयोरेतद्वैषम्यं लभ्यते कथम् ।
तस्माद्दुरूह्यमेवैतदिति मन्यामहे वयम् ॥

व्योतकीयतेः सनि अभ्यासस्य प्रसारणं भवति न वेति चिन्त्यम् ।

"व्यथो लिटि" ॥ 'विव्यथइति' । व्यथ भय[1]चलनयोः, अनु-दात्तेत्, अत्र यकारे हलादिशेषेण निवृत्ते वकारस्य प्रसारणप्रसङ्ग इत्या-शङ्क्याह । 'यकारस्येति' । इह लिट्यभ्यासस्योभयेषामित्यस्यानन्तरं व्यथ इति वक्तव्यं, ततो व्युतिस्वाप्योरिति, तथा तु न कृतमित्येव ॥

"दीर्घ इणः किति" ॥ 'यणादेशे कृतइति' । परत्वात् । 'स्थानिवद्भावादिति' । द्विर्वचनेचीति रूपस्थानिवद्भावः । 'इयाय इययिथेति' । णलि थलि च गुणवृद्ध्योः[2] कृतयोः स्थानिवद्भावाद् द्विर्वच-नम्, अभ्यासस्यासवर्णइतीयङ् ॥

"अत आदेः" ॥ आदेरिति वचनादत्र तदन्तविधिर्न भवति, लिटीत्यनुवर्त्तते किद्ग्रहणं तु निवृत्तं, अतो गुणे पररूपत्वे प्राप्ते दीर्घत्व-

१ संचलनयोरिति पा॰ २ पुस्तके ।
२ वृद्धिगुणयोरिति पा॰ २-३पुस्तकयोः ।

Digitized by Google

नियमारभ्यते, तपरकरणं किं, दीर्घस्य माभूत्, आछि आयामे, आञ्छ, आञ्छतुः, आञ्छुः, किं च स्यात्, यद्यत्र दीर्घः स्यात् तस्मान्नुड् द्विहल इति नुट् प्रसज्येत, यद्यप्यत्रापि ह्रस्वत्वे कृते अनुवर्तते तथापि तपरकरणसामर्थ्यादेव योऽह्रस्व इति विज्ञानात्स्वाभाविकस्य मात्रिकस्य परिग्रहः ।

"तस्मान्नुड् द्विहलः" ॥ 'आनङ्गेति'। अगि रगि लघि गत्यर्थाः। 'आनञ्जेति'। अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, द्विहल्ग्रहणमनेकहलुपलक्षणं, तेनानर्छेत्यत्र गुणे रपरे कृते त्रिहलोऽपि भवति, एओङित्यत्र वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवतीत्युक्त्वा नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यमित्युक्तं, तदावसरे प्राप्ते नुड्विधौ प्रतिविधत्ते । 'ऋकारैकदेश इत्यादि'। अथ द्विहल्ग्रहणं न कर्तव्यं, तस्मान्नुडित्येवास्तु, एवमुच्यमाने आटतुराटुरित्यत्रापि प्राप्नोति, अश्नोतेश्चेत्येतन्नियमार्थं भविष्यति, अद्विहलो यदि भवति अश्नोतेरेवेति, अश्नातिनिवृत्त्यर्थं नाश्न इत्येवं वाच्यं स्यात्, तदेवमन्तरेणापि द्विहल्ग्रहणं सिद्धे यद् द्विहल्ग्रहणं करोति तस्यैतदेव प्रयोजनं द्विहल्छायानुकारिणोऽपि यथा स्यादिति ॥

"भवतेरः" ॥ उरदित्यस्यानन्तरमिदं नोक्तं, लिटीत्युपजीवनाय, यदि पुनस्तत्रैवोच्येत, नैवं शक्यं लिट्येव हि स्यात्, श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः ॥

"ससूवेति निगमे" ॥ दाधर्त्यादिष्वेवैतत्पठितव्यम् ॥

"णिजां त्रयाणां गुणः श्लौ" ॥ णिजिर् विजिर् विष्लृ व्याप्तौ, जुहोत्यादिष्वमी त्रयः । 'त्रयाणां ग्रहणमुत्तरार्थमिति'। भृञामिदितीत्त्वं त्रयाणामेव यथा स्यात्, अथेहार्थमपि कस्मान्न भवति तत्राह । 'एषां हीति'। यदि तदुत्तरार्थं त्रिग्रहणं कर्तव्यं तदेवास्तु, त्रयकरणं तु णिजामन्ते शक्यमकर्तुं, सत्यं, तदपि कृतमित्येव, गुणग्रहणमिक्परिभाषोपस्थानार्थं, तेन हलादिशेषे कृते गुणो भवति, अन्यथा तदपवादो हल एव एकारः स्यात् । अथाभ्यासविकारेष्वपवादो नोत्सर्गान्बाधत इत्याश्रीयेत तदा विस्पष्टार्थं गुणग्रहणम् ॥

"भृञामित्" ॥ 'त्रयो ऽपि जुहोत्यादौ, भृञ् माङ्ओहाङ् भृञादयः । 'मिमीत इति' । ई हल्यघोः ॥

"अर्तिपिपर्त्योश्च" ॥ 'इयर्तीति' । ऋ सृ गतौ, पॄ पालनपूरणयोः, अभ्यासस्यासवर्ण इतीयङ्, अच्छन्दोर्थमिदं, छन्दस्युत्तरसूत्रेणैव सिद्धत्वात् ॥

"सन्यतः" ॥ 'यियक्षतीति' । यजेर्व्रश्चादिना षत्वं, षढोः कः सि, तपरकरणं किं, पापच्यतेः सन्, पापचिषत इत्यत्र माभूत्, किं पुनः कारणमत्र ह्रस्वो न भवति, दीर्घविधानसामर्थ्यात् । यदि तु सनि यो ऽभ्यास इत्येवं विज्ञायेत ततो लाघवे विशेषाभावात्तपरकरणम् ॥

"ओः पुयण्ज्यपरे" ॥ पुयण्जकाराणां समाहारद्वन्द्वे सप्तम्येकवचनम् । पुयण्जि द्वन्द्वाच्चुदषहान्तात्समाहार इति समासान्तस्यानित्यत्वाच्च भवति, अः परो यस्मात्पुयण्जस्तदपरमवर्णपरमित्यर्थः । 'पिपविषत इति' । पूङ् पवने, स्मिपूङ्रञ्ज्वशां सनीतीट्, गुणावादेशौ, तयोर्द्विर्वचने ऽचीति स्थानिवद्भावात्पू इति द्विरुच्यते । 'पिपावयिषतीति' । तत एव ण्यन्तात्सन् । 'बिभावयिषतीति' । भवतेर्ण्यन्तात्सन् । 'यियविषतीति' । यु मिश्रणे, सनीवन्तर्धेतीट् । 'यियावयिषतीति' । तस्मादेव ण्यन्तात्सन् । 'रिरावयिषति लिलावयिषतीति' । रौतिलुनातिभ्यां ण्यन्ताभ्यामेव सन् । 'जिजावयिषतीति' । जु इति सौत्रो धातुः जुचङ्क्रम्येत्यादौ निर्दिष्टः, कथं पुनः ण्यन्तेषु सन्युवर्णान्ताभ्यासस्य, यावता णौ वृद्ध्यावादेशयोः कृतयोराकारान्तस्य द्विर्वचनेन भवितव्यं, नहि णौ कृतस्य तेन स्थानिवद्भावो विहितः, णेरद्विर्वचननिमित्तत्वादित्यत आह । 'एतदेवेति' । नहि णौ कृतस्य स्थानिवद्भावमन्तरेण पुयण्ज्योवर्णपराः संभवन्ति । पिपचिषति पियविषते इति संभवतीति चेत् किमेतावता वर्णग्रहणं प्रत्याहारग्रहणं जग्रहणं चार्थवद्भवति, तस्मादेतदेव वचनमुक्तस्यार्थस्य सूचकमिति । यच्चात्र वक्तव्यं तद् द्विर्वचने ऽचीत्यत्रोक्तं तत एवावधार्यम् । 'पापविषत[1] इति' । सनि यो ऽभ्यास इत्येतदनाश्रित्येदं प्रत्युदाहरणं, तदा-

१ पापविषतीति मु० मू० पा० ।

अये तु प्रत्युदाहरणान्तरं मृग्यं यदि संभवति । 'अवतुतावयिषतीति' । तु इति सौत्रो धातुः तुहस्तुशम्यम इत्यत्र निर्दिष्टः । 'जु[1]हावयिषतीति'। जुहोतेर्ण्यन्तात्सन् ॥

"स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा" ॥ स्रु स्रवणे, अन्ये गत्यर्थाः, उदाहरणेषु ण्यन्तेभ्यः सन् । कथं पुनर्यणि परत उच्यमानमित्त्वं सकारादिना वर्णेन व्यवधाने भवति तत्राह । 'वचनसामर्थ्यादिति' । पूर्वसूत्रइत्यादिना अप्राप्तविभाषेयमिति दर्शयति ॥

"गुणो यङ्लुकोः" ॥ लुक्शब्देनात्र यङ्लुगेव गृह्यते संनिधानात्, किन्त्वाभ्यासस्यायं गुणो विधीयते न च लुगन्तरेऽभ्यासः संभवति । 'चोक्रुशीतीति' । क्रुशेर्यङ्लुगन्तात्तिप्, यङो वेतीट्, नाभ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधः ॥

"दीर्घोऽकितः" ॥ 'अपवादत्वादिति' । नाप्राप्ते दीर्घे नुक आरम्भादपवादत्वम् । 'अनजन्तत्वादेवेति' । दीर्घश्रुत्याचश्चेत्युपस्थानादभ्यासविशेषणादजन्तस्याभ्यासस्य दीर्घो विधीयतइति भावः । 'अभ्यासविकारेष्वित्यादि' । अपवादग्रहणं बाधकमात्रोपलक्षणमुत्सर्गग्रहणमपि बाध्यमात्रोपलक्षणं, तत्र ह्रस्वत्वस्यावकाशः ययाविन्यत्र, दीर्घत्वस्यावकाशः पापच्यतइत्यादि, डोढौक्यतइत्यादावुभयप्रसङ्गे परत्वाद्दीर्घत्वस्य प्रसङ्गो नापवादत्वात्तथा सन्वद्भावस्यावकाशोऽचिक्षणदिति, दीर्घत्वस्यावकाशोऽदीदिपदिति, अचीकरदित्यादावुभयप्रसङ्गे परत्वाद्दीर्घत्वप्रसङ्गः, मीमांसतइत्यत्राप्यनैमित्तिकत्वेनान्तरङ्गत्वाद्दीर्घत्वप्रसङ्गः, इत्वं तु सनि परतोऽङ्गाधिकारेऽभ्यासस्याकारान्तस्य विधानाद्बहिरङ्गम्, अजीगणदित्यत्र त्वेकस्मिन्येन[2]नाप्राप्तिन्यायेन हलादिशेषस्येत्वमपवादत्वाद्बाधकं प्राप्नोति इह तु अपचच्छतुरपचच्छुः, चच्छदतुः चच्छदुः, चिच्छादयिषति, चिच्छर्दयिषति, चेच्छिद्यते इति, परत्वात् ह्रस्वत्वात्वेत्वगुणेषु कृतेषु

१ अवनुनावयिषतीति मु॰ मू॰ पाठस्स पदमञ्जर्यसंमतः ।
२ एकस्मिन्विषयइति हैं॰ पु॰ पाठः ।

Digitized by Google

पश्चात्तुक् क्रियते, तेनैतच्च नोदनीयं तुकि कृते एते विधयो न प्राप्नुवन्तीति, ओहाक् त्यागे इत्यस्य धातोर्निषेधो न भवति धातुग्रहणं किंच त्वभ्यासः, ककारस्तु हश्च व्रीहिकालयोरित्यत्र हाङ्हाकोः सामान्येन ग्रहणार्थः ॥

"नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम्" ॥ वञ्चुकसिपतिपदयो गत्यर्थाः । स्कन्दिः शोषणार्थः, इतरे अवस्रंसनार्थाः, वनीवच्यत इत्यादावनिदितामित्युपधालोपः, वनीवञ्चीतीत्यादौ न भवति यङो लुमता लुप्तत्वादीकारोच्चारणसामर्थ्याच्चीकि कृते गुणह्रस्वौ न भवतः ॥

"नुगतोऽनुनासिकान्तस्य" ॥ 'नुगित्येतदित्यादि' । केन संबन्धेनोपलक्षणमत आह । 'स्थानिना हीति' । उपलक्षणत्वे किं सिद्धमत आह । 'तेनेति' । 'अझल्परत्वेपीति' । तन्तन्यत इत्यादौ झल्परत्वे तु नश्चापदान्तस्य झलीत्यनुस्वारः सिद्ध एव, अनुस्वारस्य ययि परसवर्ण इति नित्यं परसवर्णः प्राप्नोति, इष्यते च पक्षे अनुस्वारस्य श्रवणमत आह । 'दान्तवच्चेति' । तत्कथं लभ्यते, इहान्तग्रहणं न कर्त्तव्यं तदन्तविधिना सिद्धं, तत्क्रियते पदान्तस्यानुस्वारस्य यो धर्मः सोस्य यथा स्यादिति, एवं चानुनासिकान्तस्येति पृथक् पदे, अनुनासिकेति लुप्तषष्ठीकम् । 'तेतिम्यत इति' । तिम आर्द्रीभावे । 'तपरकरणं किमिति' । सर्वत्र ह्रस्वस्यैव भावाचास्य किं चिह्नावर्त्यमिति प्रश्नः । 'भूतपूर्वस्यापीति' । अन्यथा तपरकरणमनर्थकं स्यादिति भावः । 'बाभम्यत इति' । भाम क्रोधे ॥

"जपजभदहदशभञ्जपशां च" ॥ जप जल्प व्यक्तायां वाचि, जभ जृभी गात्रविनामे, दह भस्मीकरणे, दंश दशने, भञ्जो आमर्द्दने, पश इति सौत्रो धातुः । जञ्जप्यत इत्यादिचतुर्षु लुपसदेत्यादिना यङ्, इतरत्र सामान्यलक्षणेन ॥

"चरफलोश्च" ॥ चरतिर्भक्षणार्थः, ञिफला विशरणे, फल निष्पत्तौ, द्वयोरपि ग्रहणमिष्यते । 'चञ्चूर्यत इति' । लुपसदेत्यादिना यङ्, उत्तरसूत्रेणाकारस्योत्वे हलि चेति दीर्घत्वं, योगविभाग उत्तरार्थः ॥

"उत्परस्यातः" ॥ 'अभ्यासस्य माभूदिति' । अन्यथा प्रकरणात्तस्यैव प्रसङ्गः । 'अन्त्यस्य माभूदिति' । आदेः परस्येत्यस्य त्वप्रसङ्गः, पञ्च-

Digitized by Google

मीनिर्द्देशाभावात् । 'तपरकरणं किमिति' । यद्यपि भाव्यमानोऽप्युकारः सवर्णान्गृह्णाति, तथाप्यान्तर्यतो मात्रिकस्य मात्रिक एव सिद्ध इति प्रश्नः । 'लघूपधगुणनिवृत्त्यर्थमिति' । अनेन लक्षणेन दीर्घस्य प्राप्त्यभावाल्लक्षणान्तरप्राप्तोऽपि विकारस्तपरकरणसामर्थ्याद्बाध्यतइति भावः । यथैव तर्हि गुणो निवर्त्तते तथा हलि चेति दीर्घत्वमपि निवर्त्ततात आह । '¹दीर्घत्वे हीति' ॥

"ति च" ॥ 'वचनसामर्थ्यादिति' । यङ्लुकि पूर्वेणैव सिद्धत्वात् ॥

"रीगृदुपधस्य च" ॥ 'ऋत्वत इति' । यद्धि पक्षो य ऋकारवान् तस्यैव ग्रहणं न तूपदेशे ऋत्वतस्तेन परीवृश्च्यतइत्यादौ संप्रसारणे कृतेऽपि भवति ॥

"रुग्रिकौ च लुकि" ॥ 'मर्मृज्यतइति' । लुकि विधीयमानो रुगादि न प्राप्नोतीति वचनम् ।

"ऋतश्च" ॥ 'किरतिमिति' । ऋकारान्तोपलक्षणमेतत् । चर्करीतमिति यङ्लुकः पूर्वाचार्यसंज्ञा । 'पचतीति' । लट उपलक्षणमेतेन पापचीतीत्यादीनि रूपाणि, किरतेर्यो नयेदित्यर्थः । यद्वा अत्र यङ्लुकि किरतिं पचतीति यो नयेत् पचतिना तुल्यरूपाणि यो नयेत्, पचतिवद्रुगादिकमकृत्वा नयेदित्यर्थः । 'प्राप्तिज्ञमिति' । रुगादीनां विषयविभागेन या प्राप्तिस्तां जानातीति प्राप्तिज्ञः । 'प्रारब्ध इति' । संग्रहणं संग्रहः, साधुशब्दसंग्रहस्तेन प्रारब्धइति योग्यतातिशयोद्भावनेनायं स्तूयते, तच्च प्राप्तिज्ञमित्यत्र प्राप्तिं व्याचष्टे । 'तच्चेयं प्राप्तिरिति' । 'तपरकरणसामर्थ्यादिति' । अभ्यासविशेषणे तु भूतपूर्वदीर्घनिवृत्त्यर्थं तपरकरणमिति व्याख्येयं, नहि मुख्यनिवर्त्यसंभवे गौणकल्पना न्याय्येति अङ्गविशेषणमृत इत्याश्रितमित्यर्थः ॥

"सन्वल्लघुनि चङ्परेऽनग्लोपे" ॥ लघुनि चङ्परइति व्यधिकरणे सप्तम्यौ न समानाधिकरणे, चङ्परस्य लघुनोऽसंभवात् । 'चङ्परे णौ परत इति' । कथं पुनर्णाविति लभ्यते, चङ्परस्यान्यस्यासंभवात्, ननु चावकमतेत्यत्र मकारः संभवति, अदुद्रुवदसुस्रुवदित्यत्र वकारः, एवं

१ दीर्घस्यासिद्धत्वादिति मु॰ मू॰ पा॰ ।

Digitized by Google

तर्हि चङ्परइत्यङ्गस्य विशेषणं, चङ्परे यदङ्गं तस्य योऽभ्यासस्तस्यं सन्वत्कार्यं भवति । 'लघुनि धात्वक्षरइति' । चङ्परे णौ यदङ्गं तस्य संबन्धि यल्लघ्वित्यर्थः । 'सामर्थ्याण्ण्यन्तस्य ग्रहणमिति' । णेः समीपभूतस्याङ्गस्य ग्रहणमित्यर्थः । ण्यन्तस्यावयवभूतं यदङ्गं तस्य ग्रहणमिति वा । 'अनग्लोपइति' । नास्मिन्नग्लोपो विद्यतइति अनग्लोपः, एतच्च चङ्परइत्यनेन समानाधिकरणं, तेनायमर्थः, चङ्परे णावग्लोपेऽसतीति, अततक्षदित्यत्र संयोगपरत्वाद्गुरुसंज्ञया लघुसंज्ञाया बाधः, अजजागरदित्यत्र आकारः परः । 'अत्र केचिदित्यादि' । ननु च गकारो जाशब्देन व्यवहितोऽत आह । 'सर्वत्रैवेति' । अचीकरदित्यादावपि ककारादिना व्यवधानाल्लघोरानन्तर्यं नास्ति, ततश्च वचनप्रामाण्याद्व्यवधानएव सन्वद्भावेन भवितव्यमिति तेषामभिप्राय इत्यर्थः । दूषयति । 'अवसदिति' । यदि तर्हि वर्णसंघातेन व्यवधानं नाश्रीयते व्यञ्जनसंघातेनापि व्यवधाने न सिध्यतीति मन्यमानः पृच्छति । 'कथमिति' । 'एवंजातीयकानामिति' । संयोगव्यवहितानामित्यर्थः । 'अचकमतेति' । कमेरुपसंख्यानमिति णिङ्ङ्वकारादेशः । 'अवकथदिति' । कथ वाक्यप्रबन्धे चुरादावदन्तः, अतो लोपः, अचाल्लोपस्य स्थानिवद्भावे सति व्यवधानाच भविष्यति, अतः प्रत्युदाहरणान्तरोपन्यासः । 'अददृषदिति' । तदाचष्टइति णिच इष्ठवद्भावेन टिलोपः, अत्राङ्गलोपो नाच एव केवलस्येति नास्ति स्थानिवद्भावः, एतदर्थं चानग्लोपइत्येतत्क्रियमाणमवकथदित्यत्र सन्वद्भावं निवर्त्तयतीति तस्योपन्यासः, यदि चङ्परे णौ यदङ्गं तस्य यल्लघु तत्र परतोऽभ्यासस्य सन्वद्भावो विधीयते, वादितवन्तं प्रयोजितवानवीवददित्यत्रापि तर्हि न प्राप्नोति, किं कारणं, यश्चङ्परो णिर्न तत्र लघुः, पूर्वेण णिचा व्यवहितत्वात्, लोपे कृते नास्ति व्यवधानम्, अचादेशः पूर्वविधौ स्थानिवद् भवतीति स्थानिवद्भावाद्व्यवधानमेव, यद्यपि दीर्घविधिं प्रति स्थानिवद्भावो निषिद्धः, सन्वद्भावे तु प्राप्नोति, यस्मिंश्च णौ लघुर्नासौ चङ्परः, द्वितीयेन णिचा व्यवहितत्वात्, यद्यपि दीर्घविधिं प्रति स्थानिवद्भावः प्रतिषिध्यते, सन्वद्भावे तु प्राप्नोति, भवतु वा स्थानि-

Digitized by Google

वस्वनिषेधः, अग्लोपित्वाच प्राप्नोति। वृद्धौ कृतायां णेर्लोपः, तत्राग्लोप्यङ्गं भवति। अग्लोपि वास्तु प्रागेव वृद्धेर्णिलोपे कृते, तत्रापि परिहारमाह। 'योऽसौ णौ णेर्लोप इत्यादि'। ततोऽन्योऽग्लोपइति अन्याकारो ऽन्य उक्तः, जात्याश्रयणे हि गोबलीवर्दन्यायेन णिजातेर्निमित्तत्वेन परिगृहीताया अन्यस्याको लोपः प्रतिषेधविषयः परिगृह्यते न तु तस्या णिजातेः, ततश्चास्य लोपस्याग्लोपत्वेनानाश्रयणात्तेनाग्लोप्यङ्गं न भवतीति भवत्येवात्र सन्वद्भावः। 'मीमादीनामत्र ग्रहणादिति'। तत्र इत्यभ्यासलोपश्चेत्येव सिद्धेऽत्रग्रहणं विषयावधारणार्थम्, अत्र मुख्ये सन्येव भवति न सन्वद्भावविषयइति। 'किं चेत्यादि'। अनेनेदमाह न केवलं मुख्यसन्परिग्रहमात्रमत्र कारणं किं तर्हि इसभावादपि विषयत्वेन निर्दिश्यते, इह च धातोः सन्वद्भावादिस्भावादि न भवति, ततश्चाभ्यासलोपोऽपि न भवतीति। यद्वा सकारादौ सन्यभ्यासलोपो विहितो न सन्मात्रे, ततश्च सामान्यातिदेशे विशेषानतिदेशाल्लोपाभावः॥

"दीर्घो लघोः"॥ 'अबिभजदिति'। भ्राजभासेत्यादिना पक्षे उपधाह्रस्वनिषेधः॥

"अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्"॥ 'तपरकरणसामर्थ्यादिति'। स्थानिनो ह्रस्वत्वाद्भाव्यमानत्वेन सवर्णग्रहणाच्च नानेन दीर्घस्य प्रसङ्गः, अतो लक्षणान्तरेण प्राप्तं दीर्घत्वं तपरकरणेन व्यावर्त्यते॥

"ई च गणः"॥ गण संख्याने चुरादावदन्तः, तस्यातो लोपेनाग्लोप इति प्रतिषेधाद्वचनं, कृतयोर्हलादिशेषदीर्घत्वयोरीत्वमत्वं च विधीयते। लोपः पिबतेरित्येतदत्रैव पठितव्यं, पिबतेरालोपश्चेति, चकारादी चाभ्यासस्य। सत्यं, विभाषेत्यस्यानुवृत्तिः शङ्क्येत॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां सप्तमस्याध्यायस्य तुरीयश्चरणः॥ समाप्तश्चायमध्यायः॥

शुभं भवतु।

Digitized by Google

श्रीगणपतये नमः ॥

अथ अष्टमोध्यायः ।

काशिकाव्याख्या पदमञ्जरी ।

"सर्वस्य द्वे" ॥ नित्यवीप्सयोरित्येवमादीनां विधेयकार्यिणोर-निर्देशेन साकाङ्क्षत्वात्स्वरितत्वाच्चाधिकारोऽयं तदाह । [1]"सर्वस्येति द्वे इति चेति'। [2]सर्वस्येत्युक्ते यत्प्रतीयते द्वे इति चेत्युक्ते यत्प्रतीयते, एतद-र्थस्वरूपमित्यर्थः । यद्यपि स्वं रूपमितिवचनादुभयोरपि स्वरूपग्रहणं युक्तं तथापि नाम्रेडितस्यान्त्यस्य तु वा, नित्यमाम्रेडिते डाचीति द्विरुक्ते ऽच्छब्दस्य सत्तामङ्गीकृत्य कार्यविधानात्तदभावः, नहि द्वयोरन्यतरस्य वा स्वरूपग्रहणे द्विरुक्ते ऽच्छब्दस्य संभवः, तथा तस्य परमाम्रेडितमिति पूर्वपराभावादनुपपन्नं स्यात्तस्मादर्थग्रहणं, सर्वशब्दश्चायं द्रव्यप्रकाराव-यवकार्त्स्न्यवृत्तिः, द्रव्यकार्त्स्न्ये यथा सर्वस्वं ददातीति, यच्च यावच्च स्वं तत्सर्वं ददातीति गम्यते, प्रकारकार्त्स्न्ये यथा सर्वाचीनो भिक्षुरिति, सर्वप्रकारमन्नं भक्षयतीति गम्यते । अवयवकार्त्स्न्ये यथा, सर्वः पटो दग्ध इति, सर्वावयवः पटो दग्ध इति गम्यते, इह तु पर्यादीनां विशिष्टार्थानां [3]शब्दानामुपादानाद् द्रव्यप्रकारकार्त्स्न्ययोरसंभवः, यत्रापि किं चिच्चोपादीयते नित्यवीप्सयोरिति तत्रापि विशेषानुपादानादेव सर्वस्य शब्दस्य सिद्धं, तस्मादवयवकार्त्स्न्यवृत्तिर्गृह्यते, परः सर्वस्य द्वे भवतः, न कश्चिदवयवो द्विर्वचनेन वर्ज्यतइत्यर्थः । अत्र चा दशभ्यः संख्याः संख्येये वर्ततइति द्वे इत्यस्य संख्येयापेक्षायां शब्दानुशासनप्रस्ता-वाच्छब्दरूपे संख्येये षष्ठी स्थानेयोगेति वचनात्सर्वस्येति स्थानषष्ठी,

१ सर्वस्येत्यधिक्रियते, इति चेति इं॰ पु॰ पा॰ ।
२ सर्वस्येत्यारभ्य यत्प्रतीयतइत्यन्तो ग्रन्थः २–पु॰ नास्ति ।
३ शब्दानामिति नास्ति इं॰ पु॰ ।

Digitized by Google

सर्वस्य पर्यादेः स्थाने द्वे शब्दरूपे भवत इत्यर्थः, यथास्तेर्भूरिति, तदा स्थाने द्विर्वचनमित्ययं पक्षो भवति, शब्दसंबन्धिनि तूच्चारणे संख्येये स्थान्यादेशभावो न संभवति, निवृत्तिधर्मा हि स्थानी शब्दश्चोच्चरितः कस्योच्चारणं स्यादतोऽध्याहृतोच्चारणशब्दापेक्षया कर्तृकर्मणोः कृतीति सर्वस्येति कर्मणि षष्ठी, सर्वस्य पर्यादेर्द्वे उच्चारणे भवतः, सर्वः पर्यादिर्द्विरुच्चारणीय इत्यर्थः, तदा द्विः प्रयोगो द्विर्वचनमित्येष पक्षो भवति, तत्र प्रथमं पक्षं दर्शयति । 'सर्वस्य स्थाने द्वे भवत इति' । 'के द्वे इति' । विशेषानुपादानात्के पुनर्द्वे प्राप्नुत इति प्रश्नः, इतरोऽन्तरतमपरिभाषामाश्रित्याह । 'शब्दतश्चेति' । बिभीतकादिवाचिनामक्षादिशब्दानां शब्दत एवान्तर्यं तरुपादपादीनामर्थत एव द्वयोस्तु पर्वतशब्दयोरुभयथान्तर्यं तत्र ते एव यथा स्यातामित्युभयग्रहणं, ते एवोभयथान्तरतमे दर्शयति । 'एकस्येति' । ननु चास्मिन्पक्षे राजाराजा वाग्वाक् लिट्लिट् गोधुग्गोधुक् शब्दप्राट्शब्दप्राट् उपानदुपानत् गौर्गौरित्यत्र नलोपकुत्वढत्वघत्वषत्वधत्वदीर्घत्वानामसिद्धत्वादकृतेष्वेतेषु द्विर्वचने कृते पदस्य स्थाने समुदायस्यादिष्टत्वात्तस्यैव स्थानिवद्भावेन पदत्वं नावयवयोरिति पूर्वत्र भागे नलोपादीनि न स्युः, उत्तरत्र तु समुदायपदत्वेनापि सिध्यति, ननु च नलोपादीन्यन्तरङ्गाणि पदत्वमात्रापेक्षत्वात्, द्विर्वचनं तु बहिरङ्गं वीप्साद्यर्थापेक्षत्वात्ततश्च तेषु कृतेषु द्विर्वचनं भविष्यति, एवमपि कृतानामपि तेषां द्विर्वचने कर्तव्येऽसिद्धत्वादकारादियुक्तस्य द्विर्वचनमिति पुनः पूर्वपदे निमित्ताभावान्न स्युरेव, यथा घोजठदित्यत्र कृतानामपि ढत्वादीनामसिद्धत्वात् हत इत्येतस्य द्विर्वचनेऽभ्यासे हकारस्यैव श्रवणं भवति । नैष दोषः । वक्ष्यत्येतत्पूर्वत्रासिद्धीयमद्विर्वचन इति, ततश्च परत्वादन्तरङ्गत्वाद्वा नलोपादिषु कृतेषु तद्युक्तस्यैव द्विर्वचनं भविष्यति, यानि तर्हि पदकार्याणि नाकृते द्विर्वचने प्राप्नुवन्ति तानि न स्युः, तद्यथा किंकिमिति, वा पदान्तस्येति परसवर्णविकल्पः, अपचवपचविति ङमुट्, अग्नाग्नाविति क्लोपः, छायाच्छायेति तुग्विकल्पः, वृत्तान्वृत्तानिति पदान्तस्येति णत्वप्रतिषेधः,

Digitized by Google

भजेजे इति, एङः पदान्तादतीति पूर्वरूपत्वं, किं चात्र स्वरितो वानु-
दात्ते पदादावित्येष विधिर्न स्यात्, उत्तरभागस्यापदत्वात्, तथाऽपद-
स्वात्तदाश्रयाणि कार्याणि प्राप्नुवन्ति, तद्यथा अङ्गेनाङ्गेनेत्यतो गुणे पर-
रूपत्वं स्यात्, पयःपय इति सोपदादाविति सत्वप्रसङ्ग इत्येषा दिक्,
अतो द्वयोरपि पृथक्पदत्वमेषितव्यमित्युच्यते, यदि प्रत्यस्तमितावयवभेद
एक एवादेशः स्याद् द्वे इति द्विवचनमनुपपन्नं स्यात्ततो द्वे इति वचनादे-
कस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते तत्र
स्थानिवद्भावेन समुदायस्यापि पदत्वं स्वत एव चावयवयोरपीति समुदाय-
स्यावयवयोश्च पदकार्याणि भविष्यन्ति, एवमपि विसंविसं मुसलंमुसल-
मित्यादेशप्रत्यययोरिति षत्वप्रसङ्गः । नैष दोषः । नैवं विज्ञायते आदे-
शस्य सकार इति कथं तर्ह्यादेशो यः सकार इति. अत्र च समुदायस्य
समुदाय आदेशो न सकारमात्रस्य सकारमात्रमिति न भविष्यति, इह
तर्हि नृभिर्नृभिरिति समुदायस्य पदत्वाद्रेफनकारयोः समानपदस्थत्वा-
द्रषाभ्यामिति णत्वप्रसङ्गः । एषोऽप्यदोषः । तत्र समानग्रहणं न कर्तव्यं
पद इत्येवास्तु, तत्रापदस्थयोर्निमित्तनिमित्तिनोरसंभवादेकत्वविवक्षार्थमेव
पदग्रहणमिति समानपदस्थत्वं सिध्यति, ततश्च समानग्रहणाऽत्र
समानपदस्थत्वमेव तत्र णत्वम् । इह तु स्थानिवद्भावादेकपदत्वं वस्तु-
तस्तु पदद्वयात्मक आदेश इति पृथक्पदस्थत्वमिति णत्वाभावः ।
तदेवं निर्दोषः स्थाने द्विर्वचनपक्षः । इदानीं द्वितीयं पक्षं दर्शयति । 'यदा
त्विति' । 'द्विरावर्ततइति' । उच्चार्यमाणस्य शब्दस्य यो व्यापार
उच्चारणं नाम सेहावृत्तिर्विवक्षिता, द्विरुच्चरतीत्यर्थः । 'द्वे आवृत्ती
भवत इति' । द्वे उच्चारणक्रिये भवत इत्यर्थः । न पुनर्मुख्ये एवावृत्ती द्वे
भवतः, तथा सति त्रिर्वचनप्रसङ्गात्, नन्वस्मिन्पक्षे मां पचसिपचसि
देवदत्त३ इत्यत्रावृत्तिभेदनिबन्धनया द्वित्वसंख्यया स्वाश्रयस्यैक-
त्वस्य निवर्तनादेकान्तरताया अभावादाम एकान्तरमिति निघातप्रति-
षेधो न स्यात्तथा किरिणेत्यादावावृत्तिभेदनिबन्धनेनापि द्व्यच्त्वेन स्या-

१ अधीताधीतेति ब पु० पा० ।

Digitized by Google

अयस्यैकारस्वस्य निवर्तनात्सावैकाच इति विभक्त्याद्युदात्तत्वं न भवति तद्वत्, स्थाने द्विर्वचने तु समुदायस्यापि स्थानिवद्भावेन पदत्वा-त्सिध्यति, तथा पौनःपुन्यमिति पुनःपुनर्भवितरि वर्तमानात्पुनःपुनः-शब्दाद्भावे ष्यञिष्यते, पुनःपुनर्भवः पौनःपुनिक इति च कालाट्ठञ्, तत्र द्विः प्रयोगे पदस्य विज्ञायमाने समुदायस्य वीप्सालक्षणेनार्थेन सत्यप्यर्थवत्त्वे ऽर्थवत्समुदायानां समासग्रहणं नियमार्थमित्यप्रातिपदिकत्वात्तद्धितो न स्यात्, सुबन्तादुत्पत्तिपक्षेपि समुदायस्यासुबन्तत्वाच्च स्यादेव, पक्षान्तरे तु स्थानिवद्भावादुभयमप्यस्तीति सिध्यति, यद्यप्यस्य स्थानी सुबन्त-स्तथापि सुब्लुकि कृते न ङिसंबुद्ध्योरिति निषेधाज्ज्ञापकात्प्रत्ययलक्षणेना-प्रत्यय इति निषेधाभावात्प्रातिपदिकत्वमव्यावृत्तमिति, अत्रैवं भाष्ये परिहार उक्तः, पचसिपचसीत्यर्थरूपयोः समानत्वात्स एव पचशब्दः स एव च तिङ्, ततश्च यः पूर्वस्माद्विहितः स परस्मादपि यश्च पर-स्मात्स पूर्वस्मादपि तदादिग्रहणं च पदसंज्ञायामनुवर्त्तते तत्र समुदाय-स्यावयवयोश्च तुल्येपि तिङन्तत्वे समुदायस्यैव पदसंज्ञा भविष्यति द्विर्वचनवत्, तद्यथा पपाचेत्यत्र समुदायस्यावयवानां च तुल्येप्येकाच्त्वे समुदायस्यैव द्विर्वचनं भवति नावयवानां, तत्कस्य हेतोः, शास्त्रहानेः, अवयवद्विर्वचने ह्यवयवान्तरे विषये समुदायविषये च शास्त्रं हीनं स्यात्, तद्वत्पदसंज्ञापि समुदायस्यैव भविष्यतीत्येकान्तरता युज्यते, पौनःपुन्य-मित्यादौ तद्धितोप्युक्तेन न्यायेन समुदायस्य सुबन्तत्वात्प्रातिपदिकत्वाच्च सिद्ध्यतीति। अत्रैवं चोदयन्ति। प्रागेव द्विर्वचनात् पचसीत्यस्यामवस्थायां प्रवृत्ता पदसंज्ञा किमिति पुनः कृतेपि द्विर्वचने प्रवर्त्तते, प्रवर्त्तमाना वा किमिति समुदायस्यैव प्रवर्त्तते न तु प्रत्येकमवयवयोः, नह्येवंविधो द्विर्वचनन्यायस्य विषय इति, संयोगसंज्ञायामुक्तं निर्लेयादित्यादौ त्रिष्वपि द्वयोः संयोगसंज्ञाभ्युपगमात्, किञ्च यत्र समुदायस्यैव पदत्व-मपचचपचचित्यादौ तत्रावयवेषु पदकार्याभावप्रसङ्ग इति। अपर आह। उच्चारणक्रियैवात्र परं भिद्यते तद्भेदात्त्वौपचारिकः पदभेदः, तत्त्वतस्त्वेक-मेव पदमित्येकान्तरता युज्यते, पौनःपुन्यमित्यादौ च वीप्सालक्षणेनार्थेन

Digitized by Google

समुदायस्याप्यर्थवत्त्वात्प्रातिपदिकत्वं, न च समासग्रहणान्निवृत्तिः, अतुल्यजातीयत्वात्, येषां हि भिन्नार्थानां सतां परस्परसंबन्धमात्रमधिकं तत्समुदायस्यैव तुल्यजातीयस्य तेन निवृत्तिः, न चात्रैतदुभयमस्ति, नहि द्वयोः पुनःशब्दयोरर्थो भिद्यते, नापि तत्समुदाये तत्सबन्धोऽधिकः किं तर्हि वीप्सारूपोऽन्य एवेति, यद्येवं क्रियिणेत्यादौ सावेकाचस्तृतीयादिरिति विभक्तिस्वरः स्यात्, तत्रापि ह्युच्चारणक्रियैव भिद्यते तत्त्वतस्त्वेक एवेकारः, किं च नित्यानां विभूनां वर्णानां तदात्मकानां च पदानां स्वरूपेण व्यवधानमव्यवधानं च न संभवतीत्युपलब्धिगतमेव तदाश्रयितव्यं, तत्र च यथा पदभेदेऽप्युपलब्धिभेदस्तथा तदभेदेपीति कथमेकान्तरता, यदि च पौनःपुन्यमित्यादावुक्तेन न्यायेन समुदायस्यापि प्रातिपदिकत्वं हन्तैवं ग्रामोग्रामो रमणीय इत्यादावप्येवमेव प्रातिपदिकत्वे सति सुब्लुक् स्यात्तस्मात्स्थाने द्विर्वचनमेवात्र रोचयामहे। अत एव स्थाने द्विर्वचनं पूर्वं वृत्तिकारेण दर्शितं पश्चात्संभवमात्रेण द्विः प्रयोगोपि दर्शितः। इह सर्वस्येति वचनमलोन्त्यनिवृत्त्यर्थं वा स्यात् षष्ठ्यर्थप्रसिद्ध्यर्थं च, तत्र स्थाने द्विर्वचनपक्षे तावच्छब्दतोऽर्थतश्चान्तरतमाभ्यां द्वाभ्यामादेशाभ्यां भाव्यं, ये चैवं प्रकारास्ते नियोगतोऽनेकाल्स्वभावा इत्यन्तरेणापि सर्वग्रहणमनेकाल्शित्सर्वस्येति सर्वस्य भविष्यति, षष्ठ्यर्थोपि परेर्वर्जने इत्यादौ यत्र षष्ठ्युच्चार्यते तत्र तावत् सिद्धः, यत्रापि षष्ठी नास्ति नित्यवीप्सयोरिति तत्रापि सामर्थ्याल्लभ्यते नित्यवीप्सयोर्यः शब्दस्तस्य द्वे भवत इति, द्विः प्रयोगपक्षे त्वलोन्त्यविधिप्रसङ्ग एव नास्ति स्थानषष्ठ्यभावात्, षष्ठ्यर्थोपि लभ्यत एवोच्चारणस्य शब्दधर्मत्वादतो नार्थः सर्वग्रहणेनेत्यभिप्रायेणाह। 'सर्वस्येति कि[1]मिति'। 'विस्पष्टार्थमिति'। य एवं प्रतिपत्तुमसमर्थस्तं प्रति सुखप्रतिपत्तये सर्वस्येत्युच्यत इत्यर्थः। 'अथेत्यादि'। एवं मन्यते, समासतद्धितवाक्यनिवृत्त्यर्थमवश्यं पदस्येति वक्तव्यं, समासनिवृत्त्यर्थं तावत् सप्तपर्णोऽष्टापदम्। अत्र सप्तसंख्यानि पर्णानि वीप्स्यन्ते न तु तद्वान्वृत्त इति वीप्सायामेकत्वस्यानन्तर्भावा-

१ किमिति नास्ति मु॰ मू॰ पु॰।

Digitized by Google

स्यागेव विभक्तेर्द्विर्वचनप्रसङ्गः पदाधिकारात्तु न भवति, तद्धितः द्विपदिकां ददाति, अत्र द्वित्वसंख्यायुक्तः पादार्थो वीप्स्यत इति स्त्रीत्वैकत्वलक्षणयोर्लिङ्गसंख्ययोरनन्तर्भावात्याक् तद्धितोत्पत्तेः समासे कृते प्राप्तं द्विर्वचनं पदत्वाभावाच्च भवति, वाक्यं ग्रामेग्रामे पानीयम्, अत्र वाक्यस्यापदत्वाद् द्विर्वचनं न भवति ग्रामे पानीयमिति। किं चोत्तरत्र पदस्येति न वक्तव्यं भवति पदस्य पदादित्यस्यैवानुवृत्तेरिति। 'नैवं शक्यमिति'। अस्याप्ययमभिप्रायः। पदस्येत्युच्यमानेऽपि सप्तपर्णाभ्यामित्यादौ भ्यादिषु पूर्वस्य पदत्वाद् द्विर्वचनप्रसङ्गः, तस्मादेवमत्र परिहारो वाच्यः, [1]यद्वीप्सायुक्तं नादः प्रयुज्यते, किं पुनस्तत्पर्वणिपर्वणि [2]सप्तपर्णान्यस्येति, यच्च प्रयुज्यते न तद्वीप्सायुक्तं सप्तपर्णान्यस्येति पर्णशब्द इति, तद्धिते तु तद्धितेनैवोक्तत्वाद् द्विर्वचनाभावः, स हि वीप्सायामित्युच्यते, वाक्यस्यापि द्विर्वचनं न भवति, पदद्विर्वचनेनोक्तत्वाद्वीप्सायाः, तस्मात्समासादिनिवृत्त्यर्थं तावत्पदाधिकारो न कर्तव्य इति, प्रत्युत क्रियमाणे पदाधिकारेऽव्याप्तिलक्षणो दोष इत्याह। 'इह हि न स्यादिति'। 'प्रपचतीति'। धातूपसर्गसमुदायः क्रियाविशेषवाची, अडादिव्यवस्थार्थं तु धातूपसर्गयोः पृथक् कल्पनं, ततश्च क्रियाधर्मो नित्यता समुदायस्येति तस्यैव द्विर्वचनम्। 'इहेत्यादि'। द्रुहेस्तृचि विहिते वा द्रुहेति घत्वढत्वे प्राप्नुतः, द्विर्वचनं च तत्र घत्वढत्वयोरसिद्धत्वात्पूर्वं द्विर्वचनं प्राप्नोति, अस्तु को दोषस्तत्राह। 'तत्रेति'। पश्चाद्विकल्पे प्रवर्तमाने यदा परत्र ढत्वं तदा पूर्वत्रापि ढत्वमेवेति नियमाभावात् घत्वमपि कदापि स्यात्, एवं घत्वेऽपि द्रष्टव्यं, परत्र घत्वं पूर्वत्र ढत्वमिति, एतच्चैकस्या आकृतेश्चरितः प्रयोगो न[3] द्वितीयस्यास्तृतीयस्याश्च भवतीति न्यायमनाश्रित्योक्तं द्रष्टव्यम्। अयं च न्यायः कृञ्चानुप्रयुज्यते लिटीत्यत्रैव व्याख्यातः। 'पूर्वत्रासिद्धीयमिति'। पूर्वत्रासिद्धमित्यस्मिन्नधिकारे भवं नलोपादिकार्यं पूर्वत्रासिद्धीयं तद् द्विर्वचनादन्यत्रासिद्धं भवति। अथ वा पूर्वस्यां सपादसप्ताध्याय्यामसिद्धं नलो-

१ यद्वर्जेति इं॰ पु॰ पा॰। २ सप्तपर्णान्यस्येति इं॰ पु॰ नास्ति।
३ द्वितीयायास्तृतीयायाश्चेति २ पु॰ पाठः।

Digitized by Google

धर्मस्य च प्रोक्षणादेः अर्थः व्रीह्यादौ अपूर्ववचनसामर्थ्यरूपं कार्ये तत्कृतत्वात् तत्प्रयोज्यत्वात् । नीवारादौ सर्वत्र तत्प्रयोजकसत्त्वात् उक्तस्थलेषु स्थानिनो धर्मा अनुष्ठेया इति भावः ॥ ४० ॥

परिधौ यूपधर्मानुष्ठानम् । अधि० १३ ।

तदुत्पत्तेस्तु निवृत्तिः तत्कृतत्वात् स्यात् ॥ ४१ ॥

पूर्वाधिकरणे परिधौ यूपधर्माः कार्या इत्युक्तं सिद्धान्ते । तदाक्षेपरूपं पूर्वपक्षमाह । तदिति । परिधेः तदुत्पत्तेः आहवनीयपरिधानार्थमुत्पत्तेः निवृत्तिः यूपधर्माणां निवृत्तिः स्यात् । यूपधर्माणां तत्कृतत्वात् केवलपशुनियोजनार्थं यदुत्पन्नं तत्प्रयोज्यत्वात् । निवृत्तिः यूपधर्माणां निवृतिः स्यात् ॥ ४१ ॥

आवेश्येरन्वा ऽर्थवत्त्वात् संस्कारस्य तदर्थत्वात् ॥ ४२ ॥

सिद्धान्तमाह । आवेश्येरन्निति । यूपधर्माणां तदर्थत्वात् पशुबन्धनरूपकार्ये नियुक्तं यत्तदर्थत्वात् । अर्थवत्त्वात् पशुनियोजनरूपकार्यवत्त्वात् । यूपधर्माः परिधौ आवेश्येरन् अनुष्ठीयेरन् ॥ ४२ ॥

आख्या चैवं तदावेशाद् विकृतौ स्यादपूर्वत्वात् ॥ ४३ ॥

ननु यूपधर्मे याञ्जनस्य वेलायां प्रकृतौ यूपायाज्यमानायानुब्रूहीति प्रैषो ऽस्ति । तत्र यूपपदस्थाने परिधिपदस्य ऊहः कार्य इत्यत्राह । आख्येति । आहवनीयशब्दवद् यूपशब्दस्यापूर्वत्वात्संस्कारनिमित्तत्वाद् विहितपरिव्याणाञ्जनादिसंस्काराणामेव यूपपदशक्यतावच्छेदकत्वात् । परिधौ संस्काररूपशक्यतावच्छेदकसत्त्वाद् एवं प्रकृतिवत् आख्या यूपशब्दः परिधौ प्रवर्तेत । तथा च परिधये इति नोह इत्यर्थः ॥ ४३ ॥

व्रतादौ प्रणीताधर्मानुष्ठानम् । अधि० १४ ।

परार्थे न त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ ४४ ॥

यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान्विभजेद् ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं ये ऽणिष्ठास्तान् विष्णवे शिपिविष्टाय

Digitized by Google

घृते चरुमिति । अत्र दधिघृतयोः देवतोद्देशेन प्रधानार्थत्वमिति षष्ठे व्यवस्थितम् । अत्र दधिघृतयोः प्रणीताधर्मा उत्पवनादयः कार्या न वेति संशये पूर्वपक्षमाह । परेति । परार्थे प्रधानयागार्थे दध्नि घृते च न प्रणीताधर्माः यतः । अर्थसामान्यं न, प्रणीताकार्यकारित्वं न, अतः संस्कारस्य उत्पवनादेः तदर्थत्वाद् हविःश्रपणार्थत्वात् ॥ ४४ ॥

क्रियेरन्वा ऽर्थनिर्वृत्तेः ॥ ४५ ॥

सिद्धान्तमाह । क्रियेरन्निति । तद्धर्माः तयोः क्रियेरन् प्रधानार्थत्वे ऽपि अर्थस्य हविःश्रपणस्यापि निर्वृत्तेः ताभ्यामुत्पत्तेः । एकेन कार्यद्वयसाधने बाधकाभावादिति भावः ॥ ४५ ॥

बृहद्रथंतरयोर्धर्मव्यवस्था । अधि० १५ ।

एकार्थत्वादविभागः स्यात् ॥ ४६ ॥

ज्योतिष्टोमे बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति । अनयोरेकार्थत्वाद्विकल्प इति स्थितं, तथा ऽपि रथन्तरे स्तूयमाने संमीलयेद् बृहति स्तूयमाने समुद्रं ध्यायेद् इत्यादिधर्माः उभयत्र समुच्चयेन कार्याः उत तत्रैवेति नियम्यन्तइति संशये पूर्वपक्षमाह । एकेति । एको ऽर्थः कार्यं पृष्ठस्तोत्ररूपं ययोः तौ एकार्थौ बृहद्रथन्तरे तत्त्वाद् धर्मयोरविभागेन अनुष्ठानं न ॥ ४६ ॥

निर्देशाद्वा व्यवतिष्ठेरन् ॥ ४७ ॥

सिद्धान्तमाह । निर्देशादिति । वाक्ये स्वस्वोद्देश्यतावच्छेदकानां रथन्तरत्वादीनां निर्देशाद् व्यवतिष्ठेरन् तद्धर्मास्तस्यैवेति नियम्येरन् ॥ ४७ ॥

कावषरथन्तरे बृहद्रथन्तरधर्मसमुच्चयः । अधि० १६ ।

अप्राकृते तद्विकाराद् विरोधाद् व्यवतिष्ठेरन् ॥ ४८ ॥

वैश्यस्तोमे पृष्ठस्तोत्रत्वेन कावषरथन्तरं विहितम् । तत्र बृहद्रथन्तरयोर्धर्मद्वयं समुच्चीयते उत विकल्प इति संशये विकल्प इति पूर्वपक्षे सिद्धान्तमाह । अप्राकृतइति । अप्राकृते कावषरथन्तरे तयोः बृहद्रथन्तरयोः विकाराद् उभयोः स्थानापन्नत्वाद् उभयधर्माः स्युः । ननु

Digitized by Google

नोच्चैर्गेयमिति रथन्तरधर्मः, उच्चैर्गेयमिति बृहद्धर्मः । एवं विरुद्धयोः कथं समावेशः अत्राह । विरोधाद् व्यवतिष्ठते अन्यतरधर्म इति कल्प्यते ॥ ४८ ॥

द्विसामके बृहद्रथन्तरधर्मयोर्व्यवस्था । अधि॰ १७ ।

उभयसाम्नि चैवमेकार्थापत्तेः ॥ ४९ ॥

संसवादिक्रतौ पृष्ठस्तोत्रे उभे अपि बृहद्रथन्तरे समुच्चयेन विहिते तत्र प्रत्येकमुभयधर्मप्राप्तिर्न वेति संशये पूर्वपक्षमाह । उभयसाम्नीति । उभयसाम्नि संसवादौ एवं कण्वरथन्तरवत् प्रत्येकं धर्मद्वयमुभयोरपि एकार्थे पृष्ठस्तोत्ररूपैककार्ये आपत्तेः प्राप्तत्वात् ॥ ४९ ॥

स्वार्थत्वाद्वा व्यवस्था स्यात् प्रकृतिवत् ॥ ५० ॥

सिद्धान्तमाह । स्वेति । उक्तधर्माणां स्वार्थत्वात् बृहद्रथन्तरादिरूपसामार्थत्वाद् व्यवस्था रथन्तरे तद्धर्मः बृहति बृहद्धर्म इति व्यवस्था स्यात् । यथा प्रकृतौ ज्योतिष्टोमे सामप्रयुक्ता व्यवस्था तथैवात्रापि धर्माणां पृष्ठस्तोत्रार्थत्वे प्रकृतावपि धर्मसांकर्यापत्तेरिति भावः ॥ ५० ॥

सौर्यादिषु पार्वणहोमाद्यननुष्ठानम् । अधि॰ १८ ।

पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात् तदभीज्या हि ॥ ५१ ॥

दर्शपूर्णमासयोः स्रुवेण पार्वणौ होमावित्यस्ति, स सौर्ययागादावतिदिश्यते न वेति संशये सिद्धान्तेनोपक्रमते । पार्वणेति । वैकृतकर्मसु पार्वणहोमयोरप्रवृत्तिः समुदायः दर्शत्रिकं पौर्णमासत्रिकं तद्रूपो यः अर्थः तेन संबन्धात् । तदभीज्या तं समुदायमुद्दिश्य इज्या यागः । अयं भावः । पार्वणाविन्यत्र तद्धितो देवतावाचकः पर्वशब्दः प्रत्येकं त्रिकद्वयवाचकः । पञ्चहुपुरोडाशयागवर्तित्रिकसमुदायसंस्कारात्मको होमः समुदायोपकारकः । सौर्ययागे न त्रिकं, न वा सौर्ययागोऽसौ समुदायविकारः, किंतु केवलाग्निविकारः । तत्र समुदायोपकारकधर्मप्राप्तिप्रसक्तिर्नेति ॥ ५१ ॥

कालस्येति चेत् ॥ ५२ ॥

Digitized by Google

ननु पर्वशब्दः कालवाचको ऽपि पर्वणु चोभयोरुपवास इति व्यवहारात् कालदेवताकः प्रयाजादिवद्वारादुपकारकः । तस्यातिदेशो भविष्यतीत्याशङ्कते । कालस्येति । वाचकः पार्वणशब्द इति योज्यम् ॥ ५२ ॥

नाप्रकरणत्वात् ॥ ५३ ॥

दूषयति । नेति । कालस्याप्रकरणत्वात् । यथा सैन्धवशब्दस्य नानार्थत्वे ऽपि भोजनादिप्रकरणं लवणादितात्पर्यग्राहकं तथा यागत्रिके तात्पर्यग्राहकं प्रकरणं, कालस्य न प्रकरणमिति भावः ॥ ५३ ॥

मन्त्रवर्णाच्च ॥ ५४ ॥

ऋषभं वाजिनं वयं पूर्णमासं यजामहे इति मन्त्रलिङ्गात् ॥ ५४ ॥

तदभावे ऽग्निवदिति चेत् ॥ ५५ ॥

यद्यपि एतत्त्रिकं सौर्ययागे नास्ति तथा ऽपि अन्या एतत्संज्ञिका देवता भविष्यन्ति । अथ वा असन्निहितो ऽपि आग्न्यादिसमुदायः सौर्ययागोपकारं किमिति न जनयेदिति शङ्कते । तदिति । तदभावे सौर्ययागे आग्न्यादित्रिकाभावे सति असन्निहितो ऽपि समुदायः उपकरोत्विति पूरणम् । अग्निवत् । यथा अग्निमाग्नआवहेति सन्निहितः असन्निहितो वा ऽग्निर्यागार्थमावाह्यते तथा ॥ ५५ ॥

नाधिकारिकत्वात् ॥ ५६ ॥

अयं पक्षो न युक्त इत्याह । नेति । पार्वणहोमस्य प्रकृतत्रिकसंस्काररूपत्वमेव । त्रिकमधिकृत्य पठितत्वात् । इत्थं च यस्याधिकारः तस्यैव गुणं विदधाति नेतरस्येति भावः ॥ ५६ ॥

दर्शपूर्णमासयोर्होमद्वयस्य व्यवस्था । अधि० १९ ।

उभयोरविशेषात् ॥ ५७ ॥

इमौ पार्वणहोमौ दर्शे पूर्णमासे च समुच्चितौ उत लिङ्गेन व्यवस्थिताविति संशये पूर्वपक्षमाह । उभयोरिति । उभयोर्दर्शपूर्णमासयोः होमद्वयं समुच्चितमविशेषाद् नियामकाभावात् ॥ ५७ ॥

यदभीज्या वा तद्विषयौ ॥ ५८ ॥

Digitized by Google

सिद्धान्तमाह । यद्विति । यदभीज्या यत्रामञ्चयागो यत्र तद्विषयो तदुपकारको । तथा च पौर्णमास्यां पौर्णमासविकृस्मरणात्मकसंस्काराये-त्वात्पूर्णमासाय स्वाहेति । तथेऽमावास्यायै स्वाहेति अमावास्यायामे-वेति व्यवस्थेति भावः ॥ ५८ ॥

समिदादीनां यागनामता । अधि॰ २० ।

प्रयाजे ऽपीति चेत् ॥ ५६ ॥

दर्शपूर्णमासयोः समिधो यजति तनूनपातं यजतीत्यादिवाक्यैः समिद्रादिदेवता उद्दिश्य यागः संस्काररूपो विधीयते उतायमारादुप-कारक इति संशये पूर्वपक्षमाह । प्रयाजे ऽपीति । संस्काररूपत्वं पार्वण-वदिति सूत्रे पूरणीयम् ॥ ५९ ॥

नाचोदितत्वात् ॥ ६० ॥

सिद्धान्तमाह । नेति । अचोदितत्वात् । यथा आग्न्यादियागत्रयं प्रत्येकवाक्यैर्विहितं तत्समुदायस्य समुदायस्मरणमेवं समिदादीनां देव-तानां पूर्वमविहितत्वेन तदनुवादेन संस्कारार्थं यागविध्यसंभवात् ॥ ६० ॥

इति जैमिनिसूत्रवृत्तौ नवमाध्यायस्य द्वितीयः पादः ॥ २ ॥

विकृतौ मन्त्रागतव्रीह्यादिशब्दानामूहः अधि॰ १ ।

प्रकृतौ यथोत्पत्तिवचनमर्थानामुत्तरस्यां तत्प्रकृति-त्वादर्थे चाकार्यत्वात् ॥ १ ॥

प्रकृतौ अग्नये जुष्टं निर्वपामीति मन्त्रः स सौर्ययागे ऊहितव्यो न वेति संशये तत्प्रकृतित्वादित्यन्तेन अर्धसूत्रेण पूर्वपक्षमाह । प्रकृता-विति । प्रकृतौ दर्शपूर्णमासयोः यथोत्पत्तिः यत्पदघटिततया मन्त्राणा-मुत्पत्तिः तत्पदघटितैरेव मन्त्रैः अर्थानामग्न्यादिदेवतानां वचनमभिधान-मुत्तरस्यां सौर्यादीष्ट्यां तथा तत्प्रकृतित्वात् तस्याः प्रकृतिवद्विकृतिः कार्येति चोदकशास्त्रबलादित्यर्थः । शेषसूत्रेण सिद्धान्तः, अर्थे सूर्यप्रका-शनरूपे कार्ये प्रकृतिपठिताग्निपदघटितमन्त्रस्य अकार्यत्वाद् असमर्थ-त्वात् सूर्यपदस्य ऊह आवश्यक इति चकारेण दर्शितः ॥ १ ॥

Digitized by Google

लिङ्गदर्शनाच्च ॥ २ ॥

अन्यं हेतुमाह । लिङ्गेति । न माता वर्धते न पिता न भ्राता न स्वसेति । न वर्धते नोहं प्राप्नोतीति तदर्थः । इत्थं च एतेषां पदाना-मूहो नास्तीत्युक्ते अर्थादितरेषामूह इति ॥ २ ॥

पौण्डरीकेषु हविःप्रस्तरणमन्त्रस्योहः । अधि० २ ।

जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥

अपर्यवसिते ऽधिकरणे विचारान्तरं जातीति । मोद्धं वरं निर्व-पेत् श्रीकाम इतीष्ट्यां पौण्डरीकं बर्हिर्भवतीति श्रुतम् । प्रकृतौ बर्हिस्त-रणमन्त्रः दर्भैः स्तृणीतं हरितैः सुपर्णैरिति अतिदेशेन प्राप्तः । तत्र दर्भ-स्थाने पुण्डरीकैरित्यूहः कृप्तः । तथा हरितैरिति स्थाने रक्तैरित्यप्यूह्यं न वेति संशये सुब्रह्मण्यायामिवेदे इन्द्रविशेषणहरित्रेत्यादेराग्नेयी सुब्रह्मण्ये-त्यनूहपाठ एवाम्नाप्यनूहेनैव पाठ इति बर्हिः पूर्वपक्षे सिद्धान्तमाह । जातीति । जातौ जातिवाचकदर्भशब्दे नैमित्तिकं विशेषणभूतं हरितैरिति पदं तत् यथास्थानं यथायोग्यमूह्यं तत्स्थाने रक्तैरिति प्रयोक्तव्यम् । इन्द्रे हरित्वादिगुणसत्त्वे मानाभावेन ते केवलमदृष्टार्थाः अत्र दर्भेषु हरिद्वर्णः प्रत्यक्षगम्यः तत्प्रकाशनं दृष्टं फलमतो वैषम्यमिति भावः ॥ ३ ॥

लिङ्गदर्शनाच्च ॥ ४ ॥

लिङ्गेति । क्व चिदुक्तपक्षे विशेषणवाचकपदेष्वरवचनानामूहेनैव मन्त्रपाठो दृश्यते । विश्वेषां देवानामुस्राणां छागानां वपानां मेदसो ऽनुब्रूहीति । इदं लिङ्गम् ॥ ४ ॥

अविकारमेके ऽनार्षत्वात् ॥ ५ ॥

प्रथमसूत्रे अर्धसूत्रेण अनूह इति पूर्वपक्षो यः स्थितः तं दृढीक-रोति । अविकारमिति । अविकारमनूहं प्रकृतिवदेव पठितव्यमिति एके आहुः । अनार्षत्वान्मन्त्रस्य अपौरुषेयत्वात् । ऊहे मन्त्रत्वं भज्येतेति भावः ॥ ५ ॥

लिङ्गदर्शनाच्च ॥ ६ ॥

Digitized by Google

लिङ्गेति । क्व चिदाग्नेये पशौ अग्नये छागस्य वपाया मेदसो ऽनुब्रूहीति । यद्यूहः स्याद् ऊहेनैवैतन्मन्त्रस्वरूपसिद्धौ अग्निपदघटित-मन्त्रपाठो व्यर्थ इति भावः ॥ ६ ॥

विकारो वा तदुक्तो हेतुः ॥ ७ ॥

इमं पक्षं दूषयति । विकार इति । विकार ऊहः कार्यः तत् तत्र उक्तो हेतुः प्रथमसूत्रे अकार्यत्वादिति । मन्त्रत्वं भज्येतेत्यत्र दृष्टा-पत्तिरेवेति भावः ॥ ७ ॥

लिङ्गं मन्त्रचिकीर्षार्थम् ॥ ८ ॥

ननूक्तलिङ्गस्य का गतिरत्राह । लिङ्गमिति । मन्त्रचिकीर्षया अत्र मन्त्रत्वमास्तामितीच्छया अग्नये छागस्येति मन्त्रपाठ इति भावः ॥ ८ ॥

नियमो वोभयगामित्वात् ॥ ९ ॥

ननु अग्नये छागस्येति मन्त्रपाठफलं दर्शितं तथा ऽपि यद्यूपमुप-स्पृशेद्, एष ते वायो इति ब्रूयाद्यदि द्वौ एतौ ते वायू इति ब्रूयादि-त्यत्र ऊहेनैव द्विवचनान्तसिद्धौ एतौ इति ब्रूयादिति वाक्यं व्यर्थं सद् ऊहाभावं ज्ञापयतीत्याशङ्कायामाह । नियम इति । एतद्विध्यभावे एकवचनद्विवचनान्तमन्त्रमात्रपाठे एकयूपस्य स्पर्शस्य उभयभागित्वात् विकल्पेन मन्त्रद्वयभागित्वात् अनेन विधिना नियमः क्रियते । एकयूपस्पर्शे एकवचनान्तमपरं यूपद्वयस्य स्पर्शे इति विधिः न व्यर्थ इति भावः ॥ ९ ॥

अग्नीषोमीयपशौ लौकिकयूपस्पर्शे प्रायश्चित्तम् । अधि० ३ ।

लौकिके दोषप्रसङ्गाद् अपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥ १० ॥

अयं यूपस्पर्शः वैदिको लौकिकश्च निमित्तं मन्त्रपाठे उत लौकिक इति संशये अविशेषादुभयमिति पूर्वपक्षे सिद्धान्तमाह । लौकिकइति । लौकिके स्पर्शे अयं मन्त्रः दोषसंयोगात् यदि यूपं स्पृशेत्प्रतिष्ठायाश्च्य-वेतेति दोषसंयोगात् । अपवृक्ते निषिद्धे स्पर्शे निमित्ते अयं मन्त्रः चोद्यते विधीयते प्रकृते क्रत्वर्थस्पर्शे निषेधस्याभागित्वात् । अप्राप्तत्वात् न स्यात् न मन्त्रपाठः स्यात् ॥ १० ॥

Digitized by Google

द्विपशुयागे पाशमन्त्रयोरेकवचनान्तबहुवचनान्तपठयोर्द्विवचनान्तेनोहः । अधि० ४ ।

अन्यायस्त्वविकारेण दृष्टप्रतिघातित्वाद् अविशेषाच्च तेनास्य ॥ ११ ॥

अग्नीषोमीयपशौ अदितिः पाशं प्रमुमोक्त्वेतं नमः इत्येको मन्त्रः अदितिः पाशान्प्रमुमोक्त्वेतं नम इति एकवचनान्त बहुवचनान्तं मन्त्र-द्वयं पठितम् । प्रकरणादुभयोरपि तत्रैव निवेश इति अग्निमाधिकरणे सिद्धम् । एवं सति मैत्रं श्वेतमालभेत वारुणं कृष्णमपां चौषधीनां च संधावचकाम इति । तत्र द्विपशुके कथं पठितव्यमिति विचारे प्रथमपक्ष-माह । अन्याय इति । अन्यायः प्रकृतौ एकपाशे प्रयोक्तुमयोग्यो बहु-वचनान्तो मन्त्रः द्विपशुके अविकारेण प्रयोक्तव्यः । ननु रशनाद्वये बहु-वचनप्रयोगो बाधितार्थस्यादत्राह । दृष्टप्रतिघातित्वात् । प्रकृतौ एकपशौ दृष्टः प्रतिघातः बाधितार्थः यस्य तत्त्वात् । तेनाग्नीषोमीयैकरशनया अविशेषाद्विहद्बहुसंख्यात्वेन । यथा प्रकृतौ निर्वाहस्तथा ऽत्रापि भविष्य-तीति भावः ॥ ११ ॥

विकारो वा तदर्थत्वात् ॥ १२ ॥

पक्षान्तरमाह । विकार इति । विकारः एकवचनान्तमन्त्रस्याति-देशं कृत्वा स द्विवचनान्त ऊह्यः । तदर्थत्वात् । वचनबोध्यसंख्यायाः प्रकृत्यर्थपरिच्छेदार्थत्वात् । प्रकृतौ एकवचनान्तमन्त्रः पाशपरिच्छेदकतया समवेतार्थः तस्यैव विकृतावतिदेशे एकवचनेन द्वित्वबोधासंभवात् द्विव-चनान्त ऊह्यः । बहुवचनान्तमन्त्रः निरर्थकवचनः पाठवैयर्थ्यभिया प्रकृति-मात्रे वर्ततइति भावः ॥ १२ ॥

अपि त्वन्याय्यसंबन्धात् प्रकृतिवत्परेष्वपि यथार्थं स्यात् ॥ १३ ॥

पक्षान्तरमाह । अपि त्विति । प्रकृतिवत् परेष्वपि विकृतिष्वपि अन्याय्यस्य बहुवचनान्तस्य अनूहेन संबन्धः एकवचनान्तस्य यथार्थमर्था-बाधेन प्रयोगाद्विवचनान्त ऊहितव्यः द्वयोरपि विकल्पेनातिदेश इति भावः ॥ १३ ॥

यथार्थं च न्यायस्याचोदितत्वात् ॥ १४ ॥

सिद्धान्तमाह । यथार्थमिति । मन्त्रद्वयस्यापि यथार्थमर्थाबाधेन द्विवचनान्तेन पाठः अन्याय्यस्य प्रकृतिवदूहपाठस्य अचोदितत्वात् । अशास्त्रत्वात् । यथा एकपाशे बहुवचनप्रयोगो दृष्टः प्रकृतौ तथा पाशद्वये अदृष्टः अतः तस्याप्यूह आवश्यक इति भावः ॥ १४ ॥

छन्दसि तु यथादृष्टम् ॥ १५ ॥

ननु प्रकृतौ एकरशनायां बहुवचनान्तं किमिति प्रयुक्तमत आह । छन्दसीति । यथादृष्टं यथा पठितं तथैव पठनीयं, न तत्र कुतर्कावसर इति भावः ॥ १५ ॥

अन्याय्यस्याचोदितत्वात् ॥ १६ ॥

ननु प्रकृतितो ऽर्थबाधस्य अतिदिष्टत्वादूहे क्रियमाणे तद्बाध इत्यत आह । अन्याय्यस्यार्थबाधस्य अचोदितत्वात्प्रकृतावविहितत्वाद्विहितस्यैव अतिदेश इति भावः ॥ १६ ॥

अग्नीषोमीयपशौ पाशैकत्वपाशबहुत्वाभिधायिमन्त्रयोर्विकल्पः । अधि॰ ५ ।

विप्रतिपत्तौ विकल्पः स्यात् तत्समत्वाद्गुणे त्वन्यायकल्पनैकदेशत्वात् ॥ १७ ॥

अग्नीषोमीयप्रकरणे पठितौ पूर्वोक्तमन्त्रौ प्रकृतावेव निविशेते उत बहुवचनविरोधेन बहुवचनान्तमन्त्रः बहुपशुके उत्कृष्यत इति संशये सिद्धान्तेनोपक्रमते । विप्रतिपत्ताविति । विकल्पः न उत्कर्षः समत्वादुभयोरेकबहुवचनान्तयोः मन्त्रयोः प्रकरणपाठस्य तुल्यत्वात् । प्रकृतौ पाशस्य एकत्वान्मन्त्रस्य बहुत्वाभिप्रायत्वाद् विप्रतिपत्तौ विरोधे सति एकदेशत्वादप्रधानत्वाद्गुणे ऽप्रधाने बहुवचने अन्यायस्य विवक्षाभावस्य कल्पनं युक्तम् । न तु अङ्गानुसारेण प्रधानस्य प्रातिपदिकार्थस्य उत्कर्ष इति भावः ॥ १७ ॥

प्रकरणविशेषाच्च ॥ १८ ॥

प्रकरणविशेषात् पशुप्रकरणस्य उभयोस्तुल्यत्वात् । इदं प्रथमसूत्रे समत्वादित्यत्र हेतुभूतम् ॥ १८ ॥

Digitized by Google

उत्कर्षो वा द्वियज्ञवत् ॥ १९ ॥

पूर्वपक्षमाह । उत्कर्ष इति । बहुपशुके उत्कर्षः द्वियज्ञवत् । यथा तृतीये युवं हि स्थः स्वःपती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादित्यत्र मन्त्रे स्वःपती इति यजमानगतद्वित्वस्य प्रकृतौ अन्वयासंभवादेतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति कुलायनामके द्वियजमानयागे उत्कर्ष इत्युक्तं, तथा ऽत्रापीति भावः ॥ १९ ॥

अर्थाभावात्तु नैवं स्याद्गुणमात्रमितरत् ॥ २० ॥

उक्तदृष्टान्तवैषम्यमाह । अर्थेति । अर्थस्य द्वित्वविशिष्टरूपार्थबोधकविधेः प्रकृते अभावाद् गुणमात्रं वचनबोध्यसंख्याविशेषणमात्रमितरद् युवं हि स्थः स्वःपती इति मन्त्रः नैवं स्यात् । विनियोजकविधिहीनो न, अतो वैषम्यं युवं हि स्थः स्वःपती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादिति विधिर्न स्यात् तत्रापि नोत्कर्षो भवेदिति भावः ॥ २० ॥

द्यावोस्तथेति चेत् ॥ २१ ॥

ननु मा ऽस्तु यज्ञदृष्टान्तः दर्शपूर्णमासप्रकरणपठितं यदनुमन्त्रणं द्यावापृथिव्योरहं देवयज्यया वृत्रहा भूयासमिति तस्योत्कर्षस्तृतीये व्यवस्थापितः तद्दृष्टान्तेन प्रकृते बहुवचनान्तमन्त्रस्योत्कर्ष इत्याशङ्कते । द्यावोरिति । द्यावोः द्यावापदघटितमन्त्रस्य यथा तथा ॥ २१ ॥

नोत्पत्तिशब्दत्वात् ॥ २२ ॥

अत्रापि वैषम्यं दर्शयति । नेति । प्रकृते रशनया यूपं परिव्ययतीति पाशस्य उत्पत्तेः शब्दो यस्य तस्मात् । पाशस्य प्रातिपदिकार्थस्य अङ्गत्वप्रतिपादकः शब्दो ऽस्ति द्यावापृथिव्योः दर्शपूर्णमासे तथा शब्दो ऽस्ति अतः प्रातिपदिकार्थो ऽपि तत्र बाधित इति भावः ॥ २२ ॥

दर्शपूर्णमासयोर्द्विपत्नीके प्रयोगे पत्नीं संनह्येतिमन्त्रस्यानूहः । अधि० ४ ।

अपूर्वे त्वविकारो ऽप्रदेशात्प्रतीयेत ॥ २७ ॥

दर्शपूर्णमासयोः पत्नीं सनह्याज्येनोदेहीति मन्त्रो ऽस्ति बहुपत्नीकदर्शपूर्णमासप्रयोगे पत्नीशब्दो बहुवचनान्त ऊहितव्यो न वेति

Digitized by Google

संशये एकत्वबाधादूह इति पूर्वपक्षे सिद्धान्तमाह । अपूर्वइति । अपूर्व- प्रकृतौ अविकारः अनूहः प्रतीयेत अप्रदेशात् धर्मोणामतिदेशेन प्राप्त्य- भावात् अतिदेशस्थले एव ऊहप्रसक्तेरिति भावः ॥ २७ ॥

द्विपत्नीके विकृतियागे ऽपि मन्त्रस्यानूहः । अधि॰ ७ ।

विकृतौ चापि तद्वचनात् ॥ २८ ॥

अयमेव मन्त्रः बहुपत्नीकसौर्ययागे ऊह्यो न वेति संशये विकृ- तावूहे बाधकाभावाद् ऊह्य इति पूर्वपक्षे सिद्धान्तमाह । विकृतौ चेति । विकृतावप्यनूहः तद्वचनात् पत्नीमात्रतात्पर्यकवचनात् । प्रकृतौ संख्याया अविवक्षितत्वाद् विकृतावपि तथैव संभवाच्चोह इति भावः । ननु द्विप- शुके पाशमन्त्रस्य बहुवचनान्तस्य द्विवचनान्ततया ऊहः कथमुक्त इति चेदुच्यते । द्विपत्नीके बहुपत्नीके प्रकृतौ एकवचनान्तो वैदिकः प्रयोगो दृष्टः द्विपशुके तथा बहुवचनान्तः वैदिकः प्रयोगो न दृष्ट इति वैषम्यम् ॥ २४ ॥

सवनीयपशूनां समानविधानत्वे प्रास्माअग्निमिति मन्त्रे ऽनूहः । अधि॰ ८ ।

अध्रिगुः सवनीयेषु तद्वत्समानविधानाश्चेत् ॥ २५ ॥

अध्रिगुप्रैषो ऽपि सवनीयेषु संस्थापशुषु तद्वत् पत्नीं सचह्नेतिवत् पशुधर्माः समानविधानाश्चेदित्यनेन कृत्वाचिन्ता सूचिता । तृतीये समानविधानत्वस्य दूषितत्वात् ॥ २५ ॥

नीवाराणां व्रीहिप्रतिनिधित्वे व्रीहिशब्दस्यानूहः । अधि॰ ६ ।

प्रतिनिधौ चाविकारात् ॥ २६ ॥

यत्र व्रीह्यलाभे व्रीहिसदृशा नीवारा गृह्यन्ते प्रकृतौ तादृशे प्रतिनिधौ तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति मन्त्रस्योहः नीवाराणां मेधेऽस्ति न वेति संशये सिद्धान्तमाह । प्रति- निधाविति । प्रतिनिधौ नीवारादौ अविकाराद् अनूहेन पाठः ॥ २६ ॥

अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् ॥ २७ ॥

पूर्वपक्षमाह । अनाम्नानादिति । मन्त्रे व्रीहिशब्दस्य अनाम्नानाद् अपाठात् । मन्त्रे यदि व्रीहिशब्दस्य पाठो न स्यात्तदा ऊहो न स्यादिति

Digitized by Google

फलितम् । मन्त्रे व्रीहिशब्दपाठेन उक्तकल्पस्याभावात् । इतरस्य नीवारस्य अवयवत्वं व्रीहिशब्दावाच्यत्वमत ऊहः स्यात् ॥ २७ ॥

तादर्थ्याद्वा तदाख्यं स्यात्संस्कारैरविशिष्टत्वात् ॥ २८ ॥

सिद्धान्तं द्रढयति । तादर्थ्यादिति । संस्कारैः प्रोक्षणावहननादिव्रीहिसंस्कारैः अविशिष्टत्वाद् अन्यूनानतिरिक्तत्वात् । व्रीहिसंबन्धियावत्संस्कारयुक्तत्वादिति भावः । तादर्थ्यात् तेषां व्रीहीणामर्थो अवयवाः येषां नीवाराणां तत्त्वात् । उभयोरवयवयोरैक्यादिति भावः । तदाख्यं नीवारद्रव्यमपि तदाख्यं स्याद् व्रीहिशब्दनामकं स्यात् । अतो नोहः ॥ २८ ॥

उक्तं च तत्त्वमस्य ॥ २९ ॥

ननु नीवाराणां व्रीह्यवयवत्वे किं मानमत आह । उक्तमिति । अस्य उभयोरेकावयवत्वस्य तत्त्वं प्रमाणमुक्तं षष्ठे ॥ २९ ॥

द्विपशुयागे सूर्यं चक्षुर्गमयतादिति मन्त्राणामनूहः । अधि० १० ।

संसर्गिषु चार्थस्यास्थितपरिमाणत्वात् ॥ ३० ॥

अध्रिगुप्रैषे सूर्यं चक्षुर्गमयताद् इति श्रुतम् एकवचनान्तं बहुपशुके विकृतौ बहुवचनान्ततयोह्यं न वेति संशये पाशन्यायेनोह्यमिति पूर्वपक्षे सिद्धान्तमाह । संसर्गिष्विति । संसर्गिषु शरीरसंसर्गिचक्षुःप्राणप्रभृतिषु नोहः अर्थस्य तेजोरूपार्थस्य अस्थितपरिमाणत्वाद् । अत्र परिमाणपदं संख्यावाचकं नानात्वेन अस्थितं परिमाणं येषां तत्त्वात् सर्वत्र एकसंख्यात्वात् । अत्र चक्षुःपदं न गोलकपरं किं तु तेजोविशेषपरं, तच्च बहुपशूनामप्येकमेवेत्येकवचनाविरोध इति भावः ॥ ३० ॥

लिङ्गदर्शनाच्च ॥ ३१ ॥

लिङ्गेति । न माता वर्धते न मज्जा न नाभिर्न प्राण इति । वर्धते ऊह्यते । चक्षुषो ऽपि तत्सदृशत्वात् ॥ ३१ ॥

द्विपशुयागे ऽध्रिगुप्रैषे एकधेति शब्दस्याभ्यासः । अधि० ११ ।

एकधेत्येकसंयोगादभ्यासेन अभिधानं स्यादसर्वविषयत्वात् ॥ ३२ ॥

अध्रिगुप्रैषे एव एकधा ऽस्य त्वचमात्स्यतात् इत्यस्ति । अस्य बहुपशुके ऽतिदेशे अस्येत्यत्रैषामित्यूहो निर्विवादः ।

एकधेति शब्दस्याभ्यासः कार्य उत सकृदिति संशये सिद्धान्तेनोपक्रमते । एकधेति । एकधेत्यस्य अभ्यासेन अभिधानं स्यात् । एकसंयोगात् । सकृदुच्चारणाद् अभ्यासं विना असर्वविषयत्वात् । यावत्पशुविषयत्वासंभवात् ॥ ३२ ॥

अविकारो वा बहूनामेककर्मवत् ॥ ३३ ॥

पूर्वपक्षमाह । अविकारः एकधाशब्दस्य न अभ्यासः एकधा इत्यस्य एककाले इत्यर्थं संपाद्य एककाले बहूनां त्वचां बहुभिः कर्तृभिः एकीकरणसंभवात् । बहूनामेककर्मवत् । यथा एकधा एक एव पुरुष एकक्षणे बह्वीः गाः पाययति तत्रैकधा गाः पाययतीति प्रयोगः तथा ॥ ३३ ॥

सकृत्त्वं चैकध्यं स्याद् एकत्वात्त्वचो ऽनभिप्रेतं तत्प्रकृतित्वात्परेष्वभ्यासेनैव विवृद्धावभिधानं स्यात् ॥ ३४ ॥

ऐकध्यं सकृत्त्वमेकप्रयत्नसाध्यत्वं न कालः । प्रकृतौ त्वच एकत्वाद् एककालस्य सिद्धत्वेन अनभिप्रेतं व्यर्थं स्यात् । अतः प्रकृतौ सफलत्वाय एकप्रयत्नसाध्यत्वं बहुपशुकयागस्य तत्प्रकृतित्वादेकप्रयत्नसाध्यत्वं न संभवत्यतः परेषु विकृतिषु वृद्धौ पशुवृद्धौ अभ्यासेन अभिधानं स्यात् ॥ ३८ ॥

द्विपश्वादिपशुविकृतौ मेधपतिशब्दस्य देवतानुसारेणोहः । अधि० १२ ।

मेधपतित्वं स्वामिदेवतस्य समवायात् सर्वत्र च प्रयुक्तत्वात् तस्यान्यायनिगदत्वात्सर्वत्रैवाविकारः स्यात् ॥ ३५ ॥

अध्रिगुप्रैषएव आशासाना मेधपतिभ्यां मेधमिति । क्व चिद् द्विवचनान्तम् । क्व चिच्छाखायाम् आशासाना मेधपतये मेधमित्येकवचनान्तम् । विकृतौ द्विचादिपशुगणे कथं प्रयोक्तव्यमिति विचारे प्रथपक्षमाह । मेधेति । अत्र मेधः पशुगतं सारभूतं वस्तु तत्पतित्वं प्रकृतौ-

Digitized by Google

त्रिषु। स्वामिनि यजमाने प्रथमं देवतस्य अग्नीषोमयोः प्रदानानन्तरं पश्चात्ताविति त्रिषु समवायात्। त्रिषु स्वामित्वस्य विद्यमानत्वात्। ननु पतिशब्दः स्वामित्ववाचकः कथं तत्राह। सर्वत्र सर्वेषु देशेषु प्रयुक्तत्वात्। व्यवहृतत्वात्। इत्थं च मेधपतिषु त्रिषु सत्सु यथायामेकवचनघटितेन द्विवचनघटितेन वा बोधयितुमशक्यत्वेन प्रकृतावेव अन्यायेनिगदत्वाद् बाधितार्थकमन्त्रत्वात् सर्वत्र प्रकृतौ पशुगणविकृतौ चाविकारः अनूहः स्यात् पर्वो सवद्येतिवत्॥ ३५॥

अपि वा द्विसमवायोऽर्थान्यत्वे यथासंख्यं प्रयोगः स्यात्॥ ३६॥

द्वितीयपक्षमुत्थापयति। अपि वेति। द्विसमवायः द्विवचनान्तमन्त्रयोगः अर्थान्यत्वे अन्यार्थतात्पर्ये देवताबोधतात्पर्ये। एवं सति एकवचनान्तं यजमानतात्पर्ये उभयोरपि तात्पर्याधीनः प्रकृतावेव समावेशः उभयोरप्यबाधितार्थत्वम्। अस्य पशुगणे अतिदेशे यथासंख्यं देवतान्वयतात्पर्ये देवतावृद्धौ द्विवचनान्तमन्त्रस्य बहुवचनान्तः एकवचनान्तमन्त्रस्य यजमानवृद्धौ एवं यथासंख्यं प्रयोगः पाठः स्यात्॥ ३६॥

स्वामिनो वैकशब्द्यादुत्कर्षो देवतायां स्यात्पत्न्या द्वितीयशब्दः स्यात्॥ ३७॥

तृतीयं पक्षमुत्थापयति। स्वामिन इति। वाक्यद्वये ऽपि मेधपतिशब्देन स्वामिनः यजमानस्य ग्रहणम्। ऐकशब्द्यात् एकार्थप्रतिपादकशब्दत्वात्। ननु द्विवचनस्य का गतिरत्राह। पत्न्या सह द्वितीयशब्दः द्विवचनं स्यात्। ननु देवतावचनमेव किं न स्यादत आह। देवतायां वाच्यायां द्विवचनघटितमन्त्रस्य उपपत्तावपि एकवचनान्तस्य उत्कर्षः विकृतावेकदेवताके स्यात्। मम तु केवलयजमानं गृहीत्वैकं पत्नीं गृहीत्वा ऽपरमिति द्वयोः प्रकृतौ निवेश इति तथा च स्वामिवृद्धावेव ऊह इति भावः॥ ३७॥

देवता तु तदाशीष्ट्वात्संप्राप्तत्वात्स्वामिन्यनर्थिका स्यात्॥ ३८॥

सिद्धान्तमाह देवतेति । मेधपतिशब्दवाच्या देवता तदाशिष्ट्वात् मेधस्य देवमायै भवत्त्विति देवतोद्देश्यकेच्छाविषयत्वात् मेधं मेधपतिभ्यामाशासानेति वाक्यं संगतम् । स्वामिपरत्वे यजमानस्वत्वस्य मेधे संप्राप्तत्वात् आशासानेत्यनर्थिका स्यात् । तस्माद्देवताबहुत्वएव ऊह इति भावः ॥ ३८ ॥

उत्सर्गाच्च भक्त्या तस्मिन्पतित्वं स्यात् ॥ ३९ ॥

किं च देवताया एव पतित्वं स्वरसमिद्धमित्याह । उत्सर्गादिति । यजमानेन देवतोद्देशेन उत्सर्गात्तस्मिन् यजमाने भक्त्या अमुख्यवृत्त्या पतित्वं स्यात् । यथा एकस्य ग्रामस्य पूर्वं स्वामी स्थितः तदनन्तरं अन्यः स्वामी भूत्वा गतः तत्र ग्रामवासिनः पूर्वस्वामिनं गौणं नवीनस्वामिनं मुख्यमामनन्ति तदीयस्वत्वस्य विनाशोन्मुखत्वात् तथेति भावः ॥ ३९ ॥

एकस्तु समवायात् तस्य तल्लक्षणत्वात् ॥ ४० ॥

नन्वस्मिन्पक्षे एकवचनमन्त्रस्य विकृतावुत्कर्षोपपत्तिरत आह । एक इति । एकवचनान्तमेधपतिशब्दवाच्यो यो देवतागणः समवायात् । तत्रैकत्वसंबन्धात् । तस्य गणस्य तल्लक्षणत्वात् एकत्वरूपगुणविशिष्टत्वात् तत् एकत्वं लक्षणं गुणो यस्य तत्त्वात् ॥ ४० ॥

संसर्गित्वाच्च तस्मात्तेन विकल्पः स्यात् ॥ ४१ ॥

तस्माद्देवतापरत्वे बाधकाभावात् संसर्गित्वादुभयोः प्रकृतिसंबन्धित्वात् एकार्थत्वाच्च द्वयोर्मन्त्रयोः विकल्पः स्यात् ॥ ४१ ॥

एकत्वे ऽपि न गुणापायात् ॥ ४२ ॥

एकवचनान्तेन गुणरूपार्थविवक्षां विना ऽपि मन्त्रस्य प्रकरणे निवेशं पक्षद्वयेनाह । एकत्वइति । एकत्वे विवक्षिते ऽपि एकवचनस्य अर्थवत्त्वे ऽपीत्यर्थः । न प्रकरणात् उत्कर्षः । प्रत्येकस्मिन् एकत्वसत्त्वेन तदनुवादसंभवात् । गुणस्य एकत्वस्य अपायादविवक्षया ऽपि नोत्कर्ष इति ॥ ४२ ॥

Digitized by Google

बहुदेवत्यपशावपि एकवचनान्तमेधपतिशब्दस्य विकल्पः । अधि० १३ ।

नियमो बहुदेवते विकारः स्यात् ॥ ४३ ॥

एवं देवतापरो मेधपतिशब्द इति स्थिते यत्र बहुदेवताका विकृतिः वैश्वदेवी बहुरूपामालभेतेति तत्रातिदेशेन उभयोः प्राप्तिवत् द्विवचनान्तस्यैवेति संशये पूर्वपक्षमाह । नियम इति । नियमः द्विवचनान्तस्यैव अतिदेश इति नियमः । तस्य प्रकृतौ समवेतार्थत्वात् विकार ऊहः बहुवचनान्त ऊहश्च स्यात् ॥ ४३ ॥

विकल्पो वा प्रकृतिवत् ॥ ४४ ॥

सिद्धान्तमाह । विकल्प इति । प्रकृतौ यथा विकल्पेन समावेशस्तथा ऽत्रापि द्विवचनान्तस्य बहुवचनान्ततया ऊह इत्येतावान्विशेषः ॥ ४४ ॥

एकदर्शिन्यामेकवचनान्तमेधशब्दस्योहः । अधि० १४ ।

अर्थान्तरे विकारः स्यात् देवतापृथक्त्वात् एकाभिसमवायात्स्यात् ॥ ४५ ॥

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्य इत्यादिपश्वेकादशिनी विहिता अत्रैकवचनान्तस्य ऊहो ऽस्ति न वेति संशये प्रकृतिवदेवात्रापि गणे एकत्वान्वय इति बहिः पूर्वपक्षे सिद्धान्तमाह । अर्थान्तरइति । अर्थान्तरे भिन्नदेवताके यागसमुदाये तद्धितवाच्यदेवतात्वस्य एकाभिसमवायात् । एकैकस्मिन्नेव पर्याप्तेः देवतानां पृथक्त्वात् भेदात् एकतद्धितवाच्यदेवतापर्याप्त्यधिकरणगणस्य अभावात् प्रकृतिवैषम्यादिति भावः । एकवचनान्तमन्त्रस्याप्यूहेनैव बहुवचनान्त ऊहः स्यात् ॥ ४५ ॥

इति जैमिनिसूत्रवृत्तौ नवमाध्यायस्य तृतीयः पादः ।

षड्विंशतिरस्य वङ्क्रय इत्यादौ समस्योहः । अधि० १ ।

षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वाद्गणस्य प्रविभक्तत्वादविकारे हि तासामकार्त्स्न्येनाभिसंबन्धो विकाराच्च समासः स्यादसंयोगाच्च सर्वाभिः ॥ १ ॥

and not one of Simile *with the three members suppressed*—these members being, *cruelty* (the object compared) *sharpness* or *acuteness* (the common attribute), and the term (वत् in the compound) signifying similitude.

Thus these nineteen forms of Elliptical Simile together with six of the complete make up the twenty-five kinds of Simile.

There are instances of मालोपमा (String Simile) consequent upon one object being compared to many, with the same attribute all over, or different attributes for different Similes, respectively in the following two couplets—

"अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता ।
म्लानौ सा ऽथ विषादेन पद्मिनीव हिमाम्भसा" ॥

["She withered through grief,—as royal splendour through injustice and corruption, as courage through poverty, or as lotus through frost."]

"ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी" ॥

["The woman is a joy to the eyes, as light; intoxicating like wine; and captivating all the world, as power."]

And similarly we have instances of रशनोपमा (Girdle Simile) when the object compared in the former Simile becomes the one compared to in the following. And as in मालोपमा, so here we have a common attribute all through or different ones for different Similes—*e. g.*

"अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः ।
भणितिरिव मतिर्मतिरिव चेष्टा, चेष्टेव कीर्तिरतिविमला" ॥

["Of him who has collected in the form of waves all the beggars by means of his hand full of the water (used in) uninterrupted gifts of gold—of such a king, the Intellect or heart is pure as his words, his actions like his intellect, and his fame pure as his actions."]

And

"मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता ।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम्" ॥

["Of the king, the form is sweet as his heart, his assembly powerful as his form, and his victory like his assembly, unconquerable or irrepressible by enemies"].

But these are not separately described, since of such form there are thousands, and further because they do not go beyond the forms already described.

91 (*contd.*)—[*Page* 638.] When the object compared to and that compared is the same, in the same sentence, (then we have) Comparison Absolute.

(2) Ananwaya or Comparison Absolute.

Comparison Absolute is the non-existence of the relation (of the obejct compared) with any other object to which it could be compared.

Example—

"न केवलं भाति नितान्तकान्तिर्नितम्बिनी सेव नितम्बिनीव ।
यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः" ॥

["That woman does not, with her extreme brightness, shine as a woman (only), but her graces also shine as her graces, the abode, as they were, of graceful motions of the elegance-armed *i. e.* Cupid"].

[Here नितम्बिनीव &c. and तद्विलासा इव &c."]

91 (*concld.*)—[*Page* 91.] The alternation of these two, is Reciprocal Comparison.

(3) The Upaméyopamá or Reciprocal Comparison.

'*Of these two,*' *i. e.* of the object compared and that compared to.

'*Alternation,*' *i. e.* in two sentences.

That is to say, Reciprocal Comparison is the comparison (in the following simile) of the object compared to (in the preceding simile) with that compared, excluding (or implying the absence) of other similar objects.

Digitized by Google

Example—

"कमलेव मतिर्मतिरिव कमला तनुरिवविभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी, सततं विभाति बत यस्य" ॥

["Of that king, the heart is like the goddess of wealth; Riches too like his heart, his splendour like his body, and like splendour his body; his fortitude like the earth and like fortitude the earth."].

(4) Utprekshā or Poetic Fancy.

92 (*contd.*)—[*Page* 640.] *Poetic Fancy* is the expression (or implication) of the probability of the identity of the object described with a similar object.

"*Similar object,*" *i. e.* the object compared to.

[*Page* 643.] Example—

"उन्मेषं यो मम न सहते जातवैरी निशायाम्
इन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षात्
लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः" ॥

["'This my natural enemy who bears not my sight during night, has now the pride of his beauty suddenly suppressed by the splendour of the face of this lotus-eyed one',—it is being overjoyed at this, I ween, O' beautiful one! that the splendour of the lotus is attached to your feet"].

[Here we have the Causal Fancy.]

And

[*Page* 644.] "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता" ॥

["Darkness anoints the bodies as it were the sky showers Arjana, as it were; and vision is become purposeless like the science of evil persons"].

Digitized by Google

(*a*) Here the *Pervadingness*, &c. are supposed to be *anointing*, &c.

(5) The Sasandēha, a Dubious.

92 (*concld.*)—[*Page* 646.] When the difference between two objects is asserted it is the *Dubious* (ससन्देह); when it is not asserted, it is (संशय).

To exemplify, when the difference is stated—

"Is this the Sun? He is associated with (has) seven horses. Is it fire? It never permanently moves on all sides. Is he the Death-God become visible? He has the buffalo for his conveyance. Thus (O King!) your foes, seeing you in battle, fall into various doubts."

By saying 'when the difference is asserted' it does not mean that it is only such as having ascertainment latent within it; but Dubiousness, ending in certainty, is also accepted as such,—*e. g.*

[*Page* 648.] "Is it the Moon? Where lies the mark? Is it a lotus? Where is the water gone? O fawn-eyed one! After (all these doubts) it was ascertained to be the face, through (the existence of) lovely and graceful words."

But here the certainty is not hinted, as in the Dubious with latent certainty (but is expressly denoted and as such not being so charming) it was excluded by Bhattodbhata.

To exemplify, when the difference is not stated—

"In the creation of this woman, was the brilliant Moon the Creator? or Madana himself, predominating in the Erotic? or the flowery months (spring)? or else how could the ancient Rishi (Brahma) create such a lovely form,—having as he has his sensibility deadened by the study of the Vedas and his desire turned aside from objects (of enjoyment)?"

(*a*) The former half is a case of Poetic Fancy, and not of Simile; because the इव, occurring in the company of the verb, implies *probability* and not *similarity*. This point is clearly explained in the *Vyākaraṇa-Mahābhāshya*, on the *sūtra* "धातोः कर्मणः समानकर्तृकादिच्छायां वा" [III. i. 7].

93 *(contd.)*—[*Page* 651.] That is Metaphor which is the non-difference of the two objects compared.

(6) Rūpaka or the Metaphor.

The non-difference (*i. e.* the imposition of non-difference) being due to extreme likeness of the two, not having their difference concealed.

93 *(concld.)*—[*Page* 652.] Where the full expressed (meaning) is imposed, it is Metaphor *Universal* (dwelling in all the objects).

The first kind of Metaphor.

Where the imposed (object), like the substratum of imposition (the Upamēya), is also directly expressed by words, then we have Universal Metaphor, *i. e.* where the complete imposed object is denoted by the word. The plural number in आरोपिताः is without any signification.

[*Page* 653.] To exemplify the Universal Metaphor—

"This *kāpālikī* (a kind of female ascetic) *of the night* wanders from continent to continent—bright through the rubbing of the ash of light, wearing bones of stars, loving the sport of disappearing, and carrying in her hand the skull of the Moon, wherein has been put—under garb of the mark—the powerful (efficacious) unguent."

[*Page* 654.] Here in the (first) three feet we have the Metaphor; the imposed attribute being the addiction to the sport of disappearing, based on which, we have Metaphor; and as such no question can be raised as to its being a commixture.

94 *(contd.)*—[*Page* 655.] That (Metaphor)—where it (the imposed) is both expressed (denoted directly by words) and (indirectly) hinted by the sense—is the *Partial.*

The second kind of Metaphor.

Some of the imposed being directly expressed by words, and others being such as to be ascertained from the power of the sense we have the *Partial* (and it is so called because) of the expression (manifest denotation) of one part (the श्रौता).

Digitized by Google

To exemplify the Partial Metaphor—

"जस्स रणन्तउरए करे कुणन्तस्समण्डलग्गलअम् ।
रससंमुही वि सहसा परंमुही होइ रिउसेणा" ॥

["He who is (so positioned) when he handles (embraces) the sword (a woman, his wife) in the harem of the battle-field, then the enemy's army (another woman) turns away from him, though yet endowed with heroism (yet amenable to emotion)."]

Here the imposition, *character of the harem*, on the 'battle-field' is directly mentioned by word; but the facts of the 'sword' being the principal woman and the 'army' the subordinate woman, are got at merely by the power of the sense. Thus there being a speciality (that of being directly denoted) in one part, it is Partial.

94 *(contd.)*—[*Page* 657.] **This is with subordinates.**

The above two kinds of Metaphor (The Universal and the Partial) are accompanied by parts (other subordinate Metaphors.)

The third kind of Metaphor. 94 *(contd.)*—**That without subordinates is the *Pure*.**

e. g.

"While listening to songs, she remains immoved; enquires her beloved's news again and again, of her friends; lies inside without sleep;—from all this I know that the mind-born has commenced to water the *plant of affection* in her heart."

Here the only metaphor lies in प्रेमलतिका, &c.

The Mālā-Rupaka. 94 *(concld.)*—[*Page* 658.] **The String is as before.**

As of Simile, so here of this also, String is that where on one object many are imposed—*e. g.*

"That beloved one is the fount of beauty, the joy of the excellence of youth, the captivating incantation of brightness, the residence of grace and elegance, the teacher of clever statements, the embodiment of the unlimited expertness of the creator, the arrow of the Five-arrowed one, and lastly the crown-gem among women."

Digitized by Google

95.—[*Page* 659.] Where there is an imposition of others simply as a means to the imposition of the principal, it is the Consequentional Metaphor—and this occurs both where the expressed is coalesced, and distinct.

The Paramparita Rupaka.

[*Page* 660.] To exemplify the Stringed (or Serial) Coalesced (or Paronomatic) Consequentional Metaphor—

" विद्वन्मानसहंस वैरिकमलासंकोचदीप्रद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः " ॥

["O thou! the swan of the (Mānasa lake of the) heart of learned men! the sun (in causing the expansion of the lotus) in shrivelling the expansion of the glory of your enemies! Çiva (in looking for Durgā, Pārvatī) in non-search of forts! Fire (in devouring the fuel) in accepting battle! Daksha (in not loving Satī) in love for truth! Bhīma (in being the elder of Arjuna) in victory! O King! Brave of the brave! may you magnanimously rule for a whole hundred years of Brahmā!"]

Here the imposition of *the character of the swan, &c.* on the 'king' is founded on the following impositions—the *heart* resembling the *Mānasa lake;* the *shrivelling of the goddess of wealth* being *the expansion of lotus;* the *search for Durgā* being the *non-search for forts;* the *devouring of fuel* being the *acceptance of battle;* the *hatred for Satī* being the *love for truth; Vijaya* (Arjuna) being the *victory.*

[*Page* 661.] Though this has been said to be a verbal Figure of Speech, and will be spoken as such further on, yet it is mentioned here in consideration of usage. Some include this in the Partial Metaphor.

To exemplify the Non-coalescing Serial Consequentional Metaphor, where the denoted meanings are distinct—

"Thy arm, O king! the producer of the widowhood of thy brave enemies' wives, is ever glorious—being as it is the pole of

Digitized by Google

the elephant of victory, a bund in the ocean of misfortunes; the Eastern mountain of the Sun of the Sword, the sporting pillow of the goddess of wealth, and lastly the Mandara mountain in the sportive churning of the ocean of battle."

Here the imposition of *the character of the pole* &c. on the king's arms becomes proper only after that of *the character of the elephant* &c. on *victory* and the rest, mentioned distinctly.

We may have the Non-serial (Simple) Consequentional Metaphor as in the following—

(1) The Paronomatic—

"अलौकिकमहालोकप्रकाशितजगत्त्रयः ।
स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान् " ॥

["O king! by whom are you not eulogised—you being the pearl of the bamboo of high family, and brightening the world with your superhuman resplendence?"]

(2) The Non-paronomatic—

["Glorious are you, the primeval Tortoise! the root of the plant of the fourteen-fold Universe! being infinite and unsupported, and from Whom have not turned aside extraordinary phenomena."]

The Girdle-Metaphor as in the following—

"Madana captivates the hearts of men, by means of the leaf-hands of creepers, the lotus-face of the lotus, and the face-moon and the lotus-hands of women."

——is not described, because there is not much charm in this (as there is in the Girdle Simile).

(7) *Apahnuti* or Concealment.

96 *(contd.)*—[*Page* 665.] That, which, after having denied (the real nature of) the object described, establishes another (an imaginary character), is Concealment.

Concealment is that which establishes the object to be compared, after having falsified (denied) the object compared to.

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता श्री तै० रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≈)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी, ...	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायां कृता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायां कृतम्	४)
मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्तिकम्	२॥≈)
शीतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम्	५॥।)
श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	६)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	३≈)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः ।	२।)
वेदपूर्त्तः प्रथमो विन्दुः सत्संप्रदायाचार्य पं० स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥≈)
वेदपूर्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं० स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धा	५॥।)
• माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता, ...	७॥)
काशिका	६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ with SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 225

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 241

JAIMINISŪTRAVṚITTIḤ of ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 257

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 273

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6.] June, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

नाम सत्त्वासत्त्वात्यन्ताभावसमुदायवत्त्वं वा सतोऽसतश्च कुतश्चिद्व्यावृत्तत्वं वा सदसच्छब्दगोचरसर्वान्यत्वं वा ब्रह्मतुच्छव्यावृत्तत्वं वा ब्रह्मत्वतुच्छत्वसमुदायशून्यत्वं वा तदुभयात्यन्ताभावसमुदायो वाऽन्यद्वा किञ्चित् । आद्ये व्याहतता, परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायात्, न ह्युष्णानुष्णाशीतवद् गतिः कोट्यन्तरस्यात्यन्तानुपलम्भात् । न च तथाप्युष्णानुष्णाविकल्पे कोट्यन्तरं समस्ति, द्वितीये सिद्धसाध्यता सतामेव परस्परमसद्भ्यश्च व्यावृत्तत्वात्, तृतीयेऽपि स एव दोषः, अस्ति हि सत एवैकस्य तदेकस्य सर्वसदसद्रूपत्वाभावात् । अत एव न चतुर्थः, न हि वयं ब्रह्मस्वरूपं वा निरुपाधिकतुच्छं वा विश्वं ब्रूमः, विरुद्धार्थान्तरता च खरशृङ्गे खपुष्पाद्यन्यस्मिँस्तद्भावात् । एवं पञ्चमेऽपि खरशृङ्गादौ ब्रह्मणि ब्रह्मत्वतुच्छत्वयोरसमुच्चितत्वात्, षष्ठेऽपि सिद्धसाध्यता । न तु विगीतं ब्रह्मस्वरूपं न च तुच्छम् अन्यदपि केनचिद्विशेषशब्देनोपस्थापयितुं शक्यं वा न वा शक्यञ्चेदस्माभिरपि विशेषतो दूषयितुं शक्यम् अशक्यञ्चेदं व्यपदेश्ययत्किञ्चिद्धर्मवत्त्वं साध्यं स्यादिति कस्तत्र विमन्यते अतो यत्किञ्चिदेवैतदिति । किञ्च विगीतप्रयोगेषु सर्वेषु यत्र कुत्रचित् पूर्वसिद्धमेव पक्षे साध्यम् । इह तु ब्रह्मणि तुच्छे वा न साध्यग्रहः तयोर्विपक्षत्वात् । न च विगीते तस्य संदिग्धसाध्यत्वात् । सपक्षस्तु शुक्तिरजतशब्देन प्रदर्शयितुं न शक्य इत्युक्तं, न च परासिद्धसाध्यावस्थो दृष्टान्तः स्यात्, तत्साधनञ्च दूषयिष्यते तदसौ त्वदभिमता सदसद्विलक्षणता परेषां सर्वथासिद्धतया पक्षे दुस्साधेत्यभिप्रायवानाह । असिद्धा चेति । ननु घटादौ तावदसद्विलक्षणत्वं संप्रतिपन्नं सद्विलक्षणत्वमपि पटादिवैलक्षण्यात् ब्रह्मवैलक्षण्याद्वा अतो भेदव्यवहारव्यवस्थापकलक्षणरूपकेवलव्यतिरेकिन्यायेन साध्यस्य पक्षैकदेशसि-

Digitized by Google

द्धस्यैवाभिव्याप्त्या साधनान्न साध्याप्रसिद्धिरिति अत्र तु सिद्धा चासाविति तत्प्रहारेणोत्तरं पक्षे सर्वत्र सिद्धैवेत्युक्तं तथाऽपि मिथ्याशब्दनिमित्तं किञ्चित्त्वयाऽङ्गीक्रियते तदेव साधयाम इत्यत्राह । भवदनभिमत इति । परे हि रजतादेः शुक्त्याद्यात्मना वेद्यत्वं वा रजतादेरतत्संसृष्टस्य तत्संसृष्टतया भातत्वं वा बाध्यव्यवहारहेतुधीविषयत्वं वा मिथ्याशब्दनिमित्तं सिद्धान्तयन्ति न चैतत् त्वया साद्धुम् अन्यथाख्यातेरख्यातेर्वा स्वीकारप्रसङ्गात् । तथा चापसिद्धान्तः स्वदेशादौ च विश्वं सत्यं स्यादिति विवक्षितविप*रीतसाधनापत्तिः अतस्सिद्धसाध्यत्वञ्चाह । विश्वमिति । हि-शब्द आगोपालपण्डितं दुरपह्नवां प्रसिद्धिं द्योतयति तदितरवपुषा—स्वेतरस्वरूपतयेत्यर्थः । न हि स्वप्रतियोगिकान्योन्याभाववत्त्वं वा स्वेतरतादात्म्यं वा कस्यचिद् अनुबोभूयामहे शोभूयामहे वा परसिद्धान्तकल्पिताकारवत्तया च मिथ्यात्वं सिद्धमित्याह । त्वन्मतारोपितैश्चेति । ब्रह्माविद्याविवर्त्तत्वानिर्वचनीयत्वबाध्यत्वैरिति शेषः । चकाराद्संसृष्टसंसृष्टतयेत्यपि गृह्यते एवमनिर्वाच्यत्वादिविकल्पकोट्यन्तरेष्वपि तत्तद्विकल्पावतारेण बाधापसिद्धान्तसिद्धसाधनत्वादिदोषाणामनतिक्रमणीयत्वं प्रच्छन्नबौद्धोपालम्भव्याजेन छात्रान् प्रतिबोधयति । स्यादिति । ध्रुवं निश्चितं प्रसञ्जकानामङ्गपङ्गुकसम्पत्तेरिति भावः ॥ ४८ ॥

स्वरूपविकल्पेन दूषितं मिथ्यात्वं धर्मतोऽपि विकल्पासहमित्याह । साध्यमिति ।

सू० साध्यं मिथ्या न वा ते द्वितयमनुचितं निष्फ-
लत्वादिदोषादाद्यं ह्यिष्टं ममापि प्रसजति

* तथा चार्थान्तरदोषापत्तिरित्यर्थः ।

भवतस्सत्यभेदः परस्मिन् । पक्षीकारेऽस्य बाधादिकमतिचरणां तद्बहिष्कारपक्षे तच्चेद् ब्रह्मस्वरूपं भुवनमभिहितं हन्त सब्रह्मकं स्यात् ॥ ४९ ॥

टी० ते—ब्रह्मव्यतिरिक्तमिथ्यात्ववादिनः द्वितयं—मिथ्यात्वस्य मिथ्यात्वं तत्प्रतिभटं सत्यत्वञ्च अनयोरनौचित्ये क्रमात् कारणमाह । निष्फलत्वादिदोषादिति । आदिपदमपसिद्धान्तार्थम् । नैष्फल्यं सिद्धसाधनतया विवृणोति । आद्यमिति । अपसिद्धान्तमुद्घाटयति । प्रसजतीति । पुनरपि साध्यमेतन्मिथ्यात्वं पक्षीकृतं न वेति विकल्पे पूर्वं दूषयति । पक्षीकार इति । अत्र हि प्रामाणिकमिथ्यात्वं पक्षीकृत्य तस्य मिथ्यात्वसाधने बाधः,अ*न्यस्य तु सिद्धसाध्यता, विधेयस्य निषेधात् व्या†घातश्चेत्यर्थः, न ह्यत्र स्वपरनिर्वाहकनीतिः । यतः ।

---

* मिथ्याभूतस्य त्वित्यर्थः ।

† अयं भावः विधित्सितं मिथ्यात्वमपि ब्रह्मणः सद्वितीयत्वापत्तिभीत्या मिथ्यारूपमेवानुमेयं तच्च निषेधप्रतियोगित्वरूपमेव । एवं च निषेधस्य निषेधप्रतियोगित्वाङ्गीकारे न तस्यात्मलाभ इति व्याघातः सुस्थः यदि तु तदेव स्वबाधयिषितमित्यातिष्ठसे संरम्भमात्रेण तदा निषेधनिषेधे प्रतियोग्युन्मज्जनमिति निर्विशेषाद्वैतसाधनप्रयत्नवतस्ते गजस्नानायितम् ।

यदि तु निषेधस्य निषेधबुद्ध्या यत्र निषेधनिषेधस्तत्र तस्य प्रतियोग्युन्मज्जकत्वेऽपि निषेधतत्प्रतियोगिनोरुभयोरपि यत्र निषिषेधयिषितत्वं निषेध्यतावच्छेदकस्य प्रकृतभिन्नत्वादेरुभयसाधारण्यात्तत्र निषेधनिषेधो नोन्मज्जनाय प्रथमाभावप्रतियोगिनः । अत एव तु घटनिषेधनिषेधेन घटव्यवस्थापनेऽपि घटध्वंसकाले घटप्रागभावो नास्तीति प्रतीत्या घटप्रागभावनिषेधेऽपि न घटव्यवस्थापनं तत्र घटतत्प्रागभावयोरुभयोरपि निषिषेधयिषितत्वादिति तु बालप्रवञ्चनमात्रं न हि निषिषेधयिषामात्रं निषेधनिषेधेन प्रतियोगिव्यवतिष्ठापयिषामात्रं वा उभयं वा प्रतियोग्युमज्जनहेतुः । ज्ञानस्य विषयपारतन्त्र्येऽपि इच्छानामात्मतन्त्रतया घटमव्यवतिष्ठापयिषोर्घटाभावनिषिषेधयिषामात्रेण घटनिषेधनिषेधे घटानुमज्जनप्रसङ्गात् । घटध्वंसकालेऽपि च घटव्यवतिष्ठापयिषया घटप्रागभावमात्रस्य च प्रतिषिषेधयिषया घटप्रागभावो नास्तीति धिया घटोन्मज्जनस्य च प्रसङ्गात् ।

Digitized by Google

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥

उत्तरोत्तरमाह । अतिचरणमिति । पक्षबहिर्भावो हि सपक्षतया विपक्षतया स्यात् आद्ये जगन्मिथ्यात्वस्य हि मिथ्यात्वे संप्रतिपन्ने कथन्तद्विरुद्धं साध्येत, द्वितीये मिथ्यात्वस्य सत्यत्वसंप्रतिपत्त्या तत्र च हेतुवृत्तेरतिचरणं, यदीदं न दृश्यं तदा साध्यमपि न स्यात् साधनाधीनदृग्विषयत्वायोगात् । अपि च ब्रह्मवदिह विपक्षभूतम्मिथ्यात्वं ब्रह्मणः सद्वितीयत्वमापादयेत् । अभावरूपं जगन्मिथ्यात्वमसत्यमप्येकदेशिभिरङ्गीक्रियत इति चेत् तथाऽपि तत्र हेतुवृत्तेरतिचरणं दुस्तरमेव, सत्यमेव जगन्मिथ्यात्वं तच्च ब्रह्मस्वरूपमेवेति नापसिद्धान्तादिदोष इति पराभिप्रेतं कृत्वाऽनुब्रूते । तच्चेदिति । तत्रापि सिद्धसाधनत्वमाह । भुवनमिति । मिथ्यात्वयोगिमिथ्या तच्च मिथ्यात्वं यदि ब्रह्म तदा विगीतं ब्रह्मवदिति साध्यार्थः स्यात्, तत्र न वयं प्रत्याख्यातार इति भावः ॥ ४६ ॥

एवं व्यापकवद्व्याप्यस्यापि विकल्पासहत्वं चतुष्पद्या दर्शयति । दृष्टमिति ॥

यदि तु वस्तुस्वभावबलाद् घटनिषेधनिषेधस्य घटस्वरूपत्वं तत एव च घटध्वंसकाले घटप्रागभावनिषेधोऽपि न घटात्मा किन्तु घटतत्प्रागभावोभयप्रतियोगिकोऽभावात्मा व्यवतिष्ठत इत्युच्यते तदा प्रागभावनिषेधस्य प्रथमाभावप्रतियोगिसत्तानर्जकत्वेऽपि वस्तुस्वभावबलादेव अत्यन्ताभावाभावस्य प्रथमाभावप्रतियोगिस्वरूपत्वं दुरपह्नवमिति मिथ्यात्वमिथ्यात्वं मिथ्यात्वप्रतियोगिनः सत्त्वसाधकमिति समन्यायसिद्धम् ।

यदि तु निषेध्यतावच्छेदकस्य दृश्यत्वादेःप्रतियोगितन्निषेधसाधारण्यात्तन्न निषेधनिषेधो न प्रतियोगिसत्त्वार्जनाय भवतीत्युच्यते तदा दृश्यत्वं यथा न मिथ्यात्वव्याप्यं तथैव ग्रन्थे परत्र च प्राचां ग्रन्थेषु स्वेष्टपूर्त्या अस्माभिश्च बहूपपादितमिति तत्तत्ोऽवधेयम् ।

Digitized by Google

मू० दृष्टं ब्रह्मापि दृश्यं तव च कथयतस्तस्य जिज्ञास्यतादीन्मिथ्या चेद् दृश्यताऽस्मिन्ननु विमतिपदेऽप्येवमेषा त्वयेष्टा । लिङ्गं जाड्यादिकं चेत्तदपि मम मते ह्यंशतः स्याद्सिद्धं मिथ्यालिङ्गैश्च सिद्ध्येत् किमपि यदि भवेद् वाष्पधूमोऽग्नि लिङ्गम् ॥ ५० ॥

टी० यदेतन्मिथ्यात्वसाधकतयोक्तं दृश्यत्वं तद् ब्रह्मणि विद्यते न वेति विचारे नेति पक्षस्तावद् दूष्यते अथातो ब्रह्मजिज्ञासा तद्विजिज्ञासस्व तद् ब्रह्म आत्मा वा अरे द्रष्टव्यः आत्मन्येवात्मानं पश्येदित्येवमादीनि परश्शतं वाक्यानि पुरस्कृत्य श्रोतव्यमन्तव्यत्वादिविशेषान् साधयतस्ते ब्रह्मणि दृश्यत्वनिषेधो न युक्तः विद्यत इति पक्षे हेतोरतिचार इति भावः । ब्रह्मणि दृश्यत्वं तन्मिथ्याभूतमतो न तत्रातिचार इति शङ्कते । मिथ्या चेदिति । एतदुपालभते । नन्विति । मिथ्याभूतेनैव हि दृश्यत्वेन ब्रह्मव्यतिरिक्तेऽपि मिथ्यात्वं त्वया साध्यते न हि दृश्यं मिथ्या तद्धर्मस्तु दृश्यत्वं सत्यमिति संभवति तथाऽङ्गीकारे तत्रैवातिचारः सत्यद्वित्वप्रसङ्गश्चेति भावः । ननु दृश्यत्वे दृश्यत्वं त्वयापि वक्तुं न शक्यमात्माश्रयादिप्रसङ्गात् । अतस्सत्येऽपि तस्मिन् हेतुवृत्त्यभावान्नातिचारः स्यात् मेवं दृश्यत्वन्नाम लिङ्गं दृश्यत्वादिति हेतुपदेन बोध्यं न वा आद्येऽतिचारस्त्वयैवेष्टः, द्वितीये साध्यव्याप्यमनुपस्थापयतो हेतुपदस्य प्रयोगाद्गताऽयोगः, न चैवमात्माश्रयादिदोषः स्वपरनिर्वाहकसमाधिना दृश्यत्वधर्मस्य तदाश्रयाणाञ्च दृश्यपदेन संग्रहस्य त्वया स्वीकार्य्यत्वात्, अन्यथा दृश्यत्वं न दृश्यमिति

स्वोक्तिविषयत्वव्याघातात् यदि च हेतुपदजन्यधीविषयताभावेऽपि हेतुपदन्तच प्रयुज्येत एवमनेकान्तिकादिपदमपि तज्जन्यधीविषयत्वाभावेऽपि तच लब्धप्रसरमिति सर्वदोषसंपातः स्यात्, दोषाभावे कथं दुष्टशब्दस्यार्थे इति चेत् दृश्यत्वाभावे कथं दृश्यशब्दस्यार्थे इति सममेतत् ।

किञ्च दृश्यत्वरहितं दृश्यत्वं निष्प्रकाशं स्वप्रकाशं वा नाद्यः स्वोक्तिव्याघातादेव, न द्वितीयः असम्भवात् अतः कथं दृष्टिविषयत्वं नापादयेत् । अथ स्याद् दृश्यत्वशब्देन स्वगोचरदृष्टिनिरपेक्षप्रकाशात्यन्ताभावो वा दृष्टिजन्यफलाश्रयत्वं वा विवक्षितं तदुभयं स्वयञ्ज्योतिषि ब्रह्मणि नास्तीति कथन्तत्रातिचार इत्यपसर्पवाक्यमनुभाषते । लिङ्गमिति । तदुभयं दूषयति । तदपीति । अस्मन्मते हि ब्रह्मव्यतिरिक्ता जीवा धर्मभूतज्ञानञ्च स्वयंप्रकाशतया स्वगोचरदृष्टिनिरपेक्षप्रकाशानि अतो हेतोर्भागासिद्धिः, दृष्टिजन्यफलं च त्वदनुविधेयाभिमतं प्राकट्यं वा त्वदभिमतं वेद्यगतवित्तिस्फुरणं वा द्वयोरपि विगीते क्वचिदपि अस्माभिरनङ्गीकारात् सार्वत्रिकी स्वरूपासिद्धिः तथापि स्फुरणस्य वाच्यं व्यवहाराख्यं फलं विगीतस्यापीति चेत्तर्हि तद् ब्रह्मापि व्याप्नोति अन्यथा तत्र मौनेकपरत्वः कथं तज्ज्ञानिख्यापनया प्रवर्तेथाः । भवन्तु चात्र यानि कानिचिल्लिङ्गानि तानि सत्यान्यसत्यानि वेति विकल्पे पूर्वत्रापसिद्धान्तादि स्फुटमिति कृत्वा पश्चिममनुवक्ति । मिथ्यालिङ्गैरिति । तत्रानिष्टमाह । भवेदिति । बाष्पधूमः—बाष्पारोपितधूमः, । धूमभ्रान्तिसिद्धस्य धूमस्य व्यभिचारदृष्ट्या वह्निगमकत्वाभावो न तु मिथ्यात्वादिति चेत्तत एव यन्मिथ्या न तद् गमकमिति व्याप्तिसिद्धेस्त्वदभिमतान्यपि न साध्यं साधयेयुः, साधने वा ब्रह्मण्यपि तानि कथञ्चित्क-

Digitized by Google

ल्पितानि तदप्यपरमार्थयेयुः । एतेन परोक्तं बाधकमपि प्रतितर्क-प्रत्यूढं दर्शितं भवति । अपि च सत्यत्वपक्षे याऽसौ दृग्दृश्यसंबन्धानुपपत्तिर्बाधिकेति संभाव्यते असत्यत्वेऽपि सा अस्ति वा न वा आद्ये तर्काङ्गपञ्चकान्यतमहानेरतर्कत्वं तदा वाऽसत्यत्वे साध्ये कथं दृश्यत्वं हेतुरुपादीयेत । द्वितीये सत्यादन्यस्मिन् खपुष्पेऽपि दृश्यत्वानुपपत्तिर्न स्यात् माभूदिति चेन्न व्याप्तिबाधान्यथानुपपत्तितर्कानुदयप्रसङ्गात् । अथ शब्दज्ञानानुपातिवस्तुशून्यविकल्पगोचरतामात्रेण तस्य दृश्यत्वं सत्येतरत्वसाध्यापेक्षया च सपक्षत्वमिष्येत तदा तद्वदेव तुच्छत्वेऽपि संभवति अभिमतानिर्वचनीयत्वं न नियम्येत शब्दज्ञाननिरपेक्षस्य खपुष्पाद्यध्यासः प्रागपि दर्शितः । भवतु तथाप्यनिर्वचनीयत्वं शब्दमात्रानुपातिविकल्पविषये तुच्छत्वं तत्र च विवक्षितदृश्यत्वानुपपत्तिस्सिद्धेति चेत्तदपि न शब्दमात्रप्रतीतबाह्यागमविकल्पविषयाणामन्येषामपि पूर्वपक्षवाक्यार्थानामनिर्वचनीयत्वाभ्युपगमात् । अस्तु तथापि तुच्छत्वं किन्नश्छिन्नमिति चेन्न प्रत्यक्षाद्याभासप्रतिपन्नेऽप्याभासप्रतिपन्नत्वाविशेषेण तुच्छवहिर्भावकृप्तिभङ्गप्रसङ्गात् । ननु सत्ये दृक्संबन्धोऽनुपपन्नः अस्वयंप्रकाशस्य स्वतस्सिद्धिविरहेण सत्यत्वायोगात् तुच्छेऽपि तथा स्वरूपाभावे संबन्धाभावादनिर्वचनीये त्वविद्यामाहात्म्यात् आध्यासिकस्संबन्धस्सिद्ध्यन् दुरपन्हव इति तन्न पराधीनसिद्धेरपि निर्बाधस्य सत्यत्वाविरोधात् सत्येऽपि ब्रह्मणि आध्यासिकदृक्संबन्धाभ्युपगमाच्च ।

दृक्संबन्धश्च दृश्यानामसत्यत्वे विवक्षितः ।
सत्यत्वादिविकल्पेन सीदत्यनुपपत्तिमान् ॥

सत्यत्वे त्वनुपपद्यमानोहि दृक्संबन्धः सत्योऽसत्य उभयरूपोऽनुभयरूपो वा नाद्यः सत्यत्वे प्रपञ्चस्य दृक्संबन्धस्सत्यो न

Digitized by Google

स्यात् असत्यस्त्वासाविति विपर्ययविभ्रमायोगात् । विषयसत्यत्वे हि धिया संबन्धः स्वीकार्यः न चासौ घटते विकल्पदौःस्थ्यादिति प्रसक्तत्द्विपर्ययाविति चेन्न इष्टप्रसङ्गत्वात्, दृशस्सत्यत्वेऽपि दृश्यसंबन्धासत्यत्ववद् दृश्यस्य सत्यत्वेऽपि दृशिसंबन्धमात्रासत्यत्वमनुपपत्त्या कल्प्यं, दृक्संबन्धासत्त्वे तदधीनसिद्धेः कथं सत्यत्वमिति चेन्न असत्यात् सत्यसिद्धेस्त्वया त्वद्विद्वेषैश्च* जोद्घुष्यमाणत्वाद-स्माकन्तु संबन्धविकल्पदौःस्थ्यानङ्गीकारादेव समीहितसिद्धिः ।

संबन्धफलसिद्धौ च स्वरूपे दुरपह्नवे ।
अन्तर्भावबहिर्भावविवादस्त्विह निष्फलः ॥
ये च दृग्दृश्यसंबन्धे संयोगादिविकल्पतः ।
दोषाः प्रलपितास्तेऽपि दृश्यासत्यत्वभीरवः ॥
संबन्धमात्रदौर्घट्यात्तद्विशेषोऽपि दुर्घटः ।
इति चान्धस्य जात्यन्धयष्टिदानोपमं विदुः ॥

न द्वितीयः विषयस्य सत्यतायामसत्यसंबन्धो न स्यादि-ति ह्यत्र प्रसङ्गः स्यात्, अयं ब्रह्मण्यतिचरितः, इष्टप्रसङ्गश्च विपर्यये विश्रान्तिश्चाद्याप्यसिद्धा । अत एव न तृतीयचतुर्थौ, व्याघातात्र तथाऽपि कोऽसौ दृग्दृश्ययोस्संबन्ध इति निर्मत्सराः पृच्छाम इति चेत् वयमपि निर्मत्सराः पृच्छन्तं पृच्छामः तत्र किन्नामेति वा किंस्वरूप इति वा संयोगादिषु कतम इति वा तेष्वन्तर्भूतो बहिर्भूतो वेति वा सत्योऽसत्योवेत्यादिप्रकारकोटिभेदेन वा प्रश्नार्थः स्यात् नाद्यः अप्रख्यातविशेषनाम्नामानन्त्यात्, सामान्यतस्तु प्रश्नवाक्येऽपि प्रख्यातेः । न द्वितीयः सर्वत्र स्वरूपमात्रे प्रश्नोत्तरविचारादेरनव-

* माध्यमिकैश्चेत्यर्थः ।

तारात् । न तृतीयः संयोगादिराश्रयन्तर्भावनिबन्धाभावादन्यथा सर्वेष तज्जातीयराशिविशेषप्रश्नप्रसङ्गात् । नापि चतुर्थः उभयथाऽपि स्वरूपलाभे विशेषनिर्द्धारणवैफल्यात् अनिर्द्धारितेऽप्यन्यतरकोटेरनपायात् । न पञ्चमः परस्परविरुद्धे सर्वेषानुपपत्तिरहितान्यतरकोटेर्यथार्हमवशेषणीयत्वात् । दूषिता च संबन्धपक्षानुपपत्तिर्दर्शितश्चासंबन्धपक्षे दोषः, यदि चेतादृशस्तर्कोऽनुग्राहकः स तर्हि यत् प्रकाशते तन्मिथ्या यथा ग्राह्यग्राहकौ तथा संविदित्यादि संविन्मिथ्यात्वसाधकानुमानेष्वपि सुलभः, सत्यत्वस्वप्रकाशत्वादिधर्मसंबन्धानुपपत्तेस्त्वत्प्रलापप्रस्थित्यैवाकुण्ठितप्रसरत्वात् ।

मिथ्यात्वेन च दृश्यत्वं स्वतः संबन्धि साधयन् ।
अप्रामाण्यस्वतस्सिद्धिमुद्गिरत्यनया गिरा ॥ ५० ॥

इति दृश्यत्वानुमानभङ्गः ।

उक्तदोषदुष्टमप्यनुमानान्तरमधिकदोषविवक्षार्थं व्याचष्टे । व्यावृत्तमिति ।

मू० व्यावृत्तं शुक्तिरूप्यं विदितमिह मृषा विश्वमेवं न किं स्यान्मैवं हेतोरयुक्तेस्स खलु भिदुरता बाध्यता नाशिता वा । आद्येऽनैकान्त्यमन्त्ये स्वसमयविहतिर्मध्यमे स्यादसिद्धिर्धीविच्छेदादिकल्पान्तरमपि कथितैश्चूर्णितं दोषवृन्दैः ॥ ५१ ॥

टी० इह—यत्र भाति तत्रेत्यर्थः अन्यत्र तु प्रसङ्ग एव नास्ति यद्वा सर्वस्मिन्निह जगतीत्यर्थः विमतं मिथ्या व्यावर्तमानत्वात् यदुक्तसाधनन्तदुक्तसाध्यं यथा शुक्तिरूप्यं, तत्खलु स्वतादात्म्येन भाते

Digitized by Google

शुक्तिद्रव्येऽनु वर्तमाने स्वयं व्यावर्तते अतो मिथ्या, एवं रज्ज्वादे-स्सर्पभूदलनाम्बुधारादेश्च सत्यत्वमिथ्यात्वे व्यवतिष्ठेते इति । तथापि प्रागुक्तदूषणानि न प्रस्मर्तव्यानीत्यभिप्रायेण प्रतिवक्ति । मैवमिति । तत्र हेतुदौःस्थ्यं हेतुमाह । हेतोरिति । अयुक्तिं प्रथयितुं विकल्पयति । स खल्विति । योऽयं व्यावर्तमानत्वहेतुः कुतश्चित् भिन्नत्वं वा बाध्यत्वं वा नश्वरत्वं वा, प्रथमं दूषयति । आद्य इति । भिन्नत्वं ह्यत्र स्वप्रतियोगिकं वा स्वेतरप्रतियोगिकं वा स्वतोऽन्यतो वेति विशेषानादरेण यत्किञ्चित्प्रतियोगिकं वा आदिमस्त्वसंभवग्रस्तः भेदाभेदकुदृष्टिश्च त्वया नाङ्गीक्रियते अनन्तरस्त्वनैकान्त्यहतः, सत्ये ब्रह्मण्यतद्व्यावृत्तिं वर्णयता त्वयैव स्वेतरान्यत्वस्य स्वीकारात् तत एव सामान्योक्तिरपि निर्धूता अत्र क्रमस्य दूषणानुपयोगित्वादपसिद्धान्तोद्घाटनत्वरया च तृतीयं दूषयति । अन्त्य इति । यदि ह्यत्र स्वकालसत्त्वमभ्युपेत्य उत्तरकालासत्त्वं हेतुरुद्गृह्यते तदा मिथ्यात्वेन सिसाधयिषितस्य स्वकालसत्त्वाभ्यनुज्ञानेऽपसिद्धान्तः, हेतुसाध्यपदव्याघातश्चानभ्युपगतस्वकालसत्त्वे तु नश्वरत्वहेतुरसिद्धः न खलु नित्यासतां खपुष्पादीनां नश्वरत्वं पामरः परीक्षको वा कश्चित् प्रत्येति, ।

तथापि नश्वरत्वेन नित्यसत्त्वं निरुध्यताम् ।
स्वकालेतरकाले च तेन मिथ्यात्वमिष्यताम् ॥

बाध्यत्वं हेतुं बाधते । मध्यम इति । प्रपञ्चस्य बाध्यत्वं हि स्वदेशादौ वा स्वारोपदेशादौ वा आद्ये त्वसिद्धिरवस्थापिता । द्वितीये बाधस्थलेष्वेव मिथ्यात्वसाधने सिद्धसाध्यता अन्यत्र साधने त्वविषयवृत्तित्वमन्यथाऽतिप्रसङ्गः, प्रपञ्चविषयबाधेन ब्रह्मबाधस्यापि सुवचत्वात् ब्रह्म मिथ्या सप्रपञ्चात्मना बाधितत्वात् यत्कथञ्चिद् बाध्यते

Digitized by Google

तत्सर्वथा बाध्यत इति त्वयैवाश्रितत्वादिति । ननु यत्सत्यं तन्नित्यं प्रकाशते स्वतश्च यथा ब्रह्म, विगीतन्तु न तथा सुषुप्त्यादौ प्रपञ्चभानाभावात् जागरादौ चान्यत एव भानात् । किञ्च सत्यस्य सर्वस्मिन् प्रकाशमाने प्रकाशो दृश्यते यथा संवित्स्वरूपस्य, न तथा प्रपञ्चस्याप्रकाशमाने घटादौ पटादिप्रकाशदर्शनात्, सत्यञ्च ब्रह्म देशपरिच्छेदरहितं न तथा विगीतमिति मिथ्या स्यात्, अतः कोट्यन्तरसंभवात् विकल्पन्यूनः प्रस्तुत उपन्यास इति शङ्काऽपनुत्त्यै कोट्यन्तरेष्वप्युक्तदोषानतिदिशति । धीविच्छेदेति । यदत्र कदाचिदप्रकाशमानत्वान्मिथ्येति तत्र किमस्मदाद्यपेक्षया कदाचिदप्रकाशमानत्वं हेतुः, उत सर्वापेक्षया, नाद्यः सामग्र्यनुदयप्रयुक्तस्य प्रकाशाभावस्य प्रकाश्यमिथ्यात्वसाधकत्वायोगात् । न च पशुभिर्नृपशुभिश्चाविदितेष्वदृष्टेश्वरादिषु प्रामाणिकैरसत्यत्वमध्यवसीयते । वयं तु तथाप्यध्यवस्याम इति चेन्न ब्रह्मण्यपि प्रसङ्गात् विदितमेवास्माभिरध्यात्मतया ब्रह्मेति चेत् किमर्थं तर्हि तद्विविदिषया यज्ञदानाद्युपादानं शारीरकारम्भश्चाविदिताकारबोधार्थमिति चेन्न तस्यैवाकारस्य मिथ्यात्वप्रसङ्गात् तत्त्वावेदकवाक्यवेद्यस्य च मिथ्यात्वं व्याहतं निराकारे च कथं विदिताविदिताकारभेदः, तत्कल्पनयेति चेत्तर्हि कल्पिताकारविविदिषयैव शास्त्राद्यारम्भात् स्वेष्टोपप्लवः । न द्वितीयः ईश्वरस्य नित्यसर्वज्ञतया तदसिद्धेः । प्रकाशप्रकाश्ययोश्च भिन्नायुष्कत्वं युष्माभिरपि दुरपह्नवम् अनादिषाड्विधचैतन्यविषयभूतानां विद्याव्यतिरिक्तानामनादित्वानङ्गीकारात् स्वतःप्रकाशमानत्वाभावाच्च सत्यत्वनिषेधः; पूर्वहेतुविकल्पे दूषितः परतः प्रकाशोऽपि कारणदोषबाधकप्रत्ययाभावात् प्रतिष्ठितप्रामाण्यः, यच्च सत्यं संवित्स्वरूपं सर्वस्मिन् प्रकाशमाने प्रकाशते न तथा विगीतम् अतो मिथ्येति तदसत् सर्वसंपदामैक्यस्या-

स्माभिरनुपगमात् त्वयाऽपि तस्य दुस्साधत्वाच्च, अन्यथा कथं न सर्वे न सर्वेषाः स्वसंविदो गुरुसंविदा प्रतिवादिसंविदा चैक्यं पश्यन् किं तदनुगुणं नाचरसि भिदुरास्तु संविदः स्ववेद्येतरप्रकाशदशायां न प्रकाशन्त इति न तन्निदर्शनम् । एतेन सत्यं सत्त्वमेव वेद्ये प्रकाशत इत्यपि दत्तोत्तरं प्रतिवित्तिवेद्यानां सतां परस्परव्यावृत्तत्वात् सत्ताद्रूपस्तु तेषां धर्मो न त्वया सत्यत्वेन स्वीक्रियते शेषन्तु स्वस्थाने भविष्यति यत्तु देशपरिच्छेदवतां स्वदेशेऽपि निवृत्तिः सेत्स्यति तदपि नश्वरत्वोक्तन्यायेन प्रत्युक्तं यदि हि यत्र क्वचिद्देशे व्यावृत्तिर्हेतुस्स तर्हि स्वदेशासत्त्वं न साधयेत् तत्सत्त्वे विरोधाभावात् सार्वत्रिकव्यावृत्तिस्तु साध्यगर्भेति न हेतुः स्यात् ।

यन्न क्वचिन्न क्वचितत्स्वरशृङ्गादिरीरितः ।
इति मध्यमशिक्षा च स्वविधिवेपक्षपिण्डता ॥ ५१ ॥

इति व्यावर्तमानत्वानुमानभङ्गः ।

नश्वरत्वहेतावुक्तदोषमनिर्द्धारयतः कालपरिच्छेदसामान्यमुखेन मिथ्यात्वशङ्कामकुरन्तीमुज्जिहीर्षुरुद्घाटयति । यत्स्यादिति ॥

मू० यत्स्यात्तत्सर्वदा स्याद्यदपि च न भवेत्तच्च न स्यात् कदापि क्वापि व्योमारविन्दादिवदिति यदि न व्याहतेस्साध्य*हेत्वोः । मध्ये सत्त्वं गृहीत्वा खलु तदुभयतोऽसत्त्वलिङ्गं गृहीतं सामग्र्या चावधी द्वौ स्फुटतरविदितौ सापि तत्तत्प्रवाहात् ॥ ५२ ॥

---

* हेतुसाध्ययोरिति वक्तव्ये अयथाऽक्रमं न्यायप्रयोगे साध्यस्य प्रथमप्रयोगनिबन्धनमिति वेद्यम् ।

Digitized by Google

टी० विवक्षितस्य हेतोरनादरप्रतिरोधाय प्रथममिहानुग्राहकोक्तिः यत्कश्चित्काले स्यात् तत्कालान्तरेऽपि स्यात् सत्स्वभावत्वे ब्रह्मण इव सामग्रीसहस्रेणाप्यसत्त्वापादनायोगात्, असत्स्वभावत्वे खपुष्पस्येव कालविशेषे सत्त्वापादनासम्भवात् तदिहानुग्राह्याभिप्रायेणाह । यदपीति । अयमत्र प्रयोगः यत्प्रागूर्द्ध्वञ्चासत् तन्मध्येऽप्यसत् यथा संप्रतिपन्नं, विमतं च तथात्वान्मिथ्येति अनयोस्तर्कानुमानयोराभासतामभिप्रेत्याह । नेति । तर्के तावत्कालविशेषोपश्लिष्टं सत्त्वं प्रसञ्जनीयम् । उताविवक्षितकालविशेषं सत्त्वमात्रं वा नाद्यः स्वस्वरूपस्यैवाभावे स्वकालाभावात् तदवधिककालान्तरासिद्धेः तदुपश्लिष्टप्रसञ्जनीयबोधासंभवेन तत्प्रसङ्गायोगात् । न द्वितीयः इष्टप्रसङ्गत्वात् प्रसञ्जकैकदेशस्य प्रसञ्जनीयत्वायोगाच्च ॥

अथ विशिष्टाङ्गीकारे विशेष्याङ्गीकारप्रसङ्गः । तन्न नास्ति बाधादित्याकूतं तदपि न अन्यतो बाधादृष्टेः, एतेन तर्कस्य बाधमुज्जीव्योत्तत्सिद्धेरशक्यसंपादनत्वात् कुतश्चिदसत्त्वस्यासिद्धौ सत्त्वस्य प्रसञ्जनीयत्वायोगाच्चेति भावः । अनुग्राह्याभासत्वे विरोधं हेतूकरोति । साध्यहेत्वोरिति । एतल्लक्षणहेत्वोरितिवदत्र हेतुसाध्ययोर्व्याहतिं विवृणोति । मध्य इति । अयमाशयः कालविशेषासत्त्वं ह्यसिद्धं तावन्न लिङ्गं स्यात् त्वयाऽपि तथाऽनभ्युपगमात्, तत्सिद्धिस्तु स्वकालेऽप्यसत्त्वं क्रोडीकृत्य वा बहिष्कृत्य वा पूर्वत्रासिद्धिरंशतस्साध्याविशेषश्च स्वदेशकालासत्त्वात्मनो मिथ्यात्वस्य प्रविष्ट्यापर्यवसितत्वात् उत्तरत्र स्वकालसत्त्वानुमतिलब्धजीवितेन हेतुना कथं सा प्रतिक्षिप्येत तत्कालवर्तित्वबुद्ध्यपेक्षया प्रागुत्तरकालपरिक्लृप्तिरिति चेत् न नित्ययाऽपि धिया तत्कालवर्तित्वग्रहणोपपत्तेः, अनित्यबुद्ध्यपेक्षया प्रागूर्द्ध्वसमयसिद्धिरिति चेत् बुद्धेस्तर्हि

Digitized by Google

स्वकालसत्त्वमेष्टव्यमन्यथा तदवधिकपूर्वोत्तरासिद्धेः। बुद्धिरपि बुद्ध्य-धीनसिद्धिः न तु वस्तुतस्सतीति चेन्न अनित्यबुद्धिवन्नित्यबुद्धिरपि तथेति प्रसङ्गे निवारकाभावात् किञ्चासौ स्वाधीनसिद्धिर्वा स्वेतरबुद्ध्य-धीनसिद्धिर्वा नाद्यः अनित्यबुद्धेस्त्वया स्वयंप्रकाशताऽनभ्युपगमात् अभ्युपगमे वा नित्यसत्यत्वप्रसक्तेः। न द्वितीयः अन्यबुद्ध्या तत्स्व-रूपसिद्धावनित्यबुद्धेर्नित्यभानप्रसङ्गात् ईश्वरबुद्धिवत् स्वकालवर्ति-त्वप्रतिभासे स्वत एव सत्याया अनित्यबुद्धेः कालोपाधित्वप्रसङ्गात् तत एव तदपेक्षः पूर्वोत्तरकालासत्त्वलिङ्गेन स्वोपजीव्यमध्यकालस-त्वप्रतिषेधः प्रासादनिगलप्रयाससप्राय इति। अथ सतोऽसत्त्वमसत-स्सत्त्वञ्च दुस्साधमिति दुरभिमानमुन्मूलयति। सामग्र्येति। अप-रोक्षप्रमितिसामग्र्येत्यर्थः। यद्वा जनिहेतुसामग्र्योपलक्षितौ पूर्वापरा-वधी प्रत्येकं समुदायतो वा यथावस्तु प्रत्यक्षसिद्धाविति वाक्यार्थः तदा पण्डितप्रथुकतिर्य्यक्पर्य्यन्तदुरपन्हवत्वं सूच्यते, ततश्च निर्बा-धस्फुटदृष्टापन्हवे वैभाषिकादिपरिभाषया ब्रह्मणोऽपि कालपरिच्छेदर-हितत्वादेव खपुष्पकल्पत्वं प्रसज्यत इति भावः। ननु कालपरिच्छिन्नो-त्पत्तिसप्रसामग्रीसिद्धावेवं वाच्यं सैव कुतस्त्येत्यत्राह। सापीति। साम-ग्रीस्वरूपप्रवाहस्तद्बोधकप्रवाहश्चानादिरपर्य्यनुयोज्य इति भावः।

किञ्चानित्यत्वसंत्यत्वेनानित्यं सत्यतां त्यजेत्।
तदसत्यत्वपक्षे तु नित्यत्वात्सत्यता भवेत्॥

इत्यनित्यमिथ्यात्वव्याप्तिपरिहारः।

माभूदनुमानं नित्यनिर्दोषनिगमवाक्यगणैरेव निर्विशेषस्वप्र-काशसच्चिदानन्दब्रह्मव्यतिरिक्तसर्वमिथ्यात्वसिद्धिः स्यादित्यत्राह। आम्नायस्येति॥ ५२॥

Digitized by Google

मू० आम्नायस्यापि शक्तिर्न खलु गमयितुं स्वोप-
जीव्यप्रतीपं यूपादित्यैक्यवाक्यप्रभृतिरित-
रथा नोपचारं भजेत । अत्राम्नायः स्वपूर्वा-
परविहतिभयान्नेति नेत्यादिवाक्यं वैलक्ष-
ण्यादिमात्रं प्रथयति भुवनाद् ब्रह्मणो
विश्वमूर्त्तेः ॥ ५३ ॥

टी० अयं भावः प्रत्यक्षमुपजीव्यानुमानस्य, ते उभे उप-जीव्य शास्त्रस्य च प्रवृत्तिः, तच्चेते बाधेत अनुमानेऽपि कालात्ययापदिष्टकथैव न स्यात्, तथा च बाधाभावे कथं दूष्यदूषणव्यवस्थेति कथाश्रयोच्छेदः । ननु पदपदार्थादिस्वरूपमात्रं शास्त्रस्य प्रत्यक्षादुपजीव्यमनुपजीव्यं तु तत्सत्यत्वं प्रमाणाभावभावितं शास्त्रेण बाध्येत, मैवं न हि जगत्सत्यत्वग्राहिणः प्रमाणाभासत्वमितः पूर्वं सिद्धं ततश्च तदाभासत्वसिद्ध्या शास्त्रेण तद्बाधः, तेन च सेति मिथस्संश्रयः स्यात् । अस्त्वाम्नायत्वमेव प्राबल्यकारणमित्यत्रातिप्रसङ्गमाह । यूपादित्येति । नन्वादित्यो यूप इत्यादेराम्नायस्य कर्मविधिशेषतयाऽन्यपरत्वाद् दुर्बलतया प्रत्यक्षानुविधानेन वृत्त्यन्तरस्वीकारः, इह तु तत्त्वावेदकवाक्यस्यातत्परत्वासंभवात् प्रत्यक्षादिबाधकत्वं युज्येत हन्त किं क्रियाशेषत्वमेव मन्त्रार्थवादानां स्वार्थप्रहाणकारणं तथा सत्यतिप्रसङ्गात् तावता त्वन्यार्थे स्वार्थबोधनं सिद्ध्येत्, क्वचिच्च स्वार्थप्रहाणं बाधादेव न त्वन्यशेषत्वात् तथैव हि लोके वेदे च स्तुत्यादेर्दृष्टिरनन्यपरेष्वपि ब्रह्म वनं ब्रह्म स वृक्ष आसीदित्यादिष्वर्थासंभवे भाक्तो निर्देशः ।

ननु जगद्ब्रह्मसामानाधिकरण्येऽपि स्वरूपैक्यविरोधात्

Digitized by Google

बाधार्थतयोपचारः स्यात्, तन्न श्रुतिस्मृतिशताबाधेन संभवन्त्यां गतौ विपरीतलक्षणाङ्गीकारायोगात् व्याप्तिविशेषापेक्षया च सामानाधिकरण्यं व्यज्यते स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं पुरुष एवेदं सर्वं, सर्वं समाप्नोषि ततोऽसि सर्वः सर्वगतत्वादनन्तस्य स एवाहमवस्थित इत्यादिषु, अत एव ब्रह्मैवेदं सर्वम् आत्मैवेदं सर्वं यत्र त्वस्य सर्वमात्मैवाभूदित्याद्याः सावधारणनिर्देशाश्च ब्रह्मात्मकत्वनिषेधाभिप्रायास्तथा च नेह नानाऽस्ति किञ्चनेत्यादिकमपि गतार्थमिदञ्च वाक्यं यदि ब्रह्मणि नानात्वं प्रतिषेधेत् तदा ब्रह्मैकत्वसिद्धौ का कथा तद्गुणविभूतिनिषेधस्य । अथ भावप्राधान्यानाञ्जस्यं किञ्च नेति पदवैयर्थ्यञ्च मत्वा नानाभूतं किञ्चन वस्तु ब्रह्मणि नास्तीति युज्येत तथाऽपि न जगन्निषेधः, ब्रह्मण्यविद्यमानानामपक्षयविनाशरूपवर्णादीनामिव स्वाधारेषु निराधारतया वा वृत्त्युपपत्तेः, बहुव्यापिनि सर्वाधारतया चाधिगते ब्रह्मणि नास्ति किञ्चनेति निषेधात् तन्मिथ्यात्वे तात्पर्यं गम्यत इति चेत्तथा सति नेदं किञ्चनास्तीत्येतावद्वक्तव्यम् अधिकरणोक्तिस्त्वजागलस्तनायेत् । अथ प्रपञ्चे नानात्वं नास्ति नानाभूतं नास्तीति वा प्रतिपाद्येत तथाऽपि न प्रपञ्चस्वरूपबाधः, तन्नानात्वनिषेधे वाक्यप्रवृत्तेः तच्च दृष्टश्रुतविरोधपरिहृत्यै विश्वस्य ब्रह्मात्मकत्वादिसाधर्म्यविधौ वा जडपण्डितशत्रुमित्रादिवैधर्म्यदृष्टिनिषेधे वा तात्पर्यं स्थापनीयम् । इयञ्च गतिरेकधैवानुद्रष्टव्या विद्याविनयसम्पन्ने, सुहृन्मित्रार्युदासीनेत्यादिभिरनुगृह्यते अत ईदृशेषु सर्वेषु वाक्येष्वेवंसर्वाविरुद्धः कश्चिदर्थस्समर्थनीय इत्यभिप्रायेणाथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत् परमस्तीति वाक्यं तावदविरुद्धार्थविषयं साधयति । अक्षेति । प्रत्यक्षग्रहणमनुमानस्याप्युपलक्षणमाम्नायशब्दः

पादि पूर्वत्रासिद्धं, तच्च भवमसिद्धत्वं पूर्वत्रासिद्धीयं तद् द्विर्वचने कर्तव्ये न भवति, ततश्च षत्वे ढत्वे वा प्रवृत्ते तद्युक्तस्यैव द्विर्वचनमिति नास्ति दोषः । 'सर्वस्येत्येतदेवेत्यादि' । पूर्वं पूर्वत्रासिद्धीयमद्विर्वचन इति वचनाश्रयेण द्रोढाद्रोढेति साधितमिदानीं सर्वस्येत्यनेन साधितमित्येकस्मिन्साध्ये द्वयोर्हेत्वोर्विकल्पः, कथं पुनः सर्वस्येत्यनेन कृतसर्वकार्यप्रतिपत्तिः, अर्शआद्यच्प्रत्ययान्तोयं सर्वशब्दः, सर्वं कार्यं यस्मिन्नस्ति तदिदं सर्वं, तस्य द्वे भवतः, सर्वेषु कार्येषु कृतेषु द्विर्वचनमित्यर्थः ॥

"तस्य परमाम्रेडितम्" ॥ तस्येत्यवयवयोगे षष्ठी परशब्दोऽवयववचनः, दिक्शब्दाज्ञ्चूत्तरपदेत्यत्र यद्यपि दिशि दृष्टः शब्दो दिक्शब्द इत्याश्रयणात्संप्रत्यदिक्शब्दत्वेपि पञ्चमी विहिता तथाप्यस्मादेव निर्देशादवयववाचिभियोगे षष्ठी भवति, एवं च पूर्वं कायस्येत्यादि सिद्धं भवति, उदाहरणे आम्रेडितं भर्त्सने इति प्लुतः, तस्य षष्ठ्या विषया[1]वधारणार्थम्, तस्यैतस्यानन्तरस्य द्विरुक्तस्येति, तेन षाष्ठिके द्विर्वचने इयं संज्ञा न भवति, ननु आम्रेडितशब्दो निघण्टुषु प्रसिद्धः, आम्रेडितं द्विस्त्रिरुक्तमिति, सत्यमर्थे प्रसिद्धः, इह तु शब्दे परिभाष्यते, महासंज्ञाकरणं पूर्वाचार्यानुरोधेन ॥

"अनुदात्तं च" ॥ परमित्यनेन सामानाधिकरण्यात्तस्य चाङ्गभूतसमुदायरूपत्वादन्वार्थोऽत्रानुदात्तशब्दः अविद्यमानोदात्तमनुदात्तमिति । स्वरितेप्युदात्तस्य भावात्तस्यापि निवृत्तिः, एवमपि न ज्ञायते केन स्वरेणाम्रेडितं प्रयोक्तव्यमिति, उच्यते । उदात्तस्वरितौ तावन्निषिद्धौ, न चास्वरकस्याच उच्चारणं संभवति, तत्र पारिशेष्यादनुदात्तत्वमेव भविष्यति, यद्वा ऽनुदात्ताच्कमनुदात्तम्, आम्रेडितस्या अचोनुदात्ता भवन्तीत्यर्थः । 'भुङ्क्ते भुङ्क्त इति' । भुजो ऽनवन इत्यात्मनेपदं, तस्य तास्यनुदात्तेदित्यनुदात्तत्वं, श्नमः प्रत्ययस्वरः, तस्य श्नसोरल्लोप इत्यल्लोपे उदात्तनिवृत्तिस्वरेण भुङ्क्तेशब्दोन्तोदात्तः, द्विर्वचनेन परस्यानुदात्तत्वं, पशुशब्दः कुप्रत्ययान्तोन्तोदात्तः ॥

[1] विषयविभागार्थमिति पा॰ २ पु॰ ।

Digitized by Google

"नित्यवीप्सयोः"॥ नित्ये चार्थे वीप्सायां च यद्वर्तते इत्यनेन सप्तमीयमर्थनिर्देशार्थेति दर्शयति, प्रयोक्तृधर्मभूता वीप्सा न च सा ग्रामादिशब्दैरभिधीयते, पचतिपचतीत्यत्रापि वस्तुतो यन्नित्यं न तत्तिङन्तेनाभिधीयते, नित्यत्वं तु द्विर्वचनद्योत्यं, तस्मादयमर्थः, नित्यत्वे द्योत्यत्वेन विषयभूते वीप्सायां च द्योत्यत्वेन विषयभूतायामिति, एषैव च तत्र वृत्तिः, शब्दस्य यद्वृत्ता तद्विषयता, यदि पुनरेषा षष्ठी स्यात्स्वरूपविधिः प्रसज्येत, ततश्च नित्यं क्रीडाजीविकयोः, पादशतस्य संख्यादेर्वीप्सायामित्यादिनिर्देशो नोपपद्यते। यदि तु नित्यार्थविषयः शब्दो नित्य इत्युच्येत वीप्सार्थविषयश्च वीप्सेति तदा षष्ठ्यामप्यदोषः, गौणत्वप्रसङ्गात्तदनाश्रितं, नित्यशब्दोयं सर्वकालावस्थायिनो य आत्माकाशादयो येषामुत्पत्तिविनाशौ प्रयोक्तृभिर्नोपलभ्येते तेष्वपि प्रयुज्यमानो दृश्यते, नित्य आत्मा, नित्य आकाशो, नित्या द्यौरिति, आभीक्ष्ण्येऽपि नित्यं प्रहसितो नित्यं प्रजल्पित इति, तत्राविशेषादुभयोरपि ग्रहणादाकाशादिशब्दानामपि द्विर्वचनप्रसङ्ग इति मन्यमानः पृच्छति। 'केषु नित्यतेति'। अथ वा नित्यशब्दस्य कूटस्थलक्षण एव मुख्योऽर्थः, शब्दान्तरसन्निध्यनपेक्षत्वादाभीक्ष्ण्यं तु क्रियापदप्रयोगसमधिगम्यं गौणोऽर्थः, अविच्छेदोपलब्धिसामान्यमाश्रित्य तत्र प्रयोगात्, ततश्च गौणमुख्ययोर्मुख्ये संप्रत्यय इति कूटस्थवाचिनामेव द्विर्वचनप्रसंग इति मन्यमान आह। 'केषु नित्यतेति'। इतरोऽपि विदिताभिप्राय आह। 'तिङ्क्ष्विति'। अविशेषमेव मन्यमानः पृच्छति। 'कुत इति'। 'आभीक्ष्ण्यमिहेति'। अयमभिप्रायः। कूटस्थवचनग्रहणे तिङन्तानि न संगृहीतानि स्युः, आभीक्ष्ण्यलक्षणे तु नित्यत्वे गृह्यमाणे तल्लक्षणं द्विर्वचनं तिङन्तानां वीप्सालक्षणं तु सुबन्तानामित्युभयानुग्रहो भवति, गौणोऽपि चार्थो लक्ष्यदर्शनवशादिहाश्रीयते, यथा शीतोष्णाभ्यां कारिणि, पार्श्वेनान्विच्छतीत्यादौ, उभयविधेऽपि नित्यत्वे गृह्यमाणे तद्भाविनां सुबन्तानां स्वार्थ एव द्विर्वचनं स्यात्, न चैवं लोके प्रयोगोऽस्ति आत्मात्मेति, एवं ह्युक्ते वीप्सा प्रतीयते न तु स्वार्थः, तस्मादाभीक्ष्ण्यस्यैव ग्रहणमिति भवत्याभीक्ष्ण्यमिह नित्यता,

सा च तिङन्तव्ययकृत्सु चेति, एतत् कुतस्त्यमित्याह । 'आभीक्ष्ण्यं च क्रियाधर्म इति' । पौनःपुन्यमाभीक्ष्ण्यं, तच्च साध्यरूपायाः क्रियाया एव संभवति न द्रव्यस्य, यद्यपि क्रियाया अपि तस्या एव व्यक्तेः पुनः क्रिया न संभवति, तज्जातीयस्य तु पुनः करणं घटादिष्वपि सम्भवति, तथापि क्रियाविषयैव पुनः क्रियत इति प्रतीतिः, तद्वचनाश्च पुनःपुनराभीक्ष्ण्यं नित्यमित्यादयः शब्दाः यथा युगपत्पृथगित्यादयः शब्दाः क्रियाविषयास्तद्वत्, क्रिया च तिङन्तव्ययकृत्सु प्राधान्येनाभिधीयते, पाचकादिषु तु साधनं प्रधानं पाकादिष्वपि तु सिद्धता प्रधानं न क्रिया, कीदृशी पुनः सा क्रिया यस्या आभीक्ष्ण्यं धर्म इत्याह । 'यां क्रियामिति' । 'तत्कृत्यमिति' । नित्यशब्दस्य नपुंसकलिङ्गत्वात्तद्वृत्ति तच्छब्दस्यापि नपुंसकत्वं यथा यद्यो यत्कर्म यो चेत्स कर्तेत्यत्र पुंस्त्वम् । 'लुनीहिलुनीहीति' । क्रियासमभिहारे लोट्, यद्यपि तिङन्तस्य दर्शितमुदाहरणं तथाप्यस्त्यत्र वक्तव्यमिति पुनरुपन्यासस्तद्दर्शयति । 'क्त्वाणमुलोर्लोटश्चेति' । समानकर्तृकयोरित्यादिनार्थान्तरेपि क्त्वाणमुलौ विहितौ, लोडपि विध्याद्यर्थान्तरे विहित इति सामान्यशब्दत्वाद् द्विर्वचनापेक्षा एव पौनःपुन्यं प्रकाशयन्ति । 'यङ् तु तन्निरपेक्ष इति' । स हि क्रियासमभिहारं न व्यभिचरति, तत्किं तस्य तद्द्योतने द्विर्वचनापेक्षया । ननु यङन्तस्यापि कदाचिद् द्विर्वचनमिष्यते, तत्कथमित्याह । 'यदा त्विति' । द्विविधो हि क्रियायाः समभिहारः, पौनःपुन्यं भृशार्थश्च, तत्र यदा द्विर्वचनं भवति तदा भृशार्थे यङ्, तस्यैव पौनःपुन्यं द्योतयितुं द्विर्वचनं तस्य यङा ऽद्योतितत्वादित्यर्थः, वृत्तौ च सामान्यशब्दस्यापि क्रियासमभिहारशब्दस्य भृशार्थत्वके क्रियासमभिहारे वृत्तिर्विज्ञेया । 'पापच्यत इति' । सकला अवयवक्रियाः स्वयमेव संपादयन् पुनःपुनः पचतीत्यर्थः । लोडपि भवति पापच्यस्व पापच्यस्वेत्येवायं पापच्यत इति, अथ नित्यतायां द्विर्वचनमुच्यमानं धातुमात्रस्य कस्मान्न भवति, स हि क्रियावचनः । उच्यते । परिगृहीतसाधना क्रिया व्यवहारोपयोगिनी भवति, तदनभिधानाच्च धातुमात्रस्य द्विर्वचनाभावः, पदाधिकारो वाक्यपदीयः,

Digitized by Google

अनेनैवाभिप्रायेण पूर्वमुक्तमथ पदस्येत्येव कस्मान्नोच्यतइति, अस्मिन्पक्षे सगतिकस्य द्विर्वचनं वक्तव्यमेव, एतेनैतदपि निरस्तं, भृशार्थे सावकाशो यङ् पौनःपुन्ये परेण द्विर्वचनेन बाध्यतइति, कथमिदं निरस्तं, पदस्य द्विर्वचनं धातोर्यङ्, तत्रान्तरङ्गस्य न युक्तो बाध इति व्याख्यातं, नित्यं वीप्सां व्याख्यास्यन् विषयं तावत्पृच्छति । 'क्वेति' । 'सुप्सु वीप्सेति' । सुपामेव तदभिव्यक्तौ समर्थत्वात्, एवं विषयमुक्त्वा स्वरूपं पृच्छति । 'का पुनरिति' । यदि सामान्येन व्याप्तुमिच्छा वीप्सा तदा चिकीर्षतीत्यादौ द्विर्वचनप्रसङ्गः करोत्यादिक्रियाभिः कटादीनां या व्याप्तुमिच्छा तद्वाचित्वात्, इतरो योगरूढिर्वीप्साशब्द इति अभिप्रायेणाह । 'व्याप्तिविशेषविषयेति' । प्रयोक्तुरिच्छेत्यनेन नाभिधेया वीप्सा गृह्यते वीप्सावाचिनो द्वे भवत इति । किं तर्हि प्रयोक्तृधर्मः, आबाधवत् । गतगत इत्युक्ते प्रियस्य चिरगमनादिना पीडितो वाक्यं प्रयुङ्क्तइति प्रतीयते, तेन चिकीर्षतीत्यादौ द्विर्वचनं भवतीति दर्शयति, व्याप्तिविशेषविषयेत्युक्तं स तु विशेषो नाद्याप्यभिहित इति पुनः पृच्छति । 'का पुनरसाविति' । 'नानावाचिनामित्यादि' । पूर्ववृत्तिषु पठितं वीप्सालक्षणं तद् व्याचष्टे । 'नानाभूतार्थवाचिनामिति' । तत्र नानावाचिनामिति वचनाज्जातिवाचिनां द्विर्वचनं न भवति, ब्राह्मणो न हन्तव्यः संपन्नो व्रीहिरिति, नहि जातिशब्दा नानाभूतार्थवाचिनो जातेरेकत्वात्, युगपद्ग्रहणात्क्रमविवक्षायां द्विर्वचनाभावः, यथास्मिन्वनेयं वृक्षः शोभनोयं वृक्षः शोभन इति क्रमेण शोभनत्वप्रतिपादने बहूनामपि शब्दानां प्रयोगो भवति, तथैकशेषेपि न भवति, अस्मिन्वने वृक्षाः शोभना इति, नानार्थवाचित्वाभावात् पृथगर्थपर्यवसायित्वं हि नानावाचित्वं, न चैकशेषे तदस्ति, अत एव तत्र न प्रत्येकं विधेयसंबन्धो नियमेन प्रतीयते, नहि ब्राह्मणेभ्यः शतं देयमित्युक्ते नियमेन प्रत्येकं शतं देयं भवति, ब्राह्मणाय ब्राह्मणाय शतं देयमित्युक्ते प्रत्येकं शतं दीयते, तत्कस्य हेतोः, पृथगर्थपर्यवसायितया पृथग्दे[१]यस्य संबन्धात्, यदा

१ विधेयस्येति इं॰ पु॰ पाठः ।

च पृथगर्थपर्यवसायिता तदा यावन्तोऽर्था अभिधित्सितास्तावन्तः शब्दाः पृथगेकैकपर्यवसायिनः प्रसक्तास्तेषामनेन निवृत्तिः क्रियते वीप्सायां द्वे एव प्रयोक्तव्ये न तु बहु प्रयोक्तव्यमिति. कथं तर्हि निवृत्तानामर्थः प्रतीयते, यावता प्रत्येकपर्यवसायित्वे द्वयोरेव प्रतीतिः स्यात्, उच्यते ।

एकशेषे यथान्येषामर्थः शिष्टेन गम्यते ।

तद्वदत्र द्विशेषेपि शिष्टाभ्यामितरार्थधीः ॥

यथैव हि वृत्तौ वृत्ता वृत्त्येकशेषविषये शिष्यमाणमेव निवृत्तानामप्यर्थमाह तथेहापि शिष्यमाणे द्वे एव विवक्षितानर्थानभिधास्यतः, न च बहुवचनप्रसङ्गः, परिगृहीतैकत्वानां बहूनामभिधानात्, अन्यथा प्रत्येकसंबन्धस्याप्रतीतेः द्विर्वचनादुत्तरकालं सत्यामपि बहुत्वावगतावप्रातिपदिकत्वाद्बहुवचनाभावः, यथा पश्य मृगो धावतीति, सत्यपि दर्शनक्रियापेक्षे कर्मत्वे द्वितीयाभावः, एकैकमित्यत्र तु सत्यपि बहुव्रीहिवद्भावेन प्रातिपदिकत्वे परिगृहीतैकत्वस्यैकार्थस्य वीप्सायोगादन्तरङ्गत्वादेकवचनं भवति न बहुवचनं, बहुत्वप्रतीतेर्बहिरङ्गत्वात्, अस्यैवार्थस्यैकैकस्य प्राचामिति निर्देशो लिङ्गमित्यलमियता । तदयमत्रार्थः[१] । नानाभूतार्थवाचिनां यान्यधिकरणानि वा[२]च्यानि तेषां सहविवक्षितानां पृथक्संख्यायुक्तानां प्रत्येकं क्रियया गुणेन वा व्याप्तुमिच्छा वीप्सेति, क्रियागुणग्रहणं द्रव्यस्याप्युपलक्षणम् । 'ग्रामेग्रामे पानीयमिति' । द्रव्यव्याप्तेरुदाहरणम्, । 'पुरुषःपुरुषो निधनमुपैतीति' । निधनं मरणं, जातस्य हि ध्रुवो मृत्युरित्यर्थः, अपर आह साम्नां भक्तिविशेषो निधनं, सर्व एव ऋत्विजो निधनमुपयन्तीत्यर्थ इति । 'यत्तिङन्तमित्यादि' । अत्र विप्रतिषेधो हेतुः, द्विर्वचनस्यावकाशो यत्र नित्यता विवक्षिता न प्रकर्षः, पचतिपचतीति, प्रकर्षप्रत्ययस्यावकाशो यत्र प्रकर्ष एव विवक्ष्यते न नित्यता, पचतितरामिति, उभयविवक्षायामुभयप्रसंगे परत्वाद् द्विर्वचनं, ततः पुनः प्रसङ्गविज्ञानात्प्रकर्षप्रत्ययः, यद्वा प्रतियोग्यपेक्षः प्रकर्षा-

१ अर्थस्थितिरिति पा॰ २ पु॰ ।
२ वाच्यानीति इ॰ पु॰ नास्ति ।

Digitized by Google

वर्धिरङ्गः, पौनःपुन्यमन्तरङ्गमिति पूर्वं द्विर्वचनम् । 'इह त्वित्यादि' । इष्टिरेवेयं, यद्वा प्रकर्षयुक्ता एवाढ्यादय आनयनक्रियायामुपयुज्यन्तइति, तद्गुप्रकर्षो एव वीप्स्यन्ते । किञ्च कृतद्विर्वचनात्तरपि सत्याढ्यतरमिति भवितव्यं, तथा च प्रकर्षोर्थो गम्येत न वीप्सेति पूर्वं प्रकर्षयोगः ॥

"परेर्वर्जने" ॥ 'परिपरिन्निगर्त्तेभ्य इति' । अपपरी वर्जनइति कर्मप्रवचनीयसंज्ञा, पञ्चम्यपाङ्परिभिरिति पञ्चमी । 'परिषिञ्चतीति' । परिः सर्वतो भावे, उपसर्गात्सुनोतीत्यादिना षत्वम् । 'परेर्वर्जनइत्यादि' । परेर्वर्जनइत्यत्रासमास इति वक्तव्यं वेति च वक्तव्यं, तेनासमासएव भवति, तत्रापि विकल्पेन, अन्यत्र तु नैव भवति तदाह । 'समासे त्विति' । 'तेनैवोक्तत्वादिति' । ननु वाक्ये तावद्वर्जनं परेरेव द्योत्यं समासेपि परिः संनिहितस्तत्किं समासस्य वर्जने शक्तिः कल्प्यते, तत्राहुः । जहत्स्वार्था वृत्तिरिति पक्षे समास एव वर्ज्यमानोपसर्जने वर्जने वर्तते, अवयवो त्वनर्थकाविति, यदा त्वजहत्स्वार्था वृत्तिरिति पक्षस्तदा वाक्ये केवले वर्जने परिर्वर्तत्तइति तत्रैव द्विर्वचनं भवति, समासे तु वर्ज्यमानार्थोस्कन्दनात्र द्व्यर्थः परिः केवले वर्जने वर्त्ततइति द्विर्वचनाभावः ॥

"प्रसमुपोदः पादपूरणे" ॥ प्रादीनां समाहारद्वन्द्वः, द्वन्द्वाच्चुदषहान्तात्समाहारइति समासान्तस्तु न भवति समासान्तविधेरनित्यत्वात् । उदित्यं जातवेदसमिति क्वचिदुदाहृतं, तदयुक्तं, नह्यत्र द्वितीय उच्छब्दः किं तर्हुशब्दः । 'सामर्थ्याच्छन्दस्येवैतद्विधानमिति' । किं सामर्थ्यमित्याह । 'भाषायामिति' । नात्र द्विर्वचनस्य किञ्चित् द्योत्यं केवलं पादपूरणमेव कार्ये, न चैवंविधस्य भाषायां प्रयोगोस्ति, क्वचित्तु सामर्थ्यादित्यादि न पठ्यते ॥

"उपर्यध्यधसः सामीप्ये" ॥ उपर्यादीनां योर्थस्तस्य सामीप्यद्योतनाय द्विर्वचनं, सामीप्यं प्रत्यासत्तिः, तच्च देशकृतं कालकृतं वा । 'उपर्युपरि दुःखमिति' । कालकृतस्योदाहरणं, दुःखस्य सामीप्येनोपरिष्टादित्यर्थः, उभसर्वतसोरित्युपसंख्यानेन द्वितीया । 'उपर्युपरि ग्राममिति' । ग्रामस्य सामीप्येनोपरिष्ठाद्देशइत्यर्थः । 'अध्यधि ग्राममिति' । अधिरुपरिभावे, यथा समिधं स्रुचं चाध्यधि गार्हपत्यं कृत्वा इति । 'अधोधो ग्राम-

Digitized by Google

मिति’। ग्रामस्य सामीप्येनाधस्ताद्दुवरत्यर्थः। यथा नवानधोधो बृहतः पयोधरानिति।

उपर्युपरि पश्यन्तः सर्व एव दरिद्रति।
अधोधो दर्शने कस्य महिमा नोपजायते॥

इति तु वीप्सायां द्विर्वचनम्। ‘उपरि चन्द्रमा इति’। अत्र भूगतमपेक्ष्योपरिभावस्य सामीप्यं नास्ति। ‘उपरि शिरस इत्यादि’। नहि वस्तुसत्तैव शब्दव्युत्पत्तेः प्रधानं कारणं किं तर्हि विवक्षा, सा चेह नास्ति शिरस उपरिष्टाद्घटं धारयति नाधस्तादिति ह्यत्र विवक्षितं, सामीप्यं तु वस्तुतः संभवति॥

“वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु”॥ ‘एकार्थपदसमूहो वाक्यमिति’। यथाह भगवाञ्जैमिनिरर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति। क्वचित्त्वेकतिङ्पदसमूहो वाक्यमिति पठ्यते एका तिङ्विभक्तिर्यत्र स एकतिङ्, क्वचित्तु न किञ्चिदपि वाक्यलक्षणं पठ्यते। ‘असूयासंमतिकोपकुत्सनभर्त्सनेषु यदि तद्वाक्यं भवतीति’। यद्यपि वाक्यादेरिति समासे गुणीभूतं वाक्यं तथाप्यसूयादीनां तेनैव संबन्धः, असूयादिषु यद्वाक्यं तदादेरिति, न तु प्रधानेन वाक्यादिनाऽऽमन्त्रितेन, प्रयोक्तृधर्मा ह्यसूयादयो नाभिधेयधर्मास्ते च वाक्येनैव द्योत्यन्ते नामन्त्रितेन। उदाहरणेषु संनतावनुकम्पायां कन्, इतरच्च कुत्सिते कः, रिक्तं शून्यं छत्रमित्यर्थः, शक्तियष्टिशब्दाभ्यां तद्वृत्त्योः स्त्रियोर्वर्तमानाभ्यां कुत्सिते कः, एवं हि कुत्सनं संबोधनं च समीचीनं भवति। ‘भर्त्सने त्वित्यादि’। यद्यपि भर्त्सने पर्यायेणेति वचनात्पूर्वस्यापि तत्र पर्यायेणाप्लुतो भवति तथापि भर्त्सने यदुक्तमिहोदाहरणं तदधिकृत्येदमुक्तमाम्रेडितस्यैवेति। ‘शोभनः खल्वसि माणवकेति’। अत्र माणवकशब्दस्य द्विर्वचनं न भवति, ननु च नानसूयन् कुत्सयते न चाकुपितो भर्त्सयते, ततः कोपासूययोर्द्विर्वचनं विधीयमानं भर्त्सनकुत्सनयोरपि सिद्ध्यति, कारणत्वेन तत्रापि कोपासूययोर्भावात्, ततश्च नार्थः कुत्सनभर्त्सनग्रहणेन, नैतदस्ति॥

गुरवो हि हितैषित्वादकुप्यन्तोऽपि भर्त्सनम्।
कुर्वते भर्त्स्यमानास्तु कुपितान्मतियन्ति तान्॥

विनाप्यसूयया कुत्सां कुर्वन्तीति पृथक्कयोः ।
निर्देशः सूत्रकारेण विहितः सूक्ष्मदर्शिना[१] ॥
सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः ।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ॥

अभिप्राये दुष्टे लालनेपि दोषा भवन्ति, विपर्यये तु ताडनेपि गुणा इत्यर्थः ॥

"एकं बहुव्रीहिवत्" ॥ अत्र यदि केवलो बहुव्रीहिवद्भावोऽनिर्दिष्टविषयोनेन विधीयेत ततश्चेहापि प्राप्नोत्येक इति, ततश्च सुब्लुक् स्यात्, अस्तु बहुव्रीहिवद्भावादपरः सुः प्रभविष्यति, नैव चात्र सुब्लुक् प्राप्नोति, एक इत्यस्य प्रत्ययान्तत्वेनाप्रातिपदिकत्वात्, कृत्तद्धितसमासाश्चेत्यत्र च समासग्रहणं नियमार्थं न विध्यर्थमिति तेनापि नास्ति प्रातिपदिकत्वम् । इह तर्ह्येकेति पुंवद्भावः प्राप्नोति, स्यादेतत्, द्वे इत्यधिकाराद् द्विर्वचनसंनियोगेन विधीयमानो बहुव्रीहिवद्भावस्तदभावादिह न भवतीति, अथ तदपि द्विर्वचनं ते[२]न विधीयमानमत्र कस्माच्च भवति, तस्माद्वक्तव्योस्य विषय अत आह । 'एकमित्येतच्छब्दरूपं द्विरुक्तमिति' । सत्यं, द्वे इत्यनुवर्त्तते, न च तेन द्विर्वचनं विधीयते किं तर्ह्यन्येन, विहितमनूद्य तत्र बहुव्रीहिवद्भावो विधीयते, क्व चान्येन द्विर्वचनं विहितं, वीप्सायां, यदि पुनर्वीप्साग्रहणमनुवर्त्य तत्र बहुव्रीहिवद्भावो विधीयते, नैवं शक्यम् । बहुव्रीहिवद्भावेन द्विर्वचनं बाध्यते, अथ यदि वीप्सायां द्वे इत्येवमुभयमनुवर्त्य द्विर्वचनं बहुव्रीहिवद्भाव इत्युभयमनेन विधीयते न दोषो भवति, वृत्तिकारस्तु किमनया वीप्साग्रहणानुवृत्त्येति द्वे इत्येवान्ववीवृतत् । 'सुब्लोपपुंवद्भावाविति' । यद्यप्येतौ बहुव्रीहेर्धर्माविति नोच्येते तथापि तत्र दृष्टावित्येतयोरतिदेशः, क्वचित्तु वृत्तावेवायमर्थः पठ्यते । 'एकैकमिति' । एकमित्यस्य द्विर्वचने द्वयोरपि सुपोर्लुकि सति पुनर्बहु-

१ सूक्ष्मबुद्धिनेति पा॰ २ पु॰ ।
२ अनेन विधीयमानमिति इं । पु॰ पा॰ ।

Digitized by Google

व्रीहिवद्भावादेव सुप् । 'एकैकयेति' टाबन्तात्तृतीया, तदन्तस्य द्विर्वचनं, सुब्लुकि पुंवद्भावेन पूर्वभागे टापो निवृत्तिः, कः पुनरत्र टापो निवृत्तौ सत्यामसत्यां वा विशेषः, अवग्रहेऽस्ति विशेषः । ऐकैकयेत्येक-एकयेति भवति, उत्तरत्र च गतगतेत्यादौ पुंवद्भावस्य प्रयोजनं, ननु यदि यच्च यावच्च बहुव्रीहौ दृष्टं कार्यं तस्य सर्वस्यातिदेशः सर्वनामसंज्ञाप्रतिषेधः स्वरः समासान्त इत्येते विधयः प्राप्नुवन्त्यत आह । 'सर्वनामसंज्ञाप्रतिषेधस्वरसमासान्ता इति' । 'न बहुव्रीहाविति प्रतिषेधो न भवतीति' । तत्र हि विभाषा दिक्समासे बहुव्रीहावित्यतो बहुव्रीहावित्यनुवर्त्तमाने पुनर्बहुव्रीहिग्रहणं बहुव्रीहिरेव यो बहुव्रीहिस्तत्र यथा स्याद्बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूदिति, तेन संज्ञाप्रतिषेधस्तावत्समासाधिकारे बहुव्रीहौ विज्ञायते । 'नन, सुसुइति' । आबाधे चेति द्विर्वचनं, नन करोति सुसु जागर्तीत्यादिवाक्यैकदेश उदाहृतः । 'नञ्सुभ्यामित्यन्तोदात्तत्वं न भवतीति' । तत्र हि वनं समास इत्यतः सिंहावलोकितन्यायेन समास इति संबध्यते, बहुव्रीहाविदमेतत्तद्भ्य इत्यतो बहुव्रीहाविति च, तत्र बहुव्रीहेः समासत्वाव्यभिचारे पुनः समास इति विशेषणं समासाधिकारविहितबहुव्रीहिपरिग्रहार्थम् । अथात्र नञ्सुभ्यामित्यन्तोदात्तत्वे सति कः स्वरो भवति, अत्र हि चत्वारः स्वराः प्राप्नुवन्ति, समासान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरो नञ्सुभ्यामित्यन्तोदात्तत्वमाम्रेडितानुदात्तत्वं च, तत्र नञ्सुभ्यामित्ययं स्वरो न भवतीत्युक्तम् । आम्रेडितानुदात्तत्वमपि न भवति, किं कारणं, कार्यातिदेशे तावदिदमेव कार्याणां विधायकमिति परत्वादाम्रेडितानुदात्तत्वं बहुव्रीहिस्वरेण बाध्यते, शास्त्रातिदेशेऽपि विरुद्धस्य स्वाश्रयस्यातिदेशेन निवर्त्तनाच्चैवाम्रेडितानुदात्तत्वं भवति बहुव्रीहौ प्रकृत्येत्यत्र च न समासग्रहणमनुवर्त्तते, तेन बहुव्रीहिवद्भावात्पूर्वपदप्रकृतिस्वरो भवन् समासान्तोदात्तत्वं बाधते । 'चरणिति' । आबाधे चेति द्विर्वचनम् । 'अकूपूरिति समासान्तो न भवतीति' । तत्र हि समासाच्च तद्विषयादित्यतः समासादित्यनुवर्त्तमाने पुनः समासग्रहणं समासाधिकारे विहितो यः समासस्तत्परिग्रहार्थं, तेनातिदेशिके समासे न

Digitized by Google

भवतीति, एवमेते संज्ञाप्रतिषेधादयः समासाधिकारविहिते बहुव्रीहौ विज्ञायन्ते, वार्तिककारस्तु सर्वमेवैतद्वाचनिकं मन्यते, यदाह, सर्वनामस्वरसमासान्तेषु दोष इति, अथ ननेत्यत्र बहुव्रीहिवद्भावाल्लोपः कस्मान्न भवति उच्यते, उत्तरपदइति वर्तते। नञ इति च कार्यिणोर्निर्देशः, तत्र साक्षाच्छिष्टेन कार्यित्वेन नञो निमित्तभावो बाध्यते, यथा मद्रुह्रदो भद्रह्रद इत्यत्र रेफस्याचो रहाभ्यां द्वे इति द्विर्वचनप्रसङ्गे उक्तं, नेमौ रहौ कार्यिणौ किं तर्हि निमित्तमिमौ द्विर्वचनस्येति, अयं तु परिहारः पूर्वेष्वपि यथासंभवं द्रष्टव्यः ॥

"आबाधे च" ॥ 'आबाधनमाबाध इति'। भावे घञ्[1]। 'प्रयोक्तृधर्मो नाभिधेयधर्म इति'। अभिधेयधर्मत्वे हि बाधितपीडितादिशब्दानामेव द्विर्वचनं स्यान्न गतादिशब्दानां प्रयोक्तृधर्मत्वे हि तेषामपि भवतीति व्याप्तिर्भवति। 'तत्र वर्तमानस्येति'। द्विर्वचने सत्याबाधस्य गम्यमानत्वाद्गतादिशब्दानां तत्र वृत्तिः, न तु तदभिधानात्। 'प्रियस्य चिरगमनादिनेति'। प्रयोक्तृधर्मत्वमाबाधस्य दर्शयति, आदिशब्देन नाशादेर्ग्रहणम् ॥

"कर्मधारयवदुत्तरेषु" ॥ 'कोपधाया अपि कर्मधारयवद्भावात्पुंवद्भावो[2] भवतीति'। तेन बहुव्रीहिवद्भावे प्रकृते कर्मधारयवद्भावो विधीयते इति भावः। 'समासान्तोदात्तत्वमनेन विधीयतइति'। कार्यातिदेशपक्षइदमुक्तम्। शास्त्रातिदेशे तु यद्यप्याम्रेडितानुदात्तत्वमेव परं तथापि न तद्भवति, विरुद्धस्य स्वाश्रयस्यातिदेशेन निवर्तनात् ॥

"प्रकारे गुणवचनस्य" ॥ 'प्रकारो भेदः सादृश्यं चेति'। उभयत्रापि प्रकारशब्दस्य दृष्टत्वात्, भेदे तावद्बहुभिः प्रकारैर्भुङ्क्ते, बहुभिर्भेदैर्विशेषैरिति गम्यते, सादृश्ये ब्राह्मणप्रकारोऽयं माणवकः, ब्राह्मणसदृश इति गम्यते। 'तदिहेति'। तदिति वाक्योपन्यासे, अव्ययं वा सप्तम्यर्थवृत्ति, तत्रेत्यर्थः। 'सादृश्यं प्रकारो गृह्यतइति'। द्विरुक्तात्त-

१ भावे घञित्यारभ्य प्रयोक्तृधर्मत्वे इत्येतत्पर्यन्तो ग्रन्थो नास्ति २ पु०।

२ कोपधाया अपि हि पुंवद्भावात्पुंवत्कर्मधारयेति पुंवद्भावो भवतीति मु० मू० पा०।

Digitized by Google

स्यैव प्रतीतेः। अत्र चाभिधानस्वाभाव्यं हेतुः। 'प्रकारे वर्तमानस्येति'। द्विर्वचनप्रवृत्तिद्वारेण तद्द्योतनात्तत्र वृत्तिः। 'अपरिपूर्णगुण इत्यर्थ इति'। कथमेतदित्याह। 'परिपूर्णगुणेनेति'। यस्य पूर्णं पाटवं यः पटुकार्याणि करोति तेन यदा न्यूनपाटवमुपमीयते तदा पटुपटुरिति प्रयोगो भवति, तेनार्थादपरिपूर्णगुण इत्यर्थो भवति। 'जातीयरानेन द्विर्वचनेन बाधनं नेष्यतइति'। तद्विधो द्विविधस्यापि प्रकारस्य ग्रहणं मन्यते, अयादित्यस्तु तथाह, सामान्यस्य भेदको विशेषः प्रकार इति, इष्टिश्चेयम्। अन्यथा ब्राह्मणजातीय इत्यादावगुणवचने पटुजातीय इत्यादौ गुणवचनेऽपि सादृश्यादन्यत्र भेदे चरितार्थस्य जातीयरो गुणवचनेषु सादृश्ये बाधः स्यात्। 'पटुर्देवदत्त इति'। परिपूर्णगुण एवात्र पटुशब्दो वर्तते न तत्सादृश्यान्न्यूनगुणे। 'अग्निर्माणवक इति'। अग्निशब्दो वह्नौ वृत्तः सोऽयमतिसादृश्यनिमित्तादभेदोपचारान्माणवके वर्ततइति द्रव्ये पूर्वं वृत्तः संप्रत्यपि द्रव्यवचन इति गुणवचनो न भवति, एवं गौर्वाहीक इत्यत्र गोशब्दः सास्नादिमति वर्तित्वा वाहीके वर्तमानः। नन्वग्निशब्दोऽग्निगततैक्ष्ण्यं माणवके प्रतिपादयितुं प्रयुज्यतइति गुणवचन एव, तथा गोशब्दोऽपि सास्नादिमद्गतजाड्यप्रतिपादनाय वाहीके प्रयुज्यतइति गुणवचन एवेत्यत आह। 'यद्यप्यत्राग्निशब्द इति'। अग्निशब्दो माणवके प्रयुज्यमानो यादृशमग्नेस्तैक्ष्ण्यं परश्वादिभ्यो व्यावृत्तं तदेव प्रतिपादयति न तैक्ष्ण्यमात्रमिति। गोशब्दोऽपि यादृशं गवां जाड्यं मनुष्येभ्यो व्यावृत्तं तदेव प्रतिपादयति, आश्रयविशेषसंबन्धाद्धि तैक्ष्ण्यजाड्यादिकं भिद्यते, तदेतदाह। 'मुख्यार्थसंबन्धादवधृतभेदं तैक्ष्ण्यजाड्यादिकमिति'। शब्दान्तरसंनिधिमन्तरेण शब्दश्रवणमात्राद्योऽर्थः प्रतीयते स मुख्यः। विपरीतो गौणः, अवधृतभेदं, निश्चितभेदम्। आदिशब्देन पैङ्गल्यभारवहनादेर्ग्रहणम्। अर्थान्तरे, गौणे माणवके वाहीके च। 'सर्वदा गुणवचनो न भवतीति न द्विरुच्यतइति'। प्रकारे वर्तमानस्येत्येव गुणवचनत्वे सिद्धे पुनर्गुणवचनग्रहणात्सर्वदा गुणवचनस्येत्याश्रीयते, न चायं सर्वदा गुणवचनः प्राक् प्रकाराद् द्रव्यवचनत्वात्। अत्र केचित्। गुणमुक्तवान् गुणवचन इति

Digitized by Google

गुणोपसर्जनद्रव्यवचनस्य द्विर्वचनमिच्छन्ति। अन्ये तु गुणवचनस्य गुणिवचनस्य चाविशेषेणेच्छन्ति, शुक्लशुक्लं रूपं शुक्लशुक्लः पट इति नवंनवं प्रीतिरहो करोतीत्यत्र वीप्सायां द्विर्वचनम्, अनेन तु द्विर्वचने सुब्लोपप्रसङ्गः, यथा नवनवावनवायुभिरादध[1] इति। 'मूलेमूलइति'। एकस्य वस्तुनो वेणुदलादेरेकमेव मुख्यमग्रं मूलं च इतरेषां तु भागानामापेक्षिको मूलाग्रव्यपदेशः, स्थौल्यसौक्ष्म्ये अपि नैकरूपे किं तर्हि यथामूलमुपचीयते स्थौल्यं यथाग्रं च सौक्ष्म्यमिति वीप्साया अत्रासंभवः। इह[2] मूलेमूले पथि विटपिनामिति वीप्सायामेव द्विर्वचनम्। 'स्वार्थे इति'। अर्थान्तराभावप्रदर्शनार्थमिदमुक्तम्। 'अस्मात्कार्षापणादिति'। अनेकमाषसमुदायः कार्षापणः तत्र न सर्वे माषा दानक्रियया व्याप्यन्ते किं तर्हि द्वावेवेति वीप्साया अभावः। ननु यथा द्वावेव माषौ निर्ज्ञातौ दानक्रियया व्याप्येते तदा माषंमाषं देहि इति वीप्सायां द्विर्वचनं भवति, एवमनेकमाषसमुदायादपि कार्षापणाद् द्वयोरेवास्ति दानक्रियाव्याप्तिः। नैवम्। तत्र हि संनिहितस्यार्थस्य न कस्य चिद्वर्जनमस्ति इह तु वर्जनमस्ति यतो माषंमाषमसौ दत्त्वा शेषं पृच्छति किमनेन क्रियतामिति, तदिदमुक्तम्। 'अत्र हीति'। 'माषं देहि द्वौ माषौ देहि त्रीन्माषानिति'। अनेन यथेच्छं देहीति विवक्षया अवधारणाभावं दर्शयति। 'चापल इति'। प्रयोक्तृधर्मोऽयं तस्मिन् सत्यत्ये सुबन्तस्य तिङन्तस्य च सर्वस्य वाक्यगतस्य पदस्य द्विर्वचनं नावश्यमिति नेदं शास्त्रीयं द्विर्वचनं किं तर्हि परप्रत्यायनायानेकस्य स्वतन्त्रपदस्य प्रयोग इत्यर्थः, एवं च कृत्वा आम्रेडितानुदात्तत्वाभावाद्यथाप्राप्तः स्वरो भवति। 'क्रियासमभिहारइति'। लोडन्तस्यैवेदं द्विर्वचनं न यङन्तस्य, लोटः समुच्चयेऽपि विधानात् क्रियासमभिहाराभिव्यक्तौ केवलस्य सामर्थ्याभावात्, यङ् तु क्रियासमभिहारविषयएवेति तद्द्योतने स्वयं सामर्थ्यान्नापेक्षते द्विर्वचनम्। 'आभीक्ष्ण्यइति'। पूर्वेण वाक्येन क्रियासमभिहारसंशब्दनेन यो विहि-

१ रादध इति ई॰ पु॰ पाठः।
२ तु इत्यधिकं ई॰ पु॰।

तस्सदन्तस्यैव द्विर्वचनमिति शङ्कमानं प्रत्यस्य वाक्यस्योपन्यासः। 'नित्यइत्येव सिद्धमिति तत्रोक्तमिति'। नित्यंवीप्सयोरित्यत्र हि त्क्वाणमुलोर्लोटश्च द्विर्वचनसापेक्षाणामेव पौनःपुन्यप्रकाशने शक्तिरित्युक्तम्। अन्ये त्वाहुः। पुनःपुनःक्रियाया उत्पादनमाभीक्ष्ण्यं, तथाहि। भुक्त्वाभुक्त्वा व्रजतीत्युक्ते सत्यपि क्रियाया विच्छेदे पुनर्भुङ्क्ते पुनः पुनःपुनर्व्रजतीति क्रियावृत्तिः प्रतीयते, नित्यता तु क्रियाया अविच्छेदः, यथा जीवतिजीवतीत्युक्ते जीवत्येवायमिति प्र[1]तीयते न त्वसौ जीवित्वा म्रियते मृत्वा च जीवतीति जीवनमेव त्वविच्छिन्नं प्रतीयते तस्मादाभीक्ष्ण्यं नित्यमिति भि[2]न्नावेतावर्थाविति। अपर आह। भुक्त्वा व्रजतीत्यादौ त्क्वाणमुलन्तस्य तिङन्तस्य च द्विर्वचने प्राप्ते आभीक्ष्ण्यसंशब्दनेन यो विहितस्तदन्तस्य यथा स्यात्तिङन्तस्य मा भूदिति नियमार्थमिदमिति। 'डाचीति'। विषयसप्तमीयं, तेनानुत्पन्नएव डाच्यकृतटिलोपस्य पटदित्यादेर्द्विर्वचनं, ततो 'ऽव्यक्तानुकरणादि' ति डाचि टिलोपः, नित्यमाम्रेडिते डाचीति पररूपत्वम्। अपर आह। इदमेवाच्छब्दस्य पररूपविधानं लिङ्गं डाचीति परसप्तम्यामपि टिलोपात्पूर्वं द्विर्वचनं भवतीत्यस्यार्थस्येति। तदसत्। पतदित्यादौ टिलोपादुत्तरकालमप्यच्छब्दस्य संभवात्। 'द्वितीया करोतीति'। कृञो द्वितीयेत्यादिना डाच्, तर्हि डाचि द्विर्वचनं वक्तव्यं, न वक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति डाच्यव्यक्तानुकरणस्य द्विर्वचनं भवतीति, यदयं नित्यमाम्रेडिते डाचीति पररूपत्वं शास्ति। 'पूर्वप्रथमयोरिति'। पूर्वप्रथमइत्येतयो द्विर्वचनं भवति, क्व, अर्थातिशयविवक्षायाम्। अनयोर्योर्थस्तस्यातिशये विवक्षिते। 'आतिशायिकोपि दृश्यतइति'। द्विर्वचनेन बाधे प्राप्ते वचनम्, अतिशयशब्दोऽनुशतिकादिषु द्रष्टव्यः, केचित्त्वर्थभेदादातिशायिकस्याबा[3]ध्यत्वमाहुः। तथाहि। पूर्वतरं भुङ्क्ते इत्युक्ते किमात्मसाध्यक्रियान्तरापेक्षं भोजनस्य पूर्वत्वमथ भोक्तान्तरसाध्यभोजनक्रि-

१ 'प्रतीयतइत्यारभ्य तस्मादाभीक्ष्ण्यं नित्य' मित्येतत्पर्यन्त पाठ इं॰ पु॰ नास्ति।
२ द्वावेतावर्थाविति इं॰ पु॰ पाठः।
३ बाधमाहुरिति इं॰ पु॰ पाठः।

यापेक्षमिति संदेहो भवति, एवं पूर्वतरं पुष्यतीत्युक्ते ऽयमर्थो गम्यते, न तावदेव किसलयितो यावदेव पुष्यतीति, पूर्वं पूर्वं पुष्यतीत्यस्मात्त्वन्येभ्यः पुष्पितृभ्योतिशयेन पूर्वं पुष्यतीत्यर्थः प्रतीयते । 'डतरडतमयोरिति' । डतरडतमान्तस्य द्वे भवतः, समेनाढ्यत्वादिना धर्मेण संप्रधारणायां विषये । 'स्त्रीनिगदे भाव इति' । भावो भूतिः, संपत्, आढ्यता, निगद्यत इति निगदः, नौ गदेत्यादिना कर्मण्यप्, स्त्रीशब्देन स्त्रीलिङ्गः शब्दोऽभिधीयते, स्त्रिया निगदः, कर्तरि षष्ठ्याः समासः, स्त्रीलिङ्गशब्दाभिधेयायां भूतौ वर्तमानस्येत्यर्थः । 'कतरा कतरा अनयोराढ्यतेति' । किं साधनसंपत्कृता उत भाग्यकृतेति प्रश्नार्थः । 'कर्मव्यतिहार इति' । क्रियाव्यतिहारे इत्यर्थः, तत्र द्विर्वचनं नित्यं समासवद्भावस्तु बहुलं, तत्रान्योन्यशब्दे समासवद्भावाभावात्सुब्लुक् समासान्तोदात्तत्वं च न भवति । आम्रेडितानुदात्तत्वं भवति, इतरेतरशब्दे तु नित्यः समासवद्भाव इति सुब्लुक्समासस्वरौ भवतः । 'अन्योन्यमिति' । द्वितीयैकवचनान्तस्य द्विर्वचनम् । 'अन्योन्यस्येति' । षष्ठ्येकवचनान्तस्य, अन्योन्यसंबन्धिनः पुत्रादीनित्यर्थः । 'स्त्रीनपुंसकयोरिति' । उत्तरपदस्याया विभक्तेराम्भावोऽन्यथा नेकालत्वात्स सर्वस्योत्तरपदस्य स्यात्, तत्र सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पूर्वोत्तरपदयोर्द्वयोरपि पुंवद्भावे कृते पक्षे आम्विधिः, अन्याशब्दस्य तु द्विर्वचने समासवद्भावाभावाद्बहुलवचनात्स्त्रियां टापो निवृत्तिः, नपुंसके चाड्डुतरादिभ्य इत्यस्य निवृत्तिः, वार्त्तिकेषु कर्मधारयवदिति च संबध्यत इति सुब्लुगादि न भवति ॥

"प्रकृते प्रियसुखयोरन्यतरस्याम्" ॥ 'प्रियप्रियेणेति' । तृतीयैकवचनान्तस्य द्विर्वचने कर्मधारयवद्भावात्सुब्लुकि पुनस्तदेव वचनम् । अत्यन्तदयितमपि वस्त्वनायासेन ददातीत्यर्थः ॥

"यथास्वे यथायथम्" ॥ यथास्वमिति यथासादृश्य इति वीप्सायामव्ययीभावः, स्वशब्द आत्मवचन आत्मीयवचनो वेति दर्शयति । 'यो य आत्मेति' । ज्ञातिधनवचनस्य तु ग्रहणं न भवति, द्विर्वचनस्य तत्रासमर्थत्वात् ॥

Digitized by Google

"द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु" ॥ 'पूर्वपदस्येति'। द्वि श्रो द्वि श्रो इति स्थिते कर्मधारयवद्भावात्सुब्लुकि कृते पूर्वपदावयवभूतस्यैकारस्याम्भावः, उत्तरपदाव[1]यवस्य चात्वं निपात्यते, चकारादपुंसकत्वं क्वचिदेकवद्भावश्च निपात्यते, समासान्तोदात्तत्वं तु कर्मधारयवद्भावाद्भवति। 'तच रहस्यं द्वन्द्वशब्दवाच्यमिति'। द्वाभ्यां निर्वृत्ते रहस्ये योगरूढिरेषेत्यर्थः, । द्वन्द्वं मन्त्रयन्त इति'। द्वौ द्वौ भूत्वा मन्त्रयन्त इत्यर्थः। एवं हि तद्रहस्यं भवति। 'आचतुरमिति'। आङभिविधौ, चतुर्णां पूरणे चतुःशब्दो द्रष्टव्यः, आचतुर्थादित्यर्थः। 'द्वन्द्वं मिथुनीयन्तीति'। मिथुनशब्देन मैथुनं तत्कर्म लक्ष्यते, तदिच्छन्तीति क्यच्, प्रायेण मिथुनायन्त इति क्यङन्तं पठ्यते, तत्रोपमानार्थो मृग्यः, माता पुत्रेणेत्यादिना मर्यादावचने व्यनक्ति। 'तत्पुत्रेणापीति'। एतावदेव पशूनामायुः। 'द्वन्द्वं व्युत्क्रान्ता इति'। द्वौ पक्षौ भूत्वा पृथगवस्थिता इत्यर्थः। स्वार्थे द्विर्वचनमेकवद्भावश्चेति। द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति, सादयति न्यञ्चि न्यग्भूतानि अग्राणि लानि द्वन्द्वं स्फ्यश्च कपालानि चेति द्वेद्वे इत्यर्थः। अत्र वीप्सायां द्विर्वचनम्, अम्भावादि, एकवद्भावश्च। 'द्वावभिव्यक्तौ साहचर्येणेत्यर्थ इति'। अत्र स्वार्थे द्विर्वचनमेकवद्भावादिकं सर्वं निपात्यते। 'द्वन्द्वं युद्धमिति' अत्रापि वीप्सायां द्विर्वचनम्। 'द्वन्द्वानि सहन्त इति'। शीतमुष्णं चेत्येकं द्वन्द्वं, सुखदुःखे चापरं, क्षुत्तृष्णे चापरम्, अत्रापि स्वार्थे द्विर्वचनमेकवद्भावादि, तत्रैकशेषवशाद्बहुत्वम्। 'चार्थे द्वन्द्व इति'। द्व चार्थनिर्दिष्टे पदे समस्ते द्वन्द्वः, अत्रापि स्वार्थे द्विर्वचनादि, पुंस्त्वं च ॥

"पदस्य" ॥ 'प्रागपदान्ताधिकारादिति'। अपदान्तस्य मूर्द्धन्य इत्यत्र तु प्रकरणे विरोधपादानानाधिक्रियते। 'पचन्तौ यजन्ताविति'। संयोगान्तस्यापि लोपो न भवति, एवं राजानावित्यत्र नलोपो न भवति, प्रशामावित्यादौ मो नो धातोरिति नत्वं न भवति। अनन्तरेषु योगेष्वामन्त्रितादेः सुबन्तस्य तिङन्तस्य च पदस्यैव कार्यविधानात्तेषामुल्ल-

[1] अवयवस्येति इं॰ पु॰ नास्ति।

ह्नुनं,[1] न च समर्थपरिभाषोपस्थानं तेषु प्रयोजनम्, अन्तरेणाप्येतं वस्तुतः पदकार्यत्वादेव सिद्धेः, किं च समानवाक्ये निघातयुष्मदस्मदादेशा इति वक्ष्यते, क्त्वादीनि स्ववयवस्य भत्वेपि समुदायस्य पदत्वाश्रयेणोच्यन्त एव, वक्तरि दोग्धरीति । तस्माच्च भसंज्ञकव्यावृत्तिरपि प्रयोजनं, षष्ठी स्थाने-योगेति वचनात्पदस्येति स्थानषष्ठी, ततश्च 'उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्ये' त्यस्यायमर्थो भवति, उदात्तस्वरितयोर्यो यण् ततः परो योनुदात्तस्तदन्तस्य पदस्य स्वरितत्वमलोन्त्यस्य भवतीति, ततश्चात्रैव स्यात् कुमार्याविति, कुमार्य इत्यत्र न स्यात्, सकारो ह्यत्र पदस्यान्तः, हल्स्वरप्राप्तौ च व्यञ्जनमविद्यमानवद्भवति । एवमेकादेश उदात्तेनोदात्त इत्यत्रापि अयमर्थो भवति, उदात्तानुदात्तयोर्य एकादेशस्तदन्तस्य पदस्यालोन्त्यस्यादेशो भवतीति, ततश्चेहैव स्याद्वृत्रावित्रिति, वृत्रानित्यत्र न स्यात्, नकारो ह्यत्र पदस्यान्त्य इत्याशङ्क्याह । 'वक्ष्यमाणवाक्यापेक्षयेति' । अयमभिप्रायः । अधिकारोयं परार्थः, परिभाषापि परार्था, ततश्च गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यादिति न्यायेन नात्र स्थानेयोगपरिभाषोपतिष्ठते, यत्र त्वस्या अधिकारो वक्ष्यमाणेषु वाक्येषु तेष्वेवोपस्थानं, तत्र विशेषणविशेष्यभावे कामचाराद्यणेकादेशस्वरयोः पदस्येत्यनुवृत्तं कार्यविशेषणार्थं न तु कार्यप्रतिपत्त्यर्थं, तेन पदावयवयोरनुदात्तैकादेशयोः स्वरविधानादनन्त्ययोरपि भवति, संयोगान्तलोपादौ तु संयोगादिना पदस्य विशेषणात् स्थानषष्ठी, तस्मादुच्यमानानि वाक्यान्यपेक्ष्य पर्यालोच्य पदस्येति षष्ठ्या अर्थो व्यवस्थाप्यः, न त्वेतत्सूत्र[2]पर्यालोचनयेति । व्यवस्थामेव दर्शयति । 'क्वचिदिति' । [3]यद्येषा स्थानषष्ठ्येव स्यान्न लोपः प्रातिपदिकान्तस्येत्यत्रान्तग्रहणमनर्थकं स्यात्, तद्धि पदान्तस्य यथा स्यात् पदावयवस्य माभूदित्येवमर्थं स्थानषष्ठ्यां त्वलोन्त्यस्येत्यस्य सिद्धत्वादन्तग्रहणमनर्थकं स्यात्, तस्मादन्तग्रहणात्क्वचिद्विशेषणषष्ठ्यपि विज्ञायते ॥

1 क्षतमित्यधिकम् इं॰ पु॰ ।
2 मात्रेत्यधिकं इं॰ पु॰ ।
3 किंत्वेत्यधिकं इं॰ पु॰ ।

Digitized by Google

ज्योतिष्टोमे अध्रिगुप्रैषे श्रूयते षड्विंशतिरस्य वङ्क्रय इति । अयं मन्त्रः श्वेतमालभेत वायव्यां कृष्णामित्यत्र द्विपशुके अतिदेशेन प्राप्तः तत्र संदेहः षड्विंशतिरस्येति समग्रं द्विवारं पठितव्यमुतानूहेनैव पाठः उत वचनमात्रस्योह उतास्येत्यस्याभ्यास उत समस्यवचनमिति तत्र प्रथम-पूर्वपक्षमाह । षड्विंशतीति । पशुगणे द्विपशुकादियागे षड्विंशतिशब्दः अभ्यासेन आवृत्त्या पठितव्य इति शेषः । अत्र हेतुमाह । तत्प्रकृतित्वा-द्गुणस्य प्रविभक्तत्वात् । तत्प्रकृतित्वात् अग्नीषोमीयप्रकृतित्वात् पशुग-णस्य । नन्वेतावता ऽभ्याससिद्धिः कथमिति चेत् प्रकृतौ एकपशोः षड्विं-शतिवङ्क्र्यभिधानमिह षड्विंशतिरूपो गुणः प्रतिपशु विभक्तः अत आवृत्त्या प्रकृतिवत्संपादनीयमिति भावः । नन्वविकारेण प्रकृतिवत्सकृ-देव पाठो ऽस्त्वत आह । अविकारे त्विति । अविकारे प्रकृतिवत्पाठे तासां वङ्क्रीणामकार्त्स्न्येन एकदेशेन अभिसंबन्धः मन्त्रजन्यज्ञानेन संबन्धः स्यात् । अयं भावः पशुद्वये मिलित्वा द्विपञ्चाशद्वङ्क्रयः विकृतौ प्रकृतौ एकस्मिन्पशौ यावन्तो वङ्क्रयः तावद्विषयं मन्त्रजन्यज्ञानमिह द्विपञ्चाश-न्मध्ये सकृत्पाठपक्षे षड्विंशतिवङ्क्रीणामेव मन्त्रज्ञानविषयत्वात्कृत्स्ना-स्ता वङ्क्रयः ज्ञानेनासंबन्धा इति । ननु कृत्स्नवङ्क्रीसंबन्धार्थं द्विपञ्चाशद्वङ्क्रयः इत्यूहो ऽस्त्वत आह । न समासः स्यात् समासः पशुद्वयवङ्क्रीरेकी-कृत्य मिलितसंख्यावाचकपदोच्चारणं न विकारात् प्रकृतौ अश्रवणाच्छ-ब्दादत्यन्तविलक्षणशब्दत्वात्सर्वाभिर्वङ्क्रीभिः असंयोगात् असंबन्धात् । अयं भावः प्रकृतावस्येति पशुं निर्दिश्य षड्विंशतिवङ्क्रीणामभिधानमि-हापि तथैव प्राप्तं द्विपञ्चाशद्वङ्क्रीभिरित्युक्तेन केनापि पशुना संबन्धं भवेत् । किं तु द्वित्वविशिष्टपशुना तथा च प्राकृतधर्मस्यात्यन्तबाध इति ॥ १ ॥

अभ्यासे ऽपि तथेति चेत् ॥ २ ॥

अभ्यासपक्षे ऽप्येष दोष इति शङ्कते । अभ्यास इति । तथा अप्राकृतत्वमभ्यासस्यापि प्रकृतावभावादिति भावः ॥ २ ॥

न गुणादर्थकृतत्वाच्च ॥ ३ ॥

Digitized by Google

समाधत्ते नेति । अभ्यासे नैव दोषः अर्थेन कृत्स्नवङ्क्रीसंबन्धलाभफलेन कृतत्वात् अभ्यासस्य । समासस्य तदर्थत्वे ऽपि तत्पक्षे दोषमाह गुणात् गुणत्वात् । अयं भावः प्रकृतौ षड्विंशतिरिति शब्दो धर्मो प्रधानमभ्यासः तद्धर्मः गुणः एवं च तव मते प्राकृतप्रधानीभूतशब्दबाधः मन्मते प्रधानं रक्षित्वा तत्राप्राकृतगुणयोजनमिति ॥ ३ ॥

समासे ऽपि तथेति चेत् ॥ ४ ॥

शब्दस्य मुख्यं प्रयोजनमर्थस्मृतिः तच्च द्विपञ्चाशच्छब्दप्रयोगे ऽपि कृत्स्नवङ्क्रीस्मरणमुपपन्नं प्राकृतशब्दबाधस्य सूर्याय जुष्टं निर्वपामीत्यादौ दृष्टत्वादित्यभिप्रायेण शङ्कते । समासेति । समासे ऽपि पशुद्वयसंबन्धिवङ्क्रीवृत्तिसंख्यायाः मिलितायाः पाठे ऽपि तथा कार्त्स्न्येन वक्ष्यन्तरिति चोदकशास्त्रानुग्रहो भवतीति ॥ ४ ॥

नासंभवात् ॥ ५ ॥

आशङ्कां निरस्यति नेति । असंभवात् । समस्य कथनासंभवात् । अयं भावः समस्य वचने प्रयोगवचनो ऽनुगृहीतः मम तु चोदको ऽनुगृहीतः प्रयोगवचनचोदकयोः मध्ये चोदकस्य पूर्वप्रवृत्तत्वेन बलवत्त्वात्प्रयोगवचनस्यैव निवृत्तिरिति ॥ ५ ॥

स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ॥ ६ ॥

साधकान्तरमाह । स्वाभिरिति । प्रकृताग्नीषोमीये स्वाभिः स्वसंबन्धिवङ्क्रीभिः वचनं विशेषितत्वं पशौ दृश्यते तथेह स्यात् अभ्यासपक्षे । अयं भावः प्रकृतौ एकपशौ षड्विंशतिवङ्क्रीः विशेषणत्वेन दृश्यन्ते अभ्यासपक्षे तदनुग्रहः समासपक्षे समुदायस्य विशेष्यत्वेन एकपशुप्राधान्यबाध इति ॥ ६ ॥

वङ्क्रीणां तु प्रधानवत्त्वात् समासेनाभिधानं स्यात्प्राधान्यमभिगोस्तदर्थत्वात् ॥ ७ ॥

सिद्धान्तमाह वङ्क्रीणामिति । वङ्क्रीणां प्राधान्यमभिगो तदर्थत्वात् । वङ्क्र्युद्धरणार्थत्वात् । अयं भावः । अभ्यासपक्षे अस्येति पदषड्विंशतिपदयोः संबन्धः प्रधानं स च पदद्वयसमभिव्याहारलभ्यः एकवा-

Digitized by Google

रमुच्चारणे एकप्रधानलाभः अपरप्रधानलाभार्थं पुनरुच्चारणमित्यभ्याससिद्धिर्वाच्या स पक्षो न संबन्धप्रतीतेरदृष्टार्थतापत्तेः । सिद्धान्ते वङ्क्रीप्राधान्ये तेन साकं संख्यैतच्छब्दार्थयोरन्वये एतत्पशुसंबन्धिन्यः षड्विंशतिसंख्यावङ्क्रय इति ज्ञाने तदुद्धरणसौकर्यं दृष्टार्थमतो वङ्क्रीणामेव प्राधान्यमिति । अतः उक्तरीत्या प्रधानत्वात् वङ्क्रीणां बाधकाभावात् । समासेनाभिधानम् । अदृष्टार्थत्वदूषणेन सर्वे पक्षाः निरस्ताः द्वितीयपक्षे दृष्टार्थत्वं स्पष्टम् । तृतीयपक्षे संख्याप्राधान्यमेतत्पशुसंबन्धि वङ्क्रीवृत्तिः षड्विंशति संख्येति तत्राप्यदृष्टार्थता चतुर्थपक्षे पशुप्राधान्यं तत्प्रतीतये अस्येति शब्दमात्रस्य अभ्यासः षड्विंशतिसंख्याकवङ्क्रीकः पशुरिति तत्पक्षे पशुप्रत्यायनस्यादृष्टार्थत्वमेवेति तेन दूषणेन सर्वे पराहता बोध्याः ॥ ७ ॥

तासां च कृत्स्नवचनात् ॥ ८ ॥

अत्रैव साधकान्तरमाह । तासामिति । उत्तरवाक्यमेवं, ता अनुष्ठोच्यावयतादिति । ताः प्रयत्नेन उद्धर्तव्या इति तासां वङ्क्रीणां कृत्स्नवचनात् कार्त्स्न्येन उद्धरणवचनात् वङ्क्रीणां प्राधान्यं यदि वङ्क्र्यो न प्रधानं तर्हि ता इत्यनेन वङ्क्रीग्रहणं न स्यात् । सर्वनाम्नां प्रधानपरामर्शकत्वादिति भावः ॥ ८ ॥

अपि त्वसन्निपातित्वात् पत्नीवदाम्नातेन अभिधानं स्यात् ॥ ९ ॥

द्वितीयपूर्वपक्षमुत्थापयति । अपि त्विति । अयं पक्षान्तरज्ञापकः आम्नातेन प्राकृतरूपेणैव अभिधानं पशुगणे ऽपि स्यात् । असन्निपातित्वात् । मन्त्रस्मारितक्रियाया असन्निकृष्टत्वात् । अयं भावः । जीवति पशौ अध्रिगुप्रैषः । वङ्क्र्युद्धरणं च पशुसंज्ञपनानन्तरम् । इत्थं च मन्त्रेण स्मृत्वा व्यवहितोत्तरमनुष्ठानासंभवात् प्रकृतावेवास्या दृष्टार्थत्वं क्लृप्तम् । यथा पत्नीं सन्नह्येति मन्त्रस्य बहुपत्नीकप्रयोगे अविवक्षितमेकवचनमदृष्टार्थं प्रयुज्यते तद्वदिहाप्यदृष्टार्थं मन्त्रपाठः प्रकृतौ विकृतावपि तथैव पाठ इति ॥ ९ ॥

Digitized by Google

विकारस्तु प्रदेशत्वाद्यजमानवत् ॥ १० ॥

अविकृतपक्षं दूरीकरोति । विकार इति । विकारः ऊहः प्रदेशत्वात् शमितुः ज्ञानजनकशब्दे मध्यप्रदेशवर्तित्वात् । यथा प्रकृतौ यजमान हविर्निर्वप्स्यामीत्येकवचनान्तं कुलाययज्ञादौ द्वियजमानके यजमानौ हविर्निर्वप्स्यामीति यजमानसामान्यस्य ज्ञानार्थत्वं तथा ॥ १० ॥

अपूर्वत्वात्तथा पत्न्याम् ॥ ११ ॥

यच्च पत्नीं सन्नह्येति दृष्टान्तेन मन्त्रस्य अदृष्टार्थत्वमुक्तं तत्रोत्तरमाह । अपूर्वेति पत्न्यां पत्नीशब्दोत्तरैकवचनप्रयोगे अपूर्वत्वात् । अपूर्वार्थत्वात् यथा ऊहाभावः । अयं भावः पत्नीशब्दस्य एकवचनान्तस्य दर्शपूर्णमासप्रकरणे पाठेन यावद्दर्शपूर्णमासाङ्गत्वं कृतं तदनुसारेण पाशाधिकरणन्यायेन वचनस्याविवक्षिततया न केवला प्रकृतिः प्रयोक्ष्यति शास्त्रादादृष्टार्थफलं तदुच्चारणम् । इह तु शमितुः कृत्स्नवङ्क्र्युद्धरणज्ञानरूपदृष्टफलसंभवात्तल्लाभस्योहमन्तरा ऽभावादूहः । यथा लोके राजाज्ञां श्रुत्वा तमर्थं कालान्तरे स्मृत्वा करोति तथा कालान्तरानुष्ठाने ऽपि उक्तवाक्यज्ञानस्य उपयोगसंभवादिति ॥ ११ ॥

आम्नातस्त्वविकारात्संख्यासु सर्वगामित्वात् ॥ १२ ॥

तृतीयपक्षमुत्थापयति । आम्नात इति । प्रकृतौ प्रातिपदिकशब्दो यथा ऽऽम्नातस्तथा विकारादनूहेन पठितव्यः । ननु कृत्स्नवङ्क्र्यभिधानं नेत्यत आह । संख्यासु संख्यावाचकपदेषु एकवचनादिषु विकार इति दशमसूत्रादनुवृत्तिः मण्डूकप्लुत्या इत्थं च षड्विंशरनयोर्वङ्क्रय इति एवमूहेनापि सर्ववङ्क्रीगामित्वात् कार्त्स्न्यलाभः ॥ १२ ॥

संख्या त्वेवं प्रधानं स्याद्वङ्क्रयः पुनः प्रधानम् ॥ १३ ॥

इमं पक्षं दूषयति । संख्येति । एवं वचनोहपक्षे संख्याप्रधानं स्यात् न चैतदिष्टं वङ्क्रीणां तु प्रधानत्वादिति सूत्रे वङ्क्र्यतिरिक्ते प्राधान्यनिरासं कृत्वा पुनः वङ्क्रयः प्रधानमित्युक्तम्* ॥ १३ ॥

* अनाम्नातवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः, इदं सूत्रं शाबरभाष्ये ऽधिकं दृश्यते । तद्व्याख्यानं तत एवावगन्तव्यम् ।

Digitized by Google

अभ्यासो वा विकारात्स्यात् ॥ १४ ॥

चतुर्थपक्षमुत्थापयति । अभ्यास इति । अभ्यासः केवलमयं पदाभ्यासः स्यात् । अविकारात् प्राकृतषड्विंशतिशब्दस्य प्रत्ययविशिष्टस्याविकारात् प्रकृतौ श्रयमाणवर्णानामबाधादिति भावः ॥ १४ ॥

पशुस्त्वेवं प्रधानं स्यादभ्यासस्य तन्निमित्तत्वात्तस्मात्समासशब्दः स्यात् ॥ १५ ॥

इमं पक्षं दूषयन् सिद्धान्तमुपसंहरति । पशुरिति । एवमयं पदाभ्यासपक्षे पशुः प्रधानमयमयमिति अभ्यासे यो यः पशुः षड्विंशतिवङ्क्रीकरति वाक्यार्थः अभ्यासस्य अयंपदाभ्यासस्य पशुनिमित्तत्वात्तावत्पशुबोधार्थत्वात् । तत्र पशोः प्राधान्यं वाच्यम् । तस्मात् अस्यापि पक्षस्य अदृष्टार्थतारूपदूषणेन पूर्वमेव दूषितत्वात् समासशब्दः द्विपञ्चाशच्छब्दः स्यात् ॥ १५ ॥

चतुस्त्रिंशद्वाजिन इत्यनेन आश्वमेधिकसवनीयाश्वस्य चतुस्त्रिंशद्वङ्क्रिरूपविशेषवचनम् । अधि॰ २ ।

अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥ १६ ॥

सन्त्यश्वमेधे त्रयः पशवः सवनीयाः अश्वस्तूपरो गोमृग इति । तत्र वङ्क्रीः अश्वस्य चतुस्त्रिंशत् तूपरगोमृगयोः षड्विंशतिः एवं स्थिते तत्र संदेहः अश्वस्य चतुस्त्रिंशद्वचनं तूपरगोमृगयोः पूर्ववत्समस्यवचनमुत त्रयाणां समस्यवचनमिति तत्र भाष्यानुसारेण पूर्वपक्षमाह । अश्वस्येति वचनात् चतुस्त्रिंशच्छब्दस्य वङ्क्रय इति पृथक् तूपरगोमृगयोस्तु समस्यद्विपञ्चाशदिति ॥ १६ ॥

आश्वमेधिकसवनीयाश्वस्य, न चतुस्त्रिंशदित्यनेन समस्तागा एव ऋचो निषेधः अधि॰ ३ ।

तत्प्रतिषिध्य प्रकृतिः नियुज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥ १७ ॥

सिद्धान्तमाह । तदिति । न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयादिति वचनेन तद्वैशेषिकं चतुस्त्रिंशदिति वचनं प्रतिबध्य

Digitized by Google

प्रकृतिः चोदकशास्त्रविहितं समस्यकथनं नियुज्यते विधीयते । अयं भावः प्रकृतौ पार्श्वद्वयस्थानीयस्थीनि समस्य षड्विंशतिशब्देनोक्तं तथाऽत्रापि पशुत्रयास्थ्नामभ्यासस्य त्र्यंपदाभ्यासस्य पशुनिमित्तत्वाद्भाव-स्पशुबोधार्थत्वात्समासेन षडशीतिरेषां वङ्क्रय इति वक्तव्यमिति । सा प्रकृतिः प्राकृतशब्देन नियुज्यमानोऽपि पक्षे इति शेषः चतुस्त्रिंशतः संख्याविशेषस्य वाच्यत्वं यस्मिन्पदे तत् चतुस्त्रिंशत्पदसंख्याविशेषनिरू-पितशक्तिमत्पदमिति' फलितम् । तस्माद्वारयतीति शेषः । चोदकशास्त्रं वैशेषिकशब्दं पक्षे निवर्तयति न नित्यमिति सूत्रतात्पर्यम् ॥ १७ ॥

ऋग्वा स्यात् आम्नातत्वाद् अविकल्पश्च न्यायः ॥ १८ ॥

पक्षान्तरमाह । ऋगिति । प्रतिषेधानन्तरं या वैशेषिकी प्राप्तिः सा समस्य न प्रयोजयति । षडशीतिरिति । किं तु तत्स्थाने उक्तनि-खिला ऋगेव विधीयते आम्नातत्वात् । प्रकरणपाठात् अस्मिन्पक्षे विकल्पो नास्ति बहुदोषः अतः विकल्पो न्यायः ॥ १८ ॥

तस्यां तु वचनादैरवत्पदविकारः स्यात् ॥ १९ ॥

ऋचो विधिमङ्गीकृत्य उक्तनिषेधस्य तद्धटकचतुस्त्रिंशत्पदमात्रनि-षेधपरत्वमाह । तस्यामिति । तस्यामृचि वचनात् उक्तनिषेधवचनात् पदविकारः चतुस्त्रिंशत्पदस्थाने षड्विंशतिपदप्रक्षेपः स्यात् । गिरापदस्था-नैरवत् । चतुस्त्रिंशत्पदेन ग्रहणे चतुस्त्रिंशत्पदवति लक्षणयास्तेन ऋचो निषेधः पदमात्रनिषेध इति भावः ॥ १९ ॥

सर्वप्रतिषेधो वा संयोगात्पदेन स्यात् ॥ २० ॥

ऋचोऽपि निषेधसंभवादाह । सर्वेति सर्वस्या ऋचः प्रतिषेधः स्यात् । पदेन ऋचः प्रथमपदेन संयोगात् । निषेधवाक्येन ग्रहणात् । सर्वत्र आदिपदेन प्रतीकग्रहणेन सर्वग्रहणं लक्षणं विनैव संभवति । गिराशब्दस्य ऋगादित्वाभावात्प्रतीकरूपत्वं न संभवतीति भावः ॥ २० ॥

अग्नीषोमीयपशावुरुकशब्देन द्रव्याभिधानम् । अधि० ४ ।

वनिष्ठुसन्निधानादुरूकेण वपाभिधानम् ॥ २१ ॥

Digitized by Google

तत्रैव वनिष्ठुमस्य मारादिष्मुलूकं मन्यमान इति श्रुतं तत्रोलूक-शब्दस्य उलूकार्थत्वमुत वपार्थत्वमिति संशये इतयोरैक्यस्य रोमाणि लोमानीत्यत्र दर्शनादुलूकार्थत्वमिति पूर्वपक्षे सिद्धान्तमाह । वनिष्ठुरिति । उलूकेण उलूकशब्देन वपाभिधानं वनिष्ठोः पश्ववयवस्य सन्निधानाद्वपायाः । अयं भावः । उलूकपरत्वे उलूकं मन्यमान इत्यनेन उलूकसादृश्यबुद्धिप्रतिषेधो वाच्यः तथा सति अदृष्टार्थः प्रतिषेधः वपापरत्वे वपावनिष्ठोः सन्निधानात् वपाभ्रान्त्या वपोद्धरणवेलायां वनिष्ठोरपि छेदनं कुर्यात् । भ्रान्तिनिवृत्तिरूपदृष्टफलं संभवतीति ॥ २१ ॥

अध्रिगो प्रशंसा बाहू इत्यत्र प्रशंसाशब्दस्य प्रशंसापरत्वम् । अधि॰ ५ ।

प्रशंसा ऽस्यभिधानम् ॥ २२ ॥

तत्रैव प्रशंसा बाहू इति श्रुतं तत्र प्रशंसाशब्दो ऽसिपरः प्रशंसापरो वेति संशये पूर्वपक्षमाह । प्रशंसेति पदेन असेरभिधानमसिं शासमाघत्तादिति ब्राह्मणवचनात् ॥ २२ ॥

बाहुप्रशंसा वा ॥ २३ ॥

सिद्धान्तमाह । बाहूति । प्रशंसा प्रशस्तो इति बाहुविशेषणम् । न तृतीया बाहुप्रशंसा स्तुतिरनेन क्रियते ॥ २३ ॥

अध्रिगो श्येनमस्येत्यादौ श्येनादिशब्दानां कार्त्स्न्यवचनत्वम् । अधि॰ ६ ।

श्येनशलाकश्यपकवषोरुस्रेकपर्णेष्वाकृतिवचनं प्रसिद्धसन्निधानात् ॥ २४ ॥

तत्रैव श्येनमस्य वक्षः कृणुतादिति श्येनपदस्य सादृश्यमर्थ उत कार्त्स्न्यमित्यत्र पूर्वपक्षमाह । श्येनेति । मन्त्रस्थश्येनादिपदेष्वाकृतिवचनमाकृत्यर्थकत्वम् । इत्थं च वक्षःकर्तनादिसाधनेन श्येनाकृति यथा स्यात् तथा कृणुतात् छिन्नतामिति मन्त्रार्थः । एवमग्रे ऽपि प्रसिद्धेन श्येनादिपदेन सन्निधानात् वक्षःपदस्य सन्निधानाच्च श्येनवक्षसोः साक्षादभेदासंभवादिति भावः । शलाकाकश्यपकवषादिपदानामपि बोध्यम् ॥ २४ ॥

कार्त्स्न्यं वा स्यात् तथाभावादध्रिगोश्च तदर्थत्वात् ॥ २५ ॥

Digitized by Google

सिद्धान्तमाह कार्त्स्न्यमिति । श्येनपदं कृत्स्नार्थकं लक्षणया कृत्स्नं वक्षः कृणुतादिति तदर्थः कृत्स्नवक्षश्छेदने सति तथा श्येनाकृतेर्भावात् स्थितत्वात् अध्रिगोः शमितुः तदर्थत्वात् । कृत्स्नावयवोद्धरणज्ञानार्थत्वात् श्येनादिशब्दानाम् । अयं भावः । गात्रं गात्रमस्यानूनं कृणुतादित्यनेन प्राप्तं यदुद्धरणं तस्य लक्षणरूपं श्येनेति यदि वक्षः उद्धृतं सत् श्येनाकृतिः दृश्येत तदा कृत्स्नवक्षं भवति अतः श्येनाकृति यथा तथा कृणुतादिति तस्य ज्ञानार्थत्वादिति ॥ २५ ॥

दर्शपौर्णमासाग्निलोपे प्रायश्चित्तरूपज्योतिष्मत्या अननुष्ठानम् । अधि० ७ ।

प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात् तदर्थो हि विधीयते ॥ २६ ॥

आधानादिसंस्कृतस्याहवनीयस्य सर्वकर्मार्थं नित्यं धारणं च विहितं गतश्रियो नित्यं धार्य इति तस्य नाशे पूर्वोक्तेष्टिरनुष्ठेया न वेति संशये सर्वार्थत्वादग्निहोत्रस्यापि सर्वकर्ममध्ये सत्त्वात्तदर्थमपि धारणमिति निमित्तसत्त्वात् नैमित्तिकेष्टिरनुष्ठेयेति पूर्वपक्षे सिद्धान्तमाह ॥ २६ ॥

धार्योद्धाने प्रायश्चित्तरूपज्योतिष्मत्यननुष्ठानम् । अधि० ८ ।

धारणे च परार्थत्वात् ॥ २७ ॥

धारणइति । पूर्वसूत्रात् प्रायश्चित्तं न विद्यतइत्यनुवर्तते उक्तार्थे हेतुमाह । परार्थत्वात् उद्धरणस्य सर्वक्रत्वर्थत्वात् । केवलमग्निहोत्रार्थमुद्धृताग्न्यनुगमनमेव निमित्तमिति भावः । यद्वा धारणं सर्वार्थं भवतु उद्धरणात्कर्मैवेति ॥ २७ ॥

क्रियार्थत्वादितरेषु कर्म स्यात् ॥ २८ ॥

नन्वियमिष्टिरग्नावेवादृष्टविशेषं जनयन् अग्नेः संस्कारः एवं सति अग्निहोत्रार्थमनुद्धृतेऽप्यग्नौ पर्युक्षणपरिसमूहनादिरूपसंस्कारस्तथाऽयमपि स्यादेवेत्यत आह । क्रियेति इतरेषु पर्युक्षणादिषु क्रियार्थत्वात् क्रियानिमित्तः अग्निसंस्कारः तदर्थत्वात् कर्मानुष्ठानं स्यात् । अयं भावः पर्युक्षणादिकर्मणां नित्यवच्छ्रुतत्वेन अनित्यमनुष्ठानं युक्तम् ।

Digitized by Google

यस्य तु उपरागे निमित्ते स्नानेनात्मसंस्कारवत् नैमित्तिकत्वेन निमित्ताभावे अनुष्ठातुमशक्यत्वादिति भावः ॥ २८ ॥

दर्शार्थोद्धरणस्यामन्त्रकत्वम् । अधि॰ ६ ।

न तूत्पन्ने यस्य चोदना अप्राप्तकालत्वात् ॥ २६ ॥

अग्निहोत्रे वाचा त्वा होत्रेति नित्योद्धरणमन्त्रः यत्र दर्शार्थमुद्धरणं तत्रैव अग्निहोत्रं तादृशप्रणयने मन्त्रः प्रयोज्यो न वेति संशये अग्निहोत्रस्य तत्र क्रियमाणत्वात्तदङ्गमन्त्रः पठनीय इति पूर्वपक्षे सिद्धान्तमाह । न त्विति । उत्पन्ने परार्थमुत्पन्ने ऽग्नौ यस्याग्निहोत्रस्य चोदनाविधिः तत्र स तु मन्त्रो न । अप्राप्तकालत्वात् । उक्तमन्त्रेण उद्धरणम् अधिवृत्तसूर्ये उक्तप्रणयनस्य तद्भिन्नकालत्वात् ॥ २९ ॥

प्रायणीयचरौ प्रदानधर्माणामननुष्ठानम् । अधि॰ १० ।

प्रधानदर्शनं श्रपणे तद्धर्मभोजनार्थत्वात्संसर्गाच्च मधूदकवत् ॥ ३० ॥

ज्योतिष्टोमे श्रूयते, आदित्यः प्रायणीयः पयसि चरुरिति अत्र पयः प्रदेयद्रव्यं तच्चरुवत् देवतासंबद्धमुत श्रपणार्थमेव पय इति संशये पूर्वपक्षमाह । प्रधानेति । श्रपणे पयसि श्रपणे ऽपि प्रधानदर्शनं यथा चरोः देवतोद्देशेन प्रदानं दृश्यते तद्वत् पयसो ऽपि प्रदानदर्शनमस्ति पयसा विभज्य चरुः न प्रदीयतइति भावः अतः मधूदकवत् चित्रायागे दधिमधुपयसां यथा संसर्गस्तद्वच्चरुपयसोः संसर्गात् मिलितत्वात् भोजनार्थत्वात् यागार्थत्वात् तद्धर्मे इन्द्राय प्रदेयद्रव्यं प्रकृतौ पयः तस्य ये धर्माः वत्सापाकरणादयः तद्वत्पयः ॥ ३० ॥

संस्कारप्रतिषेधश्च तद्वत् ॥ ३१ ॥

उक्तार्थे लिङ्गमप्याह । संस्कारेति । संस्कारप्रतिषेधः केषां चित्प्रदेयसंस्काराणां निषेधः तद्रूपत उक्तार्थसाधकः अयजुषा वत्सानपाकरोति अपर्यावर्तति गां दोहयतीति ॥ ३१ ॥

तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ॥ ३२ ॥

Digitized by Google

साधकान्तरमाह । तदिति तत्प्रतिषेधे तस्य पयसः प्रदेयत्वप्रतिषेधे च तथाभूतस्य पयोमिश्रितस्य द्रव्यान्तरस्य वर्जनात् । अयं भावः सर्वेऽपि द्रव्यविधयो नियमार्था इति सिद्धान्तः चरुणैव याग इति विधाने पयसः प्रतिषेधः सिद्धः यत्प्रतिषेधः तत्संयुक्तस्यापि प्रतिषेध इति यथा नित्यं पयसा सहौदनं भुङ्क्ते तत्र व्याध्यादौ निमित्ते भिषजा पयःसेवनं मा कुर्वित्युक्ते पयःसंसृष्टमोदनं त्यजति यथा ब्रह्मचारिणो मधुप्रतिषेधे मधुमिश्रितचरोरपि प्रतिषेधमिच्छन्ति तथा पयोयुक्तचरोरपि प्रतिषेधः स्यादिति ॥ ३२ ॥

अधर्मत्वमप्रदानात्प्रणीतार्थे विधानादतुल्यत्वादसंसर्गः ॥ ३३ ॥

सिद्धान्तमाह । अधर्मत्वमिति । अधर्मत्वं प्रदेयद्रव्यधर्मत्वं नास्ति अप्रदानात् प्रदेयत्वेन विध्यभावात् । पयसीति सप्तम्या प्रणीताकार्ये विधानात् प्रणीताधर्म एवेति भावः । दधि मधु घृतमापो धाना इत्यनेनातुल्यत्वादसंसर्गः दधि मधु घृतमापो धाना इत्यत्र सर्वं प्रथमान्तमिति सर्वेषां प्रदेयत्वं संसृष्टत्वं च इह तु पयसीति सप्तम्या चर्वधिकरणत्वं पयसः प्रतीयतइति वैषम्यमिति भावः ॥ ३३ ॥

परो नित्यानुवादः स्यात् ॥ ३४ ॥

अयजुषेत्यादिपरोऽर्थवादो नित्यानुवाद इत्याह । पर इति ॥ ३४ ॥

विहितप्रतिषेधो वा ॥ ३५ ॥

अथ वा शाखान्तरे यजुषा वत्सानपाकरोतीति विहितप्रतिषेध इत्याह । विहितेति ॥ ३५ ॥

वर्जने गुणभावित्वात् तदुक्तप्रतिषेधात् स्यात्कारणात्केवलाशनम् ॥ ३६ ॥

पयसः प्रतिषेधे पयोयुक्तौदनपरित्यागदृष्टान्तं परिहरति । वर्जनइति । उक्तप्रतिषेधात् । पयो मा भुङ्क्ष्वेति प्रतिषेधात् वर्जने पयः संसृष्टावर्जने पयसो गुणभावित्वात् अप्रधानत्वात् कारणात् केवलाशनं केवलौदनाशनं स्यात् भोजने ओदनं प्रधानं पयो हि गुणः नित्यमोद-

Digitized by Google

नस्य गुणत्वेन पयसः प्राप्तौ निषेधो ऽपि गुणभूतस्यैवेति इह चरुणा सह प्रदेयद्रव्यत्वेन प्राप्तं तुल्यत्वं निषिध्यते अप्रधानत्वेन संसृष्टत्वे बाधकाभाव इति भावः ॥ ३६ ॥

व्रतधर्माच्च लेपवत् ॥३७ ॥

ननु ब्रह्मचारिव्रतलोपो मधुलिप्तद्रव्यादिना परिवेषणे यथा भवति तथा निषिद्धपयःसंयुक्तचरुहोमे ऽदृष्टलोपः स्यादेवेति शङ्कते। व्रतधर्मादिति व्याख्यातप्रायमवतरणिकायाम् ॥ ३७ ॥

रसप्रतिषेधो वा पुरुषधर्मत्वात् ॥ ३८ ॥

पुरुषधर्मत्वात्तु पुरुषधर्मः रागः तेन मधोः प्राप्तत्वात्। रसप्रतिषेधः अयं मधुरस इति यावता उपलब्धिः तावतो लेपस्यापि निषेधः पयसः पयसि चरुमिति शास्त्रप्राप्तस्य संयोगस्य न निषेध इति भावः ॥ ३८ ॥

अभ्युदयेष्टौ दधिशृतयोः प्रदेयधर्मानुष्ठानम्। अधि॰ ११।

अभ्युदये दोहापनयः स्वधर्मा स्यात् प्रवृत्तत्वात् ॥ ३९ ॥

अभ्युदयेष्टौ शृते चरुं दधन्यश्चरुमिति सप्तमीश्रवणात् प्रदेयधर्मो न पूर्ववदिति पूर्वपक्षे सिद्धान्तमाह। अभ्युदयइति। अभ्युदये चन्द्रोदये निमित्ते दोहात् दधिशृतरूपद्रव्यात् अपनयः पूर्वदेवताविभागमात्र देवतान्तरसंबन्धश्च विधीयते यतः अतः प्रवृत्तत्वात् यागार्थं पूर्वमेव प्रवृत्तत्वात् स्वधर्मा स्यात् प्रदेयद्रव्यधर्मा स्यात् ॥ ३९ ॥

शृतोपदेशाच्च ॥ ४० ॥

उक्तार्थे लिङ्गमप्याह। शृतोपदेशाच्चेति। शृते पाकाश्रये इति सिद्धवन्निर्देशः प्रदेयद्रव्यएव अवकल्पते अन्यथा पयसीत्येव वदेत् न संस्कारविशिष्टमिति भावः ॥ ४० ॥

पशुकामेष्टौ दधिशृतयोः प्रदेयधर्माननुष्ठानम्। अधि॰ १२।

अपनयो वा अर्थान्तरे विधानाच्चरुपयोवत् ॥ ४१ ॥

अस्ति पशुकामेष्टिः यः पशुकामः स्यात्सो ऽमावास्यायामिष्ट्वा ये वोदिशस्तानानये सन्निमते ऽष्टाकपालं निर्वपेत् ये मध्यमाः तानिन्द्राय

Digitized by Google

प्रदाने दध्यसृदृं ये ऽभिष्ठाः तान्विष्णवे शिपिविष्टाय शृते चरुमिति अत्रापि प्रदेयधर्माः पूर्ववत्स्युरिति पूर्वपक्षे सिद्धान्तमाह । अपनयो वेति । चरुपयोवत् आदित्यः प्रायणीयः पयसि चरुरितिवत् । अर्थान्तरे अपण्य-रूपकार्यान्तरे विधानात् अपनयः इज्याधर्माभावः[1] ॥ ४१ ॥

ज्योतिष्टोमे अपणानां प्रदेयधर्माननुष्ठानम् । अधि० १३ ।

अपणानां तु अपूर्वत्वात् प्रदानार्थविधानं स्यात् ॥ ४२ ॥

पयसा मैत्रावरुणं श्रीणातीत्यत्र पयसि इज्याधर्माः सन्ति न वेति संशये पूर्वपक्षमाह । अपणानामिति । अपणानां पयःप्रभृतीनां प्रदा-नार्थं यागार्थं विधानमपूर्वत्वात् । अपणमनूद्य पयः विधीयतइति न सो-मयागस्य अपूर्वत्वात् । तस्मादिज्याद्रव्यधर्मा इति भावः ॥ ४२ ॥

गुणो वा अपणार्थत्वात् ॥ ४३ ॥

सिद्धान्तमाह । गुण इति । सोमरसस्य गुणः पयः न तुल्यं अप-णार्थत्वात् । अपणं मिश्रणं तदर्थत्वात् ॥ ४३ ॥

अनिर्देशाच्च ॥ ४४ ॥

अनिर्देशाच्चेति हेत्वन्तरं द्रव्येण देवतासंबद्धस्य मैत्रावरुणं पय इति अनिर्देशात् ॥ ४४ ॥

श्रुतेश्च तत्प्रधानत्वात् ॥ ४५ ॥

श्रुतेः सोममिति द्वितीयाश्रुतेः तस्य सोमस्य प्रधानत्वात् ॥ ४५ ॥

अर्थवादश्च तदर्थत्वात् ॥ ४६ ॥

अर्थवादः पयसैव मे सोमं श्रीणात्वित्यर्थवादः तदर्थः पयसो ऽप्रा-धान्यरूपो ऽर्थस्तद्वत् यदि पयः सोमतुल्यं तर्हि पयो मे देहीति वरं याचेतेति भावः ॥ ४६ ॥

संस्कारं प्रति भावाच्च तस्मादप्यप्रधानम् ॥ ४७ ॥

संस्कारं प्रति संस्कारविधिसंबिधिं प्रति भावात् गतत्वात् यादृ-शस्यने संस्कारा एव विधीयन्ते तन्मध्यश्रुतित्वादस्य वाक्यस्य संस्कारा-र्थत्वमेवेति भावः तस्मात्पयो ऽप्रधानं स्यात् ॥ ४७ ॥

---

१ इत उत्तरं लक्षणार्था ग्रतश्रुतिः, इति सूत्रं शाबरभाष्ये ऽधिकं दृश्यते ।

Digitized by Google

अश्वमेधे ईशानाय परस्वत इत्यनेन यागान्तरविधानम् । अधि० १४ ।

पर्यग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥ ४८ ॥

अश्वमेधे श्रूयते । ईशानाय परस्वत आलभत इति तं पर्यग्निकृतमुत्सृजतीति अत्रालभतिधातोः केवलस्पर्शार्थत्वमस्तु वा अग्रिमवाक्ये विहितोत्सर्गार्थत्वमुत प्रथमवाक्ये यागविधिरुत्तरवाक्येन शेषाङ्गनिवृत्तिविधिरिति संशये पूर्वपक्षमाह । पर्यग्नीति । उत्तरवाक्येन विहिते पर्यग्निकृतानामुत्सर्गे सति तादर्थ्यमुत्सर्गार्थत्वमालम्भस्य यथा चरुमुपदधातीति चरोरुपधानार्थत्वं तथा ॥ ४८ ॥

शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत् ॥ ४९ ॥

सिद्धान्तमाह शेषेति । शेषस्य पर्यग्निकरणोत्तरकालीनप्राकृताङ्गस्य प्रतिषेधः अर्थाभावात् उत्तरवाक्ये निष्फलत्वापत्तेः । विधेयांशस्य इतराङ्गनिषेधादन्यस्याभावादिति भावः । इडान्तवत् । आतिथ्यायामिडान्ता भवतीति इतरनिवर्तकं तथेति ॥ ४९ ॥

पूर्वत्वाच्च शब्दस्य संस्थापयतीति चाप्रवृत्ते नोपपद्यते ॥ ५० ॥

यदि च द्वितीयवाक्यस्य वैयर्थ्यभिया यागप्रतिषेधपरत्वम् । इत्थं च पर्यग्निकरणान्तं संस्कारं कृत्वा द्रव्यस्य परित्याग इति पक्षे दूषणमाह । प्रवृत्तेरिति प्रवृत्तेः द्रव्ये संस्कारप्रवृत्तेः यज्ञहेतुत्वात् देवतोद्देश्यकद्रव्यत्यागरूपप्रधानयागजन्यापूर्वकारणत्वात् तत्कारित्वात् प्रधानानुष्ठानपूर्वानुष्ठितत्वात् । प्रतिषेधे प्रधानक्रियाप्रतिषेधे संस्काराणामक्रमे अननुष्ठानं स्यात् । यथा गृहमेधीये न प्रयाजा इज्यन्ते इति प्रयाजप्रतिषेध आज्यग्रहणं प्रयाजार्थत्वेन यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तदित्यनेन प्राप्तग्रहणस्याननुष्ठानं तथा ॥ ५० ॥

क्रिया वास्यादवच्छेदादकर्म सर्वहानं स्यात् ॥ ५१ ॥

एवं परमते दण्डं प्रविश्य स्वमते उपपत्तिं साधयति क्रिया वेति । अत्र वाकारः स्वमते उपपत्तिद्योतकः । प्रथमं हेतुत्वेन पूर्वोक्तमनुवदन् स्वमतं व्यवस्थापयति । अक्रमे प्रधानानुष्ठानं सर्वस्य क्रियामात्रहानम-

Digitized by Google

नुष्ठापकं स्यादतः अतो हेनोरवच्छेद्रात्पर्यग्निकरणोत्तरादूमात्रस्य व्यवच्छेदात् द्वितीयवाक्येन प्रथमवाक्येन विहितदेवतोद्देश्यकद्रव्यत्यागरूपप्रधानस्य पर्यग्निकरणप्राक्कालिकद्रव्यसंस्कारस्य च क्रिया अनुष्ठानम् ॥ ५१ ॥

आज्येन शेषं संस्थापयतीत्यनेन कर्मान्तरविधानम् । अधि० १५ ।

आज्यसंस्थाप्रतिनिधिः स्यात् द्रव्योत्सर्गात् ॥ ५२ ॥

त्वाष्ट्रं पात्नीवतमालभते पर्यग्निकृतं पात्नीवतमुत्सृजति आज्येन शेषं संस्थापयतीति किमाज्यं पूर्वकर्मणि प्रतिनिधिभूतमुत कर्मान्तरमिति संशये पूर्वपक्षमाह । आज्येति । आज्यसंस्था आज्येन समाप्तिः प्रतिनिधिः स्यात् पूर्वद्रव्यपरित्यागात् ॥ ५२ ॥

समाप्तिवचनात् ॥ ५३ ॥

लिङ्गमप्याह । समाप्तीति । आज्येन शेषं समापयेदिति वचनात् । यदि कर्मान्तरं स्यात् आज्येन कर्मारभेदिति स्यादिति भावः ॥ ५३ ॥

चोदना वा कर्मोत्सर्गादन्यैः स्यादविशिष्टत्वात् ॥ ५४ ॥

सिद्धान्तमाह । चोदनेति । चोदना अपूर्वकर्मविधिः कर्मोत्सर्गात् पूर्वकर्मसमाप्तेः । पूर्वाधिकरणयुक्त्या द्वितीयवाक्यस्य शेषनिवर्तकत्वादिति भावः ।

ननु यागार्थकं पदं नास्तीत्यत आह । अन्यैरविशिष्टत्वात् एतद्रूपं सोमं चरुं निर्वपेत् यदाग्नेयो भवतीत्यादावपि सत्त्वेन तेभ्योऽविशेषात् तत्र यथा तथा तथेति भावः ॥ ५४ ॥

अनिज्यां च वनस्पतेः प्रसिद्धान्तेन दर्शयति ॥ ५५ ॥

लिङ्गमपि दर्शयति । अनिज्येति । अत्रैवैनाविष्टो विद्यादिति वचनमङ्गान्तरेण अनुयहं ब्रुवन् प्रसिद्धेनान्तेन चरमावयवेन वनस्पतेः दशमप्रयाजस्यानिज्यां यागाभावं दर्शयति अत एव शेषनिवृत्तिं जानीयात् ॥ ५५ ॥

संस्था तद्देवतात्वात्स्यात् ॥ ५६ ॥

समाप्तिवचनात् इत्याक्षेपस्य उत्तरमाह । संस्थेति । संस्था समाप्तिवचनम् । तद्देवतात्वात् पत्नीवद्देवताकत्वात्स्यात् । अयं भावः आज्येन शेषमिति कर्मान्तरमिति पक्षे ऽपि देवताभवणात् सन्निहित-

पत्नीवद्देवताया एव पशुपुरोडाशवद्ग्रहणम् । इत्थं च तद्देवताकत्वेन पूर्वोत्तरकर्मणोः साजात्यात् पत्नीवद्देवताकं कर्म तत्रारब्धमनेन कर्मणा समाप्तमिति साजात्यं गृहीत्वोपपन्नमिति ॥ ५६ ॥

इति श्रीजैमिनिसूत्रवृत्तौ नवमस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

विकृतौ लुप्तार्थानां प्राकृतानां बाधः ।

विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥ १ ॥

*तत्र भगवाञ्जैमिनिः षड्भिरध्यायैः प्रकृतिविचारं समाप्य सप्तमाष्टमाभ्यामतिदेशं विचार्य विकृतावतिदेशशास्त्रप्राप्तानां प्राकृतरूपेणैव प्राप्तिरुत वैरूप्येणापीत्याशङ्कायां क्व चिद्वैरूप्येणापि प्राप्त्यर्थं नवमेनोहं विचिन्त्य चोदकप्रमाणप्राप्तानां प्राकृतानां विकृतौ सर्वेषां प्राप्तिरुत कस्य चिद्बाध इति संशये पूर्वपक्षमारभते । विधेरिति । अतिदेशलक्षणेनास्योपजीव्योपजीवकभावसंगतिः सामान्यतोऽतिदेशसिद्धावेव तद्विशेषचिन्तावसरः । अतोऽतिदेशविशेषचिन्ता सामान्यातिदेशव्यवस्थामपेक्षते । ऊहेन साकमवसरसंगतिः । विधेः प्राकृतविधेः प्रकरणान्तरे विकृतौ प्रकृतिवत्कर्तव्यमित्यविशेषेणातिदेशात्सर्वं प्राकृतं कर्म विकृतौ स्यात् । इत्थं च बाधस्यावसर एव नास्तीति बाधाध्यायो नारम्भणीय इति पूर्वपक्षसूत्राभिप्रायः । यथा मैत्राबार्हस्पत्यहविषि राजसूये स्वयं दितं बर्हिः स्वयंकृत इध्म इत्यत्र प्रकृतौ यदश्वपरश्वादिसंपादनं तस्य यत्कार्यं कुशभेदनादि तदनेन प्रत्यक्षश्रुतिवाक्येन बाध्यतां तथाऽपि वचनप्राप्तस्य निवृत्त्यसंभवादश्वपरश्वादिसंपादनस्यादृष्टमेव फलं कल्पनीयम् । तथा च प्रयाजादिवदारादुपकारकत्वमेव कल्पनीयमिति भावः ॥ १ ॥

अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥ २ ॥

सिद्धान्तमाह । अपि वेति । पूर्वव्यावर्तकोऽपिवाशब्दः । स्वयं दितं बर्हिरित्यत्रैव अभिधानेन देवस्य त्वेत्यादिमन्त्रैः संस्काररूपः

* चिन्मयचुतवरजनितां वाग्देवीं नौमि तत्कृपादृष्ट्या । लब्धस्फूर्तिः कुर्वे रामेशो बाधलक्षणव्याख्याम् ॥ १ ॥ इति मङ्गलाचरणं गोन्दिकाख्यग्रन्थपुस्तके दृश्यते ।

Digitized by Google

आदानादिक्रियाकलापो यत्र इंद्रसमश्वशरश्वादिद्रव्यमर्थं तदीयपुरुषप्रय-
त्नसाध्यच्छेदनक्रियायां सत्यां क्रियेत तत्प्रयोगे योजयेत् । कुतः प्रकृतौ
अश्वपरश्वा बर्हिरच्छेति इति तृतीयाश्रुत्या तादर्थ्यात् तत्कार्यार्थत्वेन
रूपेण ज्ञापितत्वात् । इत्थं च प्रकृतौ यस्य द्रव्यस्य यत्कार्यं क्लृप्तं तस्मि-
न्कार्ये विकृतौ सत्येव तद् द्रव्यं योज्यं प्रमाणान्तरेण कार्यबाधे द्रव्यस्य
समन्त्रसंस्काररूपक्रियस्य बाध इति तदभिप्रायः ॥ २ ॥

तेषामप्रत्यक्षशिष्टत्वात् ॥ ३ ॥

ननु प्राकृतं कार्यं तस्य मा भवतु । वचनबलादवृष्टद्वारा परमा-
पूर्वं प्रति प्रयाजादिवदारादुपकारकं कुतो न भवेदित्याशङ्कां परिहरति ।
तेषामिति । तेषां मन्त्रसंस्कारक्रियाद्रव्याणामप्रत्यक्षेण आनुमानिकशा-
स्त्रेण शिष्टत्वात् । अक्लृप्तत्वात् । अयमभिप्रायः भावनायामंशत्रयाकाङ्क्षायां
किं केन कथमिति प्रकृतौ तिसृणामपि परिपूरकं प्रत्यक्षं शास्त्रमस्ति ।
विकृतौ सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामं इत्यत्र फलं करणं च श्रूयते कथं-
भावाकाङ्क्षापूरकः शब्दो नास्ति तदाकाङ्क्षायां द्वारमित्यादौ प्रकरणा-
दिना पिधानादिवत् निर्वपतिचोदनाचोदितत्वादिसादृश्यलिङ्गेनाग्निया-
गव्यापारसदृशव्यापारकेण यागेन ब्रह्मवर्चसं भावयेदिति व्यापारप्रति-
पादकं शास्त्रमानुमानिकम् । तत्र कथंभावाकाङ्क्षा न द्रव्यविषयिणी
भवितुमर्हति किं तु क्रियारूपव्यापारविषयिणी । दृष्टं चैतत्कुठारेण
छिन्द्यादित्युक्ते छेदनाऽनभिज्ञः कुठारेण कथं छिन्द्यादिति कुठारवृत्ति-
क्रियाज्ञानमेव मुख्यत्वेनापेक्षते न तु द्रव्यम् । तत्पूर्वकतया उद्यमननिप-
तनसंबद्धकुठारेण छिन्द्यादितिनिर्णीते तादृशव्यापारनिर्वाहाय दण्डह-
स्तादिद्रव्यमपेक्षते न तु स्वतन्त्रम् । तथा प्रकृतेऽपि सौर्ययागे कथंभा-
वाकाङ्क्षायां प्रथमं यादृशव्यापारसंबन्धो यागः ब्रह्मवर्चसं जनयेत्तादृशव्या-
पारमपेक्षते तन्निर्वाहाय पश्चाद् द्रव्यापेक्षा तथा सति प्रकृतौ तादृश-
व्यापारनिर्वाहार्थं प्राकृतद्रव्यशास्त्रमपि अनुमेयं तादृशव्यापारस्यैव बल-
वता प्रमाणेन निवृत्तौ तदुपजीव्यस्य अदृष्टरूपफलान्तरं द्वारीकृत्य तत्प्र-
वृत्तिर्न शास्त्रमन्तरा भवितुमर्हति । शास्त्रे च प्रमाणं द्विविधं प्रत्यक्षम-

Digitized by Google

[*Page* 666.] Examples—

"O daughter of the mountain! this is not the developed stigma of the moon with fully developed sheen. It is (the colour of) his wife, the Night, soundly sleeping on his breast, cool through the dropping of nectar."

[*Page* 667.] Or again—

"O friend! just see what are the enemical feelings of Cupid towards loving person reduced by separation! see how by him has been applied poison to his arrows under show of black-bees on the mango trees in the garden!"

Here the suggested meaning is that *the mango trees with the black-bees are poisoned arrows.*

[*Page* 668.] Or again—

"Verily Cupid burnt by Çiva has fallen on the plump thighs of the fawn-eyed one,—a very tank of the nectar of loveliness! for from the hole of her navel proceeds a line of smoke,—in the form of the hair over the navel—showing the extinguishing of the fire on his body."

Here the suggested sense is that *it is not a line of hair over the navel, but a thin column of smoke.* Thus it may be suggested by various other ways.

(8) Çlesha or Ideal Paronomasia.

96.—Paronomasia is that where several meanings are got out of a single sentence—*e. g.*

"उदयमयते दिङ्मालिन्यं निराकुरुतेतराम्
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनम्
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः" ॥

"This sun (receptacle of brightness) resplendent, rises (becomes prosperous), removes the darkness of the atmosphere (the dirtiness of all people), kills the closure of sleep (removes dullness), urges men to action, and clips the spontaneous and unrestricted actions of peoples."

Digitized by Google

Here the denotations not being restricted (by means of Context, &c.) to any particular case, the description is equally applicable both to the Sun and to the King.

97 *(contd.)*—[*Page* 671.] The Modal Metaphor is the implication of another (object), through differentiative adjuncts (qualifying adjectives) capable of diverse significations.

(9) *Samasokti* or the Modal Metaphor.

When the sentence signifying the principal meaning, implies another, through power of the qualifying adjuncts with diverse significations,—not through that of the qualified substantive—it is Modal Metaphor,—literally, the "Brief Double-Signification."

Example—

"लहिऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो।
जअलच्छी तुह विरहे ण हुज्जला दुब्बला णं सा" ॥

"The glory of victory,—which by the contact of your arm, had quite an unique joy—now, through separation from you, appears,—not bright,—but reduced and meagre."

[*Page* 672.] Here the term जअलच्छी does not express only a woman (but also Glory of Victory).

97 *(concld.)*—When an impossible relation of things establishes similitude, it is Illustration.

(10) Nidarçanâ or Illustration.

Illustration, *i. e.* exemplifying or instancing.

[*Page* 673.] Example—

"Where (on one side) the family founded by the Sun, where on the other, my limited intellect! through sheer delusion do I wish to cross the ocean by means of a raft."

[*Raghuvaṅça*, Canto I.]

Here the sense finally arrived at is that—

"The description of the Solar Dynasty by my intellect is like the crossing of the ocean by means of rafts."

[*Page* 674.] Or again—

"The hot-rayed one—with his string-like rays spreading—having risen,—and the moon similarly having set,—this mountain bears the appearance of an elephant with two bells hanging on its two sides." [*Çiçupālavadha*, IV.]

Here the fact of the appearance of one being borne by another being questionable, the sense develops into the Simile, that 'the appearance of the mountain is like that of an elephant.'

"Verily does he hope to swim across the ocean, to catch hold the moon's disc, and to jump over the Mount Meru—who, O lord! attempts a description of your good qualities."

Here we have the Stringed or Serial Illustration.

Another kind of Illustration.

98 (*contd.*)—When the connection of the action and its cause is signified by the action (verb) itself, then we have the other kind of Illustration.

When the connection of the action and its cause is comprehended through action itself, that is another (kind of) Illustration, *e. g.*

[*Page* 676.] "'A low object attaining a high position, will naturally fall down'—thus saying, as it were, the stone-dust wafted by a wild wind, falls down from the mountain top."

Here the *action* of *falling* signifies the connection between *falling*, and (its cause) the fact of *a low person attaining to high positions*.

(11) Aprastutapraçaṁsā or Indirect Description.

98 (*concld.*)—[*Page* 677.] Indirect description consists in the description of an alien or extraneous object implanting itself in the object to be described.

Indirect Description is the implication of the object in question by the description of an extraneous matter.

The five kinds of Indirect Description.

99.—(1) The effect, (2) the cause, (3) class or generality, and (4) speciality,—being the objects in question, the

Digitized by Google

description of their contraries, and (5) the description of a thing resembling the object in question. Thus it is five-fold.

Their contraries—*i. e.* cause, etc. respectively.

Examples in order—

(1) Description of cause, the effect being in question—

"'O beautiful one, do not those who have been separated, meet again? Then why be anxious for me? you have been altogether reduced!' I having said this, she, looking at me, expressed a determination to die, by means of her eyes, unmoved through modesty, and with tears overflowing and being absorbed.' [*Amaruçataka.*]

[*Page* 679.] Here it being asked 'why did you keep back from going?'—(and thus effect being the object in question) the cause (the determined death of the beloved) is described.

(2) The description of the effect, when the cause is the matter in question—

"'O lord! the king's daughters teach me not; silently lying are the queens; O Kubjā! feed me! why do not the Ministers of the Prince eat?' thus O lord! does the parrot, let out by the passers by, in thy enemy's empty house, speak, on seeing the pictures (of its former master)."

Here the matter in question being the cause—the fact that on your advance, your enemies fled away, evacuating their houses —the effects (of such evacuation) are described.

(3) The description of the particular, when the general matter is in question—

"You have heard very little from him in the form that a certain foolish person took water-drops on lotus leaves to be pearls. Hear from me a farther (instance of foolishness). Going to take it up, and thus the drop having disappeared by being taken up in the finger-tip, the fool gets not sleep through internal pain on the thought of where should his pearl should have flown away!"

[*Bhallataçataka.*]

Digitized by Google

Here the matter to be described being the fact that foolish persons are attached to such improper things, the particular instance of a fool is described.

(4) The description of the general when the particular is to be described—

" He who washes the tears from the eyes of his friend's wife by avenging his friend on the enemy—he alone is to be respected, the only wise man ; his alone is real living, and he the receptacle of prosperity."

[*Page* 681.] Here the matter meant to be described is a particular instance—*viz.* 'you will be respected if you remove the grief of Narakāsura's wife by killing Krishna,'—but the description is that of a general case.

(5) Of 'the description of a matter resembling the original' there are three forms—Where the means of implication is (*a*) *Çlesha* (the paronomatic use of the substantive, as well as of the qualifying adjunct), or (*b*) *Samāsokti* (the paronomatic use of the qualifying adjunct alone), or (*c*) Mere resemblance (without any paronomasia).

Examples in order—

(*a*) Through *Çlesha.*

" One may give up manliness, may lower himself, may even give up his magnanimity—one may do all this to protect this world,—this was the way shown by Purushottama."

[Here the object to be described is a good man. And the description given is that of ressembling Vishnu through a pun upon the qualifying term पुंस्त्वात् and the qualified पुरुषोत्तम] (= good man, and Supreme Being).

(*b*) Through *Samāsokti*—

" येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव, न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मनाक्
अस्त्वेवं जडधामता तु भवतो यद्व्योम्नि विस्फूर्जसे " ॥

Digitized by Google

"O Moon! against the rising Sun, by whom you have been suppressed, the only proper course for you would be revenge, and not falling on his feet (absorbing his rays). Doing this when devoid of your magnificence, are you not ashamed? Or it may be your dullness (coolness) through which you yet show yourself (in the sky)."

[Here there is no pun on the substantive Moon, but merely on the qualifying adjuncts by means of which the description of an impoverished individual is implied.]

(c) Through mere Similitude—

"What has the wretched ocean done with the water taken from the rivers? He has salted them; offered it to the submarine fire, or kept in the innermost caves of the nether world."

[Here the object to be described is the person squandering away the wealth he got from places where it was properly spent.]

[*Page* 684.] Some kinds of this (the Indirect Description based on mere Similitude) are possible on the non-imposition of the implied or suggested meaning—*e. g.*

"There are means, for crossing the ocean, pervading the length and breadth of the universe, as also the innermost caves of the nether world. But if by chance he becomes emptied of water, who would be able to look at his depth and the inner holes?"

[Here the implication is that "It is much better to have a bad master full (of wealth &c.) than devoid of all—the latter circumstance leading to greater evils for the servant." But the direct meaning being quite compatible by itself, this implication is not necessary.]

[*Page* 685.] Sometimes it is through imposition—*e. g.*

"'Who are you'? 'know me to be the fate-stricken Sakhotaka.' 'You speak as if you were disgusted.' 'Rightly have you guessed.' 'How is that?' 'This Vata tree, that lies on the left of the road, every traveller has recourse to, and to me, lying on the road, does not belong even shade enough to benefit others."

Digitized by Google

[Here the intended description is that of a good man incapable through poverty of doing good to others. And the original meaning—the conversation between the speaker and the tree—is not properly applicable to the tree; and as such the figure here is based on mere imposition of the implied meaning.]

[*Page* 686.] Sometimes, through partial imposition—*e. g.*

"This the curious process of the turning of the tongue! that fickleness of ear! The eyes too incapacitated, through intoxication, to descriminate between his own and other's ways! or what is the good of saying more? O black-bee thou hast forgotten all this, that O brother! you still stick to this elephant, with empty trunk,—wherefore this thy determined attachment?"

[*Page* 687.] Here the *turn of the tongue* and the *emptiness of the trunk* are not reasons for the departure of the black-bee, the *intoxication*, on the contrary, is only a reason for its sticking to it; the *fickleness of the ear is* the only reason.

(In the case of a human master, शून्यकर is *empty-handed*, मद is *pride* and *arrogance*, कर्णचापल is *easiness of belief*).

(12) Atiçayokti or Hyperbole.

100-101 (*contd.*)—[*Page* 688.] (1) When the original (the object to be described) is established by being swallowed by the other (the object compared to); (2) When the object is described as distinct; (3) when the (sense) is assumed through the use of such expression as 'if' &c.; (4) When the causal sequence is inverted—then is to be known the Figure Hyperbole.

(1) The one is that where the establishment or comprehension is that of the object described, (*a*) swallowed by the object compared to—*e. g.*

[*Page* 689.] "Lotus in a place without water! A couple of lotuses again in the lotus! All these again in a golden creeper! And this too soft and lovely!—What a series of strange phenomena!"

(*a*) *i. e.* not denoted by its own denotative terms.

Here 'face' 'eyes,' &c. are comprehended as being of the form of the 'lotus,' &c. [This form of the Hyperbole consists, according to the *Pradīpa*, in the comprehension of identity in difference; as here the identity of face in the lotus].

[*Page* 690.] (2) That, where the object described is comprehended as strange or peculiar, is the second—*e. g.*

"Strange is her loveliness! Peculiar the brightness of complexion! The young woman cannot be the creation of the common creator."

[This form consists in the comprehension of difference in identity]

[*Page* 692.] (3) The third form is that where the impossible (not directly comprehensible) sense is got at by means of such expressions as 'if' 'if it were so,' &c.—*e. g.*

"If the body of the moon were spotless during night, then would her face be troubled with similarity."

[*Page* 693.] (4) The fourth is the pre-mention of the effect in order to show the quick efficacy of the causal operation—*e. g.*

"Mālati's heart was first occupied by the arrow—Cupid; by you, O loved of women, it was occupied only later on, when you traversed the path of her vision." [*Kuttanīmata* 96].

[Here the cause, *Cupid occupying the heart,* was the *seeing of the young man;* but in order to show the quickness of the causal efficacy, the natural sequence is inverted].

(13) ***Prativastūpamā*** **or Typical Comparison.**

101-102 (*contd.*)—[*Page* 694.] Typical Comparison is that where a single common (attribute) is mentioned twice in two sentences.

Typical Comparison—the comparison of matter, *i. e.* the meaning of a sentence—occurs when, both in the sentence describing the object compared and in that containing the object compared to, the common attribute is mentioned—but by different words, in order to avoid the fault of Repetition—*e. g.*

संस्कृतपुस्तकानां सूचीपत्रम्।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता श्री तै· रामशास्त्रिणा संशोधितः	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी,	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टेनाचार्य्यणेङ्गलण्डीयभाषायां कृता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्यणेङ्गलण्डीयभाषायां कृतम्	४)
मानवधर्म्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका,	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामश्कोल्लूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः	३॥),
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम्	५।॥)
श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	६)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः।	२।)
स्नेहपूर्त्तेः प्रथमोबिन्दुः सत्संप्रदायाचार्य पं· स्वामिश्रीराममिश्रशास्त्रि-प्रणीतोनिर्विशेषाद्वैतनिराकरणपरः	१॥=)
स्नेहपूर्त्तिसहितोवेदार्थसंग्रहः	३।॥)
शास्त्रदीपिका	६।)
संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं· स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम्।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-शास्त्रिणा संशोधिता पूर्वारूपा	५।॥)
• माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता,	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता।	६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 281

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 297

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityânandapanta, Scholar, Sanskrit College, Benares. 313

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 329

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7.] July, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

इह श्रुत्यन्तरपरः । अथ द्वे वाव ब्रह्मणो रूपे मूर्तञ्चामूर्तमेव चेत्यादि पूर्ववाक्यम् । अथ नामधेयं सत्यस्य सत्यमित्यादि पश्चिमं तदिह प्रत्यक्षानुमानश्रुत्यन्तरपूर्वापरविरोधभीत्या मध्यमं नेति नेतीत्यादिवाक्यं ब्रह्मगुणविभूतिविग्रहाद्यबाधेन ब्रह्मण्येवानुक्तातिशयान्तरपरं नेतव्यं, ततश्च लोकदृष्टप्रकारवैलक्षण्यार्थमिह केचिदाहुः । अन्ये तु इति नेति व्यवहारेणेतोऽधिकं किञ्चिदस्तीति निर्देष्टव्यं नास्तीति प्रकृतैतावत्त्व*सूत्रभाष्योक्तमिहादिशब्दसंगृहीतं ब्रूमः । पूर्वप्रदर्शितप्रकारमात्रयोगाद् ब्रह्मणः प्रकृतमेतावत्त्वं नेति नेत्यादिवाक्यं प्रतिषेधतीति ब्रह्मणो विश्वमूर्तेरिति पदाभ्यां धर्मिग्राहकप्रसिद्धगुणविभूत्यादिप्रकर्षः प्रख्याप्यते ॥ ५३ ॥

इति निषेधश्रुतीनां प्रत्यक्षादिविरुद्धप्रतिपादकत्वानुपपत्तिः ।

ननु प्रत्यक्षस्य प्रत्यक्षान्तरेणेव परोक्षेणापि बाधस्तत्रतत्र सम्मतः तद्वदिहापि स्यादिति शङ्कते । प्रत्यक्षेणेति ।

मू० प्रत्यक्षेणैव पुंसां भवति दृढतरो देह एवा-
त्ममोहो ज्वालैक्यप्रत्यभिज्ञाद्युभयमपि च
तद्बाध्यते ह्यागमाद्यैः । तस्माद्दक्षादिसिद्धं
श्रुतिभिरपि जगद्बाध्यतामित्ययुक्तं सन्दे-
हार्हेषु शक्तं यदिह न खलु तद्दोषदूरेष्वपि
स्यात् ॥ ५४ ॥

टी० अस्ति हि मनुष्यत्वस्थूलत्वादिविशिष्टे पिण्डे तिरश्चामिव विपश्चितामप्यात्मत्वाभिमानः, तत्र चामोक्षादसमाहितदशायां जाग्रतः स्वपतो वा दर्पणतलदत्तदृष्टेरिव सामग्रीसामर्थ्यादनिच्छ-

* प्रकृतैतावत्त्वं प्रतिषेधति ततोब्रवीति च भूयः । इति सूत्रम् ।

Digitized by Google

तोऽपि देहविभ्रमे बाधितानुवृत्तिरित्यभिप्रायेण दृढतरशब्दः । अस्य ज्वालैक्यप्रत्यभिज्ञायां विपरिणतानुषक्तिः, अपिः प्रत्यक्षस्य बाध्यत्वसंभावनार्थः, चकारश्चन्द्रसूर्य्यपरिमाणाल्पत्वादिभ्रमाकारसंग्रहार्थः । आगमादेरित्यनेनानुमानवत्परेष्टमर्थापत्त्यादिकमपि गृह्यते अथ देहात्मबोधस्यानुमानागमाभ्यां ज्वालैक्यग्रहस्य चानुमानेन बाधः । एवं निर्दर्शितमर्थं प्रकृते निवेशयति । तस्मादिति । विषमो दृष्टान्त इत्यभिप्रायेणाह । इत्ययुक्तमिति । सन्देहार्हेष्विति । अयं भावः शेषभूषणादिनयात् मम देह इति व्यतिरेकप्रत्ययस्तावद् दुरपह्नवः ममात्मेत्येतत्तु घटस्यात्मेतिवत् स्वरूपपरमिति सर्वसम्मतं वीतरागजन्मादर्शनादिभिश्च देहात्मभेदस्संभाव्यते अतस्तत्प्रायःपिण्डादिन्यायात् भ्रमहेतुसंसर्गविशेषवति द्रव्यद्वये स्थौल्यचैतन्यादिगुणव्यतिहारधीः स्यादिति शङ्काकलङ्कितस्तत्तद्देहात्मबोधस्सर्वेषां सर्वदा संभवन्नपि नित्यनिर्दोषनिगमजन्यधिया न्यक्कारमर्हति ज्वालैक्यधीरप्यदृष्टनिर्वापणस्य पुनरारोपितदीपेऽपि संभवात् सादृश्यसादेश्यभेदाग्रहादिप्रसूतेति लैङ्गिक्या धिया नियम्येत चन्द्रसूर्यपरिमाणाल्पत्वादिबोधेष्वपि दूरत्वादिदोषसंप्रतिपत्त्याऽनन्यथासिद्धानुमानागमसिद्धया बुद्ध्या बाधः साधीयान् इह तु तत्तत्प्रमाणदोषत्वेन संभावितानां सर्वेषामसिद्धेर्न शास्त्रबाध्यत्वं संभाव्यमिति ॥ ५४ ॥

इति परोक्षबाध्यत्वयोग्यायोग्यप्रत्यक्षविभागः ।

पुनःप्रत्यक्षादेर्निर्दोषत्वमसिद्धमिति शङ्कते । प्रत्यक्षमिति ।

मू० प्रत्यक्षं दोषमूलं श्रुतिरिह न तथा पौरुषे-
यत्वहानेस्तस्मात्सा बाधिकाऽस्येत्यसदखि-

Digitized by Google

लधियामन्ततो दोषसाम्यात् । शास्त्रस्यापि ह्यविद्याप्रभृतिभिरुदयस्संमतस्त्वन्मतस्थैस्त- स्यानाविद्यभावे न हि निखिलभिदाऽप- न्हवश्शक्यशङ्कः ॥ ५५ ॥

टी० अयं भावः विगीतं प्रत्यक्षं दोषमूलं प्रत्यक्षत्वात् द्विच- न्द्रादिप्रत्यक्षवत् अत एवं तन्मूलस्यानुमानस्यापि दोषमूलत्वं सिद्धं श्रुतिस्तु न तथा सर्वेषु कल्पेषु एकरूपतयैव श्रूयमाणतया पौरुषेय- त्वासंभवे वक्तृदोषप्रसङ्गाभावात्, इह च तद्वये ब्रह्मणि भेदनिषेधे वा ऽनन्यगोचरत्वेन तात्पर्यस्थापनात् अतस्सा श्रुतिरस्य प्रत्यक्षस्य बाधिकेति तदेतत् प्रत्याचष्टे । इत्यसदिति । स्वव्याघातादिदोषा- दिति भावः । अभिप्रेतं विवृणोति । अखिलधियामिति । अयं समाधिः प्रत्यक्षत्वादिति स्वप्रकाशप्रत्यक्षेऽपि वृत्तेरनैकान्तिकम् । अथानित्य- प्रत्यक्षत्वादिति विशेष्येत तथाऽपि स्वाभीष्टध्यानजन्ये शब्दजन्ये वा परब्रह्मप्रत्यक्षे तद्वृत्तिस्सिद्धा तथापि दोषमूलत्वाभ्युपगमे कथं तत्त्वसाक्षात्कारसिद्धिः दोषमूलादपि तत्सिद्धावतिप्रसङ्गः दुष्टप्रत्यक्षमूलतया चानुमानस्यापि बाध्यत्वं दुर्वचं स्यात् यदि च प्रत्यक्षत्वमात्रेण पृथिव्यादिस्वरूपप्रत्यक्षस्य दोषमूलत्वं बोधकत्वा- देव ब्रह्माद्वैतवाक्यानामपि किन्नैतत्स्यात् वाक्यदोषत्वेन संप्रतिपन्नं किञ्चिन्न तत्र दृश्यत इति चेत् । समानमेतद्भिमतेऽपि प्रत्यक्षे अतिरिक्त- दोषानुमानस्य तु वाक्येऽपि कः प्रत्यूहः भेदवासनाख्यो दोषः प्रत्यक्षे प्रसिद्ध इति चेन्न शब्देऽपि तस्यास्तद्वत्प्रसिद्धत्वात्, न ह्यत्र प्रकृतिप्रत्ययपदवाक्यपदार्थवाक्यार्थादिविकल्पान् वासनानपेक्षानभि- मन्यध्वे न च द्विचन्द्रादिवासनानां वासनात्वादेव दोषत्वं किन्तु

Digitized by Google

भ्रान्तिमूलत्वात् अतोऽभिन्नस्येव भेदवासना दोषः अयथार्थस्मृतिहेतुत्वात् अन्यथा ह्यद्वैतवा*सनायाः अपि दोषत्वप्रसक्तिः प्रत्यक्षे तु वासना भ्रान्तिप्रसूतैवेति चेत् न वासनाया दोषत्वसिद्धौ तद्धेतोरनुभवस्य भ्रान्तित्वसिद्धिः ततश्च तत्सिद्धिरिति मिथस्संश्रयात् एतेन भेदधीजनकत्वाद्वासनाया दोषत्वमित्यपि प्रत्युक्तं पृथिव्यादिभेदधिया भ्रान्तित्वसिद्धौ तज्जनकवासनाया दोषत्वं ततश्च तदिति तत्त्वावेदकवाक्यबाधितत्वात् भेदधियां भ्रान्तित्वे सिद्धे ततस्तद्धेतोर्दोषत्वक्लृप्तौ नान्योन्याश्रय इति चेन्न प्रत्यक्षस्य वासनाख्यदोषमूलत्वे सिद्धे वाक्यस्य तद्विरुद्धतत्त्वावेदकत्वं ततश्च भेदधियां भ्रान्तित्वं तत एव तद्धेतुवासनाया दोषत्वं ततः प्रत्यक्षस्य दोषमूलत्वमिति चक्रकापत्तेः । पर्वसंकोचेन मिथस्संश्रयो वा प्रत्यक्षं सर्वं भेदवासनामूलमित्यपि निर्विकल्पके दुर्वचं तस्य त्वयाऽपि संस्कार-

* अद्वैतवासनाया वासनास्वरूपत्वं चाभाणि । ईश्वरानुग्रहादेव पुंसामद्वैतवासना । महाभयकृतत्राणा द्वित्राणां यदि जायते ॥ इति खण्डनकारेण । ततो वासनात्वेनैव दोषत्वाङ्गीकारोऽनुचितः । भेदवासनानां दोषत्वे नाप्यद्वैतवासनेत्येव गुणो नापि ब्रह्माद्वैतवासनेत्येव वा गुणस्तथा सति विरलपादपेष्वपि दूरादुदीक्ष्यमाणस्यैक्यवासनया जातमैक्यज्ञानं न भ्रमः स्यात् । द्वितीये त्वद्वैतवासनाया गुणत्वमव्याप्यसिद्धं तदधिकृत्यैवावयोर्विवादात् तत्र न द्वैतवासना दोषः किन्तु दूरत्वं तर्हि द्विचन्द्रभ्रमस्थलेऽपि तिमिरं दोषो न तु भेदवासना । किंच भेदवासनाया दोषत्वे तस्या दोषत्वमेव दुरवधारणतामापद्येत तद्दोषताया अपि भेदवासनयैव प्रत्याययनीयतया दोषजन्यज्ञाने च प्रामाण्यानाश्वासेन दोषत्वादोषत्वकथायाः कथंचिदप्यनवतारात् । भेदवासनाया दोषत्वं श्रुतिसमधिगम्यमिति त्वतिबालभाषितं तादृशश्रुतीनामनैदम्पर्यात् । ऐदम्पर्याङ्गीकारेऽपि वा ऐदम्पर्यग्रहस्य भेदवासनामूलकतया ज्ञानान्तराणामिवैदम्पर्यज्ञानस्यापि दोषमूलकत्वेनाप्रामाण्यज्ञानास्कन्दिततया तदर्थे प्रामाणिकानामनाश्वासात् । दोषमूलकत्वज्ञानविरहकाले भेदवासनया जातस्य भेदवासनाया दोषमूलत्वबोधकश्रुतिवाक्यैदम्पर्यज्ञानस्याश्वसनीयतया भेदवासनाया दोषत्वं स्ववधारणमिति तु कौरकल्पकापुरुषकथामात्रं तथा सति शुक्तिरूप्यज्ञानधर्मिकदोषमूलकत्वज्ञानविरहकाले तज्ज्ञानस्याप्याश्वसनीयत्वेन ततोऽपि शुक्तिरूप्यस्य तत्त्वप्रसङ्गादिति किमत्र भूरि विक्रान्तेन । तस्माद्वासनानां दोषत्वादोषत्वे न वासनात्वेन किन्तु भ्रमप्रमामूलत्वेनेति विवेचनीयेऽपि विषयेऽन्यत्र कृतविस्तरा उदास्महे ।

Digitized by Google

जन्यत्वानभ्युपगमात् । अस्ति च शब्दानुगमवादिनामप्यवासना-धीनं प्रथमावश्यन्निगमजं प्रत्यक्षं तत्कल्पितयोश्शब्दविवर्तपरिणात्यो-स्संस्कारापेक्षप्रकाशत्वात् अस्तु सर्वजननी मायैव निर्विकल्पके दोष इति चेन्न वाक्यतज्जन्यज्ञानयोरपि तदपत्यभेदत्वादिति तदिदमाह । शास्त्रस्यापीति । प्रभृति—शब्देन भेदवासनां तन्मूलभेदभ्रमञ्च गृह्णाति अतः प्रत्यक्षमात्रस्य दोषमूलत्वकल्पना निर्दोषत्वप्रसिद्धावं न सहेतेति निश्चितमतः । अथ शास्त्रस्य ब्रह्मवदविद्यात्वञ्चानादित्वादविद्यामूलत्वं नास्तीति मुग्धाद्वैतिमतमनूद्य दूषयति । तस्येति । तच शास्त्रस्या-दोषकल्पितानादिभावत्वात् ब्रह्मवदविद्यातद्विवर्तान्यतया च सत्य-त्वप्रसक्तौ स्वाभिमतमद्वैतं भज्येतेति भावः ॥ ५५ ॥

इति शास्त्रप्रत्यक्षयोर्दोषसाम्यापादनम् ।

अथ केचिदनाकलिततर्कतन्त्रगतिभिः प्रपञ्चलुण्ठा*केरेवं प्रत्यवस्थितं दोषमूलत्वाविशेषेऽपि परत्वादद्वैतवाक्यजन्यं ज्ञानं प्रत्यक्षस्य बाधकं पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यतीति न्यायात्, न चाविशेषः परस्य बाधकत्वं प्रतिहन्यात् प्रमाणत्वाविशेषे-ऽप्युद्गातृप्रतिहर्त्रपच्छेदयोरयुगपदुभयसंभवे परस्य नैमित्तिकशास्त्रस्य बाधकत्वस्थापनात्, अपेति च रज्जुसर्पभीतिः कस्यचिदनाप्तवाक्ये-नापि, अतश्शास्त्रतः प्रत्यक्षबाधश्शक्य इति तत्प्रतिविपति । दोषोत्थत्वेति ॥

मू० दोषोत्थत्वाविशेषे न हि भवति परं पूर्व-
बाधप्रगल्भं दोषज्ञानं तु माभूदविदुषि पुरुषे
वस्तुतस्त्वन्यथा तत् । निर्दोषत्वाभिमन्तृ-

* प्रपञ्चलुण्ठनशीलशालिभिरित्यर्थः ।

स्वसमयिमतिभिः किन्न मिथ्याकृतान्ताः प्राग*लभ्यं चेन्निषेधः पर इति मुखिरं तुर्यबोद्धस्य तूर्य्यम् ॥ ५६ ॥

टी० अयं भावः न हि सर्पभूदलनभ्रमयोरुपरितनस्य बलीयस्त्वमुत्पादयितुं शक्यम् अनाप्तवाक्य बाधिते रज्जुसर्पे तदनाप्तत्वपरामर्शिनस्तदुभयं पुनरनुषज्यते इह त्वादावेव दोषमूलत्वाविशेषश्चिन्तितः प्रतिसंहितश्चेति न परबलीयस्त्वभावनावकाश इति दोषपरामर्शाभावमन्वाहृत्यापि दूषयति । दोषज्ञानमिति । तुःवैपरीत्यद्योतकः वस्तुनस्त्वित्यत्र तुः—विदुषि तद्वैषंभवद्योतनार्थः दोष एव ह्ययथार्थधीहेतुः तज्ज्ञानन्तु तद्विभ्रमनिवर्तकं दुष्टस्यापि बोधस्य दोषपरामर्शाभावमात्रात् वस्तुस्थितिवैपरीत्यव्यवस्थापकत्वेऽतिप्रसङ्गमाह । निर्दोषत्वेति । सर्वे हि वादिनः स्वसिद्धान्तस्थापकं निर्दोषमभिमन्यन्ते न च तत्तथ्यं न च तथातथा भिद्येत वस्तुगतिः व्याघातात् तदिह स्वपक्षस्थापकदोषानाकलनमात्रेण बाह्यसिद्धान्ता विपश्चिद्विदितदोषाः किन्न मिथ्या भवन्ति तद्वदिहापि बाधकदोषस्य सतः परामर्शे अन्यथाऽपि वा बाध्यबाधकभावो दुर्धर्षण इति भावः । अनन्यगतिकापच्छेदन्यायदर्शनमात्रेण तुल्यस्यापि परस्य प्राबल्ये सर्वबाधकमाध्यमिकविजयतूर्य्यं जोद्घुष्येतेत्याह । प्राबल्यमिति निषेधः पर इत्येतावता तस्य प्राबल्यं चेदित्यन्वयः ॥ ५६ ॥

इति दोषसाम्ये परस्य बाधकत्वानुपपत्तिः ।

असंभावितदोषादौपनिषदवाक्यादद्वैतज्ञानं सिध्यतीति परोक्ते प्रतिवन्दिं प्रस्तुवान इव स्वपक्षमपि स्थापयति । निर्दोषमिति ॥

* प्राबल्यमिति वा पा० ।

मू० निर्दोषं यच्च शास्त्रं तदपि बहुविधं बोधयत्येव भेदं वाक्यैस्तत्त्वोपदेशप्रकरणपठितैर्नान्यपर्य्यं प्रतीमः । नाशापच्छेदनीतिर्न्नियतिमति सदोपक्रमन्यायसिद्धेः स्वप्रख्याप्यापलापे श्रुतिरपि वृषलोद्वाहमन्त्रायते वः ॥ ५७ ॥

टी० बहुविधं भेदम् आधाराधेयभावादिभिरीशेशितव्यभेदं भोक्तृभोग्यनियन्तृभावैस्तत्त्वत्रयभेदमणुत्वविभुत्वादिभिर्जीवेश्वरभेदं बद्धमुक्तनित्यतदवान्तरविभागैर्जीवभेदम् एतेषु च कालभेदेन तत्तदवस्थाभेदञ्चेत्यर्थः । प्रतिषेधग्रन्थिना त्वयाऽपि प्रतिषेध्यधीर्दुरपलपेत्येवकाराभिप्रायः प्रस्तुतभेदवाक्यान्यन्यपरत्वान्न भेदं विदधतीत्यत्राह । वाक्यैरिति । न हि सद्विद्यादिषु कर्मविधयः उपासनविधयो वा संनिदधतीति त्वयाऽपि संप्रधार्य्यते, सन्ति च तत्राप्यहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीत्यादीनि तत्तद्द्रव्यस्वरूपव्यापारादिविविधभेदविषयाणि वाक्यानि अतोऽनन्यपरनिर्दोषवाक्यसिद्धत्वाददृष्टवत् दृष्टमपि दुर्न्निषेधमित्यभिप्रायः । ननु प्रतिषेधस्य प्रसक्तिसापेक्षत्वात् भेदप्रसञ्जकवाक्यं पूर्वं तन्निषेधकन्तु परत्वेनापच्छेदनयात्तद्बाधकं स्यादित्यत्राह । नाशेति । आशेत्यनेनाभिप्रेतं हेतुमाह । नियतिमतीति । अयं भावः अनियतपौर्वापर्य्ये ह्यपच्छेदनयः नियमे तूपक्रमनयात् परानुत्पत्तिरेवेति नीतिविदः । इह च त्वयैव प्रसञ्जकप्रतिषेधकयोः पौर्वापर्य्यनियमः स्थापितः, अतः परस्यैव दौर्बल्यं प्रत्येतव्यमिति अनुष्ठाने त्वस्य न्यायस्यानन्यथाभावमभिप्रेत्य सदा शब्दः । ननु लोकसिद्धान् भेदांस्तावत्प्रसिद्धत्वादनुवदति अलौकिकानपि प्रतिषेधार्थमेवोपदिश्य

प्रतिषेधतीति परप्राबल्यं दुर्वारं तत्राह । स्वप्रख्याप्येति । अप्रख्यातस्य प्रख्यापनाद्दूरं तत्र तूष्णीं भावः । न हि धर्मनिवर्त्तनाय प्रवृत्तं शास्त्रं धर्मान्तरमुत्पादयतीति त्वदन्यः प्रतिपद्येत, तदिह श्रुतिः प्रत्यक्षाद्यनवगतान् भेदान् स्वयं त्रिधत्ते प्रतिषेधति चेति वृषलविवाहमन्त्रवञ्चाघात एव परिशिष्यते इति भावः । एतेन सगुणनिर्गुणश्रुत्योरपि परप्राबल्यवर्णनं निरस्तम् ॥ ५७ ॥

इति भेदतन्निषेधश्रुत्योरपच्छेदन्यायानर्हत्वम् ।

एवमपि मुग्धान् प्रति मुग्धैरुपादेशि भेदस्तावद् भूतधीनिष्ठादिष्वासंचारं प्रविदुः अतीन्द्रियनिष्ठोऽप्यसौ सामान्यतः प्रत्यक्ष एव अन्यथा भेदसामान्यप्रयुक्तभेदशब्दवाच्यत्वादिव्याप्तिग्रहणायोगात्, व्याप्तिग्रहणरूपं हि प्रत्यक्षमदृष्टसकलव्यक्तिगोचरमिति धूमानुमानादिष्वपि समर्थयन्ते सावयवत्वानित्यत्वव्याप्तिग्रहणमतीन्द्रियसावयवपक्षीकारेण शिक्षयन्ति तदिह भेदमात्रस्य प्रत्यक्षविषयत्वादप्राप्तप्रापकस्वभावशास्त्रगोचरत्वं न संभवतीति । एतदनुभाष्योपालभते । भेद इति ।

मू० भेदः प्रत्यक्षसिद्धो न निगमविषयः स्यादि-
ति त्वभंकोक्तिः प्रख्यातादन्यमेनं प्रथयति
यदसौ त्वन्मताद्वैतवन्नः । सन्मात्रग्राहि चाक्षं
नियमयसि ततो ब्रह्मदृश्यं मृषा स्यात् किन्ते
श्रुत्या तदानीं फलमपि लभतां क्वापशूद्रा-
धिकारः ॥ ५८ ॥

टी० तुः—सर्वशास्त्रनिर्विषयत्वप्रसङ्गावहत्वं द्योतयति, प्रायेण हि तवापि यत्किञ्चिद्भेदविषयं सर्वं शास्त्रम् अन्ततःप्रतिप-

न्नात् अन्यदेव हि सर्वशास्त्रे प्रख्याप्यं तद्यदि यस्यकस्यचिद् भेदा-न्तरस्य प्रत्यक्षतया सामान्यतः सर्वभेदग्रहणात् शास्त्रस्य विषयलोपः स्यात्, लुप्येत तर्हि सकललौकिकवैदिकशास्त्रविषयः व्याकरणादि-व्युत्पत्तिलोपात् अद्वैतशास्त्रमप्यशक्यारम्भं स्यात् अतो भेदस्य शास्त्रविषयत्वं निराचिकीर्षता विवक्षयिषितस्याभेदस्यापि तन्निराकृ-तमेवेति । अथ सर्वशास्त्रे प्रतिपन्नसामान्यप्रतिपन्नादन्यद् विशेषतः प्रतिपित्साहं प्रतिपाद्यमिति पश्यसि तदा म*न्मते ऽपि लोकप्रसिद्ध-गजतुरगनीलपीतादिभेदातिरिक्तः पराबरादिभेद उपनिषद्वेद्यो वर्णनीय-स्तदिदमाह । प्रख्यातादिति । अत्राविद्यौचित्यान्निगमः परामृश्यते त्वन्मताद्वैतवदिति प्रति†बन्दिपरं तथा हि यदि भेदमात्रस्य प्रसि-द्धत्वादलौकिकभेदोऽपि शास्त्रविषयो न स्यात् अभेदमात्रस्यापि प्रतिवस्तु सर्वलोकप्रसिद्धत्वात् त्वदभिमतमद्वैतमपि तदविषयः स्यात् यदि प्रसिद्धविलक्षणमद्वैतं तत्प्रतिपाद्यं पश्यसि भेदेऽपि तादृशे तथैव दीयतां दृष्टिरिति प्रत्यक्षविषयत्वादेव शास्त्राविषयत्वे परस्य सिद्धा-न्तविरोधमपि सूचयति । सन्मात्रेति । भेदस्य भ्रान्तिविषयत्वं सन्मात्रस्य प्रत्यक्षविषयत्वञ्च त्वया स्थाप्यते अतस्तस्यापि शास्त्र-विषयत्वं त्वया दुस्साधमिति भावः ॥

अस्तु सन्मात्रमनागमविषयः भेदनिषेधमात्रे पर्यन्ततात्प-र्य्यात् सन्मात्रं तु प्रत्यक्षत एव सिद्ध्यतीति तत्राह । तत इति । यदि प्रत्यक्षत एव ब्रह्मणस्सिद्धिः तदा दृश्यत्वसामान्यसंगृहीत्या युष्मत्पदव्या मिथ्यात्वं दुस्तरं स्यादिति भावः । अन्यमपि सिद्धा-न्तविरोधमाह । किमिति । प्रत्यक्षत एव ब्रह्मस्वरूपसिद्धौ तद्विभू-

* बलन्मतेऽपीति पा॰ ।

† प्रतिबन्दीपरमिति पा॰ ।

Digitized by Google

तिगुणादेश्च मिथ्यात्वादनुपदेष्टृव्यत्वे भेदनिषेधस्य च माध्यमिकोपदिष्टैरेव तर्कैस्सिद्धौ शारीरकविचारार्थिनः श्रुतिसाध्यं न किञ्चित्स्यादित्यर्थः । ब्रह्मविद्यायां शूद्राधिकारप्रतिषेधोऽपि दुश्शक इत्याह । फलमिति । ब्रह्मणस्त्वप्यन्तवेद्यत्वे सिद्धे ह्यनधीतश्रुतीनां शूद्रादीनां ब्रह्मविद्यायामनधिकारस्सिध्येत् प्रत्यक्षवेद्यत्वे तु वैराग्यैकाविशिष्टशूद्रोऽनधिकारी न स्यादिति भावः ॥ ५८ ॥

इत्यलौकिकभेदस्य शास्त्रवेद्यत्वोपपत्तिः ।

ये चैते प्रमाणप्रमेयादिभेदान् भ्रान्तिसिद्धान् साधयन्ति तेषां योगाचारादिसमयमनास्थाय चाप्यन्तवादाश्रयणं बालप्रलोभनार्थमित्यभिप्रायेणाह । वेदा इति ।

मू० वेदा बुद्धागमाश्च स्वयमपि हि मृषा मानता चैवमेषां बोद्धा बुद्धिः फलञ्च स्थिरतदितरताद्यन्तरालञ्च बुद्धेः । ज्ञातस्तैर्विद्वडिम्भान् ग्रसितुमुपनिषद्वारबाणोपगूढैः प्रायः प्रच्छादिता स्वा पटुभिरसुरता पौण्ड्रकाद्यैर्गतनिष्ठैः ॥ ५९ ॥

टी० स्वयं—स्वरूपतः, अपिना व्यापारानुग्राहकयोस्संग्रहः मानता—प्रामाण्यम् एवं मृषा एषामुभयेषां स्थिराभावादेव सौगतानां बोद्धा मिथ्याभूतः स्थिरसद्भावेऽप्यद्वैतिनामात्मनोऽनुभूतिमात्ररूपत्वेनाबोद्धृत्वात् तदाश्रयतया भातस्याहमर्थस्याविद्याविवर्तत्वाच्च बोद्धुर्मिथ्यात्वं सिद्धं, बुद्धिरपि सर्वा माध्यमिकस्य मिथ्या मायावादिनस्तु शास्त्रसाध्या साध्यत्वादेव सत्यव्यतिरिक्ता अपि च अनेनोक्तं बुद्धिस्थैर्य्ये निर्विशेषत्वविरोधात् काल्पनिकं योगाचारोक्तं क्षणिक-

त्वमपि तथैव क्षणिकधियां ग्राह्यग्राहकस्वगतविशेषस्वमिथ्यात्वाभ्युपगमात् फलं व्याहारो हानोपादानादौ च एवं सर्वतस्साम्ये कुदृष्टीनामन्यतरपरिग्रहनियतो निदानमुत्प्रेक्षमाणा इवोपालभते । मात इति । शेषमतिरोहिततात्पर्य्यम् । एवमिह यादवप्रकाशीयस्संग्रहः ।

वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् । बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयञ्च बौद्धाश्च समानसंसदः । इति । इति प्रपञ्चमिथ्यात्ववादिनां सौगतसाम्यापादनम् ॥ ५९ ॥

अथास्मिन् पश्यतोहराणां पक्षे विकल्पदौःस्थ्यं विचित्रमुदाहरति । त्वन्निष्ठेति ॥

मू० त्वन्निष्ठासिद्ध्यसिद्धोः परमतनियतिस्सिद्धिमेवाधिरूढा वेदस्यामानतायां त्वदभिमतहतिर्मानतायां च तद्वत् । साध्याऽसाध्यापि मुक्तिस्त्वदुपगमहता तत्समञ्चान्यदित्थं रक्षोभ्यः प्रेषितोऽयं रघुपतिविशिखो राहुमीमांसकेभ्यः ॥ ६० ॥

टी० नितिष्ठत्यस्मिन् परीक्षेति निर्णयोऽत्र निष्ठा, तद्विषय एव वा राद्धान्तः याऽसौ त्वन्निष्ठा सा ऽसिद्धा भ्रान्तिसिद्धा वा तर्हि तद्विपरीता परेषां निष्ठैव प्रमितिसिद्धिमधिरोहेत् । अथ प्रमितिसिद्धा प्रमितिरसौ चेद् व्यावहारिकी वा पारमार्थिकी वा न प्रथमः दत्तोत्तरत्वात् । तादृश्या तया परमतान्यपि किन्न सिद्ध्येयुः । अस्मदुक्तबाधकैरिति चेत् तदुक्तबाधकैस्त्वन्मतमपि न सिध्येत् । ते बाधका-

Digitized by Google

भाषा इति चेत् त्वदुक्ता अपि तथैवेत्यन्ततस्त्वमेव ब्रूषे स्वव्याघातादिदोषस्त्वधिकः तदिदं सञ्जगृहुः ॥

स्वशास्त्रनिर्णये सिद्धे सिद्धाःस्युर्लोकनिर्णयाः ।
स्वशास्त्रनिर्णयेऽसिद्धेऽसिद्धाः स्युर्लौकनिर्णयाः ॥

अपि च वेदाः प्रमाणमप्रमाणं वा अप्रमाणत्वे कथं ततस्तद्विषयसिद्धिः, अन्यथा बाह्यागमैरपि तत्तद्विषयाः किन्न सिद्ध्येयुः कथन्तर्ह्यप्रमाणात् भयविस्मयादिसिद्धिरित्थं न हि वयमप्रमाणस्य स्वानुरूपार्थक्रियाकारित्वं नेति ब्रूमः किन्तु न ततस्तद्विषयसत्यत्वस्थापनं सिद्ध्येदिति, प्रमाणत्वन्तु तस्य सत्यमसत्यं वा ब्रह्मणः स्वरूपभूतमन्यद्वा नाद्यः ब्रह्मणश्शब्दधर्मत्वायोगात्, न द्वितीयः सदद्वैतव्याघातात्, असत्यत्वे तु वृतमेवोत्तरं मुक्तिश्च ब्रह्मण उपायसाध्या उत स्वरूपत्वादसाध्या वा आद्ये भावरूपाऽभावरूपा वा पूर्वेषाद्वैतभङ्गः । उत्तरत्र सत्यमिथ्याप्रतियोगिकत्वविकल्पे प्राच्योऽपसिद्धान्तहतः पश्चिमस्तु प्रध्वंसमिथ्यात्वमपि स्थापयेदेव अलब्धस्वरूपस्य हि प्रध्वंसोऽपि स्वरूपं न लभेत एवं स्वयंप्रकाशत्वादिषु स्वतस्सिद्धत्वान्यतस्सिद्धत्वादिविकल्पदोषश्च्यं दुस्तरमित्याह । तत्समं चान्यदिति । उक्तानुक्ततर्काणां मोघत्वं व्यञ्जयन्निगमयति । इत्थमिति रचोभ्य इत्यनेन स्वव्याघातकमायाप्रवर्तकत्वं व्यज्यते रघुपतिविशिखः तद्वत्सर्वेषाप्रतिहत इति तात्पर्यं राहुमीमांसकशब्देन सशिरस्कवेदनिर्णयप्रवृत्तमीमांसाशास्त्रशरीरेऽपि शकलितशिरोमात्रसंग्रहीतृत्वं सूच्यते ॥ ६० ॥

इति प्रपञ्चमिथ्यात्ववादिनां बाधकविकल्पोदाहरणम् ।

एवं प्रसक्तानुप्रसक्तिं परिसमाप्य परमप्रकृतसृष्टिविशेषोक्तिं संगमयन् प्रकरणारम्भोद्दिष्टलक्षितनित्यविभूतिपरीक्षां परिमितनि-

Digitized by Google

रूप्यत्वादौचित्याच्च प्रधानप्राप्यप्रापकभूतपरतत्त्वनिरूपणानन्तरं निवेशयति । शुद्धस्येति ॥

मू० शुद्धस्याशुद्धसृष्टिक्रम इति कथितश्शुद्धसत्त्वे तु तत्त्वे स्थानं नित्यं श्रुतन्तत्स्मृतमपि कलया तत्र देहाद्यवस्थाः । सृष्टेः प्रागेकमेवेत्यपि निगमवचस्तद्द्वयमाणव्यपेक्षं नोचेत्स्वाभीष्टमायोपधिमुखविलये स्वस्ति विश्वप्रसूत्यै ॥ ६१ ॥

टी० शुद्धस्येत्यनुकथनमशुद्धद्रव्यानुप्रवेशात् तत्सृष्ट्यादिभिश्च स्वतन्त्रस्याप्यशुद्धिशङ्कामपनयति अशुद्धसृष्टिक्रमः कथित इत्यत्र शुद्धसृष्टिक्रमस्तु वक्तव्य इति शेषः । शुद्धसत्त्वे तु तत्त्व इत्यनुवादेन तद्ग्राहकप्रमाणमपि सूच्यते तस्याप्राकृतत्वस्यापकमाह । स्थानमिति । श्रूयते हि तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । इति तदिदं सदापश्यत्सूरिविशिष्टस्थानविधानार्थमिति वेदार्थसंग्रहे स्थापितम्, एवमादित्यवर्णं तमसः परस्तात् क्षयन्तमस्य रजसः पराके इत्यादिशाट्यायनिनश्च एवमामनन्ति सहस्रस्थूणे विमते दृढ उग्रे यत्र देवानामधिदेव आस्ते इति, कौषीतकीनपर्य्यङ्कविद्या चात्र पठितव्या । सर्वमेतत् संक्षिप्तं षडर्थसंक्षेपे व्यतिरेकाधिकरणनिवासशब्दैरिति तद्विप्रासो विपण्य*वो जागृवांसस्समिन्धते विष्णोर्यत्परमं पदमित्यादि प्रसिद्धिसूचनार्थस्तच्छब्दः अस्यार्थस्योपबृंहणप्रतिष्ठितत्वमाह । स्मृतमपीति । यथोक्तमुत्तरश्रीरामायणे तच्चाक्षयं सनातनमिति, महाभारते च दिव्यं स्थानमजरञ्चाप्रमेय-

* विपन्यव इति पा० ।

Digitized by Google

मिति । भगवच्छा*स्त्रसंहितासु च विस्तरस्सिद्धः । नन्वक्षरे परमे व्योमन्नित्यव्यक्ततमसोरन्तरालेऽधीतस्त्रिगुणपरिणतिविशेष ईश्वरस्य मुक्तानाञ्च भोगस्थानतयाऽऽम्नायत इति यादवप्रकाशोक्तं युक्तम् अक्षरशब्दप्रत्यभिज्ञानस्यात्र बाधकाभावात् शुद्धसत्त्वव्यपदेशस्य रजस्तमसोरभिभूततयोपपत्तेरप्राकृतस्थानक्लृप्तौ च गौरवात् तथापि पृथिव्यादिभेदाभ्युपगमेन प्राकृतत्वं प्रज्ञायत इति । अत्र ब्रूमः अक्षरशब्दप्रत्यभिज्ञामात्रमन्यथासिद्धिप्रसञ्जकम् अस्ति चात्र परमे व्योमन्निति समभिव्याहारो बाधकः, न हि तमोऽनन्तरस्याक्षरस्य व्योमत्वमुपचारस्तु गत्यभावे अस्मत्पक्षे त्वक्षरपरमविशेषणाभ्यां प्रसिद्धव्योमवैलक्षण्यं युक्तं, न च स्थानान्तरादिस्वीकारे गौरवं यथाश्रुतमात्रसंग्रहणात् पृथिव्यादिभेदस्तु शब्दादिगुणतारतम्यशाद्रूप्यात् युष्मदिष्टाक्षरस्थाने च प्रकृत्यामिव पृथिव्यादीनामसन्निधानात् । न च तत्त्वसंख्याधिक्यप्रसक्तो दोषः कालवदेव पृथक्त्वोपपत्तेः तं षड्विंशकमित्याहुः सप्तविंशमथापरे इत्यधिकसंख्याऽऽम्नानात् । न चैवं षट्विंशतत्त्ववादस्यापि स्वीकार्य्यत्वमनाप्तागमप्रणीतस्यानादरणीयत्वात् आप्तागमे त्वधिकगणनमनतिविप्रकृष्टावान्तरपरिणामख्यापनाभिप्रायं बोद्धव्यं लोकं वैकुण्ठनामानमिति प्रकृत्य अप्राकृतं सुरैर्वन्द्यमिति विशेष्यते अत एव ब्रह्माण्डान्तर्वर्त्तिलोकविशेषत्वशङ्काऽपि निर्धूता न तस्य प्राकृती† मूर्त्तिरित्यनेनापि द्रव्यान्तरं सिद्ध्यति न चात्र बाधकमस्ति अतश्शुद्धाशुद्धविभूतियुगलं व्यवस्थितमिति । नन्वेवमपि नित्यानित्यविभूतिविभागोऽनुपपन्नः अथाप्यात्मस्वरूपादेर्नित्यत्वात् तथाप्येच्छदेहादेरनित्यत्वात् तथाह । कलयेति । नित्यानित्यप्राचुर्य्य-

* श्रीनारायणस्वरात्रपठव्यपदेशपरम् ।

† प्राकृतेति पाठान्तरं तु चिन्त्यम् ।

Digitized by Google

विवक्षया तथा विभाग इति भाव: । न हि तत्रत्यानां पृथिव्यादीनामीश्वरदेहादीनाञ्चात्रत्यवत् सृष्टिप्रल*ये, उक्तं हि महाभारते ।

नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् ।
ऋते तमेकं पुरुषं वासुदेवं सनातनम् ॥ इति ।

भूतशब्दोऽत्र कार्य्यांशपर: ।

अत एव जीवलयोक्तिरौपचारिकी वासुदेवशब्दोऽत्र परत्रिपाद्विशिष्टपर: स्वरूपनित्यत्वस्य जीवेष्वपि समत्वात् विशिष्टलयस्य वासुदेवे विश्वविशिष्टेऽपि सिद्धत्वात् परविग्रहनित्यत्वोक्तिस्तदनुबन्ध्युपलक्षणार्था ।

ननु कारणवाक्येष्वेकत्वावधारणादनन्तरञ्च बहुभवनसंकल्पोक्तेर्नित्यस्यानादिव्यपदेशस्त्रिदशामरत्वन्यायेन नेतव्य इति वेदान्त†कुदृष्टीनां सर्वेषां व्यावघोषो तत्राह । सृष्टेरिति । अयं भाव: सृष्टिकालापेक्षया स्रक्ष्यमाणस्य जगत उपदेशकालापेक्षयेदङ्कारगोचरस्य प्रलयदशायामविभक्तनामरूपतया एकत्वमवधार्य्यते अत एव हि तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेति श्रुतिरेकत्वबहुत्वप्रकारमेतमेव व्यनक्ति अथाऽपि यथाश्रुति जीवादिसमस्तैक्ये को दोष इत्यत्राह । नो चेद्दिति । अयं भाव: प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादिकमास्तान्तावच्छ्रोदयितृणान्तु स्वसिद्धान्तविरोध: स्यात्, न हि मायाविलय: प्रलये मृषावादिभिरङ्गीक्रियते औपाधिकभेदवादिभिश्चोपाध्यंशप्रध्वंस: । मुख्यशब्द: स्वाभाविकभेद-

* अनित्यत्वं चेच्छाधीनध्वंसप्रतियोगित्वं वा अदृष्टाकृष्टध्वंसप्रतियोगित्वं वा सुखदु:खान्यतरजनकध्वंसप्रतियोगित्वं वा लौकिकप्रयोजनकान्यध्वंसप्रतियोगित्वं वेति नित्यविभूतौ पूर्वशरीरमपहाय शरीरान्तरपरिग्रहेऽपि नानित्यत्वमत्र पूर्वपक्षत्यागमूलं लक्षणस्यपदकृत्यं तत्परिष्कारश्चास्मदीयग्रन्थान्तरे द्रष्टव्य इति ।

† वेदान्तशास्त्रेषु बौद्धमतानुप्रवेशकर्तृत्वेन तेषां कुदर्शनशालितेति भाव: ।

Digitized by Google

वाद्युक्तचिदचिदीश्वरशक्तित्रयसंग्रहार्थः । यदि मायोपाधिशक्तीनामपि विलयः तैरभ्युपगम्येत तदुपहिताद् ब्रह्मणो विश्वप्रसूत्यभावात् अनुपहितस्य च तत्कारणत्वानभ्युपगमाद् बहुभवनसंकल्पपूर्वकविश्वसृष्ट्याद्यभावात् कारणवाक्यं सर्वं कबन्धमीमांसककल्पितमूषरत्वमेव भजेतेति, स्वस्तीत्युपालम्भकाकुगर्भम् ॥ ६१ ॥

इति नित्यविभूतिसद्भावः ।

नित्यविभूतौ जडाजडविकल्पे प्रथमं दर्शयति । ज्ञानत्वमिति ।

मू० ज्ञानत्वञ्चेद्रहस्यागमविदितमिति स्वीकृतं नित्यभूतेः षाड्गुण्यात्मत्वमेवं प्रसजति सह तत्पाठतोऽतो जडा सा । तत्संबन्धात् कुतश्चित्तदुपचरणमित्याहुरेके परे तु ज्ञानत्वाजाड्यकण्ठोक्त्यनुगुणमवदन्मुख्यतामात्मनीव ॥ ६२ ॥

टी० अयं भावः प्रसिद्धशास्त्रेषु तावदजडत्वं शुद्धस्य सत्त्वस्य न पश्यामः । अथ रहस्यागमवाक्यविशेषैस्तद्दिष्येत षष्ठ्यं तर्हि षाड्गुण्यमयत्वमपि तस्यापि तस्मिन्नेव शास्त्रे सह पाठात्, इष्टप्रसङ्गोऽयमिति चेन्न चेतनत्वप्रसङ्गात् । न च तदप्यस्त्विति वाच्यं जीवेश्वरविकल्पबाधात्, षाड्गुण्यमयत्वमौपचारिकमिति चेत् ज्ञानमयत्वमपि तथैव स्यादविशेषात्, अतस्त्रिगुणविभूतिरिवाद्यापि सा विभूतिरन्याधीनसिद्धितया जडैवेति कुतस्तत्र ज्ञानत्वोक्तिरित्यत्राह । तत्संबन्धादिति । निश्शेषाविद्यानिवृत्तिहेतुतया निरुपाधिकज्ञानविकासस्थानतयाऽन्यतो वा कुतश्चित्संबन्धादायुर्घृतमितिवज्जडे-

“पदात्” ॥ ‘प्राक् कुत्सने च सुप्यगोत्रादावित्येतस्मादिति’ । यदि त्वत्र पदादित्येतदनुवर्तेत यत्पचति पूतीत्यत्रैव तिङन्तस्य निघातः स्यान्न तु पचति पूतीत्यत्र ॥

“अनुदात्तं सर्वमपादादौ” ॥ ‘यत्ते नियतमित्यादि’ । अत्र मृत्यो इत्यस्य पादादौ निघाताभावः, [1]‘यदङ्ग दाशुषे त्वमित्येकः पादः, अग्ने इत्यपरः, अग्ने भद्रं करिष्यतीत्यादीनि चोदाहरणानि । ‘इन्द्रो विश्वेश्वर इत्यादि’ । अत्र युष्माकमस्माकमित्यनयोरादेशाभावः । ‘ऋक्पादः श्लोकपादश्च गृह्यते इति’ । विशेषानुपादानात् । अथ सर्वग्रहणं किमर्थं, यावतानुदात्तं पदमेकवर्जमिति वचनादेकस्मिन्पद एक एवोदात्तः स्वरितो वा संभवति, ये तु द्व्युदात्ता उभे वनस्पत्यादिषु युगपदिति न तेषामत्र प्रकरणे क्वचिदनुदात्तत्वं विधीयते । यदा तु तेषामामन्त्रितत्वं तदा द्व्युदात्तत्वमेव, इदं तर्हि प्रयोजनमनादेरप्युदात्तस्यानुदात्तत्वं यथा स्यात्, अन्यथा पदादित्यधिकारादादेः परस्येत्यादेरेव स्यात्ततश्च तिङ्ङतिङ इति इहैव स्यात्, देवदत्तः पचतीति, अत्र हि शप्तिपावनुदात्तौ, धातोः स्वरः, इह तु न स्यात्, देवदत्तः करोतीति, विकरणस्वरेण मध्योदात्तमेतत्पदं, सर्वग्रहणे तु सति पदस्य सर्वावयवोनुदात्तो भवतीत्यर्थः संपद्यते, लुटि प्रतिषेधात्सिद्धं, यदयं न लुडिति प्रतिषेधं शास्ति तज्ज्ञापयति नादेः परस्येत्येतद्व्याप्रियत इति, न हि लुडन्तं किंचिदाद्युदात्तमस्ति, एवमपि ज्ञापकेनापवादे आदिविधावपनीते अलोऽन्त्यस्यैव स्यादुभौ कुरुत इत्यादौ, [2]‘अत्र लसार्वधातुकस्य प्रत्ययस्वरेणान्तोदात्तत्वं विकरणस्य तु निघातः, न तु विकरणस्वरः सति शिष्टोपि सार्वधातुकस्वरं बाधते, तासेः लसार्वधातुकानुदात्तत्वविधानेन ज्ञापनात्, एवं तर्हि लृटि प्रतिषेधात्सिद्धं, यदयं गत्यर्थलोटा लृण्न चेदिति लृडन्तस्य प्रतिषेधं शास्ति तज्ज्ञापयति नात्रालोऽन्त्यस्येत्येतद्व्याप्रियत इति, न हि लृडन्तं किंचिदन्तोदात्तमस्ति, अदुपदेशात्परं लसार्वधातुकं निहन्यते, नैतदस्ति

१ यदङ्गदाशुषे त्वमिति इं० पु० नास्ति ।

२ ‘अत्र लसार्वधातुकस्येत्यारभ्य एवन्तर्हीति’ पर्यन्त इं० पु० पाठो नास्ति ।

Digitized by Google

ज्ञापकमिदर्थमेतत् स्यात् भोह्यइति । एतद्ध्येकादेशस्वरेणान्तोदात्तम् । एवं तर्ह्युक्तमेतत्पदस्येति क्वचिद्विशेषणषष्ठ्यपि भवति न स्थानषष्ठ्येवेति, ततः किमनुदात्तविधौ विशेषणषष्ठ्याश्रयिष्यते, तत्सामानाधिकरण्यात्तिङिति षष्ठ्यर्थे प्रथमा, तिङन्तस्य पदस्यावयवो ऽजनुदात्तो भवतीत्यर्थः, तत्र स्थानषष्ठ्यभावादलो ऽन्त्यस्येति न प्रवर्त्तते, तस्माच्चार्थः सर्वग्रहणेनेत्यत आह । 'सर्वग्रहणमित्यादि'। असति सर्वग्रहणे यत्र विधेयान्तरं नास्त्यामन्त्रितस्येत्यादौ तत्रैवानुदात्तत्वं विधीयेत तत्र ह्येतद्विधानार्थमामन्त्रिताद्यनूद्यते, विधेयान्तरसद्भावे तु न तस्यानुदात्तत्वं विधायेत, वाक्यभेदप्रसङ्गात् । तथाहि । सिद्धस्य वस्तुनो धर्मान्तरं शक्यते विधातुं नासिद्धस्य, नह्यसति कुड्ये चित्रकर्म, ततश्च वांनावादय एकेन वाक्येन विधेयाः, अपरेण च तेषामनुदात्तत्वमिति वाक्यभेदः, विशिष्टविधानेऽप्यनेकार्थविधानाद्विधिगौरवलक्षणो वाक्यभेदः स्यादेव, संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते, सति तु सर्वग्रहणे तत्सामर्थ्याद्वाक्यभेदः सह्यतइत्याह । 'तेनेति'। प्रयोजनान्तरमाह । 'युष्मदस्मदादेशाश्च सर्वस्य सुबन्तस्य यथा स्युरिति'। अन्यथा केवलयोर्युष्मदस्मदोरेव स्युः, षष्ठ्येकवचने ङसोऽश् ङसिङसोश्चेति पूर्वैकादेशे यद्यपि दोषाभावस्तथापि वचनान्तरे दोषप्रसङ्गः, सर्वग्रहणे तु सति युष्मदस्मद्भ्यां तदवयवकं पदं लक्ष्यतइति सर्वस्य पदस्य वांनावादयो भवन्तीति । ननु च पदस्येति वर्त्तते, विभक्त्यन्तं च पदं, तत्रान्तरेणापि सर्वग्रहणं विभक्त्यन्तस्य भविष्यतीत्यत आह । 'यत्रापीति।' भवेदेवं यत्र विभक्त्यन्तं पदं यत्र तु विभक्तौ पदं तत्र युष्मदस्मदोरेव प्रसङ्ग इत्यर्थः । 'ग्रामो वां दीयतइति'। चतुर्थीद्विवचने, स्वादिष्विति पूर्वं पदं भवति ॥

"आमन्त्रितस्य च" ॥ 'सर्वमनुदात्तं भवतीति'। आमन्त्रितसंबन्धिनः सर्वे ऽचो ऽनुदात्ता भवन्तीत्यर्थः । एतच्चानुवृत्तस्य सर्वशब्दस्यान्वयमात्रं प्रदर्शितं न त्वत्रास्योपयोगः कश्चित् । 'समानवाक्यइ-

१ युष्मदस्मदोरेव स्युरित्यारभ्य सर्वग्रहणे सति त्वित्येतत्पर्यन्त क॰ पु॰ पाठो नास्ति ।

त्यादि'। अर्थैकत्वादिकं लौकिकं वाक्यलक्षणम्, इह तु पारिभाषिकं वाक्यम्। आख्यातं साव्ययकारकविशेषणं वाक्यमिति, आख्यातमित्येकत्वं विवक्षितं, निमित्तनिमित्तिनोः समानएकस्मिन्वाक्यआधारभूते सति निघातादयो भवन्तीति वक्तव्यं, किमर्थमित्याह। 'इहेति'। भवतीह विष्णुमित्रो देवदत्तागच्छेति वाक्यद्वयमेतत्तिङन्तद्वययोगात्, तत्र देवदत्तेत्यस्यामन्त्रितस्य निघातो न भवति। ननु च पदविधिरयं ततश्चासामर्थ्यादेवात्र न भविष्यति, अस्त्यत्र सामर्थ्यं विष्णुमित्रमन्विष्यान्यत्र गच्छन्तं देवदत्तं प्रतीदमुच्यते, ततश्च विष्णुमित्रस्येह भवनं देवदत्तागमनस्य निमित्तत्वेनोच्यतइत्यस्ति व्यपेक्षा, क्वचिदेतदुदाहरणं न पठ्यते। 'अयं दण्ड इति'। अस्तीति गम्यमानत्वादेतावदेकं वाक्यम्। अत्राप्यनेनेति सर्वनाम्ना परामृष्टस्य दण्डस्य करणत्वादस्ति सामर्थ्यमिति तिङन्तस्य निघातप्रसङ्गः। 'ओदनं पचेति'। त्वत्कर्तृकत्वेन त्वत्स्वामिको मत्स्वामिकश्चोदनो भविष्यतीत्येवं पाकस्य युष्मदस्मदर्थस्य च व्यपेक्षाऽस्तीत्यादेशप्रसङ्गः, एवमतिप्रसङ्गपरिहारः प्रयोजनमित्युक्तम्। इदानीमव्याप्तिपरिहारोपि प्रयोजनमित्याह। 'इह चेति'। किं पुनः कारणमेषूदाहरणेषु निघातादयो न स्युरित्यत आह। 'आमन्त्रितान्तमित्यादि'। इह स्थिता मातेत्यन्वयो न त्विह देवदत्तेति, नद्याः कूलमित्यन्वयो न जह्यास्तिष्ठतीति, शालीनामोदनमित्यन्वयो न शालीनां ते इति, ततश्चासामर्थ्यान्न स्युरित्यर्थः॥

"युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ"॥ 'द्विवचनान्तयोरेवेति'। तेन वचनान्तरेणोदाहृतमिति भावः। स्थग्रहणमनर्थकं षष्ठ्यादिष्वादेशविधानादेव तात्स्थ्यसिद्धेरित्यत आह। 'स्थग्रहणमिति'। श्रूयमाणविभक्तिकयोरेवादेशा यथा स्युर्लुप्तविभक्तिकयोर्मा भूवन्नित्यर्थः। श्रूयमाणायां हि विभक्तौ तत्स्थत्वं भवति न पुनर्लुप्तायां, प्रत्ययलक्षणेनापि कार्यं शास्त्रं वाऽतिदिश्यते न तात्स्थ्यं, यदि वा तिष्ठतिरप्रमविहानावपि दृष्टः, यथा समये तिष्ठ सुग्रीवेति, समयं मा विहासीरित्यर्थः, तेनायमर्थः, षष्ठीचतुर्थीद्वितीया अजहतोर्युष्मदस्मदोरादेशा भवन्तीति।

'इति युष्मत्पुत्र इति'। इतिशब्दात्पदात्परयोः षष्ठ्यन्तयोर्युष्मदस्मदोः प्रत्ययलक्षणेन वा[1]नावौ न भवतः ॥

"न चवाहाहैवयुक्ते" ॥ चः समुच्चये, वा विकल्पे, ह अहेत्यद्भुते, ह खेदे च, एवोऽवधारणे। 'एभिर्युक्तइति'। एभिर्योगे सतीत्यर्थः। यद्वा एभिर्युक्ते युष्मदस्मदोरर्थे इत्यर्थः। युक्तग्रहणमनर्थकं तृतीयानिर्देशत एव सिद्धं, यथा तुल्यार्थैरतुलोपमाभ्यामित्यत्रेत्यत आह। 'युक्तग्रहणमिति'। यदा युष्मदस्मदर्थेन[2]तान्समुच्चयादींश्चादयो द्योतयन्ति तदा तैस्तयोः साक्षाद्योगः, तत्रैवायं प्रतिषेधो यथा स्यात् युक्तयुक्ते माभूदित्येवमर्थं युक्तग्रहणमित्यर्थः। एतदेव युक्तग्रहणं लिङ्गम्। अत्र प्रकरणे युक्तयुक्तस्यापि ग्रहणमिति, तेनोत्तरः प्रतिषेधो युक्तयुक्ते[3]षु भवति ॥

"पश्यार्थैश्चानालोचने" ॥ दर्शनं पश्यः, अस्मादेव निपातनाद्भावे शप्रत्ययः, पाघ्रादिसूत्रेण पश्यादेशः, पश्योऽर्थो येषां ते पश्यार्थाः, तदाह। 'पश्यार्था दर्शनार्था इति'। यदि तु 'पाघ्राध्माधेट्दृशः शः' इति कर्तरि शप्रत्ययः स्यात्, ततो द्रष्ट्रर्थैरित्यर्थः स्यात्, तथा चालोचनपर्युदासोऽनर्थकः स्यात्, नह्यालोचनार्था द्रष्ट्रर्था भवन्ति। 'दर्शनं ज्ञानमिति'। यद्यपि दृशिश्चक्षुर्विज्ञाने प्रसिद्धस्तथापि तस्य पर्युदासात् ज्ञानमात्रे दृशिरिह वर्ततइत्यर्थः। ग्रामो जनसमुदायः, समीक्ष्य, मनसा निरूप्येत्यर्थः ॥

"सपूर्वायाः प्रथमाया विभाषा" ॥ 'विद्यमानपूर्वादिति'। तेन सहेति तुल्ययोगइत्यत्र तुल्ययोगइत्युपाधेः प्रायिकत्वाद्विद्यमानवचनस्यापि सहशब्दस्य समासः, वोपसर्जनस्येति सभावः। 'युष्मदस्मदोर्विभाषाऽनन्वादेशइति'। येयं युष्मदस्मदोर्विभाषा सा ऽनन्वादेशे भवति, अन्वादेशे तु नित्यमादेशविधिरित्यर्थः। 'अपर आहेति'।

१ वस्नसौ न भवत इति इं· पु· पाठः।
२ गतान् समुच्चयादीनित्यारभ्य युक्तग्रहणमित्यर्थ इत्येतत्पर्यन्तं पाठो नास्ति इं· पु·।
३ युक्तयुक्तेपीति इं· पु· पाठः।

पूर्वस्यैव वाक्यस्य व्याख्यानान्तरं, पूर्वं विभाषाऽनुवादेन विषयो नियम्यतइत्युक्तमिदानीं तु विशिष्टे विषये विकल्प एव विधीयते इत्युच्यते, न केवलं सूत्रोक्तविषये ये प्राप्तास्तएव विकल्प्यन्ते, अपि तु सर्वे सर्वविषया इत्यर्थः । 'न स्तर्हीति' । वक्तव्येनैव सिद्धत्वादिति भावः । 'अन्वादेशार्थमिति' । ननु पूर्वमन्वादेशे सूत्रं न व्याप्रियतइत्युक्तमिदानीं तु तत्रैव व्याप्रियतइत्युच्यते तत्को ऽत्र निर्णय इत्याह । 'तद्[1]द्वयमिति' । तदिति तत्रेत्यर्थः । वाक्योपन्यासे वा, पूर्वा व्याख्या परया व्याख्यया बाध्यतइत्यर्थः ॥

"तिङो गोत्रादीनि कुत्सनाऽऽभीक्ष्ण्ययोः" ॥ 'पचति गोत्रमिति'। पचिर्व्यक्तीभावे, यथा लोकपङ्क्तिरिति, भोजनाद्यर्थं गोत्रं ख्यापयतीत्यर्थः, एवं हि कुत्सा भवति । 'पचतिपचति गोत्रमिति' । विवाहादिविषये पुनःपुनर्गोत्रं ख्यापयतीत्यर्थः, तच्च कुत्साया अभावादाभीक्ष्ण्यग्रहणं, नित्यवीप्सयोरिति द्विर्वचनं, ब्रुवशब्दः कुत्सितवचनः, अत एवास्याभीक्ष्ण्ये पृथगुदाहरणं न प्रदर्शितं, पचति प्रब्रुवनमित्यादावात्मप्रशंसया कुत्सः, प्रवचनमध्यापनम् । वा नामेति गणसूत्रं व्याचष्टे । 'नामेत्येतदिति' । 'पचति पापमिति' । पापमिति क्रियाविशेषणम् । 'खनति गोत्रं समेत्य कूपमिति' । गोत्रं कुलं समुदितं भूत्वा कूपं खनतीत्यर्थः । किमिदं कुत्सनाऽऽभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणम् । एतयोरर्थयोर्गोत्रादीनि भवन्ति तानि च तिङः पराण्यनुदात्तानि भवन्तीति, आहोस्विदनुदात्तविशेषणं तिङः पराणि गोत्रादीनि अनुदात्तानि भवन्त्येतयोरर्थयोरिति, अस्मिन्वि[2]वादे निर्णयमाह । 'कुत्सनाभीक्ष्ण्यग्रहणं चेति' । पठ्यतइति पाठः, संनिवेशविशेषः, तस्य विशेषणं वेदितव्यम् । अयं चार्थो योगविभागाल्लभ्यते, तिङो गोत्रादीनीत्येको योगोऽनुदात्तविधानार्थः, कुत्सनाभीक्ष्ण्ययोरिति द्वितीयो योगः, गोत्रादीनीत्येव, परिभाषेयम् । इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाण्येव

१ तद्वयमिति मु॰ मू॰ पु॰ नोपलभ्यते ।
२ विचारे इति इं॰ पु॰ पाठः ।

वाह्यायीति, तेन किं सिद्धं भवतीत्यत आह । 'तेनेति' । 'अन्यथा-पीति' । 'चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः,' 'कुत्सने च सुप्य-गोत्रादा'वित्यत्र ॥

"तिङ्ङतिङः" ॥ 'भवति पचतीति' । पचतीत्येतद्भवति, पाक-क्रिया भवतीत्यर्थः । तत्र साध्यसाधनभावेन द्वयोः क्रिययोरन्वयादः-स्ति सामर्थ्यं, यथोक्तं पच्यादिक्रिया भवतिक्रियायाः कर्त्री भवन्तीति, तत्र पाकस्य स्वसाधनानि प्रति साध्यस्यापि भवनं प्रति सिद्धत्वं यथाह भर्तृहरिः ॥

तत्र यं प्रति साध्यत्वमसिद्धं तं प्रति क्रिया ।
सिद्धा तु यस्मिन्साध्यत्वं न तमेव पुनः प्रति ॥

इति । अस्त्येतत्किं तर्ह्यतिङ्ग्रहणमनर्थकं समानवाक्याधिकारात्, समानवाक्यइति वर्त्तते, न चैकस्मिन्वाक्ये तिङन्तद्वयमस्ति,तदुक्तं पुर-स्तात्, सूत्रकारेण तु समानवाक्याधिकारो न कृत इत्यतिङ्ग्रहणमकारि ॥

"न लुट्" ॥ 'श्वः कर्त्तेत्यादि' । अथात्र निघाते प्रतिषिद्धे कः स्वरः श्रूयतइत्याह । 'तासेःपरस्येति' ॥

"निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्" ॥

यद्यदार्थे च हेतौ च विचारे यदिचेच्चणः ।
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ॥
कच्चित्प्रश्ने नेत्रिषेधे प्रशंसायां कुविन्स्मृ[१]तम् ।
यत्राधारे निपातत्वं यदादीनां विशेषणम् ॥
समासे गुणभूतानामपि गत्यन्तरं न हि ।
नैव वाऽयं समासः सुबव्ययत्वेन लुप्यते ॥

तत्र बहूचा नेच्चेदिति निपातसमाहारमधीयते, नेदेवमायुनत्त-यत्र देवाः । अन्यश्चेचाभिगच्छतीति । 'चेदर्थे वर्त्ततइति' । य एव

१ कुत्सने सुप्यगोत्रादावित्यत्र चेति इं॰ पु॰ पाठो नास्ति ।
२ कुविन्स्मृत इति इं पु॰ पाठः ।

Digitized by Google

समुच्चयादिषु दृष्टश्चशब्दः स एव चेदर्थे[1] वर्तते, तदर्थवर्तिनस्तु चिह्नं णकारः, तथा च चादयो ऽनुदात्ता इत्ययं चेदर्थो ऽप्यनुदात्तः, इन्द्रश्च मृळयाति नः, ततः पश्चादघं नशत्, इन्द्रश्चेदस्मान्मृडयेत्, सुखयेदित्यर्थः, त्वं च सोम नो वशो जीवातुं न मरामहे, हे सोम त्वं चेदस्मान् जीवातुं जीवितुं वशः उश्याः कामयेथा इत्यर्थः । 'समुच्चयादिषु यश्चशब्द इति' । एष्वर्थेषु न भवतीत्यर्थः । उदाहरणेषु करोतिशब्दो विकरणस्वरेण मध्योदात्तः । 'भुङ्क्त इति' । उदात्तनिवृत्तिस्वरेणान्तोदात्तः । 'अधीत इति' । अनुदात्तङित इति लसार्वधातुकानुदात्तत्वप्रतिषेधादन्तोदात्तः । 'इणः शतरि रूपमिति' । इणो यणिति यणादेशः । ननु प्रतिपदोक्तत्वादव्ययादिभिः साहचर्याच्च निपातस्यैव ग्रहणं भविष्यति, एवं तर्ह्येतज्ज्ञापयति अत्र प्रकरणे नेदमुभयं व्यवस्थापकमिति, तेन यावद्यथाभ्यामित्यत्र यत्तदेतेभ्यः परिमाणे वतुबिति व्युत्पादितस्य लाक्षणिकस्यानिपातस्यापि यावच्छब्दस्य ग्रहणं भवति, ता[2]वद्दुषो राधो अस्मभ्यं, रास्व यावत्स्तोतृभ्यो अरदो गृणाना इति, यावतोऽश्वान्प्रतिगृह्णीयादिति च । 'यत्र क्व चेति' । अत्र यत्रेत्यस्य उत्तरमित्यनेन साक्षात्संबन्धः । 'दधस इति' । दध धारणेऽनुदात्तेत्, इह हन्ताऽहं पृथिवीमिमां निदधानीह वेह वा, हन्तो नु किमास से प्र[4]थमं नो रथं कृधि इति, छान्दसत्वाद्विघातः ॥

"नह प्रत्यारम्भे" ॥ नहेति निपातसमाहारः प्रतिषेधे वर्तते, प्रत्यारम्भः पुनरारम्भः, तस्य विषयमाह । 'चोदितस्येति' । भुङ्क्ष्वाधीष्वेत्येवं चोदितस्य कर्तव्यतयोपन्यस्तस्य भोजनादेरवधीरणेऽवज्ञाते सति तस्यावधीरयितुरुपालिप्सया उपालब्धुमिच्छया तस्यैव भोजनादेः प्रतिषेधेन संबन्धः प्रत्यारम्भः, पुनरुपन्यासः क्रियते[5] इति यावत् ॥

१ अपीत्यधिकम् इं॰ पु॰ ।
२ यच्छब्दस्येत्यधिकम् इं॰ पु॰ ।
३ तावद्दुषो राधोत्यस्मभ्यं रास्वेति पाठ इं॰ पु॰ नास्ति ।
४ प्रथमं नोरथं कृधीति पाठ इं॰ पु॰ नास्ति ।
५ इतियावदिति इं॰ पु॰ नास्ति ।

Digitized by Google

"अङ्गाप्रातिलोम्ये" ॥ प्रातिलोम्यं प्रतिकूलकारित्वं ततोऽन्यदभिमतकारित्वमप्रातिलोम्यम् । एवं चानुलोम्यमिति वक्तव्यम् । अङ्गशब्द उदाहरणेऽनुज्ञायां, प्रत्युदाहरणे त्वमर्षे ॥

"हि च" ॥ हिशब्दोऽवधारणे हेतौ वा, स च प्रत्युदाहरणे त्वमर्षे ॥

"छन्दस्यनेकमपि साकाङ्क्षम्" ॥ अत्र हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति, तत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथा स्यादिति वचनं तदाह । 'कदाचिदिति' । तत्र छन्दसि दृष्टानुविधानाद्यथाप्रयोगं व्यवस्था । 'अनृतं हीति' । पाप्मा मत्र उच्यते, यस्मादसौ मत्तोऽनृतं वदति तस्मादनृतवदनदोषेण युज्यत इत्यर्थः । 'उदजयदित्याद्युदात्तमिति' । अत्राजयदित्याद्युदात्तमित्यर्थः । 'अजनिष्ट गर्भमिति' । अन्तर्भावितण्यर्थत्वाज्जनेरत्र सकर्मकत्वम् ॥

"यावद्यथाभ्याम्" ॥ यावत्साकल्ये ऽवधारणे वा, यथा योग्यतादिषु यावद्यथाभ्यामिति तृतीयेति दर्शयितुं पचतिभूतेरपि प्रयोग उदाहृतः । तेनैतदपि न चोदनीयं यद्वृत्तान्नित्यमित्येव यथाशब्दे यावच्छब्दे च वतुबन्ते सिद्धः प्रतिषेध इति ॥

"पूजायां नानन्तरम्" ॥ द्वौ प्रतिषेधौ प्रकृतमर्थं गमयत इत्याह । 'किं तर्ह्यनुदात्तमिति' । 'यावद्भुङ्क्ते इति' । ननु चोत्तरत्र नियमो विज्ञास्यते व्यवाये यदि भवति उपसर्गेणैवेति, एवं तर्ह्युत्तरत्रास्य प्रयोजनम् । उपसर्गव्यपेतस्य यावद्यथाशब्दयोश्च मध्ये शब्दान्तरं माभूत्, अथ तु व्यवाये यदि भवति उपसर्गेणैवेत्यस्मादेव नियमात्तत्राप्रसङ्गः, ततोऽनन्तरग्रहणं शक्यमकर्तुम् ॥

"उपसर्गव्यपेतञ्च" ॥ व्यवायो व्यवधानम् । 'अनन्तरमित्येवेति' । तच्चानन्तर्यं सोपसर्गस्य न तिङन्तमात्रस्य ॥

"तुपश्यपश्यताहैः पूजायाम्" ॥ तुप्रभृतीनि पूजाविषयाणि । 'माणवकस्तु भुङ्क्त इति' । आश्चर्यं तुशब्द इति भोजनस्य पूजा गम्यते, एवमन्यत्रापि । 'पश्य मृगो धावतीति' । तत्त्वकथनमेतत् । ननु

पूजायां नानन्तरमित्यतः पूजायामित्यनुवर्तत एव, तत्किं पूजायामित्यनेन, तत्राह । 'पूजायामिति वर्तमानइति'। 'नह्वीति' । ततश्च तदनुवृत्ताविहापि न लुडित्यादिके विषये प्रतिषेधस्य प्रतिषेधः स्यान्मा भूदेवं निघातस्यैव प्रतिषेधो यथा स्यादित्येवमर्थं पूजायहणमित्यर्थः । किं च अनन्तरमित्येवं तदभूदिह त्वविशेषेणोच्यते ॥

"अहो च" ॥ 'पृथग्योगकरणमुत्तरार्थमिति' । उत्तरो योगोऽहोयोगएव यथा स्यात्तुप्रभृतिभिर्योगे मा भूत् ॥

"शेषे विभाषा" ॥ 'असूयावचनमेतदिति'। अनाश्चर्यभूतमेव वस्त्वसूययाश्चर्यवत्प्रतिपादयतीत्यर्थः । शेषवचनं किम् । यावता योगविभागसामर्थ्यादेव पूर्वप्रकृतेषु किंचिन्नानुवर्ततइति ज्ञातं तत्र चानुकृष्टत्वात्पूजायामित्येतन्निवर्तिष्यते, अत आह । 'पूजायामित्यस्येति' ॥

"पुरा च परीप्सायाम्" ॥ 'पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयतीति'। भविष्यतो विद्योतनादेरध्ययनान्तरायभूतस्याचिरकालभावित्वं द्योतयति, तेनात्र त्वरा गम्यतइति भावः । विद्योतनादावध्ययनं धर्मशास्त्रे प्रतिषिद्धमतस्तदुपन्यासेन त्वरितमधीष्वेति गम्यतइत्यर्थः । उदाहरणे यावत्पुरानिपातयोरिति भविष्यदर्थे लट्, प्रत्युदाहरणे लट् स्मइति । 'अत्र भूतकालविप्रकर्षमिति'। भूतस्याध्ययनस्य चिरकालप्रवृत्तत्वं द्योतयति । तेन नात्र त्वरा गम्यतइति भावः ॥

"नन्वित्यनुज्ञैषणायाम्" ॥ किंचित्कर्तुं स्वयमेवोद्युक्तस्यैवं क्रियतामित्येवं रूपोऽभ्युपगमोऽनुज्ञा, सूत्रार्थमुदाहरणेन दर्शयति। 'करणं[१] पचतीति'। उपलक्षणमेतत्, करणगमने प्रतीत्यर्थः । उदाहरणे वर्तमाने लट्, प्रत्युदाहरणे तु भूते ननौ पृष्टप्रतिवचनइत्येनेन, अङ्गाप्रतिलोम्यइत्यादिवत् निद्धे इतिकरण एकनिपातोऽयमिति दर्शनार्थः, अन्यथा द्वयोरपि निपातयोर्ग्रहणं संभाव्येत ॥

"किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्" ॥ 'अप्रतिषिद्धमिति'। अप्रतिषिद्धार्थमित्यर्थः । 'पूर्वं किंयुक्तमिति' । तत्समीपे किमः श्रूयमाण-

१ गमनं प्रतीति मु· मू· पाठः स पदमञ्जर्यसंमतः ।

त्वात्। 'उत्तरं तु न किंयुक्तमिति'। विपर्ययात्। 'अपरेत्यादि'। न समीपे श्रूयमाणत्वं किंशब्देन संबन्धे हेतुः किं तु संशयविषयत्वं, तच्च द्वितीयस्याप्यस्ति अतस्तस्यापि तेन योग इत्युभयत्र प्रतिषेध इत्यर्थः। ये त्वाहुः पूर्वं किंयुक्तमिति ते मन्यन्ते, ऽस्तु द्वयोः संशयविषत्वं किंशब्देन तु समीपे श्रुतक्रियाविषय एव प्रश्नो द्योत्यते, क्रियान्तरविषयस्तु प्रश्न आहोस्विदित्यनेन, क्रियाप्रश्नइति चोच्यते, तस्मात्तस्यैव निघातप्रतिषेध इति ॥

"लोपे विभाषा" ॥ प्रकृतत्वात्किम एव लोपो विज्ञायतइत्याह। 'किमो लोप इति'। 'क्व चास्येति'। शास्त्रे क्वचिदपि किमो लोपस्याविहितत्वात्प्रश्नः। न शास्त्रीयस्यैवादर्शनस्य लोपसंज्ञा किं तर्ह्यदर्शनमात्रस्येत्युत्तरम्। 'यत्रेति'। 'न च प्रयुज्यतइति'। अर्थप्रकरणादिना गम्यमानत्वात्, उदाहरणे आहोस्विच्छब्दः पक्षान्तरप्रश्ने, स च नान्तरेण पूर्वप्रश्नमित्यर्थात्पूर्वेच किमर्थो गम्यते तदाह। 'विनैव किमेति'। 'प्राप्तविभाषेयमिति'। कथं पुनः प्राप्तिर्यावता किंशब्देन योगे पूर्वो योगस्तत्राह। 'किमर्थेनेति'। 'पूर्ववत्प्रत्युदाहरणानीति'। तान्येव किंशब्दरहितानीत्यर्थः ॥

"एहिमन्ये प्रहासे लृट्" ॥ 'एहिमन्यइत्यनेनेति'। समुदायाभिप्रायमेकवचनम्, अन्यथा आख्याते द्वे आङ् चापर इति बहुवचनप्रसङ्गः, उदाहरणे प्रहासे च मन्योपपदइत्यादिना पुरुषव्यत्ययः। 'सुष्ठु च मन्यसइति'। भूतमर्थं दर्शयन् प्रहासाभावमाह, अत एव पुरुषव्यत्ययोऽपि न कृतः। 'गत्यर्थलोटा लृडित्येव सिद्धइति'। आङ्पूर्वादिणो लोट्, सिपो हिः। 'अन्यत्र माभूदिति'। क्वान्यत्र माभूत्, वृत्तिकारेण यत्प्रत्युदाहृतम् एहि मन्यसइत्यादि, तत्र कथं पुनरेहिमन्यइत्यनेन योगनियमः क्रियमाण एहि मन्यसइत्यनेन योगे निवृत्तिं करोतीत्याह। 'उत्तमोपादानमतन्त्रमिति'। अतन्त्रत्वे कारणमाह। 'प्रहासएव हीति'। तन्त्रत्वे नियमस्य व्यावर्त्यं न संभवेदित्यर्थः। भाष्ये तु प्रत्युदाहरणेऽप्युत्तम एव प्रयुक्तस्तत्रायमर्थः। एहि रथेन त्वं यास्यसीत्येवमहं मन्यइति ॥

Digitized by Google

"जात्वपूर्वम्" ॥ 'जात्वित्येतदपूर्वमिति' । अथ तिङन्तविशेषणमपूर्वत्वं कस्मान्न भवति, युक्तं चैतत्, विशेषणेन संबन्धुं योग्ये सति निमित्तिनि निमित्तस्याप्रधानस्य नहि युक्तं विशेषणम्, उच्यते । यदयमाहो उताहो चानन्तरमित्यत्रानन्तरग्रहणं करोति ततो ज्ञायते निमित्तस्यैवं विशेषणमिति, अन्यथा तत्राप्यपूर्वमित्यनुवृत्तेरेव केवलतिङन्तस्यानन्तर्ये लभ्यतइति किं तेन । ननु च शेषप्रक्लृप्त्यर्थं तत्स्यात् शेषे विभाषा, कश्च शेषः, सान्तरः शेष इति, अन्तरेणाप्यनन्तरग्रहणं प्रक्लृप्तः शेषः, कथम्, अपूर्वमिति प्रकृतं सपूर्वः शेष इति ॥

"किंवृत्तं च चिदुत्तरम्" ॥ वृत्तमित्यधिकरणे क्तः, किमो वृत्तं किंवृत्तमिति, अधिकरणवाचिनश्चेति कर्त्तरि षष्ठी, अधिकरणवाचिना चेति समासप्रतिषेधे प्राप्ते ऽस्मादेव निपातनात्समासः, यदि यत्र किंशब्दो वर्त्तते तत्सर्वं गृह्येत किमीयः कैमायनिः किंतरामित्यादेरपि ग्रहणप्रसङ्ग इति मत्वा परिसञ्चष्टे । 'वृत्तग्रहणेनेति' । चिदुत्तरमित्येतत्किंवृत्तस्य विशेषणं न तिङन्तस्य, पूर्वोक्तात्सामान्यापेक्षया ज्ञापकात् ॥

"आहो उताहो चानन्तरम्" ॥ 'अपूर्वमित्येवेति' । अत एवोताहोग्रहणम्, उतशब्दपूर्वत्वादाहोशब्दस्य ॥

"शेषे विभाषा" ॥ 'कश्च शेष इति' । बहूनां प्रकृतत्वात्प्रश्नः । 'यदन्यदनन्तरादिति' । [1]प्रतिषेधस्य निमित्तभूतमाहोउताहोग्रहणं तावदवश्यमनुवर्त्त्यम्, उताहोग्रहणाच्चापूर्वमित्यप्यनुवर्त्तते तत्र पारिशेष्यादनन्तरापेक्ष एव शेष इति भावः ॥

"गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत्" ॥ 'गमिना समानार्था गत्यर्था इति' । अर्थप्रदर्शन[2]मेतत्, गतिरर्थो येषामिति तु विग्रहः, गत्यर्थलोटा युक्तमिति योगः, पुनरर्थद्वारको निमित्तनिमित्तिभावः, लोडन्तवाच्यं हि निमित्तं लृडन्तवाच्यस्य । 'न चेत्कारकं सर्वमन्यद्भवतीति' । सर्वं चेत्कारकमन्यत्तदा निघातप्रतिषेधो न भवतीति भावः, अत्र

१ निपातेत्यधिकम् इं० पु० ।
२ परमित्यधिकम् इं० पु० ।

Digitized by Google

लोडन्ते च लृडन्ते च यावत्किञ्चन कारकम् ।
दृश्येत यदि तत्सर्वं वाच्यावाच्यविवेकतः ॥

तदेहापि तर्हि प्राप्नोति वह ग्रामं नय शालींस्त्वं पितैतांस्त्वं भोक्ष्यसइति, यत्र हि सर्वं भिद्यते तत्रैव न भवितव्यं यथा वृत्तावुपन्यस्तयोः प्रत्युदाहरणयोः ।

न चात्र भिद्यते सर्वमभेदात्कालिकर्मणोः ।

अथायमर्थः स्यात्सर्वस्मिन्कारकेऽनन्यस्मिन्निघातप्रतिषेधो न तु क्वचिदपि भिद्यत इति तदेहापि न स्यात् आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसइति, भिद्यते ह्यत्र कर्म तस्माद्व्याख्येयमेतत्, तत्राह । 'यत्रैवेति' । एवकारेण वाच्यव्यतिरिक्तस्य निरासो न तु सर्वस्यानन्यत्वं विवक्षितं तत्स्पष्टीकृतम् । 'कर्तृकर्मणी एवेति' । एतच्च प्रत्यासत्तेर्लभ्यते, प्रत्यासन्नं हि तत्तस्य यत्तेनैवाभिधीयते, उदाहरणेषु प्रथमतृतीययोः सर्वमनन्यत्, व्रज्यसीत्यस्य तु निघातप्रसङ्गश्चिन्त्यो नानावाक्यत्वात्, द्वितीयचतुर्थयोर्वाच्यमात्रं वहेर्गुणभूतगमनाभिप्रायं गत्यर्थत्वं प्रापणार्थस्त्वयं, तथा च ।

नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च ।

इति भेदेन गणनं कृतं, ननु च शक्तिः कारकं, सा च प्रतिक्रियं भिद्यते, तत्कथमिहाभिन्नं कारकं, शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वाददोषः । 'आगच्छेरिति' । लिङयं न लोट् । 'पश्यतीति' । लडयं न लट्, प्रत्युदाहरणयोः सर्वमन्यत्, कारकशब्देनापि सूत्रे कारकव्यक्तिरेवाभिधीयते, तेन कर्तृकर्म्मत्वाभेदेऽपि व्यक्तिभेदात्कारकभेदः, त्वं चाहं च व्रज्याव इति, अक्रियमाणे सर्वग्रहणे यत्र वाच्यं न भिद्यते तत्रैव भवितव्यम्, इह च भिद्यते वाच्यम्, एकत्रैकमपरत्र द्वयमिति निघातप्रतिषेधो न स्यात्, क्रियमाणे तु सर्वग्रहणे यथा सिद्ध्यति तथा दर्शयति । 'लृडन्तवाच्ये हीति' ॥

"लोट् च" ॥ 'शाधीति' । शासेर्लोट्, सिप्, सिपो हिः, शा हाविति शादेशः, तस्यासिद्धत्वात् झल्लक्षणं धित्वम् । प्रशाधीति

१ पठ्यामिति इं· पाठः ।

प्रायेण पाठः स न युक्तः, सोपसर्गत्वेनोत्तरसूत्रविषयत्वात्। 'पृथग्योग-करणमुत्तरार्थमिति'। उत्तरो विकल्पो लोट एव यथा स्यात् लटो मा भूदिति॥

"हन्त च"॥ 'हन्त प्रभुनग्वावहाइति'। भुजेर्लोट्, भुजो-ऽनवइत्यात्मनेपदं वहिः, टेरेत्वम्। आडुत्तमस्य पिच्च, एत ऐ, अनुदात्त-त्वाल्लसार्वधातुकमनुदात्तत्वं, विकरणस्वरः।

"आम एकान्तरमामन्त्रितमनन्तिके"॥ अन्तयतीत्यन्तरं व्यव-धायकम्। एकमन्तरं यस्य तदेकान्तरम्, उदाहरणे निघाते प्रतिषिद्धे वाष्ठिकमाद्युदात्तत्वं, दूराद्धूते चेति प्लुतः, भवच्छब्दस्य विभाषा भवद्भ-गवदघवतामिति रुत्वम्, अवशब्दस्य च ओकारः, भोभगोइत्यादिना यत्वं, तस्य हलि सर्वेषामिति लोपः। ननु चामन्त्रितं पूर्वमविद्यमा-नवदिति भोःशब्दस्याविद्यमानत्वादेकान्तरता नोपपद्यते, अत आह। 'भोइत्येतदिति'। 'तदुभयमप्यनेन क्रियतइति'। कथं पुनरप्रकृताया असंशब्दितायाश्चैकश्रुतेः प्रतिषेधः शक्यो विज्ञातुम्, उच्यते, नञत्र विपक्षवचनः, अधर्मानृतादिवत्, अन्तिकविरुद्धमनन्तिकं, दूरमित्यर्थः, तत्र चैकश्रुतिरुच्यते, ततश्च पचसि देवदत्तेत्यादावनन्तिके सावकाशमा-मन्त्रितनिघातं बाधित्वा एकश्रुतिः प्राप्नोति, सा तावत्प्रतिषिद्ध्यते, ततोऽपवादे प्रतिषिद्धउत्सर्गभूतो निघातः प्राप्नोति सोऽपि प्रतिषिध्यते, एकश्रुतिमात्रप्रतिषेधे हि तत्रैवायं ब्रूयात् नाम एकान्तरमिति, एवं ह्यामन्त्रितमनन्तिकइति च न वक्तव्यं भवति, सोऽयमेवं सिद्धे यन्निघातप्र-करणे इदं ब्रवीति तेन विजानीमो निघातोऽपि प्रतिषिध्यतइति, केवलस्य निघातस्यैकश्रुत्या बाधितस्य प्रतिषेधोऽनर्थक इति सामर्थ्यादुभयोः प्रति-षेधः। ननु चैकश्रुतिरपि देवदत्ता३[1] आगच्छेत्यादौ सावकाशा, कथमां भो देवदत्त इत्यादौ निघातस्य बाधिका, प्रत्युत परत्वादेकश्रुतेर्निघात एव बाधक इति तस्यैवात्र प्रसङ्ग इति प्रतिषेधोऽपि तस्यैव न्याय्यः, तस्य च

१ परमित्यधिकम् इं॰ पु॰।

Digitized by Google

प्रतिषेधे एकश्रुतिः स्यादेव, अत्राहुः । पदद्वयमात्रनिबन्धनत्वादन्तरङ्गो निघातः पूर्वं प्रवर्त्तते, ततो दूरात्संबोधनमधिकं निमित्तमपेक्षमाणैकश्रुतिरिति सैवानन्तरं प्राप्नोति तां तावद्बाधते पूर्वोक्तेन न्यायेन निघातमपीति सूक्तं तदुभयमनेन क्रियतइति, यथैव तर्हि एकश्रुतिर्बाध्यते तथैव प्लुतोदात्तोऽपि बाध्येतात आह । 'प्लुतोदात्तः पुनरिति' । 'अपरेषामिति' । ते मन्यन्ते सादृश्येऽत्र नञ् न विपद्ये, अन्यथा दूरइत्येव ब्रूयादिति प्राप्तिरेव नास्ति अदूरत्वात्कथं तर्हि प्लुत उदाह्रियते अत आह । 'प्लुतोऽपीति' ॥

"यद्धितुपरं छन्दसि" ॥ 'जाये स्वो रोहावेहीति' । रुहेर्लोट्, वस्, शप्, आडुत्तमस्य पिच्च, लोटो लङ्वदिति लङ्वद्भावान्नित्यं ङित इति सलोपः, आङ्पूर्वादिणो लोट्, सिपो हिः, एहीत्यनेन परभूतेन युक्तस्य रोहावेत्यस्य लोट् चेति प्राप्तो निघातप्रतिषेधो नियमेन निवर्त्यते, तेन स्वशब्दाश्रयो निघातो भवति । ननु परमपि छन्दसीतिवचनात् स्वःशब्दस्य पूर्वाङ्गवद्भावाज्जायेस्वरित्यामन्त्रितं ततश्चामन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानत्वान्निघातो न प्राप्नोति, प्रतिषिध्यते ऽत्राङ्गवद्भावः । अव्ययानां प्रतिषेध इति । नैवमत्राङ्गवद्भावः प्राप्नोति, उक्तं हि तत्र, 'षष्ठ्यामन्त्रितकारकवचनं' 'तन्निमित्तग्रहणं चे' ति । नहि स्वःशब्दः षष्ठ्यन्त आमन्त्रितकारकं तन्निमित्तं वा स्वरं वाङ्गवद्भावो नाविद्यमानवत्त्वम्, स्वःशब्दस्य रो रीति लोपो न भवति उत्वं च भवति छान्दसत्वात् । अथेदानीं रोहावेत्यनेन युक्तस्य एहीत्यस्य लोट् चेति निघातप्रतिषेधः कस्मान्न भवति, न रुहिर्गत्यर्थः, गत्यर्थाकर्मकेत्यत्र पृथग्ग्रहणात्, यदि न गत्यर्थः, आरोहन्ति हस्तिनं मनुष्याः आरोहयति हस्ती मनुष्यान्, गतिबुद्धिप्रत्यवसानार्थेति कर्मसंज्ञा न प्राप्नोति, तस्मा[1]दुपरिगमनरूपव्यापारो रुहेरर्थः, गत्यर्थाकर्मकेत्यत्र च रुहिग्रहणं प्रपञ्चार्थम्, एहीत्यस्य तु निघातप्रतिषेधो न भवति, विभाषितं सोपसर्गमनुत्तममिति वचनात् ॥

१ अस्तु तर्हि गतिरेव रुहेरर्थ इति इं· पु· पाठः ।

"चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः" ॥ 'इहा'पीति'। न केवलं तिङो गोत्रादीनीत्यत्रैवेत्यपिशब्दार्थः। तत्र हेतुस्तत्रैव प्रतिपादितः। 'शुक्लीकरोति चनेति'। अगतेरिति प्रतिषेधाभावादत्र निघातप्रतिषेधो भवत्येव। 'यत्काष्ठमिति'। शुक्लीशब्दस्य निघातो न भवति ॥

"चादिषु च" ॥ 'तदह गृह्यन्तइति'। प्रत्यासत्तेः। 'चादयोसत्त्वे'इत्यत्र येषां ग्रहणं ते विप्रकृष्टाः, समुच्चयो विकल्पश्चानेकस्य धर्म इत्युत्तरसूत्रे वक्ष्यति। अतः खादति चेत्यस्योपन्यासः, न त्वस्य निघातप्रसङ्गः, नानावाक्यत्वात्, खादति हेत्यादेस्तु प्रक्रमाभेदायोपन्यासः। 'परन्तु निहन्यतएवेति'। प्रशब्दात्समानवाक्यगतात् पदात्परत्वात् ॥

"चवायोगे प्रथमा" ॥ 'अगतेरिति'। 'पूर्वसूत्रइत्यादि'। अत एव पूर्वसूत्रे प्रत्युदाहरणावसरउक्तं प्रथमस्याच तिङन्तस्य चवायोगे प्रथमेति निघातः प्रतिषिध्यतएवेति, प्रथमेति स्त्रीलिङ्गस्य निर्वाहमाह। 'प्रथमा तिङ्विभक्तिरिति'। प्रथमाग्रहणाद्यावत्यस्य द्वितीयादेः संभवमाह। 'चवायोगो हीति'॥

"हेति क्षियायाम्" ॥ आचारभेद आचारोल्लङ्घनम्। उदाहरणे उपाध्याये पदातौ गच्छति शिष्यस्य रथेन गमनं प्रतिषिद्धम् इत्याचारभेदः ॥

"अहेति विनियोगे च" ॥ 'नानाप्रयोजनइति'। अनेकप्रयोजनः नियोगः प्रेषणम्। 'पृतश्चेति'। स पुनः क्षियायां क्षियाहेतुकः, विनियोगे प्रेषहेतुकः ॥

"चाहलोपएवेत्यवधारणम्" ॥ उदाहरणे चलोपं दर्शयति। 'ग्रामं चेति'। एवमहलोपेपि द्रष्टव्यम्। तत्र प्रथमे ग्रामकर्मकस्यारण्यकर्मकस्य च देवदत्त एव कर्तेति समानकर्तृकत्वं, द्वितीये तु विपर्ययान्नानाकर्तृकता द्रष्टव्या, अनवक्लृप्तिरसंभावनं, यो हि देवदत्तस्य भोजनं क्वचिदपि न संभावयति स एवं प्रयुङ्क्ते क्वव भोक्ष्यसइति, एवं चानियोगइति परूपत्वं, क्वचित्तु वृत्तावेवेतत्पठ्यते ॥

"चादिलोपे विभाषा" ॥ पूर्वो योग एवशब्दप्रयोगे नित्यार्थः ॥

१ अत्रार्गतिग्रहणं इति मु॰ सू॰ पा॰ ।

Digitized by Google

"वेवावेति च छन्दसि" ॥ वे स्फुटार्थे समायां च, वा व प्रसिद्धौ स्फुटार्थे च ॥

"एकान्याभ्यां समर्थाभ्याम्" ॥ समौ तुल्यावर्थौ ययोस्तौ समर्थौ, शकन्ध्वादिषु दर्शनात्पररूपत्वं, निपातनाद्वा ऽन्त्यलोपः, परस्परं समानार्थता न तिङन्तेन असंभवात्, तिङन्तेन सङ्गताभ्यामित्ययं त्वर्थो न भवति, सर्वयोगे प्रथमेत्यतो योगग्रहणानुवृत्तेरेवास्यार्थस्य सिद्धत्वात् । 'जिन्वतीति' । जिवि: प्रीणनार्थः, इदित्त्वान्नुम्, लट्तिप्शपः । 'चाकशीतीति' । काशिना समानार्थः कशिः प्रकृत्यन्तरमस्तीत्युक्तं, तस्यैतद्यङ्लुकि रूपम् । 'एकशब्दस्य व्यवस्थार्थं चेति' असमस्तस्यैव प्रत्युदाहरणं दर्शितं नान्यशब्दस्येति भावः । 'व्यभिचारित्वात्तस्येति' । एकशब्दो ह्यन्यार्थं व्यभिचरतीति । नानार्थो ह्ययमिति ह्येको गोचरत्यत्र दर्शितं, तत्रासति समर्थग्रहणे ऽन्यशब्देन भिन्नार्थस्यापि ग्रहणप्रसङ्गः । न च साहचर्यमत्र प्रकरणे व्यवस्थापकमिति निपातैर्यद्यदिहन्तेत्यत्रावोचाम ॥

"यद्वृत्तान्नित्यम्" ॥ किंवृत्तं च चिदुत्तरमित्यत्र किंवृत्तशब्दस्य दर्शिता व्युत्पत्तिरिहानुगन्तव्या । 'एतच्चाश्रीयतइति' । तदाश्रयणे हि यद्र्यङ् यदीयं यादायनिरित्यादिभ्यः परस्य न स्यात् । 'जुहुम इति' । प्रत्ययस्वरेणान्तोदात्तमेतत्, अभ्यस्तानामादिः, भीह्रीभृहुमदेति चोभयत्रापि पचीति वर्तते । 'यद्र्यङिति' । यदञ्चति, क्विन्, विष्वग्देवयोश्चेति टेरद्र्यादेशः, कथं पुनः पञ्चमीनिर्देशे सति यत्कामास्ते, यद्र्यङ् वायुरित्यादौ व्यवधाने भवति अत आह । 'पञ्चमीनिर्देशेऽप्यचेति' । एतच्चोत्तरसूत्रे ज्ञापयिष्यते । 'याथाकाम्ये वे[1]ति' । याथाकाम्यं यथेच्छं[2] प्रवृत्तिर्देशकालानपेक्षा, तत्र गम्यमाने वा निघातप्रतिषेधः, यत्र क्वचन यजते ॥

"पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः" ॥ काष्ठादिभ्य इति वार्त्तिके दृष्टं सूत्रावयवत्वेन पठितत्वात्तदनुरोधेन पूजनादित्येकवचनं

१ वा यथाकाम्यइतीति ३ पु॰ पा॰ ।

२ यथेष्टमिति २ पु॰ पा॰ ।

Digitized by Google

नुमानं वा। यथा स्वयं दितं बर्हिरित्यश्वपरश्वादिजन्यच्छेदनविवर्तकमुपलभ्यते प्रत्यक्षेण तथा ऽश्वपरश्वादिप्रापकं प्रत्यक्षप्रमाणगम्यं शास्त्रं न। अनुमानासंभवस्तु दर्शित एव तस्मादभिधानसंस्कारद्रव्यमश्वपरश्वादि मैत्राबार्हस्पत्ययागे निवर्तत एवेति। एवं प्रकृतितः अतिदिश्यमानपदार्थेषु केषांचिद्बाधस्य सत्त्वात्तज्ज्ञानार्थं बाधाध्याय आरम्भणीय इति भावः ॥ ३ ॥

एवं वा भवतु मैत्राबार्हस्पत्ययागे आनुमानिकत्वादश्वपरश्वादीना निवृत्तिः तथा ऽपि अस्ति प्राजापत्ययागः प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्काम इति विहितः। तत्र प्राजापत्यं शतकृष्णलं निर्वपेदित्यनेनैव द्रव्यदेवताविशिष्टयागलाभे चरुमिति व्यर्थं सत् चरुधर्मके लक्षितं सत् प्रात्यक्षिकश्रुत्यैव चरुधर्मान्प्रापयति। तथा सति पूर्वोदाहरणविषमत्वादत्र कृष्णलेषु वितुषीभावरूपद्वारलोपे ऽपि प्रत्यक्षश्रुत्या प्राप्तत्वादपूर्वद्वारा तदङ्गमिति मत्वा, विधेः प्रकरणान्तरे इति सूत्रमत्र प्रवर्तते इत्याह। विधेः अवहननादिविधेः प्रकरणान्तरे प्राजापत्ययागे नाम्नेति शेषः। अग्निहोत्रनामवत् चरुनाम्ना ऽतिदेशात् सर्वकर्म अवहननादियावच्चरुकर्म कर्तव्यमिति पूर्वपक्षे सिद्धान्तं पूर्वाधिकरणस्यमतिदिशति। एवं वेति। वाकारः सिद्धान्तद्योतनार्थः। एवं, यथा आनुमानिकातिदेशे द्वारं पुरस्कृत्यैव पदार्थानामतिदेशः तथा नामातिदेशे ऽपि प्रकृतौ यद्यदर्थं यस्य यस्य पदार्थस्य प्राप्तिः तत्तदर्थं ते ते पदार्था इत्यविशेषेणैवातिदेशात्। किं च द्वारलोपे ऽपि यदि पदार्थानामतिदेशः तर्हि विक्लित्तिरूपद्वारलोपे ऽपि पाकस्यातिदेशेनैव प्राप्तौ घृते श्रपयतीति विधिर्व्यर्थः स्यात्। तस्मान्नामातिदेशे ऽपि पूर्ववदेव। तर्हि पाकस्य कथमपूर्वार्थत्वमिति नाशङ्कनीयम्। प्रथमं चोदकशास्त्रेण प्राप्तः पाकः द्वारलोपान्निवृत्तः पुनर्वचनेनापूर्वार्थं विधीयते। वचनवैयर्थ्यभिया तथा कल्पनात्। अत एव विधिरसायने अप्पय्यदीक्षितैः प्राप्तापोदितपुनर्विधित्वेनोदाहृतम्। न हि वचनस्यातिभारो ऽस्ति। एवं वा। एवं स्थलविशेषे अधिकाशङ्कानिरासाय, यथा वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान् तं बर्हिषदं कृत्वा शम्यया स्फ्येन वा व्यूहे-

Digitized by Google

दिवमहममुं च व्यूहामीति यं द्विष्यात्तं ध्यायति यदधो ऽवमृज्येत्तं विष्णवे उरुक्रमायावर्ष्वोदिति। अस्यार्थः। स्फ्येन चेत्यतः स्पष्टः । चतुर्धाकरणकाले प्रकृतौ हस्तेन पुरोडाशभेदनमस्ति । अत्र वचनाद्विशम्यया स्फ्येन वा भेदने कृते यदि चरुः भूमौ पतेत् स्फ्येन वा संलग्नं भवेत् तदुभयं गृहीत्वा तेन उरुक्रमाय विष्णवे यागं कुर्यादिति । अत्र वैश्वदेवयागायावहनकाले विष्णोरुरुक्रमस्याप्यावाहनं कर्तव्यं न वेति संशये प्राकृतविधेः प्रकरणान्तरे विष्णोरुरुक्रमस्य यागे ऽतिदेशात् सर्वकर्म आवाहनादि सर्वकर्म स्याद् वैश्वदेवीयावाहनसमयएव । न चात्र द्वारलोपो ऽस्ति । आवाहनेन देवतासंस्कारः । स चादृष्टरूपो ऽपेक्षित एव । तदर्थमावाहनकाले तस्याप्यावाहनमिति पूर्वपक्षमुद्भाव्य अत्रापि सिद्धान्तमतिदिशति । द्वितीयम् एवं वेति । अस्मिन् पक्षे अभिधानेन विष्णुमुरुक्रममावहेति मन्त्रेण देवतास्मरणरूपसंस्कारः द्रव्यं चेति द्वन्द्वसमासः । समाहारैकवद्भावः। मन्त्रेण संस्कारः द्रव्यं वा कार्ये सत्येव क्रियेतेत्यर्थः । ननु संस्कारस्यापूर्वं कार्यं तत्रास्तीति ज्ञातुमशक्यमिति चेत्, सत्यम् । वैश्वदेवीयावाहनकाले यदि उरुक्रमविष्णुयागः प्राप्तः स्यात् तदङ्गदेवतासंस्कारो ऽपि युक्तः । तस्य यागस्य चरुभेदनकाले भूमिपतनादि निमित्तम् । निमित्तानन्तरं हि तद्यागप्राप्तिः यदि निमित्तं न स्यात्तदा यागो ऽपि नेति यागप्राप्तेः पाक्षिकत्वेन यदा यागप्राप्तिः तदैवावाहनं पौरोडाशिकाज्यभागन्यायेन । प्रयाजादीनां प्रसङ्गसिद्धिः । तस्माद् वैश्वदेवावाहनकाले न विष्णोरुरुक्रमस्यावाहनमिति भावः ॥ ३ ॥

दीक्षणीयादिषु आरम्भणीयाबाधः ।

इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेतारम्भस्य प्रधानसंयोगात् ॥ ४ ॥

सन्ति ज्योतिष्टोमे दर्शपूर्णमासप्रकृतिकाः तदङ्गभूता दीक्षणीयादयः । तत्र निखिलदर्शपूर्णमासाङ्गकलापेन सहान्वारम्भणीया ऽतिदिश्यते न वेति संशये प्रथमसूत्रोक्तयुक्त्या ऽतिदिश्यतइति तत्र पूर्वपक्षे सिद्धान्तमाहेष्टिरिति । आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासा-

वारप्स्यमान इत्यत्र अरम्भसंयोगात् । आरम्भशब्दसत्त्वात् । आरम्भाङ्गम् । आरम्भो नाम प्रधानोद्देश्यिका प्रथमा कृतिः कृतौ प्राथम्यं च स्वसजातीयकृतिध्वंसानधिकरणकालवृत्तित्वम् । साजात्यं च साक्षात्परम्परयो तत्प्रधानोद्देश्यकत्वेन । अत ईदृशारम्भो न दीक्षणीयायामस्ति तस्या ज्योतिष्टोमाङ्गत्वाद् यतः इष्टिरारम्भाङ्गं स चारम्भः प्रधानेन संयुक्तो यतः प्रधानोद्देश्यक इति यावत् । तादृशारम्भस्य अङ्गभूतदीक्षणीयायामभावात् द्वारलोपेनाङ्गभूतात् दीक्षणीयात इष्टिः अन्वारम्भणीया निवर्तते ॥ ४ ॥

अनुयज्ञादिषु आरम्भणीयाबाधः ।

प्रधानाच्चान्यसंयुक्तात्सर्वारम्भान्निवर्ततानङ्गत्वात् ॥ ५ ॥

राजसूये सोमेष्टिपशवः समप्रधाना इति व्यवस्थापितं प्राक् । राजसूयारम्भः इष्ट्यात्मकप्रधानार्थो ऽपि भवति अन्वारम्भणीयायाः इष्ट्यात्मकप्रधानारम्भो द्वारमिति पूर्वाधिकरणे स्थितम् । तत्र ईदृशद्वारसत्त्वाद्राजसूयान्तर्गतेषु अन्वारम्भणीया ऽतिदिश्यत इति पूर्वपक्षे सिद्धान्तमाह । प्रधानाच्चेति । अन्येन सोमादिरूपेण प्रधानेन युक्तं यदिष्टिरूपं प्रधानं तस्मादिष्टेरिति पूर्वसूत्रादनुवर्तते । अन्वारम्भणीयारूपेष्टिः निवर्तेत कुतःसर्वारम्भात् । सर्वार्थो मान्तो यतः तस्मात् केवलेष्टेरनङ्गं यतः तस्मात् । प्रकृतौ केवलस्वविषयः आरम्भः । अन्वारम्भणीयाद्वारं राजसूये य आरम्भः केवलेष्ट्यर्थो न सोमाद्यर्थो ऽपीति प्राकृतकार्याभावात्तन्निवृत्तिरिति सूत्रार्थः फलितः ॥ ५ ॥

आरम्भणीयायामारम्भणीयाबाधः ।

तस्यां तु स्यात्प्रयाजवत् ॥ ६ ॥

अन्वारम्भणीयारम्भाङ्गभूतमन्वारम्भणीयान्तरमस्तीति पूर्वपक्षमुत्थापयति । तस्यामिति । तस्यामन्वारम्भणीयायामिष्टिरित्यनुषज्यते । इष्टिरन्वारम्भणीया स्यात् प्रयाजवदित्यत्र अतिदेशादिति शेषः । यथा प्रयाजा अन्वारम्भणीयायामतिदिष्टाः तथा अस्या अप्यतिदेशे बाधकाभावादिति भावः । प्रायः तुशब्दः पूर्वपक्षनिवर्तको ऽप्यत्र संशयव्यावर्तकः । अन्वारम्भणीयातिदेशे संशयो नास्तीति पूर्वपक्षावद्योतकः ॥ ६ ॥

न वाङ्गभूतत्वात् ॥ ७ ॥

सिद्धान्तमारभते । न वेति । वाशब्दः सिद्धान्तज्ञापकः तस्यां स्यादिति पूर्वसूत्रादनुवर्तते । तेन पदसमूहेन ईदृशसम्बन्धे तस्यामन्वारम्भणीया न वर्ततइति फलितम् । कुतः । अङ्गभूतत्वात् । अस्य हेतोरयमभिप्रायः । यज्ञे आरम्भः पूर्वोक्तः ऋत्विग्वरणम् । आरम्भो वरणं यज्ञइति शास्त्रात् । स आरम्भः प्रधानस्यैव क्रियते । यथा ज्योतिष्टोमे प्रधानार्थं कृता एवाङ्गेषु न पृथक् । एवमेवात्रापि अन्वारम्भणीया दर्शपूर्णमासाङ्गभूतारम्भोङ्गत्वेन दर्शपूर्णमासारम्भेणैवाङ्गारम्भस्य प्रसङ्गसिद्धौ न तस्यामारम्भो ऽस्ति येन हेतुना ऽन्वारम्भणीया ऽऽपाद्यतइति । इत्थं च पूर्वपक्षिणो बाधकाभावादिति हेतुः स्वरूपासिद्ध इति भावः ॥ ७ ॥

एकवाक्यत्वाच्च ॥ ८ ॥

ननु ज्योतिष्टोमारम्भेण दीक्षणीयाद्यारम्भाणां प्रसङ्गसिद्धिर्वदिति विषमो दृष्टान्तः । तथा हि । दीक्षणीयादिप्रयोगाणां ज्योतिष्टोमप्रयोगान्तःपातित्वात्प्रधानारम्भेण प्रसङ्गो युक्तः इह तु दर्शपूर्णमासावारप्स्यमान इति लटा दर्शपूर्णमासारम्भस्य भावित्वसूचनात् तत्प्रयोगबहिर्भूतत्वं क्लृप्तम् । बहिर्भूतप्रसङ्गासंभवाद्वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्रेव पृथगारम्भः सिद्धः । तथा च द्वारलोपो न संभवतीति अस्मिन् दूषणे अपरितोषेण दूषणान्तरमाह । एकवाक्यत्वाच्चेति । अयमभिप्रायः । दर्शपूर्णमासयोरङ्गत्वेन विहितारम्भाङ्गत्वेन विधायकमिदमेकमेव वाक्यं न द्वितीयमस्ति । तथा सति अस्या आरम्भाङ्गत्वेन ज्ञानवेलायां यथा दर्शपूर्णमासे क्लृप्तप्रयाजादिव्यापारसहितेनाग्नावैष्णवयागात्मककरणेन दर्शपूर्णमासारम्भं भावयेदितिवद्दर्शपूर्णमासक्लृप्तान्वारम्भसहितया अन्वारम्भणीयया ऽऽरम्भं भावयेदिति वाच्यम् । इदं न संभवति यदीदं विधायकमस्मात्पूर्वमक्लृप्तमित्यतिदेशो न संभवतीति एतदीयकथंभावाकाङ्क्षापूरकत्वेनान्वारम्भणीया प्रवेष्टुं नार्हति । प्रयाजस्य तूत्पादकं वाक्यं भिन्नम् । तेन क्लृप्तमन्वारम्भणीयोत्पत्तिवाक्यार्थे प्रविशते तथा स्वोत्पत्तिवा-

Digitized by Google

ध्यार्थघटकतया स्वप्रवेशासंभवात् एकस्मिन्वाक्ये विहितवदपेक्षणस्या-विहितवद्विधानस्यासंभव इति सूत्रभावरहस्यं ज्ञेयम् ॥ ८ ॥

खलेवाल्यां यूपाहुतिबाधः।

कर्म च द्रव्यसंयोगार्थमर्थभावान्निवर्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ ९ ॥

ज्योतिष्टोमे यूपसंस्कारप्रकरणे यूपमाच्छेत्स्यता परेणाहवनीय-माज्यं वारणीं च आदाय यूपस्यान्तिके ऽग्निं मथित्वा उरु विष्णो विक्र-मस्वेति यूपाहुतिं जुहोतीति। इयमाहुतिः साद्यस्के खलेवाली यूपो भवतीति यूपकार्यविहितायां खलेवाल्यां सत्यां भवितुमर्हति यूपाहुतेर-दृष्टार्थत्वेन द्वारलोपासंभवादिति पूर्वपक्षे सिद्धान्तमाह। कर्म चेति। चकारस्त्वर्थे सिद्धान्तद्योतकः कर्म यूपाहुतिरूपयूपपदवाच्यं यत् अदृ-ष्टशरीरं द्रव्यं तत्संयोगः तदुत्पत्तिः सैवार्थः प्रयोजनं यस्येदृशं हेतुगर्भ-मिदं कर्मणो विशेषणमर्थाभावात् खलेवाल्यामीदृशादृष्टशरीरयूपपदवा-च्यद्रव्योत्पत्तेरभावादाहुतिरूपं कर्म निवर्तते। तादर्थ्यं यूपोत्पत्त्यर्थमिति कथं ज्ञातमत्राह। श्रुतिसंयोगादिति। अत्र श्रुतिपदं श्रुतिवाक्यप्रापिताङ्ग-त्वार्थकं लक्षणया तत्संयोगात्। तदुत्त्वात् यद्वा अङ्गत्वस्येतिशेषः। अन्या श्रुतिवाक्येन संयोगात् ज्ञानादिति यूपमाच्छेत्स्यतेत्यनेन यूपमा-प्तुमुत्पादयितुमिच्छया गच्छता होतव्यमिति वाक्येन श्रौतेनाङ्गत्वनिर्ण-यादिति तदभिप्रायः ॥ ९ ॥

साद्यस्के स्थाणवाहुतिबाधः।

स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत ॥ १० ॥

वनस्पते शतवल्शो विरोहेत्याव्रश्चने जुहोतीति स्थाणवाहुति-र्विहिता सा खलेवाल्यां कर्तव्या नेति संशये पूर्वपक्षमाह। स्थाणा-विति। अत्रापि तुशब्दः संशयव्यावर्तकः स्थाणौ त्वेति देशमात्रत्वादि-त्यनेनाहवनीयबाधपूर्वकाहुतिदेशनियममात्रम्। यतो देशमात्रनियमः क्रियते। अतः खलेवाल्यां स्थाणवाहुतेरनुवृत्तिः प्रतीयेत ज्ञायेतेति। अयमभिप्रायः। इयमाहुतिः यूपे सन्निपत्योपकारिका न भवति। यूपस्य

Digitized by Google

स्थाणोर्विभक्तत्वेन तत्राहुत्या तद्विभक्तयूपसंस्कारासंभवात् । संबन्धे क्रियमाणं संबन्धिन्युपकुर्यात् । न त्वन्यथा । अतो ऽग्नीषोमीयापूर्वस्यादावुपकारकमिति वाच्यम् । तथा सति तद्द्वारस्य पशुपूर्वस्यात्रापि सत्त्वात् आग्नस्थने जुहोतीति देशं नियमयन् स्खलेवाल्यामस्तीति ॥ १० ॥

अपि वा शेषभूतत्वात्संस्कारः प्रतीयेत ॥ ११ ॥

सिद्धान्तमाह । अपि वेति । अपिवेति पूर्वपक्षव्यावर्तकं यूपस्येति शेषः । यद्वा कर्म चेत्यस्मान्मण्डूकप्लुत्या द्रव्यस्येत्यनुवर्तते । यूपस्य शेषभूतत्वादङ्गभूतत्वात् तस्य यूपस्य संस्कारः प्रतीयेत ज्ञातव्यः । अङ्गत्वसाधकं यूपावान्तरप्रकरणम् । तथा हि वैष्णव्यर्चा यूपमच्छेतीति यूपसंस्कारः मध्ये ऽप्यष्टाश्रिर्भवतीत्यपि यूपस्येव मध्यमं दृष्टम् आग्नस्थने जुहोतीति होमः कथं न तदङ्गं भवेत् । यच्चोक्तं संबद्धे क्रियमाणमेव संबन्धिनि कार्यं जनयतीति तन्न । गुरौ अर्पितकुसुमादीनां तद्वियोगे ऽपि शिरसि धारणेन गुरोः गौरवापादनेन व्यभिचारात् ॥ ११ ॥

समाख्यानं च तद्वत् ॥ १२ ॥

यूपाङ्गत्वे प्रमाणान्तरमाह । समाख्यानमिति । यथा ऽवान्तरप्रकरणं यूपाङ्गत्वसाधकम् । तद्वत्समाख्यानं श्रुतिलिङ्गादिषु षष्ठं प्रमाणमङ्गत्वे मानमित्यर्थः । अयमभिप्रायः शाखान्तरे स्थाणौ स्थाणवाहुतिं जुहोतीति श्रूयते । तत्र स्थाणोराहुतिरिति षष्ठीतत्पुरुषो न सप्तमीतत्पुरुषः शौण्डादिगणपाठाभावात् । सा ऽपि षष्ठी कर्मणि । कर्म च ईप्सिततममपेक्षितम् । न हि स्थाणुसंस्कारानङ्गीकारे स्थाणोरीप्सिततमत्वं संभवति अतः स्थाणवाहुतिसमाख्या बाध्येतातः स्थाणुसंस्कारद्वारा यूपसंस्कार इति ॥ १२ ॥

मन्त्रवर्णश्च तद्वत् ॥ १३ ॥

अङ्गत्वे समाख्यामुक्त्वा लिङ्गमप्याह । मन्त्रेति । तद्वत् समाख्यावत् मन्त्रवर्णमपि मन्त्रवर्णलिङ्गमपि अङ्गत्वे प्रमाणम् । स्थाणवाहुतेर्मन्त्र एवं श्रूयते वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहे-

Digitized by Google

मेति । हे वनस्पते हे यूपसंज्ञन्थिश्च यतो मया वृक्णः अतस्त्वं शतवल्शः शतकाण्डः सन् विरोह वर्धस्वेत्यर्थः । यदि स्याद्याविविदेशनियमः तर्हि स्वच्छेदनापराधनिवृत्तये आहुत्या वर्धस्वेति प्रार्थनमनुपपन्नम् । अतो ऽपि सन्निपत्योपकारकमिति भावः ॥ १३ ॥

उत्तमप्रयाजस्य संस्कारकर्मता ।

प्रयाजे च तन्न्यायत्वात् ॥ १४ ॥

अस्ति दर्शपूर्णमासयोरुत्तमः प्रयाजः स्वाहाकारं यजतीति विहितः सो ऽपि प्रथमादिप्रयाजवत् प्रधानकर्म भवितुमर्हति प्रयाजत्वात् । इत्थं च विकृतौ स्वाहा ऽग्निमित्यादेरविकृतः पाठ इति पूर्वपक्षे सिद्धान्तमाह । प्रयाजे चेति । प्रयाजे च उत्तमप्रयाजे ऽपि तन्न्यायत्वात् । अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेतेति विचारे यः प्रतिज्ञाहेतूदाहरणसमुदायरूपो न्यायः तत्त्वात् । अयमभिप्रायः । स्वाहाकारो न प्रधानकर्म तद्यागे मन्त्रलिङ्गे या यक्ष्यमाणा अग्न्यादिदेवताः तासामेवोपलब्धेः यागेन तत्संस्काररूपे फले संभवति आरादुपकारकल्पनस्यान्याय्यत्वात् । न च माता पुत्रेषु समेत्यपुत्रपदसमभिव्याहाराज्जननीमुपस्थापयति । माता समं धान्यं मिमीते इत्यत्र स एव मातृशब्दो ऽन्यं धान्यमातारमुपस्थापयति तथा स एवाग्न्यादिशब्दः स्वाहाकारसन्निधानात् स्वाहाग्निमित्यादिना ऽन्यमेवाग्निमुपस्थापयतीति वाच्यम् । मातृशब्दो रूढ्या जननीमुपस्थापयति धान्यमातारं योगेनोपस्थापयति तथा स्वाहाकारसान्निध्यादग्निशब्दस्यान्यदेवतोपस्थापकत्वे अग्निशब्दस्य तत्र स्वातन्त्र्येण शक्तिः कल्पनीया । तत्र प्रमाणे सति सिध्येत् तदेव नास्ति एकार्थान्तरं स्यात् । तस्माद्यथा स्थाण्वाहुतिः यूपद्वारा सन्निपत्योपकारकमेवमेवोत्तमप्रयाजो ऽपि यक्ष्यमाणाग्न्यादिसंस्कारद्वारोपकारक इति भावः ॥ १४ ॥

लिङ्गदर्शनाच्च ॥ १५ ॥

सन्निपत्योपकारे साधकान्तरमाह । लिङ्गदर्शनाच्चेति । अयमभिप्रायः । चातुर्मास्ये संप्रतिपन्नदेवताको निगदः स्वाहा ऽग्निं स्वाह-

Digitized by Google

सोमं स्वाहा सवितारं स्वाहा सरस्वतीं स्वाहा पूषणमिति श्रूयते च देवतासंस्कारपक्षे प्रवकल्पते । अतिदेशशास्त्रेण प्राकृतनिगदप्राप्तौ अस्य पाठवैयर्थ्यात् । न हि दृष्टे संभवति अदृष्टार्थत्वकल्पनं न्याय्य यागोत्पत्तिवाक्योदितदेवतापाठः निगदे तद्देवतास्मरणरूपं कार्यं ज्ञापयतीति ॥ १५ ॥

अग्नियागस्यारादुपकारकत्वम् ।

तथा ऽऽज्यभागाग्निरपीति चेत् ॥ १६ ॥

उत्तमप्रयाजसिद्धान्तसाधकहेतुना आज्यभागाग्नेययागस्य सन्निपत्योपकारकत्वं पूर्वपक्षी साधयति । तथेति । तथा उत्तमप्रयाजवत् आज्यभागान्तर्गताग्नियागः सन्निपत्योपकारकः । चेदिति पूर्वपक्षसमाप्तिद्योतकम् ॥ १६ ॥

व्यपदेशाद्देवतान्तरम् ॥ १७ ॥

सिद्धान्तमारभते । व्यपदेशादिति । व्यपदेशादित्यस्मात् प्राक् भेदेनेत्यादिः । व्यपदेशात् निर्देशात् । निगदेष्विति शेषः । देवतान्तरं प्रधानदेवतातः भिन्नम् । निगदश्चैवं द्विवारं श्रूयते । अग्निमग्नआवह सोममावह । अग्निमावहेति लोके ऽपि ब्राह्मणा आगताः । शूद्र आगतः । ब्राह्मणा आगत इति श्रुत्वा अग्निमत्राक्यत्रैयर्थ्यभिया ब्राह्मणादुयागमनं प्रत्येति तस्मादाज्यभागाग्निः सन्निपत्योपकारकः तेन न विकृतावग्निबाधः ॥ १७ ॥

समत्वाच्च ॥ १८ ॥

हेत्वन्तरमाह । सेति । समत्वात् आरादुपकारकपङ्क्तिनिविष्टत्वात् । तदेवम् अभीषू वा एतौ यज्ञस्य यदाघारौ चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियतइति तस्मादारादुपकारकम् ॥ १८ ॥

पशुपुरोडाशयागस्य देवतासंस्कारकत्वम् ।

पशावपीति चेत् ॥ १९ ॥

अग्नीषोमीयपशौ श्रूयते अग्नीषोमीयवपया प्रचर्याग्नीषोमीयं पुरोडाशमनुनिर्वपतीति अत्र पशुपुरोडाश आरादुपकारकः उत पशुयागदेवतासंस्कारार्थ इति संशये प्रयाजाधिकरणपराहतमपि आरादुपकारकत्वं हेत्वन्तरेण उज्जीवयितुं पूर्वपक्षमाह । पशाविति । अपिशब्दः यथा ऽऽज्यभागाग्नेरारादुपकारत्वं तथा पशावपीति दृष्टान्तसंगतिं ज्ञापयति यद्वा पशौ पशुपुरोडाशे आरादुपकारत्वमिति शेषः । हेत्वाकाङ्क्षायां व्यपदेशादिति मण्डूकप्लुत्या ऽनुषज्यते । अत्राप्याग्नीषोमीयमिति द्विरभ्यासादिति तत्रापिशब्दयोगेन हेत्वन्तरं सूचितं तच्चेत्थम् अर्थवादेन देवताभेदप्रतिपादनादिति अर्थवादश्चैवं श्रूयते । यदग्नीषोमीयं पशुमालभतइत्येतत्सविधो वा सोमं वहन्त्यग्निना प्रतितिष्ठतइति अनेन पशुयागस्याग्नीध्रयोनिः सोमलता च देवतापुरोडाशयागस्य सादृश्यात्प्राकृताग्नीषोमाविति देवताभेदात्संस्कारासंभवादारादुपकारक इति भावः ॥ १९ ॥

न तद्भूतवचनात् ॥ २० ॥

इमं पक्षं निराकरोति । नेति । तद्देवतयोरभेदः तस्य यद्भूतं भवनं सत्ता तदभेदः तत्प्रतिपादकवचनस्य सत्त्वादित्यर्थः तद्वचनं चेत्थं यद्देवत्यः पशुः तद्देवत्यः पुरोडाश इति ॥ २० ॥

लिङ्गदर्शनाच्च ॥ २१ ॥

तथा ऽपि साम्याच्च स्वपक्षसिद्धिरतः लिङ्गमपि साधकमाह । लिङ्गेति । इन्द्राय वज्रिणे ललामं प्राशृङ्गमालभेतेति यागे याज्यानुवाक्यायुगलमिन्द्रं स्तुहि वज्रिणꣳस्सोमपृष्ठमिति स्तुहि शूरं वज्रिणमप्रतीतमिति चैकदेवतालिङ्गं समाम्नातम् । नैतद्देवताभेदे लिङ्गमुपपन्नमिति भावः । अस्तु वा देवतैक्यमित्यङ्गीकृत्य तथा ऽपि पशुयागदेवता न पुरोडाशे प्रधानमिति ॥ २१ ॥

गुणो वा स्यात्कपालवद् गुणभूतविकाराच्च ॥ २२ ॥

पुनः पूर्वपक्षमुत्थापयति । गुणो वेति । वाकारः पूर्वविरुद्धकोटिकथनद्योतकः । तथा वा एकमेव कपालं हविःश्रपणे तुषोपवपने चाङ्ग

Digitized by Google

तथा एकैव देवता यागद्वयेऽङ्गमित्यर्थः । तत्रैव हेत्वन्तरमाह । गुणभूतेति । अयं पशुपुरोडाशयागः प्राकृताग्नीषोमीयविकारः । प्रकृतौ अग्नीषोमीयदेवता अङ्गम् । अत्र प्रधानत्वं संस्कारपक्षे वाच्यम् । तथा च विसदृशत्वादतिदेशस्तद्धर्माणामत्र च स्यादतो ऽप्यङ्गं देवतेत्यर्थः । चकारेण दूषणान्तरं सूचितं यदि देवतासंस्कारः स्यात् तदा सौत्रामण्यां भिन्नदेवताकत्वेन देवतासंस्कारासंभवात् द्वारान्तराभावात्पशुप्रयोगात्पूषानुमन्त्रणवत्कल्प्येरन् आरादुपकारकपक्षे तत्रैवानुष्ठानं संभवतीति ॥ २२ ॥

अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहाकारवदङ्गानामर्थसंयोगात् ॥ २३ ॥

उक्तं पक्षं व्यावर्तयति । अपि वेति । तत्संस्कारः देवतासंस्कारः प्रतीयेत । कुतः शेषभूतत्वात् । भागस्य देवताङ्गत्वात् । तत्संस्कारः देवतासंस्कारः प्रतीयेत । अङ्गभूतत्वं कथमित्याकाङ्क्षायां हेतुमाह । प्रयाजवदिति । प्रयाजवत् उत्तमप्रयाजादिवदङ्गानामर्थेन फलेन संयोगात् । अयमभिप्रायः यथा उत्तमप्रयाजे देवतासंस्कारद्वारा संभवति गुणकर्मत्वे प्रधानकर्मत्वमनुचितमेवमत्रापीति ॥ २३ ॥

व्यृद्धवचनं च विप्रतिपत्तौ तदर्थत्वात् ॥ २४ ॥

संस्कारपक्षे हेत्वन्तरमाह । व्यृद्धमिति । एवं हि श्रूयते यद्वै सौत्रामण्यै व्यृद्धं तदस्यै समृद्धमिति । आरादुपकारकत्वपक्षे व्यृद्धत्वमनुपपन्नम् । व्यृद्धत्वं हि व्यङ्गत्वम् । तस्मिन् पक्षे अङ्गलोपाभावादिति भावः ॥ २४ ॥

गुणे ऽपीति चेत् ॥ २५ ॥

संस्कारपक्षे वा किमङ्गं लुप्यते येन व्यृद्धशब्दस्य स्वारस्यं संपाद्यतइति समो दोष इति शङ्कते । गुणे ऽपीति । गुणे ऽपि इत्यस्य पुरोडाशयागे देवतां प्रति गुणेपीत्यादिः समो दोष इति शेषः ॥ २५ ॥

नासंहानात्कपालवत् ॥ २६ ॥

वैषम्यं प्रतिपादयति । नेति । आरादुपकारकपक्षे इति शेषः । यथा एकेन कपालेन तुषोपवापे क्रियमाणे अन्यस्य हानिर्नास्ति । तथा ऽन्यदेवतया पुरोडाशयागे क्रियमाणे पशुयागदेवताया असंस्थानात् । हान्यभावात् । अयमभिप्रायः सूत्राद्बहिर्निष्कास्यः । स्वमते पशुदेवतायाः संस्काररूपपुरोडाशयागे ऽन्यदेवतायागे स्मरणरूपसंस्कारलोपाद्वृत्रघ्न-स्वरस इति भावः ॥ २६ ॥

ग्रहाणां च संप्रतिपत्तौ तद्वचनं तदर्थत्वात् ॥ २७ ॥

संस्कारपक्षे उपोद्बलकं लिङ्गान्तरमाह । ग्रहाणामिति । ग्रहाणां सुरायहाणां संप्रतिपत्त्या समदेवताकत्वविषयकं तद्वचनम् । नैतेषां पशूनां पुरोडाशा भवन्ति । ग्रहपुरोडाशा ह्येते इति वचनम् । उपपन्नमिति शेषः तत्र हेतुः तदर्थत्वादिति । अयं भावः । पशुदेवतासंस्काररूपतद्दे-वताकपुरोडाशाभावाद्वैगुण्यमिति शङ्कानिवारकं हि इदं वाक्यं ग्रहपुरोडाशा इति असंस्कारपक्षे नावकल्पतइति ॥ २७ ॥

ग्रहाभावे तद्वचनम् ॥ २८ ॥

लिङ्गान्तरं च दर्शयति । ग्रहाभावेति । सौत्रामण्याम् आश्विन-सारस्वतैन्द्रान्पशुयागान् त्रीन् विधाय तेषां ग्रहपुरोडाशांश्च विधाय बार्हस्पत्यः चतुर्थपशुयागो विहितः । तत्र पुरोडाशवानेष पशुर्भवतीति । न ह्येतस्य ग्रहं गृह्णातीति श्रुतम् । अस्मिन्वाक्ये ग्रहाभावे पुरोडाशवत्त्वं हेतुत्वेन कथितं तद्वचनं लिङ्गमिति शेषः । एतेन पुरोडाशग्रहान्यतरसं-स्कृतदेवतायाः पशुयागाङ्गत्वं नान्यथेति भावः ॥ २८ ॥

देवतायाश्च हेतुत्वे प्रसिद्धं तेन दर्शयति ॥ २९ ॥

अथ लिङ्गान्तरमाह देवताया इति । अग्निभ्यः कामेभ्यः पशव आलभ्यन्ते कामाय वा अग्नये पुरोडाशा भवन्ति इति श्रूयते । अत्र उत्तरवाक्ये वै इत्यनेन यतः पुरोडाशयागे अग्निः कामो देवता अतः पशावपि सैव देवतेति हेतुत्वं प्रसिद्धं तेन वै इत्यनेन दर्शयति । इद-मपि संस्कारार्थत्वे लिङ्गम् ॥ २९ ॥

अविरुद्धोपपत्तिरर्थापत्तेः श्रुतवद्गुणभूतविकारः स्यात् ॥ ३० ॥

अथ यदुक्तं गुणभूतयोर्धर्मैः प्रधानभूतदेवताकयागे नानुवर्तनमिति तद्दोषं परिहरति । अविरुद्धेति । अविरुद्ध इत्यनन्तरमङ्गभूतयोरग्नीषोमयोः धर्माणामिति शेषः । अर्थस्य तत्तद्द्वारस्य चापत्तेः प्राप्तत्वात् । यथा ऽभ्युदयेष्टौ प्रधानद्रव्यसंस्कारार्थं क्रियमाणायाः प्रणीतायाः तद्धर्माः श्रुते प्रधाने एव भवन्ति तद्वत् । गुणभूतस्य प्राकृताग्नीषोमीयस्य विकारः पशुयागो भवितुमर्हति ॥ ३० ॥

स ह्यर्थः स्यादुभयोः श्रुतिभूतत्वाद्विप्रतिपत्तौ तादर्थ्याद्विकारत्वमुक्तं तस्यार्थवादत्वम् ॥ ३१ ॥

गुणो वा स्यादिति सूत्रे चकारेण सूचितं दूषणं परिहरति । स ह्यर्थ इति । सः पशुपुरोडाशो ह्यर्थः द्विप्रयोजनः । देवतासंस्कार एकः छिद्रापिधानमेकमुभयोरपि कार्ययोः श्रौतत्वात् । संस्कारस्य श्रौतत्वं दर्शितम् । अथो पशोरेव छिद्रमपिदधातीति वाक्यादन्यत् । इत्थं चाविप्रतिपत्तौ भिन्नदेवताके अन्यदेवताकत्वेन देवतासंस्काररूपकार्याभावे ऽपि छिद्रापिधानरूपतादर्थ्याद्विकारत्वं तदङ्गत्वमतः प्रकृतयागात् पूषानुमन्त्रणस्योत्कर्ष इति भावः । तस्यार्थवादत्वमित्यग्रिमसूत्रावतरणिकारूपम् । तदित्थम् । अथो पशोरेवेति वाक्यं तस्यार्थवादरूपत्वात्फलबोधकत्वं न संभवति । तथा च कार्याभावात्पूषानुमन्त्रणस्योत्कर्षे प्राप्ते अयिमं समाधानम् ॥ ३१ ॥

विप्रतिपत्तौ तासामाख्याविकारः स्यात् ॥ ३२ ॥

अथो पशोरित्यस्यार्थवादत्वे पुरोडाशोत्कर्षोपपत्तिं परिहरति विप्रतिपत्ताविति । विप्रतिपत्तौ पशुपुरोडाशयागवपायागदेवताबोधकशब्दयोर्भिन्नानुपूर्वीकत्वे ऽपीत्यर्थः । यथा पशुयागोत्पादकवाक्यम् आश्विनं धूम्रमालभते सारस्वतं मेषमैन्द्रमृषभमिति पुरोडाशयागोत्पादकवाक्यं च ऐन्द्रमेकादशकपालं निर्वपति सावित्रं द्वादशकपालं वारुणं दशक-

Digitized by Google

पालमिति तासां देवतानां समाख्या विकारः पशुयागदेवतानाम्ना एवं पुरोडाशदेवताया आभासः । यथा गोशब्दस्य गावीतिवत् ऐन्द्रशब्दस्तु उभयत्राविकृतः । वचनेनेन्द्रः पुरोडाशानां प्रथम इत्यनेन स्थानभेदमात्रं सारस्वतमित्यत्र सकारवकारादिकतिपयवर्णषट्कघटितत्वात्साविवस्य तदाभासत्वम् । आश्विनेत्यत्रान्यवकारादिवर्णचतुष्टयघटितत्वात्तदाभासत्वम् । इत्थं च पुरोडाशवाक्यस्थशब्दरूपेराभासैरपि पाशुका एव देवता बुध्यन्तइति न कश्चनानुपपत्तिगन्ध इति भावः ॥ ३२ ॥

अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः ॥ ३३ ॥

उक्तसमाधाने अपरितोषात्समाधानान्तरमाह । अभ्यासेति । अभ्यासः प्रकृतितः प्राप्तोऽयं पुरोडाशयागः तस्यावृत्तिः एकदेशो ग्रहयागः पशुदेवत्य एव । तद्भिन्नांशस्तु अन्यदेवत्यः पुरोडाशः यथा मकादशप्रयाजे पशौ प्राकृतप्रयाजा एव अभ्यस्यन्तइति सिद्धान्तितं प्राक् । तथा चैकदेशे पञ्चपर्यन्तं प्राकृतदेवतासंबन्धः तद्भिन्नैकदेशे उर उषासानक्तेत्येवमादयो भिन्नदेवता एव संबन्ध्यते तद्वत् । अयमभिप्रायः प्रकृतितः चोदकशास्त्रेण पुरोडाशद्रव्यकः पशुयागदेवताकः यागः प्राप्तः अत्राश्विनं ग्रहं गृह्णातीति देवतासंबन्धं द्रव्यं विहितं तस्य यागाकाङ्क्षायां यागबोधकाभावात्प्राकृतेनैव संबध्यते तदंशेन देवतासंस्कारः संभवति । तत्रैवैन्द्रमेकादशकपालं निर्वपतीति प्राकृतद्रव्यविशिष्टयागमनूद्यते देवताविधिरिति अभ्यास उपपन्न इति ॥ ३३ ॥

सौर्ययागे चरुशब्दस्यौदनवाचित्वम् ।

चरुर्हविर्विकारः स्यादिज्यासंयोगात् ॥ ३४ ॥

पञ्चदशसूत्रमिदमधिकरणम् । सौम्यं चरुं निर्वपेदिति श्रुतम् । अत्र चरुः कपालविकार उत हविर्विकारः । यदा हविर्विकारः तदाऽपि पुरोडाशकार्यं स्थाली करोति उतौदन इति संशये तत्र सिद्धान्तमाह । चरुरिति । चरुः चरुपदवाच्यः हविर्विकारः प्रकृतपुरोडाशकार्यकारी स्यात् । कुतः यागसंयोगात् । प्रकृतौ पुरोडाशे यागसंबन्धोऽस्ति प्रकृतेऽपि तद्वत् ॥ ३४ ॥

Digitized by Google

प्रसिद्धग्रहणत्वाच्च ॥ ३५ ॥

एवं स्थिते पूर्वपक्षमाह । प्रसिद्धेति । लोके चरुशब्दः स्थाल्यां प्रसिद्धः तद्ग्रहणत्वात् । तस्यैव ग्रहीतुं योग्यत्वात् । स्थाल्येव पुरोडाशकार्यकारीत्यर्थः ॥ ३५ ॥

ओदनो वा ऽन्नसंयोगात् ॥ ३६ ॥

इमं पक्षं दूषयति । ओदनेति । ओदनः पुरोडाशकार्यकारी । अन्नस्य अदनयोग्यस्य यागेनेति शेषः । संयोगात् । संबन्धात् । अदनीयेनैव द्रव्येण शिष्टा यागं कुर्वन्ति नान्येनेति भावः ॥ ३६ ॥

न द्व्यर्थत्वात् ॥ ३७ ॥

नेति । ओदनो हविर्विकारो न द्व्यर्थत्वात् चरुशब्दस्य नानार्थत्वापत्तेः ॥ ३७ ॥

कपालविकारो वा विशये ऽर्थोपपत्तिभ्याम् ॥ ३८ ॥

हविर्विकारपक्षे पक्षद्वये ऽपि दोषात्कपालविकारो ऽस्त्विति शङ्कते । कपालेति । प्राकृतपुरोडाशस्य प्रकृतिवत्कपाले न श्रपणं किं तु स्थाल्यां तथा च पूर्वोक्तविषये संशये कपालविकारः । कुतः सौर्ये इति तद्विहितार्थस्य संबन्धस्य सूर्याद्युद्देश्यकहविराधाररूपस्य उपपत्तेः । श्रपणयोग्यतायाश्च सत्त्वात् ॥ ३८ ॥

गुणमुख्यविशेषाच्च ॥ ३९ ॥

अस्मिन्नेव पक्षे युक्त्यन्तरमाह । गुणेति । प्रकृतौ कपालं पुरोडाशः प्रधानं तयोरतिदेशः सौर्ययागे तत्र चरुशब्देनान्यतरस्य बाधे कर्तव्ये कपालबाधे अङ्गबाधो भवति । पुरोडाशबाधे प्रधानबाधो भवति प्रधानबाधादुरमङ्गबाध इति गुणमुख्यविशेषभावादङ्गलोपः ॥ ३९ ॥

तच्छ्रुतौ चान्यहविष्ट्वात् ॥ ४० ॥

चरुशब्दस्य स्थालीपरत्वे हि पूर्वोक्तपक्षः संभवति । तदेव नेत्याह । तच्छ्रुताविति । प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्काम इत्यत्र तच्छ्रुतौ चरुशब्दार्थे अन्यस्य विशेषणीभूता अन्यस्य शतकृष्णलस्य हविष्ट्वात् चरुरपि हविर्विकार इति भावः ॥ ४० ॥

Digitized by Google

लिङ्गदर्शनाच्च ॥ ४१ ॥

लिङ्गान्तरमप्याह । लिङ्गेति । पृश्नये दुग्धे प्रैयङ्गवं चरुं निर्वपे-न्मरुद्भ्यो ग्रामकाम इत्यत्र प्रैयङ्गवं प्रियङ्गुविकारम् इदं चरौ विशेषणम् । न हि स्थाली प्रियङ्गुविकारो भवितुमर्हतीति न कपालविकार-श्चरुः ॥ ४१ ॥

ओदनो वा प्रयुक्तत्वात् ॥ ४२ ॥

ओदनो वेति । अस्मात्सूत्रादुद्दिश्य षट्चत्वारिंशे सूत्रे नेयं प्रयु-क्तत्वादिति कपालविकारखण्डनमेव । प्रयुक्तत्वात् । तद्धितप्रयोगात् । यदि देवतातद्धितो न स्यात् तर्हि देवताया अलाभात् ऐन्द्रामालभेत वत्समालभेतेतिवत्प्रयोगो न स्यात् इति भावः ॥ ४२ ॥

अपूर्वव्यपदेशाच्च ॥ ४३ ॥

अत्रैव साधकान्तरमाह । अपूर्वेति । पुरोडाशेन वै देवा अमुष्मि-ल्लोकमार्ध्नुवन् चरुणा ऽस्मिन्यः कामयेतामुष्मिल्लोकमृध्नुयामिति स पुरोडाशं कुर्वीत यः कामयेतास्मिल्लोकमृध्नुयामिति स चरुं कुर्वीतेत्यत्र पुरोडाशापूर्वसदृशापूर्वजनकत्वं व्यपदेशः चरौ प्रतीयते । अतश्चरुरपि पुरोडाशसदृशो भवितुमर्हतीति न कपालसदृशः ॥ ४३ ॥

तथा च लिङ्गदर्शनम् ॥ ४४ ॥

एवं कपालविकारं प्रदूष्य सिद्धान्तमाह । तथा चेति । अत्रौदनो वेति प्रपूर्वसूत्रस्थं योज्यम् । तथा च कपालविकारदूषणेन च ओदनश्च-रुशब्दवाच्यो भवितुमर्हतीति । लिङ्गदर्शनात् । लिङ्गं ह्येवं ज्योतिष्टोमाङ्गं प्रायणीयेष्ट्यामादित्यः प्रायणीयश्चरुरिति । तदनन्तरं चतुर आज्यभा-गान्यजेदिति ओदनेनेति चरुपदार्थस्यैवौदनेत्यनुवादाच्चरुरोदन एवेति भावः ॥ ४४ ॥

सौर्यचरोः स्थाल्यामेव पाकः ।

स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ॥ ४५ ॥

स ओदनः अष्टसु कपालेषु पक्तव्यः उतैककपाले उत कपालभिन्ने यत्र क्व चित् अथ वा स्थाल्यामेवेति संशये प्रथमपक्षमाह । स इति ।

Digitized by Google

चोदनः कपाले कपालेषु स्यात् । कुतः प्रकृत्या दर्शपूर्णमासप्रकृतितः प्राप्तत्वात् । तद्बाधकान्यस्य चाश्रुतत्वात् शास्त्रत्वाच्च ॥ ४५ ॥

एकस्मिन्वा विप्रतिषेधात् ॥ ४६ ॥

प्रथमपक्षं दूषयन् द्वितीयमाहैकस्मिन्निति । प्राकृतसंख्यां बाधित्वा कपालमात्रमतिदिशेत् । कुतः बहुषु जलधारणपूर्वकौदननिष्पत्तेर्विप्रतिषिद्धत्वाद्बाधितत्वात् ॥ ४६ ॥

न वा ऽर्थान्तरसंयोगादपूपे पाकसंयुक्तं धारणार्थं चरौ भवति तत्रार्थात्पात्रलाभः स्यादनियमो विशेषात् ॥ ४७ ॥

द्वितीयं दूषयन् तृतीयमुत्थापयति । न वेति । न वा कपाले पक्तव्यः अपूपे पुरोडाशे पूपो ऽपूपः पिष्टकः स्यादिति कोशात्पिष्टविकारत्वादपूपत्वमर्थान्तरेण जलगतौष्ण्येन यदश्रयत्रशैथिल्यं तदन्येन विजातीयपाकेन संयोगात् । चरौ पाकेन पाकसाधनौष्ण्येन संयुक्तं यत्तद्धारणार्थं धारणमर्थो यस्येति तादृशवस्तुना भवितव्यमतः तत्र चरोरर्थात् अर्थापत्तिप्रमाणात्पात्रलाभः स्यात् । तत्पात्रं स्थाल्येवेति अनियमः अविशेषात् नियामकविशेषाभावात् । तादृशोदकधारणयोग्ये स्थाल्यां कटाहादौ यत्र क्व चित्पक्तव्यमिति फलितार्थः ॥ ४७ ॥

चरौ लिङ्गदर्शनात् ॥ ४८ ॥

सिद्धान्तमाह चरावति । वेति पूर्वपक्षव्यावर्तकः । चरौ स्थाल्यां पाकः । लिङ्गदर्शनात् । यासु स्थालीषु सोमाः स्युः तेषु चरवस्स्युरिति स्वे स्वस्थालीषु चरुपाकं ब्रुवन् पाकसाधनं स्थालीति दर्शयति ॥ ४८ ॥

सौर्यचरौ पेषणबाधः ।

तस्मिन्पेषणमनर्थलोपात्स्यात् ॥ ४९ ॥

इतः परमापादसमाप्ति अस्यैवाधिकरणस्य वर्णकान्तरमिति पार्थसारथिप्रभृतिमतम् । भाष्यकारमते पृथगधिकरणानि । एवं वेति । यथा चरौ कपालं बाध्यते तथा पेषणादि पात्राद्धरणान्तं बाध्यते द्वारलोपात् । द्वारलोप एव स्पष्टीकृतो ऽग्रिमसूत्रैरिति पार्थसारथ्याद्यभिप्रायः ।

Digitized by Google

"देवीभावं गमिता परिवारपदं कथम्भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम्" ॥

"How can she, having once enjoyed the position of a Queen, be lowered to the position of a common woman? Verily, the jewel marked with divine forms is not capable of wear."

[Here the common attribute—*impropriety*—is mentioned in both cases, but by different words].

There are Serial Typical Comparisons also—*e. g.*

"यदि दहत्यनलो" (*Vide Text*, P. 445).

Similarly may others be followed.

102 (*concld.*)—[*Page* 697.] Exemplification is the reflective representation of all these.

(14) Drishtâuta or Exempiification.

Of all these, i. e. of the common attribute &c.

Exemplification (दृष्टान्त) is explained as that of which the अन्त (*i. e.* comprehension) is perceived—*e. g.*

"On seeing you, is the fire of her desire cooled. For it is only on seeing the moon that the Kumuda blooms."

This is founded on similarity. To exemplify when it is through contrast—

"When you—of auspicious actions (or deeds)—take up the sword in battle,—your enemies become shattered. Dusts are settled only in the absence of wind."

103.—[*Page* 699.] When the common attribute of the original and the alien objects, is only once mentioned, and when the same Case is connected with many verbs, then we have the Illuminator.

(15) *Dipaka* or Illuminator.

The Illuminator is that where the attribute—of the form of verb, &c.—of the objects connected and unconnected, with the context—*i. e.* of the two members of compariton—is expressed only once. And this is called Illuminator, since the attribute mentioned but once, illumines the whole sentence—*e. g.*

Digitized by Google

"The wealth of misers, the hood-jewel of serpents, the mein of the lion, and the breasts of young ladies—when are all these touched before death?"

[Here the attribute—*i. e.* difficulty of touch—common to the lady's breasts (the Upamēya) and the others (the Upamānas), is mentioned but once.]

(The second) is that where a Case connected with many verbs, is but once mentioned—*e. g.*

[*Page* 701.] "The newly-wedded wife, when on the (husband's) bed, perspires, shrinks (with terror), turns away, and sleeps with her face turned to the other side, closes the eyes, casts sidelong glances, rejoices internally and desires to kiss."

[Here a single noun, the '*wife*' is connected with the whole series of verbs.]

The Mālādīpaka.

104 (*contd.*)—Stringed Illuminator is that where the preceding helps the excellence of the following.

[*Page* 702.] We have Stringed Illuminator where the following description is helped by the preceding.—*e. g.*

"संग्रामाङ्गणमागतेन" (*Vide* Text, p. 395.)

(16) *Tulyayogitā* or Equal Pairing.

104 (*concld.*)—The single mention of the properties of the *fixed object (or of the object compared to)* constitutes *Equal Pairing.*

[*Page* 703.] '*Of the fixed object*'—*i. e.* of the object described or one alien to it.

Examples in order—

"पाण्डुक्षामं" (*Vide* Text, p. 503.)

[Here the property, that of *expressing*, belonging to the object described, the pangs of separation,—is only once mentioned.]

And

"Before her lovely and graceful eyes, what are the lines of white, red or blue lotus? and by your face are subdued at a stroke, nectar, the nectar-beamed and the lotus."

[Here in the first half the property—that of being disregarded—belonging to the lotuses, the object compared to,—is mentioned once; as is the 'subjugation' in the latter half.]

105 (*contd.*)—The description of the excellence of the object compared to, by the other, is Dissimilitude.

(17) Vyatirēka or Dissimilitude.

'*The other*'—*i. e.* the object compared.

Example—

"The moon, though reduced every day, yet rises higher every day too. O beautiful one! have done! be reconciled! youth, having once gone, returns not again."

Some people have asserted, that here we have an excess of the object compared to, over the object compared. But this is not true; since the property described here is the *greater fickleness* of youth.

105-106 (*contd.*)—[*Page* 706.] This is twenty-four-fold—one having both the causes (of excellence) mentioned, and three-fold with non-mention (of these); (and these again are such as having) the similitude, expressed by word and meaning, or implied; (and these again being based on words) of double *entendre* as well.

The twenty-four kinds of Vyatirēka.

[*Page* 707.] (1) The mention of the two causes of contrast—the excellence of the object described, and the deficiency of that compared to; (2), (3) and (4) the leaving out, or non-mention, of each of these two, or of both. These four kinds become twelve-fold,—on account of the similitude being denoted by word, and by sense, (in each of which there are four kinds), and the Similitude being implied, (in which case too there are four). And these occur in Paronomasia also (as well as without it), and thus become—twenty-four-fold. Examples in order—

Digitized by Google

"असिमात्रसहायो यं प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्मयो ऽस्य महाधृतेः" ॥

["That brave person who with only his sword for his help, suppressed enemies, is not puffed, like other ordinary people."]

[*Page* 708.] Here the non-mention of one of the two (causes of contrast)—*ordinary* and *brave*—or of both would make the above, an instance of the three-fold non-mention. The use of the particle इव makes the similitude a verbal or direct one.

"असिमात्रसहायोऽपि प्रभूतारिपराभवे ।
नैवान्यतुच्छजनवत् सगर्वोऽयं महाधृतिः" ॥

Here the affix वति being in the sense of similarity, makes it due to the sense (or indirect.)

"इयं सुनयना दासीकृततामरसश्रिया ।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम्" ॥

["This beautiful-eyed one, subdues the stigmatised moon, by means of her unstigmatised face, the subduer of the loveliness of lotus."]

Here the absence of any such words as इव or तुल्य—makes the similitude merely an implied one.

[*Page* 710.] "जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः ।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः" ॥

"The qualities of that person, of unfathomable excellences, the subjugator of the senses, the student of proper learning, are not imperfect, like (the threads of) the lotus."

Here the affix वति means इव, and the word गुण has a double *entendre*, and the similitude is verbal or direct.

"अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः" ॥

"Lo! this wealthy Lord of the Earth, with a compact and perfect kingdom, is never deprived of his splendour, like the moon (full and bright)."

Here the affix वति=तुल्य, and the word कला has a double meaning.

[*Page* 711.] The Stringed Contrast is like the Stringed Prativastūpamā. There are as many sorts (of the Stringed Contrast as of the pure ones). These are only partially exemplified.

"हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि" ॥

"O Lord! you are not *of unequal eyes* (odd) like Çiva, not the suppressor *of merit* (of the demon Vrisha) like Vishnu, nor the *troubler* (beater) of the world by means of your *arms* (rays) like the Sun."

Here वति=तुल्य, and the words विषम, etc., are used with double sense; hence we have *Contrast* based on implied similarity.

[*Page* 712.] "नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वताऽनेन भूपेन भास्वानेष विनिर्जितः" ॥

"With his resplendence of glory always shining, the King has subdued the Sun, who has his brightness suppressed at night."

Here the similitude is merely implied. भास्वता has a double meaning (*shining* and *sun*).

Or again—

"स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बम्
बिम्बप्रभाधरमकृत्रिमहृद्यगन्धम् ।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम्" ॥

"The nocturnal drinking bouts of young men cooled down their desire for drinking, but not so, for the face of women—the face, resembling the clear and shining moon (the wine reflecting the disc of the moon owing to its clearness) with Bimba-like lips (red as the Bimba), and with natural fragrance."

[*Page* 713.] Here though the words इव and तुल्य etc. are not mentioned, yet we have the similitude implied by the parono-

Digitized by Google

matic qualifications. There will be similar divisions by the distinct mention of words with double meanings; and these may be similarly exemplified.

(18) *Akshepa* or Hint.

106-107 (*contd.*)—[*Page* 714.] When something desired to be said, is suppressed or denied for the purpose of conveying a particular meaning, it is Hint; and this is two-fold—having its subject *about to be mentioned*, and *already mentioned.*

Hint consists in the suppression, or semblance of denial, of a principal subject, not capable of being abandoned, with a view to convey an idea of its unmentionability, or of its being too well-known; and this is two-fold—(1) having its subject about to be mentioned, and (2) having its subject already mentioned.

Examples in order—

[*Page* 715.] "Oh! come! I shall tell you—O cruel one!—something about some body. Or, what is the use? I shall not tell you. Let her, who has taken an unconsidered step, die."

Here the subject to be described consists of the pangs of the woman; and this is suppressed in order to imply the undescribability of her sufferings.

"Moonlight, pearl-necklace, sandalwood anointment, the water of the lunar-gem, camphor, plantain-(roots), bangles (made) of lotus-stalks, and lotus leaves—all these act like fire in her heart, lorded over by you. Ah! what is the good of saying all this? *I shall not tell it*".

(Here the subject—the fire-like effects of cooling objects—is too well-known to be mentioned).

(19) Vibhavanā or Peculiar Causation.

107 (*concld.*)—[*Page* 716.] Peculiar Causation consists in the implication of the effect, in the absence of the action (cause).

Peculiar Causation is the mention of the effect when there is a denial of the action, in the form of the cause.—*e. g.*

"She felt hurt, though not hurt by even a blooming creeper; she turned aside, though not stung by the black-bees; and moved to and fro, even without being moved by waves of lotus leaves."

108 (*contd.*)—[*Page* 718.] Peculiar Allegation is the non-mention of the effect in the presence of a fully developed cause.

(20) Viçeshokti or Peculiar Allegation.

Peculiar Allegation consists in the non-mention of the effect, though there is present the conjunction of all the causes (appertaining to it). This is (threefold)—(1) not having the reason (of the absence of the effect) mentioned, (2) having the reason mentioned, and (3) having the reason inconceivable.

Examples in order—

[*Page* 719.] "Though sleep had gone, the sun had risen, the friends had come to the door, and the paramour had loosened his embrace, yet the woman moved not from the embrace."

[Here the reason, *the great affection*, is not mentioned].

"Reverence to that Fish-marked One, of irrespressible prowess, who, though burnt (completely) like the camphor, is yet capable of displaying his power in every individual."

[Here the reason—*the irrespressibleness of the prowess*—is mentioned.]

"He who though one, is yet victor over the three worlds—the Flower-armed One, not deprived of his power by Çiva, Who deprived him of his body."

[Here the reason of Çiva not depriving him of his power, is not conceivable.]

108 (*concld.*)—[*Page* 721.] The Symmetrical is the systematic connection of words mentioned in order.

(21) Yathâsankhya or the Symmetrical.

(1) "एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च ।
तापं च सम्मदरसं च रतिं च पुष्णान्
शौर्योष्मणा च विनयेन च लीलया च" ॥

"O Lord! it is strange that though alone, you live three-fold—in the hearts of enemies, learned men, and the deer-eyed ones,—producing pain, pleasure, and love,—by means of your valour, humility, and graces."

(22) Arthāntaranyāsa or Transition.

109.—Where a general (statement) is supported by a particular, or a particular by a general, through similitude or contrast of properties, it is Transition.

Where through similitude or contrast of properties, a general is supported by a particular, or where a particular is supported by a general, it is *Transition*.

Examples in order—

"To persons, having their heart suppressed by their own faults, the most lovely things appear otherwise. Struck with bile one perceives the snow-white conch to be yellow." (Mere through similitude properties, we have a support of faultiness by a particular statement).

"सुसितवसनालङ्कारायां &c." (*Vide* Text, p. 441.)

"Through the fault of qualities alone are persons, capable of bearing work, engaged in work. The worthless ox, not having its shoulder hardened (by work), sleeps soundly." (Here we have the particular supported by the general through similtude of properties).

[*Page* 724.] "Oh! a great fault has been committed by my life, that I had to speak in such a manner. Lucky are those that have died without seeing their friends fallen in trouble." (Here we have the general supported by the particular, through contrast).

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

चित्रमीमांसा, अप्पयदीक्षितकृता श्री ते· रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।≡)॥

गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतडाक्तरबालन्टैनाचार्य्येणाङ्गलदेशीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायां कृतम् .. .. ४)

मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

शाक्तधर्मदीपिका, ... १)

अमरकोशः सटीकः.. .. .. ४)

योगवार्त्तिकम् .. .. २॥≡)

शीतपदार्थनिर्वचनम् .. .. ३)

वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूकशास्त्रि-
संशोधिता .. .. ४)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम् ५॥।)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीरामभिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३≡)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः । .. .. २।)

सेतुपूर्त्तेः प्रथमोविन्दुः सत्संप्रदायाचार्य पं· स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतोनिर्विशेषाद्वैतनिराकरणपरः .. .. १॥≡)

सेतुपूर्त्तिसहितोवेदार्थसंग्रहः .. .. ३॥।)

शाक्तदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं· स्वामिश्रीराममिश्रशास्त्रि संकलिलतटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-
शास्त्रिणा संशोधिता पूर्वार्धरूपा .. .. ५॥।)

• माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता, ... ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 337

KĀŚIKĀVYĀKHYĀ PADAMAÑJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 353

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 369

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 385

Digitized by Google

HARVARD COLLEGE LIBRARY
AUG 29 1898

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 8.] August, 1898. [Vol. XX.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

AUG 29 1898

ऽपि ज्ञानत्वोपचार इत्यवोचन् केचित् । पक्षान्तरमुपक्षिपति । परे त्विति । किमात्मिकैषा भगवतो व्याप्तिरित्यनुयोगे यदात्मको भगवानिति प्रतिवचनात्, किमात्मको भगवानिति पुनरनुयोगे च ज्ञानात्मक इत्यादिप्रत्युक्तेः शक्त्यात्मकत्वादिवन्मुख्यत्वविरोधाभावाच्च । स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणमित्युपबृंहणस्वारस्याच्च विषयाश्रयावच्छेदनिरपेक्षं स्वगोचरज्ञाननिरपेक्षप्रकाशनत्वनिमित्तेनात्मनीव ज्ञानत्वं मुख्यमिति ॥ ६२ ॥

इति नित्यविभूतेर्जडत्वाजडत्वपक्षौ ।

नन्विह जडपक्ष एव साधीयान् पक्षान्तरन्तु न सम्भवमृच्छतीत्यभिप्रायेण चोदयति । निस्सङ्कोचेति ॥

मू० निस्संकोचासमस्तङ्कलयति मतिर्नित्यमुक्तेश्वराणां बद्धानां नित्यभूतिर्न विलसति ततः कस्य सा स्वप्रकाशा । मैवं नित्येश्वरादेस्सति मतिविभवे साऽस्तु तेनानपेक्षा वेद्यानुद्भासकाले मतिरिव न तु सा बन्धकाले विभाति ॥ ६३ ॥

टी० न हि कश्चित्पुरुषमनपेक्ष्य किञ्चित्प्रकाशत इति सम्भवति पुरुषास्तु नित्यमुक्तेश्वरास्सर्वेऽपि निष्प्रतिघया स्वधर्मभूतधिया सर्वं साक्षात्कुर्वते बद्धानां तु नित्यविभूतिर्न प्रकाशत एव अतः स्वप्रकाशत्वं न स्यादित्याक्षेपः । तत्र यथाश्रुतस्वारस्यसक्तस्समाधत्ते । मैवमिति । अभिप्रेतं विवृणोति । नित्येति । यथाऽऽत्मनां नित्यस्वप्रकाशानां धर्मभूतधीर्गृह्यमाणदशायामपि स्वप्रकाशत्वं नापैति तथा सर्वैस्तत्तद्धिया साक्षात्क्रियमाणस्यापि शुद्धसत्त्वस्य

Digitized by Google

स्वप्रकाशत्वमविरुद्धमिति तर्हि सर्वसाधारण्याद् बद्धान् प्रत्यपि भासेतेत्यत्राह । वेद्येति । यथा धर्मभूतज्ञानस्य विषयग्रहणवेलायां स्वाश्रयायैव भातीत्यवस्थाभेदात् पुरुषभेदाच्च भाननियमः तथा स्वसाक्षात्कर्तॄणामेव स्वयमपि प्रकाशत इति व्यवस्थायां न कश्चि-द्बाधः पुरुषाणां नैरपेक्ष्यं न वस्तुस्वभावं प्रतिरुणद्धीति भावः । नन्वयं प्रकाशः स्वविषयबुद्धिधर्मो वा स्वधर्मो वा पूर्वत्र स्वप्रकाश-त्वहानिः, उत्तरत्रानादिरागन्तुको वाऽऽद्ये बद्धान् प्रत्यप्यनादिरिति भानप्रसङ्गो दुर्वारः, द्वितीये कारणानिरूपणादसम्भवः मैवं न ह्याग-न्तूनां सर्वेषां विशेषकारणमस्माभिर्विविच्यते न चास्मदविवेचितमिति नास्ति अतिप्रसङ्गात्, सामान्यकारणन्तु विश्वकर्तुरिच्छादिकं श्रुतमेव अत एव हि नित्यानां मुक्तानां च स्वच्छन्दविकीर्षासन्ततिभेदसि-द्धिरिति ॥ ६३ ॥

इति नित्यविभूतेरजडत्वपक्षोपपत्तिः ।

दिव्यस्थानादेर्नित्यत्वमाक्षिप्य प्रत्याह । तत्त्वानीत्यर्द्धेन ॥

मू० तत्त्वान्यप्राकृतानि त्रिगुण इव प*रीणामत-श्चेद् भवेयुः स्थानादि स्यादनित्यं न यदि न घटते भूततादीति चेन्न । अत्रत्यस्मादित-स्त्वक्रमनियतगुणप्रक्रियाद्यैकरूप्यान्नित्येऽपि स्यान्निमित्तानुगतिनियमितस्तत्तदाख्याविशेषः ॥ ६४ ॥

टी० त्रिगुण इव त्रिगुणद्रव्ये यथा परिणामतः पृथिव्यादि-विभागस्तथेत्यर्थः स्थानादिस्यादनित्यमिति सङ्घातिनामनित्यत्वे कथन्तत्सङ्घातनित्यत्वमिति भावः । अपरिणामपक्षं शङ्कते । न

* परिणामशब्दस्य घञन्तत्वेन परेर्दीर्घः ।

Digitized by Google

यदीति । तत्र चोद्यमाह । न घटत इति । अप्राकृतपञ्चभूतादिव्यपदेशो न युज्यत इत्यर्थः । अनित्येष्वप्याकाशादिपञ्चभूतसमाख्यानिवेशस्यान्यथासिद्धिमाह । अचत्येति । त्रिगुणविकृतीनां हि तत्वानां परिणतिविशेषादेकद्वित्र्यादिगुणनियतिः द्रव्यतत्वानां तु नित्यसिद्धा ततश्च यथा नित्ये चानित्ये च निमित्ताविशेषात् परेषां पृथिव्यादिशब्दः तथाऽत्रापि तत्तद्गुणतारतम्यनिमित्तास्तत्तच्छब्द इति नित्यत्वाविरोधः ॥ ६४ ॥

इत्यप्राकृतस्थानादेरनित्यत्वादिपरिहारः ।

अथ परविग्रहनित्यतां प्रमाणतः स्थापयति । निर्दिष्टमिति ।

मू० निर्दिष्टं पौ*ष्करादौ स्वयमखिलकृता स्वं
वपुर्न्नित्यसिद्धं नित्या लिङ्गेति चैकायननिगमविदो वाक्यभाष्यादि चैवम् । नित्यत्वं
वासुदेवाह्वयवपुषि जगौ मोक्षधर्मे मुनीन्द्रो-
नित्येच्छातस्तथा तत्तदिह विहृतिमान् सां-
ख्यजन्मादितर्कः ॥ ६५ ॥

टी० श्रीपौष्करे तावन्नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर इति । श्रीसात्वते च नित्यं नित्याकृतिधरमिति भगवन्मूर्तिं प्रस्तुत्य नित्याऽलिङ्गा स्वभावसंसिद्धिरिति रहस्याम्नायेऽप्युक्तमाह । नित्यत्वमिति । अत्र ब्रह्मनन्द्यादिसंप्रदायमाह । वाक्येति । आप्ततमोपबृंहणमाह । नित्यत्वमिति । यथा ।

नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् ।
ऋते तमेकं पुरुषं वासुदेवं सनातनमिति ॥

* पौष्करसंहिता नारदपञ्चरात्रान्तर्गता इदानीमप्युपलभ्यते च ।

Digitized by Google

श्रीवैष्णवे पुराणे सदैकरूपरूपायेति इच्छागृहीताभिमतोरुदेह इति स्मरणाद्विग्रहस्येच्छागृहीतत्वे कथं नित्यत्वं तस्मिन्वा कथं तदित्यत्राह । नित्येच्छात इति । अयं भावः अवतारविग्रहेषु तावदिच्छागृहीतत्वमविरुद्धं नित्येऽप्यनिच्छायामनित्यत्वप्रसङ्गमभिसन्धाय नित्येच्छाधीनस्थितित्वविवक्षयेच्छागृहीतत्ववचोयुक्तियुक्तेति । अथ तर्कबाधं परिहरति । तदिति । तथा प्रमाणसिद्धत्वादित्यर्थः । सांशत्वेन जन्मादिसहितत्वं तद्विरहेण वा निरंशत्वं प्रसञ्जयितुं न शक्यमिति भावः । यत्तु कैश्चिदुच्यते नित्यं निष्कलं निर्विकारञ्च परं ब्रह्माशरीरमनुत्या स्वरूपत एव विचित्रविग्रहाकारं तत एवं विग्रहनित्यत्वं, न चात्र स्वरूपविग्रहयोर्भेदो नापि भेदाभेदप्रसङ्ग इति न तद्भावनीयमन्यथा विश्वाद्वैतस्यापि संशाश्यत्वप्रसङ्गादिति ॥ ६६ ॥

इति परविग्रहनित्यत्वम् ।

केचिदाहुः वीरशृङ्गारादिरसानुबन्धीनि अस्त्रभूषणादीनि तानि तदुचिताधिकारिणां यद्यपि तत्तद्विग्रहेष्वनुसन्धेयानि तथाऽप्यत्यन्तनिष्कामाणां तादृशचिन्तनमयुक्तं प्रशान्तशान्तसूचकमित्यादिविशेषणाच्च न चावाप्तसमस्तकामस्य निर्दोषो निरनिष्ट इत्यादिप्रख्यातप्रकारस्य परमात्मनो भूषणादिसाध्यं किञ्चिदस्ति अत इदमुच्यते न ते रूपं न चाकारो नायुधानि न च चास्पदमिति तदिमनुभाषते । अस्त्रेरिति ॥

मू० अस्त्रैर्वा भूषणैर्वा किमिह भगवतोऽवाप्तकामस्य तस्माद्देवो देहेऽपि वीतावरण इति

अणुः कोऽपि जैनोपज*प्राः । किं वा देहेन विश्वात्मन इति वदतां किं प्रतिब्रूयुरेते तस्त्वेतस्याश्रितार्थं तदधिकरणकं सर्वमप्येवमस्तु ॥ ६६ ॥

टी० देहेऽपीत्यादिकमुपालम्भकाकुगर्भम् । अपि—शब्देन स्वरूपे वीतावरणत्वं व्यज्यते तेनानिरोहितस्वभावत्वमनुसन्धत्ते । अथ प्रतिबन्दिमुखेन परिहारमाह । किं वेति । अयं भावः विश्वशरीरिण ईश्वरस्य किं विशेषतः केनचिद्विग्रहेण परिगृहीतेनेति चोदयतां किमेते प्रत्युत्तरं ब्रूयुः । अथ योगविशेषसक्तानां चितालम्बनसिद्ध्यर्थमीश्वरस्य दिव्यगात्रपरिग्रह इति तथैवास्त्रभूषणादिपरिग्रहोऽपीति तुल्यप्रमाणसिद्धत्वादेष्टव्यम् । न च शान्त्यर्थभावनाविरोधः यथोपदेशमस्त्राद्युपयोगस्य स्वीकार्य्यत्वात्, दामोदरं बन्धगत इतिवत् तथा भगवज्जन्मादिवेदिनो जन्मादिनिवृत्तिश्च स्मर्य्यते अहमात्मा विरोधकृत्प्रसक्तिप्रसङ्गे स्यात् ॥ ६६ ॥

इति परस्यास्त्रभूषणाद्यनुपपत्तिपरिहारः ।

ये तु मन्यन्ते परस्य ब्रह्मणो विग्रहादिषु विधिनिषेधौ दृश्येते तत्र निषेधप्राबल्याद्विधीनामन्यार्थत्वमिति तान् प्रत्याह । रूपेति ।

मू० रूपस्थानायुधाख्याजनिलयविधृतिव्यापृतीच्छागुणादेर्विश्वाधारे निषेधो विधिरपि

* रूपेः खेदकत्वेऽपि अग्र उपजाप इत्यादिपदसंदर्शनेन संज्ञापूर्वकविधेरनित्यत्वमाश्रित्य उपजाप इति प्रयोगोनिर्वहणीय इति मन्यामहे तदर्थस्तु जैनजनानुयायिनः केचन वेद-युक्तितत्त्वपराङ्मुखाः प्राकृतमग्नमनसो हठादेव तथा कुग्रहाविष्टमनसः सन्ति । अथवा जैनोपजप्ता जैनसंसर्गविभ्रष्टमतय इत्यर्थः उपजापशब्दस्य तूपदेशार्थकता तु सुप्रसिद्धैव ॥

विषयद्वैतशाम्यद्विरोधौ । इत्थंभूते निषेधः
क्वचिदपि न विधिं बाधते सावकाशः कल्या-
णीरस्य योगस्तदितरविरहोऽप्येकवाक्यश्रुतौ
च ॥ ६७ ॥

टी० विषयद्वैतं—विषयभेदः तेन विधिनिषेधौ शाम्यद्विरोधौ । ततः किमित्यत्राह । इत्थमिति । इत्थं भूते—आलम्भादि-वद्विशेषविधिविद्धाविव्यर्थः एवमनभ्युपगमेऽतिप्रसङ्ग इति भावः विधिनिषेधयोरत्र विषयभेदं विवृण्वन् तस्यैकश्रुतिपठितत्वेन न्यायनिरपेक्षप्रसिद्धिमप्याह । कल्याणीरिति । एतेनापच्छेदन्याय स्यात्र दूरनिरस्तत्वं सूच्यते ॥ ६७ ॥

इति विग्रहादिविधिनिषेधविरोधप्रशमनम् ।

अथ प्रसङ्गात् सर्वदेवतानां विग्रहादिपञ्चकनिरासं परि-हर्तुं तमनुभाषते । देहादिरिति ॥

मू० देहादिर्देवतानां हविरनुभवनं सन्निधिर्योग-
पद्यं प्रीतिर्दानं फलस्याप्यसदिति कथय-
न्त्यर्द्धलोकायतस्थाः । तत्राध्यक्षादिदूरस्वम-
हिमसदृशाशेषवैशिष्ट्यमासां तत्तद्विध्यर्थवा-
दप्रभृतिभिरविदुस्तत्परैरेव शिष्टाः ॥ ६८ ॥

टी० आदिशब्देन इन्द्रियभोग्यभोगोपकरणादिसंग्रहः अ-र्द्धलोकायतमतं कर्माराध्यापन्हवमतम् । एतत्प्रतिक्षिपति । तत्रेति । तस्मिन् पक्षे प्रतिक्षेप्ये सतीत्यर्थः । अध्यक्षादिदूर-त्वोक्तिः यूपादित्यैक्यादिवन्नात्र बाधप्रसङ्ग इति ज्ञापनार्थं स्वमहि-मसदृशत्वोक्त्या स्वपरोपयोगिसाधनानुगुण्यसूचनम् । अशेषशब्देन

तत्तदाराध्यप्रतिनियतविग्रहतदनुबन्ध्यस्त्रादिसर्वसंग्रहः प्रभृतिशब्देन मन्त्राणां स्मृतीतिहासपुराणानाञ्च संग्रहः अप्रधानेऽप्युपयुक्ते तात्पर्य्यमस्त्येवेत्यभिप्रायेण तत्परैरेवेत्युक्तं, देवताऽधिकरणे च विग्रहादिनिरासो न सूत्रोक्तः प्रयोजकाप्रयोजकविभागमात्रन्तु न विग्रहादिसदसत्त्वापेक्षं हविर्देवतासामान्ये हविर्बलीयस्त्वम् । प्रमाणप्रवृत्तिवैषम्याद् विशेषणतः पर्य्यायतश्च देवताभेदोक्तिस्तथातथोद्देशार्था विस्तरस्त्वन्यत्र । शिष्टाः—बोधायनटङ्कद्रमिडादयः ॥ ६८ ॥

इति विग्रहादिपञ्चकनिराकरणपरिहारः ।

यद्यपि भगवतो गुणविग्रहादियोगस्सत्यः तथाऽपि षाड्गुण्यस्य व्यापित्वमयुक्तं विभवेषु विपरीतदृष्टेः, व्यूहेषु संकर्षणादिषु ज्ञानबलादिगुणद्वन्द्वनियमोक्तेरित्यत्राह । साधुत्राणेति ॥

मू० साधुत्राणादिहेतोस्तदुचितसमये विग्रहांशैः स्वकीयैः स्वेच्छातस्सत्यरूपो विभुरवतरति स्वान् गुणौघाननुभ्रन् । व्यूहे संकर्षणादौ गुणनियतिरभिव्यक्तिवैषम्यमात्राद्वृद्धिह्रासाद्यभावात् स हि भवति सदा पूर्णषाड्गुण्यशाली ॥ ६९ ॥

टी० अजोऽपि सन्नव्ययात्मेत्यादिप्रसिद्धमिह प्रतिसन्धेयं प्रतिनियतगुणद्वन्द्वोक्तेरन्यथासिद्धिमाह । व्यूह इति । अयं भावः

निगूहनं चतुष्काणां द्वन्द्वानाञ्च प्रकाशनम् ।
षड्गुणस्य तथाभूतसमाधिस्थोपयोगतः ॥

मोहनशक्त्या मनुष्यादिसजातीयशङ्कास्पदेषु विभवेष्वपि हि सिद्धं षाड्गुण्यं व्यूहेषु कैमुत्यसिद्धं सर्वेष्वपि हि भगवत्त्वं पूर्णत्वञ्च

Digitized by Google

प्रख्याप्यते संकर्षणादौ व्यवस्थाया गुणद्वन्द्वाभिव्यक्तेः गुणचतुष्कान्तराणामनभिव्यक्तेश्च विशेषनिर्देशोपपत्तिरिति न कर्मणा वर्द्धते नो कनीयान् स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान् अन्यूनस्याप्यवृद्धिश्चेत्यादिश्रुतिस्मृतिबलेन वृद्धिह्रासाद्यभावाद् व्यूहादिषु गुणकार्त्स्न्यमाह । वृद्धीति ॥ ६९ ॥

इति परव्यूहादिपञ्चरूपस्यापि पूर्णषाड्गुण्यवत्त्वम् ।

उक्तेषु व्यूहेषु क्रमाच्छास्त्रप्रवर्त्तनधर्मनयनतत्त्वगमनरूपमुपकारत्रयं जीवमनोऽहङ्कारेष्वभिमानत्रयं संहारसृष्टिरक्षारूपलीलात्रयञ्च व्यपदिश्यते तत्र प्रथमत्रिके व्यवस्थाऽनुपपत्तिचोद्यं सुपरिहरमित्याभिप्रायेणाह । शास्त्रादीनामिति ।

मू० शास्त्रादीनां प्रवृत्तिः प्रतितनु नियता स्याद्धि
संकर्षणादौ जीवादौ या विभज्याभिमति-
रिह लयोत्पत्तिरक्षाविधिश्च । तत्तद्विद्या-
विशेषप्रतिनियतगुणान्यायतस्तौ तु नेयौ
सर्वस्यैको ऽभि मन्ता स हि सकलजगद्धा-
पृतिष्वेककर्त्ता ॥ ७० ॥

टी० द्वितीयतृतीयत्रिके विरोधं परिजिहीर्षुरनुभाषते । जीवादाविति । अत्रेदमाभिप्रायिकं चोद्यं यदि सङ्कर्षणादयोऽपि वासुदेव एव स्युस्तदा अभिमानत्रयस्य सञ्जिहीर्षादित्रयस्य चैकाश्रयत्वाद्व्यवस्था न स्यात्, अतस्ते परस्मादन्ये केचित् पुरुषा इति परिहरति । तत्तदिति । यद्येक एव परमात्मा तत्तद्विद्याविशेषव्यवस्थितगुणविशेषवत्तयोपास्य इति गुणोपसंहारपादे निरणायि तथापि मिथस्संघटितविषयाभिमानव्यापारविशेषवत्तया व्यूहनिष्ठैर्विभज्यानुसन्धेय इति भावः । चेतनभेदभ्रमो बाधमाह । सर्वस्येति ।

Digitized by Google

न हि विश्वमूर्त्तेरभिमानः कश्चित्संकुचति न च संहारादौ क्वचिदुदास्ते न च हिरण्यगर्भादिवद्विशेषभूतचेतनान्तराश्रयत्व वचनान्तराण्यपि प्रत्युतैक्यमेव प्रतिपादितमित्याशयः ॥ ७० ॥

इति व्यूहेषु विशेषाभिमानादिविरोधपरिहारः ।

मानमेयमलिम्लुचास्त्वाहुः त्रिव्यूहचतुर्व्यूहवाक्ययोर्विरोधात् सर्वमेतदुपासनार्थकल्पनामात्रमितिरिति तदनुवदते । त्रिव्यूह इति ।

मू० त्रिव्यूहः क्वापि देवः क्वचिदपि हि चतुर्व्यूह उक्तस्तदेवं व्याघातेऽन्योन्यबाधादुभयमिदमसत्कल्पनामात्रमस्तु । तन्नाद्ये व्यूहभेदे त्रियुगगुणतया चिन्तनीये परस्माद्युक्ताभेदाविवक्षा तदनुपगमने तत्त्वसंख्यादिबाधः ॥ ७१ ॥

टी० प्रतिवदति । तन्नेति । विरोधं शमयति । आद्य इति । वस्तुतश्चतुर्व्यूहत्वेऽप्याद्यव्यूहस्य षड्गुणतयाऽनुसन्धेयत्वात् परस्मादभेदं विवक्षित्वा त्रिव्यूहत्वोक्तिः प्रवृत्तेति न मिथोबाधश्शङ्कनीय इति हृदयम् । उक्तप्रकारानभ्युपगमेऽतिप्रसङ्गमाह । तदनुपगमन इति । एवमिह प्रसङ्गः । यदि न्यूनाधिकनिर्देशमात्राद्विरोधः तदा क्वचिदप्यनुक्तमन्यतो ग्राह्यं न स्यात् ततश्च विद्यैक्ये गुणोपसंहारस्त्यज्येत तथाच्छान्दोग्ये भूतत्रयं तैत्तिरीयके भूतपञ्चकमन्यत्र च तथा तथा न्यूनमधिकञ्च तत्त्वजातमधीतमिति तत्त्वसंख्याव्यवस्थापनं च विलीयेतेति आतिवाहिकगणनादिसंग्रहार्थः आदिशब्दः । एवञ्च पञ्चमूर्त्यादिपरिगणनापि परिचितेति वेदितव्यम् ॥ ७१ ॥

इति व्यूहगणनावैषम्यनिर्वाहः ।

Digitized by Google

पुनरपि मुखान्तरेण मूर्तिकल्पनामनुभाषते । मूर्त्तीनामिति ।

मू० मूर्त्तीनाम्मूलमूलिप्रभृतिषु बहुधा वैपरीत्य-
प्रतीतेर्वर्णादौ बीजतादिव्यवहृतिवदियं
वर्णना भावनार्था । मैवं कालादिभेदात् प्रश-
मितविहृतौ कल्पितत्वं न कल्प्यं नो चेद्
ब्रह्माद्युदन्तेष्वपि विषमकथाभेदवैयाकुली-
स्यात् ॥ ७२ ॥

टी० अस्ति हि तत्तत्संहितास्वभिन्ननाम्नोमूर्तेर्भिन्नकारणकत्वं वर्णभुजादिवैषम्यञ्च अतो मन्त्राक्षरेषु बीजतत्कार्य्यव्यपदेशवत् चितरत्तादिव्यपदेशवच्च भावनार्थं दृष्ट्युपदेशमात्रमेतदिति भावः । एतन्निषेधति । मैवमिति । काल्पनिकत्वशङ्कामूलं विरोधं परिहरति । कालादिभेदादिति । उक्तानभ्युपगमेऽतिप्रसङ्गमाह । नो चेदिति । सन्ति हि चतुर्मुखस्य सप्त जन्मानि रुद्रस्य ब्रह्मपुत्रत्वं ब्रह्मानुजत्वञ्चेन्द्रादीनामपि कारणभेदाः कथ्यन्ते न चैतेषु कल्पादिभेदप्रशमितविरोधेषु काल्पनिकत्वशङ्काऽवकाशस्तथाऽत्रापि स्यात् अन्यथा तत्राऽपि विपरीतापत्तिरिति ।

इति प्रादुर्भावादिप्रक्रियान्तरोपपत्तिः ॥ ७२ ॥

इह केचिदीश्वरस्वरूपेऽपि भोक्तृभोग्यन्यायेन समष्टिव्यष्टिभेदं वर्णयन्ति वदन्ति च मनोमयप्राणमयवाङ्मयाख्यंव्यूहत्रयं तदनुभाषते । ईशस्येति ।

मू० ईशस्य व्यष्टिभेदानभिदधति मनोवाङ्म-
यादीन् यदन्ये तत्र त्रेधा यदीष्टा विकृतिर-
विषया निर्विकारागमाः स्युः । नित्यत्रित्वे तु

नैकेश्वरनियमगतिर्भ्रान्तिसिद्धे विभागे मा-
यादायादपक्षश्रुतिरपि नियतैरस्त्वधिष्ठान-
भेदैः ॥ ७३ ॥

टी० ईदृशोऽयं भेदः किं भोग्यवत्परिणामतः उत भोक्तृवत्स्वभावतः अथ प्रतिबिम्बितचन्द्रादेरिव भ्रान्तित इति विकल्पं मन्वानः प्रथमे निर्विकारश्रुतिविरोधमाह । नचेति । चेधेत्यनन्तव्यष्ट्यन्तराणामुपलक्षणं सर्वात्मनो ब्रह्मणस्सविकारत्वादीश्वरांशे हि तैर्निर्विकारत्वश्रुतिर्निर्वेषिता तथाप्यनवकाशत्वं तस्याः प्रसक्तं द्वितीयं दूषयति । नित्यचित्त्व इति । एको देवः सर्वभूतेषु गूढः एकश्चात्मा न द्वितीयोऽस्ति चास्तेत्यादिभिर्विरोधः स्यादिति भावः । तृतीयेऽनिष्टमाह । भ्रान्तीति । मायादायादपक्षः— मायार्जितभ्रान्तिविभागोपजीविपक्षः स ते स्यादिति शेषः । सत्यमीश्वरमनभ्युपगच्छतामीश्वरचित्त्वश्रुतिस्तर्हि निरधिष्ठानभ्रमविषया स्यादित्यचाह । श्रुतिरपीति । अयं भावः ईश्वरस्तावन्मायोपहिते ब्रह्मणि कल्प्यतां चित्वञ्च तस्य द्विचन्द्रादिन्यायात् मायाविलासविशुतब्रह्माधिष्ठानतया स्वीक्रियतामिति । यद्वा मनोमयादिविभागवादिनी श्रुतिः कथं निर्वाढव्येत्यचाह । श्रुतिरपीति । अपिशब्द इह एतादृशश्रुत्यसंभवाभिप्रायः संभवेऽप्युच्यते परोपकारकमनःप्रभृत्यधिष्ठानभेदादीश्वरस्य मनोमयत्वादिविभागो निरुह्यतामिति । इतीश्वरस्वरूपत्रिवयसमष्टिव्यष्ट्यादिवादनिरासः ॥ ७३ ॥

पुनरपि परव्यूहादिषु पुरुषभेदमाशङ्कते । युक्तिरिति ।

मू० युक्तिः प्रश्नोत्तरादेर्न हि पुरुषभिदां बुद्धि-
भेदञ्च मुक्त्वा तस्माद्व्यूहादिभेदे कतिचन

पुरुषाः स्युः परेणानुबद्धाः । तत्र स्वच्छन्द-
लीलः स्वयमभिनयति स्वान्यतां सर्ववेदी
तद्वच्छिष्यादिवृत्तिप्रसृतिमिह सतां शिक्ष-
यन् सानुकम्पः ॥ ७४ ॥

टी० आदिशब्देन कृष्णबलभद्रादिषु मिथो विवादकोपादि संगृह्यते अस्ति तावत्सात्वतादिषु गुरुशिष्यन्याये वासुदेवसंकर्षणादीनां प्रश्नप्रतिवचनक्रमेण विद्याऽधिगमस्तत्र न तावत् स्वात्मानं स्वयं पृच्छति प्रतिवदति वा हेतुप्रयोजनयोरसंभवात् अतः प्रष्टृप्रतिवक्तृचेतनभेदः कल्प्यत इति । ननु भेदज्ञानिश्चये कथं भेदकॢप्तिरित्यत आह । बुद्धिभेदश्च युक्तेति । न्यूनबुद्धिः परिपृच्छेदधिकबुद्धिरनुशास्तीति लोकवेदप्रसिद्धमिति भावः । एतदन्यथासिद्धमित्यभिप्रायेण प्रतिवक्ति । तन्नेति । चेतनभेदाभावेऽपि प्रश्नोत्तराद्युपपत्तिमाह । स्वच्छन्दलील इति । स्वयमित्यनेन स्वस्येवेति गम्यते । अभिनयप्रयोजनमाह । तद्वदिति । शिष्याचार्यादिभिरेवं वर्तितव्यमिति धार्मिकशिक्षणं देवस्य दयान्वितलीलाप्रसूतमिति भावः ।

इतीश्वरस्य स्वात्मनि शिष्याचार्यत्वाद्यभिनयफलम् ॥ ७४ ॥

अथ मायामतानुयायी चोदयति । विश्वेति ।

मू० विश्वान्तर्वर्त्तिबालोदरगतमखिलं कस्य वि-
श्वासभूमिस्तस्मादौपेन्द्रमीदृग् भवतु रसव-
शादिन्द्रजालं प्रवृत्तम् । माभूदाश्चर्यशक्ते-
रवितथमिदमित्येव सर्वाप्रसिद्धेर्व्याघातस्यो-
पशान्तिस्तदनुगुणदशाभेदयोगादिभिः स्या-
त् ॥ ७५ ॥

टी० विश्वशब्देन त्रैलोक्यादि गृह्यते कस्यचिदन्तरे किञ्चि-
द्वर्तते तदेव तदानीमेव तस्माद्बहिरेव क एतच्च बुद्ध्यधीतेति भावः ।
विश्वापह्नवाभिलाषी स्वोक्तफलितमाह । तस्मादिति । रसवशादि-
च्छावशादीप्सितक्रीडारसवशाद्वा तादृशाद्भुतविवक्षया प्रतिषेधति ।
मा भूदिति । तत्तत्प्रकरणपरामर्शेन मिथ्यात्वपरिहारे सिद्धे विरुद्ध
वत् प्रतिपन्नं सर्वमविरुद्धावस्थाविशेषादिविवक्षया निर्वोढुं शक्यं तत्र
भगवद्विग्रहविभूत्यादीनां सङ्कोचशक्तिर्विकासशक्तिस्तत्तदभिमानविष-
यसजातीयोत्पादनशक्तिः सूक्ष्मस्थूलावस्थाभेदः परिमितविग्रहव्यङ्ग्या-
परिमितस्वरूपलक्षणमित्यादिकं यथार्हमवधारणीयम् एवमणोरणीयान्
महतो महीयानित्यादीनि ब्रह्मस्वरूपविषयवाक्यान्यपि तत्तदविरु
द्धार्थविवक्षया नेतव्यानि वस्त्वन्तराद्दृष्टवैचित्र्यमात्रेण विरोधशङ्कायां
सर्वेषातिप्रसङ्गः स्यादिति ।

इत्याश्चर्य्यवृत्तान्तविशेषसत्यत्वम् । ७५ ।

अथ निखिलजगत्कारणतयाऽवधृतस्येश्वरस्य सर्वसृष्ट्यनुगुणेषु
ज्ञानशक्त्यादिष्वनुपपत्तिः परिह्रियते तत्र ज्ञाने तावदयुक्तिरेवं शङ्क्यते
नित्यसर्वज्ञ ईश्वरः भविष्यद्वस्तु भविष्यत्त्वेन पश्यति न वा पूर्वं
तस्यैव वस्तुनो भवदवस्थायां भूतावस्थायाञ्च किं स एवोल्लेखस्त-
दन्यो वा आद्ये भवतो भूतस्य च भविष्यत्त्वेनोल्लेखाद् भ्रान्तिरेव
स्यात्, द्वितीये पश्यत्यचक्षुरित्यादिना करणनिरपेक्षज्ञानवत्त्वेन कथि-
तस्य कार्य्यज्ञानासंभवात् प्रतिक्षणं भिदुरानन्तोल्लेखसन्ततिपरिग्रहो
निर्मूलः स्यात् भविष्यतां भविष्यत्त्वेनादर्शनन्तु तेषामदर्शनत एव वा
स्वस्वरूपमात्रदर्शनेन वा वर्तमानत्वभूतत्वदर्शनेन वा स्यात् आद्ये
किञ्चिज्ज्ञत्वप्रसङ्गः द्वितीयेऽपि प्रकारतस्स एव, तृतीये भ्रान्तत्वं दुस्त-
रम्, एवं वर्तमानेऽतीते च वर्तमानत्वादिबुद्धिरस्ति वा न वा सा च

Digitized by Google

निवृत्तिमती नित्या वेत्यादिविकल्पेन प्रवृत्ता दोषाः प्रतिबन्धेया इति तदभिप्रेत्याह । यद्भावित्वेनेति ।

मू० यद्भावित्वेन बुद्धं भवति तदथ चाऽतीतरूपं तदस्मिन्नुल्लेखो भिद्यते चेदकरणजमतेरैकरूप्यं प्रकुप्येत् । प्राचीनोल्लेख एव स्थितवति तु गते भाविबुद्धिभ्रमः स्यान्नैवं पूर्वापरादिक्रमनियतसदोल्लेखसत्यत्वसिद्धेः ॥ ७६ ॥

टी० भवति तद्वर्त्तमानत्वावस्थां प्राप्नोति अथ चाऽतीतरूपं वर्त्तमानत्वावस्थानन्तरमतीतावस्थं स्यादित्यर्थः तत्तस्मादस्मिन्नवस्थाद्वयवति वस्तुनि नित्यसर्वज्ञबुद्धेरागमित्याद्युल्लेखो भिद्यते चेत्करणनिरपेक्षबुद्धेरीश्वरस्य नित्यैकरूपसर्वदर्शनानुपपत्तिः स्यात् प्राचीनोल्लेखे नित्यानुवृत्ते तु वर्त्तमाने गते च भविष्यत्तद्बुद्धिर्भ्रान्तिस्स्यादिति परचोदनाऽनुवादः । चचेोल्लेखभेदे तदभावे चादोष इत्यभिप्रायेण प्रतिषेधति । नैवमिति । उल्लेखभेदपक्षे तावदेवं निस्तारः, न ह्यत्र करणनिरपेक्षज्ञानवत्त्वविरोधः चक्षुरादिनिरपेक्षत्वेऽपि हेतुतस्साध्यप्रकाशोपपत्तेः हेतुश्चोल्लेखसन्तानवुत्तरोत्तरस्य पूर्वपूर्वः तत्प्रवाहानादित्वाच्च न कदाचिन्निर्मूलत्वं न चेदृशाऽनवस्था दोष इति । एकरूपोल्लेखपक्षे त्वाह । पूर्वापरेति । अयं भावः सर्वं कार्य्यं स्वकालेन हि नित्याद्यनन्त्र किंचिदपेक्ष्य पूर्वं किञ्चिदपेक्ष्योत्तरं तत एवं चिप्रकारं कार्य्यं सर्वदैकबुद्धिसमारूढं न कदाचिदपि स्वकालवर्तिनः कालान्तरवर्तित्वेनोल्लेखः भविष्यत्त्वादिकञ्चापेक्षिकं किञ्चिदपेक्षयोत्तरत्वमेव कस्यचित्तत्समकालप्रागभाववतस्तदपेक्षया भविष्यत्त्वम् एवं किञ्चिदपेक्षया पूर्वत्वमेव तत्समकालप्रध्वंसवतोऽतीतत्वं तच्च

Digitized by Google

किञ्चित्कादाचित्कं न हि नित्यापेक्षया किञ्चिद् भविष्यद् भूतं वा एवं सर्वप्रकारं वस्तु सर्वज्ञबुद्ध्या यथावस्थितरूपेण सर्वदेवोल्लिख्यत इति करणनैरपेक्ष्यं विपर्ययासविरहश्च सिध्यतीति ।

य एव स्यादसर्वज्ञस्सर्वज्ञं न स बुध्यते ।
इति तद्बाधबोधार्थी तन्निषेधेऽपि न क्षमः ॥

इति सार्वज्ञ्यानुपपत्तिनिरासः ॥ ७६ ॥

ईश्वरस्य सर्वशक्तित्ववादमपह्नोतुमिच्छन् कश्चिद्विरुद्धोदाहरणान्तावद् व्यवस्थापयति । नीलमितिं ॥

मू० नीलं किञ्चित्तदानीमरुणमिति न खल्विन्द्रजालादृते ऽद्धा नो चेदेवं विरोधः क्वचिदपि न भवेत् कश्च जैनेऽपराधः । तस्मादीशो विरुद्धद्वितयमघटयन् सर्वशक्तिः कथं स्यान्मैवं व्याघातशून्येष्वनितरसुशकेष्वस्य तादृक्त्वसिद्धेः ॥ ७७ ॥

टी० अद्धा—सत्यम् । इत्यद्धेत्यन्वयः इन्द्रजालतिरोहितस्त्वेवमद्धेत्यभिमन्येतेति भावः । उक्तानभ्युपगमेऽतिप्रसङ्गमाह । नो चेदिति । क्वचिदपि—दूष्यदूषणपूर्वपक्षसिद्धान्तादावपीत्यर्थः । अतिप्रसङ्गान्तरमाह । कश्चेति । विरुद्धसप्तभङ्गीपरिग्रहो हि जैनस्यापराधः विरोधोच्छेदे सोऽपि न निगृह्येतेति भावः । विरोधसिद्धिमुपजीव्य चोदयति । तस्मादिति । शक्तिर्हि शक्यविषया विरुद्धन्तु घटयितुं न शक्यम् । अतोऽशक्यसद्भावात् कथं सर्वशक्तिः स्यादित्याक्षेपः । अविवक्षितदूषणमिदमित्यभिप्रायेण प्रत्याह । मैवमिति । अभिप्रेतं विवृणोति । व्याघातेति । न हि व्याहतमीश्वरो घटयतीति तस्य सर्वशक्तित्वं ब्रूमः किन्तु यत्कार्यं तत्सर्वं करोति

Digitized by Google

ततश्चान्यैरप्यशक्यं करोतीति सिध्येत् ईदृशमस्य सर्वशक्तित्वमागमाभिप्रेतं तच्च विरोधाभावाद् युज्यत एवेति ।

इति सर्वशक्तित्वस्थापनम् ॥ ७७ ॥

एवमस्तु सर्वज्ञस्सर्वशक्तिरीश्वरस्तथाऽपि चिकीर्षा नाङ्गीकार्य्या न हि कर्त्तुः कार्य्योत्पादकत्वमिच्छाप्रयुक्तं यत्राभावे क्वचिदपि ततस्तदसिद्धेः इच्छाभावेऽपि प्रयत्नः कार्यसिद्धिर्जीवनपूर्वकप्रयत्नकार्य्यनिश्वासादिनिष्पत्त्या संगृहीता, अतः कार्यलिङ्गेन वोपदेशलिङ्गेन वा कर्त्तुर्ज्ञानयत्नवत्त्वमात्रमेवानुमेयं किमनागलस्तनकल्पया चिकीर्षयेति काश्यपीयाः केचिदाचक्षते तदिदमन्वाचष्टे । संगृह्येति ।

मू० संगृह्य ज्ञानयत्नौ कतिचन निखिलस्रष्टुरिच्छां तु नैच्छंस्तस्यां द्वेषः क एषामनुमितिशरणानीकनासीरभाजाम् । श्रुत्या तद्बोधयन्तावभिदधति यदि त्वम्यतामेवमिच्छा निर्वाह्यं त्वाप्तकामप्रभृतिवचनमप्यान्यपर्य्यापन्नम् ॥ ७८ ॥

टी० तु-शब्दः प्रदर्शितमनपेक्षितत्वं द्योतयति । अत्र प्रतिबन्दिमभिप्रेत्य प्रतिब्रूते । तस्यामिति । आगमादनुमानाच्च ईश्वरसिद्धिं नैयायिका निर्द्धारयन्ति वैशेषिकास्त्वागममप्यनुमानीकृत्य तदेकवेद्यमीश्वरं तन्त्रयन्ति । अनुमानञ्च ज्ञानयत्नवच्चिकीर्षामपि समर्थयितुं शक्नोति तत्र यदि जीवनपूर्वकप्रयत्नन्यायेन चिकीर्षानैरपेक्ष्यं संगृह्यते तद्वदेव ज्ञाननैरपेक्ष्यं किन्न स्यात् न हि ज्ञानमपि प्रयत्नमनपेक्ष्य क्वचित् कार्य्यं जनयति प्रयत्नस्तु ज्ञानमनपेक्ष्यापीति दृष्टमेव, अत एव चिकीर्षा प्रयत्नोत्पत्त्यर्थमन्यत्रापेक्ष्यते इह तु नित्यप्रयत्ने किन्तयेत्यपि

बहुवचनस्थानइति व्याचष्टे। 'पूजनेभ्यः काष्ठादिभ्य इति'। 'उत्तरपदमिति'। उत्तरसूत्रे तिङ्ग्रहणादस्य च सूत्रस्य समासविषयत्वात्सुबन्तमिति द्रष्टव्यं, काष्ठादयश्चैते ऽद्भुतपर्यायाः पूजनवचना भवन्ति, तत्र येषां वृत्तिविषयएवाद्भुतपर्यायत्वममातापुत्रादीनां तेष्वन्यपदेन विग्रहः। 'काष्ठाध्यापक इति'। क्रियाविशेषणं, काष्ठशब्दो द्वितीयान्तः समस्यते, कृद्योगलक्षणा तु षष्ठी क्रियाविशेषणेषु न भवति, धात्वर्थं प्रति यत्कर्म तत्रैव षष्ठी, कर्तृपदेन साहचर्यात्, यो हि धात्वर्थं प्रति कर्ता तत्र षष्ठी तत्साहचर्यात् कर्म्मापि तादृशमेव गृह्यते, विशेषणं तु धात्वर्थेन समानाधिकरणत्वाच तं प्रति कर्म सर्वथा क्रियाविशेषणाच षष्ठी भवति, अत एव मलोप इति वक्ष्यते, षष्ठ्यां सत्यां मकाराभावादनुपपन्नमेतत्स्यात्, कथं पुनः कर्तृप्रधाने कृदन्ते गुणभूतायाः क्रियाया विशेषणेन संबन्धः, साधनसंबन्धवदुपपद्यते, तद्यथा ग्रामं गत इत्यादौ गुणभूताया अपि क्रियायाः साधनेन योगः तथा विशेषणेनापि नानुपपन्नः। 'काष्ठाभिरूपक इति'। आभिरूप्यं काष्ठेन विशेष्यतइति नपुंसकप्रथमान्तस्य समासः, एवं सर्वत्र प्रवृत्तिनिमित्तमात्रेण काष्ठादीनामन्वयाद् द्रव्यवाचिभिः सामानाधिकरण्याभावान्मयूरव्यंसकादित्वमाश्रितम्। 'समासे चेत्यादि'। चकारोऽवधारणे, यदि समासएवैतदिष्यते कथं वार्त्तिककारेणोक्तं पूजितस्यानुदात्तत्वे काष्ठादिग्रहणं मलोपश्चेति, नहि समासे तेषामन्त्यो मकारः संभवति विभक्तेर्लुप्तत्वादित्यत आह। 'मलोपश्चेत्यनेनापीति'। कथं पुनरयं विषयोऽनेनाख्यायते ऽत आह। 'यत्रेति'। समासे हि विभक्तेरभावान्मकारो न श्रूयते अयमेव लोप इति। किं पुनः कारणमेवं क्लिशकुशावलम्बनेन वार्त्तिकं व्याख्यायते ऽत आह। 'असमासे हीति'। अन्ये त्वाहुः। यदि समासएवैतदभिमतमभविष्यत्समासइत्येवावक्ष्यत्, मलोपवचनात्तु वाक्यविषयमेवैतदुदाहरणमध्यापक इत्यादिकं तु रूपं यदीष्यते विकल्पेन मलोपो वक्तव्य इति। 'पूजनादित्येव पूजितपरिग्रहे सिद्धइति'। पूजनस्य पूजितापेक्षत्वादिति भावः। 'अनन्तरपूजितप्रतिपत्त्यर्थमिति'। पूजनात्पूजितमिति सूत्रे सामान्यगतमानन्तर्यं विशेषाणां विज्ञायतइति

Digitized by Google

भावः। कथं पुनः पञ्चमीनिर्द्देशे व्यवहितस्य प्रसङ्ग इत्याह। 'एतदेवेति'। ज्ञापनस्य प्रयोजनमाह। 'तथा चेति'। 'अनुदात्तइति वर्त्तमानइत्यादि'। प्रकृतं ह्यनुदात्तग्रहणं न लुडित्यादिना प्रतिषेधेन संबद्धमतस्तदनुवृत्तौ प्रतिषेधोऽप्यनुवर्त्तेत, तत्र यद्यप्यस्य योगस्य समासविषयत्वात्तादृशो विषयो न संभवति यत्रामन्त्रितादौ निघातः प्रतिषिध्येत तथापि कुत्सने च सुपीत्यादौ उत्तरत्र प्रतिषेध एव स्यात्तस्मात्तन्निवृत्त्यर्थं पुनरनुदात्तग्रहणम्॥

"सगतिरपि तिङ्" ॥ 'यत्काष्ठं पचतीति'। येऽपि मलोपश्चेत्यनेन वाक्येन मलोपमाहुस्तेऽपि तिङन्ते परतो नैव लोपमिच्छन्ति। 'सगतिग्रहणाद्गतिरपि निहन्यतइति'। कथं, तुल्ययोगेऽत्र सहशब्दः, यत्र तुल्ययोगे सहशब्दस्तत्र द्वयोरपि कार्ययोगो भवति, तद्यथा सपुत्रो भोज्यतामित्युक्ते पुत्रोऽपि भोज्यते, अपिग्रहणं यत्र गतिर्न प्रयुज्यते तत्र केवलस्यापि तिङन्तस्य यथा स्यात्, गतिप्रयोगे तु द्वयोः सहैव भवति, तिङ्ग्रहणात्पूर्वो योगः सुबन्तविषय एव विज्ञायते॥

"कुत्सने च सुप्यगोत्रादौ" ॥ 'पचति क्लिश्नातीति'। कथमत्र समानवाक्यत्वं सामर्थ्यं चेति चिन्त्यम्। 'कर्त्तुः कुत्सने मा भूत्, पचति पूतीति'। कर्तृत्वमत्र कुत्स्यते। 'अस्येदमयुक्तमिति'। क्रिया तु शोभनैव तत्र कर्तृत्वस्य विशेषणं पूतित्वं न कर्त्रा समानाधिकरणमिति दारुणमभिरूपकमित्यादिवन्नपुंसकत्वम्। एवं द्विबहुष्वप्येकवचनमेव भवति, पचतः पूति पचन्ति पूतीति। प्रायेण पूतिरिति पुल्लिङ्गं पठ्यते। ननु क्रियाप्रधानेऽस्मिन्नाख्याते साधनं कथं विशेषणेन संबन्धमप्रधानं प्रपद्यते, उच्यते। एकार्थीभावमापन्नं वृत्तौ यदुपसर्जनं विशेषणेन संबन्धस्तस्य नैवोपपद्यते न हि भवति ऋद्धस्य राजपुरुष इति, यस्य तु नैकार्थीभावस्तदप्रधानमपि विशेषणेन संयुज्यते, यथा ऋद्धस्य राज्ञः पुरुष इति, एवं साधनं क्रियां प्रति गुणभूतमप्येकार्थीभावाभावाद्विशेषणेन युज्यते तथा साधनप्रधानेषु कृदन्तेषु क्रिया गुणभूताऽपि विशेषणेन युज्यते दारुणमध्यापक इति, यद्येव तर्हि साधनस्य विशेषणेन योग एवं क्रियान्तरेणापि प्राप्नोति पचति पठति पचति नृत्यति पाचकः पठति पाचकः पश्यतीतिवत्, किं कुर्मः न ताव-

देवं दृश्यते तदेतदेवं प्रतिपत्तव्यम् ॥

भार्या स्वन्तरसंबन्धं पत्युर्न सहते यथा ।
स्नानादिकं तु संस्कारं स्वार्थमेवानुमन्यते ॥

तथा क्रियापि ।

विशेषणेन संबन्धं कर्तुः स्वस्यानुमन्यते ।
स्वानुरक्तं तु कर्तारं न क्रियान्तरगामिनम् ॥

इति । 'पूतिश्चेति' । तिङन्तः पूतिशब्द आद्युदात्तः । 'वसेस्तिविति' । तिप् बाहुलकात्पूञो ऽपि भवति, बाहुलकादेव गुणाभावः । तस्य निघातनिमित्तस्यान्तोदात्तत्वं यथा स्यादिति चित्त्वमुपसङ्ख्यायते । 'विभाषितमिति' । बहूर्थं तिङन्तं विभाषा निहन्यते, यदा निहन्यते तदा पूतिरन्तोदात्तः । क्रियाकुत्सन इत्यादि यदुक्तं तत्र प्रमाणत्वेन भाष्यपठितामार्यां पठति । 'सुपि कुत्सनइति' । 'मलोप इष्टोऽतिहीति चोक्तार्थमि[2]ति' । भाष्ये तावदयमर्थः, मलोपश्चेति वार्तिककारेणोक्ते मलोपस्तर्हि नेष्टः, दास्या पचतीति । इत्येवं मलोपश्चेति वाक्यमुक्तार्थमाचार्यैरिति । वृत्तौ तु श्लोकान्तर्गतत्वादयं पादः पठितो न त्वत्रास्योपयोगः कश्चित्, समासे चैतदनुदात्तत्वमिष्यत इत्युक्तत्वात् ॥

"गतिर्गतौ" ॥ 'अभ्युद्धरतीति' । सर्वोपसर्गसाधारणी हरणक्रिया प्रतीयते, तामुद्विशिनष्टि उद्धरतीति उदैवोर्ध्वता विशिष्टा ऽवगम्यते तामभिर्विशिनष्टि अभ्युद्धरतीति, तत्र ।

अन्योन्यापेक्षया नास्ति गतित्वं यद्यपि द्वयोः ।
क्रियां प्रति गतित्वात्तु निहतो ऽभिर्गतिर्गतौ ॥

'समुदानयतीति' । अत्र समुदोर्द्वयोरपि निघातः । 'अभिसंपर्योहरतीति' । अत्र त्रयाणाम् । 'गतावेति किमिति' । क्रियां प्रति गतिर्भवति, क्रिया च धातुवाच्या, धातुश्च द्विविधः, सगतिरगतिश्च, प्रत्यया अपि धातोर्द्वये भवन्ति कृतस्तिङश्च, तत्र कृदन्ते सगतावगतौ च कृत्स्वरेणाथादिस्वरेण कृत्सु शेषनिघातेन गतिर्निहन्यत एव, तिङन्तेपि

१ तस्मादेवेति इ पु० पा० । २ चोक्तार्थं इति मु० मू० पा० ।

Digitized by Google

केवले उदात्तवति तावदुत्तरसूत्रेण भवत्येव निघातः, अनुदात्ते तु नियमाश्रयणाच्च भविष्यति, तिङन्ते यदि भवति उदात्तवत्येव भवति, ततश्च सगतिरेव तिङ्वर्जयिष्यते इति प्रश्नः । 'आ मन्द्रैरिति' । ननु च क्रियायोगे गतिर्भवति न चात्राङः क्रियायोगोऽस्ति, मन्द्रशब्दस्याक्रियावाचित्वादत आह । 'याहीत्येतत्प्रतीति' । ते प्राग्धातोरिति प्रयोगनियमो न संज्ञानियमः, ततश्च व्यवहितप्रयोगेऽपि गतित्वमस्त्येवेति भावः । ननु यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति, ततश्च याहीत्येतत्प्रति गतित्वेन मन्द्रं प्रत्यगतित्वादप्रसङ्गः, इहापि तर्हि न प्राप्नोति अभ्युद्धरतीति, उद्धं प्रत्यगतित्वान्मा भूदुद्धं प्रति गतिः समुदायं तु प्रति गतिर्भवति उदा विशिष्टा हि क्रिया अभिना विशेष्यते, आ मन्द्रैरित्यत्रापि मन्द्रादिकरणकमिन्द्रकर्तृकं यानमाङा विशेष्यत इति समुदायं क्रियाविशेषवाचिनं प्रत्याङो गतित्वान्निघातः प्राप्नोति, न प्राप्नोति, पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन, आयाने हि मन्द्रादेः साधनत्वं मन्द्रैर्हरिभिरायाहीति न तु याने, ततश्च न समुदायं प्रत्याङो गतित्वमिति नास्त्येवात्र प्रसङ्गस्तत्राह । 'तस्येति' । नहि परनिमित्तानुपादाने यत्क्रियायुक्ताः प्रादयस्तं प्रतीति गम्यते, तत्रश्च वस्तुतो गतित्वाश्रयो निघातः स्यादिति मन्यते, यदि पुनः पदस्येत्यधिकारात्समर्थपरिभाषोपस्थानाद्वेन गतेः सामर्थ्यं तं प्रति गतेरिति विज्ञायेत तदा शक्यं गतावित्यवक्तुं, यदाह गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं, तिङवधारणाच्छन्दोऽर्थमिति चेचागतित्वादिति ॥

"तिङि चोदात्तवति" ॥ उदाहरणे निपातैर्यद्यदीति निघातप्रतिषेधात्तिङन्तमुदात्तवत्, तिङ्ग्रहणं किमर्थं, तिङन्ते यथा स्यात् मन्द्रशब्दे मा भूत्, आ मन्द्रैरिन्द्र हरिभिर्याहि, मन्द्रशब्दो रक्प्रत्ययान्तोऽन्तोदात्तः, ननु च यत्क्रियायुक्ता इति वचनाद्गतिशब्दः पित्रादिशब्दवत् सम्बन्धिशब्दत्वात् स्वसंबन्धिनमाक्षिपतीति क्रियावाचिन्येवोदात्तवति भविष्यति सुबन्ते चातिप्रसङ्गाभावः पूर्वसूत्रे एवोक्तस्तस्माचार्थस्तिङ्ग्रहणेनेत्याशङ्क्याह । 'तिङ्ग्रहणमिति' । परिमाणमियत्ता, परिमाणार्थ-

Digitized by Google

त्वमेव स्पष्टयति । 'अन्यथा हीति' । अक्रियमाणे तिङ्ग्रहणे धातुरेव क्रियावाचित्वाद्गतिसंज्ञानिमित्तमिति तत्रैवोदात्तवति निघातः स्यात्र तु प्रत्यये, तिङ्ग्रहणात्तु प्रकृतिभागं प्रति गतेः प्रत्ययोदात्तत्वेनाप्युदात्तवति तिङन्तमात्रे भवति । 'धातुमेव प्रति गतिसंज्ञेति' । यस्य क्रिया यत्क्रियेति षष्ठी, समासः, अन्वयव्यतिरेकाभ्यां यस्य वाच्या क्रिया तं प्रतीत्यर्थः, धातोरेव चासौ वाच्येति तमेव प्रति गतित्वम् । 'आमन्ते तर्हि न प्राप्नोतीति' । ननु चाक्रियमाणेपि तिङ्ग्रहणे नैवामन्ते प्राप्नोति, यदा हि तिङन्तेपि प्रत्ययोदात्तत्वेनोदात्तवति न स्यादिति स्थितं तदा का वार्ता आमन्ते, तत्किमुच्यते आमन्ते तर्हीति, एवं तर्ह्ययमत्रार्थः, यदि तिङ्ग्रहणादव्ययात्मकरोतीत्यादौ भवति तर्हि तस्यामन्तेऽभावाच्च प्राप्नोति, तस्माद्या क्रिया यत्क्रियेति कर्मधारय आश्रयणीयः, एवं हि क्रियालक्षणमर्थं प्रति गतित्वं तच्चार्थे कार्यस्यासंभवात्तद्वाचिनि कार्यं विज्ञायमानं क्रियाप्रधाने सर्वत्र सिध्यतीति, अनन्तरोक्तं चोद्यं पक्षविशेषे व्यवस्थापयितुमाह । 'अत्र केचिदिति' । अत्र पक्षे गतिकारकोपपदानामित्यस्यायमर्थः, गत्यादीनामविशेषेण समासो भवति कृद्भिस्तु प्राक् सुबुत्पत्तेरिति । 'अव्ययपूर्वपदप्रकृतिस्वरत्वइति' । गतिकारकोपपदादित्यत्र प्रपञ्चतिदेश्याद्यर्थं कृद्ग्रहणं स्थितं न प्रत्याख्यातमिति पूर्वपदप्रकृतिस्वरस्यैवात्र प्रसङ्ग इति मन्यते । 'अक्रियमाणेऽपि तिङ्ग्रहणादिति' । यथा वा क्रियमाणे तिङ्ग्रहणे उदात्तवत्त्वे सति निघातः सिध्यति तथाऽनन्तरमेवोक्तम् । 'अथ तरबन्तस्येति' । यथायं पक्षः संभवति यश्चात्र पक्षे दोषस्तत्सर्वं गतिकारकोपपदात्कृदित्यत्रैवोक्तम् । 'येषां त्वित्यादि' । कुगत्यादीनां कृदन्तेनैव तत्रापि प्राक् सुबुत्पत्तेरित्यर्थः । 'तदर्थं यत्नः कर्तव्य इति' । तत्रायं यत्नः, तिङ्ग्रहणं न करिष्यते, या क्रिया यत्क्रियेति वाश्रयिष्यतइति ॥

"आमन्त्रितं पूर्वमविद्यमानवत्" ॥ किमिदमविद्यमानवदित्याह । 'तस्मिन्सतीत्यादि' । तत्र तस्मिन्सति यत्कार्यं तत्र भवतीत्यत्रोदाहरणमाह । 'आमन्त्रिततिङ्निघातेति' । असति च यत्कार्यं तद्भवती-

Digitized by Google

त्यत्रोदाहरणमाह । 'पूजायामित्यादि' । 'आमन्त्रितानुदात्तत्वे कर्त्तव्य इति' । असति पूर्वग्रहणे आमन्त्रितमविद्यमानवदित्युच्यमाने स्वस्यानुदात्तत्वेऽपि वाष्ठिके कर्त्तव्येऽविद्यमानवत् स्यात्, क इदानीं तस्यावकाशः, यत्राविद्यमानवद्भावः प्रतिषिध्यते, विकल्प्यते वा, तथा ऽपादादावित्यधिकारात्पादादिरप्यवकाशः उषो नो मघसु हवा व्युच्छनन्, नत्वभावो ह्यत्राविद्यमानवद्भावाभावादेव भवति, इन्द्र त्वा वृषभं वयं, त्वादेशो भवति, एवं तु इन्द्र पिब तुभ्यं सुतो मदाय, इन्द्र पिब वृषधूतस्य वृष्णः, अग्ने याहि शुचिभिः, वायो याहि शिवाद्दिव इत्यादौ तिङ्निघातः प्राप्नोति । कर्त्तव्योऽत्र यत्नः, उक्तं हि पुरस्तात् । आपादपरिसमाप्तेरपादादावित्यधिकार इति, यद्यामन्त्रितं पूर्वमविद्यमानवत् देवदत्त पचसीत्यत्र पचसीत्येतदपेक्षया देवदत्तशब्दस्य पूर्वत्वमस्तीत्यविद्यमानवत्त्वे सति आमन्त्रितानुदात्तत्वं न स्यादित्यत आह । 'पूर्वत्वं चेति' । पूर्वशब्दस्य संबन्धिशब्दत्वाद्यं प्रति पूर्वत्वं तत्कार्यं प्रत्येवाविद्यमानवत्त्वं न स्वकार्यं प्रति तेन नायं दोष इत्यर्थः । कार्यशब्देनेतद्दर्शयति । अविद्यमानवत् कार्यमत्रातिदिश्यते, तत्र पूर्वशब्दस्य सम्बन्धिशब्दत्वेन परस्य कार्ये कर्त्तव्य इत्येतावदाश्रीयते, न तु परं प्रत्यविद्यमानवत् पूर्वं तु प्रति विद्यमानवदित्यर्थ इति स्यात्, इमं मे गङ्गे यमुने सरस्वतीत्यत्र गङ्गेशब्दस्य यमुनेशब्दं प्रत्येवाविद्यमानवत्त्वं न मेशब्दं प्रतीति व्यवधानाद्यमुनेशब्दस्य निघातं प्रति मेशब्दो निमित्तं न स्यात्, यथोपदर्शिते त्वर्थे परस्य कार्ये कर्त्तव्ये इत्येतावत्तत्कार्ये स्वनिमित्तमन्यनिमित्तं वेति विशेषाभावात् मेशब्दापेक्षेऽपि निघाते गङ्गेशब्दस्याविद्यमानवत्त्वं सिध्यति, तदेतत् स्वनिमित्तेऽन्यनिमित्ते चेत्यत्र सूचितं, तदेवमुक्तं दर्शयति । 'इहेत्यादि' । गङ्गेशब्दोऽविद्यमानवत्त्वात्स्वयं निमित्तं न भवतीत्येतावत्, न तु मेशब्दस्य निमित्तभावं प्रतिबध्नातीत्यर्थः, परं प्रत्यविद्यमानवद्भवतीत्याश्रीयमाणे हि तथा स्यात्, ननु वत्करणमन्तरेणापि गोतो णिदित्यादावतिदेशो दृश्यते तत्किमत्र वत्करणेन । नन्व[1]सति वत्करणे

१ स्यादेतदिति इं· पु· पा· ।

पूर्वमामन्त्रितमविद्यमानमित्युच्यमाने [1]पूर्वस्यामन्त्रितस्य निवृत्तिः स्यात् । नैष दोषः । अर्थप्रत्यायनाय शब्दप्रयोगादनिवृत्तेऽर्थे शब्दनिवृत्त्यभावात्, अथापि परप्रयोगो भवतु पूर्वप्रयोगो मा भूदित्यर्थः कल्प्येत तथापि राजवन्तादिषु परमामन्त्रितं वेति वक्तव्यं स्यात् परमेवामन्त्रितं भवति न पूर्वमित्यर्थः, तदेवमन्तरेणापि वतिमतिदेशः सिद्धः, इदं तर्हि प्रयोजनं स्वाश्रयमपि यथा स्यात् आं भो देवदत्त ग्राम एकान्तरमामन्त्रितमनन्तिक इत्येकान्तरता यथा स्यात्, एकवचनान्तं ह्युत्तरसूत्रस्य विषयः बहुवचनान्ते तु विभाषितं विशेषवचने बहुवचनमिति पक्षे निघातप्रसङ्गः, यद्यप्यातिदेशिककार्याविरुद्धं स्वाश्रयमतिदेशेऽप्यसत्यपि तत्कारणे भवति इह तु तत्कारणाद्य[2]र्थाद्विरुद्धमपि क्वचित्प्राप्यते अविद्यमानवत्त्वविरोधिनी ह्येकान्तरता व्याख्यानाच्चातिप्रसङ्गो नोद्भावनीयः ॥

"नामन्त्रिते समानाधिकरणे सामान्यवचनम्" ॥ द्वौ नञौ प्रकृतमर्थं सूचयत इत्याह । 'किं तर्हि विद्यमानवदेवेति' । 'माणवकजटिलकाध्यापकेति' । अत्र जटिलशब्दो माणवकशब्दापेक्षया विशेषवचनोऽध्यापकशब्दापेक्षया तु सामान्यवचन इति द्वयोरप्यविद्यमानवत्त्वं न भवति, पूर्वस्येत्यादिना प्रतिषेधस्य फलं दर्शयति । 'देवदत्तयज्ञदत्तेति' । सामान्यवचनं विशेषवचनापेक्षमिति वक्ष्यत्युत्तरसूत्रे, ततश्च यथा यज्ञदत्तशब्दः समानाधिकरणो न भवति एवं पूर्वामन्त्रितार्थगतविशेषाकारवचनोऽपि न भवतीति देवदत्तशब्दोऽपि सामान्यवचनो न भवति, तस्माद्युक्तिविकल्पस्याचिन्त्यमेतत् । 'एवं ह्युक्तमिति' । तैत्तिरीयके ब्राह्मणे सहस्रतमीं प्रकृत्य इडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुते एतानि ते अघ्न्ये नामानीति, वृत्तौ त्वन्यथा पाठः शाखान्तरे द्रष्टव्यः ॥

"विभाषितं विशेषवचने" ॥ बहुवचनमिति वार्त्तिके दर्शनात् प्रक्षिप्तं, शरणत्वेन प्राप्तिः शरणं, तत्र साधवः, शरण्याः, शरणशब्दो हि

---

१ कुतश्चित्पूर्वमामन्त्रितं न प्रयोक्तव्यमित्यर्थः स्यादिति, तन्न । यद्ययमर्थोऽभिप्रेतस्स्याद्राजवन्तादिषु परमामन्त्रितं वेत्येव ब्रूयात्, न चापादादावित्यनुवर्तते, यद्येवं तथाप्याम एकान्तरमामन्त्रितमनन्तिक इति इं· पु· पा· ।

२ सामर्थ्यादिति इं· पु· पा· ।

Digitized by Google

शरण्येपि दृश्यते, शरणं भवन्तमतिकारुणिकमिति। शर्मण्या इति पाठे शर्मणि साधवः शर्मण्याः। 'सामान्यवचनाधिकारादेवेति'। सामान्यस्य विशेषापेक्षत्वात्कं प्रति सामान्यमित्येतद्भवति, तस्मिन्विशेषवचनएव भविष्यति॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यामष्टमस्याध्यायस्य प्रथमः पादः॥

"पूर्वत्रासिद्धम्"॥ 'पूर्वत्रासिद्धमित्ययमधिकार इति'। यदि तु स्वतन्त्रो विधिः स्यात् ततो वक्ष्यमाणस्य त्रिपादीलक्षणसमुदायस्य पूर्वत्र सपादसप्ताध्यायीलक्षणे समुदाये ऽसिद्धत्वमुक्तं स्यान्न तु त्रिपाद्यां पूर्वत्र परस्यासिद्धत्वमापादितं स्यात्ततश्च गुडलिण्मान् गोधुङ्मानित्यादौ ढत्वघत्वादेरसिद्धत्वाभावाज्झय इति मतुपो वत्वप्रसङ्गः, तस्मान्न विधिः, अथ परिभाषा स्यात्, सर्वत्रैवाष्टाध्याय्यां पूर्वं प्रति परस्यासिद्धत्वात् तेन तैः तस्येत्यादावपिनादिषु कर्तव्येषु त्यदाद्यत्वस्यासिद्धत्वादकारान्तनिमित्ता इनादयो न स्युस्तस्मादधिकारः, एवं सति यदनेन संपादितं भवति तद्दर्शयति। 'तत्रेति'। तत्राधिकारे सतीत्यर्थः। अधिकारे हि त्रिपादीगतानामप्यविशेषेण सपादसप्ताध्यायीगतान्प्रत्यसिद्धत्वं त्रिपाद्यां च पूर्वत्र परस्यासिद्धत्वं सिद्ध्यति, विधौ तु नैतावत्संपादयितुं शक्यं त्रिपाद्यां पूर्वत्र परस्यासिद्धत्वानापादनात्, परिभाषायां च नैतावति पर्यवस्यति सर्वत्रैव प्रसङ्गात्तस्मादधिकारत्वादेतावत्संपद्यते, एतावदेव च संपद्यतइत्यर्थः, न चैवमत्र भ्रमितव्यं येयं सपादसप्ताध्यायी अनुक्रान्तेत्यनेन विधिरूपेण प्रवृत्तिर्दर्शिता, इत उत्तरमित्यादिना त्वधिकाररूपेण, ततश्च शेष इतिवल्लक्षणं चाधिकारश्चेति। निष्प्रयोजनत्वादधिकारोऽयमित्युक्तत्वाच्च, किं हि नामाधिकारएवास्मिन्न सिध्यति यदर्थो विधिराश्रीयेत, सप्तानामध्यायानां सामाहारः सप्ताध्यायी, सपादा चासौ सप्ताध्यायी चेति कर्मधारयः, सपादेति टाबन्तपाठे त्वसमासः, उत्तरउत्तरो योग इति पाठः, वीप्सायां द्विर्वचने सुब्लुकोऽसंभवात्। अत्राध्यायग्रहणेन योगग्रहणेन च शास्त्रासिद्धत्वमाश्रीयतइति दर्शयति, एतच्च पूर्वत्रेति वचनाल्लभ्यते, शास्त्रस्य हि

Digitized by Google

मुख्यं पूर्वत्वं संनिवेशविशेषयोगित्वात्, कार्यस्य तु शास्त्रद्वारकमौपचारिकं, नहि मुख्ये संभवति गौणस्य ग्रहणं युक्तं, कथं पुनरुच्चरितं शास्त्रमसिद्धमित्युच्यते न हि वचनशतेनापि सिद्धमपि असिद्धं भवति अत आह । 'सिद्धकार्यं न करोतीत्यर्थ इति' । वचनादतिदेश आश्रीयतइत्यर्थः, शास्त्रस्यासिद्धत्वमाश्रीयते न कार्यस्येति दर्शितं, तत्र प्रयोजनमाह । 'तदेतदिति' । यदिदं शास्त्रविषयमसिद्धवचनं तदेतदित्यर्थः, आदेशो लक्षणं निमित्तं यस्य कार्यस्य तस्य प्रतिषेधार्थ,मुत्सृज्यते आदेशेन निवर्ततइति उत्सर्गः, स्थानी, स लक्षणं निमित्तं यस्य तस्य भावः प्रवृत्तिर्यथा स्यादित्येवमर्थं चासिद्धवचनं, कार्यासिद्धत्वे तूत्सर्गलक्षणस्य भावो न सिध्यति, तत्रादेशलक्षणप्रतिषेधस्योदाहरणमाह । 'अस्मा उद्धरेत्यादि' । आयावोः कृतयोर्लोपः शाकल्यस्येति लोपः । 'यलोपस्यासिद्धत्वादिति' । शास्त्रद्वारकं यलोपस्यासिद्धत्वं, यदा हि पूर्वशास्त्रसंनिधौ परशास्त्रमसिद्धं तदा तत्प्रतिपादितं कार्यं सुतरामसिद्धं भवति, उत्सर्गलक्षणभावस्योदाहरणमाह । 'अमुष्मा इति' । अत्रासत्यसिद्धत्वे परत्वाददसो ऽसेर्दादु दो म इत्युत्वे सत्यत इति स्मायादयो न स्युः, असिद्धत्वे तु पूर्वं स्मायादयः पश्चादुत्वमिति सिद्धमिष्टम् । 'उत्वस्येति' । उत्वशास्त्रस्येत्यर्थः । शुष्किकेत्यादिश्लोकः, अत्र निदर्शनमिति प्रत्येकमभिसंबध्यते, निदर्शनमुदाहरणदिगित्यर्थः, मतोर्वत्वे कर्तव्ये झलां जशो ऽन्तइति जश्त्वे ऽसिद्धे सति गुडलिण्मानिति दर्शनम् । 'न कोपधाया इति पुंवद्भावप्रतिषेधो न भवतीति' । कोपधप्रतिषेधे तद्धितवुग्रहणमित्येतद्वनाश्रित्येदं प्रयोजनमुक्तम् । 'क्षामिमानिति' । क्षायो म इति निष्ठातकारस्य मत्वं, ततो ऽत इनिठनाविति इजन्तादत इनिठनाविती्न तदन्ताद्वा मतुप् । 'वहेरित्यादि' । वह प्रापणे, निष्ठा, संप्रसारणं, हो ढः, झषस्तथोर्धोऽधः, ष्टुत्वं, ढो ढे लोपः, ढ्रलोपे पूर्वस्य दीर्घोऽणः, ऊठ इति स्थिते णिचि टिलोपः, लुङ्, चङ्, ऊढ्वह् । 'हल-इत्येतद् द्विरुच्यते इति' । अजादेर्द्वितीयस्येतिवचनात्, ततो हलादिः शेषः, कुहोश्चुरिति चुत्वं हकारस्य झकारः, तस्याभ्यासे चर्चेति जश्त्वं जकारः, अथात्र सन्वल्लघुनीतीत्वं कस्मान्न भवति तत्राह । 'अवल्लोपइति वच-

Digitized by Google

नादिति'। कथं पुनरौजिढदिति भवतीत्यत आह। 'औजिढदित्येतस्त्विति'। पूर्वत्रासिद्धीयमद्विर्वचन इत्येतत्त्विह न प्रवर्तते अनित्यत्वात्, अनित्यत्वं चोभौ साभ्यासस्येति वचनाद्विज्ञायते, अन्यथाऽनितेरिति णत्वे कृते तस्य सिद्धत्वात्सह णकारेण द्विर्वचने सति सिद्धं स्यात्किमिति ब्रवीतीति। 'गुडलिण्मानिति'। गुडं लेढीति क्विप्, तदन्तान्मतुप्, ढत्वजश्त्वयोः कृतयोर्यरोऽनुनासिकत्वे तद्धिते भाषायां नित्यवचनमिति णकारः। 'षष्ठीनिर्दिष्टा इति'। संयोगान्तस्य लोप इत्यादयः, पञ्चमीनिर्दिष्टाः ह्रस्वादङ्गादित्यादयः। सप्तमीनिर्दिष्टाः झलो झलीत्यादयस्तेषाम्। 'असिद्धत्वं न भवतीति'। यदि स्यात् संयोगान्तस्य लोप इत्यत्र षष्ठी स्थानेयोगेत्येतस्याभावात्तच्छेषस्यालोऽन्त्यस्येत्यस्याप्रवृत्तेः सर्वस्य पदस्य लोपप्रसङ्गः, ह्रस्वादङ्गादित्यत्राप्यनियमेन दिक्छब्दाध्याहारात्पूर्वस्य परस्य च लोपप्रसङ्गः झलो झलीत्यत्राप्यौपश्लेषिकेऽधिकरणे सप्तमी विज्ञायेतेति पूर्वपरयोरविशेषेण प्रसङ्गः, सत्सप्तमीविज्ञाने तु व्यवहितस्यापि प्रसङ्गः, कथं पुनः पूर्वासु परिभाषासु कर्तव्यासु तेषामसिद्धत्वं न भवत्यत आह। 'कार्यकालं हीति'। 'संज्ञापरिभाषमिति'। समाहारद्वन्द्वः। अयमभिप्रायः॥

संज्ञाः परार्था अत्यन्तं परिभाषाश्च तद्विधाः।
न स्वातन्त्र्येण तास्तस्मात्कार्यावगतिहेतवः॥
अनेकस्य प्रधानस्य शेषभूता भवन्त्विति।
एताः केवलमाचार्यैः पृथग्देशा उपादिशत्॥
विधिवाक्यैस्तु संहृत्य यत्र तत्र स्थितैरपि।
प्रोऽधयन्त्यःस्वकार्याणि नेकपूर्वाः परा इमाः॥

इति। यदि कार्यकालं संज्ञापरिभाषं विप्रतिषेधे परमित्येषापि परिभाषाचोपतिष्ठेत, ततश्च विस्फोर्यमवगोर्यमित्यत्र गुणं बाधित्वा परत्वात् हलि चेति दीर्घत्वं स्यादित्यत आह। 'विप्रतिषेधे परमित्येषा त्विति'। एषा तु न प्रवर्तेतइति संबन्धः, अत्र हेतुर्येनेति, विप्रतिषेधो हि तस्या निमित्तं, अतश्च विप्रतिषेधः, द्वयोस्तुल्यबलयोरेकस्मिन्विषये त्वं चाहं चेति

प्रवृत्तिप्रसङ्गः, न चायमत्र संभवति, तस्मान्निमित्ताभावाच्च प्रवर्तत इत्यर्थः, यद्येवमपवादोऽपि परः पूर्वमुत्सर्गं न बाधेतात आह । 'अपवादस्येति' । यद्यपवादस्यासिद्धत्वादुत्सर्ग एव स्यादपवादविधानं व्यर्थं स्यात् ॥

"नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति" ॥ अत्र सूत्रे उत्तरसूत्रे च कार्योपादानात्कार्ये कार्यस्यासिद्धत्वमुच्यते, कृतीत्येतत्तु संभवव्यभिचाराभ्यां तुग्विधिनैव संबध्यते, विधिशब्दो भावसाधनः कर्मसाधनश्च, तत्र भावसाधनानां त्रयाणां कर्मसाधनस्य चैकस्यैकशेषः, भिन्नार्थानामपि सरूपाणामेकशेषवचनात्, विधिश्च विधिश्च विधयः, ततो बहुवचनान्तेन विधिशब्देन सुबादीनां द्वन्द्वस्य षष्ठीसमासः, सर्वत्र च शेषलक्षणा षष्ठी, तत्र सुब्विधौ शेष एव शेषः, इतरेषु तु कर्म शेषत्वेन विवक्षितं तदिदमुक्तम् । 'विधिशब्दोऽयमित्यादि' । 'संबन्धसामान्यषष्ठ्यन्तेनेति' । संबन्धसामान्यमुच्यते षष्ठ्या तदन्तेनेत्यर्थः, सामान्यशब्देन स्थानेयोगव्यवच्छेदः, कथं पुनः षष्ठी स्थानेयोगेतिपरिभाषायां सत्यां सामान्यवचनता लभ्यते । उच्यते । नात्र सुपः स्थाने किंचिद्विधीयते किं तर्ह्यनुवादोऽयं, सुपो यो विधिस्तत्रेति, अनुवादे च परिभाषा न प्रवर्तते, उदीचामातः स्थाने इति स्थानेग्रहणाल्लिङ्गात्, संबन्धसामान्यवचनषष्ठ्यन्तेनेति यदुक्तं तत्र प्रयोजनमाह । 'सुपां स्थान इत्यादि' । 'सर्वोऽसौ सुब्विधिरिति' । सर्वस्य सुप्संबन्धित्वात्सुबर्थमेव चेदं विधिग्रहणं कृतं स्वरादिषु तु नार्थः तेन यथा न मुने इत्यत्र नाभावे कर्तव्ये इत्यर्थो भवति तथा स्वरादिषु कर्तव्येष्वित्यर्थो भविष्यति, द्वन्द्वात्परस्य तु प्रत्येकं संबन्धो दुर्निवार इति भावसाधनत्वमङ्गीकृतं, सुब्विधिस्वरसंज्ञातुग्विध्युच्यमाने तु न किंचिदप्यसाध्यम् । 'राजवतीति' । मतुबन्तादुगितश्चेति ङीप्, राजशब्दः कनिन्प्रत्ययान्तत्वादाद्युदात्तः । 'पञ्चार्ममिति' । दिक्संख्ये संज्ञायामिति समासः, तत्र नलोपे कृते पूर्वपदमवर्णान्तं चातन्निति स्वरः प्राप्तोऽसिद्धत्वान्न भवति, समासोदात्तत्वमेव भवति । 'पञ्चतक्षीति' । समाहारद्विगुः । 'नलोपस्यासिद्धत्वात् ष्णान्ता षडिति षट्संज्ञा भवतीति' । एतच्च यत्तत्रोक्तमन्तग्रहणमौपदेशिकप्र-

Digitized by Google

तिपस्त्यर्थमिति तदनाश्रित्योक्तं द्रष्टव्यम् । 'न षट्स्वस्रादिभ्य इति टाप्प्रतिषेधो भवतीति' । अत्र हि नान्तत्वात् पूर्वं ङीप् प्राप्नोति निषिध्यते, ततो जस्शसोर्लुकि नलोपे चाकारान्तत्वाट्टाप्प्राप्तः सोऽपि निषिध्यते, स्त्रियां यदुक्तं तन्न भवतीति सामान्येन निषेधविधानात् । 'तदेतत्प्रयोजनं कथं भवतीति' । पाक्षिकत्वं प्रयोजनस्य दर्शयितुं प्रश्नः । केषां चिद्दर्शनमनारभ्य कार्यविशेषमादौ तावत्संज्ञा क्रियते ततो यस्यां दशायां यत्कार्यं प्राप्तं तत्क्रियते लोकवत्, तद्यथा लोके दशम्यामुत्थितायां पुत्रस्य नाम दधातीति सकृत्कृतया संज्ञया सर्वाणि कार्याणि क्रियन्ते न तु प्रतिकार्यं नाम कुर्वन्ति तद्वदिति, अयं च यथोद्देशं संज्ञापरिभाषमिति पक्षः, कार्यकालपक्षे तु तेनतेन विधिवाक्येनैकवाक्यतापन्नेन संज्ञासूत्रेण संज्ञा प्रणीयत इति प्रतिकार्यं संज्ञाप्रवृत्तिः, तत्राद्ये दर्शनं जस्शसोर्लुगर्था या संज्ञा तयैव टाप्प्रतिषेधस्यापि सिद्धत्वान्नेदं प्रयोजनं द्वितीये तु पक्षे भवति प्रयोजनमित्याह । 'यदि प्रतिकार्यमिति' । कथं तदा प्रयोजनमित्याह । 'या हीति' । 'जस्शसोर्लुगर्थेति' । उपलक्षणमेतत् ङीप्प्रतिषेधार्थेत्यपि द्रष्टव्यम् । 'स्त्रीप्रत्ययस्येति' । टाप इत्यर्थः, अथ प्रथमे पक्षे न कर्तव्यं संज्ञाग्रहणम्, इह हि दण्डिगुप्तौ गुप्तदण्डिनाविति नलोपे कृते दण्डिशब्दस्य घिसंज्ञा प्राप्नोति ततश्च तस्यैव पूर्वनिपातः स्यात्, नलोपस्यासिद्धत्वाद्धि संज्ञाया अभावादनियमः पूर्वनिपातस्य भवति । 'अत्र केचिदित्यादि' । सुपः संनिपातेन नलोपः स यदि तुकं प्रवर्तयेत तत्संनिपातं विहन्यात्, कथं पुनः संनिपातस्य विघातः यावता पूर्वान्तस्तुक् स तुग्ग्रहणेन गृह्यते, सत्यं, ह्रस्वमात्रभक्तस्तुगित्याश्रित्येदमुक्तम् । 'बहिरङ्गलक्षणत्वेन वेति' । बहिर्भूतविभक्त्यपेक्षो नलोपोऽन्तर्भूतक्रियापेक्षे तुक्यसिद्धो भवतीत्यर्थः । 'परिभाषाद्वयस्याप्यनित्यत्वं ज्ञापयितुमिति' । तत्र संनिपातपरिभाषाया अनित्यत्वाद्धृहायेत्यादौ सुपि चेति दीर्घत्वं भवति, बहिरङ्गपरिभाषायास्त्वनित्यत्वादेषा ह्रु इत्यत्र विभक्त्याश्रयं त्यदाद्यत्वं बहिरङ्गमपि प्रातिपदिकाश्रये टापि न सिद्धं भवति । 'वृत्रहच्छत्रमिति' । नात्र संनिपातलक्षणो नलोपः

नापि नलोपस्य बहिरङ्गत्वं तुकोऽपि छकारापेक्षत्वात् । ‘राजीयतीति’ । क्यचि चेतीत्वम् । ‘राजायतइति’ । अकृत्सार्वधातुकयोरिति दीर्घः । ‘राजाश्व इति’ । अकः सवर्णे दीर्घः ॥

“न मु ने” ॥ मु इत्यविभक्तिको निर्देशः, । ‘घिलक्षणो नाभावो-न स्यादिति’ । यद्येतन्नारभ्येतेति शेषः । अनेन सूत्रारम्भस्य प्रयोजनमु-क्तम् । ‘कृते तु नाभावइत्यादि’ । यद्यत्र दीर्घत्वं स्यात् भाव्यमानोऽप्यु-कारः सवर्णान् गृह्णातीति यथा ऽमूभ्यामित्यादौ दीर्घस्य स्थानिनो दीर्घोकारो भवति तथात्राप्याकारस्य दीर्घोकारः स्यात्, ततश्च ह्रस्वसं-निपातकृतो नाभावस्तं विहन्यादिति भावः । अत्र चोदयन्ति , मुभावस्य सिद्धत्वात्किल दीर्घप्रसङ्गश्चोद्यते तत् किं मुभावमपश्यद् दीर्घशास्त्रं घिल-क्षणं नाभावमपि न पश्यति, वृक्षादिशब्दस्थानीयं ह्येतद्दीर्घशास्त्रं प्रति ततश्च यञादेरभावात्कथमत्र दीर्घप्रसङ्ग इति । अत्राहुः । प्रयोगे तावन्नाभावः श्रूयते शास्त्रमपि तस्य सिद्धकाण्डे पठितं केवलं तन्निदा-नभूतं मुभावमेव दीर्घशास्त्रं न पश्यति तस्मात्प्राचीनाभावं तावत्प-श्यति ततश्च दीर्घत्वं प्रवर्त्तयेदिति । ‘अथ वेति’ । यथा कश्चित्कुशल-मतिः किं जातीयो धावति किं वर्णो धावतीत्येकेनानेकेन वा पृष्टस्तन्त्रेण प्रतिवक्ति श्वेतो धावतीति, तथात्रापि योगद्वयमेतत् तत्रैकं ने कर्त्तव्ये मुत्वस्यासिद्धत्वं निषेधति, अपरं ने परतो यत्प्राप्तं तत्र, तदिदमुक्तम् । ‘उभ-यार्थमिति’ । ‘तन्त्रेणेति’ । साधारणं भवेत्तन्त्रं यथा तुल्यकक्षयोर्भुञ्जानयोः प्रदीपः, इह तु साधारणप्रयत्नस्तन्त्रम् । इदानीमेकस्मिन्नेव योगे यथोभयं साध्यते तथा दर्शयति । ‘अथ वेति’ । ‘अर्थात्संगृहीतमिति’ । वृद्ध-कुमारीवाक्यवत्, तद्यथा वृद्धकुमारीन्द्रेणोक्ता वरं वृणीष्वेति सा वरम-वृणोत् पुत्रा मे बहुक्षीरघृतमन्नं कांस्यपात्र्यां भुञ्जीरन्निति, पतिरेव तावदस्या न भवति कुतः पुत्राः कुतो,गावः कुतो धान्यम् । अनेनैव खल्वेकवाक्येन पतिः पुत्राः गावो धान्यमिति सर्वं वृतं भवति तद्वदत्रापि ने परतो यत्कार्यं तत्र कर्त्तव्ये मुभावस्यासिद्धत्वस्य प्रतिषेधं ब्रुवता नाभावेऽपि कर्त्तव्ये ऽर्थान्मु-त्वस्यासिद्धत्वं प्रतिषिद्धं भवति । ‘एकादेशस्वरो ऽन्तरङ्ग इति’ । एकादेश-

Digitized by Google

स्वरे चत्वारि दर्शनानि, उदात्तानुदात्तयोरेकादेश आन्तर्यतः स्वरितो ऽभिनिर्वृत्तस्य स्थाने एकादेश उदात्तेनोदात्त इत्यनेनोदात्त गुणादेशः क्रियत इत्येकं दर्शनं, तथैवाभिनिर्वृत्तएकादेशस्वरे स्वरितगुणमात्रस्यो-दात्तमात्रं विधीयत इति द्वितीयं दर्शनं, तृतीयं तु दर्शनमेकादेश उदा-त्तेनोदात्त इति परिभाषा एकादेशविधिमुपतिष्ठते, तत्रायमर्थो भवति, आद्गुणो भवति उदात्तानुदात्तयोः स चाद्गुण उदात्त इति, एवं सत्येकादेशो विधीयमान एवोदात्तो भवति, चतुर्थदर्शनमुदात्तानुदात्तयोरेकादेशः स्वरितगुणः प्राप्त उदात्तो भवतीति । तत्र येन नाप्राप्तिन्यायेन स्वरि-तस्यापवाद उदात्तविधिः संपद्यते, तत्र परिभाषापक्षे सिद्धमुदात्तत्व-मयादिषु । इतरेषु तु पक्षेषु असिद्धत्वे प्राप्ते सिद्धत्वमुच्यते, आन्त-र्यतो ऽयादेश उदात्तो यथा स्यादिति, अन्यथा स्वरितः स्यात् । 'कुमार्या इदमिति' । कुमारशब्दः प्रातिपदिकस्वरेणान्तोदात्तः, तस्मा-द्वयसि प्रथम इति ङीप्, यस्येति चेति लोपः, अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं चतुर्थ्येकवचनं, कुमारी ए इति स्थिते आण्नद्या इत्याट् यणादेशः, उदात्तयणो हल्पूर्वादित्याट उदात्तत्वम् । आटश्चेति वृद्धि-रेकादेशः, स आन्तर्यतः स्वरितः प्रसक्त एकादेश उदात्त इत्यनेनोदात्तः क्रियते, तत्सिद्धत्वं वक्तव्यम्, । अयादेश उदात्तो यथा स्यात् । 'यदी-त्यादि' । पूर्वमुदात्तत्वं क्रियते पश्चादेकादेशः यथानन्तरं दर्शितं तदा भवतीदं प्रयोजनमित्यर्थः । 'अथ त्वित्यादि' । कुमार्या ए इति स्थिते आटश्चेति वृद्धिश्च प्राप्नोति उदात्तयणो हल्पूर्वादिति आटः स्वरश्च, द्वावप्यनित्यौ, स्वरः शब्दान्तरप्राप्तेरनित्यः, स हि प्रागाकारस्य प्राप्नोति कृतायां वृद्धावैकारस्य, वृद्धिरपि प्रागनुदात्तयोः परत्वात्स्वरे आटस्तु स्वरे कृते उदात्तानुदात्तयोः स्वरभिन्नस्य प्राप्नुवन्विधिरनित्यो भवति उभयो-रनित्ययोः परत्वात्स्वरे प्राप्ते वर्णाश्रयत्वेनान्तरङ्गत्वाद्वृद्धिः, स्वरस्तु विभ-क्तिव्यपानः पदाश्रयो बहिरङ्गः । 'गाङ्गेऽनूप इति' । गङ्गाया इदमित्यण्, प्रत्ययस्वरेणान्तोदात्तः, ततो ङिः सुप्त्वादनुदात्तः, तयोरेकादेश उदा-त्तः । आपोनुगतमनूपमिति प्रादिसमासः, अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते

Digitized by Google

अनोरप्रधानकनीयमीत्युत्तरपदान्तोदात्तत्वं शेषनिघातः । 'तस्य सिद्धत्वादित्यादि'। एकादेशस्वरस्य सिद्धत्वे एङःपदान्तादतीत्ययमेकादेश उदात्तेन सह भवति, ततश्च स्वरितो वानुदात्तेपदादाविति पक्षे स्वरितः. पक्षे उदात्तो भवति, यदि त्वसिद्धत्वं स्यात् तदासावेकार उदात्तानुदात्तस्थानिकत्वादान्तर्यतः स्वरितः स्यात्, तथा च सति तस्य एङःपदान्तादतीत्ययमेकादेश उदात्तेन न भवति किं तर्हि स्वरितेनेति पक्षे स्वरितो न स्यात्, अपि तु स्वरितानुदात्तयोः स्थाने भवनान्तर्यतो नित्यमेव स्वरितः स्यात्, स उदात्तेनेत्यत इति पाठः, स एकादेश उदात्तेन सहेत्यतो हेतोरित्यर्थः । 'शतृस्वर इति'। तुदिवदि नदिभ्यो लट्, तस्य शत्राश्रयो नद्यजाद्योः स्वरः शतृस्वरः, शतुरनुमो नद्यजादि इत्यत्रान्तोदात्तादुत्तरपदादित्यन्तोदात्तादुत्तरपदादित्यनुवर्तते। 'तुदती वदती नदतीति'। 'तुदिनुदिभ्यां लट्, शत्रादेशः, तुदादिभ्यः शः, प्रत्ययस्वरेणोदात्तः । 'अनुम इति प्रतिषेधो ज्ञापक इति'। तेन नैतदर्थं सिद्धत्वं वक्तव्यमिति भावः। कथमेतत् ज्ञापकमित्याह। 'नदीति'। अनुम इति प्रतिषेधस्यैतत्प्रयोजनं नुदन्तीत्यत्राच्छीनद्योर्नुमिति यदा नुम् भवति तदा माभूदिति, असिद्धे चैकादेशस्वरेऽन्तोदात्तत्वाभावादेव शतृ न भविष्यति किमनुम इति प्रतिषेधेन, प्रतिषेधात्तु सिद्धत्वमनुमीयते, ननु यत्र लसार्वधातुकानुदात्तत्वस्य निमित्तं नास्ति तदर्थः प्रतिषेधः स्यात्, यान्तो वान्तीत्यत्र हि धातुप्रत्यययोरुदात्तयोरान्तर्यत एकादेश उदात्तः, स च शतृस्वरे सिद्धः, अत्रापि प्रत्ययस्वरे सति तदनन्तरमेव धातोः शेषनिघातो भवति, ततश्चात्रापि नान्तरेणैकादेशस्वरमन्तोदात्तत्वं भवति । 'एकानुदात्तत्वमिति'। एकं वर्जयित्वा परिशिष्टस्य यदनुदात्तत्वं तदेकानुदात्तत्वम्, भाष्ये त्वेकाननुदात्तमिति पाठः, तत्राप्यनुदात्तं पदमेकवर्जमित्ययमेव स्वरो विवक्षितः, तत्र ह्येकमेवानुदात्तमन्यत्सर्वमनुदात्तमित्युच्यते, तथा च तत्रोक्तं सिद्धं त्वेकाननुदात्तत्वादिति । 'तुदन्तीति'। शविकरण उदात्तः, लसार्वधातुकमनुदात्तं तयोरेकादेशः । 'अनेनेति'। एकादेशस्वरेण सिद्धेन । 'वर्ष्यमाणतेति'। अनुदात्तं

Digitized by Google

पदमेकवर्जमित्यस्यार्थो लक्ष्यते, यदि त्वसिद्धत्वं स्यात्ततोऽसत्यां वर्ज्यमानतायां द्वयोरुदात्तयोः श्रवणं स्यात्, ननु चोदात्तस्यासिद्धत्वेऽपि योऽसावुदात्तानुदात्तयोरेकादेश आन्तर्यतः स्वरितोऽभिनिर्वृत्तस्तदाश्रया वर्ज्यमानता भविष्यति सत्यं, सिद्ध्यति यदा स्वरितस्योदात्तो भवतीति पक्षः, यदा तु स्वरितापवाद उदात्तो विधीयते तदा तस्यासिद्धत्वात् स्थानिनश्च स्वरान्तराभावात्केन वर्ज्यमानता स्यात् तस्मात्सिद्धत्वमुच्यते, न च कार्यकालपक्षाश्रयेण परिभाषान्तरवद्वर्ज्यमानपरिभाषाया अपि त्रिपाद्यां प्रवृत्तिः शक्याऽभ्युपगन्तुमतिप्रसङ्गात्, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य उदात्तादनुदात्तस्य स्वरित इत्यत्रापि शेषनिघातप्रसङ्गात्, यथा तु यान्तीत्यत्र प्रागेवैकादेशाच्छेषनिघातो भवति तथात्रापीत्यप्रयोजनमित्याहुः । 'ब्राह्मणास्तुदन्तीति' । अत्रापि स्वरितत्वापवाद उदात्तत्वमिति दर्शने सिद्धत्वमुच्यते, अन्यथोदात्तस्यानुदात्तत्वाभावादुदात्तः प्रयोगे श्रूयेत 'बहिरङ्गस्यासिद्धत्वमेव भवतीति' । असिद्धं बहिरङ्गमन्तरङ्ग इत्यनेन । 'पचतीति' । इतिशब्दो निपातत्वादाद्युदात्तः । अत्र बाह्यपदापेक्षत्वादादेकादेशस्य बहिरङ्गत्वात्तत्स्वरोऽपि बहिरङ्गस्तस्यासिद्धत्वात्तेन वर्ज्यमानता न भवति । 'प्रपचतीति' । यत्रापि तिङि चोदात्तवतीति गतिनिघातो न भवति, उभयत्रापि पूर्ववत् प्रत्यन्तवद्भावात्प्रसङ्गः । 'हरिश्च इति' । यदा छन्दसीवनिपाविति वनिप्प्रत्ययः क्रियते वन उपसंख्यानमिति तस्य च ह्रस्वं तदा नार्थः सिद्धवचनेन । 'अलावीदिति' । लुङ्, च्लेः सिच्, इट्, अस्तिसिचोऽपृक्त इतीट्, सिचि वृद्धिः, ननु च इट ईटीत्यत्र इट इति षष्ठी विज्ञास्यते न पञ्चमी, सस्येत्यनुवर्तते, तत्रेडादेः सस्य लोपो विधीयमान इटो भविष्यतीति सिद्धमलावीदिति, सत्यं रूपं सिद्धं स्वरे तु दोषः स्यात्, यदि लोपेनेकारो निवर्त्येत अनुदात्तस्य ईटः श्रवणं प्रसज्येत उदात्तनिवृत्तिस्वरे लोपस्यासिद्धत्वात्, यदा तु सकारमात्रस्य लोपे सवर्णदीर्घत्वं तदा सिचश्चित्करणादिडुदात्त इत्येकादेशस्वरो भवति । 'वृक्ण इति' । ओदित । इति निष्ठानत्वं, अत्वस्वरप्रत्ययेड्विधिष्वित्यस्य व्यावर्त्यं दर्शयति,

भाष्याभिप्रायेण लिख्यते । तत्रैव पेषणविषये पूर्वपक्षमाह । तस्मिन्पेष-णमिति । चरौ पेषणं भवति । अर्थस्य चूर्णीभावस्य कृष्णलवल्लोपाभा-वात् कर्तुं शक्यत्वादित्यर्थः ॥ ४९ ॥

अक्रिया वा ऽपूपहेतुत्वात् ॥ ५० ॥

सिद्धान्तमाह । अक्रियेति । अक्रिया चरौ पेषणं न कर्तव्यम् । कुतः अपूपहेतुत्वात् । प्राकृतपेषणस्यापूपहेतुत्वेन चरावपूपाभावादिति भावः ॥ ५० ॥

सौर्यचरौ संयवनबाधः । अधि० १३ ।

पिण्डार्थत्वाच्च संयवनम् ॥ ५१ ॥

पिण्डेति । प्रणीताभिः हवींषि संयौतीत्यस्य प्रकृतौ पिण्डार्थ-त्वात् । चरौ पिण्डाभावान्निवर्ततइत्यर्थः ॥ ५१ ॥

सौर्यचरौ संवपनबाधः । अधि० १४ ।

संवपनं च तादर्थ्यात् ॥ ५२ ॥

संवपनं चेति । देवस्य त्वा संवपामीति यत्तदपि निवर्तते । चरौ संवप्तव्येन प्रयोजनाभावात् ॥ ५२ ॥

सौर्यचरौ संतापनबाधः । अधि० १५ ।

संतापनमधः श्रपणात् ॥ ५३ ॥

संतापनेति । भृगूणामङ्गिरसां तपसा तप्यध्वमिति संतापनं निव-र्तते । प्रकृतौ अयं संतापः कपालोपरि क्रियते । अत्राधः अतो न प्राकृ-तम् । अध इत्यनन्तरं संतापनेनेति शेषः ॥ ५३ ॥

सौर्यचरावुपधानबाधः । अधि० १६ ।

उपधानं च तादर्थ्यात् ॥ ५४ ॥

उपधानेति । कपालोपधानस्य हविष्पाकार्थत्वात् । तस्य स्थाल्यैव निर्वाहान्निवर्तते ॥ ५४ ॥

सौर्यचरौ पृथुश्लक्ष्णबाधः । अधि० १७ ।

पृथुश्लक्ष्णे चानपूपत्वात् ॥ ५५ ॥

पृथ्वीति । उरु प्रथस्वेति प्रथनम् । त्वचं गृह्णीष्वेति श्लक्ष्णीक-रणं च निवर्तते । तयोरपूपार्थत्वात् ॥ ५५ ॥

सौर्यचरावभ्यूहबाधः । अधि॰ १८ ।

अभ्यूहश्चोपरिपाकार्थत्वात् ॥ ५६ ॥

अभ्यूहेति । वेदेन पुरोडाशे साङ्गारं भस्म अभ्यूहेति विहितम् अभ्यूहनं निवर्तते । चरावुपरि पाकाभावात् ॥ ५६ ॥

सौर्यचरौ ज्वलनबाधः । अधि॰ १६ ।

तथा च ज्वलनम् ॥ ५७ ॥

तथेति । दर्भैरभिज्वलयतीति निवर्तते । उपरिपाकार्थत्वात् ॥ ५७ ॥

सौर्यचरौ व्युद्धृत्यासादनबाधः । अधि॰ २० ।

व्युद्धृत्यासादं च प्रकृतावश्रुतित्वात् ॥ ५८ ॥

व्युद्धृत्येति । प्रकृतौ कपालेभ्यः पृथक्कृत्य अन्तर्वेद्यां हविरासादनं क्रियते तद्बोधकविधेरभावात् । अन्तर्वेद्यां हविरासादनानन्तरं कपालोद्वासनस्य विहितत्वाद् आर्थिकं व्युद्धृत्यासादनम् । आर्थिकस्यानङ्गत्वाच्च चोदकशास्त्रं प्रापयति अतः तन्निवर्तते ॥ ५८ ॥

इति जैमिनिसूत्रवृत्तौ दशमाध्यायस्य प्रथमः पादः ॥ १ ॥

कृष्णले चरौ पाकानुष्ठानम् । अधि॰ १ ।

कृष्णलेष्वर्थलोपादपाकः स्यात् ॥ १ ॥

पूर्वपादे द्वारलोपनिबन्धनो बाधश्चिन्तितः । द्वितीये तदपवादश्चिन्त्यते । तत्र कृष्णलचरुरुदाहरणम् । तत्र पूर्वपक्षमाह । कृष्णलेष्विति । कृष्णलेषु द्रव्येषु अपाकः पाकाभावः स्यात् । अर्थस्य कार्यस्य लोपात् । न च घृते श्रपयतीति वैयर्थ्यं, पूषानुमन्त्रणवदेतत्प्रकरणादुत्कृष्य द्वारवति निवेशादिति भावः ॥ १ ॥

स्याद्वा प्रत्यक्षशिष्टत्वात्प्रदानवत् ॥ २ ॥

सिद्धान्तमाह । स्याद्वेति । पाकः स्यात् । यथा ऽनदनीयस्यापि द्रव्यस्य वचनात्प्रदानं प्रत्यक्षवचनमनुशास्ति तद्वत् प्रत्यक्षवचनेन शासनात् । न चोत्कर्षेण सार्थक्यम् । तत्रापि चोदकादेव प्राप्तौ उक्तवाक्यवैयर्थ्यस्य दुर्वारत्वात् ॥ २ ॥

कपाले उपस्तरणाभिघारणयोरभावः । अधि० २ ।

उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात् ॥ ३ ॥

तत्रैव प्राकृतोपस्तरणाभिघारणे स्तो न वेति संशये सिद्धान्तमारभते । उपस्तरणेति । तयोरमृतार्थत्वात् स्वादुर्थत्वात् । कपाले तदभावात्तयोरकर्म अननुष्ठानं, यदुपस्तृणात्यभिघारयत्यमृताहुतिमेवैनां करोतीति अमृतेनोपमितत्वात्स्वादुर्थत्वम् ॥ ३ ॥

क्रियेत वा ऽर्थवादत्वात्तयोः संसर्गहेतुत्वात् ॥ ४ ॥

पूर्वपक्षमाह । क्रियेत वेति । अमृतीभाववाक्यस्यार्थवादत्वाद्विधिवाक्येन हविःसंबन्धमात्रहेतुत्वं प्रतीयते ॥ ४ ॥

अकर्म वा चतुर्भिराप्तिवचनात्सह पूर्णं पुनश्चतुरवत्तम् ॥ ५ ॥

पुनः सिद्धान्तपक्षमुत्थापयति । अकर्मेति । तयोरकर्म अननुष्ठानम् । चतुरवत्तसंपत्तये हि प्रकृतावुपस्तरणाभिघारणे । अत्र चत्वारि चत्वारि कपालान्यवद्यति चतुरवत्तस्याप्त्या इति श्रूयते । तेनैव चतुरवत्तलाभात् सह ताभ्यां सह अवदाने चतुरवत्तं पूर्णम् । तथा सति कपालचतुष्टयावदानेन चतुरवत्तसंपादकं व्याहन्येतेति भावः ॥ ५ ॥

क्रिया वा मुख्यावदानपरिमाणात्सामान्यात्तद्गुणत्वम् ॥ ६ ॥

पुनः पूर्वपक्षमुत्थापयति । क्रियेति । तयोः क्रिया ऽनुष्ठानं वा । कुतः, मुख्यस्य हविषः यदवदानं तत्कियत्कर्तव्यमित्याकाङ्क्षायां प्रकृतितः अङ्गुष्ठपर्वमात्रप्राप्तौ तद्बाधकतया चतुःसंख्यारूपपरिमाणात् परिमाणबोधकत्वात् । परिमाणबोधकत्वे किं मानमत आह । सामान्यात् । कियदवदेयमित्याकाङ्क्षापूरकत्वेन साजात्यात् । अतः तस्य परिमाणस्य द्रव्ये गुणत्वम् अङ्गत्वम् । केवलाङ्गबोधकशास्त्रं, न मुख्यं द्रव्यं बाधितुं शक्नोतीति भावः ॥ ६ ॥

तेषां चैकावदानत्वात् ॥ ७ ॥

अत्रैव साधकान्तरमाह । तेषामिति । तेषां चतुर्णां कपालानां एकावदानत्वात् । एकावदानत्वविधानात् । न तयोर्निवृत्तिः । तद्विधायकं वाक्यं च चत्वारि कपालान्येकमवदानमिति ॥ ७ ॥

Digitized by Google

आप्तिः संख्यासमानत्वात् ॥ ८ ॥

यदुक्तं चतुरवत्तावाप्तिविरोध इति तत्परिहरति । आप्तिरिति । स्तुतिरिति शेषः । आप्तिवचनं चतुष्कमुभयत्र समानमिति तेन कृष्णल-निष्ठसंख्यास्तुतिः । द्वादश द्वादशानि जुहोति द्वादशमासाः संवत्सर इति-वत् ॥ ८ ॥

सतोस्त्वाप्तिवचनं व्यर्थम् ॥ ९ ॥

पुनराप्तिवचनवैयर्थ्यमाह । सतोरित्विति । तयोः सतोः आप्ति-वचनं व्यर्थम् । अयमभिप्रायः । अविद्यमाने वसिष्ठत्वे अयं वसिष्ठ इति तेन रूपेण स्तुतिः संभवति न वसिष्ठे तेन रूपेण स्तुतिः । तथा अविद्यमाने चतुरवत्ते तेन रूपेण स्तुतिः संगच्छते न विद्यमाने इति । आप्तिवचनं तयोः सत्त्वे व्यर्थमेवेति ॥ ९ ॥

विकल्पस्त्वेकावदानत्वात् ॥ १० ॥

पूर्वपक्षं पुनरुत्थापयति । विकल्प इति । यथा आप्तिवचनं तौ निवर्त-यत्येवमेकावदानवचनं तौ व्यवस्थापयतीति साम्याद्विकल्पः स्यात् ॥ १० ॥

सर्वविकारे त्वभ्यासानर्थक्यं हविषो हीतरस्य स्यादपि वा स्विष्टकृतः स्यादितरस्यान्याय्यत्वात् ॥ ११ ॥

एवं विकल्पमापाद्य तमसहमानः आप्तिवचनबाधमेव दृढीक-रोति । सर्वविकारेति । सर्वस्य चतुरवदानस्य विकारे सति प्राकृतचतुर-वदानबाधके सकृदवदाने सति चत्वारि चत्वारि कृष्णलान्यवद्यतीति अभ्यासस्यानर्थक्यम् । अयं भावः । कृष्णलचतुष्टयसकृदवदानं चतुरवत्तं संपादयति तदा द्वितीयावदानाभावादभ्यासो व्यर्थः स्यादिति । स्वमते उपपत्तिमाह । हविष इति । मन्मते ऽभ्यास इतरस्य द्वितीयस्य हविरवदानस्य मानप्राप्त्यर्थं, मन्मते प्राकृतावदानचतुष्टयस्याभावात् । मध्ये शङ्कते । अपि वेति । अभ्यासः स्विष्टकृदवदानार्थं इति चेत् । तस्य स्वि ष्टकृदर्थत्वस्यान्याय्यत्वात् । प्रधानप्रकरणं परित्यज्यान्यार्थत्वस्यान्या-य्यत्वादिति भावः ॥ ११ ॥

Digitized by Google

अकर्म वा संसर्गार्थनिवृत्तत्वात्तस्मादाप्तिसमर्थत्वात् ॥ १२ ॥

सिद्धान्तमाह। अकर्म वेति। तयोरकर्म अननुष्ठानम्। तयोरसंसर्गार्थेनिवृत्तित्वात्। प्रकृतौ पुरोडाशावयवानां सूक्ष्माणां सुचि संयोगाभावप्रयोजनस्य निवृत्तत्वात्। प्रकृते तयोरेव निवृत्तिः। न तु द्वितायावदानस्य। तथा चाभ्यास उपपन्नः। तस्मात्तयोर्निवृत्तत्वाद् आप्तिसमर्थत्वम्। चतुरवदानाभावादाप्त्या समर्थनं स्तुतिरुपपन्ना ॥ १२ ॥

कपालवरौ भक्षसद्भावः। अधि॰ ३।

भक्षाणां तु प्रीत्यर्थत्वादकर्म स्यात् ॥ १३ ॥

तत्रैव हविःशेषभक्षणं कर्तव्यं नेति संशये पूर्वपक्षमाह। भक्षाणामिति। स्पष्टो ऽर्थः ॥ १३ ॥

स्याद्वा निधानदर्शनात् ॥ १४ ॥

सिद्धान्तमाह। स्याद्वेति। भक्षणं प्राकृतं स्यात्। निधानदर्शनात्। निरिव धयन्तो भक्षयन्तीति वचने निरिव धयन्त इति प्राकृतं भक्षमनूद्य तत्र गुणविशेषविधानदर्शनादिति भावः ॥ १४ ॥

वचनं त्वाज्यभक्षं प्रकृतौ स्यादभागित्वात् ॥ १५ ॥

पूर्वपक्षं पुनरुत्थापयति। वचनं त्विति। वचनं पूर्वोक्तमाज्यभक्षणं विदधाति। प्रकृतावाज्यस्याभागित्वात्। भक्षहेतुत्वेनाकॢप्तत्वात् ॥ १५ ॥

वचनं वा हिरण्यस्य प्रदानवदाज्यस्य गुणभूतत्वात् ॥ १६ ॥

सिद्धान्तमाह। वचनं वेति। निरिव धयन्तो भक्षयन्तीत्येतद्वचनं हिरण्यस्य भक्षमाह नाज्यस्यानिर्दिष्टत्वात्। यथा प्रदानमशनीयस्य क्रियते तद्वद् भक्षणमपि। ननु अनिर्देशः हिरण्ये ऽपि समानः कथं हिरण्यं गृह्यते। तत्राह। आज्यस्य गुणेति। अनिर्देशे गृह्यमाणमाकाङ्क्षया प्रधानमेव गृह्यते न गुणः। इह च आज्यस्य गुणभूतत्वादप्रधानद्रव्यत्वादग्रहणं, यथा इष्टकाकूटे दण्डः तिष्ठति प्रहर चोरमित्युक्ते दण्डमेव प्रधानं गृह्णाति न त्विष्टकां, तथा ॥ १६ ॥

Digitized by Google

कृष्णलचरौ सहत्वपरिहारविधानम् । अधि० ४ ।

एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहितत्वात् ॥ १७ ॥

तस्यामेवैकधा ब्रह्मण उपहरतीत्यत्र धाप्रत्ययस्य सकृत्त्वे सहत्वे च शक्तत्वात्प्रकृते इच्छया ग्राह्यमिति पूर्वपक्षे सिद्धान्तमाह । एकधेति । एकधा एककाले प्राकृतानामिडाचतुर्धाकरणशंयुवाकभक्षाणामुपहारे सर्वेषां सहत्वं ब्रह्मभक्षाणां संपद्यते । प्रकृतौ दर्शपूर्णमासे भक्षचतुष्टयस्य विहितत्वात् । अयं भावः । प्रकृतौ विहितं भक्षचतुष्टयं चोदकेन प्राप्तम् । तत्र सकृत्त्वार्थत्वे भक्षत्रयबाधः । सहत्वार्थत्वे भक्षाङ्गभूतकालबाधः प्रधानबाधाद्वरमङ्गबाधकल्पनेति ॥ १७ ॥

कृष्णलचरौ ब्रह्मणे सर्वभक्षभागार्पणम् । अधि० ५ ।

सर्वत्वं च तेषामधिकारात्स्यात् ॥ १८ ॥

तत्रैव कृष्णलचरौ सर्वं ब्रह्मणे परिहरतीति । अत्र यद्ब्रह्मणे परिहरति तत्सर्वमिति सर्वत्वविधिः उत यत्सर्वं परिहरति तद्ब्रह्मण इति ब्रह्मसंबन्धविधिरिति संशये पूर्वपक्षमाह । सर्वत्वमिति । सर्वत्वं विधीयत इति । कुतः तेषां ब्रह्मसंबन्धिपरिहाराणामधिकारात् । उद्देश्यत्वात् । अयमभिप्रायः यथा । अवदाने ऽपि सकलपुरोडाशे आग्नेयत्वं तथा प्रकृतौ ब्रह्मभागैकदेशभक्षणे ऽपि शेषे ब्रह्मभागत्वं न विरुध्यते अतः परिहरतीत्यनेन भक्ष्यं लक्षयित्वा प्रकृते ब्रह्मभागभक्षणमुद्दिश्याप्राप्तं सर्वत्वं विधीयत इति ॥ १८ ॥

पुरुषापनयो वा तेषामवाच्यत्वात् ॥ १९ ॥

सिद्धान्तमाह । पुरुषेति । पुरुषान्तरस्य ब्रह्मातिरिक्तर्त्विक्संबन्धस्य अपनयः विच्छेदः । स्यादिति पूर्वसूत्रस्यमत्र संबध्यते । अयमभिप्रायः । हविःशेषस्यर्त्विग्भक्षणेन संस्कार्यत्वात् सर्वभक्षः प्राप्तो न विधेयः किं तु हविःशेषे सर्वस्मिन् ब्रह्मसंबन्धो विधीयते तेनेतरसंबन्धनिवृत्तिः । अथ यद्ब्रह्मणे तत्सर्वं परिहरति । ब्रह्मणे सर्वं यत्तत्परिहरतीति वा । यत्सर्वं तद्ब्रह्मणे परिहरतीति पक्षाः । तेषाम्, विशेष्यस्येति शेषः । अवाच्यत्वादश्रुतत्वात् । अबोधकं वाक्यं भवेदिति भावः । यदि च ब्र-

Digitized by Google

स्मणे इत्यादिशब्दैः प्राकृतभक्षभागा एव विशेष्यत्वेनानूद्यन्ते इत्युच्यते तर्हि विशिष्टस्यार्थस्य प्राप्तत्वेन विधेयाभावाद्वाक्यं अनर्थकमेव भवेदिति भावः ॥१९॥

भक्षभागानां स्वस्वकाले ग्रहणता भक्षणम् । अधि॰ ६ ।

पुरुषापनयात्स्वकालत्वम् ॥ २० ॥

कण्डूलचराविवेककालपरिहाराद् भक्षणमप्येककालइति पूर्वपक्षे सिद्धान्तमाह । पुरुषेति । पुरुषापनयादित्यनन्तरं कृतार्थत्वादिति शेषः । स्वकालत्वं प्रकृतौ यस्य यस्य विहितः कालः तत्कालत्वं भक्षाणाम् । अयं भावः । पुरुषापनयेन चरितार्थो विधिः प्राकृतकालं बाधितुमसमर्थः ॥ २० ॥

ब्रह्मभक्षे चतुर्धाकरणादीनामभावः । अधि॰ ७ ।

एकार्थत्वादविभागः स्यात् ॥ २१ ॥

तत्रैवेदं चिन्त्यते । इदं ब्रह्मणे इति निर्देशः कर्तव्यो नेति संशये बाधकाभावात्कर्तव्य इति पूर्वपक्षे सिद्धान्तमाह । एकार्थत्वादिति । एकब्रह्मार्थत्वादविभागः निर्देशाभावः । अयं भावः । प्रकृतौ सर्वर्त्विगर्थत्वाद्विःशेषस्य निर्देशाभावे परस्परं कलहं कुर्युः । इह एक एवेति कलहाभावान्न निर्देशः ॥ २१ ॥

ऋत्विग्दानस्यानत्यर्थता । अधि॰ ८ ।

ऋत्विग्दानं धर्ममात्रार्थं स्याद्ददातिसामर्थ्यात् ॥ २२ ॥

यज्ञे ऽयमाणा दक्षिणा अदृष्टार्थेति पूर्वपक्षयति । ऋत्विगिति । धर्ममात्रम् अर्थो यस्येति । यजतीत्यत्र यथा ऽदृष्टार्थता तथा ददातेरपि तादर्थ्याददृष्टार्थत्वात् ॥ २२ ॥

परिक्रयार्थं वा कर्मसंयोगाल्लोकवत् ॥ २३ ॥

सिद्धान्तमाह । परिक्रयेति । ऋत्विजां परिक्रयार्था दक्षिणा कर्मसंयोगात् कर्मकर्तृसंबन्धात् । लोके क्रियाकर्तुः दानं भृतिरूपं दृष्टम् ॥ २३ ॥

दक्षिणायुक्तवचनाच्च ॥ २४ ॥

साधकान्तरमाह । दक्षिणेति । दक्षिणायुक्ता वहन्त्यृत्विज इति वाक्ये ऋत्विजां वहने हेतुत्वं दक्षिणायुक्ता इत्यनेन ज्ञाप्यते इदं लिङ्गम्* ॥ २४ ॥

---

* न चान्येनानम्येत परिक्रयात्कर्मणः परार्थत्वादिति सूत्रमधिकं न्यायमालायाम् ।

Digitized by Google

परिक्रीतवचनाच्च ॥ २५ ॥

लिङ्गान्तरं स्पष्टमाह । परिक्रीतेति । श्रूयते दक्षिणापरिक्रीता ऋत्विजो याजयन्तीति । तस्माच्च ॥ २५ ॥

सनिवन्येव भृतिवचनात् ॥ २६ ॥

लिङ्गान्तरमाह । सनीति । सनिर्धनं याच्ञायां प्राप्तं सनिवन्यं तस्मिन् तद्विधायकवाक्येषु निवचनाद् भृतिवचनसत्त्वात् तद्वाक्यं द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेति। अयमर्थः यजमानो दीक्षितः द्वादशरात्रपर्यन्तमन्येभ्यः ऋत्विग्दक्षिणारूपां भृतिं भिक्षेतेति । भृतिशब्दो लोके कर्मकर्तुः परिक्रये प्रसिद्धः । अतो लिङ्गात् ॥ २६ ॥

नैष्कर्तृकेण संस्तवात् ॥ २७ ॥

लिङ्गान्तरमप्याह। नैष्कर्तृकेणेति। यथा वै दारुहारो नैष्कर्तृको निष्कर्तनभृतः कर्मयोगे वर्तते । एवं वा एते यज्ञस्यर्त्विज इति। अयमर्थः। यथा दारुहारः नैष्कर्तृकः वृक्षच्छेदनकर्ता निष्कर्तनं छेदनं तद्भृतकर्म तत्साभोपाये वर्तते । तत्सादृश्यप्रदर्शनेन ऋत्विग्दक्षिणा भृतिरूपेति कृप्ता। विचारफलं पूर्वपक्षे सत्रे दक्षिणाया अबाधः । सिद्धान्ते तद्बाधः ॥ २७ ॥

ज्योतिष्टोमे भक्षस्य प्रतिपत्त्यर्थत्वम् । अधि० ६ ।

शेषभक्षाश्च तद्वत् ॥ २८ ॥

हविःशेषभक्षणं परिक्रयः संस्कारो वेति संशये पूर्वपक्षमाह । शेषेति । तद्वद्दक्षिणावत् ॥ २८ ॥

संस्कारो वा द्रव्यस्य परार्थत्वात् ॥ २९ ॥

सिद्धान्तमाह । संस्कारेति। शेषहविषः संस्कारः । कुतः, पुरोडाशादिद्रव्यस्य परार्थत्वात् । यागार्थत्वात् । अयं । भावः । पुरोडाशादिद्रव्यं यदि भक्षार्थं स्यात्तदा भवेदेवम् । यागार्थत्वाचेत्रम् ॥ २९ ॥

शेषे च समत्वात् ॥ ३० ॥

हेत्वन्तरमाह । शेषइति । शेषे हुतशेषे द्रव्ये समत्वात् । ऋत्विग्यजमानयोः समत्वात् । स्वत्वाभावसाम्यात् । अयं भावः । देवता-

Digitized by Google

द्वेशेनाग्नये जुष्टं निर्वपामीति निर्वापाद्यजमानस्वत्वं निवृत्तम् । अतः साम्यम् । यत्र स्वत्वमेव नास्ति तेन परिक्रयः कथं स्यात् ॥ ३० ॥

स्वामिनि च दर्शनात्तत्सामान्यादितरेषां तथात्वम् ॥ ३१ ॥

हेत्वन्तरमाह । स्वामिनीति । यजमानस्यापि शेषभक्षो विहितः दृश्यते । अतः इतरेषामपि भक्षे तथात्वं स्वामिभक्षसादृश्यम्* ॥ ३१

सत्रे ऋत्विग्वरणाभावः । अधि॰ १० ।

वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात् ॥ ३२ ॥

सत्रे अबाधात्माह्वतवरणं कर्तव्यमिति पूर्वपक्षे सिद्धान्तमाह । वरणमिति । स्वकर्मत्वात् । सत्रे यजमाने ऋत्विक्त्वातिदेशेन सर्वस्य यजमानकर्मत्वात् । शेषं स्पष्टम् ॥ ३२ ॥

सत्रे परिक्रयाभावः । अधि॰ ११ ।

परिक्रयश्च तादर्थ्यात् ॥ ३३ ॥

परिक्रय इति । परिक्रयः दक्षिणा ऽपि नेति पूर्वसूत्रादनुवर्तते । तादर्थ्यात् । आत्मार्थत्वात् ॥ ३३ ॥

प्रतिषेधश्च कर्मवत् ॥ ३४ ॥

सिद्धान्तमाक्षिपति । प्रतिषेध इति । प्रतिषेधः अदक्षिणानि सत्राणीति निषेधः कर्मवत् प्राप्तिमत्प्राप्तिपूर्वकमिति यावत् । यदि सत्रे दक्षिणाया अप्राप्तिः तदा निषेधो ऽनुपपन्न इति भावः ॥ ३४ ॥

स्याद्वा प्रसर्पिकस्य धर्ममात्रत्वात् ॥ ३५ ॥

एकदेशिसमाधानमाह । स्याद्वेति । प्रतिषेधोपपत्तिः स्यात् । प्रसर्पकेभ्यो लोमानीति विहितदानस्य धर्ममात्रत्वाददृष्टार्थत्वात् । तत्प्राप्तौ तन्निषेधसंभवात् ॥ ३५ ॥

न दक्षिणाशब्दात्तस्मान्नित्यानुवादः स्यात् ॥ ३६ ॥

सिद्धान्तमाह । नेति । प्रसर्पकदक्षिणानिषेधो न । दक्षिणाशब्दात् । आनत्यर्थदानएव दक्षिणाशब्दो रूढ इति भावः । अतो निषेधो

---

* तथा चात्मार्थकर्मेनमिति सूत्रमधिकं न्यायमालायाम् ।

नित्यानुवादः इत्थं च प्रसर्पकदक्षिणाबाधो न ॥ ३६ ॥

उदवसानीये दानस्य परिक्रयार्थत्वम् । अधि० १२ ।

उदवसानीयः सत्रधर्मा स्यात्तदङ्गत्वात्तत्र दानं धर्ममात्रं स्यात् ॥ ३७ ॥

अस्ति सत्रसमाप्त्यनन्तरं सत्रादुदवसाय पृष्ठशमनीयेन ज्योतिष्टोमेन सहस्रदक्षिणेन यजेरन्निति विहितः । तत्र दक्षिणाऽदृष्टार्थेति पूर्वपक्षमाह । उदवसानीयेति । सत्रस्य धर्मो यत्रेति बहुव्रीहिः तदङ्गत्वात् । सत्राङ्गत्वात् । धर्ममात्रमदृष्टैकफलम् ॥ ३७ ॥

न त्वतत्प्रकृतित्वाद्विभक्तचोदितत्वात् ॥ ३८ ॥

सिद्धान्तमाह । नेति । नादृष्टार्थमतत्प्रकृतित्वादुदवसानीयस्य सत्रप्रकृतिकत्वाभावात् । नापि सत्राङ्गमित्याह । विभक्तचोदितत्वात् । सत्रादुदवसाय इत्याय समाप्येति अस्मिन् सत्रविभक्तत्वनिर्देशात् ॥ ३८ ॥

उदवसानीयस्यर्त्विजामेकैकेनानुष्ठानम् । अधि० १३ ।

तेषां तु वचनाद् द्वियज्ञवत्सह प्रयोगः स्यात् ॥ ३९ ॥

सोदवसानीया सर्वैः संभूय कार्या प्रत्येकमिति संशये पूर्वपक्षमाह । तेषामिति । तेषां सत्रकर्तॄणां वचनात् सहस्रदक्षिणेन यजेरन्नित्यत्र बहुवचनाद् द्वियज्ञवद् राजपुरोहितौ सायुज्यकामौ यजेयातामितिवत् सह मिलित्वा अनुष्ठानं स्यात् । एवं पूर्वपक्षे स्थिते सिद्धान्तमनुक्त्वा विचारान्तरमारभते ॥ ३९ ॥

उदवसानीयस्यर्त्विजां सत्रिभ्यो भिन्नता । अधि० १४ ।

तत्रान्या ऋत्विजो वृणीरन् ॥ ४० ॥

पूर्वोक्ते कर्मणि सत्रस्य अनङ्गत्वेऽपि ल्यपा एककर्तृकत्वनिर्देशात्त एवर्त्विज इति पूर्वपक्षे सिद्धान्तमाह । तत्रेति । दक्षिणाश्रवणादिति शेषः । स्पष्टम् ॥ ४० ॥

पृष्ठशमनीये प्रत्येकं यष्टृता । अधि० १५ ।

एकैकशस्त्वविप्रतिषेधात्प्रकृतेश्चैकसंयोगात् ॥ ४१ ॥

आगन्तुकविचारं समाप्य पूर्वपक्षे सिद्धान्तमाह एकैकश इति । पृष्ठशमनीयमेकैकशः प्रत्येकं कुर्युः । अविप्रतिषेधात् । बाधकाभावात् । तत्र

कर्तॄणां बहुत्वेन तत्र बहुवचने सत्त्वाभावाधिकरणस्थमेमाख्यातबहुवचनम् । श्रुतेः एककर्तृसंयोगाच्चोदकप्राप्तमनुगृहीतं भवतीति भावः । द्वियज्ञवैषम्यं भाष्यादवगन्तव्यम् । विस्तरभयान्नेह लिख्यते ॥ ४१ ॥

कामेष्टौ दानस्यादृष्टार्थता । अधि० १६ ।

कामेष्टौ च दानशब्दात् ॥ ४२ ॥

सारस्वतसत्रमध्ये कामेष्टौ अश्वी पुरुषी दक्षिणेति विहिता । तत्र दक्षिणा परिक्रयार्थेतादृष्टार्थेति संशये पूर्वपक्षमाह । कामेति । पृष्ठशमनीयद्दानशब्दाद्दानत्यर्था ॥ ४२ ॥

वचनं वा सत्रत्वात् ॥ ४३ ॥

सिद्धान्तमाह । वचनमिति । सत्रत्वादानत्यर्था । दक्षिणावचनमदृष्टार्थत्वबोधकम् ॥ ४३ ॥

दर्शपूर्णमासयोर्दुष्याय दानस्यादृष्टार्थत्वम् । अधि० १७ ।

द्वेष्ये वा चोदनाद्दक्षिणापनयात् ॥ ४४ ॥

निमित्तविशेषे इष्टिः श्रूयते । वैश्वानरं द्वादशकपालं निर्वपेत्तस्यैकहायनो गौर्दक्षिणा तं द्वेष्याय दद्यादिति । अत्र दक्षिणाश्रवणात्परिक्रयार्थं, तथा च तदनुसारेण द्वेष्या ऋत्विजः इति पूर्वपक्षे सिद्धान्तमाह । द्वेष्येति । द्वेष्ये दक्षिणा दृष्टार्था अचोदनाद् द्वेष्यस्य ऋत्विक्त्वनिषेधात् । अतः ऋत्विक् उक्तदक्षिणापनयात् । प्राकृतान्वाहार्यमेवेति भावः ॥ ४४ ॥

जीवतामस्थियज्ञः । अधि० १८ ।

अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ॥ ४५ ॥

सत्रे श्रूयते । यदि संदीक्षितानामेकः प्रमीयेत तं दग्ध्वा कृष्णाजिनेऽस्थीन्युपनह्य यो ऽस्य नेदिष्ठः तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन् ततः संवत्सरेऽस्थीनि याजयेदिति । याजयेदित्यत्र णिचः परस्मैपदस्य च श्रवणादस्थीनि याजयेयुरिति विहितयागजन्यफलं मृतस्येति पूर्वपक्षे सिद्धान्तमाह । अस्थियज्ञ इति । अस्थियज्ञः इतरेषां मृतभिन्नानां स्यात् । अविप्रतिषेधात् । अबाधात् । अस्थ्नामचेतनानां बाधाच ॥ ४५ ॥

Digitized by Google

यावदुक्तमुपयोगः स्यात् ॥ ४६ ॥

ननु तत्रास्थ्नां क्व चिदुपनिधानं श्रूयते । अस्थि कुम्भमुपनिधाय स्तुवीतेति तत्कथमिति शङ्कायामाह । यावदिति । स्पष्टोऽर्थः ॥ ४६ ॥

अस्थियागे ऽस्थ्नां जपाद्यननुष्ठानम् । अधि॰ १९ ।

यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ॥ ४७ ॥

इत ऊर्ध्वमधिकरणपञ्चकं क्रत्वाचिन्तारूपम् । यद्यस्थ्नां यागः वाचनिकः तदा संस्कारादयः अस्थ्नां कर्तव्या इति पूर्वपक्षे सिद्धान्तमाह । यदीति । तेषामस्थ्नां वचनबलाद्यागस्तदा जपः मन्त्रोच्चारः संस्कारः केशश्मश्रुवपनादि सेष्टि दीक्षणीयेष्टिसहितम् अर्थः द्वारं लुप्तो यस्य तन्निवर्तते । तेषां तदर्थत्वात् । कर्तृसंस्कारार्थत्वात् ॥ ४७ ॥

क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ॥ ४८ ॥

क्रत्वर्थमपि लुप्यतइति पूर्वपक्षमाह । क्रत्वर्थमिति । शुक्लवस्त्रान्वारम्भादिरूपं यत्क्रत्वर्थं तत्कर्तव्यम् । तत्र यजमानस्य गुणभूतत्वादङ्गत्वात् ॥ ४८ ॥

अस्थियज्ञे ऽस्थ्नां काम्यकर्माद्यननुष्ठानम् । अधि॰ २० ।

काम्यानि तु न विद्यन्ते कामाज्ञानाद्यथेतरस्यानुच्यमानानि ॥ ४९ ॥

यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुयादित्यादि अस्थियज्ञे कर्तव्यम् इति पूर्वपक्षे सिद्धान्तमाह । काम्यानीति । काम्यानि सदोमानविशेषादि अस्थियज्ञे न विद्यन्ते । तदीयकामस्याज्ञानात् । जीवतोऽपि परपुरुषस्य अनुच्यमानानि ज्ञानादीनि परो न जानाति यथा ॥ ४९ ॥

अस्थियज्ञे ऽस्थ्नां सूक्तवाकगताशासनाननुष्ठानम् । अधि॰ २१ ।

ईहार्थाभावात्सूक्तवाकवत् ॥ ५० ॥

तत्रैव दर्शपूर्णमासप्रकृतिके प्रायणीयादौ सूक्तवाके अयं यजमान आयुराशास्ते इत्यादिमन्त्राः सन्ति न वेति संदेहे सिद्धान्तमाह ।

Digitized by Google

ईहेति । मन्त्राणामीहार्थत्वात् । अस्मिन्न तदभावात् । सूक्तवाकवत् । सूक्तवाकादेः । अत्राह वृत्तिः । मन्त्रेषु विशेषणम् । निवर्तन्तइति शेषः ॥ ५० ॥

स्युर्वा ऽर्थवादत्वात् ॥ ५१ ॥

पूर्वपक्षमाह । स्युर्वेति । स्पष्टो ऽर्थः ॥ ५१ ॥

नेच्छाभिधानात्तदभावादितरस्मिन् ॥ ५२ ॥

पुनः सिद्धान्तं द्रढयति । नेति । मन्त्रेषु इत्यादिः । इतरस्मिन् अस्मिन्न ॥ ५२ ॥

अस्थियज्ञे होतृकामाभावः । अधि० २२ ।

स्युर्वा होतृकामाः ॥ ५३ ॥

तत्रैव यं कामयेत पशुमान्स्यादिति परार्चो तस्येडामुपहूयेतेत्यादिहोतृकामा अबाधात्स्युरिति पूर्वः पक्षः ॥ ५३ ॥

न तदाशीष्ट्वात् ॥ ५४ ॥

सिद्धान्तमाह । नेति । तदाशीष्ट्वाद् यजमानाशीष्ट्वात् ॥ ५४ ॥

यजमानस्य मरणे ऽपि सर्वस्वारस्य समापनम् । अधि० २३ ।

सर्वस्वारस्य दिष्टे गतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ॥ ५५ ॥

सर्वस्वार इति क्रतुविशेषः ज्योतिष्टोमविकारः । मरणकामो ह्येतेन यजेतार्भवपवमाने औदुम्बरीं दक्षिणेन दशेनाहतेन वाससा परिवेष्ट्य ब्राह्मणाः समापयत मे यज्ञमिति संप्रेष्याग्नौ संविशतीति । अत्र पूर्वपक्षमाह । सर्वेति । दिष्टे गतौ यजमानमरणोत्तरम् । शेषं स्पष्टम् ॥ ५५ ॥

स्याद्वोभयोः प्रत्यक्षशिष्टत्वात् ॥ ५६ ॥

सिद्धान्तमाह । स्याद्वेति । समापनान्तं पूर्वस्मादनुवर्तते । उभयोः क्रत्वोः परिसमाप्त्योश्च । समापयतेति प्रैषद्वारा लक्षणया समाप्तिर्वेदाहृतवाक्येन विधीयतइति भावः ॥ ५६ ॥

सर्वस्वारे कार्यबाध्यव्यवस्था । अधि० २४ ।

गते कर्मास्थियज्ञवत् ॥ ५७ ॥

तत्रैव गते यजमानमरणानन्तरं यजमानकर्म पूर्वमस्थियज्ञे निर्वृत्तं तद्वदिति सिद्धान्तः ॥ ५७ ॥

Digitized by Google

संस्कारे यजमाने मृते ऽप्यायुराशंसनम् । अधि० २५ ।

जीवत्यवचनमायुराशिषस्तदर्थत्वात् ॥ ५८ ॥

तस्मिन्नेव क्रतौ प्रायणीयादौ अयं यजमान आयुराशास्ते इति मन्त्रो न पठनीय इति पूर्वपक्षमाह । जीवत्येति । जीवितुमिच्छावाञ् जीवत्यः तत्संबन्धिवचनमायुराशास्ते इति, निवर्तते इति शेषः । आशिषः यजमानार्थत्वात् । यजमानस्यायुषि इच्छाभावादिति भावः ॥ ५८ ॥

वचनं वा भागित्वात्प्राग्यथोक्तात् ॥ ५९ ॥

सिद्धान्तमाह । वचनमिति । वचनं पठनं वा कर्तव्यम् । आयुरादीनां यथोक्तात् । आर्भवपवमानात्प्राग् भागित्वात्तादृशेच्छाभागित्वात् । तावत्पर्यन्तं जीवनेच्छासत्त्वादिति भावः ॥ ५९ ॥

द्वादशाहे ऋतुयाज्याद्यनुष्ठानम् । अधि० २६ ।

क्रिया स्याद्धर्ममात्राणाम् ॥ ६० ॥

अस्ति सत्रे ऋतुयाज्यावरणम् आत्रेयाय हिरण्यदानादि । तत्र वरणादि निवर्ततइत्युक्तं प्राक् । अत इदृशमपि निवर्ततइति प्राप्ते सिद्धान्तमाह । क्रियेति । धर्ममात्राणामदृष्टैकप्रयोजनानां क्रिया अनुष्ठानम् ॥ ६० ॥

पवमानेष्टौ निर्वापानुष्ठानम् । अधि० २७ ।

गुणलोपे तु मुख्यस्य ॥ ६१ ॥

प्रथमपवमानेष्टौ अग्निहोत्रहवण्या निर्वापसाधनस्य अभावान्निर्वापो निवर्ततइति प्राप्ते सिद्धान्तमाह । गुणेति । गुणस्याग्निहोत्रहवण्या लोपे ऽपि मुख्यस्य प्रधानस्य निर्वापस्यानुष्ठानम् ॥ ६१ ॥

वाजपेये मुष्टिलोपः । अधि० २८ ।

मुष्टिलोपात्तु संख्यालोपः तद्गुणत्वात्स्यात् ॥ ६२ ॥

वाजपेये नैवारस्सप्तदशशरावश्चरुर्भवतीति । तत्र चतुरो मुष्टीन्निर्वपतीति अतिदेशेन प्राप्तौ सप्तदशशराव इत्यनेन बाध्यमानं कतमं बाध्यतइति चिन्तायां प्रथमपूर्वपक्षमाह । मुष्टीति । मुष्टिलोपे सति सप्तदशशरावधान्यस्य स्थूलपरिच्छेदे माने संख्यानुग्रहः । तादृशधान्यस्य शतवारं मुष्ट्या माने मुष्ट्यनुग्रहः संख्याबाधः । तयोर्मध्ये मुष्टिलोपाद्वरं संख्यालोपः स्यात् । संख्याया मुष्टिगुणत्वात् ॥ ६२ ॥

Digitized by Google

न निर्वापशेषत्वात् ॥ ६३ ॥

इमं पक्षं दूषयन् पक्षान्तरमाह । नेति । न मुष्टिगुणः संख्या किंतु निर्वापस्य । तद्विस्तरो भाष्ये द्रष्टव्यः । अतो मुष्टिलोपः ॥ ६३ ॥

संख्या तु चोदनां प्रति सामान्यात्तद्विकारः संयोगाच्च परं मुष्टेः ॥ ६४ ॥

इमं पक्षं दूषयन् पक्षान्तरमाह । संख्या त्विति । चोदनां प्रति सामान्यात् । सादृश्यात् । प्रकृतौ चतुःसंख्याकार्यं द्रव्यपरिच्छेदः तस्य सप्तदशपरिच्छेदकत्वेन सादृश्यात्संख्या सप्तदशसंख्या चतुष्ट्वविकारः बाधकः स्यात् । एवं शरावः दृश्यमानसंयोगाद् मुष्टेर्विकारः । तथा चोभयबाध इति भावः ॥ ६४ ॥

न चोदनाभिसंबन्धात्प्रकृतौ संस्कारयोगात् ॥ ६५ ॥

सिद्धान्तमाह । नेति । वाजपेयवाक्ये संख्याशरावौ उत्पत्तिवाक्यत्वाच्चोदनया यागभावनया संबन्धात् । प्रकृतौ तु निर्वापरूपद्रव्यसंस्कारभावनया योगाद् न द्वयोरपि बाधः संभवति शास्त्रेण किं तु द्वयोर्मेलनानुपपत्त्या ऽन्यतरस्य बाधे कर्तव्ये असञ्जातविरोधन्यायेन प्रथमोपस्थितसंख्या न बाध्यते । पाश्चात्यमुष्टिरेव बाध्यत इति भावः ॥ ६५ ॥

धेन्वादिशब्दानां गोवाचित्वम् । अधि॰ २९ ।

औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात् ॥ ६६ ॥

त्वाष्ट्रपात्न्यां धेनुमालभेतेत्यत्र प्रजननसूतत्वरूपगुणविशिष्टगोत्वे धेनुशब्दस्य रूढिः तथा ऽपि चोदकानुग्रहाय जातिमपहाय गुणमात्रमजायां विधीयत इति पूर्वपक्षस्य समाधानमाह । औत्पत्तिकेति । यदोत्पत्तिवेलायामेव गुणविशिष्टजातिवाचके द्रव्यस्य प्राकृतस्य विकारः बाधः स्यात् । अकार्यत्वात् । प्राकृते द्रव्ये अकार्यत्वाद् गुणविशिष्टद्रव्यस्य संपादयितुमशक्यत्वात् ॥ ६६ ॥

वायव्यपशोरजस्यैवालम्भनम् । अधि॰ ३० ।

नैमित्तिके तु कार्यत्वात्प्रकृतेः स्यात्तदापत्तेः ॥ ६७ ॥

नैमित्तिके श्वेतत्वं गुणमात्रं निमित्तीकृत्य प्रवृत्ते श्वेतमालभेतेत्यत्र

Digitized by Google

श्वेतशब्दे कार्यत्वात् । गुणयोगस्य प्राकृते कर्तुं शक्यत्वात्प्राकृतः स्यात् । कुतः तस्य चोदकशास्त्रस्य प्राप्तेः उपपत्तेः अनुग्रहादिति सिद्धान्तः ॥ ६७ ॥

खलेवालीतयूपयोः खादिरप्रैहत्वानियमः । अधि० ३१ ।

विप्रतिषेधे तद्वचनात्प्राकृतगुणलोपः स्यात्तेन कर्मसंयोगात् ॥ ६८ ॥

खलेवाली यूपो भवतीत्यत्र चोदकानुग्रहाय यो यूपः स खलेवालीति वाक्यार्थं संपाद्य यत्र खादिरः खलेवाली स संपादनीय इति पूर्वपक्षे सिद्धान्तमाह । विप्रतिषेधइति । प्राकृतवैकृतयोर्गुणयोर्विप्रतिषेधे विरोधे सति तस्य वैकृतस्य वचनात्प्रत्यक्षवचनात्प्राकृतगुणलोपः बाधः स्यात् । ननु यूपमुद्दिश्य खलेवालीत्वविधानेन द्वयोर्विरोध इत्यत आह । तेनेति । तेन यूपेन समीपवर्तिना कर्मसंयोगात् । भावनान्वयात् तस्यैव विधानं युक्तमिति भावः ॥ ६८ ॥

खलेवाल्यां तक्षणाद्यननुष्ठानम् । अधि० ३२ ।

परेषां प्रतिषेधः स्यात् ॥ ६९ ॥

तत्रैव परेषां तक्षणादीनां प्रतिषेधः बाधः स्यात् । तक्षणाष्टाश्रीकरणादियूपोत्पत्तिसाधनम् अत्र तदभावादिति भावः ॥ ६९ ॥

विप्रतिषेधाच्च ॥ ७० ॥

हेत्वन्तरमाह । विप्रतीति । विप्रतिषेधाद्विरोधाच्च तक्षणादिषु क्रियमाणेषु रूपान्तरोत्पत्त्या खलेवालीत्वं भज्येत । तथा च गतं खलेवालीत्वमिति भावः ॥ ७० ॥

खलेवाल्यां पर्यूहणादिसंस्काराणामनुष्ठानम् । अधि० ३३ ।

अर्थाभावे संस्कारत्वं स्यात् ॥ ७१ ॥

तत्रैव खलेवाल्यां यूपत्वनिमित्ततक्षणादिवन्मेत्रावरुणदण्डेन समीकरणजलसेचनादयो निवर्तन्ते इति पूर्वपक्षे सिद्धान्तमाह । अर्थेति । अर्थस्य यूपत्वस्य खलेवाल्यामभावे ऽपि संस्कारत्वं दृष्टफलसंस्कारसमूहः स्यात् । यद्वा खलेवाल्यामुक्तसंस्काराणां कार्यस्य दृष्टस्याभावे हि यूपसंस्कारत्वं स्यात् । इह दृष्टप्रयोजनसंभवाच्चादृष्टार्थतेति भावः ॥ ७१ ॥

110 (*contd.*)—Contradiction consists in the mention of two objects,—really not contradictory—as contradictory.

(23) Virodha or Contradiction.

[*Page* 725.] *Contradiction* is the mention of two objects as contradictory to each other, when as a matter of fact they are not so.

110-111 (*contd.*)—Genus contradicting the four, Genus, &c. (Genus, Property, Action and Substance); Property the three (Property, Action and Substance); Action the two (Action and Substance); and Substance contradicting Substance;—thus this is tenfold.

The Ten Forms of Contradiction.

[*Page* 726.] Examples in order—

(1) *Genus Contradictory to Genus.*—

"O handsome one! On the thunderfall of your separation, to the fawn-eyed one, fresh lotus leaves, bangles of lotus stalk and such like things, appear as heaps of flaming fuel."

(Here the genus *lotus* is contradictory to the genus *fire.*)

(2) *Genus to Property.*—

"O Lord of men! in your presence, mountains become lowered; winds motionless, and oceans shallow, and the earth too small."

(Here the genus *mountain,* &c. are contradictory to the properties *lowness,* &c.)

(3) *Genus to Action.*—

"Thy enemies—by obtaining the hold of whose necks, thy sharp sword was coloured (impassioned) and smooth (affectionate) —of them, having their hearts in fight, thou performest bodily adornments by means of the dust (of the battle field). How strange this!"

[Here the genus *sword* is contradictory to the actions of being *impassioned,* &c.]

Digitized by Google

(4) *Genus to Substance.*—

"It is strange that Janārdana with ease creates, protects and destroys the universe; and when occasion presents itself, He becomes a common fish."

[Here the genus *fish* is contradictory to the substance *Janārdana*].

[*Page* 729.] (5) *Property to Property.*—

"The hands of Brāhmana women, hardened by handling the wooden pole, in their household duties, have become lotus-soft during your regime.

[Here the property *softness* contradicts *hardness.*]

(6) *Property to Action.*—

"Of really appreciative men, even soft talks of evil men, burn the hearts; whereas the words of good men, though harsh, produce pleasure like the juice of sandalwood."

[Here the properties *softness* and *harshness* are contradictory to the actions *paining* and *pleasing* respectively.]

(7) *Property to Substance.*—

"Verily, a peculiar object of creation was Paraçurāma, by means of the uninterrupted shower of whose arrows even the stony-hard *Kraunchādri*, became soft like lotus."

(Here the substance *Kraunchādri* is contradictory to the property of *softness*)

[*Page* 730.] (8) *Action to Action.*—

"परिच्छेदातीतः, &c." (*Vide* Text p. 204).

[Here the action of *burning* (paining) is contradictory to that of *cooling.*]

(9) *Action to Substance.*—

"Having our hearts moved with desire, we had recourse to the ocean thinking him to be the one reservoir of water and receptacle of Gems. Who knew that the Rishi taking up the ocean

in his joined palms, would drink it up in a moment—the ocean wherein the fish and allegators were fluttering about." [*Bhallata-çataka*].

(Here the action of *drinking* by Agastya, is contradictory to the *substance, the ocean*).

(10) *Substance to Substance.*—

[*Page* 731.] "O thou ornament of the earth! when you are on the banks of the River on the head of Çiva (Gangā), she becomes the Yamunā, by contact with the rivulet of the temple-juice of thy intoxicated elephants."

[Here we have contradiction between the *two substances Gangā and Yamunā.*]

111 (*concld.*)—Natural Description is the description of the peculiar (or specific) action (or appearance) of children, &c.

(24) Swabhāvokti or Natural Description.

Peculiar, *i. e.* resting in themselves.

Appearance, *i. e.* colour and form.

Example—

"The horse rising from sleep extends his hind legs, stretches his body, large owing to the depth of the spinal column; brings his face to his breast, with his neck curved; and flutters his dusted mein,—having his lips quivering on account of his desire for grass, and slightly neighing, he is scratching the ground with his hoofs."

112 (*contd.*)—Dissembling Eulogy consists in apparent praise or disparagement, ending contrarily (*i. e.* in disparagement or praise respectively.)

(25) Vyājastuti or Dissembling Eulogy.

Vyājastuti=Eulogy in the form of a dissimilation; or Eulogy through dissimilation.

Example in order—

(1) *Disparagement ending in Praise*—

[*Page* 733.] "No other than yourself is the chief of the ungrateful; shamelessness too is seen nowhere else save in Lakshmī, who, though disregarded, still has her residence in you, who renounce her who has taken shelter in you in thousand ways."

[Here the king is eulogised as being a great giver; but this is done through the description of his fault, *that of renouncing Lakshmī who has taken shelter in him*].

(2) *Praise ending in Disparagement*—

"O Ocean! the subduer of the Buddha (in pity)! what is the use of such words! There is no equal to you in your determination to benefit others! You who help the desert in bearing the weight of infame, attaching to it on account of its disinclination to benefit the thirsty travellers!"

(26) Sahokti or Connected Description.

112 (*concld.*)—Connected Description consists in the denotation of more than one meaning, by a word; through the force of the meaning of such words as 'together, etc.' (सह).

Connected Description is that where a word with a single denotation is made to signify both, on account of the words 'together, etc.'—*e. g.*

[*Page* 735.] "सह दिअसणिसाहिं दीहरा सासदण्डा:
सह मणिवलयेहिं बाप्पधारा गलन्ति ।
तुम सुहअ विओए तीअ उव्वेवणीए
सह अ तणुलदाए दुब्बला जीविदासा" ॥

[*Karpūramanjarī*].

"Her breath became long, together with days and nights; tears rolling down, together with the jewel bangle; O beautiful one! in separation from you, the hope of life of that longing woman becomes feebler, together with her body!"

Here the *length*, etc. with reference to the *breath*, etc. are directly expressed; that with reference to *nights and days*, etc. are implied by the words "together, etc."

113 (*contd.*)—[*Page* 736.] Privative Description is that where a certain object is shown to be not agreeable, or the contrary, in the absence of another.

(27) Vinokti or Privative Description.

Sometimes disagreeable and sometimes agreeable.

Examples in order—

(1) *The Disagreeable*—

"Moon without the night is not bright; night too without the moon is all darkness; without both of these, the action of Cupid belonging to gallants is not lovely."

(2) *The Agreeable*—

"This prince without the deer-eyed one, is expert in intellectual feats; and without such (evil) friends, he has his character agreeable as the nectar."

113 (*concld.*)—Exchange is (that Figure) where there is an exchange of equal or unequal things.

(28) Parivritti or Exchange.

Exchange, *i. e.* the Figure so-named.

Examples—

[*Page* 738.] "This wind, having imparted graceful motion to these creepers with blooming flowers, takes in their unrivalled fragrance; these creepers, on the other hand, take (attract) the eyes of travellers and gives them (in return) (*i. e.* subjects them to) a host of internal as well as external pain, perplexity and delusion."

In the above, in the first half, we have the exchange of equals (*grace* with *fragrance*); in the second, we have that of unequals—*evil* for *good* (*pain* with *eyes.*)

"O King! your proud enemies at war accept the strokes of manifold arms whizzing in battle, and make over to you this earth, whose embrace with themselves is never to be removed."

Here we have the exchange of good for evil (*earth* for *strokes of arms*).

Digitized by Google

114 (*contd.*)—Vision consists in the delineation of past or future events as being of the present.

(29) Bhāvika or Vision.

In भूतभाविनः we have a *Dwandwa* Compound. *Vision* (literally) means *that where lies the meaning of the poet*—*e. g.*

"Methinks there was the black collyrium in your eyes. And I perceive thy body as if it were going to be adorned with ornaments."

Here in the first half we have a vision of the past, as in the latter, of the future.

114 (*concld.*)—The Poetical Reason consists in the mention of the reason, by a sentence or a word.

(30) The Kāvyalinga or Poetical Reason.

[*Page* 741.] To exemplify the cause mentioned in a sentence—

"O destroyer of cities! from my bodily incarnation, I infer that I never bowed to you in my previous birth. And bowing to you at present, I shall not offer obeisance in any future birth. Thus O Lord! you will have to excuse my double fault."

To exemplify the mention of reason by many words—

"Her body is such as bears not the strokes of the lovely and soft Çirīsha flower, given by her friends in sportive jokes; and you have raised your arms against such a body; so fall on your head this arm of mine—resembling the missils of the Death-God!"

[*Mālatīmādhava*, Act V.]

To exemplify the mention of cause by a single word.—

"O ash anointments! may good befall thee! string beads! prosperity to thee! Ah! the series of stairs adorning the house of the husband of the Daughter of the Mountain! To-day I am taken in—to the extreme darkness of Beautitude—depriving me of the comfort (*lit.* 'light') of attending on you—by the propitiated Mahādēva."

Digitized by Google

In these three, the *non-obeisance in past and future births* (in the first Çloka) is the cause of the double fault; the *taking up of arms* (against Mālatī) is the cause of the *falling of the arm* (in the 2nd), and the *deprivation of the comfort-light* is the cause of *extreme darkness.*

(31) **Paryāyokta or Periphrasis.**

115 (*contd.*)—Periphrasis consists in the description (of an object expressed) without the relation of the expresser and the expressed.

[*Page* 744.] The description—*i. e.* the signification—through implication, (of objects really denoted or directly expressed) without (there being expressed) the relation of the expresser and the expressed—is called Periphrasis—*Paryāyokta* literally meaning the signification by means of a *paryayā, i. e.* a change of intonation, &c.

Example—

"यं प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः" ॥

["By looking on whom, intoxication renounced its long residence in the face of Airāvata, and self-respect that in Indra's heart."]

Here the implied meaning—that *Airāvata and Indra were respectively deprived of intoxication and self-respect*—is also directly expressed by words. Thus that which is directly expressed, is also the implied; but the manner of implication is different from that of expression. As for example, an ox being seen, there arises a qualified knowledge, 'The white ox moves'; here that only which is seen (*i. e.* गोत्व, the class 'ox' the cognition of which is unqualitative) is known qualitatively (*i. e.* made the object of qualified knowledge); but the manner of the two cognitions (qualified and unqualified) is not the same. Because that which was perceived (गोत्व, the object of unqualified cognition) was percieved without either distinction or commixture; whereas the qualified cognition is arrived at through differentiation and commixture.

Digitized by Google

(32) Sampat or The Exalted.

115 (*contd.*)—[*Page* 747.] **The Exalted consists in the (description of the) prosperity of objects.**

Prosperity, i. e. the connection with prosperity—*e. g.*

"The pearls dropping from necklaces snapped in dalliance, are picked up by sweepers. In the morning are the pearls seen in the yards, coloured with the *alakta* paintings of the feet of lascivious women; and these pearls (being thus reddened) are taken up by sportive parrots, who mistake them for pomegranate-seeds—all these occurring in the house of learned men are, O Bhoja! the results of your munificience."

115 (*concld*)—[*Page* 748.] **And it *(Exalted)* is the attachment of prominence to the great.**

उपलक्षण—means the attachment of prominence,—that is to say, in the object to be described.

Example—

"This is the forest, residing wherein Rāma addicted to obeying Daçaratha, helped by his arms alone, exterminated the Rākshasas."

[*Page* 749.] Here we have not the heroic *Rasa;* since it is subordinated to the description of the magnificence of the forest.

(33) Samuchchaya or Conjunction.

116 (*contd.*)—**The Conjunction consists in the mention of other causes, in a place where there is already a cause (sufficient to bring about the effect).**

Where there already being an establisher, others are mentioned, we have the *Conjunction.*

Example—

[*Page* 750.] "Irrepressible are Cupid's arrows; my beloved is at a distance; the heart is longing; the love deep; age young; life hard; family unstigmatised; feminineness contradictory to firmness; the season, the friend of Cupid; the Death-God incapacitated; the friends not clever enough; how is this strong pang of separation to be borne?"

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

चित्रमीमांसा, अप्पयदीक्षितकृता श्री ते॰ रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।=)॥

गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः ड)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम् .. .. ४)

मानवधर्म्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

भागवतधर्मदीपिका, ... १)

अमरकोशः सटीकः .. .. ४)

श्लोकवार्त्तिकम् .. .. २॥=)

द्वैतपदार्थनिर्वचनम् .. .. ३)

वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूरुशास्त्रि-
संशोधिता .. .. ५)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम् ५॥)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतश्रुतप्रकाशिकाविषमपदटिप्पणीसमेतः .. .. ७।)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः । .. .. २।)

स्नेहपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

स्नेहपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥)

शास्त्रदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥)

माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता, ... ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 393

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 409

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 425

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 441

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9.] September, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

मन्दं चिकीर्षोत्पत्त्यर्थमन्यच्च ज्ञानमपेक्ष्यते इह तु प्रयत्नस्य नित्यत्वेन चिकीर्षानिरपेक्षत्वात् किं ज्ञानेनेत्यपि सुवचत्वात् प्रयत्नस्य स्वतोविषयनियमाभावात्, ज्ञानविषयेण सविषयत्वं वक्तव्यमिति चेन्न उक्तोत्तरत्वात् न हि जीवनपूर्वकप्रयत्नस्य स्वाधारज्ञाननियतविषयत्वं, न च सर्वकार्यविषयस्य ईश्वरप्रयत्नस्य विषयनियामकापेक्षा, सत्यास्तु तस्यां सहकारिशक्तिभूतजीवादृष्टविशेषत एव प्रयत्नस्य नियतविषयत्वे संभवति सर्वविषयज्ञानेन प्रयत्नस्य विषयनियमकल्पनं बालिशकृत्यं विषयत्वमात्रञ्च न यावद्धीविषयत्वं नित्यानामपि निष्पाद्यत्वप्रसङ्गात् अशक्यविषयप्रयत्नवत्तया वा डिम्भादिकल्प ईश्वरः स्यात् । अथ स्वासाधारणधीविषयेणैव विषयवत्त्वं प्रयत्नस्येति मन्येत तदपि न धिय इव प्रयत्नस्यापि नियामकनिरपेक्षविषयत्वोपपत्तेः, अन्यथा कल्पनागौरवात् स्वतस्सविषयत्वे ज्ञानत्वप्रसङ्ग इति चेन्न धियोऽपि तन्नियामकत्वाभावात्, न च स्वाधारधीविषयस्य सर्वस्य प्रयत्नविषयत्वमिति मन्यसे साङ्कर्येऽप्यवान्तरलक्षणेन भेदोपपत्तेः अन्यथाऽतिप्रसङ्गात् । किञ्च सामग्रीनियतविषये निरीश्वरज्ञानेच्छाप्रद्वेषैर्हा ईश्वरज्ञानं त्वयाप्यसिद्धं यदि च यथादृष्टप्रकारानादरेण बुद्धियत्नयोर्हेतुनिरपेक्षत्वं कल्प्यते तथा यत्नस्य बुद्धिनिरपेक्षविषयत्वमदृष्टमभिमन्यताम् अविशेषाल्लाघवाच्च एवं बुद्धिमात्रमवलम्ब्य प्रयत्नपरित्यागप्रतिबन्दिरपि प्रयोक्तव्या ईश्वर इच्छात्यन्ताभाववान् कर्मषट्कव्यतिरिक्तत्वात् घटादिवदित्यादिषु च तादृशप्रयोगः प्रतिप्रयोक्तव्यः धर्मिसिद्ध्यसिद्ध्यादिविकल्पेन दूषणजातञ्च दुस्तरमिति यथाश्रुतिबलादीश्वरज्ञानप्रयत्नस्थापनं शक्यते । श्रुत्येति । तथा सोऽकामयतेत्यादिश्रुतिबलात्तदिच्छाऽपि स्वीक्रियतामित्याह । गम्यतामिति । नन्ववाप्तकामत्वपूर्णत्वादिश्रुतिस्मृतिघटितेरिच्छाराहित्यमीश्वरस्य वि-

Digitized by Google

घ्येदित्यत्राह । निर्वाह्यमिति । तुशब्दः शङ्कानिवृत्त्यर्थः, अयं भावः आप्त-कामशब्दस्तावदीशितुरैश्वर्याभावमिच्छाराहित्यं वा न ब्रूते अत्र काम-शब्दस्य काम्यपरत्वे कामनापरत्वे वा तत्प्राप्तिवचनतस्तन्निषेधायो-गात् अत इष्टं सर्वमस्य प्राप्तमेव भवतीति तात्पर्यं ग्राह्यम् । अनि-त्यानां वा भोग्यानां प्राप्तत्वं प्रत्येतव्यम् । अत एव पूर्णशब्दोऽपि गुणा-दिपौष्कल्यमाह न तु भोक्तीं कामनां निरुन्ध्यात् विधिनिषेधविरोधश्च-मनङ्ग प्रागेव स्थापितं तदिह सर्वकार्यविषयाप्रतिहतानन्याधीनेच्छा-वानीश्वरः, जीवस्तु न तथा ईप्सितालाभजनितदुःखं च `बद्ध-स्यैव नित्यमुक्तेश्वरायोरन्तदलाभ एव नास्तीति नियमः ।

इतीश्वरस्येच्छावत्त्वसिद्धिः ॥ ७८ ॥

अथ प्रस्तुतानुबन्धं पण्डितम्मन्यप्रलपितं प्रदर्शयति स्वीकृत्येति ।

मू० स्वीकृत्येशानतत्त्वं कतिचन जहतस्तत्प्रसा-
दादिसाध्यं गङ्गाम्भःपञ्चगव्यप्रभृतिवदव-
दन् पावनत्वादि तस्य । तच्छ्रुत्यादिप्रतीपं
यदपि च फलदं दर्शितं निष्प्रसादं तच्चैतस्य
प्रसादादिति हि निजगदुर्दुर्मममर्मस्पृशि-
स्ताः ॥ ७९ ॥

टी० अयमत्राभिसन्धिः यद्यपि राजादिवत्कर्मवश्या देवताः कुप्यन्ति तुष्यन्ति च तथाऽपि न तथा परः पुरुषः निरपेक्षत्वात् सर्वभू-तसुहृत्त्वाच्च अतस्तस्मिन् प्रसादकोपव्यपदेशो भाक्तो तदुपचारापचा-रयत्तित ग्रत्रानुकूलप्रतिकूलसंपत्तिः पावनत्वं मोक्षप्रदत्वञ्च तस्य यस्य देवे परा भक्तिरित्यादिस्वारस्याद्गङ्गोदकादेरिव स्वविहितविषयानुग्रा-

Digitized by Google

नसामर्थ्यात्स्यादिति इमं पक्षं पचिततदुपपत्त्या प्रतिक्षिपति । तदिति । धातुः प्रसादान्मत्प्रसादादित्यादिश्रुतिरिह प्रख्यापिता अत्र च मुख्ये संभवति न गौणत्वकल्पना न्याय्या प्रशस्तवस्तुविषयतत्तत्कर्मशक्त्यैव फलसिद्धिरित्युक्तं प्रतिवक्ति । यद्यपीति । निष्प्रसादमराध्य प्रसादनिरपेक्षमित्यर्थः । यद्वा क्रियादिस्वरूपं स्वयमचेतनत्वात् प्रसादवन्निष्प्रसादं फलप्रदमिति उपलक्षणमेतत् निष्कोपमित्यपि ग्राह्यम् एतस्य सर्वकर्तुः सर्वसुहृद इति भावः । धर्ममर्मेक्षचित्ता इत्यत्र धर्माणां कारणभूतं कार्यभूतञ्च भगवत्कटाक्षणं स्वपीडायां धर्मपीडनात् धर्ममर्मत्वेनोपचरितं धर्मस्य यथा परप्रसादः कारणमेवमधर्मस्यापि तत्कोपः कारणं श्रूयते हि तस्य साध्वसाधुकर्मकारयितृत्वं, स्मर्यते च बहुशः ।

इतीश्वरस्य साध्यप्रसादादिमत्त्वम् ॥ ७९ ॥

एवं सकलफलप्रदस्य तत्त्वस्थानां स्वयंफलभूतस्य च परस्य प्रतिपादनेन श्रोतॄणामनुनिष्पन्नं फलविशेषमाह । अध्यन्तेति ॥

मू० अध्यन्तोदन्तचिन्ता सहचरणसहैरेभिरस्मिन् परस्मिन् भक्तिश्रद्धास्तिकत्वप्रभृतिगुणसिरावेदिभिस्तर्कशस्त्रैः । स्वार्थत्वस्वाश्रयत्वस्ववशयतनताद्यूहवर्गोपसर्गश्लिष्यताच्छेद्यपूर्वोत्तरसरयुगलस्यूततत्त्वस्थितीनाम् ॥ ८० ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापे नायकसरस्तृतीयः ।

टी० सर्वोत्तरयोस्सरयुगलयोः समर्थितानां चेतनाचेतनतत्त्वस्थितीनां यथासंभवं स्वशेषत्वं स्वाधारत्वं स्वाधीनव्यापारत्व-

Digitized by Google

चेतनान्तरशेषत्वादिकन्तु विवेकशून्या मन्यन्ते सोऽयमुपद्रवः सर्वशेषिणस्सर्वाधारस्य सर्वनियन्तुरीश्वरस्य प्रतिष्ठापकैः प्रमाणानुग्राहकैः प्रतिक्षिप्येतेति ॥ ८० ॥

इतीश्वरनिरूपणप्रयोजनविशेषः ।

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्य्यस्य कृतिषु सर्वार्थसिद्धौ तत्त्वमुक्ताकलापव्याख्यायां नायकसरस्तृतीयः ।

श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तगुरवे नमः ।

अथ चतुर्थोबुद्धिसर आरभ्यते ।

आत्मतत्त्वं परमपरञ्च निरूपितम् । अथ यथोद्देशलक्षणं तद्गुणभूता बुद्धिश्चिन्त्यते तत्र प्रथमं तत्स्वरूपस्य स्वतस्सिद्धिमाह । धीत्वादिति ।

मू० धीत्वाद्वेद्मीति सिद्धा स्वयमितरमतिर्बुद्धिलक्ष्मादिधीवद्यद्वा सर्वज्ञधीवन्न समतियुगवान्नापि चैकोनवेदी । नो चेद्धारा*मतौ सा प्रथममपि सती नावबुद्धेति धीः स्यात् स्वस्यां वृत्तेर्विरोधोऽप्युपशमनमियादुक्तदृष्टान्तनीत्या ॥ १ ॥

टी० इतरमतिः—विप्रतिपन्ना बुद्धिः, स्वयं सिद्धा—स्वगोचरज्ञाननिरपेक्षव्यवहारानुगुणेत्यर्थः, वेद्मीत्युपलम्भानुगुण्यप्रदर्शनमस्ति तावत्सर्वसिद्धान्तिनामिदमहं वेद्मीति कर्मकर्तृघटितक्रियाविशेषावभासः, सोऽयं पूर्वज्ञानगोचरेण मानसप्रत्यक्षेण प्राकट्यलिङ्गजनितेनानुमितिज्ञानेन वेति न केनचिद् दृष्टं तत्कल्पने तु गौरवं बुद्धिसामग्र्येवाच वोद्धृविशेषणत्वेन भातीति चेत् तदेतदनुमेयवादिनं प्रत्युत्तरं स्यात् । न तु प्रत्यक्षरूपां बुद्धिसिद्धिमिच्छन्तं प्रति प्रत्यक्षाप्रत्यक्षसमुदायरूपा च सामग्री न प्रत्यक्षा स्यात् न च प्रत्यक्षं किञ्चिदन्यद्वेद्मीत्यत्र वोद्धृ-

* धारावाहिकबुद्धाविति तदर्थः ।

Digitized by Google

विशेषणतया भाति अतो यद्येवं प्रत्यक्षं तदेव ज्ञानमिति धर्मसि-
द्धिः तथाऽप्यदृष्टचरं स्वयंप्रकाशत्वं न ज्ञाने कल्पयितुं शक्यं तथैव
तत्सिद्धौ न कल्प्यत्वमन्यच्च तत्सिद्धिरसिद्धा एवन्तर्हि युष्मदिष्टमपि
तच्चान्यत्र असिद्धं न तच्च कल्प्यमिति चेत्र प्राकट्यानुमेयत्वस्या-
न्यत्रासिद्धावपि मानसप्रत्यक्षत्वं सुखादिषु स्वात्मनि च सिद्धमिति चेन्न
सुखादीनि स्वात्मा च स्वयं भासन्ते मानसप्रत्यक्षतो वेति को विविङ्क्ते
अस्तु वा तत्र तत्सिद्धिः अस्मदिष्टमपि क्वचित्त्वयेष्टव्यमित्यभिप्राये-
णाह । बुद्धिलक्ष्मादिधीवदिति । बुद्धिलक्षणधीर्हि लक्ष्यभूतकृत्स्नबु-
द्धिव्याप्तसाधारणधर्मविषया तद्योगेन स्वात्मानमपि विषयीकरोति
बुद्धिरस्तीति च बुद्धिः स्वात्मना विषयिणी बुद्धित्वसामान्योपश्लेषस-
वेद्यव्यक्तिभावात् । न च तदाऽनुव्यवसायाद्यवकाशः शब्दशब्दादि-
वत् सामान्यतः स्वात्मप्रकाशने तन्निरपेक्षत्वात् बुद्धिव्यतिरिक्तत्वादि-
बुद्धयोऽप्येवं ग्राह्याः । दृष्टान्तान्तरमाह । यद्वा सर्वज्ञधीवदिति ।
सामान्यतो विशेषतो वा सार्वज्ञ्यमिच्छतान्तद्बुद्धिः स्वात्मानमपि
सर्वानुप्रविष्टं युगपदेव प्रकाशयति अन्यथाऽनवच्छिन्नसर्वशब्दप्रयोगा-
दिकमपि न स्यादिति भावः । यत्तु केश्चिदुक्तं सर्वज्ञबुद्ध्यादीनां
स्वसंवेद्यत्वमस्ति न तु स्वयं प्रकाशत्वमिति तत्तेभ्य एव रोचेत न
ह्यत्र स्वात्मानं प्रति कर्मकारकत्वं स्वबोद्धृत्वं वा विधातुं युक्तं न च
स्वगोचरधीनिरपेक्षव्यवहारानुगुण्यं निषेद्धुं शक्यम् । अथ केचिदूचुः
स्वेतराशेषगोचरज्ञानद्वयवत्तया सर्वज्ञत्वमीश्वरस्येति तद् दूषयति ।
न समतियुगवानिति । अयं भावः ईदृशज्ञानद्वयवानीश्वर इत्यत्र
न किञ्चित्प्रमाणं पश्यामः सर्वज्ञत्वान्यथाऽनुपपत्त्या तत्कल्पनमप्य-
युक्तं स्वपरनिर्वाहकसमाधिनाऽपि तदुपपत्तेः । यत्तु स्वयंप्रकाश-
त्वमसहमानैरेकोनसर्वज्ञत्वमीश्वरस्योक्तं तत्प्रतिक्षिपति । नापि

चेति । यदि स्वज्ञानमीश्वरो न जानाति तदाऽन्येषां हेतूनां तद्बुद्धिविषयभूतानामेव हेतुत्वं तद्बुद्धेस्तु तदविषयभूताया इति विभागः स्यात् तथाऽन्येषां स्वगोचरधीविषयतमेव प्रकाशमानत्वं तस्यास्तु तन्निरपेक्षमिति किन्न विभज्येत अपि च स्वज्ञानमजानता सर्वज्ञेन स्वस्य तदाधारत्वमन्येषान्तदनाधारत्वं तद्विषयत्वतद-न्यत्वादीनि स्वज्ञानविशेषणानि सर्वाणि दुर्ग्रहाणि स्युः । ततश्चानन्तज्ञानवत्त्वमिवानन्ताज्ञानवत्त्वमपि तस्य स्यात् तथा च जीवप्रायत्वे तैरेवालमायोजनहेतुश्च भग्नव्याप्तिकः अचेतनाऽपि हि तद्बुद्धिर्न चेतनायोजिता प्रवर्तते ततश्चादृष्टादेरपि तथात्वं लाघ-वादेष्टव्यम् अस्मिंश्च पक्षे सर्वज्ञत्वश्रुतिर्बाध्येत भवताञ्च सर्वज्ञ-पूर्वकत्वं साधयन्नवीतहेतुरलब्धविषयस्यादिति भावः । स्वयंप्र-काशत्वानभ्युपगमे अनिष्टप्रसङ्गमाह । नो चेदिति । क्वचित्क्वचिद्विषये कदाचिद्धारावाहिकबुद्धिस्सर्वसम्मता सा च पश्चादियन्तं कालमि-मर्थमद्राक्षमिति परामृश्यते न चान्यतः पूर्वं तद्ग्रहसंभवः धारा-विच्छेदप्रसङ्गात् अतोधारावाहिकधीः पूर्वमनवबुद्धेति भानाभावाद-बुद्धेति परामर्शाच्चात्मनैव भातेति भाव्यते । ननु नाङ्गुल्यग्रं स्वात्मानं स्पृशति न कुठारः स्वात्मानं छिनत्ति न वह्निः स्वात्मानं दहति तद्वद्बुद्धेः स्वात्मनि वृत्तिविरोधात् न स्वयंप्रकाशत्वमित्यत्राह । स्वस्यामिति । उक्तदृष्टान्तनीत्या—स्वपरनिर्वाहकवर्गन्यायेनेति भावः । यथा चात्मा ग्राह्यश्च ग्राहकश्च यथा प्रत्यक्षविषयः स्वयं बोध्यः स्वगोचरबोधजनकश्च एवं यथादृष्टि सर्वमिति ॥ १ ॥

इति ज्ञानस्यास्वयंप्रकाशत्वे ।

अपरे तु बुद्धेः स्वयंप्रकाशत्वं चातुकामा वेद्यत्वमपह्नुवते तान् प्रत्याह । स्मृत्वेति ।

मू० स्मृत्या शब्दानुमानप्रभृतिभिरपि धीर्वेद्यते स्वप्रकाशा धीत्वादेस्तामवेद्यामनुपधि वदतः स्वोक्तिबाधादयः स्युः। वेद्यत्वे सा जडा स्यादिति च विहतिमद्व्याप्तिभङ्गश्च नो चेच्छिष्याचार्य्यादिसर्वव्यवहृतिविरहाज्जातमौनं जगत्स्यात् ॥ २ ॥

टी० अथ स्वप्रकाशेति सम्मतांशानुवादो वेद्यत्वविरोधाभावज्ञापनार्थः, स्मृतिस्तावदिह देवदत्तमद्राक्षमित्यादिषु दृष्टा, शब्दश्च बुद्धिपर्यायस्सर्वो बुद्धिं बोधयति परबुद्धयश्च प्रवृत्त्यादिभिरनुमीयन्ते स्वबुद्धिं च भविष्यन्तीमनुमाय शृणोति प्रभृतिशब्देन योगिप्रत्यक्षादिग्रहणं पराभिमतप्रमाणान्तरानुधावनं वा अथ परोक्तमवीतहेतुमपाकरोति। धीत्वादेरिति। आदिशब्देन स्वयंप्रकाशत्वधीशब्दवाच्यत्वादीनि गृह्यन्ते पुरुषभेदेन कालभेदेन च बुद्धेरवेद्यत्वमस्ति न तु सर्वैः सर्वदेत्यभिप्रायेणानुपधीत्युक्तम्, आदिशब्देन स्वबुद्धिबाधः स्वसिद्धान्तबाधश्च गृह्यते तत्र स्वोक्तिविरोधस्तावदनुभूतिः स्वयंप्रकाशा अनुभूतित्वादित्यादिभिर्धर्मिसाध्यहेत्वादिशब्दैरनुभूतिर्बोध्यते न वा आद्ये कथं न तद्बाधः। द्वितीये कथमयं प्रयोगस्त्वदिष्टं साधयेत् भ्रान्त्या बोध्यते न तु वस्तुत इति चेत्तर्हि भ्रान्तिसिद्धं बोध्यत्वमनुमतत्वान्न प्रतिषेध्यं वस्तुतस्तु बोध्यत्वं न क्वचित्सिद्धमिति तथापि न प्रतिषेध्यम्। अपि च तादृशस्य वेद्यत्वस्याभावस्सर्वत्र सुसिद्ध इति सपक्षे सति पक्षमात्रवर्ती हेतुरयं कथम*नाभासः एवं परबुद्धीरहमजानामीति स्वबुद्धिबाधः स्वान-

* कथं नाभास इति पा०।

रूपब्रह्मबोधनार्थं शास्त्रमिति स्वसिद्धान्तबाधश्च अथानुग्राहकमपि परप्रयुक्तं दूषयति । वेद्यत्व इति । वेद्यत्वे जडत्वप्रसङ्ग इतिवदता प्रसञ्जकप्रसञ्जनीयधर्मान्वितत्वेन शब्दवेद्यत्वं स्वीकृतं न वा पूर्वेण व्याघातः, उत्तरत्र वैयर्थ्यं किञ्चात्र प्रसज्यमानं जडत्वं वेद्यत्वमात्रं वा स्वगोचरवेदनेनैव सिद्धत्वं वा स्वयंप्रकाशत्वाभावो वा अविदितावस्थायोगो वा अन्यद्वा किञ्चिन्न प्रथमः इष्टप्रसङ्गरूपत्वात् प्रसञ्जकप्रसञ्जनीययोरविशेषाच्च । न द्वितीयः अवधारणव्यवच्छेद्यस्य स्वगोचरवेदननिरपेक्षसिद्धत्वस्यानुमानादिना समर्थ्यमानस्य स्वाश्रयवेद्यत्वसहदृष्ट्या प्रसङ्गस्य भग्नव्याप्तिकत्वात् अत एव न तृतीयः नामभेदमात्रत्वात् नापि चतुर्थः इष्टप्रसङ्गत्वात्, न हि बुद्धिर्विद्यमानावस्थायां स्वबुद्ध्यन्तरविदिता । अप्रकाशमानावस्थाप्रसङ्गे तात्पर्य्यमिति चेन्न सर्वेषां सर्वदा अप्रकाशमानत्वावस्थायास्त्वप्यन्तवादिनां घटादिष्वप्यसम्मतत्वात् कदाचित्कस्यचिदप्रकाशमानत्वस्य बुद्धावप्यस्माभिरभ्युपगमात् । नापि पञ्चमः बुद्धौ दृष्टस्य कस्यचिद्विरुद्धधर्मे प्रसज्यमाने पूर्ववद्व्याप्तिभङ्गादेव । अतथाभूतस्य तु यथासंभवमिष्टप्रसङ्गत्वाद्व्याप्तिरहितत्वाद्वेति । एवं परोक्तं प्रसङ्गं प्रतिक्षिप्य प्रतिप्रसङ्गमाह । नो चेदिति । न तावच्छिष्याचार्य्यौ परस्परबुद्ध्यनभिज्ञौ प्रश्नप्रतिवचनाद्यसंभवप्रसङ्गात्, एवं वादिप्रतिवादिप्रभृतयोऽपि मिथोबुद्धिमबुद्ध्यमाना न विवादादिकं कुर्य्युः तथा पामराणामपि संलापो न स्यादिति भावः । नन्वन्तःकरणवृत्तय एव परस्परं बुद्ध्यन्तां तत एव च सर्वो व्यवहारः स्यात्, न स्यात् बाह्यकरणव्यापाराणामिवान्तःकरणव्यापारस्यापि ज्ञानशब्दवाच्यत्वाभावाद्, भावे वा तदतिरिक्तचैतन्यस्वीकारायोगात् एतेन वृत्त्यवच्छिन्नचैतन्यम्मिथोवेद्यं न तु शुद्धमित्यादिकमपि दुराशामात्रम् ।

इति बुद्धेरवेद्यत्वभङ्गः ॥ २ ॥

Digitized by Google

कौमारिलास्तु कथयन्ति न स्वयंप्रकाशा नापि मानसप्रत्यक्षा बुद्धिः स्वफलेन तु विषयप्रकाशेनानुमीयत इति तदनुभाषते। बुद्धेरिति॥

मू० बुद्धेरर्थप्रकाशादनुमितिरिति चेत्तन्न साध्याविशेषात् साध्याद्भेदेऽपि बुद्धिर्यत उदयति ते स्यात्ततोऽर्थप्रकाशः। मध्ये बुद्धिः किमर्था ननु सममुभयोरप्यसाधारणत्वं ततसा नित्यानुमेया यदि फलति तदा बुद्धितत्त्वापलापः॥ ३॥

टी० बुद्धिलक्ष्मादिधीवदित्यादिना पूर्वोदाहृतं स्वप्रकाशत्वं दुस्त्यजमित्यभिप्रायेण प्रतिक्षिपति। तन्नेति। अर्थप्रकाशो बुद्धिरिति हि बुद्धिं लक्षयन्ति अतः कथं तेनैव लिङ्गेन तस्यैवानुमानमिति व्यञ्जयन्नाह। साध्याविशेषादिति। नन्वर्थगतः प्रकाशो लिङ्गं पुरुषगतः प्रकाशोऽनुमेय इत्यत्राह। साध्यादिति। अयं भावः पुरुषगतप्रकाशकल्पनेऽपि यद्यर्थगतप्रकाशमन्तरेण व्यवहारो न जायेत तदा बुद्धिजनकत्वेनाभिमतैव सामग्री लाघवादर्थगतप्रकाशस्याव्यवहितहेतुरिति कल्प्यतामिति। फलितमाह। मध्य इति। किमर्था न तावदर्थव्यवहारार्था नाप्यर्थप्रकाशार्था द्वयोरन्यथासिद्धेरिति भावः। प्रतिपुरुषनियतविशेषमन्तरेण कथमर्थप्रकाशः प्रतिपुरुषनियतो भवेदित्यत्राह। ननु सममिति। बुद्धेरिव बुद्धिसामग्र्या अपि तत्तत्पुरुषासाधारणत्वं त्वयापि स्वीकृतम्। अन्यथा कथमेकपुरुषमात्रनिष्ठबुद्धिजनकत्वमिति भावः। उक्तं निगमनेन व्यनक्ति। तदिति।

इति बुद्धेर्नित्यानुमेयत्वभङ्गः॥ ३॥

Digitized by Google

वैशेषिकादयो वदन्ति अनीश्वराणामात्मनामपरजन्यमेव ज्ञानं न तु स्वाभाविकमिति तन्निरासार्थमाह । ज्ञातुरिति ।

मू० ज्ञातुर्ज्ञप्तेरलोपं कथयति निगमः स्मर्यते चैवमेषा तस्मादेकत्वसिद्धौ प्रसरणभिदया तद्भिदैकत्र पुंसि । योग्यादृष्टेरभावान्न च भवति सुषुप्त्याद्यवस्थासु बाधस्तत्तद्वस्तुप्रकाशप्रणयविरहवती न प्रकाशेत बुद्धिः ॥ ४ ॥

टी० श्रूयते हि न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्यादि नेयं श्रुतिरीश्वरधीविषया प्रकरणविघट्यात् न धीप्रवाहाविच्छेदपरा सुषुप्त्यादौ तद्विच्छेदस्य युष्माभिरेवोक्तेः, न ज्ञानशक्तिनित्यत्वार्था मुख्ये सत्युपचारायोगात् नात्मस्वरूपनित्यत्वार्था व्यतिरेकोक्तेर्न चात्र सामानाधिकरण्यमात्मस्वरूपनित्यत्वस्थापने विशेषणैरपेक्ष्यात् । अथ स्वाभीष्टार्थस्य उपबृंहणसिद्धत्वमाह । स्मर्य्यत इति । एवं विपरिलोपरहितत्वेनेत्यर्थः । तदाह भगवान् शौनकः ।

यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतस्संभवः कुतः ।
तथा हेयगुणध्वंसादवबोधादयो गुणाः ॥
प्रकाश्यन्ते न जाय*न्ते नित्या
एवात्मनो हि ते ॥ इति ।

* न जन्यते इति पा० ।

एवन्तर्हि स्मृत्यनुभवरूपेण प्रत्यक्षपरोक्षभेदेन दर्शनश्रवणादिभेदेन पूर्वापरादिभेदेन च सर्वलोकविदितो धीभेदः कथन्निर्वाह्य इत्यत्राह । तस्मादिति । अत्र प्रज्ञा च तस्मात् प्रसृता पुराणी । तेनास्य चरति प्रज्ञा । आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणेत्यादिकमप्यभग्नस्वारस्यमिति भावः । पुरुषभेदेन नियतधीभेदस्य प्रकरणभेदोपाधिकत्वाभावादेकत्र पुंसीति नियमितम् । ननु सुषुप्त्यादिषु स्वतोऽन्यतो वा बुद्धेरुपलम्भासंभवान्नित्यत्वश्रुतिरादित्यो यूप इत्यादिवत् अपहृतविषया तत्राह । योग्यादृष्टेरिति । योग्यानुपलब्धेरभावादनुपलब्धिमात्रस्य बाधकत्वाच्च न तदानीन्तद्बाधः यूपद्रव्यस्य तच्छ्रुतेर्वा तपनतादात्म्यविरुद्धधर्मसहितं तत्तद्धर्मिग्राहकेण विद्रावितमिति भावः । कथमत्र योग्यादृष्टेरभाव इत्यत्राह । तत्तदिति । प्रकाशयोग्यदशायामप्रकाशे हि योग्यानुपलब्धिः स्यात् विषयप्रकाशरहितावस्थायां न बुद्धिरनन्याधीनप्रकाशा अतस्सुषुप्त्यादौ तस्याः स्वतःप्रकाशयोग्यत्वाभावान्न योग्यानुपलब्धिरिति ।

इति वैषयबुद्धेरपि स्वरूपनित्यत्वम् ॥ ४ ॥

यदाहुस्संविन्न नाना उत्पत्तिरहितत्वान्नाशरहितत्वाद्वा न यदेवं न तदेवं यथा घट इति, तदनुभाषते । उत्पत्त्यादेरिति ।

मू० उत्पत्त्यादेरभावान्न यदि दृशि भिदा नो
दशाभेददृष्टेर्दृष्टादृष्टव्यवस्था क्वचिदिह
पुरुषे बुद्ध्यवस्थाभिरेव । अज्ञानादेरनैका-
न्तिकमपि न च धीरात्मभेदेऽप्यभिन्ना
सत्यासत्यादिभेदः कथमिव घटते सर्वथैका
मतिश्चेत् ॥ ५ ॥

टी० अत्र परमार्थभेदो वा अपरमार्थभेदो वा प्रतिषिध्यते नाद्यः व्यतिरेकस्थाने घटादौ परमार्थभेदाभ्युपगमप्रसङ्गात् न द्वितीयः पक्षे परमार्थभेदाभ्युपगमप्रसङ्गात् तथा च किं नश्छिन्नं कल्पितभेदास्वीकारात् तन्निषेधे स्वमतविरोधश्च अत एव भेदमात्रप्रतिषेधप्रतिज्ञापि दुःशकेत्यभिप्रायेण प्रतिवक्ति । नो इति । बाधितत्वमाह । दशाभेददृष्टेरिति । उत्पत्तिनाशाद्यवस्थासंविदस्सर्वेलोकिकपरीक्षकसंदृष्टाः तत्प्रतिषेधस्तैरेव प्रतिषिद्धोतेति भावः । हेत्वसिद्धिमपि दर्शयन् दशाभेदं दर्शयति । दृष्टादृष्टेति । यदि त्वेकैव बुद्धिस्सर्वदा सर्वविषया किञ्चिन्मया दृश्यते नान्यत् दृष्टञ्च तत्तदिदानीं न दृश्यत इत्यादिप्रतीताप्रतीतव्यवहाराः प्रलुप्येरन् चिन्ताबुभुत्साप्रश्नोत्तरादयश्च न भवेयुरित्याशयः पुरुषभेदनियतबुद्धिभेदस्यावस्थाभेदप्रयुक्तत्वाभावात् क्वचिदिह पुरुष इति विशेषितं, किञ्चोत्पत्तिरहितः प्रागभावः त्वदिष्टं देवदत्तादिभेदप्रतिनियतप्रमानिवर्तनादिभावरूपं घटाद्यज्ञानञ्च त्वयैव भेदवत्तयाऽङ्गीक्रियते नाशरहितश्च घटपटादिप्रध्वंसो नानाभूतः अतस्तैस्त्वदुक्तमनुमानमनैकान्तिकमित्याह । अज्ञानादेरिति । उत्पत्तिनाशाभावद्वयसमुदायात्मा युगलहेतुर्नानैकान्तिक इति चेत्तदपि न अत्यन्ताभावैरुभयान्तरहितैः प्रतियोगिभेदेन नानाभूतैरनैकान्त्यस्य दुस्तरत्वात् तेषामुत्पत्त्यादिमत्त्वे प्रागूर्ध्वञ्च तदाश्रये प्रतियोगिप्रसङ्गेनात्यन्ताभावरूपताव्याघातात् न चेक एवात्यन्ताभावस्सर्वप्रतियोगिकः एकशून्यस्य सर्वशून्यत्वप्रसङ्गादिति भावः । प्रकारान्तरेणापि बाधं दर्शयति न चेति । अयं भावः अस्माभिस्तावन्नित्यसत्यश्चात्मभेदः स्वीकृतः युष्माभिरपि काल्पनिकः पक्षद्वयेऽपि जडपण्डितगुरुशिष्यादिव्यवस्था संविद्भेदमन्तरेण न संपद्येत ततश्च पुरुषभेदनियतबुद्धिभेदापह्नवस्सहृदयविसंवादीति हृदयमुक्तं विवृणोति ।

Digitized by Google

सत्त्वेति । यत्तु मायाकृतविच्छेदप्रत्ययाच्छिद्यन्ते चिदभिन्ना विविक्ताऽऽत्मभाव इति बाह्याद्वैतिभिरुक्तं तच यदि वैचित्र्यं सत्यम् ऐक्यव्याघातोऽपि दुर्वारः । अथ काल्पनिकं चरमद्वैतमतवदेव सर्वोपप्लवप्रसङ्ग इति सर्वदा विषयाश्रयस्वगतभेदविधूननेत्यर्थः ।

इति पारमार्थिकसंविद्भेदः ॥ ५ ॥

अन्यदपि संविदो निर्भेदत्वे निर्धर्मकत्वे च परोक्तं वीतमवीतञ्चानुमानमनुभाषते । भेदादिरिति ।

मू० भेदादिर्दृश्यभावान्न दृशि दृशितया दृश्यधर्म्मा न दृक् चेत् पूर्वस्मिन्नित्यताद्यैरनियतिविहती वाग्विरोधादि शेषे । बाधश्चात्र द्वयोस्स्यात् स्वमत इह च यैस्साध्यते ये च साध्या नैते मिथ्याविरोधान्न दृशिरपि मतेः स्यादभावोऽपि धर्मः ॥ ६ ॥

टी० आदिशब्देन जन्मादयः स्मृतित्वानुभूतित्वादयश्च गृह्यन्ते, विगीता धर्मा न संविदि वर्त्तन्ते दृश्यत्वात् रूपादिवदित्येकः, अनुभूतिधर्मरहिता अनुभूतित्वादित्यपरः, तत्राद्यं दूषयति । पूर्वस्मिन्निति । अयं भावः अत्र नित्यत्वस्वयंप्रकाशत्वादयो धर्माः स्वीक्रियन्ते न वा न चेत्तेषां दृश्यत्वेऽपि संविद्वृत्तित्वेन तैरनैकान्त्यं, स्वीकारे तु सौगतादीन् प्रति त्वयैव साध्यन्ते बाध्यन्ते चेति सिद्धान्तव्याघात इति । द्वितीममपि दूषयति । वाग्विरोधादीति । आदिशब्देनासिद्धिबाधसिद्धान्तविरोधसङ्ग्रहः । अत्रापि विकल्पतः प्रत्युक्तिः संविदि निर्द्धर्मकत्वं साधयता प्रयुज्यमानो हेतुसाध्यधर्मो तत्रान्वीयेते न वा पूर्वत्र स्ववाग्विरोधः, उत्तरत्र हेत्वनन्वयात् स्वरूपासि-

Digitized by Google

द्धिः साध्यानन्वयाद्बाधः स्वसिद्धान्तसिद्धयोरुभयोरपि प्रतिषेधादपसिद्धान्त इति । किञ्च ।

सत्यधर्मनिषेधे स्याद् घटादेस्सत्यधर्मता ।
सत्येतरनिषेधे तु दुस्तरं सिद्धसाधनम् ॥

बाधश्चेति प्रत्यक्षानुमानागमैरिति शेषः । पुनरपि द्वयोस्साधारणं दूषणं वक्तुं विकल्पालम्बनमनुवदति । स्वमत इति । युष्मत्सिद्धान्ते साधकत्वेन साध्यत्वेन च ये धर्मास्संगृहीताः ते दृशिस्वरूपादतिरिक्ताः, अनतिरिक्ता वा अतिरिक्तत्वपक्षे सत्या मिथ्या वा सत्यत्वे च तत्पक्षीकारबहिष्कारयोरुक्तमेव । दूषणं मिथ्यात्वं निषेधति । नेत इति । मिथ्यात्वे तद्विपरीतानित्यत्वजडत्वादिप्रसङ्गं सिद्धान्तविरोधञ्चाभिप्रेत्याह । विरोधादिति । अनतिरेकपक्षं प्रतिक्षिपति । न दृशिरिति । विरुद्धधर्माध्यासेन व्यतिरेकमभिप्रयन्नाह । अविमतेरिति । न ह्युभयाविगीतमनुभूतिस्वरूपं विगीतञ्च नित्यत्वादिकं न मिथोऽतिरिच्यतेति भावः । नन्वस्मिन् सिद्धान्ते साधकास्साध्याश्च सर्वे धर्मास्तत्तद्विरोध्यभावमात्ररूपाः अतो हेत्वादिसिद्धिर्निर्धर्मकत्वाविरोधश्चेति तत्राह । स्यादिति । अयं भावः अभावरूपा अपि हेतुसाध्यविशेषाः पक्षीकारबहिष्कारसत्यत्वमिथ्यात्वधर्म्यन्वयानन्वयविकल्पैर्यथोचितदूषणग्रस्तैः प्रत्युक्ता एवेति ।

इति संवित्सधर्मकत्वम् ॥ ६ ॥

प्रागुक्तं बुद्धेर्द्रव्यत्वं प्राप्तावसरे प्रतिष्ठापयति । बुद्धिर्द्रव्यमिति ।

मू० बुद्धिर्द्रव्यं विकारान्वयत इतरवद् बोद्धृवच्चाजडत्वात् संकोचादिप्रयोगा बहव इह तथा न ह्यमुख्या भवेयुः । एवं नास्या गुण-

Digitized by Google

त्वं गलति न खलु तत्तन्नसङ्केतसिद्धं लोके धर्मस्वभावो गुण इति विदितं सापि सिद्धा प्रभावत् ॥ ७ ॥

टी० समवायिकारणं द्रव्यमिति वदद्भिः परैरपि विकाराश्रयो द्रव्यमित्यङ्गीकृतम् अतो विकारान्वयत इति द्रव्यलक्षणयोगकथनम्, इतरवत्संप्रतिपन्नद्रव्यवदित्यर्थः । यान्यन्यानि द्रव्याणि तानि सर्वाणि यत्किञ्चिद्विकारवन्ति अतो द्रव्याभिव्याप्तलक्षणयोगात् द्रव्यत्वं युक्तमिति । न चात्र साध्याविशेषः द्रव्यशब्दवाच्यत्वसाधने तदभावात् व्यवहारव्यवस्थापकत्वञ्च लक्षणस्य परैरप्यङ्गीकृतम् । अनुमानान्तरमाह । बोद्धृवदिति । पुरुषस्य स्वयंप्रकाशत्वं प्रागेव श्रुतिभिः प्रदर्शितं बुद्धेरप्येतत्सरादौ स्थापितं, तदयं प्रयोगः बुद्धिर्द्रव्यं स्वयंप्रकाशत्वात् आत्मवदिति प्रथमस्यासिद्धिपरिहारं द्वितीयस्यानुग्राहकञ्चाभिप्रेत्याह । सङ्कोचादिति । सङ्कोचप्रयोगस्तावदावृतं ज्ञानमित्यादिना दर्शितः, आदिशब्देन प्रसरणादिसंग्रहः तत्प्रयोगश्च दर्शित एव, द्रव्यत्वे ह्येतेषामबाधान्मुख्यत्वमन्यथाश्रुतिस्मृतिसिद्धबहुप्रयोगमुख्यत्वभङ्गः स्यादिति भावः । ननु बुद्धेरात्मगुणत्वं बोद्धृसद्भावागमेषु सर्वेषु प्रसिद्धं गुणस्य चाद्रव्यत्वं रूपादिषु दृष्टं तदत्र धर्मिग्राहकबाधितमनुमानमित्यत्राह । एवमिति । द्रव्यत्वे सत्यपीत्यर्थः, कथन्तर्हि करचरणादिभिरद्रव्येष्वेव गुणत्वमवस्थापितमित्यत्राह । न खल्विति । अर्थशास्त्रेषु सन्धिविग्रहादयो गुणत्वेन गृह्यन्ते तद्वत्परोक्तमद्रव्यनियतं गुणत्वमिह न ब्रूम इत्यभिप्रायः । किन्निमित्तस्तर्हि बुद्धौ गुणशब्दप्रयोग इत्यत्राह । लोक इति । दासादयो हि गुणभूता उच्यन्ते दध्यादिद्रव्यविधानञ्च गुणविधिरिति व्यवह्रियते । ननु बुद्धिर्बोद्धृधर्मः, बोद्धा तु तदभिव्यक्तिस्थानं तत

Digitized by Google

'कुत्वं तु भवतीति'। 'क्षीबशब्द [1]एवोदाह्रियत इति'। कथं पुनरेकमेव त्रिषु विधिषूदाहरणमित्यत आह । 'तत्र ह्री[2]ति' तत्र क्त चित्यत्रे किञ्चित्प्रयोजनं प्रत्युदाहरणमित्याह । 'यदेति' । संज्ञायामिति वचनं तत्र संज्ञायामुपमानमित्यतः संज्ञायामित्यनुवृत्तेः । 'एष स्वर इति' । आद्युदात्तत्वं, क्षीबिक इति नोङ्गचः ष्ठन् । प्लुतसहितो विकारः, प्लुत विकारः । 'अग्ना[3] इ, पटा[3] उ इति '। अग्निपटुशब्दयोः संबुद्धिगुणे कृते एचो-ऽप्रगृह्यस्येत्यादिना पूर्वस्यार्धस्याकारः प्लुतः, उत्तरस्य त्विदुतौ । 'नित्यस्तु न प्राप्नोतीति' । पदान्ताद्वेति दीर्घलक्षणो विकल्पः स्यात्, छ इति किम् । अन्यत्र प्लुतविकारस्यासिद्धत्वमेव यथा स्यात्, खलपु ब्राह्मणकुलं, तत्र संबुद्धाविह किञ्चिल्लपो इति न्यायेन गुणे खलपो उ इति स्थिते ह्रस्वस्य पिति कृतीति तुक् न भवति, द्विविधं चात्रासिद्धत्वं बहिरङ्गलक्षणं पूर्वत्रासिद्धमिति च । 'किमर्थं पुनरिति' । सकारस्य क्वचिदपि श्रवणाभावात्प्रश्नः । 'उचिच्छिषतीति' । उच्छी विवासे, तुक्, सन्, इट्, अजादेर्द्वितीयस्येति छिस्शब्दस्य द्विर्वचनं, [3]शर्पूर्वाः खय इति खयः शेषः, छस्य अभ्यासे चर्त्वेति चकारः, संयन्तेत्यादौ मोनुस्वारः, अनुस्वारस्य ययि परसवर्णः । 'पदाधिकारश्चेदिति' । यदि लत्वादिविधिषु पदस्येत्यपेक्ष्यते तदा लत्वादीनां द्विर्वचनस्य च समकालत्वम्, अनपेक्षायां तु बहिरङ्गं द्विर्वचनमन्तरङ्गेषु लत्वादिष्वसिद्धमिति पूर्वत्रासिद्धमित्येतच्च प्रवर्त्तत इति लत्वादिषु कृतेषु द्विर्वचनमिति सिद्धमिष्टम् । 'गलोगल इति'। अचि विभाषेति लत्वम् । 'दोग्धेति' । वा द्रुहेति वा घत्वं, तदभावे हो ढः। 'नुत्त इति'। नुदविदेति वा निष्ठानत्वम् । 'अभिन इति' । भिदेर्लङ्, सिपि श्नमि हल्ङ्यादिलोपः सिपि धातोरुर्वा,दश्चेति वा रुत्वम् । अहागमः । 'मातुःष्वसेति' मातुःपितुर्भ्यामन्यतरस्यामिति वा षत्वम् । 'माषवापाणीति' । प्रातिपदिकान्तेति वा णत्वम् । 'वाङ्नयनमिति' ।

१ एवेति नास्ति मु॰ मूलपुस्तके ।
२ चेति मु॰ मू॰ पाठः ।
३ एतत्सूत्रस्थेन खर्पूर्वाः खय इति वार्तिकेनेति भावः ।

Digitized by Google

यरोऽनुनासिकेऽनुनासिको वेति वा गकारस्य ङकारः 'वाक्प्रपन्नमिति'। शश्छोऽटीति वा छत्वं, लत्वादीनामित्यादिना ऽसिद्धत्वे लत्वादीनां यो दोषस्तं दर्शयति। '[1]अनिष्टोऽपि विकल्पः स्यादिति'। पूर्वान्तरयोः पदयोरेकत्र प्रवृत्तिरपरत्राप्रवृत्तिरित्येवोऽनिष्टो विकल्पः। 'एतत्सर्वमित्यादि'। योगविभागार्थमेव च प्रतिषेधाश्रयणमन्यथा लाघवार्थमनुनेति निपातनमाश्रयणीयं स्यात्, ततो मु न इति द्वितीयो योगः, किमर्थमिदं, पूर्वयोगस्यासर्वविषयत्वख्यापनार्थं तेनातिप्रसङ्गो नोद्भावनीयः॥

"उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" ॥ उदात्तस्वरितयोरित्यनुवादेऽपि स्थानषष्ठ्येषा व्याख्यानात्, तेन उदात्तस्वरितयोः समीपवर्त्ती यो यण् ततः परस्यानुदात्तस्य स्वरितत्वं न भवति। 'सकृल्ल्व्याशा खलप्व्याशा इति'। 'ततः परस्य सप्तम्येकवचनस्य स्वरितत्वमिति'। केनेत्यत आह। 'उदात्त यण इत्यनेनेति'। योऽयमस्मिन्सूत्रे पूर्वो भागस्तेनेत्यर्थः। उदात्तयणो हल्पूर्वादित्युदात्तत्वं तु न भवति नोङ्धात्वोरिति प्रतिषेधात्, आशाशब्द आङ्पूर्वात् अश्नोतेः आशा वा दिगाख्या चेदिति अन्तोदात्तत्वादनुदात्तादिः। 'तत्कथमयं स्वरितयण् भवतीति'। न कथं चित्, नह्ययं स्वरितमपनीय तत्स्थाने भवति, नहि पूर्वं शास्त्रं स्थानि बुद्ध्या आदेशे प्रवर्तते, किं तर्हि स्थानिन्येव, यथोक्तं इत इत्येतद्विरुच्यत इति, न पुनस्तद्बुद्ध्या ठशब्दो द्विरुच्यत इति। 'आश्रयादिति'। आह्वायं स्वरितयण इति न चास्ति सिद्धः स्वरितस्तदाश्रयात् सिद्धत्वं भविष्यति। एवमुच्यमाने ऽतिप्रसङ्गमुद्भावयति। 'यद्येवमिति'। 'दध्याशेति'। दधिशब्दो नब्विषयस्यानिसन्तस्येत्याद्युदात्तः, शेषनिघातः, उदात्तादनुदात्तस्य स्वरित इति तस्य स्वरितत्वं तस्याश्रयात्सिद्धत्वे सति तत्स्थानिकादपि यणः परस्यानुदात्तस्य स्वरितत्वप्रसङ्ग इत्यर्थः। 'तस्मादित्यादि'। यत एवमाश्रयात्सिद्धत्वे दोषस्तस्मादयमेव यण् स्वरो यथा सिद्धो भवति तथा वक्तव्यं, तत्कथं, योगविभागः करिष्यते उदात्तयणः, उदात्तयणः परस्यानुदात्तस्य स्वरितो भवति, ततः स्वरितयणः, स्वरितयणश्च परस्यानुदात्तस्य स्वरितो भवति, उदात्तयण इत्येव, तेन

1 अयं पाठो मुद्रितमूल पु० नास्ति।

Digitized by Google

उदात्तयण इत्येवं योऽभिनिर्वृत्तः स्वरितस्तद्यणः परस्यानुदात्तस्य स्वरितत्वं भवतीत्यर्थः, तेनास्यैव स्वरितस्याप्यसिद्धत्वं भविष्यति । एवमित्यादिना योऽतिप्रसङ्ग उद्भावितस्तं केषांचिन्मतेन परिहरति । 'के चिदिति'। 'उदात्तात्स्वरितयणो यौति'। उदात्तात्परो यः स्वरितः उदात्तादनुदात्तस्येति विहितः तस्य यो यण् तस्मादपि परस्येत्यर्थः । 'तैत्तिरीयकइति'। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयास्तेषामाम्नायस्तैत्तिरीयकं, चरणलक्षणो वुञ् । 'शाखान्तर इति'। वृत्तिकारदेशे या शाखा तदपेक्षं शाखान्तरत्वम् । एकशतं ह्यध्वर्युशाखाः, विशेषवचनो वान्तरशब्दः । 'यास्ते विश्वा इति'। यद्वृत्तान्नित्यमिति प्रतीत्यस्य निघातप्रतिषेधः, पदेशब्दस्यामन्त्रितनिघातः । 'आह्नश्च इति'। तत्रैव तैत्तिरीयके दधिशब्द उदात्तस्वरः, आशयतीत्यस्य तिङ्निघातः । ननु चोभयथाप्यत्र यथादेशे कृते उदात्तादनुदात्तस्य स्वरित इत्येव स्वरितः, तथा च यत्र स प्रतिषिध्यते सोदात्तस्वरितोदयमिति तत्र स्वरितो न दृश्यते च, स्वस्मिन्नपर प्रत्यभिज्ञानाभावप्रसङ्गादिति, अयं तु स्वरित उदात्तस्वरितपरस्याऽपि भवति, दध्याशो रक्षः पाह्यस्मानिति, तथा च भाष्येऽनुदात्तपर एवानुदात्तेति प्रसङ्ग उद्भावितो दध्याशेति, तस्मात् पूर्वोक्तस्यातिप्रसङ्गस्य नायं परिहार इति चिन्त्यमेतत्, निराकरिष्यमाणत्वाच्चास्य नाति सुष्ठु निर्बन्धनीयं[4] दर्शयति । 'यथा क्रियेति'। अत्र वार्त्तिकं यणः स्वरो यणादेशे सिद्धो वक्तव्यः, स्वरितयणः स्वरितार्थः आगमात्सिद्धत्वमिति चेदुदात्तात् स्वरिते दोष इति, यदि चोदात्तादनुदात्तस्य स्वरित इति यः स्वरितः तस्य यो यण् ततः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्यात् दोषत्वेन वचनमनुपपन्नं स्यात् । भाष्ये तु यथावदर्थं विवृत्य दर्शयति । 'तथा चेति'। अत्र भाष्यम् । यदि वा स्वरितग्रहणं न करिष्यते, यदि न क्रियते केनेदानीं स्वरितयणः परस्यानुदात्तस्य स्वरितत्वं भवति, उदात्तयण इत्येव, स्वरितयणा व्यवहितत्वान्न प्राप्नोति, स्वरविधौ व्यञ्जनमविद्यमानवदिति नास्ति व्यवधानमिति, यदि वा

४ निबन्धः कर्तव्यइति पं० पु० पा० ।

Digitized by Google

दात्तात् स्वरितयणः परस्यानुदात्तस्य स्वरितत्वमिष्टं स्यात् प्रत्याख्यानं न युज्येत, यदि प्रत्याख्यानं किमर्थं तर्हि स्वरितयण्ग्रहणं क्रियत इत्याह । 'तत्क्रियत इति' । 'स्थानिवद्भावाद्व्यवधानमस्तीति' । यण्स्थानिकेने-कारेण, व्यञ्जनस्य ह्यविद्यमानवद्भावो नाचः । ननु च नपादान्तद्विर्वचनेति स्वरविधौ प्रतिषिद्धः स्थानिवद्भावस्तत्राह । 'स्वरदीर्घेति' । 'वैव्याश्वेति' । विदस्या पत्यं स्त्री अनृष्यानन्तर्ये बिदादिभ्यो ऽञ्, शार्ङ्गरवाद्यञो ङीन्, नित्स्वरेणाद्युदात्तो वैदीशब्दः ॥

"एकादेश उदात्तेनोदात्तः" ॥ अनुदात्तस्येति वर्तते, अन्यादिश-ब्दाः प्रातिपदिकस्वरेणान्तोदात्ताः, विभक्तिरनुदात्ता । 'पचन्तीति' । अत्र शबकारस्य यत्स्वरितत्वमुदात्तादनुदात्तस्य स्वरित इति तस्यासि-द्धत्वाद् द्वयोरनुदात्तयोरेकादेशः ॥

"स्वरितो वानुदात्ते पदादौ" ॥ 'प्रादित्वात्समासे सतीति' । प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेध इत्यस्य तु तत्रैव स्वती पूजायामिति प्रतिषेधः कृतः, गतिसमासस्त्वनाश्रितः, गतिर्गताविति निघातप्रसङ्गात्, वसुकशब्दः पूर्ववदन्तोदात्तः । 'स्वरितग्रहणं विस्पष्टार्थमिति' । कथ-मित्याह । 'उदात्ते ही ति' । 'आन्तर्यत एव स्वरितो भविष्यतीति' । यद्येवं तस्य सिद्धत्वाच्छेषनिघातः स्यात्, गाङ्गनूप इति, एकादेशस्य परं प्रत्यादिवद्भावादनूपशब्दो ऽनुदात्तः प्राप्नोति स्वरितग्रहणे तु सति अस्यासिद्धत्वादयोक्तदोषाभावः, अथ क्रियमाणेऽपि स्वरितग्रहणे यः सिद्धः स्वरितः तेन वर्ज्यमानता कस्मान्न भवति कन्यानूप इति, कन्याशब्दः कन्याराजन्यमनुष्याणामन्त इत्यन्तस्वरितः, ततः स्वरितानु-दात्तयोरेकादेश आन्तर्यतः स्वरितस्तस्य सिद्धत्वात्तेन वर्ज्यमानता प्राप्नोति, ततश्चात्र यः परिहारः स एव गाङ्गनूप इत्यत्र भविष्यति, कः पुनरसौ पदद्वयाश्रयत्वेन एकादेशस्य बहिरङ्गत्वात्स्वरोऽपि तदीयो बहिरङ्गः शेषनिघातस्तु एकपदाश्रयत्वात्स्वरोऽपि तदीयोऽन्तरङ्गः, ततः किमसिद्धं बहिरङ्गमन्तरङ्गे ॥

१ स्वरितस्येत्यधिकम् इं० पु० ।

"नलोपः प्रातिपदिकान्तस्य" ॥

विशेष्यमन्तस्येत्यस्य नेत्येतदविभक्तिकम् ।
तथैव प्रातिपदिकेत्येतत्पदविशेषणम् ॥

प्रातिपदिकस्य पदस्येति समानाधिकरणे षष्ठ्यौ । 'अहन्निति' । हन्तेर्लङ्तिपो हल्ङ्यादिलोपः । 'अन्तग्रहणं किमिति' । नलोपः प्रातिपदिकस्येत्येवास्तु पदस्येति वर्तते, तत्र नकारेण पदे विशेष्यमाणे तदन्तविधिना नकारान्तस्य पदस्य लोपो विधीयमानो ऽलोन्त्यस्येत्यन्त्यस्यैव भविष्यतीति प्रश्नः । 'राजानावि[1]ति' । असत्यन्तग्रहणे प्रातिपदिकस्य पदस्य यो ऽवयवो नकारः तस्य यत्र तत्र स्थितस्य लोपो भवतीत्यर्थः स्यात्, ततश्चेहापि स्यादिति भावः, एवं च नराभ्यामित्यादावपि प्रसङ्गो दर्शयितव्यः । ननु च क्रियमाणमप्यन्तग्रहणं प्रातिपदिकग्रहणेन समस्तं ततश्च प्रातिपदिकान्तस्य पदावयवस्य नकारस्येत्येषो ऽर्थो भवति, न पुनः पदान्तस्येति, ततश्चाहन्नराभ्यामित्यादौ माभूत् राजानावि[2]त्यादौ तु स्यादेवात आह । 'प्रातिपदिकग्रहणमिति' । 'अहरिति' । स्वमोर्नपुंसकादिति स्वमोर्लुक्, नलुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधात्सुप्परत्वाभावात् रो ऽसुपीति रत्वम् । 'अहोभ्यामिति' । अहन्निति रुत्वं, ननु चात्र रत्वरुत्वयोः कृतयोर्नकाराभावादेव नलोपो न भविष्यत्यत आह । 'रुत्वरेफयोरसिद्धत्वादिति' । नन्वनवकाशत्वाद्रुत्वरत्वे एव भविष्यतः, उक्तं ह्य[3]पवादस्य परस्यापि वचनप्रामाण्यादसिद्धत्वं न भवतीत्यत आह । 'सावकाशं वै तदुभयमिति' । संबुद्धौ हि न ङिसंबुद्ध्योरिति नलोपः प्रतिषिध्यते । 'हे अहरिति' । वा नपुंसकानामिति पक्षे नलोपप्रतिषेधः, अत्र रत्वं सावकाशम् । 'हे दीर्घाहो निदाघेति' । पुल्लिङ्गे ऽन्यपदार्थे बहुव्रीहिः, संबुद्धौ हल्ङ्यादिलोपः, निदाघशब्दस्य परस्य प्रयोगो विशेषणार्थः, हशि चेत्युत्वम्, अथ अहः अहोभ्या

१ राजान इत्यधिकम् इं· पु· ।
२ राजान इत्यधिकम् इं· पु· ।
३ तत्रेत्याधिकम् इं· पु· ।

Digitized by Google

मित्यादौ नलोपे कृते ऽप्येकदेशविकृतस्यानन्यत्वात्स्य एवाहःशब्द इत्य वशिष्टस्य योऽन्त्याकारः सो ऽवकाश इति कस्मान्नोक्तम् एवं मन्यते महन्निति नकारापरित्यागेन निर्देशान्नकारान्तस्यैव स्थानित्वम् अन्यथा हस्येत्येव ब्रूयादिति । ‘अहन्निति प्रथमैकवचनान्तमिति’ । आदेश-मात्रे विधित्सिते अह्न इति नकारान्तस्येव षष्ठ्या निर्देशं कुर्यात् प्रथ-मान्तस्य निर्देशे प्रयोजनमेतस्य रूपस्यान्वाख्यानमेवेति भावः ॥

“न ङिसंबुद्ध्योः” । ‘आर्द्रे चर्मन्निति’ । सुपां सुलुगित्यादिना ङेर्लुक्, ननु च ङिसंबुद्ध्योर्द्वयोरपि लुप्तयोः पूर्वस्य प्रातिपदिकसंज्ञा नास्ति प्रत्ययलक्षणेनाप्रत्यय इति निषेधात्, ङौ तु पदसंज्ञापि नास्ति प्रत्ययल-क्षणेनैव प्रवृत्तया भसंज्ञया बाधित्वात्कुतो ऽत्र नलोपप्रसङ्गो ऽत आह । ‘एतस्मादेवेति’ । ननु च हे सुराजन्नित्यादावर्थमेतत्स्यादत्र हि कृत्तद्धितस-मासाश्चेति प्रातिपदिकसंज्ञा, न च तस्या अपि अप्रत्यय इति निषेधः, सूत्रान्तरगतत्वात्, एवं तर्ह्य[1]चाप्यप्रत्यय इत्यनुवर्तते अन्यथा सुराजेत्यादौ विध्यर्थत्वसंभवात्समासग्रहणं नियमार्थं न स्यात्, तस्मादुपपन्नमेवास्य ज्ञा-पकत्वम्, एतच्च प्रतिकार्यं संज्ञाप्रवृत्तिरिति पक्षाश्रयेणोच्यते, तत्र हि विभ-क्त्यर्थमुत्पन्नया प्रातिपदिकसंज्ञया नलोपो न प्राप्नोति । ‘भसंज्ञा च न भवतीति’ । अथाप्येतस्मादेव प्रतिषेधवचनात्प्रत्ययलक्षणेन ज्ञाप्यत इति च संबध्यते, ज्ञापनस्य प्रयोजनमाह । ‘तथा चेति’ । ‘नलोपश्च भवती-ति’ । प्रातिपदिकत्वात् । ‘अल्लोपश्च न भवती ति’ । भसंज्ञाया अभावात् । अपर आह नायमर्थो ज्ञापकसाध्यः भसंज्ञा न भवतीति । कथं, यचीत्युच्यते, न चात्र यजादिं पश्यामः, प्रत्ययलक्षणेन, न लुमता-ङ्गस्येति प्रतिषेधः, तत्र हि लुमता लुप्ते प्रत्यये यदङ्गं तस्य यत्कार्यमा-ङ्गमनाङ्गं वा तत्सर्वं प्रतिषिध्यत इति । ‘चर्मतिल इति’ । वैयधिक-रण्येऽपि गमकत्वाद्बहुव्रीहिः, ननु वात्यल्पमिदमुच्यते ङाविति संबुद्धाव-प्युत्तरपदे प्रतिषेधो वक्तव्यः, अन्यथा हे राजन् वृन्दारकेति विगृह्य वृन्दारकनागकुञ्जरैः पूज्यमानमिति संबुध्यन्तयोः समासे सति लोपो

१ तर्हि तत्रेति पा॰ २ पु॰ ।

न स्यात्, तथा च वार्तिकं, ङिसंबुद्ध्योरनुत्तरपदइति अत आह। 'हे राजवृन्दारकेत्यत्र त्विति'। 'तच्च न पूर्वपदार्थसंबोधनमिति'। नहि पृथगवयवार्थयोरभिमुखीकरणे परस्परमेकार्थीभावः संभवति, किञ्च संबुद्धावित्युच्यते न चात्र संबुद्धिं पश्यामः, प्रत्ययलक्षणेन, न लुमताङ्गस्येति प्रतिषेधः, वचनं तु हे राजन्नित्यादौ यत्र लोपशब्देन संबुद्धिर्लुप्यते तत्र चरितार्थं, ङौ तु नायं परिहारः संभवति, सर्वत्र लुमता लुप्तत्वात्। 'वा नपुंसकानामिति'। अप्राप्तविभाषेयं, संबुद्धेर्लुमता लुप्तत्वात्॥

"मादुपधायाश्च मतोर्वोऽयवादिभ्यः"॥ अत्र चकाराद्वाक्यभेदः, मश्च अश्चेति समाहारद्वन्द्वः तस्मान्मात्परस्य मतोर्वो भवति, उपधायाश्च, मादित्येव, उपधायाश्च मात्परस्य मतोर्वो भवति, पूर्वयानन्तर्ये विहितं व्यवधानेऽपि यथा स्यादित्ययमारम्भः, एवं व्याख्यातव्ये मतोरिह कार्यित्वेनेत्यादि यदुक्तं तत्राभिप्रायो मृग्यः, कश्चिदाह, मकारान्तान्मकारोपधादवर्णान्तादवर्णोपधाच्चेति, वैयाकरणगोष्ठीषु पठ्यते तस्येदमुपपादनमिति तत्रापि मकारोपधादकारोपधादिति बहुव्रीह्यर्थस्य नोपपादनं दृश्यते। 'व इत्ययमादेशो भवतीति'। अत्रेति शब्दः पठितव्यः, तदयमर्थो भवतीत्युपक्रमात्। यवादिविप्रतिषेधे प्रकारे आदिशब्दः। 'पयस्वानिति'। तसौ मत्वर्थ इति भत्वात्पदत्वाभावः, इह नरोऽस्यास्तीति नृमान्, तस्येदं नार्मतमिति वृद्धौ कृतायामवर्णोपधादिति वत्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्य इत्यत आह। 'इहेति'। बहिर्भूततद्धितापेक्षत्वाद्बहिरङ्गा वृद्धिरन्तर्भूतमतुबपेक्षे वत्वे असिद्धा भवतीत्यर्थः॥

"झयः"॥ 'अग्निचित्वानिति'। पूर्ववद्भत्वाज्जश्त्वाभावः॥

"संज्ञायाम्"॥ अहीवतीत्यादौ चातुरर्थिको नद्यां मतुप्॥

"आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती"॥ 'आसन्दीवदहिस्थलमिति,' देशविशेषः, यत्रेदमुच्यते॥

---

१ तत्रेति नास्ति मु॰ मूलपुस्तके।

Digitized by Google

आसन्दीवति धान्यादं रुक्मियं हरितस्रजम् ।
अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजयः ॥

इति । 'तथाचोक्तमिति' ॥ प्रयोगशास्त्रेषु, राजासन्दी सोमराजस्यासनं, यदि तस्यैव संज्ञायामिति वत्वेन सिद्धम् आसंदीवदित्येतत्किमर्थं तर्हि निपातनमित्यत आह । 'अपस्त्वार्थं त्विह पठ्यतइति' । अचेतिशब्दः पठितव्यः, अपरे त्वाहुरित्युपक्रमात् । 'शरीरैकदेशस्येति' । स पुनर्जान्वोः सन्धिः । 'चक्रीवन्ति सदो हविर्धानानीति' । सारस्वते सत्त्रे बहूनि सदो हविर्धानानि, न त्वेकत्रावस्थितानि तानि तत्र तत्र कर्मार्थाय चक्रयुक्तानि भवन्ति । 'कक्षीवानिति' । हल इति दीर्घत्वम् । 'रुमण्विति प्रकृत्यन्तरमस्तीति' । रुमा च लवणाकरः । 'णत्वार्थं चेति' । पदान्तस्येति प्रतिषेधप्रसङ्गात् । 'मतोर्वा नुडर्थमिति' । अत्र पक्षे पूर्वस्य मकारस्य लोपः, णत्वमपि रषाभ्यामित्येव सिद्धम् ॥

"उदन्वानुदधौ च" ॥ 'उदन्वान्नाम ऋषिरिति' । यस्य च कामवर्षी पर्जन्यः, यस्मिन्नुदकं धीयतइति स पुनस्तटाकादिः, कर्मण्यधिकरणे चेति कि प्रत्ययः, पेषंवासवाहनधिषु चेति उदकस्योदूभावः । 'उदकसत्तासंबन्धसामान्यमिति' । तच्च देवदत्तादिष्वपि संभवति, असंज्ञार्थे वोदधिग्रहणम् ॥

"राजन्वान् सौराज्ये" ॥ शोभनो राजा तस्य भावः सौराज्यं, ब्राह्मणादित्वात्ष्यञ्, टिलोपः, तत्पुनः शोभनेन राज्ञा देशस्य संबन्धः, समासकृत्तद्धितेषु संबन्धाभिधानं भावप्रत्ययेनेति वचनात्, एतच्च राजन्वानित्यस्य प्रवृत्तिनिमित्तं देश एव त्वभिधेयः, यदाह । 'सौराज्ये गम्यमानइति' । 'राजन्वानिति' । प्रशंसायां मतुप्, नलोपाभावो निपात्यते, सूत्रे पुल्लिङ्गस्याविवक्षितत्वं दर्शयति । 'राजन्वती पृथिवीति' ॥

"अनो नुट्" ॥ 'अक्षण्वन्त इति' । अक्षिशब्दस्य मतुपि छन्दस्यपि दृश्यतइति अनङादेशः, नुटो ऽसिद्धत्वात् पूर्वं नलोपे भूतपूर्वगत्या नुट्, तस्य णत्वम् । 'शीर्षण्वतीति' । शीर्षं श्छन्दसि शिरसः

शिर्षन् आदेशः। प्रकृत्यन्तरं वा शिरस्शब्देन समानार्थः। शिर्षेविति छन्दसि निपात्यते। नुडयं परादिः क्रियते तस्य मतुब्ग्रहणेन ग्रहणान्मादु-पधाया इति वत्वं प्राप्नोति, मकारस्य तु न प्राप्नोति, नुटा व्यवधानात्, यदि पुनरयं नुक् पूर्वान्तः क्रियते, नैवं शक्यम्, अत्तवता शीर्षवता वत्वं न स्यात्, इह च सुपथिन्तरः, उत्तरसूत्रेण नुकि कृते पदान्तत्वाच्च शुक्ण्मग्रयानिति हत्वं प्राप्नोति तस्मात्परादिरेव कर्त्तव्यः, सच चोक्तो दोषो ऽत आह। 'नुटो सिद्धत्वादिति'। नन्वेवमप्यवग्रहे दोषः प्राप्नोति अक्षण्वन्त इत्यत्तवन्ते इति ग्रान्तमवगृह्णाति तत्र प्राप्नोति, न लक्षणेनपदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम् ॥

"नाद्धस्य" ॥ 'भूरिदावत्तर इति'। आतो मनिनित्यादिना वनिप्। 'रथीतर इति' रथशब्दान्मत्वर्थीय इनिः, तदन्तात्तरप्, नकार-लोपे कृते दकारस्य ईकारः, यदि तु नकारलोपापवादो नकारस्य स्थाने विधीयेत तदा तस्यासिद्धत्वादेकादेशो न स्यात् ॥

"कृपो रो लः" ॥ कृपो धातोरिति पाठः। भाष्ये कृपो रो ल इति पठितत्वात्, नुड्विधिलादेशविनामेष्वृकारे प्रतिविधातव्यमित्युक्तं, तत्रावसरे प्राप्ते लादेशे प्रतिविधत्ते। '[1]इति सामान्यमिति'। वर्णत्वावर्णत्वकृतभेद-तिरस्कारेण वर्णात्मिकायामवर्णात्मिकायां च रेफव्यक्तौ यत्सामान्यं वर्त्तते यतो द्वयोरपि तयोर इत्यभिन्नाभिधानप्रत्ययौ भवतस्तदुपादीयते न तु वर्णात्मिकैव रेफव्यक्तिरित्यर्थः। 'ततः किमित्यत आह'। 'तेनेति'। 'इत्यपि सामान्यं चेति'। उपादीयतइत्यपेक्षते, अत्रापि तेन यश्च केवलो लकारः यश्च लृकारस्थः तयोर्द्वयोरपि ग्रहणमिति पठितव्यं पूर्वानुसारेण तु गम्यमानत्वान्न पठितं, यदि द्वयोरपि ग्रहणं ततोपि किमित्याह। 'ततोयमिति'। केवलस्य, शुद्धस्य। 'लकार आदेश इति'। अत्रापि केवल इति द्रष्टव्यम्। 'ऋकारस्यापि लृकार इति'। आन्तरतम्यात्, ननु सत्यपि द्वयोरपि ग्रहणे ऋकारस्थस्य रेफस्य लृकारस्थो लकार आदेशो भवतु कथन्तु कृत्स्नस्य कृत्स्नो वर्ण आदेशो लभ्यत इत्याशङ्क्याह। 'एकदेशद्वारेणेति'।

१ इत्यपीति मु॰ मूलपुस्तके पाठः।

एकदेशविकारस्थो रेफः तस्य विकार एकदेशविकारः, यद्वा च एकदेश लका-
रस्योत्लकारः स एव विकार एकदेशविकारः तद्द्वारेण, तत एतदुक्तं भवति,
ऋकारात्सम्पुटितयो रेफलकारयोर्निर्देशं कर्तुमशक्यत्वात्तत्समुदायस्य समु-
दाय आदेश इति, यदि निर्देशौ अवयविनः माभूत्तयोरुपादानं न पुन-
रेतावता सूत्रे ऽनुपात्तयोः समुदाययोः स्थान्यादेशभावो विज्ञातइत्यत
आह। 'तथा चेति'। 'एवमादय इति'। आदिशब्देन तासि च क्लृपः,
अचुपधायाः क्लृपिचृतेः, अनवक्लृप्त्यमर्षयोरित्यादेर्ग्रहणम्। 'कल्प्तेति'।
ऊदित्वात्पक्षे इडभावः, अत्र लत्वस्यासिद्धत्वात्पूर्वं परस्मैपदे तासि च
क्लृप इतीड्भावोऽन्यत्र तु गुणे कृते रेफस्य लकारः। 'चिक्लृप्सतीति'। हल-
न्ताच्चेति सनः कित्त्वम्॥ 'कृपेरिति'। कृप कृपायां, भवतु संप्रसारणे कृते
ऋत्वं, तथापि रूपसामान्याद्ग्रहणप्रसंगोऽत आह। 'तस्य हीति'। 'कृपे-
रेव ग्रहणम् इति'। रज्जेः क्वुन् बहुलवचनात्कृपेरपि भवति, कृकपिभ्यां
कीटचित्यत्रापि कृपिरेव पठितव्यः, सर्जि पिञ्जादिभ्य ऊरोलचौ कृपेरपि
भवतु सर्वत्र बहुलवचनात्संप्रसारणम्। 'कर्पूरादय इति'। आदिशब्देन
कृपाणस्य ग्रहणं, युधिबुधिदृशेः किच्चेति बाहुलकात् कृपेरपि आनच्, यथा-
वचनं बाहुलकमस्त्ययथीयं कृपे रपि न दोष इत्याह। 'उणादयइति'।
'बालेति'। बल वल्ल संवरणे, बल्यतइति बालः। 'मूलमिति'। मूल
प्रतिष्ठायामित्यस्मादिगुपधलक्षणः कः, लङ्घिबंह्योर्नलोपश्चेति कुप्रत्य-
यान्तो लघुशब्दः, अलमित्यव्ययम्; अङ्गुः कुलिः अङ्गुलिः अमेर्दुरी
रश्च लो वेति नाश्रितं, कपिलकादित्वाद्वा रस्य लः। 'रोमाणीति'।
रौतेर्मनिन्, रोमन् नामन् सीमन् स्तोमन् होमन् सामन् नोमन् क्षोमन्
विधर्मन् पाप्मन् धामन् इत्यत्र लोमन्सामचेति निपातनं नाश्रितम्।
'पांसुरमिति'। पांसुरमस्यास्तीति नगपांसुपाण्डुभ्यश्चेति रः, कृशो
ऽमकिन् कर्मे, कुशः कुश इति च अचोऽचेति निपातनं नाश्रितम्। कल इत्य
कपिलकम् इत्येव अस्माच्च पठितम्। एवं हि लत्वं न विधेयं भवति,
नैतदस्ति, अचोऽकृपदित्वि हि न सिध्येत्। पकारलकारयोः लत्वावि-
धिरिति लकारस्योरर्दाति षकारे कृते अचोऽकृपदिति स्यात्, लत्वविधौ

Digitized by Google

तस्यासिद्धत्वात्पूर्वमृकारस्ततो लत्वमिति सिद्धमिष्टम् । तथा चलीक्लृ-प्यतइति रेफो पि लत्वसिद्धिर्भवति ॥

"उपसर्गस्यायतौ" ॥ 'अयतौ परतइति'। अत्र द्वौ पक्षौ, अयति-परत्वं रेफविशेषणम्, अयतिपरस्य रेफस्य, स चेदुपसर्गस्येति, उपसर्गविशे-षणं वा, अयतिपरस्योपसर्गस्य यो रेफ इति, तत्राद्ये पक्षे एवमन्वयः, अय-तौ परतो यो रेफ उपसर्गसंबन्धी तस्येति, द्वितीये त्वयतौ परतो य उपस-र्गस्तस्य यो रेफस्तस्येति । 'प्लायतइति'। अयतिरनुदात्तेत्, कथं तर्हि उदयति विततोर्ध्वरश्मिरज्जाविति परस्मैपदं, किमनेन वन्यगजघोषेन, यदि वा पचाद्यजन्तादुदयशब्दादाचारे क्विपि लट्, के चित्तु इट किटी गता-वित्यत्र इकारमपि धातुं पठन्ति, यथा त्वत्र दर्शिते पक्षद्वयेपि दोषो न भवति तथा क्रमेण दर्शयति। 'अचेति'। 'स्थानिवद्भावादिति'। पूर्वत्रा-सिद्धे न स्थानिवदित्येतत्त्विह न भवति, तस्य दोषः संयोगादिलोपलत्व-णत्वेष्वित्यपवादस्मरणात्। 'यद्ययतिग्रहणं रेफस्य विशेषणमिति'। का-र्यित्वेन प्रधानत्वात्। 'एकेन वर्णेनेति'। एकग्रहणं प्रत्यय इत्यत्र संघातेन व्यवाये न भवतीति प्रदर्शनार्थम्। 'तथा चेति'। एवं च कृत्वेत्यर्थः । 'प्रत्ययत इत्यत्रापीति'। यत्र श्रूयमाणेनैकेनैव वर्णेन लौकिकं व्यवधानं तत्रापि प्रवर्तते न केवलं प्लायत इत्यादौ यत्र स्थानिभावद्वारेण शास्त्रीयं तत्रैवेत्यपि शब्दस्यार्थः, अमुमेव विशेषं दर्शयितुमस्य पृथगुपन्यासः। ननु च निर दुषः, सुदुरोरधिकरणइति निर्दुशब्दौ रेफान्तावप्युपसर्गौ स्तस्तौ वचन-स्यावकाशा इति कथं व्यवधाने भवति। उच्यते। यद्येतावत्प्रयोजनं स्यान्नि-र्दुरोरयताविव्येव ब्रूयात्, उपसर्गग्रहणात्तु व्यवायेपि भविष्यति, एतच्चैकव-र्णव्यवधानेनाप्युपपन्नमिति न प्रत्ययतइत्यत्र प्रसङ्गः। 'उपसर्गविशेषणे त्वि-ति'। श्रुतत्वादिति भावः। 'सिद्धमेवैतत्सर्वमिति'। येन नाव्य-वधानमित्यादि न कश्चित् यत्नो ऽस्मिन्पक्षे इत्येवशब्दस्यार्थः। 'प्रतेरपि तु प्राप्नोतीति'। पूर्वस्मिन्पक्षे संघातेन व्यवायान्न प्राप्नोति अत्र तु प्राप्नोतीत्य-मुं विशेषं तुशब्दो द्योतयति। 'प्रथमपक्षदर्शनाभिनिविष्टास्त्विति'। प्रथ-मपक्षस्य या दर्शना परेभ्यः प्रतिपादना तत्राभिनिविष्टास्तत्परायणा

Digitized by Google

इत्यर्थः । 'अपरे त्वित्यादि' । आप्तपर्यायः प्रत्ययितशब्द इतच् प्रत्ययान्तः संजातप्रत्ययाः प्रत्ययिता इति । 'निस्दुस् इत्येतयोस्त्विति' । सकारान्तविषयोऽयन्यः, रेफान्तयोस्तु भवितव्यमेव लत्वेन ॥

"ग्रो यङि" ॥ उदाहरणे ऋत इद्धातोरितीत्वं, रपरत्वं, हलि चेति दीर्घस्यासिद्धत्वात्पूर्वमनेन लत्वं, ततोऽपहृतनिमित्तत्वाद्दीर्घाभावः । 'गिरतेर्गृणातेश्चेति' । निगरणार्थस्य शब्दार्थस्य च । 'सामान्येनेति' । विशेषानुपादानात् । अपरे तु गिरतेरेव ग्रहणमिच्छन्तीत्यनुषङ्गः । कः पुनरत्र हेतुरित्यत आह । 'गृणातेस्त्विति' । तुह्यर्थे । 'निगीर्यत इति' । यक् ॥

"अचि विभाषा" ॥ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्प्रत्ययः संनिधापितः, तस्याचाविशेषणात्तदादिविधिर्विज्ञायते, यदाह । 'अजादौ प्रत्यये इति' । 'निगिरतीति' । तुदादित्वाच्छः, तस्य ङित्त्वादसति गुणे इत्वम् । 'णिलोपस्य स्थानिवद्भावादिति' । पदस्य लत्वविधानादन्तरङ्गत्वाभावात्पूर्वत्रासिद्धमिति च लत्वस्यासिद्धत्वात्पूर्वं णिलोप एव भवतीति भावः, प्रत्ययलक्षणमप्यत्र शक्यं वक्तुं, न च वर्णाश्रयत्वमजादौ प्रत्यय इत्युक्तत्वात्, कथं पुनः स्थानिवद्भावः, यावता पूर्वत्रासिद्धे न स्थानिवदिति पठ्यतेऽत आह । 'पूर्वत्रासिद्ध इति' । कः पुनरस्यापवाद इत्यत आह । 'तस्य दोष इति' । 'अन्तरङ्गत्वाद्वेति' । पदस्येत्यधिकारात्कालतोऽन्तरङ्गत्वाभावेऽप्यन्तर्भूताजपेक्षत्वाल्लत्वमन्तरङ्गं बहिर्भूतयगपेक्षत्वात्तु णिलोपो बहिरङ्ग इति भावः । 'गिरौ गिर इति' । विस्पष्टार्थम् ॥

"परेश्च घाङ्कयोः" ॥ 'परि च इति' । परौ घ इत्यप्, हन्तेष्टिलोपो घत्वं च । 'पर्यङ्क इति' । अकि लक्षणे पचाद्यच् हलश्चेति घञ्, घाङ्कश्च । 'घ इति स्वरूपग्रहणमत्रेष्यत इति' । इष्टिरेवेयं, परियोगः, पर्यनुयोगः ॥

"संयोगान्तस्य लोपः" ॥ 'इह श्रेयान्भूयानिति' । संयोगान्तलोपो न प्राप्नोति परत्वाद्रुत्वेन बाध्यमानत्वादित्याशङ्क्याह । 'इहेति' ।

Digitized by Google

यथैव तर्हि हत्वमसिद्धत्वात्संयोगान्तलोपं न बाधते तथा जश्त्वमपि न बाधेत, ततश्च पयो यश इति जश्त्वमेव स्यादत आह। 'जश्त्वे त्विति'। संयोगान्तलोपे हि प्राप्तेऽप्राप्ते च हत्वमारभ्यते, श्रेयानित्यादौ प्राप्ते, पय इत्यादौ त्वप्राप्ते, जश्त्वे तु सर्वत्र प्राप्त एव, तस्माद्येन नाप्राप्तिन्यायेन जश्त्वमेव बाध्यते न संयोगान्तलोपः। 'दध्यत्रेत्यादि'। यणादेशो हि द्विपदाश्रयत्वाद्बहिरङ्गः संयोगान्तस्य लोपस्त्वेकपदाश्रयत्वादन्तरङ्गः। अन्तग्रहणं शक्यमकर्तुं, पदस्येति वर्तते, संयोगे न हि पदे विशेष्यमाणे तदन्तविधिना संयोगान्तस्येति लभ्यत एव॥

"रात्सस्य"॥ 'संयोगान्तस्य पदस्येत्यादि'। संयोगान्तस्य पदस्य योऽवयवो रेफस्तस्मादुत्तरस्य सकारस्य लोपो भवति तदेव पदं प्रत्यलोऽन्त्यस्येत्यर्थः। 'मत्ताः मत्सारिति'। त्सर संवलने त्सर छद्मगतौ। 'रात्सस्यैवेति'। रादेव सस्य नान्यतः श्रेयानित्यादौ, एवं तु नियमो न भवति, उरःप्रभृतिषु पुमानिति कृतसंयोगान्तलोपस्य पाठात्। 'ऊर्गिति'। ऊर्ज बलप्राणनयोः, भ्राजभासेत्यादिना क्विप्, अत्र नियमाज्जकारस्य लोपाभावे चोः कुरिति कुत्वं गकारः, वावसानइति चर्त्वम्। 'न्यमार्डिति'। मृजू शुद्धौ अदादिः, तिपो हल्ङ्याब्भ्यइति लोपः, मृजेर्वृद्धिः, व्रश्चादिना षत्वं, जश्त्वचर्त्वे॥

"धि च"॥ इतः प्रभृति सिचः सकारस्य लोप इति वक्ष्यति, ततश्च सिचा प्रत्यय आक्षिप्यते, तस्य धकारेण विशेषणात्तदादिविधिर्विज्ञायत इत्याह। 'धकारादौ प्रत्यय इति'। भाष्यकारमते तु धकारे परइति द्रष्टव्यम्। 'अलविढ्वमिति'। लुङ् ध्वं सिच् इट्, सिचो लोपः, विभाषेट इति पक्षे मूर्धन्यः। 'धकारो न श्रूयेतेति'। ष्टुत्वे कृते अलविड्ढ्वमित्येव स्यात्, विभाषा ग्रहणं तु तत्र षीध्वमर्थं लिडर्थं च स्यात्। 'इतः प्रभृतीत्यादि'। रदःस्याद्भ्यः पूर्वस्येति पूर्वसवर्णविधानमत्र ज्ञापकमाहुः। अन्यथाऽउत्स्था इति स्थिते तकारात्परस्य सकारस्य झरो झरीति लोपे सति उत्थानेत्यादेः सिद्धत्वादनर्थकं तत्स्यात्सामान्यापेक्षं च ज्ञापकमस्मिन्प्रकरणे यो लोपः स सिच इति।

Digitized by Google

'चक्राद्धीति'। हे शिरः पलितं सच्चकाद्धि, शोभस्वेत्यर्थः, चकासृ दीप्तौ अदादिः, लोट्, सिपो हिः, हेर्धिः, झलाञ्जश् झशीति सकारस्य दकारः। 'पयो धावतीति'। हशि चेति रोरुत्वं, यदि सिचो लोप इष्यते सग्धिर्वब्धामिति झलो झलीति लोपो न स्यादत आह। 'सग्धिर्वब्धामिति'। अदेः क्तिनि बहुलं छन्दसीति घस्लादेशः, घसिभसोर्हलि चेत्युपधालोपः, बहुलं छन्दसीति सलोपः, झषस्तथोर्धोऽधः, जश्त्वेन घकारस्य गकारः, समानाग्धिः सग्धिरिति पूर्वापरप्रथमेत्यादिना कर्म्मधारयः, समानस्य छन्दसीति सभावः। 'बब्धामिति'। भस भर्त्सनदीप्त्योः जुहोत्यादिः, लोट्, तसस्तां, श्लौ द्विर्वचनं, पूर्ववदुपधालोपः, सकारस्य च लोपः, तकारस्य धकारः, भकारस्य जश्त्वं बकारः। 'पयो धावतीत्येवमादावपीति'। अन्यथा रुत्वस्य सिद्धत्वात्पूर्वं सलोपः स्यात्। 'भाष्यकारस्त्वाहेति'। पूर्वं तु श्लोकवार्त्तिककारस्य मतं दर्शितम्। 'यथान्तरमास्थेयमिति'। एकपदाश्रयत्वादन्तरङ्गं रुत्वं पदद्वयाश्रयत्वाद्बहिरङ्गः सलोपः, तत्र सलोपस्यासिद्धत्वात् पूर्वत्रेति निर्दिष्टस्य विषयस्याभावादसिद्धत्वाभावाद्रुत्वमेव तावत्प्रवर्त्तते, अल्विधित्वाच्च स्थानिवत्त्वाभावादेर्लोपाभाव इति। 'धि सकार इति'। स्थानिनोऽपि विषयत्वविवक्षया सकार इति सप्तमीनिर्देशः। 'आशाध्वमिति'। आङः शासु इच्छायाम् अदादिरनुदात्तेत्। 'जश्त्वमिति'। झलां जश् झशीत्यनेन। 'सर्वमेवमिति'। यदि सकारस्य जश्त्वेनाशाध्वमिति सिद्धं, ततः सर्वमेव तज्जातं जश्त्वेनैव सिद्धं स्यात्, ततश्च सूत्रमेवेदं न कर्त्तव्यमिति, 'श्रुतिश्चापि नभिद्यत इति'। व्यञ्जनपरस्यैकस्यानेकस्य वा हलः श्रवणे विशेषो न धार्यत इत्यर्थः। 'लुङश्चापीति'। अयं चापरो जश्त्वे सति गुणः, इणः षीध्वमित्यत्र लुङो ग्रहणं न कर्त्तव्यं भवति अच्योढ्वमलोढ्वमित्यादौ षत्वजश्त्वष्टुत्वैरेव रूपस्य सिद्धत्वात्।

ह्रस्वादङ्गादिति सिचो लोपे ऽकृतं, कथं भवेत्।
वेधाक्षराभिधानात्तु नैतत्सुष्ठु निरूपितम्॥

Digitized by Google

तद्दर्शयति । 'सेटि दुष्यतीति' । एतच्च यत्नात् सकारस्य लोपो न स्यादित्युपक्रम एवोक्तं तस्माद्धि चेति कर्त्तव्यं, मूर्धन्ये च लुङो ग्रहः, धिसकारे सिचो लोप इति त्वेतदवस्थितं तत्र दोषान्तरं दर्शयति । 'घसिभसोरिति' । सग्धिर्बब्धामित्येतयोरसिद्धिप्रसङ्गात्, न सिचो लोपः शक्यो विज्ञातुमित्यर्थः, परिहरति । 'छान्दसो वर्णलोपो वेति'। वाशब्दः पक्षं व्यावर्त्तयति, सिच एवायं लोपः, । घसिभस्योस्तु छान्दसो वर्णलोप इति । क्व यथेत्याह । 'यथेति' । इष्कर्त्तारमध्वरस्य यस्येकदेशानुकरणादिष्कर्त्तारमध्वरस्येत्यस्मात्सप्तमी, तत्र बहुधा इष्कर्त्तारमिति पठन्ति, तैत्तिरीयास्तु निष्कर्त्तारमिति ॥

"झलो झलि" ॥ भिदिच्छिदी स्वरितेतौ, मन्यतिरनुदात्तेत् । 'अयमपि सिच एव लोप इति' । यदि वा पदस्येति वर्त्तते, तदा[1] सत्तझलो झलि सस्येति निर्दिष्टानां त्रयाणामप्येकसंबन्धत्वे विधिरयमिति सोमसुत्स्तोतेत्यादौ न भविष्यति, समासेऽपि न भवति, सोमसुत् स्थातिरिति किं कारणं सकारथकाराभ्यां यत्पदमारब्धं तत्पति तकारस्यावयवत्वाभावात् ॥

"ह्रस्वादङ्गात्" ॥ 'अप्योष्टेति' । सलोपस्यासिद्धत्वात्पूर्वं गुणस्ततो विहतनिमित्तत्वाल्लोपाभावः । 'अयमपीति' । अचोदः स्यात्सध्वोरिति पूर्वोक्तं ज्ञापकमेव शरणम् । 'ह्रिष्टमामिति' । ह्रस्वात्तादौ तद्धितइति वक्तव्यम् ॥

"इट ईटि" ॥ अत्र सिच एव संभवः ॥

"स्कोः संयोगाद्योरन्ते च" ॥

गुणभूतोऽपि संयोगो झलन्ताभ्यां विशेष्यते ।
संयोगाद्योः पदस्यान्ते स्कोर्यस्मान्नास्ति संभवः ॥

इति मत्वाह । 'पदस्यान्तइति' । 'झलि च परत इति' । पदस्य यः संयोग इत्यपेक्षते । 'लग्न इति' । ओलस्जी व्रीडे, त्विष्टा, ईदित्त्वात्.

१ तत्पदमात्तेरिति पा० २ पु० ।

Digitized by Google

विट्प्रतिषेधः, अत्र तकारे झलि परतः सजयोर्यः संयोगः तदादिः सकारः, ओदितश्चेति निष्ठानत्वं, तस्यासिद्धत्वात्कुत्वम् । 'साधुलगिति' । साधु लज्जत इति क्विप् । 'मग्न इति' । मस्जिनशोर्झलीति नुम्, स च जकारात्पूर्वः, मस्जेरन्त्यात्पूर्वं नुममिच्छन्तीति वचनात्, तेनानिदितामिति नलोपः, सलोपादि पूर्ववत् । तष्ट इति । तक्षू तनूकरणे, ऊदित्वा द्विकल्पितेट्, यस्य विभाषेतीट्प्रतिषेधः, । 'झलि सहीति वक्तव्यमिति' । सहीत्ययं प्रकरणशेषः, किं प्रयोजनम् ।

गिरोऽभोर्धिर्द्विष्टरां च दृषत्स्यः काष्टशक्स्थिरः ।
कुञ्चाधुर्येति मा स्मैषु सत्वादीनि भवंस्त्विति ॥

गिर इत्यत्रापि विभाषेति लत्वं माभूत्, अभोर्धिरिति, धि चेति सलोपो न भवति । 'द्विष्टरामिति । ह्रस्वादङ्गादिति न भवति, दृषत्स्यः, झलो झलीति न भवति, काष्टशक्स्थिरः, स्कोः संयोगाद्योरिति न भवति, कुञ्चा चोःकुरिति कुत्वं न भवति, धुरं वहतीति धुर्येति हलि चेति दीर्घत्वं न भवति, तथा च वार्त्तिकं सहि लत्वलोपसंयोगादिलोपकुत्वदीर्घत्वानीति, सहीति प्रकृत्य लत्वादीनि वक्तव्यानीत्यर्थः, तदेवं वार्त्तिककारमतेऽपि चक्राधीत्येव भवितव्यं, सहीति वचनात् । 'सनःप्रभृतीति' । धातुप्रत्ययानां ग्रहणमित्यर्थः । अत्र संयोगादिलोपं प्रयोजनं प्रत्याचष्टे । 'तद्धिति' । तदिति वाक्योपन्यासे । 'चक्रे रिति' ककारान्तोपलक्षणमेतत्, तेन कक्क लौल्ये कुक्क वृक आदानइत्यादेरपि क्विबन्तस्य प्रयोगो नास्त्येव । 'आहुरिति' । भाष्यकारादयः । तत्र भाष्यं तावत्पठति । 'काष्टशगेवेति' । वाक्यर्थमित्यत्र स्थानिवद्भावोपि शक्यो वक्तुं, तस्य दोषः संयोगादिलोप इत्युक्तत्वात् ॥

"चोः कुः" ॥ 'नकारोपधो वेति' पूर्वमौत्पत्तिकं अकारोपधत्वमाश्रित्योक्तम्, इदानीन्तु नकारस्यानुस्वारपरसवर्णाभ्यामागतो ञकार इत्युच्यते । 'नकारलोपे हीति' । तथा संनिपातपरिभाषायाः प्रयोजनेषु पठितमुदुपधत्वमकित्वस्य निकुचितइति । कुचितशब्देकित्व संनिपातकृतमुदुपधत्वमुदुपधाद्भावादिकर्मणोरन्यतरस्यां कित्वस्य निमित्तं न भवती-

Digitized by Google

महापितृयज्ञे धानास्ववघातानुष्ठानम् । अधि० ३३ ।

अर्थे न च विपर्यासे तादर्थ्यात्तत्त्वमेव स्यात् ॥ ७३ ॥

महापितृयज्ञे पितृभ्यो बर्हिषद्भ्यो धाना इति । धाना भृष्टतण्डुलाः । अत्र धानासु अवहननं खलेवाल्यां तत्तथावचिवर्तते । यदि धानास्ववहननं भवेत्तदा सक्तवो भवेयुर्धानात्वं भज्येतेति पूर्वपक्षे सिद्धान्तमाह । अर्थे नेति । विपर्यासे विपर्यासवति विपरीतक्रमइति यावत् । अर्थे पदार्थे च सति न च धानात्वं हन्येत । ननु प्राकृतपदार्थानुग्रहे क्रियमाणे क्रमो बाध्येतेति अन्यतरबाधप्रसक्तौ किं बाध्यतइत्यत्र नियामकमाह । तादर्थ्यादिति । तादर्थ्यात्, क्रमस्येति शेषः । पदार्थार्थत्वात् पदार्थाङ्गत्वादिति यावत् । तत्त्वं क्रमरहितत्वं धानात्वसंपादनमवहननं च द्वयं पदार्थः । अत्र प्राकृतसरण्यनुसरणे उत्पत्तिवाक्यश्रुतद्रव्योद्देशेनावहननविधायकं वाक्यं धाना अवहन्तीति क्लृप्तधानात्वनिर्माणं प्रथमं पश्चादवहननमिति क्रमे ऽनुसृते धानाभङ्गः । प्रथममवहत्य पश्चाद्धानासंपादने क्रमबाधः न पदार्थबाध इति भावः ॥ ७३ ॥

इति जैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

पश्वादौ सामिधेन्यादिप्राकृतेतिकर्तव्यतानुष्ठानम् । अधि० १ ।

विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिः सन्निधानात् ॥ १ ॥

अस्मिन्पादे विकृतौ श्रुतस्य प्राकृतेन विरोधः प्रायेण चिन्त्यते । अग्नीषोमीयपशौ एकादश प्रयाजान्यजतीति श्रुतम् । इदं प्राकृतमपूर्वं वेति संशये पूर्वपक्षमाह । विकृताविति । विकृतौ प्राकृतगुणविलक्षणगुणकप्राकृताङ्गके अग्नीषोमीयपश्वादौ शब्दवत्त्वात् । एकादशत्वादिविशिष्टप्रयाजादिविधायकशब्दवत्त्वाद् गुणानाम् अप्राकृतगुणानाम् अधिकोत्पत्तिः स्वातन्त्र्येणोत्पत्तिः स्यात् । ननु प्राकृतप्रयाजानुवादेन संख्यामात्रविधिः किं न स्यादत आह । प्रधानस्य सन्निधानात् । प्रधानस्य मुख्यविशेष्यस्य भावनायाः सन्निधानात् । पदश्रुत्या धात्वर्थविधिरेव युक्तः । तेन पशुमेधीयवद् यावत्प्राकृताङ्गनिवृत्तिरिति भावः ॥ १ ॥

Digitized by Google

प्रकृतिवच्चस्य चानुपरोधः ॥ २ ॥

उक्तार्थे साधकान्तरमाह । प्रकृतिवच्चेति । प्रकृतिवच्चस्य पशुमालभेतेति वाक्ये प्रकृतिवदिति पदस्य अनुपरोधः अकल्पनं प्रयाजवाक्येनैव कथंभावाकाङ्क्षाशान्तेरिति भावः ॥ २ ॥

चोदनाप्रभुत्वाच्च ॥ ३ ॥

चोदनेति । चोदनायां प्रयाजादिविधौ उक्तवाक्यस्य प्रभुत्वात् समर्थत्वात् ॥ ३ ॥

प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य विध्युपलक्षणात्सर्वो हि पूर्ववान्विधिरविशेषात्प्रवर्तितः ॥ ४ ॥

सिद्धान्तमाह । प्रधानमिति । प्रधानं प्राकृतं यथा अङ्गसंयुक्तं यादृशाङ्गसंयुक्तं तथाभूतं तादृशाङ्गसंयुक्तमपूर्वं विकृतिसामान्यं स्यात् । ननु प्राकृतधर्मा ऽस्तु विकृतिविशेषे सौर्ययागादौ यत्रापूर्वमङ्गं न श्रूयते, प्रकृते श्रवणाचेत्यत आह । तस्येति । क्व चिद्विकृतौ तस्य प्रकृतेः विधेरङ्गस्य उपलक्षणाद् उपलब्धेः सर्वो ऽपि सर्वविकृतियागो ऽपि पूर्ववान् प्रकृतिमान् यतः अविशेषेण प्रवर्तितः । प्रकृतिवदित्यस्य विशेष्याकाङ्क्षायां विकृतिर्योज्या तत्र वैजात्यनिवेशे प्रमाणाभावात् प्रकृतिवद्विकृतिः कर्तव्येति योजनेति भावः ॥ ४ ॥

न चाङ्गविधिरनङ्गे स्यात् ॥ ५ ॥

हेत्वन्तरमाह । न चेति । अनङ्गे प्राकृतप्रयाजादिशून्ये एकादशत्वाद्यङ्गविधिः संभवति । सति कुड्ये चित्रकर्मेति न्यायात् ॥ ५ ॥

कर्मणश्चैकशब्द्यात्सन्निधाने विधेराख्यासंयोगो गुणेन तद्विकारः स्याच्छब्दस्य विधिगामित्वाद्गुणस्य चोपदेश्यत्वात् ॥ ६ ॥

ननु यदि प्रकृतितः प्राप्यन्ते तर्हि एकादश प्रयाजान्यजतीति वाक्यं व्यर्थं स्यादत्रोत्तरमाह । कर्मण इति । कर्मणश्चैकशब्द्यात् । पशुयामप-

Digitized by Google

याजयोरेकशब्दवाच्यत्वात् । समीपवर्त्तिनोः परस्परविलक्षणार्थबोधक-त्वासंभवात् । तत्सन्निधाने प्रधानविधिसन्निधाने सति विधेः प्रकृ-विधिः प्राकृत नाम्न तेन संयोगः । प्राकृतप्रयाजनामविशेषितयागः कृत इति भावः । ततः गुणेन एकादशत्वसंख्यया तस्य प्रयाजयागस्य विकारः परिच्छेदकरूपान्तरप्राप्तिः स्यात् । कुत एवं निर्णयस्तत्राह । शब्दस्य एकादशत्वादिशब्दस्य विधिगामित्वात् । प्रयाजादिविधिसंब-न्धात् । गुणस्योपदेश्यत्वाद्विधेयत्वाद्, नानर्थक्यमिति शेषः ॥ ६ ॥

अकार्यत्वाच्च नाम्नः ॥ ७ ॥

प्रयाज इति नाम यागे विधीयते इति नेत्यत्र हेतुमाह । अका-र्यत्वादिति ॥ ७ ॥

तुल्या च प्रभुता गुणे ॥ ८ ॥

तुल्येति । अपूर्वकर्मविधाने प्राकृते च कर्मणि गुणविशेषविधाने प्रभुता शक्तिः विधिप्रत्ययस्य तुल्या ॥ ८ ॥

सर्वमेवं प्रधानमिति चेत् ॥ ९ ॥

एवं सति सर्वे ऽपि प्रधानविधयः स्युः आख्यातवाच्यत्वादिति युक्त्या सिद्धान्तमाक्षिपति । सर्वेति ॥ ९ ॥

तथाभूतेन संयोगाद्यथा ऽर्थविधयः स्युः ॥ १० ॥

आक्षेपं परिहरति । तथाभूतेनेति । तथाभूतेन द्वितीयाध्यायस्य-गुणप्रधानलक्षणयुक्तेन यथा ऽर्थविधयः गुणकर्मविधयः ॥ १० ॥

विधित्वं चाविशिष्टं वैकृतैः कर्मणा योगात्तस्मात्सर्वं प्रधानार्थम् ॥ ११ ॥

प्रयाजवाक्यस्य गुणविधित्वे युक्त्यन्तरमाह । विधित्वं चेति । श्रूयमाणप्रयाजादिविधित्वं प्राकृतानां वैकृतैस्सह कर्मणा अर्थवादेन योगा-त्सम्बन्धाद् अविशिष्टं, न विशिष्यते एकरूप इति यावत् । यथा पष्टे यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य प्रतिदधातीति, विकृतावपि

Digitized by Google

आज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेतीति । तस्मादेवंजातीयं सर्वं न प्रधानं किं तु प्रधानार्थम् ॥ ११ ॥

समत्वाच्च तदुत्पत्तेः संस्कारैरधिकारः स्यात् ॥ १२ ॥

प्रधानार्थत्वे साधकान्तरमप्याह । समत्वादिति । संस्कारैः, सहेति शेषः । तदुत्पत्तेः प्रयाजादिक्रमस्य समत्वात्प्रकृतिविकृत्योः तुल्यत्वात् । प्रकृतौ प्रथमं प्रयाजाः मध्ये प्रधानं ततोऽनूयाजा इति दृष्टं, विकृतावपि प्रजापतिर्यज्ञमसृजत स आज्यं पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात्तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनानुयाजा इति । प्रकृतौ यथा प्रधानार्थं पाठः एवमेवाधिकारः । अत्रापि प्रयाजादिपाठः स्यात् ॥ १२ ॥

हिरण्यगर्भ इत्यादिमन्त्रस्योत्तराघारे गुणत्वम् । अधि० २ ।

हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् ॥ १३ ॥

वायव्यपशुविशेषे श्रूयते, हिरण्यगर्भः समवर्तताग्र इति आघारमाघारयतीति । अयं मन्त्रः प्रथमाघाराङ्गमुत द्वितीयस्येति संशये पूर्वपक्षमाह । हिरण्येति । हिरण्यगर्भमन्त्रः पूर्वस्य प्रथमाघारस्य प्रकृतौ प्रजापतिर्देवता अत्रापि तद्वाचकहिरण्यगर्भ इति लिङ्गात् ॥ १३ ॥

प्रकृत्यनुपरोधाच्च ॥ १४ ॥

प्रकृते प्राकृतमन्त्रस्य अनुपरोधात् । अबाधात् । द्वितीयाघारे प्रकृतौ समारभ्योर्ध्वो अध्वर इति मन्त्रस्य बाधः स्यात् । हिरण्येत्यस्य द्वितीयाघारे योजने अस्मिन्पक्षे अबाध इति भावः ॥ १४ ॥

उत्तरस्य वा मन्त्रार्थित्वात् ॥ १५ ॥

सिद्धान्तमाह । उत्तरस्येति । मन्त्रार्थित्वादुत्तराघारे प्रकृतौ मन्त्रस्य क्लृप्तत्वात्तत्रैव मन्त्राकाङ्क्षा न प्रथम इति भावः ॥ १५ ॥

विध्यतिदेशात्तच्छ्रुतौ विकारः स्याद्गुणानामुपदेश्यत्वात् ॥ १६ ॥

विध्यतिदेशाद् आघारविधेः प्रकृतितः अतिदेशात् । तच्छ्रुतौ तदनुवादे गुणानामनुवाद्यस्य ये प्राकृता गुणाः तेषामेव विकारः स्यात् ।

Digitized by Google

कृतः, गुणानां तद्गुणानामेवोपदेश्यत्वात् । विधेयत्वात् । यथा देवदत्तं शाकेन घृतेन भोजय, विष्णुमित्रं तद्गतैलेनेत्युक्तौ साजात्यात्प्राप्तं घृतमेव बाधते न शाकं, तथा द्वितीयाघारमन्त्रं साजात्याद्बाधत-इति भावः ॥ १६ ॥

पूर्वस्मिंश्चामन्त्रदर्शनात् ॥ १७ ॥

तादृशसाजात्यं स्पष्टीकरोति । पूर्वेति । न मन्त्रदर्शनममन्त्रदर्शनं तस्मात् ॥ १७ ॥

आसादननियोजनयोः प्राकृतगुणविधित्वम् । अधि॰ ३ ।

संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् ॥ १८ ॥

सन्ति क्रतुविशेषे परिधौ पशुं नियुञ्जीतेति । इदं प्राकृतात्पशुनियोजनात् कर्मान्तरमुत तत्रैव गुणविधिरिति संशये पूर्वपक्षमाह । संस्कारेति । उदाहृतवाक्यस्य तस्य पशुनियोजनस्य विधायकत्वात् । परिधिसंबन्धेन पशोः संस्कारे सति क्रियान्तरं प्राकृतादपूर्वमदृष्टार्थत्वादिति भावः ॥ १८ ॥

प्रकृत्यनुपरोधाच्च ॥ १९ ॥

प्रकृतीति । व्याख्यातं पूर्वाधिकरणे ॥ १९ ॥

विधेस्तु तत्र भावात्संदेहे यस्य शब्दस्तदर्थं स्यात् ॥ २० ॥

सिद्धान्तमाह । विधेरिति । विधेः नियोजनविषये प्राकृतप्रत्यक्षविध्योः तत्र क्रतुविशेषे भावात्संदेहे यस्य यदुद्देश्यकः, षष्ठ्यर्थे उद्देश्यत्वं, शब्दः परिधिरूपः सः तदर्थे नियोजनार्थम् । न च परिधेरपि प्रकृतौ कार्यस्य क्लृप्तत्वात्कथं नियोजनार्थत्वमिति शङ्क्यम् । कपाले क्लृप्तोपकारे तुषोपवपनार्थत्ववत्प्राकृतवैकृतोभयार्थत्वसंभवात् । तस्मादपूर्वं कर्म ॥ २० ॥

संस्कारसामर्थ्याद् गुणसंयोगाच्च ॥ २१ ॥

ननु नियोजनार्थत्वे नियोजनस्य पशुगतिप्रतिबन्धकत्वं दृष्टं फलमिदं परिधौ कथं संभवतीत्यत आह । संस्कारेति । गुणयोगात् ।

परिधौ स्थूलत्वरूपगुणयोगात् । संस्कारस्य गमनप्रतिबन्धरूपकार्यस्य सामर्थ्यात् । उत्पादकशक्तिमत्त्वात् ॥ २१ ॥

विप्रतिषेधात् क्रिया प्रकरणे स्यात् ॥ २२ ॥

ननु सौत्रामण्यां ब्राह्मणस्य मस्तके दूर्वोऽभ्यासादयतीति यथा अदृष्टार्थम् एवमेव किं न स्यादित आह । विप्रतिषेधादिति । प्रकरणे सौत्रामणीप्रकरणे विप्रतिषेधात् । दृष्टासंभवात् । क्रिया अपूर्वं कर्म स्यात् ॥ २२ ॥

अग्निचयने प्राकृतवैकृतोभयदीक्षाहुतीनामनुष्ठानम् । अधि· ४ ।

षड्भिर्दीक्षयतीति तासां मन्त्रविकारः श्रुतिसंयोगात् ॥ २३ ॥

अग्निचयने श्रूयते, षड्भिर्दीक्षयतीति । तत्र प्रकृतितः आकूत्यै प्रयुजइति चत्वमन्त्राः प्राप्ताः । वैकृता आकूतिमग्निमिति षण्मन्त्रा विहिताः । तथा च वैकृतेन प्राकृतबाध उत समुच्चय इति संशये पूर्वपक्षमाह । षड्भिरिति । तासां प्राकृतदीक्षाहुतीनां मन्त्रविकारः प्राकृतमन्त्रादन्यमन्त्रः स्यात् । षड्भिर्दीक्षयतीतिश्रुतिसंयोगात् ॥ २३ ॥

अभ्यासात्तु प्रधानस्य ॥ २४ ॥

सिद्धान्तमाह । अभ्यासादिति । प्रधानस्य प्राकृतदीक्षाहुतेः अभ्यासात् । आवृत्त्या द्वयोरुपपत्तेरिति शेषः । अन्यार्थेनोपपत्तौ बाधो नेति भावः ॥ २४ ॥

आवृत्त्या मन्त्रकर्म स्यात् ॥ २५ ॥

अयं पक्षो न संभवतीति पूर्वपक्ष्याह । आवृत्त्येति । आवृत्त्या क्रियमाणेऽपीति शेषः । मन्त्रैः वैकृतमन्त्रैरेव युक्तं कर्म मन्त्रकर्म स्यात् । चयनप्रकरणे प्रत्यक्षविधेरिति हेतुः पूरणीयः ॥ २५ ॥

अपि वा प्रतिमन्त्रत्वात्प्राकृतानामहानिः स्यादन्यायश्च कृतेऽभ्यासः ॥ २६ ॥

सिद्धान्तमाह । अपि वेति । प्रतिमन्त्रत्वात् । यावत्य आहुतयः तासां प्रत्येकमेकैकमन्त्रापेक्षत्वात् । प्राकृतानां चतसृणां द्विवाराभ्यासे

प्राकृतमन्त्राणामहानिः अबाधः अबाधेन संभवे बाधो ऽन्याय्यः अतः अभ्यासः स्यात् ॥ २६ ॥

पौर्वापर्यं वा ऽभ्यासेनोपपद्यते नैमित्तिकत्वात् ॥ २७ ॥

हेत्वन्तरमाह। पौर्वेति। षट् पूर्वाऽऽनुहोति बहुत्तरानिति श्रुतम्। इदमभ्यासेनैवोपपद्यते पूर्वान्प्राकृतान् उत्तरान् नैमित्तिकान्। आगन्तुकस्य नैमित्तिकत्वात् प्राकृते पूर्वत्वमुपपन्नमिति भावः ॥ २७ ॥

तत्पृथक्त्वं च दर्शयति ॥ २८ ॥

उभयीर्जुहोत्याग्निकीराध्वरीश्चेति श्रुतम्। उभयीरित्यस्य विवरणमाग्निकीः अग्निसंबन्धिनीः आध्वरीः प्राकृताः ॥ २८ ॥

न वा विशेषाद्व्यपदेशः स्यात् ॥ २९ ॥

इतो ऽपि न बाध इत्याह। न वेति। पूर्ववाक्यसमीपएव पूर्वमध्वरस्याथाग्नेरिति श्रुतो ऽस्मि। तत्र विशेषान्नैमित्तिकाद्व्यपदेशः। पूर्वभावः विहितः। अयं समुच्चयमन्तरा न कल्पते अतो न बाधः ॥ २९ ॥

पुनराधाने ऽग्न्याधानदक्षिणानां निवृत्तिः। अधि० ५।

अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ ३० ॥

यो ऽग्न्याधेयेन नर्ध्नोति स पुनराधेयमादधीतेत्यग्न्याधेयविकृतिराम्नाता। तत्र वैकृतदक्षिणा पुनर्निष्कृतो रथो दक्षिणेत्यादिः श्रुता। आधानान्मिथुनौ गावौ ददातीत्यादि प्राप्तम्। अत्र समुच्चयो बाधो वेति संशये पूर्वपक्षमाह। अग्न्याधेयेति। नैमित्तिके पुनराधेये गुणस्य दक्षिणायाः पुनर्निष्कृतो रथो दक्षिणेत्यनेन विकारे प्राप्ते ऽपि अग्न्याधेयस्य दक्षिणादानमधिकं समुच्चितं स्यात्। वाक्यसंयोगात्। तत्रापि उभयीर्ददात्याग्न्याधेयिकीः पुनराधेयिकीश्चेति वाक्येन संयोगात् ॥ ३० ॥

शिष्टत्वाच्चेतरासां यथास्थानम् ॥ ३१ ॥

साधकान्तरमाह। शिष्टत्वादिति। यथास्थानं यथाक्रमम् इतरासां प्राकृतदक्षिणानां शिष्टत्वात्। अनुशासनात्। अनुशासनं चैवं श्रूयते, आग्न्याधेयिकीर्दत्वा पुनराधेयिकीर्ददातीति ॥ ३१ ॥

Digitized by Google

विकारस्त्वप्रकरणे हि काम्यानि ॥ ३२ ॥

सिद्धान्तमाह । विकार इति । हि यस्मात् कारणात् काम्यानि पुनराधेयानि । प्रयोगबहुत्वाभिप्रायं बहुवचनम् । अतो ऽप्रकरणे ऽप्रकृतौ, विहितदक्षिणाया इति शेषः । विकारः बाधः प्राकृतस्य ॥ ३२ ॥

शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ॥ ३३ ॥

पूर्वपक्षिणा दर्शितवाक्यसंगतिमाह । शङ्कत इति । पूर्वोक्तवाक्ये उभयत्वं श्रूयते । तत्स्वार्थपरं नेति पूरणीयम् । कुतः, हि यस्माच् शङ्कते निवृत्तेः प्राकृतदक्षिणाविषये शङ्कते । पूर्ववाक्यसमीपएव यद्विकृतौ ददाति दक्षिणा उभयोरपि दक्षिणाः तेन प्रत्ता भवन्तीति श्रूयते । अत्र प्रत्ता भवन्तीति शब्देन प्राकृतदक्षिणालोपाद्वैगुण्यशङ्कायाः समाधानं कृतम् । अतः पूर्ववाक्यं जर्तिलयवाग्वा जुहुयादितिवत् पूर्वपक्षपरमिति भावः ॥ ३३ ॥

वासोवत्साभ्यामन्वाहार्यस्य निवृत्तिः । अधि॰ ६ ।

वासोवत्सं च सामान्यात् ॥ ३४ ॥

आग्रयणे प्रथमजो वत्सो दक्षिणेत्यत्राबाधायान्वाहार्यस्यापि समुच्चय इति पूर्वपक्षे सिद्धान्तमाह । वास इति । यथा पुनराधेयदक्षिणा प्राकृतदक्षिणां बाधतएवं वासोवत्सं च सामान्याद् एककार्यकारित्वात् ॥ ३४ ॥

वासोवत्सयोरन्वाहार्यधर्मानुष्ठानम् । अधि॰ ७ ।

अर्थापत्तेस्तद्धर्मः स्यान्निमित्ताख्याभिसंयोगात् ॥ ३५ ॥

तत्रैवान्वाहार्यधर्मा मन्त्रादयः न सन्ति । प्रकृतावन्वाहार्योद्देशेन प्रवृत्तत्वादिति पूर्वपक्षे सिद्धान्तमाह । अर्थेति । अर्थस्य प्राकृतमन्त्राद्युद्देश्यदक्षिणाया आपत्तेः स्थाने पतितत्वात् । तद्धर्मः अन्वाहार्यधर्मः वासोवत्से स्यात् । वासो दक्षिणेत्यस्य मन्त्रनिमित्तस्य दक्षिणाख्यया दक्षिणानाम्ना अभिसंयोगात् । संयुक्तत्वात् ॥ ३५ ॥

वत्से पाकाभावः । अधि॰ । ८ ।

दाने पाको ऽर्थलक्षणः ॥ ३६ ॥

तत्रैव वत्से प्राकृतपाकप्राप्तौ सिद्धान्तमाह । दानइति । अर्थः

Digitized by Google

ग्नोतः तस्य वत्सशब्दस्य लक्षणा लक्षकः पाको भवेदतः दाने दानसाधनवत्से निवर्ततइति शेषः । वत्से पाके सति दक्षिणासाधनं न वत्सः तस्य नष्टत्वात् । किं तु मांसं, वत्सपदस्य लक्षणापत्तिरिति भावः ॥ ३६ ॥

वाससि पाकाभावः । अधि० । ९ ।

पाकस्य चान्नकारित्वात् ३७ ॥

वासोनाशाभावात्तत्र पाको ऽस्त्विति पूर्वपक्षे सिद्धान्तमाह । पाकस्येति । अन्नकारित्वं हि पाकस्य । वाससि तदभावान्निवृत्तिरिति भावः ॥ ३७ ॥

वासोवत्सयोरभिघारणाभावः । अधि० १० ।

तथा ऽभिघारणस्य ॥ ३८ ॥

यथा पाकस्य तथा ऽभिघारस्यापि निवृत्तिः । हविसंपादकत्वात्तस्येति भावः ॥ ३८ ॥

ज्योतिष्टोमे गवामेव द्वादशशतस्य दक्षिणात्वम् । अधि० ११ ।

द्रव्यविधिसंनिधौ संख्या तेषां गुणत्वात् स्यात् ॥ ३९ ॥

ज्योतिष्टोमे गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति । अत्र द्वादशशतसंख्या सर्वेषु प्रत्येकमुत एकस्मिन् कस्मिंश्चिद् उत सन्निहितउत गवादिराशाविति संशये प्रथमं पक्षमुत्थापयति । द्रव्येति । संख्यापदोत्तरं सर्वैः संबध्यतइति शेषः । तेषां, षष्ठ्यर्थो निरूपितत्वं, गवादिमाषान्तनिरूपितगुणत्वात् संख्यायाः । यद्वा तेषां संख्या स्यादित्यन्वयः । तावदुद्देश्यका संख्येति फलितं, प्रतिप्रधानमङ्गावृत्तिरित्यावृत्त्या संख्यावाचकशब्दस्य प्रत्येकमन्वय इति भावः ॥ ३९ ॥

समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ॥ ४० ॥

इमं पक्षं दूषयन् पक्षान्तरमाह । समत्वादिति । गुणानां माषान्तानां संख्यायाश्च समत्वात् । अयं भावः । न गवादिभिः संख्या संबध्यते किं तु दक्षिणया गवादीनामपि तत्रैव संबन्धः । अतः समत्वमिति

Digitized by Google

न पूर्वोक्तो गुणत्वरूपो हेतुः संगच्छते। यस्मिन् कस्मिंश्चित्संबन्धे ऽपि तद्द्वारा दक्षिणायां योग उपपन्नः तस्मादिच्छया एकस्मिन्संख्यान्वयः। ननु दक्षिणान्विता संख्येति कथं निर्णयः। तत्राह। श्रुतिसंयोगात्। श्रुतेः द्वादशशतशब्दस्य संयोगात्। दक्षिणाशब्दसांनिध्यात् ॥ ४० ॥

यस्य वा सन्निधाने स्याद्वाक्यतो ऽह्यभिसंबन्धः ॥ ४१ ॥

इच्छातो वरं सांनिध्यस्य नियामकत्वमित्यभिप्रायेणापरं पक्षमाह। यस्य वेति। यस्य वा संनिधाने संख्याशब्दः स्यात्तेन ह्यभिसंबन्धः। एवं सति वाक्यतो ऽभिसंबन्धः गृहीतो भवति ॥ ४१ ॥

असंयुक्तास्तु तुल्यवदितराभिर्विधीयन्ते तस्मात्सर्वाधिकारः स्यात् ॥ ४२ ॥

सांनिध्यस्य नियामकत्वं दूषयन् तुरीयं पक्षमाह। असंयुक्ता इति। केवलैर्माषैरसंयुक्ताः संख्यायतइतराभिर्द्रव्यश्रुतिभिस्तुल्यवत्तया विधीयन्ते माषाः। अयं भावः। गौरित्यारभ्य माषान्तद्रव्यावाचकपदेषु चकारयोगो दृश्यते। तेन न कस्यापि स्वातन्त्र्यं किं तु इतरसहितस्यैव तस्मात्सर्वाधिकारः स्याद्गवादिमाषान्तराशौ संख्यान्वयः स्यादिति भावः ॥ ४२ ॥

असंयोगाद्विधिश्रुतावेकजाताधिकारः स्याच्छ्रुत्याकोपात्क्रतोः ॥ ४३ ॥

सिद्धान्तमाह। असंयोगादिति। राशेः विधिश्रुतौ विधिवाक्ये ऽसंयोगाद् न राशौ अन्वयः किं त्वेकजातीयके द्रव्ये यस्मिन् कस्मिंश्चिद् एकस्मिन् एकजाताधिकारः स्यादित्यस्यायमेवार्थः। यद्यनेकद्रव्येषु संख्यान्वयार्थमुद्योगः स्यात् तदा तस्येत्यत्र एकत्वश्रुतिकोपात् तच्छब्दः द्रव्यमबोधयन् क्रतुमेव बोधयेत्। तस्मादेकजातीयएकस्मिन्संख्यान्वयः ॥ ४३ ॥

शब्दार्थश्चापि लोकवत् ॥ ४४ ॥

ननु तस्य द्वादशशतमित्यस्मात् तद्वृत्तिद्वादशशतमिति बोधः।

Digitized by Google

तत्पदेन श्रुत्यनुग्राहायैक एव पदार्थो गृह्यताम् । गवादिष्वेकस्मिन् तदन्यस्मिंश्च वर्तमानद्वादशशतसंख्याग्रहणे बाधकाभाव इत्याशङ्क्य एकजातीयवृत्तिसंख्याया एव ग्रहणे लोकदृष्टान्तमाह । शब्दार्थ इति । यः वेदे शब्दार्थः स लोकवद्भवति । लोके शतं गावः इत्यत्राश्वादिवृत्तित्वसहितगोवृत्तिसंख्या यथा न प्रतीयते तथा प्रकृते ऽप्येकजातीयवृत्त्यैवेति भावः ॥ ४४ ॥

तस्य द्वादशशतमित्यनेन पशुगतसंख्याभिधानम् । अधि॰ १२ ।

सा पशूनामुत्पत्तितो विभागात् ॥ ४५ ॥

एवमेकजातीयसंख्यासिद्धावपि यत्किञ्चिदिच्छयेति पूर्वपक्षे सिद्धान्तमाह । सेति । सा संख्या पशूनां पशुवृत्तिः न व्रीह्यादिवृत्तिः । उत्पत्तितः लोकतः विभागात् । संख्यायाः गवादिष्वेव साक्षात्परिच्छेदग्रहात् । अयं भावः । लोके पञ्चभिरश्वैः क्रीत इतिवत्पञ्चभिः माषैः क्रीत इति व्यवहाराभावादिति ॥ ४५ ॥

पशुषु गवां नियमः । अधि॰ १३ ।

अनियमो ऽविशेषात् ॥ ४६ ॥

पशुष्वप्यनियमो नियमो वेति संशये पूर्वपक्षमाह । अनियम इति । स्पष्टो ऽर्थः ॥ ४६ ॥

भागित्वाद्वा गवां स्यात् ॥ ४७ ॥

सिद्धान्तमाह । भागित्वादिति । भागित्वाद् बृहदुपकारकत्वात् । गवां नियमः स्यात् ॥ ४७ ॥

प्रत्ययात् ॥ ४८ ॥

साधकान्तरमाह । प्रेति । संख्यान्वयार्थे विशेष्याकाङ्क्षायां प्रकृतशास्त्रेण प्रथमं गोः प्रत्ययात् । असति बाधके तत्परित्यागो ऽनुचित इति भावः ॥ ४८ ॥

लिङ्गदर्शनाच्च ॥ ४९ ॥

लिङ्गेति । तैत्तिरीयशाखायां सप्तमाष्टके प्रथमप्रपाठके सहस्रदक्षिणार्थवादे, ते संवत्सरएकां गामसृजन्तेति सा चीर्णा च शतान्यसृजत त्रयस्त्रिंशतं चेति भूयो भूयो गोमहिमैव श्रूयते । इदं लिङ्गं गोनियमे ॥ ४९ ॥

विभज्य गोदक्षिणाया दानम् । अधि० १४ ।

तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥ ५० ॥

गोद्वादशशतं दक्षिणेति श्रुते तादृशगोद्वादशशतं सर्वेषां मध्ये संस्थाप्य समुदायोद्देशेन दातव्यं ततः ऋत्विजः स्वयं विभज्य गृह्णीयुरिति पूर्वपक्षे सिद्धान्तमाह । तत्रेति । तत्र क्रतौ विभागेन दानम् । एतावदस्मै अमुष्मा एतावदिति विभज्य यजमानेन दातव्यं प्रदानानां संप्रदानानां प्रतिग्रहीतॄणामिति यावत् । पृथक्त्वाद् भिन्नत्वात् ॥ ५० ॥

परिक्रयाच्च लोकवत् ॥ ५१ ॥

लोके यथा काष्ठादिवाहानां स्वामी विभज्य ददाति तथा ऋत्विग्दानस्य परिक्रयरूपत्वाच्च ॥ ५१ ॥

विभागं चापि दर्शयति ॥ ५२ ॥

लिङ्गमप्याह । विभागमिति । श्रुतिरिति शेषः । तुभ्यो वो विश्ववेदा विभजत्विति मन्त्रलिङ्गम् । आग्नीध्रे ददाति ब्रह्मणे ददातीति संप्रदानस्य पृथक्कृत्वा ऽर्थकथनमपरं लिङ्गम् ॥ ५२ ॥

समाख्यानुसारेण दक्षिणाविभागः । अधि० १५ ।

समं स्यादश्रुतित्वात् ॥ ५३ ॥

एवं विभागे सिद्धे किं समो विभाग उत विषम इति संशये पूर्वपक्षमाह । सममिति । स्पष्टम् ॥ ५३ ॥

अपि वा कर्मवैषम्यात् ॥ ५४ ॥

वैषम्यसाधनपूर्वकं पक्षान्तरमाह । अपि वेति । कर्मानुरूपा भृतिर्लोकवद् इति भावः ॥ ५४ ॥

अतुल्याः स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथा ऽभ्युदये ॥ ५५ ॥

सिद्धान्तमाह । अतुल्या इति । परिक्रये दक्षिणादाने विषमाख्या विधिश्रुतौ परिक्रयात् । समाख्यया ऋत्विक्षु दक्षिणांशभागित्ववैषम्यमनूद्य दीक्षाविधिश्रुतौ परिक्रयात्तन्निर्णयात् । एवं विशेषदर्शनात्

Digitized by Google

कर्मणि वैषम्यं पूर्वोक्तं न । ईदृग्भूतिः कुत्रास्तीत्यत आह । अभ्युदये सत्रे । तथा उक्तनिर्णायकशब्दस्य दर्शनात् । तादृशं वाक्यं वेदे श्रूयते । अर्धिनो दीक्षयति तृतीयिनो दीक्षयति पादिनो दीक्षयतीति । अस्य विवरणं कल्पसूत्रकारैः कृतं, यावदध्वर्यवे ददाति तस्यार्धं प्रतिप्रस्थात्रे तृतीयं नेष्ट्रे चतुर्थमुन्नेत्र एतेनेतरेषां दानमुक्तमिति ॥ ५५ ॥

भूनामैकाहे तस्य धेनुरित्यनेन कृत्स्नक्रतुदक्षिणाबाधः । १६ ।

तस्य धेनुरिति गवां प्रकृतौ विभक्तं चोदितत्वात्तत्सामान्यात्तद्विकारः स्याद्यथेष्टिर्गुणशब्देन ॥ ५६ ॥

ज्योतिष्टोमविकारः एकाहः क्रतुविशेषोऽस्ति । तत्र धेनुर्दक्षिणेति श्रुतम् । अत्र धेनुशब्दः किं प्राकृतदक्षिणामध्ये गोमात्रबाधकः उत पूर्ववाक्ये विहितयावद्दक्षिणाबाधकः । एतन्निर्णयाय, गौश्चाश्वश्चाश्वतरश्चेत्यादिना मायान्तान् प्रथमैकवचनान्तांश्चकारसहितान्पठित्वा तस्य द्वादशशतं दक्षिणेति श्रुतम्, ज्योतिष्टोमे मिलित्वा दक्षिणा उत प्रत्येकमिति संशयः । एतदर्थमुक्तवाक्ये गवादीनुद्दिश्य दक्षिणेति विधीयते उत दक्षिणामुद्दिश्य गवादिकं विधीयत इति संशयेषु सत्सु पूर्वपक्षमाह । तस्य धेनुरितीति । तस्य धेनुरित्यनेन प्राकृतः गौरेव विक्रियते । कुतः, प्रकृतौ ज्योतिष्टोमे दक्षिणावाक्ये विभक्तं विभज्य प्रत्येकं दक्षिणात्वेन चोदितत्वात् । विहितत्वात् । ननु धेनुरिति वाक्यं पक्षीकृत्य प्राकृतगोबाधकत्वं साध्यते । तत्र प्रकृतौ विभक्तं चोदितत्वादिति हेतुः इयं गौरश्वत्वादितिवत् प्रयुक्तः सूत्रकारेण न सदनुमानमित्याशङ्कायामुच्यते सूत्रकाराभिप्रायः । धेनुरितिवाक्यविहितं वस्तु, प्रकृतेन गौर्दक्षिणेति वाक्येन जनितज्ञानविषयप्रकृतिकं, प्राकृतवाक्यस्य सजातीयवाक्यजन्यज्ञानविषयत्वात् । यो यादृशवाक्यसजातीयवाक्यजन्यज्ञानविषयः स तादृशवाक्यजनितज्ञानविषयप्रकृतिकः यथा सौर्ययागः इत्यनुमानमभिप्रेतम् । तस्य धेनुरित्यनेन पक्षः सूचितः । गवामित्यनेनोक्तं साध्यं सूचितम् । तत्सामान्यादित्यनेन हेतुः सूचितः । तद् धेनुरिति वाक्यं तेन सामान्यात् साजात्याद् यथेष्टिरित्यनेन दृष्टान्तः सूचितः । इष्टिः सौर्ययागः गुणशब्देन

Digitized by Google

निर्वापशब्देन निर्वापशब्दघटितोत्पत्तिवाक्येन जनितज्ञानविषयत्वेनेति यावत् । अयं भावः । सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यत्र कथंभावाकाङ्क्षापरिपूरकशब्दाकाङ्क्षायां यथा द्वारमित्यत्र प्रकरणादिना परेच्छाविषयीभूतपिधानशब्दः कल्प्यते तथा वाक्यस्य निर्वपतिशब्दघटितत्वेन क्लृप्तनिर्वापकः दर्शपूर्णमासप्रयोगउपस्थितः तद्वदिति शब्दः कल्प्यते । तथा च तत्प्रकृतिकत्वं सिद्धम् । एवमेवात्र धेनुर्दक्षिणेत्यनेन गोप्रकृतिकत्वमश्वप्रकृतिकत्वं वा ऽऽश्रयणीयमिति संदेहे गोप्रकृतिकत्वाश्रयणे लिङ्गं धेनुरिति । तत्रापि निर्वपतिशब्देन तदर्थघटितप्रयोगोपस्थितिः तथा धेनुशब्दस्य गोत्वसमानाधिकरणसकृत्प्रसूतत्वं शक्यतावच्छेदकमतः तद्घटितार्थबोधकतया तेन शब्देन तद्घटितार्थको गोरेवोपस्थाप्यतइति तत्रैव द्वादशशतसंख्याबाधं कृत्वैकत्वं निविशते सकृत्प्रसूतत्वं चेति प्रकृतौ पूर्वोक्तदक्षिणावाक्येन यदि गवादिसमूहो दक्षिणात्वेन विधीयते तदा गौर्दक्षिणेति वाक्यमेवाप्रसिद्धमतः तद्घटितसाध्याप्रसिद्धिरिति तद्वारणाय तद्वाक्यप्रसिद्धिसंपादको हेतुः प्रकृतौ विभक्तं चोदितत्वादिति । यतः गवादीनुद्दिश्य दक्षिणा विधीयते अतः गवादयः प्रधानं दक्षिणा ऽङ्गं प्रतिप्रधानमङ्गावृत्तिरिति न्यायेन गौर्दक्षिणा अश्वो दक्षिणेति वाक्यानि तथा च न साध्याप्रसिद्धिरिति भावः ॥ ५६ ॥

सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे विकृतौ श्रुतिभूतं स्यात्तया समवायादिकर्मभिः ॥ ५७ ॥

सिद्धान्तमाह । सर्वस्येति । सर्वस्य गवादिमाषान्तस्य विकारः । तथा हि । यतः प्रकृतौ दक्षिणामुद्दिश्य गवादयो विधीयन्ते । कुतो ऽयमर्थमिति चेच्छृणु । यदि दक्षिणा विधीयते तदा द्वादशशतसंख्याया दक्षिणायामन्वयः उत गवि । आद्ये ऽपि गवादिभिः सहान्वयवेलायामेव संख्यान्वयः उत पश्चात् । आद्ये दक्षिणाया विरुद्धत्रिकद्वयापत्तिः । द्वितीये वाक्यभेदः । यदि च संख्याविशिष्टदक्षिणाया अन्वयः तदा गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यादिति न्यायविरोधः । किं च संख्याविशिष्टदक्षिणायाः

Digitized by Google

गवादिमाषान्तेषु संख्यान्वयापत्तेः । इष्टापत्तौ भागि चान्नवामितिन्यायविरोधः । यदि च द्वादशशतसंख्यायाः गव्यन्वयं कृत्वा पश्चात्तत्र दक्षिणान्वये विशिष्टोद्देश्यत्वप्रयुक्तो वाक्यभेदो दुर्वारः । अपि च दक्षिणापदोत्तरं बहुवचनापत्तिश्च । गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति नियमात् । अतः दक्षिणामुद्दिश्य गवादयो विधीयन्ते । इत्थं च द्वादशशतविशिष्टगौः तदितरे च परस्परसहिता दक्षिणया संबध्यन्तइति न वाक्यभेदः । न वा विरुद्धत्रिकादिः । एवं च दक्षिणार्थस्य दक्षिणाकार्यस्य ऋत्विगानतेः एकत्वं क्लृप्तं प्रकृतौ तथा गवादिगुणानां च दक्षिणारूपैककार्यत्वमपि । तस्माद्विकृतौ अयं धेनुर्दक्षिणेति विहिते वैकृते धेनुरूपार्थे प्रकृतौ दक्षिणासाधनत्वेन क्लृप्ता यावन्तः पदार्थाः तावतां मिलित्वा यत्कार्यं तत्कारित्वं हि ज्ञाप्यते यतः अतः तावत्कारित्वं श्रुतिभूतं श्रुतितात्पर्यविषयः । तया दक्षिणाया समवायात् संबन्धात् । धेनुर्दक्षिणेत्यत्रापि पूर्ववद्धेनोरेव दक्षिणानुवादेन विधानात्तस्याश्चर्त्विक्तु संबन्धः क्लृप्त इति भावः । दक्षिणाया ऋत्विक्संबन्धश्च स्वजनोत्साहाश्रयत्वं दक्षिणाप्रतियोगिकनिरुक्तसंबन्धानुयोगिका ऋत्विजः कर्मभिः क्रतुसंबन्धकर्मभिः संबध्यन्ते । एतादृशप्रणाड्या धेनोः क्रतुसंयोगात् संबन्धाचिखिलदक्षिणाबाधः । प्रकृतौ गवादिसमुदायरूपस्वाभिचदक्षिणाजन्योत्साहाश्रयत्विक्साध्यत्वसंबन्धेन समुदायवैशिष्ट्यं क्रतोः क्लृप्तम् । प्रकृते ऽपि धेनोरुक्तसंबन्धेन क्रतुसंयोगात् सर्वस्य बाध इति विशिष्टसूत्रस्य निर्गलितो भावः । एतादृशसंबन्धबोधकमेवैकत्वमित्यारभ्य कर्मभिरित्यन्तम् ॥ ५७ ॥

चोदनानामनाश्रयाल्लिङ्गेन नियमः स्यात् ॥ ५८ ॥

ननु यथेष्टिर्गुणशब्देनेत्युक्तं तत्र किमुत्तरमत आह । चोदनानामिति । चोदनानां विकृतीष्टिचोदनानां वैकृतविधीनामिति यावत् । अनाश्रयात् । इतिकर्तव्यताकाङ्क्षापूरकशब्दानाश्रयात् । शब्दाभावादिति यावत् । लिङ्गेन निर्वपतिचोदनाचोदितत्वादिलिङ्गेन नियमः । तत्तत्प्रकृतिकत्वनियमः स्यात् । धेनुर्दक्षिणेत्यत्र प्राकृतदक्षिणामुद्दिश्य धेन्वाः प्रत्यक्षविधानाच्च लिङ्गेन प्रकृतिभावनिर्णय इति भावः ॥ ५८ ॥

Digitized by Google

एकां गामित्यनेन प्राकृतसंख्याया बाधः । अधि० १७ ।

एका पञ्चेति धेनुवत् ॥ ५९ ॥

सोमापहरणनिमित्ते कर्मणि एकां गां दक्षिणां दद्यात्पञ्च वेति श्रुतम् । पञ्चेत्यस्येति च । अत्र सर्वनिवर्तिकोत गोवृत्तिप्राकृतसंख्यानिवर्तिकेति संशये पूर्वपक्षमाह । एकेति । धेनुवत् । यथा धेनुः सर्वनिवर्तिका तथा ॥ ५९ ॥

साद्यस्क्रे त्रिवत्सेन सर्वेषां क्रयार्थानां बाधः । अधि० १८ ।

त्रिवत्सश्च ॥ ६० ॥

एवं पूर्वपक्षे उत्तरमनुक्त्वा अधिकरणान्तरमारभते । त्रिवत्स इति । साद्यस्क्रे त्रिवत्सः साण्डः सोमक्रयण इति । त्रिवत्सः त्रिवत्सर इत्यर्थः । प्रकृतितः अजादिदशद्रव्याणि प्राप्तानि तत्र दशमध्ये श्रूयमाणस्य वृषभस्यैव बाधकः उत दशद्रव्याणामिति संशये पूर्वपक्षसिद्धान्तावतिदिशन्नाह । त्रिवत्सश्चेति । धेनुवदिति पूर्वसूत्रादनुवर्तते । पूर्वपक्षसिद्धान्तौ धेन्वधिकरणवदित्यर्थः । पृथगधिकरणबीजमाकराज्ज्ञेयम् ॥ ६० ॥

तथा लिङ्गदर्शनम् ॥ ६१ ॥

लिङ्गमपि साधकमाह । तथेति । उक्तादन्यसाद्यस्क्रे स्त्री गौः सोमक्रयणी व्यावृत्ता इतेषां स्पर्धेति । अस्यार्थः । यतः साद्यस्क्रे स्त्री गौः निखिलसोमक्रयसाधनं बाधित्वा सर्वस्थाने स्थिता अतः स्पर्धा कलहो निवृत्तः । यदि वृषभमात्रस्य बाधिका भवेत्तदा शेषाः स्वसंघस्थितमृषभं बाधितवत्यै क्रुध्येयुरेवेति स्पर्धा निवृत्तेत्यसङ्गतम् । इदं लिङ्गं सर्वबाधे ॥ ६१ ॥

एके तु श्रुतिभूतत्वात्संख्याया गवां लिङ्गविशेषेण ॥ ६२ ॥

पूर्वस्थितपूर्वपक्षोत्तरमाह । एकेति । एकां गां पञ्च गा दक्षिणेत्यनेन प्राकृतसंख्यायुक्ता गावः निवर्तन्ते । नाश्वादयः । एकेत्यस्य द्वादशशतसंख्याविशिष्टा या गावः तत्स्थाने एका गौरिति हि श्रुतिभूतं श्रुतितात्पर्यम् । न हि एकामित्यस्य दक्षिणाया ऽन्वयः संभवति । एकदक्षिणायाः प्रकृतौ क्लृप्तत्वेनातिदेशादेव प्राप्तेः वाक्यवैयर्थ्यात् । अतः गवां गोवृत्तिसंख्याया एकामिति स्त्रीलिङ्गेन च संख्याया गोवृत्तेर्निवृत्तिरिति भावः ॥ ६२ ॥

Here "Cupid's arrows" alone is enough to make the separation unbearable; over and above this are mentioned other (causes), *the beloved being at a distance, &c.*

This *Conjunction* becomes threefold, as caused by the mixture of two good, and one good another bad, and of two bad causes. But these are not separately defined. Examples:

"The family untainted; appearance gentle; intellect versed in revelation; the strength of arms enough; wealth clear; sovereignty unimpeded;—these thy conditions are naturally sweet; and through these this person becomes elated; but these are only your goading hooks."

Here we have a conjunction of good ones. In the previous example we have that of improper ones.

In the following—

"The moon dimmed in the day, woman with faded youth, a tank deprived of lotus, a handsome person illiterate, a lord addicted to wealth, good men always hard pressed, evil men (prominent) at a king's court—these are the seven darts to my heart."

[Bhartrihari's *Nītiçataka.*]

(*a*) There already being a dart in the shape of the 'dimmed moon,' others are also mentioned. And here we have the conjunction of the good and the bad.

116 (*concld.*)—[*Page* 753.] Another kind of Conjunction results when properties and actions are (described as) simultaneous.

Another Form of Conjunction.

Examples in order—

(1) The Simultaneity of two Properties—

"O king! this thy army, having suppressed the enemies' faces, soon became untainted (or flawless.) And the faces of evil men became tainted or depressed."

(*a*) The 'moon' is not proper (or good) in itself, but as qualified by dimness, it becomes improper.

Here of *clearness* and *taintedness.*

[*Page* 754.] (2) Of Actions—

"This the separation from my beloved, suddenly brought about; and the days are sure to be lovely on account of the absence of heat, owing to the rising of fresh clouds."

Vikramorvaçīya Act IV.]

Here of *being brought about* and *sure to be.*

(3) Of Action and Quality—

"Thy eyes like the white lotus became reddened, when directed towards thy enemies. And O Mundane Indra! On them fell the glance of misfortune."

Here of *reddening* and *falling.*

Seeing such instances as—"he blandishes the sword—and spreads his fame," "you weild the sword in the battle-field, and the Gods are with praising voices in the heavens,"—we cannot restrict the Conjunction, as residing either in different substrates alone or only in the same substrate.

(34) Paryāyā or Sequence.

117 (*concld.*)—[*Page* 755.] When the same object occurs (*a*) successively in more than one, it is Sequence.

Where a single object occurs (without the mention of the cause), or is made to reside (having the cause mentioned), in more than one, then we have the Figure *Sequence.*

Examples in order—

(1) One occurring in many—

"O poison! who directed you to this successively higher localities of resideuce? first of all in the ocean's heart; then in the throat of the Çiva; and at present in the words of evil men."

[*Bhallataçatuka.*]

Or again—

"बिम्बोष्ठएव रागस्ते तन्विपूर्वमदृश्यत ।
अधुना हृदये ऽप्येष मृगशावाक्षिलक्ष्यते" ॥

(*a*) This is said in order to differentiate it from Conjunction, as also from the two following.

"Previously was redness seen in your lips alone, now O deer-eyed one! it (affection) is seen in your heart also."

Here the two "*Rāgas*" being materially different, are yet understood as one, and hence the example is not contradictory (of the '*singleness*' of the definition).

(2) One made to reside in many—

"The emotion of the Demons with regard to the wearer of the Kaustubha was located in the Bimba lips of their beloved (Vishnu having attained the form of a lovely woman) by the Flower-arrowed One."

Here the cause, *the agency of Cupid*, is mentioned.

Another kind of Sequence.

117 (*contd.*)—[Page 758.] Another kind of this results from an inverted process.

i. e. the occurrence, &c. of many in one.

Examples in order—

"Strange it is that the sweet and graceful words of evil men at first clearly exhibit nectar, and that soon enough they bear testimony to internal poison, the cause of delusion."

Here in one substrate, *the words of evil men*, occur successively the two actions; and the cause is not mentioned.

"That low-walled house, and this palace lighted from heaven, that red and jaded cow, and the herd of bellowing elephants! that sound of the *musala*, and this the sound of woman's songs!—strange it is that in a few days, this Brāhmana has attained to such an opulence!"

Here the cause, *opulence*, is mentioned.

Here since the *acceptance* and the *renouncing* are not both attributed to the same agent, therefore it is not *Parivritti* (of which a necessary condition is the fact of the *accepting* and the *renouncing* both belonging to the same agent).

(35) Anumāna or Inference.

117. (*concld.*)—Inference is the description of the Reason and the Conclusion.

Reason is threefold—being a property of the Minor term, being universal affirmative, or universal negative; and *conclusion* is the permanent relation of the object having the reason for its property (*i. e.* the Minor term), and the pervaded (*i. e.* the Major term).—*e. g.*

[*Page* 760]. "Since the heart-piercing arrows are seen to enter wherever the brows are moved by the eyes moving like waves; therefore (we infer) the angry sovereign Cupid always runs before these (women), having his bow encircled with arrow in his hand."

Here the second half is the conclusion, the former half being the reason.

[*Page* 761]. The inversion of the order of the premises and the conclusion, giving no peculiar charm, is not shown.

(36) Parikara or Insinuator.

118 (*contd.*)—Insinuator is the description (of a certain object) with significant epithets.

Example—

"The archers desire to fulfil his ends, even at the expense of their lives—the archers, valiant, presented with riches, renowned in battle, not won over by others, and not opposed to each other."

[*Kirātārjunīya*, Canto I.]

[*Page* 763]. Though the *Significant* has already been mentioned as being the negation of the fault of *Insignificant*, yet there arises a peculiar charm by the attribution of many epithets to a single object; and then only is it included among Figures.

(37) Vyājokti or Artful Assertion.

118 (*concld.*).—The Artful Assertion is the concealing of the unhidden form of things.

The form of things, though not very explicit, yet somehow made so, being somehow concealed, gives rise to the *Artful Assertion.* This is not the same as *Concealment* since here (in the *Artful Assertion*) there can be no similitude between the object compared and that compared to.

Example—

"Being subjugated by the horripilation, etc. attendant upon the touch of the hands of Pārvatī offered to him by the Lord of mountains; and rather astonished at the marriage rites, Çiva spoke out 'Oh how cool is Himalaya's hand;' and as such being smilingly looked upon by the females, may Çiva protect!"

Here the *horripilation* and *shivering* brought about as manifestations of the quality of Goodness (Çiva's love for Pārvatī), — have their real forms concealed by being expressed as caused by the cool touch of Himalaya's hands; and thus bring about the Figure *Artful Assertion*.

119 [*Page* 767]—When an object, either asked or unasked, being directly expressed by words, finally ends in the setting aside of similar objects, it is Special Mention.

(38) Parisankhya or Special Mention.

Any matter, otherwise proved and directly expressed by words, when leading, in the absence of any other purpose, to the setting aside of similar matters, it is *Special Mention*. Here the assertion may be accompanied, or otherwise, by a question; and these again are each twofold, inasmuch as the object set aside, is either implied or directly expressed. Thus then does this Figure become fourfold.

Examples in order—

(1) The object set aside—implied and preceded—by question—

"What is to be addicted to by men? The flawless proximity to the Celestial River. What is to be meditated upon in seclusion? The two feet of Vishnu. What is to be worshipped? Virtue. What is to be desired? Pathos (or sympathy) accompanied by which the heart becomes beautified as it were."

(2) The object set aside being directly expressed and preceded by question—

"What is ornament? Fame, not jewels. What is to be performed? Good deeds befitting good men, not misdeeds. Which

vision is unimpeded? Intellect, not eyes. Who, other than you, knows the discrimation between evil and good?"

(3) Implied, without question—

"Curls in the hairs; redness in the hands, feet and lip; hardness in the breasts; and unsteadiness resides in the eyes."

(4) Expressed without question.—

"Devotion to Çiva, not to riches; addiction to learning, not to women, the weapons of Cupid; anxiety for fame, not for the body;—all these are seen in good men."

(39) Kāraṇamālā or the String of Causes.

120 *(contd.)* [*Page* 770.]—The String of Causes is that where the causality belongs to the preceding successively (to the following).

जितेन्द्रियत्वम् &c. (*Vide* Text, p. 484.)

The Figure 'Cause'—defined (by Udbbata) to be the 'delineation of the effect as identical with the cause'—is not described, since it is devoid of all charm, like the statement 'butter is longevity.'

[*Page* 771.] In the couplet—

"अविरलकमलविलासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति सम्प्रति लोकोत्कण्ठाकरः कालः" ॥

["Now is come the lovely season, producing anxiety in men's hearts, and having the graces of uninterrupted lines of lotus, and intoxicated, as it were, by the humming black-bees, and the joy of the cuckoo."],—

the poetical charm has been said by those wishing to class it among poetry, to lie in the *Alliteration*, and not in the existence of an independent Figure 'Cause.' In fact the 'Cause' is nothing more than the *Poetical Reason*.

(40) Anyonya or the Reciprocal.

120-121 *(contd.)*.—It is the Reciprocal, when two objects produce each other through an action.

Digitized by Google

The Figure named *Reciprocal* arises when to objects belong causality with regard to each other, through a common (*i. e.* similar) action.

Example—

"Tanks add beauty to the swans; and so do the swans to the tanks; these two only beautify each other."

Here the causality of both (*swan* and *tank*) with regard to each other, is through the common action of "adding beauty."

(41) **The Uttara or Reply.**

121-122 *(contd.)* [*Page* 773].—It is the Reply—(1) when (there being no question directly expressed) the question is implied by merely listening to the reply; and (2) when, the question being directly expressed, the reply—being improbable—is repeated more than once.

(1) When the preceding sentence (the question) is guessed out merely by the comprehension of the reply, it is one kind of *Reply*—*e. g.*

"O merchant! whence can I have ivory or tiger-skin, so long as my daughter-in-law with lovely locks, is in my house?"

Here the sense implied is that which must have been spoken by the purchaser—"if you have ivory and tiger-skin, take the price, and let me have them."

This is not *Poetical Reason*, because the *Reply* does not resemble it in form; and because the reply is not the producing cause of the question (as in the *Poetical Reason*) (but it is only the signifying cause). Nor is this *Inference*, since the premises and the conclusion are not mentioned as referring to a single object. Hence *Reply* is an independent Figure.

(2, [*Page* 775]. When after a question, the reply looks like improbable, owing to its not being generally comprehensible, it is another kind of Reply.—*e. g.*

Digitized by Google

"What is adverse? The process of fate. What is hard to be obtained? Appreciative people. What is pleasure? A good wife. What is pain? The existence of evil men."

In the questioning Parisaṅkhyā the import lies in the (implication of the) setting aside of another; whereas here the import rests in the directly expressed meaning. In this lies the difference of these two.

122-23 (*contd.*)—[*Page* 776]. Where a subtle meaning somehow hinted or implied, is signified for the sake of another (meaning), by means of some property, then we have the Subtle.

(42) Sukshena or The Subtle.

Somehow—*i. e.* by means of *gestures*, etc.

Subtle—*i. e.* comprehensible only by a keen intellect.

Example—

"Some friend having seen the marks of Kuṅkuma blurred by the perspiration from the face, smiled and painted a sword in the hand of the young woman, signifying (thereby) her masculinity."

[*Page* 777.] Here some one having seen her form, inferred her masculinity, which is cleverly manifested by painting the sword in the hand, proper only for men.

Or again (by means of *gesture*)—

"Knowing the clever man with significant glances to be longing for a time of meeting, she contracted the sporting-lotus."

[*Page* 778.] Here the paramour being guessed out, through his significant glance, to be desirous of having some hint as to the time of meeting, he is informed of the *night* being the time, by the contraction of the lotus (which happens only at night).

123 (*concld.*)—A successive using in the excellence of things to the highest pitch, is Climax.

(43) Sâra or Climax.

परावधि = that whose limit is the highest point; since excellence rising successively can rest there alone.

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

विधिमीमांसा, अप्पयदीक्षितकृता श्री तै॰ रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः .. .. ।≈)॥

गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतडाक्तरबालन्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः ≡)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम् .. .. ४)

मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

शाश्वतधर्मदीपिका, ... १)

अमरकोशः सटीकः .. .. ४)

योगवार्त्तिकम् .. .. २॥≈)

शीतपदार्थनिर्वचनम् .. .. ३)

वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोल्लूकशास्त्रि-
संशोधिता .. .. ४)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम् ५।॥)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३≈)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः । .. .. २।)

वेदपूर्तः प्रथमो बिन्दुः सत्संप्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥≈)

वेदपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३।॥)

शास्त्रदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-
शास्त्रिणा संशोधिता पूर्वारूपा .. .. ५।॥)

माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता, ... ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

CONTENTS.

Page.

TATTVAMUKTÂKALÂPAḤ WITH SARVÂRTHASIDDHI, Ed. Râma Miśra Śâstrî, Professor, Sanskrit College, Benares. 449

KÂŚIKÂVYÂKHYÂ PADAMANJARÎ, Ed. Dâmodara Śâstrî, Professor, Sanskrit College, Benares. 465

JAIMINISÛTRAVṚIṬTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityânandapanta, Scholar, Sanskrit College, Benares. 481

KÂVYA-PRAKÂÇA, Ed. Gangânâth Jhâ, M. A., Darbhanga. 497

Digitized by Google

काशीविद्यासुधानिधिः

OCT 31 1898

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 10.] October, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.]

[*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

OCT 31 1898

एव तद्व्यङ्ग्यद्रव्यत्वाद्धर्मत्वारोपः । वस्तुतस्तु सा न द्रव्यं न च गुण इति परोक्तं बाधितुमाह । सापीति । प्रभावतो यथा प्रभा धर्मत्वेन प्रख्याता तथा बुद्धिरपि बोद्धृधर्मत्वेन प्रत्यक्षादिभिः प्रसिद्धा न चात्र प्रतिबिम्बादिवद् बाध इति भावः ॥ ७ ॥

उक्तार्थे सयूथ्यविमतिं वारयितुं तदुक्तप्रकारन्तावदाह । नित्येति ।

मू० नित्या धीर्हेतुतोऽस्या भवति विषयितेत्येवमिच्छन्त एव द्रव्यत्वं नास्ति बुद्धेरिति गुणगणने तामपि स्थापयन्ति । अद्रव्यत्वं कथं स्याद्विकृतिमति विकृत्युज्झने पूर्ववत् स्यादित्थंभूताद्विकाराद्भवति यदि नातिप्रसङ्गप्रसङ्गात् ॥ ८ ॥

टी० एवकारः स्वोक्तिविरोधसूचनार्थः गुणगणने द्रव्यत्वरहितगुणगणनायामित्यर्थः, एवकारद्योतितं विकल्पमुखेन व्यनक्ति । अद्रव्यत्वमिति । विकृतिमतीति सामान्याभिप्रायेण नपुंसकलिङ्गनिर्देशः, यदि नित्यायां बुद्धौ तत्तत्सामग्रीभिस्तत्तद्विषयित्वावस्थाः संभवन्ति तदा कथमसौ द्रव्यं न स्यात्, न हि विकृतिमति क्वचिदद्रव्यत्वम् अन्यत्र संमतम् । विकृत्यसंभवपक्षे दोषमाह । विकृत्युज्झन इति । पूर्ववत् स्यात्सामग्रीसंपातेऽपि प्रागिव न किञ्चिद्विषयीकुर्य्यादित्यर्थः । विषयित्वलक्षणविकारेण द्रव्यत्वं न स्यादिति शङ्कते । इत्थंभूतादिति । सामान्यलक्षणयोगे सत्यवान्तरवैषम्यात् कथमतज्जातीयत्वमित्यभिप्रायेण प्रत्याह । नेति । अन्यथा बाधक-

Digitized by Google

माह । अतिप्रसङ्गप्रसङ्गादिति । द्रव्यत्वेन सम्मतेष्वपि तत्तदवान्तरवि-शेषोपादानेन द्रव्येतरत्वसाधनं प्रसज्येतेत्यर्थः तदिह सर्वत्र व्याख्येयम् भाष्यानुगुणमान्यपर्य्यमवसेयम् ।

इत्यद्रव्यनित्यबुद्धिवादभङ्गः ॥ ८ ॥

अथ पूर्वापरसरस्यूतसर्वप्रमेयप्रतिष्ठापकं प्रमाणं शोधयितुं सामान्यतः प्रमाणाप्रमाणविभागं तावदाह । सर्वमिति ।

मू० सर्वं ज्ञानं न मानं परमतविजयान्नाप्रमाणं
स्ववाधान्मानामानव्यवस्था तदियमनुमता
लौकिकैर्यौक्तिकैश्च । तत्रामाने त्ववर्ज्यं
स्वरसमिति वदन्त्यन्यथा भानमेके तत्साम-
ग्र्येव तादृग्व्यवहृतिमपरे लाघवादाश्र-
यन्ति ॥ ९ ॥

टी० अयमर्थः न तावत्सर्वं ज्ञानं प्रमितिः प्रतिपक्षविजया-भ्युपगमप्रसङ्गात्, यच ख्यातिरेव नास्ति तत्र कथं विजयप्रसङ्ग इति चेन्न स्वहृदयविसंवादात् परोक्तीनां स्वोक्तिविरुद्धबुद्धिजनकत्वाभावे विवादविलयप्रसङ्गः । अन्यथा स्वोक्तानुभाषणवर्णक्रमपाठादावपि विवादः प्रसज्येत अत एव प्रतिपक्षतो जातापि ख्यातिः प्रमितिरिति न वक्तव्यं स्वोक्तमात्रविषयत्वेऽनुक्तमात्रविषयत्वे स्वोक्तानुक्तमात्रवि-षयत्वे च विवादाद्ययोगात् विरुद्धविषयत्वे त्वन्यतरबुद्धेरप्रमात्वम-परिहार्य्यमिति सर्वबुद्धीनामप्रमात्वमपि प्रतिषेधति । नाप्रमाण-मिति । स्ववचनस्वसिद्धान्तसर्वलोकधीविरोधमभिप्रेत्याह । स्वबा-धादिति । स्वोक्तं लौकिकपरीक्षकसर्वसम्मतमित्याह । मानामा-

Digitized by Google

नेति । एवमन्यथाख्यातिपक्षाभिप्रायेण दर्शिते विभागे भाष्योक्तं पक्षान्तरमपि प्रतिष्ठापयिषुरुक्तस्य प्रतीतिस्वारस्यरसिकैरेकदेशिभिस्स्वं-गृहीतत्वमाह । तत्रेति । अमाने—संशयविपर्य्यासात्मकबुद्धावित्यर्थः अवर्ज्ये ख्यात्यन्तरवादिभिरपि दूरापवर्णेऽपि दुरत्ययं, स्वत एव रसोयस्य तत्स्वरसम् अस्ति हि शुक्तिशकलमेव मया रजततया गृहीतमित्यादिप्रतीतिस्वारस्यं योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । अयथावत् प्रजानाति बुद्धिस्सा पार्थ राजसी । अनात्मन्यात्मबुद्धिर्य्या अस्वे स्वमिति या मतिरित्याद्याप्तवाक्यस्वारस्यञ्च अतो भ्रान्तावन्यथा भानं प्रथममुपन्यस्तं भाष्यकाराभिप्रेतमित्येके वदन्ति । केषाञ्चित्पक्षान्तरपरिग्रहं सहेतुकमाह । तत्सामग्र्येति । व्यवहारविशेषान्यथानुपपत्त्या ह्यन्यथाभानमवस्थाप्यते तत्रान्यथाख्यातिसाध्यतयाऽभिमता व्यवहृतिस्तज्जनकतयाऽभिमतसामग्र्येव संपाद्यताम् अदृष्टचरान्यथाख्यातिसंग्रहस्तन्मध्ये मुधेत्यपरे समाम्नयन्ति पक्षद्वयोपन्यासप्रपञ्चस्तु न्याय*कुलिशे निपुणमवधारणीयः ॥ ९ ॥

इति प्रमाणाप्रमाणव्यवस्था ।

उक्तपक्षद्वये द्वितीयस्य सांप्रदायिकत्वमाह । नाथैरिति ।

मू० नाथैरुक्ता यथार्था विमतमतिरपि न्यायतत्त्वे
तदेतद्भाष्येऽनूक्तान्तदत्र व्यवहृतिरुभयी बा-
धिताऽबाधिताख्या शुक्तौ रूप्यं प्रभाम्भः ।
श्रुतिनयवशतः स्वाप्नमप्यस्तु सत्यं योग्या-
योग्यादिभेदाग्रह इह चरमां गाहते
संप्रतिष्ठाम् ॥ १० ॥

* न्यायकुलिशनामा ग्रन्थ एतद्देशे ऽनायासेन न मिलति ।

टी० विमतमतिः शुक्तिरजतादिबुद्धिस्सा न्यायतत्त्वे भ्रान्त्यधिकरणसिद्धान्ते षष्ठी* चेयं ख्यातिर्यथार्थख्यातिरित्यादिना निर्द्धार्य्यते अयं च पक्षः, अथवा यथार्थं सर्वविज्ञानमिति वेदविदां मतमिति भाष्यकारैरप्यभाषि कथमस्मिन् पक्षे प्रमाणाप्रमाणव्यवस्थादिकमित्यत्राह । व्यवहृतिरिति । बाध्यव्यवहारहेतुर्ज्ञानमप्रमाणं भ्रान्तिरित्युच्यते तत्र मणिप्रभादिदर्शने मण्याद्यर्थप्रवृत्तौ तत्संवादो ऽन्यायत्तः अबाध्यव्यवहारहेतुर्ज्ञानं प्रमाणमभ्रान्तिरिति व्यवह्रियते तत्र कदाचित्पविवृद्धदादौ प्रवृत्तिविसंवादो विषयापक्रमादेरिति भावः । यत्तु शुक्तौ सादृश्यात् रजतसद्भावो मरीचिकायां पञ्चीकरणानुरोधेन तोयसद्भावः स्वप्ने च रथादेस्सृष्टिविशेषतया सत्यत्वं भाषितं तत्र विषयसत्यत्वेऽप्यप्रमाणव्यवहारनिदानमाचिख्यासुर्यथाभाषितमनुभाषते । शुक्ताविति । प्रभाम्भस्सूर्य्यप्रभायां दृश्यमानं तोयमित्यर्थः स्वाप्नं स्वप्नसिद्धं रथादि, यद्यप्यत्रास्मिन् तद्बुद्धिर्नास्ति अतज्जातीयभेदाग्रहश्च न प्रवर्त्तकः तथाऽपि तज्जातीये स्वाभीष्टयोग्यायोग्यादिभेदाग्रहात् प्रवृत्ता व्यवहृतिर्विसंवदेतेत्यप्रमाणव्यवहारोऽस्त्यर्थे घटेतेत्यभिप्रायेणाह । योग्येऽपि । शुक्तिलीनं रजतं मरीचिकास्थं जलं चाङ्गुलीयकसेकाद्यनर्हम् अतस्तदनर्हे तदर्हभेदाग्रहात् प्रवृत्तिर्वितथा भवति एवं स्वाप्नेष्वपि धनपिशाचादिषु जागरदृष्टसरूपेषु तत्तद्भेदाग्रहात् प्रवृत्ता दुराशा मोघा भवति आदिशब्देन नष्टानष्टादिसंग्रहः, चरमां संप्रतिष्ठां व्यवहारविसंवादनिदानतामित्यर्थः ॥ १० ॥

नन्वन्वयव्यतिरेकाभ्यां कारणविशेषस्सर्वैर्व्यवस्थाप्यः तत्र

* आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा । तथाऽनिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकमिति ग्रन्थान्तरेषु सुप्रसिद्धं पञ्चकं ख्यातीनाम् ।

Digitized by Google

चेतनप्रवृत्तिरिच्छातः सा चानुकूलताज्ञानात् न चात्र ज्ञानेच्छाप्रवृत्तीनां भिन्नविषयत्वं युक्तं, यद्यपि शुष्के पतिष्यामीति कर्दमे पतति तथाऽप्यवशागतप्रवृत्तिन्याय इह नास्थेयः इदं रजतमित्यत्रेदमर्थभूतभास्वरद्रव्यजिघृक्षयैव प्रवृत्तेः । न च रजतभेदाग्रहात् अरजते प्रवृत्तिः अग्रहस्य क्वचिदपि प्रवृत्तिहेतुत्वादृष्टेरिति मत्वा भेदाग्रहात् प्रवृत्तावतिप्रसङ्गमाह । भेदाज्ञानादिति ।

मू० भेदाज्ञानात् प्रवृत्तौ न कथमुपरतिः स्या-
दभेदाप्रतीत्या रूप्यारूप्यभ्रमादाविव यदि
न यतोऽनिष्टभेदाग्रहात् सा । आधारे
भेदवर्जं स्फुरति सदृशवस्त्वन्तरे चोपपन्ना
तत्तद्वस्तूचितैव व्यवहृतिनियतिस्त्वन्मते
बुद्धिवन्नः ॥ ११ ॥

टी० यदि निवृत्तिकारणभूतभेदग्रहाभावात् प्रवर्त्तते तथा प्रवृत्तिकारणभूताभेदग्रहाभावात् किं न निवर्त्तेत यथा भेदग्रहस्य निवृत्तिकारणत्वं नेदं रजतमित्यत्र दृश्यते एवमभेदग्रहस्य प्रवृत्तिकारणत्वम् इदं रजतमित्यभ्रान्तबुद्धौ दृष्टमेव ततश्चाभेदग्रहरूपप्रवृत्तिकारणाभावात् प्रवृत्तिप्रतिपक्षभूता निवृत्तिः कथन्न स्यादिति भावः । अथ रजते प्रवृत्तिरपि रजतभेदाग्रहादेवेति दृष्टं स चात्रापि समान इति मन्यसे तर्हि रजतार्थिनः कदाचिद्रजतान्निवृत्तिरपि रजताभेदाग्रहादिति दृश्यते अतो निवृत्तिकारणभूतरजताभेदाग्रहसद्भावात् निवृत्तिरनिवार्य्येत्यभिप्रायेणोदाहरति । रूप्यारूप्यभ्रमादाविवेति । तत्र निवृत्तिरन्यकारणिकेत्यभिप्रायेणाह । नेति । हार्दं विवृणोति । यत इति । सा निवृत्तिः । अयं भावः न ह्यसौ रजतार्थिनस्ततो निवृत्तिरिष्ट-

Digitized by Google

रजताभेदाग्रहात् किन्तु अनिष्टारजतभेदाग्रहात् अरजताद् भेदो-ऽरजतत्वं तदग्रहादेव हि तथापि तदर्थिनो निवृत्तिः कथं प्रवृत्तिर्निवृत्तिश्च भेदाग्रहतस्स्यातामिति चेत् इत्थं प्रतियोगिविषयभेदेन सामग्रीभेदात् इष्टभेदाग्रहात् प्रवृत्तिः, अनिष्टभेदाग्रहान्निवृत्तिरिति । किञ्चोपादानवज्ज्ञानमपि प्रवृत्तिविशेषः तत्र भेदाग्रहः प्रवृत्तिसामान्यप्रयोजकः तद्विशेषस्य तु तद्विशेष इति किन्नो बाध्यते । नन्वधिकरणप्रतियोगिनोरुभयोरन्यतरस्य वा ग्रहणाभावेऽपि तद्भेदाग्रहसिद्धिः किं तत्रापि प्रवृत्तिः स्यान्नेत्याह । आधार इति । भेदाधारे भेदमन्तरेण भासमाने सतीत्यर्थः । स्फुरतीत्यत्र ग्रहणतः स्मरणतो वेति यथासंभवं ग्राह्यं सदृशवस्त्वन्तरेऽभिमते ऽनभिमते वाऽन्यस्मिन्वस्तुनि तत्तदिति इष्टानिष्टविभागाभिप्रायम् । एवमनभ्युपगमेऽन्यथाख्यातिपक्षेऽप्यतिप्रसङ्गो दुर्वार इत्यभिप्रायेणाह । त्वन्मत इति । भ्रान्तेर्हि विशेषाग्रहसहकृतसामग्र्या सिद्धिस्त्वयोच्यते तत्र न ह्यधिकरणादिग्रहणरहितभेदाग्रहस्य सहकारित्वं मन्यसे संशयविपर्ययरूपविशेषोत्पत्तौ च विशेषकारणापेक्षां ब्रूषे तद्वदिहाप्यतिप्रसङ्गपरिहारः । ननु यदा शुक्तौ रजतभेदाग्रहस्तदा तत्र शुक्तिभेदाग्रहोऽपि विद्यते अतोऽनिष्टशुक्तिभेदाग्रहात्ततो निवृत्तिः किन्न स्यात् तत्र शुक्तिभेदभ्रमात् पूर्वक्षणेऽन्यत्र भ्रमकारणतयाऽभिमतशुक्तिभेदाग्रहात् शुक्तिभ्रमः किं न स्यात् शुक्तौ शुक्तिभ्रमो न घटत इति चेत् शुक्तौ रजतधीरप्यघटितैव त्वयाऽङ्गीक्रियते न हि रजतोल्लेखिनी धीरजतविषयेति घटते अदृष्टचरत्वात्, अदृष्टमपि भेदाग्रहविशेषो घटयतीति चेत् तद्वदिहापि शुक्तौ शुक्तिभ्रममघटितं घटयतु, दर्शनादर्शनाभ्यां विशेष इति चेत् एवन्निवृत्तिहेतुत्वेऽपि निध्यातव्यमिति, एतदपि प्रतिबन्द्यैव प्रत्यापितम् अग्रहणस्य प्रवृत्तिकारणत्वं न दृष्टमित्यस्याप्येषैव प्रति-

Digitized by Google

वन्दिः, न ह्यग्रहस्य बुद्धिकारणत्वमप्यन्यत्र दृष्टं भवति अगत्या कल्पनं त्वन्यथापि समानं त्वन्मते गौरवमधिकम् ॥ ११ ॥

इत्यख्यातिसंवलितयथार्थख्यातिपक्षः ।

अथ प्रसङ्गमुखेनान्यथाख्यातिसाधनमनुभाषते । अन्यस्मिन्निति ॥

मू० अन्यस्मिन्नन्यबुद्धिर्न यदि न घटते तत्र वृत्तिस्तदिच्छोरिष्टं तत्साधनं वा यदभिमतमतोऽन्यत्र सा नेति चेन्न । रत्नांशौ रत्नबुद्ध्या विदुरनवगते रत्न एव प्रवृत्तिं ज्ञातस्वेष्टानुषङ्गादविदितमपि स्वल्वाददीतात्र चैवम् ॥ १२ ॥

टी० विवादपदं शुक्तिशकलं रजतज्ञानविषयः रजतोपाया-न्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वात्सम्प्रतिपन्नरजतवत् यदि पुरोवर्तिनो रजतबुद्धिविषयत्वं न स्यात् किन्तत्र पुरुषः प्रवर्तेत सुखे दुःखनि-वृत्तौ तदुभयसाधने वा बुद्ध्यारूढे पुरुषस्येच्छा भवति इष्टे च प्रवर्तेत तदिह शुक्तौ यद्युपादित्सा तदा प्रसाधिका रजतधीर्न स्यात् तर्हि न स्यादेव तत्र प्रवृत्तिरिति, अतोऽन्यत्र सा न सुखदुःखनिवृत्तित-त्साधनबुद्धिविषयादन्यत्र पुंसां प्रवृत्तिर्न दृष्टेत्यर्थः । प्रवृत्तेः स्वविषय-बुद्धिपूर्वकत्वनियमो नास्तीत्यभिप्रायेण प्रत्याह । नेति । व्यभिचार-मुदाहरति । रत्नांशाविति । त्वत्पक्षे हि रत्नांशुविषयेण रत्नभ्रमेण प्रसारितहस्तस्तत्पत्यमनवगतं रत्नमुपादत्ते तत्र रत्नार्थिप्रवृत्तिविषय-भूतं रत्नं न प्रवृत्तिहेतुरत्नधीविषयः प्रभाया एव तत्र धीविषयत्वाद-स्मत्पक्षेऽपि सामान्यतो रत्नजातीयस्मृत्या प्रवृत्तिः न तु तदानीं

Digitized by Google

गृह्यमाणरजतविशेषविषयस्मृत्या तस्यानुभूतचरत्वात् सामान्यतो विदितत्वादप्यविदितत्वन्नास्तीति चेन्न एतावता विदितत्वेन प्रवृत्तिविषयत्वेऽतिप्रसङ्गात् । एवं व्यभिचारस्थलान्तरमाह । ज्ञातेति । किञ्चिदिष्टं क्षीरादिकं कश्चिदुपादत्ते तत्र सामान्यतोऽप्यज्ञाततोयतृणादिकमप्युपात्तं भवति पुरुषप्रवृत्तिविषयत्वन्तत्र नास्तीति चेन्न ज्ञातानामज्ञातानाञ्च तत्प्रवृत्तिजन्यफलाधारत्वाविशेषात् तदेवमविदितस्यापि प्रवृत्तिविषयत्वे पुरोवर्त्तिन इदन्त्वेन विदितस्य रजतत्वेनाविदितस्यापि प्रवृत्तिविषयत्वं कैमुत्यसिद्धमित्यभिप्रायेणाह । अत्र चैवमिति । चकाराद् दूषणान्तरमपि समुच्चिनोति तत्र रजतोल्लेखस्य शुक्त्युल्लेखरूपत्वमसंभवीति पूर्वमेवोक्तं संभवद्विषयत्वे त्वनुमानस्य सिद्धसाधनता शुक्तिरजते इत्युभयग्राहिण एकज्ञानस्य सर्वसम्मतत्वात् रजतत्वविशिष्टज्ञानविषय इत्युक्तेऽपि स एव दोषो यज्ज्ञानं रजतत्वाश्रयतया स्वविषयं गृह्णाति तस्य विषय इत्युक्तेऽपि रजतव्यक्तिं रजतत्वाश्रयतया विषयीकुर्वतो ज्ञानस्य शुक्तिरपि विषय इति स्यात् । अथैतन्निष्ठरजतत्वाश्रयतया ज्ञानस्य विषय इति साध्यते तत्र दृष्टान्तासिद्धिः साध्यस्वरूपासंभवश्च एतन्निष्ठरजतत्वाद्यभावात् स्वविषयरजतताज्ञानविषय इत्युक्तेऽपि न निस्तारः रजतगतरजतत्वोल्लेखिज्ञानस्यैवैतद्विषयत्वसंभवात् । अथ स्वोपादित्साहेतुभूतरजतज्ञानविषय इति ब्रूषे तथाऽपि सहकारिविशेषात्तद्धेतुभूतरजतस्मृतेस्संनिहितासंनिहितानुभवजनितसंस्काराभ्यामुत्पत्तिसंभवात् तद्विषयतयाऽर्थान्तरतैव । रजतानुभवविषय इति विशेषितेऽपि स्मृतिमूलप्रवृत्तिविषये रजते व्यभिचार इति ॥ १२ ॥

अन्यथाख्यातिवादमनुमानतोऽपि प्रत्याचष्टे तत्र बोध्यपक्षीकारेण तावदाह । शुक्तित्वेति ।

मू० शुक्तित्वाद्रूप्यतादेर्न तु रजततया भाति
शुक्तिर्विगीता यद्वा धीत्वाद्यथार्था विमत-
मतिरतो बुद्धिबाधोक्त्ययोगः । वैशिष्ट्यासि-
द्धिमात्रप्रथनमिह परं बाधकस्यापि कृत्यं
किञ्चासत्ख्यातिरंशे प्रसजति भवतामन्यथा-
ख्यातिवेदे ॥ १३ ॥

टी० विगीता शुक्तिर्न रजततया भाति शुक्तित्वात् अरूप्यत्वाद्वा आदिशब्देन रजतविरुद्धार्थक्रियाकारित्वसंग्रहः अन्यथाख्यातिसमर्थनहेतोस्सविशेषणत्वान्निर्विशेषणशुक्तित्वादिहेतुः प्रबल इति द्योतनार्थस्तु-शब्दः । किञ्च मदुक्तस्य विपक्षे गौरवप्रसङ्गो बाधकस्संभवति न तु त्वदुक्तस्य प्रवृत्तिविशेषो हि भेदाग्रहादप्युपपन्नो दर्शितः । अथ बुद्धिपक्षीकारेणाप्याह । यद्वेति । विगीता बुद्धिर्यथार्था बुद्धित्वात् संप्रतिपन्नवत् । नन्वन्यथाख्यातिपक्षीकृता चाश्रयासिद्धिर्धर्मिग्राहकविरोधो वा । अथ विषयांशभेदेन तद्याथात्म्यमभिप्रेतं तदा सिद्धसाधनं धर्मिणस्समानधर्मस्य चानारोपितत्वात् बुद्ध्यन्तरपक्षीकारेऽप्ययमेव दोष इति । मैवम् अत्र हि पुरोवर्त्यर्थे व्यवहर्तुरुपादित्सां प्रत्यव्यवहितहेतुभूता काचिद् बुद्धिरस्तीति सामान्यत उभयाभ्युपेतं यद्यपि सिद्धस्य वा ऽसिद्धस्य वा धर्मिणस्सत्त्वासत्त्वे विधिनिषेधानर्हे तथाऽपि गृह्यमाणयत्किञ्चिदाकारेण सत्ये पर्वतादौ अवयविसंघातप्राकृतपरिणामादिविवादानादरेण पक्षीकरणं सर्वसम्मतं तद्वदिहापि शुक्तिविषयत्वतदविषयत्वादिविवादे सत्यप्युभयानुमतोपादित्साकारणत्वविशिष्टज्ञानपक्षीकारेण च प्रयोगोपपत्तिः यथा च प्रमितिरूपत्वभ्रान्तिरूपत्वविशेषानादरेण शुक्तिशकलस्य

Digitized by Google

रजतज्ञानविषयत्वमात्रं सामान्यतस्साध्यते तच्च प्रमितिरूपत्वे विरोधः भ्रान्तिरूपत्वे त्वप्रसिद्धविशेषणत्वमिति पर्य्यनुयोगं न क्षमते एवमिहापि सामान्यतः पक्षसिद्धिरिति मध्यस्थदृष्टिमनुसंधत्स्व तथाऽप्यत्र साध्यं यथार्थत्वमनारोपितविषयत्वमारोपितविषयराहित्यं वा आद्ये धर्म्यंशादेरनारोपितत्वात्तद्विषयत्वेन सिद्धसाधनत्वम् आरोपितविषयत्वात्यन्ताप्रसिद्धौ चानारोपितविषयत्वमपि दुर्वचम् । अत एव न द्वितीयः निष्प्रतियोगिकनिषेधायोगादित्यचाह । अत इति । यथार्थत्वप्रतिज्ञानवच्चाङ्गावच्छेद्यत्वेन क्वचित् बुद्धिबाधः स्यादित्युक्तेरयोग इत्यर्थः । अयं भावः योगाचारादयो हि स्वप्नादिनिदर्शनेन सर्वप्रत्ययानां प्रत्ययत्वेनायथार्थत्वं साधयन्ति सर्वेषाप्रसिद्धं च यथार्थत्वं प्रतिषेध्यं प्रतिपद्यन्ते तानुद्दिश्यायं प्रयोगः स्यात् पिशाचानां पिशाचभाषयैव ह्युत्तरं देयं तदिह यद्वत्यनेन पक्षान्तरान्वारोहः प्रख्याप्यते कस्तर्हि तान् प्रति दृष्टान्तो वाच्यो यस्तेषां स्वपक्षबाधकबोधः न हि तस्यायथार्थत्वं तैर्वक्तुं युक्तं स्वपक्षासिद्धिप्रसङ्गादिति । ननु बुद्धिबाधः कश्चित्प्रसिद्धो न वा आद्ये कथन्तन्निषेधः, द्वितीये कथन्तरामिति चेत् उच्यते न हि वयं बुद्धिबाधशब्दस्य कंचिदर्थमनुमत्य प्रतिषेधामः किन्तु बुद्धिबाधोक्तिरयोग्यपदसमभिव्याहाररूपा न विशिष्टमर्थं बोधयतीति तत्प्रयोगस्यायुक्ततामात्रं ब्रूम इति भावः । एतेनान्यथाख्यातिः क्वचिदस्ति न वेत्यादिकमपि प्रत्युक्तम्, अस्ति तावत् परस्परविरुद्धाकारभानरूपान्यथाख्यातिस्सर्वेषु वस्तुषु सेयं शुक्तिविरुद्धाकारवत्तयाऽन्यत्र सिद्धान्यथाख्यातिश्शुक्त्यालम्बना न भवतीत्युक्तौ क्वचित् सिद्धस्यैवान्यत्र निषेधः । यत्तु शुक्तेरेव बाधदशायां रजतादन्यथात्वेन भानं न तन्निषेध्यं स्वाकारविरुद्धाकारवत्तया भानमिति त्वयोग्यपदसमभि-

व्याहारमात्रमिति। ननु पूर्वधीबाधाभावे परस्य कथं बाधकत्वमित्यत्राह । वैशिष्ट्येति । बाधकज्ञानं हि पुरोवर्तिनि रूप्यत्ववैशिष्ट्यं नास्तीति बोधयति तच्च रूप्ये सिद्धं प्रतियोगि भवति, अत एव भेदग्रहसिद्धो भेदाग्रहप्रभवप्रवृत्तिरूपसाध्यापहारात् पूर्वोत्तरधियोर्बाध्यबाधकत्वव्यवहारोपपत्तिरिति भावः । असत्ख्यातिदूषणेनान्यथाख्यातिं साधयतामनिष्टप्रसङ्गमाह । किञ्चेति । यद्यप्यधिष्ठानं सत्यं भाति यद्यपि रजतस्य रजतत्वस्य चान्यत्र सिद्धेस्तदारोपे नात्यन्तासत्ख्यातिस्तथाऽपि शुक्तिशकले रजततादात्म्यस्य रजतत्वसंसर्गस्य वा तत्र चान्यत्र चासिद्धस्य निषेध्यस्य ख्यातिविषयत्वादत्यन्तासत्ख्यातिरनिवार्य्या एतावदसत्ख्यातिरङ्गीक्रियत इति चेदिदमपि गौरवान्तरं तथा चासत्ख्यातिदूषणाद्विरन्तव्यम् अन्यथाख्यातिसाधनाद्वेति ॥ १३ ॥

नन्वन्यथाख्यातिमब्रुवानानां सर्वस्या बुद्धेर्याथार्थ्यात्रिशेषाद् भ्रान्तिशब्दः क्वचिदपि न स्यात् न ह्यसावसाधुः, न च साधुरपि निर्विषयः स्यात् स्पष्टदृष्टबोधापलापे च सर्वबोधापलापप्रसक्त्या विश्वविलोपस्स्यादित्यत्राह । योऽसाविति ।

मू० योऽसौ बोधोऽन्यथाधीजनक इति जगे भ्रान्तिरित्युच्यतेऽसौ नेत्थं बोधापलापः क्वचिदपि वदतां बोधमध्यक्षसिद्धम् । यत्र प्रत्यक्षसिद्धादधिकमपि परे निष्फलं कल्पयेयुः सिद्धेरेवात्र तत्तद्व्यवहृतिरिति हि स्थापितं भाष्यकारैः ॥ १४ ॥

टी० अयं भावः अस्ति ह्यधिष्ठानादिगोचरं भेदाग्रहविशे-

Digitized by Google

सहकृतं भ्रान्तिजनकत्वेन युष्मदभिमतं किञ्चित् ज्ञानं तदेव भ्रान्तिरित्युच्यते न चात्र बोधापलापः ईदृशबोधोपलम्भस्याभ्युपगमात् तदतिरिक्तबोधोपलम्भस्याभावाच्चेति । नन्वानादेशिकमेतद् भाष्यादिष्वनुक्तेरित्यत्राह । यथेति । यत्र संप्रतिपन्नैः केश्चिद्व्यवहारस्संभवति तत्र मध्ये न किञ्चित् कल्पनीयमित्यभावजात्यवयविभेदादिनिरासे भाष्यकारैर्निरूपणाय प्रस्तुतार्थश्च भ्रान्तिचिन्तायां प्रदर्शितप्राय इति । ननु चाख्यातिपक्षेऽप्यन्यविशेषणमन्यविशेषणत्वेनेति कथं भाष्ये चोदितं किमिति वा तच्चाप्रदिष्टात्तरं सत्यन्तदुच्यते सर्पभूदलनाम्बुधारादिभ्रमेष्वयं सर्प इदं भूदलनमियमम्बुधारेति सर्पादिविशेष्यलिङ्गभाञ्जि विशेषणानि भवन्ति इयत्तु समानाधिकरणत्वाभिमानात् अतोऽन्यथाख्यातिरवर्जनीयेति चोद्याभिप्रायः परिहारानुक्तिस्तु तत्तद्ग्रहणनिबन्धनवाचकव्यवहारविशेषमात्रमिति स्वयमूहनमाशिष्यशिक्षार्थेति ।

तर्कतत्फलसामर्थ्यादन्यथाधीप्रसञ्जनम् ।
इत्तोत्तरमिति ग्राह्यं दृष्टगौरवलाघवैः ॥

यदेतदाहार्य्यव्याप्यजनितमारोपितव्यापकविषयं ज्ञानं तर्क इति ब्रूषे तज्जनकतयाऽभिमतज्ञानस्यैव तर्कशब्दवाच्यत्वं तस्यैव च मानानुग्राहकत्वमिति ।

इत्यन्यथाख्यातिभङ्गप्रकारः ॥ १४ ॥

अथ स्याद्विरुद्धानियतकोटिद्वयगोचरं संशयात्मकं ज्ञानं सर्वेषां प्रसिद्धं तच्च वस्तुनि विकल्पस्य विरुद्धानियताकारत्वस्य चायोगात् अन्यथाख्यातिरूपमेव तदनभ्युपगमे सन्दिग्धे न्यायप्रवृत्तिः विषयस्संशयश्चैवेत्यादिकमुच्छिद्येतेत्यत्राह । एकाधार इति ।

मू० एकाधारे विरुद्धाकृतियुगयुगपत्ख्यातिर-
न्योन्यबाध्या डोलाविक्षेपकल्पा तदनियति-
रियं धीक्रमे साक्षिणी नः । तस्मात्तत्त-
द्विशेषस्मृतिसमसमयं छन्नतत्तद्विरोधः ख्या-
तस्याधारयोऽर्थः परमिह विषये येन बुद्ध्य-
न्तरं वः ॥ १५ ॥

टी० अयं भावः यदि स्थाणुत्वविशिष्टतया पुरोवर्त्ति भायात् पुरुषत्वविशिष्टतया न भायादेव तथाऽन्यत्र सर्वत्र दृष्टेः । तदयं प्रयोगः विप्रतिपन्नं स्थाणुपुरुषभानं भिन्नाधारे स्थाणुत्वपुरुषत्वे बोधयति स्थाणुपुरुषभानत्वात् स्थाणुपुरुषाविति भानवत् ततश्च पुरोवर्त्तिभानं स्थाणुपुरुषभानञ्च मिथोभिन्नमिति सिद्धं, तस्माद्धूर्द्धद्रव्यभानमनुभवः स्थाणुपुरुषभानन्तु स्मरणं, न चैकस्मिन् पुरुषे स्मृत्यनुभवयोरेकदा संभवं मन्यसे स्मर्यमाणाधारसंशये धर्मिस्फुरणस्य कोटिद्वयस्फुरणस्य च स्मृतित्वाविशेषेऽपि धर्मिस्फुरणस्य कोटिद्वयस्मृतिहेतुसंस्कारोद्बोधकतया पूर्वत्वमनिवार्य्यमिति प्रकारान्तरेणापि धीक्रमं साधयति । डोलेति । संशयडोलाधिरूढा डोलायमानमानस इति रूपकोपमानाभ्यां क्रमेण विरुद्धयोगरूपं व्यज्यते अनियतत्वव्यञ्जकश्च वाकारप्रयोगोऽन्यतः स्फुरणमितरोल्लेखवर्जितं स्वरसतो दर्शयति न ह्यसाविह समुच्चयार्थः तथा सत्यनियमानुल्लेखेन संशयरूपत्वाभावप्रसङ्गात् वाकारश्चाविशेषात् प्रयुज्येत नाप्युपमानार्थः धर्मिणस्ततदन्यत्वानिश्चयेन ततदुपमेयत्वायोगात्, न च मिथः अयमिति पुरोवर्त्तिनिर्देशेनाघटितत्वात् अध्याहारवाक्यभेदयोरवर्जनीयत्वाच्च । अतोऽत्र विकल्पतः

Digitized by Google

प्रवृत्तमिदमव्ययं तत्त्वे तदयोगात् ऊर्द्धः पदार्थः कश्चित् स्थाणुर्भवति कश्चित्पुरुषो भवतीत्यूर्द्धत्वस्य स्थाणुत्वपुरुषत्वाभ्यां विभज्य साहचर्यं व्यनक्ति तदिहायमिति पुरोवर्तिमात्रमगृहीतविशेषमनुभूयते स्थाणुपुरुषौ तु स्मर्य्येते इति विभागः । एतदेव निगमनव्याजेन स्पष्टयति । तस्मादिति । समसमयमित्यगृहीतक्रमयोरनुभवस्मृत्योर्निरन्तरभानाभिप्रायम् । अथवा पुरोवर्त्यनुभवजनितसंस्कारेण कोटिद्वयस्मृतिहेतुसंस्काराभ्यां च संभूय तैर्युगपदेकस्मृतिसंभवात् तदुल्लिख्यमानविषयत्रययुगपत्प्रकाशख्यापनार्थमेतत्. छन्नतत्त्विति च इत्येतद्भेदकधर्मानुल्लेखपरं साधारणः साधारणाकारविशिष्ट इत्यर्थः परं पश्चात् केवलमिति वा एतावतैव संशयव्यवहार इति भावः । ईदृशस्य ज्ञानस्य संशयव्यवहारजनकत्वं न क्वचिद् दृष्टमित्यत्र लाघवं प्रतिबन्दिञ्चाभिप्रेत्याह । येनेति । साधारणख्यातिपरामर्शोऽयम् ईदृशभेदेन संशयरूपज्ञानोत्पत्तिरप्यन्यत्र न दृष्टा व्यवहारविशेषस्तु त्वदिष्टतत्कारणेनैव सिध्येदिति भावः ।

ऊहानध्यवसायौ च परोक्तौ संशयात्मकौ ।
तदन्यत्वेऽपि निर्वाहस्समानन्यायतः स्थितः ॥

इति संशययाथार्थ्यप्रकारः ॥ १५ ॥

सयूथ्यमतभेदौ द्वौ भ्रमे किञ्चित्प्रदर्शितौ ।
अथ प्रतिमतस्थानां प्रलापः प्रतिरुद्ध्यते ॥

तत्र तावत् कथोल्लुञ्चनमतोच्छित्तामनिर्वचनीयख्यातिमधिक्षिपामः तत्र यदाहुः ।

सत्त्वेन भ्रान्तिबाधौ स्तो नासत्त्वे ख्यातिबाधने सदसद्भ्यामनिर्वाच्येत्यादि चानिर्वाच्यत्वं नाम किं वाच्यादन्यत्वं वाच्यत्वराहित्यं

निरुपाख्यत्वं सदसदन्यत्वं सत्त्वासत्त्वरहितत्वं ब्रह्मतुच्छविलक्षणत्व मन्यद्वा किञ्चिन्नाद्यः सर्वलौकिकवैदिकव्यवहारविरोधात् स्ववचनादिविरोधाच्च वाच्यानामेव मिथोऽन्यत्वेन तत्साधने सिद्धसाधनात् सर्ववाच्यान्यत्वमप्येकस्मिन् विद्यत एव न ह्येकस्यापि वाच्यस्य सर्ववाच्यत्वं सर्वेषां वाच्यान्योन्याभावानामाश्रयत्वमित्यप्ययुक्तमनिर्वाच्यादिशब्दवाच्यस्यस्यान्योन्याभावाधारत्वायोगात्, अत एव न द्वितीयः-ब्रह्मणि तुच्छे च वाच्यत्वानभ्युपगमात् तयोरपि प्रपञ्चतुल्यत्वस्वीकारप्रसक्तिश्च, न तृतीयः निरुपाख्यशब्दस्य यौगिकत्वे दत्तोत्तरत्वात् निरुपाख्योपाख्यया च त्वयैव विगीतस्योपादानात् रूढिमात्रस्य परिभाषाप्रायत्वेन विगीतवन्यत्वानुपरोधित्वात् खरशृङ्गाद्यविशेषसाधने दृष्टविरोधादपसिद्धान्ताच्च । एवं स्थिते चतुर्थादीन् दूषयति । दुस्साधेति ।

मू० दुस्साधा बाधधीभ्यां सदसदितरता कुत्रचिद् व्याहतत्वात् सत्त्वासत्त्वञ्च ताभ्यां कथमिव न भवेद्व्याहतेश्चेत् समन्तात् । दृष्टत्वाद्वा विशेषः क्वचिदपि न हि नस्सर्वरूपेण सत्त्वं नासत्ता चानुपाधिर्न च विमतिरिह ब्रह्मतुच्छातिरेके ॥ १९ ॥

टी० बाधधीभ्यामित्युपलक्षणं नाशधीभ्यामित्यपि भाव्यम् अयं भावः सदसदन्यत्वन्तावत्सतामेव सदन्तरव्यावृत्त्या तुच्छव्यावृत्त्या च संभवति सर्वेभ्यस्सद्भ्योऽन्यत्वञ्च त्वया दुर्वचम् अनेकसदनभ्युपगमात् यद्यपि पारमार्थिकं सदेकमेव तथाऽपि प्रातिभासिकानि व्यावहारिकाणि च बहूनि सन्तीति चेत् किमतः अनिर्वच-

Digitized by Google

नीयत्वाभिमतस्य व्यावहारिकसतः स्वस्मादन्यत्वायोगेन सर्वसदन्योन्याभावकात्स्‍र्यासिद्धेः व्यावहारिकराशिबहिर्भावाभ्युपगमे च पारमार्थिकप्रातिभासिकतुच्छकोटिप्रवेशप्रसङ्गेन स्वमतादिव्याघातात् अत एव सत्त्वासत्त्वराहित्यमपि निरस्तं व्यावहारिकसत्त्वराहित्यस्य सत्त्वमात्रराहित्यस्य वा साधने व्याघातात् पारमार्थिकसत्त्वराहित्यविवक्षायान्तु ब्रह्मतुच्छयोरपि तद्राहित्यात्तदविशेषप्रसङ्गः, न हि ब्रह्मण्यपि पारमार्थिकं सत्त्वन्नाम धर्मस्त्वयेष्यते तदपि तच्च प्रपञ्चवत् कल्पितमिति चेदन्यथापि तस्य कल्पितत्वादविशेष एव ब्रह्मणि च तस्य कल्पितत्वे कथं ब्रह्म परमार्थसत् तथात्वे वा विगीतमपि कथन्न तथा, एवं ब्रह्मतुच्छान्यत्वमपि दुस्साधं सत्यस्य तस्य असत्यवृत्तित्वव्याघातात् तदसत्यत्वे तु सत्ययोस्तुच्छातुच्छयोश्च तादात्म्यापत्त्या व्याघातादेव ब्रह्मणि तुच्छे च ब्रह्मतुच्छान्यत्वमसत्यं विद्यत इत्यविशेषश्च । यदप्यन्यत् किञ्चित् तदपि विगीते सत्यत्वं सहेत न वा, पूर्वत्र न विवादः उत्तरत्र न स्वयं सत्यमसत्यं वा आद्ये ब्रह्मान्यत्वानन्यत्वोभयसमुच्चयोभयप्रतिषेधविकल्पेनापसिद्धान्तसिद्धसाधनत्वव्याघातादयः । द्वितीये स्वसाध्यमसत्यं वदतस्ते न किञ्चिदन्यैर्दूषणं देयं तत्प्रदानफलस्य त्वदुक्त्यैव सिद्धत्वादिति । अथ प्रतिबन्द्यभिप्रायेण विपरिवर्तं प्रसञ्जयति । सत्त्वासत्त्वमिति । समाहारद्वन्द्वोऽयं चकारो येनानुधावनप्रसक्तिं दूषयति । व्यात्यन्यथानुपपत्त्या सत्त्वं बाधान्यथानुपपत्त्या चासत्त्वं किन्न कल्प्यत इति भावः । प्रतिक्षेपार्थे कथं शब्दं प्रश्नार्थं मन्यमानस्य प्रत्युक्तिं शङ्कते । व्याहतेश्चेदिति । सत्त्वासत्त्वयोस्सितासितत्वन्यायेन मिथोविरोधात् नैकत्रैकदा तयोस्संभव इति भावः । हार्दमुद्गिरति । समन्तदिति । ततश्चाहतिप्रयुक्तमभवनं त्वदुक्ते ऽपि समानमित्यर्थः ।

Digitized by Google

त्यर्थः। नन्वस्तु नोपधः, तथाप्यनुस्वारपरसवर्णयोः कृतयोः नकारस्य कुत्वप्रसंगोऽत आह। 'तत्रेति'। चुत्वस्य त्वत्र प्रसंगो नास्ति अनुस्वारं प्रति तस्यासिद्धत्वात्॥

"हो ढः"॥ 'सोढेति'। तीषसहेतीड्विकल्पः। 'तुराषाडिति' छन्दसि सह इति ण्विः, अन्येषामपि दृश्यतइति पूर्वपदस्य दीर्घत्वं, सहेः साडः स इति षत्वम्,। 'प्रष्ठवाडिति'। वहश्चेति ण्विः॥

"दादेर्धातोर्घः"॥ 'किं तर्हि तद्विशेषणमिति'। यद्यपि समानाधिकरणं न भवतीत्यस्यैतत्प्रतिपक्षभूतं न भवति समानाधिकरणस्यापि विशेषणत्वोपपत्तेः, तथापि सामानाधिकरण्यपक्षे धातोरित्येतद्विशेष्यम् अत्र तु पक्षे विशेषणमित्यस्यैव प्रतिपक्षता। 'अवयवषष्ठ्यन्तमिति'। अवयवसंबन्धे या षष्ठी तदन्तमित्यर्थः। अत्र स्पष्टमेव प्रतिपन्नत्वं, धातोरवयवो यो दादिः शब्द इति, एवं चोपक्रमेऽपि दकारादेर्धातोरिति व्यधिकरणे षष्ठ्यौ। 'किं[1] कृतं भवतीति'। किमिष्टं सिद्धं भवतीत्यर्थः। 'अधोगित्यत्रापीति'। सामानाधिकरण्ये त्वडागमेन दादित्वस्य विहतत्वाच्च स्यात्। 'कथमिति'। धातुरेवायं न धातोरवयव इति प्रश्नः। 'अथ वेति'। अस्मिन्पक्षे उपक्रमेऽपि दादेर्धातोरिति यथा श्रुतमेव। 'धातूपदेशइति'। एतच्च धातुग्रहणाल्लभ्यते,

नह्यधातोर्दकारादेर्हकारान्तस्य संभवः।
देवानडुद्भ्यामित्यादौ यस्माड्ढत्वं प्रवर्त्तते॥
तदेतदसमीचीनमवधानच्युतं वचः।
यस्माद्दामलिडित्यादेरधातोरपि संभवः॥

तस्माद्धातुग्रहणमावर्तनीयं, तत्रैकमतिरिच्यमानमुपदेशकालं लक्षयति। 'तथा चेति'। पूर्वत्र तु पक्षे व्यपदेशिवद्भावेन दामलिडित्यत्रापि प्रसंगः॥

"वा द्रुहमुहष्णुहष्णिहाम्"॥ द्रुहादय एते दिवादिष्वनेनैव क्रमेण पठ्यन्ते, रधादित्वाद्विकल्पितेटः, तत्र वा द्रुहादीनामिति वक्तव्ये प्रतिपदपाठो यङ्लुक्यपि यथा स्यात् दोध्रुक् दोध्रुट्, अन्यथा निर्दिष्टं यद्गणेन चेति न स्यात्॥

[1] एवमित्यधिकं मु॰ मू॰ पु॰।

Digitized by Google

"नहो धः" ॥ 'परीणदिति'। संपदादित्वात्क्विप्, नहिवृतीति दीर्घत्वम्, उपसर्गादसमासेपीति णत्वं, प्रक्रियालाघवार्थं दकार एव विधातव्ये धकारविधानं झषस्तथोर्धोध इति धत्वं यथा स्यात्, नद्धमित्यत्र रदाभ्यां निष्ठानत्वं च माभूदिति ।

"आहस्थः" ॥ अथ प्रकृतो धकार एव कस्मान्न विधीयते तस्यापि हि चर्त्वेन आत्थेति सिद्धम्, थकारस्यापि चर्त्वेन भवितव्यम्, एवं च कृत्वा ऽऽहनहोर्ध इत्येक एव योगः कर्तव्योत आह । 'आदेशान्तरकरणमिति'। एवमपि तकार एव कर्त्तव्यः। 'झयहोरिति'। 'हकारस्येति'। वचनं हरत्यर्थम्। 'निघाभमिति'। उदि घञ इत्यत्र छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोरिति वचनाद्वा घञ् ॥

"व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः" ॥ अत्र शकारान्तस्य जश्त्वे प्राप्ते इतरेषान्तु कुत्वे तदपवादः षत्वं विधीयते। 'मूलवृट्, धानाभृड्इति'। ग्रहिज्यादिना संप्रसारणं, स्कोः संयोगाद्योरिति सलोपः, षकारस्य जश्त्वं डकारः, वावसानइति पक्षे टकारः । 'भ्रस्जादिराभ्यामित्यादि'। पर्यवपद्यते, व्यवधीयते । 'राष्टिः भ्राष्टि[1]रिति'। गुरोश्च हल इत्यकारे प्राप्ते क्तिचक्तौ चेति वा स्त्रियां क्तिन्प्रत्ययः, तितुत्रेत्यादिनेट्प्रतिषेधः। 'शब्दप्राड्इति'। क्विब्वचीत्यादिना क्विप् दीर्घत्वं, संप्रसारणाभावश्च, छ्वयहणमनर्थकं छ्वोः शूडित्यादिना छस्य शत्वे कृते शान्तानामित्येव षत्वं सिद्धमत आह । 'छ्वोः शूडित्यादि ॥

"एकाचो बशो भष् झषन्तस्य स्ध्वोः" ॥ धातोरिति यदिहानुवर्त्तते तद्व्यधिकरणमवयवषष्ठ्यन्तमेकाच इत्यस्य विशेषणं, झषन्तस्येत्येतदपि तस्यैव समानाधिकरणं विशेषणम्, एवं विशिष्टं त्वेकाच इत्येतदवयवषष्ठ्यन्तविशेषणं तदाह । 'धातोरवयव इत्यादि'। 'झलि सकारइति'। एतेनानुवर्त्तमानस्य झलो विशेषणं सकार इति दर्शयति, किमर्थं पुनरिह झलीत्यनुवर्त्तते, अन्त इत्यस्यानुवृत्तिर्यथा स्यादन्यथा झलीत्यस्य निवृत्तौ तत्संबद्धमन्तइत्यपि निवर्त्तेत । ननु

१ भ्राष्टिरिति नास्ति मु॰ मू॰ पु॰ ।

चत्वारो भष आदेशाः स्थानिनस्तु बशस्त्रयः।
इकारस्य तु न क्वापि संभवोस्ति कथं च न॥

ततश्च वैषम्यात्संख्यातानुदेशो न प्राप्नोति तत्राह। 'च[1]त्वारो बशः स्थानिन इत्यादि'। शास्त्रप्रतीतिवेलायां संख्यासाम्यस्य संभवात् प्रवर्तते यथासंख्यमनुष्ठाने त्वसंभव इत्यर्थः, क्वचित्तु नायं ग्रन्थः पठ्यते, 'भोत्स्यन्त इति'। बुधिरनुदात्तेत्, लृटि स्यः, तत्र व्यपदेशिवद्भावेन धातुं प्रत्येकाचोवयवत्वम्। 'अभुध्वमिति'। धि चेति सिचो लोपः, गुहिदुही स्वरितेतौ। 'अजर्घा इति'। गृधेर्यङ्लुकि द्विर्वचने धातुं प्रत्येकाचो ऽवयवत्वम्, रुग्रिकौ च लुकीति रुक्, जर्गृध इति स्थिते लङादि। 'गर्द्दभयते रिति'। गर्दभमाचष्ट इति णिच्, अग्लावी प्रत्ययो ऽप्रत्यय क्विबादिः। 'असत्येकाज्ग्रहण इत्यादि'। यद्येकाज्ग्रहणं न क्रियेत ततोन्यस्येहाश्रुतत्वाद्बश एव धातोरित्यनेन विशेष्येत बशो झषन्तत्वस्यासंभवाज्झषन्तस्येत्यनेनापि धातुरेव विशेष्येत, ततश्चायमर्थः स्यात्, झषन्तस्य धातोर्योवयवो बश् तस्य भषिति, ततो दामलिडित्यत्रापि प्रसङ्गः, एकाच इत्यस्मिंस्तु सति वृत्तिकारोपदर्शित एवार्थो भवतीति च तत्र प्रसङ्गः, अत्र हि यो झषन्त एकाच् लिडिति न तस्यावयवो बश् दकारः, यस्य चावयवो दामित्यस्य न स झषन्तः। 'क्रोत्स्यतीति'। अत्र ककारस्य घकारो न भवति॥

"दधस्तथोश्च"॥ 'दधातिर्[2]निर्दिश्यत इति'। दध धारणे इत्यस्य ग्रहणं न भवति, शपा तयोर्व्यवायात्, ननु यङ्लुकि व्यवायो नास्ति, ततश्च तस्यैव ग्रहणप्रसङ्गः, एवं च वचनसामर्थ्यादिति वक्ष्यमाणं नाश्रयितव्यं भवति, तस्माद्व्याख्यानमेवात्र शरणम्। 'वचनसामर्थ्यादिति'। नहि दधातिराकारलोपेन विना झषन्तो भवति, एतच्च पूर्वत्रासिद्धे न स्थानिवदित्यनाश्रित्योक्तम्। 'अभ्यासजश्त्वस्य चासिद्धत्वमिति'। वचनसामर्थ्यान्न भवतीत्यपेक्षते, यद्यभ्यासस्य जश्त्वेन विना दधातेर्बश्

१ मु॰ मूल पुस्तके त्वयं ग्रन्थः सूत्रान्ते पठितः।
२ कृतद्विर्वचन इत्यधिकं मु॰ मू॰ पु॰।

क्वचित्संभवति । 'तथोरिति किमिति' । झलीति वर्तते, झषन्तस्येति च, न च तकारथकाराभ्यामन्यो दधो झलस्ति, दध्वोस्तावदिष्टमेव तस्मात्तथोरिति न वक्तव्यम्, एवं च कृत्वा चकारोऽपि न कर्तव्यः, सर्वत्र झलीत्येव सिद्धमिति प्रश्नः । 'आनन्तर्यादिति' । ननु च दध्वोः पूर्वणैव सिद्धं, न सिध्यति, आल्लोपस्य स्थानिवद्भावे सति अझषन्तत्वात् । ननु च पूर्वत्रासिद्धे नास्ति स्थानिवद्भावः, एवमप्यभ्यासजश्त्वस्यासिद्धत्वान्न सिध्यति, यदि त्वभ्यासजश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यमित्यत्र एत्वतुको रित्यपनीयाविशेषेण सिद्धत्वमुच्येत फलिभजिग्रहणं वा सामान्येन ज्ञापकमाश्रीयेत न त्वेत्वविषयमेव, ततस्तथोश्चेति शक्यमकर्तुं, कथं दध्वोः पूर्वेणैव सिद्धम्, इदं तु व्यतिरिक्ते झलि यथा स्यादित्येवमर्थं भविष्यति ॥

"झलां जशोऽन्ते" ॥ 'पदस्यान्ते वर्तमानानामिति' । यदाऽवसाने वर्तमानानामन्तशब्दोऽवसानवचनो न त्ववयववचनः । 'श्वलिड्हिति' । अत्र हकारस्य जश्त्वे प्राप्ते तस्यासिद्धत्वात् पूर्वं ढत्वं, ढकारस्य जश्त्वं डकारः ॥

"झषस्तथोर्धोऽधः" ॥ 'दधातिं वर्जयित्वेति' । अनेनाध इति धातुप्रतिषेधं दर्शयति, यदि धकारप्रतिषेधः स्यात् धकारात्परयोर्नेति ततो गतिबुद्धीत्यादयो निर्देशा नोपपद्येरन्, । 'अलब्ध, अलब्धा इति' । लुङि तथासो, एवमलीढ, अलीढा इति । 'धत्तः धत्थ इति' । धत्वे प्रतिषिद्धे धकारस्य चर्त्वम्, अध इति शक्यमवक्तुम्, इह कस्मान्न, धत्तो धत्थ इति । जश्त्वे योगविभागः करिष्यते, दधस्तथोश्च, झलां जशः, झलाञ्जशो भवन्ति, दधस्तथोः, ततोऽन्ते, अन्ते च झलां जशो भवन्ति, तत्र पूर्वत्रासिद्धमिति भष्भावे जश्त्वस्यासिद्धत्वाज्झषन्तत्वं, धत्वे परस्मिन् सिद्धं जश्त्वमित्यझषन्तत्वाद्धत्वाभाव इति सिद्धमिष्टम् ॥

"रदाभ्यां निष्ठातो नः पूर्वस्य च दः" ॥ निष्ठात इति समासनिर्देशः, तत्र प्रधानभूततकारो रदाभ्यामित्यनेन विशेष्यते न गुणभूता निष्ठेत्याह । 'रेफदकाराभ्यामुत्तरस्येति' । तेन चरितं मुदितमित्यत्र निष्ठाया अव्यवधानेऽपि तस्येटा व्यवहितत्वान्नत्वं न भवति । 'अवमू-

र्णमिति'। गुरी उद्यमने, श्वीदितो निष्ठायामितीट्प्रतिषेधः, पूर्वेषु ष्यक्षः क्षितीति। 'भिन्नः भिन्नवानिति'। आदेशे नइत्यकार उच्चारणार्थः, तेन दकारस्य स्थाने शुद्धो नकारो भवति। 'कृतः कृतवानिति'। ननु यथा कृपो रो ल इत्यृकारस्यापि रेफस्य लकारो भवति तथेहापि ऋकारस्य रेफमाश्रित्य नत्वं प्राप्नोत्यत आह । 'इत्यत्रेति'। युक्तं तत्र सामान्योपादानादिह तु न सामान्यमुपादीयते किं तर्हि व्यञ्जनं किमात्मकमर्द्धमात्रात्मकम्, ऋकारस्तु मात्राचतुर्भागात्मकः, अस्तु वा सामान्यनिर्द्देशस्तथापि न दोष इत्याह। 'सामान्यनिर्द्देशे चेति'। ऋकारे ह्यभितो ऽभक्तिर्मध्ये रेफभक्तिस्ततश्च परयाऽभक्त्या व्यवधानान्नास्ति नत्वप्रसङ्गः। 'चरितं मुदितमिति'। नइत्यनुच्यमाने इटो निष्ठाभक्तत्वात्तस्य नत्वप्रसङ्गः। 'परस्य माभूदिति'। परस्यैव माभूदित्यर्थः, असति पूर्वग्रहणे पाठक्रमे निष्ठा प्रत्यासन्नेति तद्दकारस्यैव नत्वेन भाव्यं, तेनैतदपि न चोदनीयं बहिरङ्गत्वाल्लाक्षणिकत्वाच्च न भविष्यतीति, किं च पदस्येत्यधिकारात्पदावस्थायां नत्वविधानाद्बहिरङ्गत्वमपि नास्ति, केवलस्य वर्णस्यानुपदेशात्प्रतिपदोक्तत्वमपि नास्ति, यद्यपि प्रत्यासत्तिर्नापेक्ष्यते तथापि पञ्चमीनिर्द्देशात्परस्यैव प्रसङ्गः, कार्तिरित्यत्र बहिर्भूततद्धितापेक्षत्वाद्बहिरङ्गा वृद्धिः वृद्धेश्च यन्निमित्तं तदेव रेफस्याप्युरण्रपर इत्यस्य वृद्धिविधिनैकवाक्यत्वात् ॥

"संयोगादेरातो धातोर्यण्वतः" ॥ 'प्रद्राण इति'। क्तस्यच इति णत्वम्। 'निर्यात इति'। योत्र धातुर्नासो संयोगादिर्यश्च संयोगादिर्नासो धातुः, न चात्र संयोगादित्वस्य बहिरङ्गत्वं, कथं पूर्वं धातुरुपसर्गेण युज्यते ततश्च निष्ठोत्पत्तेः प्रागेव संयोगः संनिहितः, प्रद्राण इत्यादावप्येतावदेव ॥

"ल्वादिभ्यः" ॥ 'जीन इति'। ज्या वयोहानौ, ग्रहिज्यादिना संप्रसारणम्। 'निष्ठावदिति'। नत्वसंनिधो वचनात्तदेवातिदिश्यते, तेन पूनिरित्यत्र क्लिशः क्त्वानिष्ठयोः पूङश्चेतीड्विकल्पो न भवति । 'दुग्वोरिति'। दु गतावित्यस्यैव दीर्घग्रहणं न तु टुदु उपतापइत्यस्य, सानुबन्ध-

Digitized by Google

कत्वात्, तथा माघे प्रयुक्तं, मृदुतया दुतयेति, नु पुरीषोत्सर्गे । 'पूना इति'। अनेकार्थत्वाद्धातूनां पूञ् विनाशार्थः । 'सिनो ग्रास इति' । षिञ् बन्धने, बध्यमानः पिण्डीक्रियमाणो ग्रासो यदा दध्यादिव्यञ्जनवशेन तच्चानुकूल्यं प्रतिपद्यते तदा कर्मणः कर्तृत्वविवक्षायामयं प्रयोगः, सिता पाशेन, शुद्धे कर्मणि क्तः, समुदायप्रत्युदाहरणमेतत्, इदानीमवयवप्रत्युदाहरणं दर्शयति । 'ग्रासोपीति' ॥

"ओदितश्च" ॥ 'आपीन इति'। ध्यायः पीति पीभावः । स्वादयः षूङ् प्राणिप्रसव इत्यादयो ओङ् वृणोत्यर्थ इत्येवमन्ता दिवादौ पठ्यन्ते ॥

"क्षियो दीर्घात्" क्षि क्षये, क्षि निवासगत्योः, द्वयोरपि ग्रहणम् । 'क्षीणा इति'। अकर्मकत्वात् कर्तरि क्तः, निष्ठायामण्यदर्थे इति दीर्घः । 'क्षीणस्तपस्वीति'। अत्रापि वाक्रोत्यादैन्ययोरिति, दीर्घादिति शक्यमवक्तुं, क्षिय इति निर्देशादेव दीर्घस्य ग्रहणं विज्ञायते, ह्रस्वस्य हि ग्रहणे इयङादेशात्परत्वात् घेर्ङितीति गुणे कृते क्षेरिति निर्देष्टव्यं स्यादित्यत आह । 'ह्रस्वान्तस्यापीति'। यथाभूतस्य दीर्घत्वं विधेयं तथाभूतमेवानुकर्तुं युक्तं, ह्रस्वान्तस्य च दीर्घत्वं विधेयमिति तस्यैव दीर्घविधावनुकरणं तत्रापि चेयङादेशो दृष्टः तस्मादियङादेशो न दीर्घग्रहणे प्रमाणमित्यर्थः । यदि तर्हि ह्रस्वान्तस्यापि धात्वनुकरणस्येयङादेशो भवति विपराभ्यां जेरित्यादावपि प्रसङ्ग इत्यत आह । 'विपराभ्यां जेरित्येवमादौ त्विति'। अविभक्तिकत्वेति पाठः, तत्र हि धातावनुकार्ये ऽवस्थितं धातुत्वं क्रियावाचित्वलक्षणमविवक्षितत्वात्तस्य विवक्षामकृत्वा रूपसामान्यस्य विजितं कूजितमित्यादिसाधारणस्य रूपस्यानुकरणं, ततश्च विशेषनिबन्धनस्य कार्यस्य सामान्येऽभावात्प्रकृतावदृष्टत्वादनुकरणेप्यभाव इत्यर्थः । यदा तु विशेषोनुक्रियते तदा तन्निबन्धनं कार्यमनुकरणे प्रवर्तते, यथात्रेयङादेशः, यद्येवं विभक्त्युत्पत्तिर्न प्राप्नोति, अधातुरिति प्रतिषेधेन प्रातिपदिकसंज्ञाया अभावात् । नैष दोषः । अधातुरिति पर्युदासो ऽयं न प्रसज्यप्रतिषेधः, ततः किम् । आतिदेशिकस्य

कस्य चित् कार्यस्याभावात् धातोरन्यत्वात्स्वाश्रया प्रातिपदिकसंज्ञा प्रवर्तते, इयङादेशस्त्वादेशिको धातोर्विधीयमानत्वाद्भवति ॥

"श्यो ऽस्पर्शे"॥ 'शीनमिति'। श्यैङ् गतौ, द्रवमूर्तिस्पर्शयोः श्य इति संप्रसारणम्। 'गुणभूतोपि स्पर्श इति'। एतच्च व्याख्यानाल्लभ्यते, स्पर्शशब्दोयमस्ति गुणवचनः, स्पृश संस्पर्शने, भावे कर्मणि वा घञ्, स्पर्शस्त्वगिन्द्रियग्राह्यो गुणः, अस्ति रोगवचनः, स्पृश उपतापे, घञ्, स्पर्शः, तदिह विशेषानुपादानाद् द्वयोरपि ग्रहणं, ततश्च रोगेपि प्रतिषेधात्प्रतिशीन इति न सिध्येत्, अत आह। 'गुणे चेति'। गुण एवेत्यर्थः। एवं मन्यते यदयं द्रवमूर्तिस्पर्शयोः श्य इति स्पर्शे संप्रसारणं विधाय पुनः प्रतेश्चेत्याह तज्ज्ञापयति। श्यायतेर्ग्रहणे स्पर्शशब्दो रोगं न प्रत्याययतीति, यदि प्रत्याययेत् पुनर्न विदध्यात्, प्रतिपूर्वो रोगएव श्यायतिर्वर्तते ॥

"अञ्चोनपादने" ॥ 'न चेदपादानं तत्र भवतीति'। तत्राञ्चत्यर्थे विषये ऽपादानं चेन्न भवतीत्यर्थः। 'समक्ताविति'। सङ्गतावित्यर्थः। यस्य विभाषेतीट्प्रतिषेधः, अनिदितामित्युपधालोपः। 'उदक्तमिति'। उद्धृतमित्यर्थः। 'व्यक्तमित्येतदिति'। अञ्जू व्यक्तिम्रक्षणकान्तिगतिष्वित्यस्येदं रूपं नाञ्चतेः, तेन नत्वमिदं न भवतीति भावः ॥

"दिवो विजिगीषायाम्" ॥ 'आद्यूनइति'। क्तौ: ऊठ्, आद्यून औदरिकः, परिद्यूनः क्षीणः। 'द्यूतं वर्तते इति'। नन्वत्राक्षादिपातनलक्षणा क्रीडा प्रतीयते न विजिगीषा अत आह। 'विजिगीषया हीति' ॥

"निर्वाणोऽवाते" ॥ 'वाताधिकरण इति'। अनतकर्तृक इत्यर्थः। यदि वातश्चेदभिधेयो न भवतीत्यर्थः स्यात्तदा निर्वातो वात इत्यत्रैव प्रतिषेधः स्यादत्र च कर्तरि क्तः, यत्र तु भावे तत्र न स्यात् निर्वातं वातेनेति। 'निर्वाणोग्निरिति'। उपशान्त इत्यर्थः। 'निर्वाणो भिक्षुरिति'। उपरत इत्यर्थः। 'वातस्तु करणमिति'। अत्रार्थभेदे करणत्वे हेतौ वा तृतीया द्रष्टव्या, यदा तु वार्तिकं तदा भावे प्रतिषेधो न भवति, निर्वाणं वातेनेत्येव भवति ॥

"प्रस्त्योन्यतरस्याम्" ॥ 'प्रस्तीम इति'। स्त्यः प्रपूर्वस्येति संप्रसारणम् ॥

"अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः" ॥ 'फुल्ल इति'। आदितश्चेतीट्प्रतिषेधः, उत्परस्यातस्त्विति चेत्युत्वम्। 'क्तवत्वन्तस्याप्येतल्लत्वमिष्यत इति'। निष्ठायास्तशब्दान्तं यद्रूपं तस्य फुल्ल इत्येतन्निपात्यत इति भावः, क्षीबादिषु तु नैतदिष्यते। 'इडभाव इति'। अन्यथा तलोपस्यासिद्धत्वाद्वलादित्वादिट् प्रसज्येत। 'कृते वा इटि इच्छब्दलोप इति'। निपात्यत इत्यपेक्षते। 'लाघेरुदोन्य इति'। उदस्तु प्रतिषेधो न भवति निर्देशसामर्थ्यात्। 'कृशं प्रत्यनुपसर्ग एवेति'। यत्क्रियायुक्ताः प्रादयस्तम्प्रतीतिवचनात्, क्रियान्तरयोगमेव दर्शयति। 'परिगतः कृश इति'। कार्श्येन परिगत इत्यर्थः। यद्यपि फुल्लादयः पचाद्यचि इगुपधलक्षणे के च सिध्यन्ति तथापि निष्ठा च द्व्यजनादित्यादिकार्यसिद्धये क्षीबिताद्यनिष्टशब्दनिवृत्तये च निपातनं, फुल्लशब्दे तु फुल्लवानित्येतदर्थं च ॥

"नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्याम्" ॥ अत्रानन्तरस्य निपातनस्य विधातुमशक्यत्वाद्व्यवहितं विधेयमिति स्थिते शुषः क इत्यादिभिरादेशान्तरैर्व्यवहितमपि नत्वमेव विधीयते, कथम्, उत्तरसूत्रे तावत्तदेव प्रतिषिध्यते प्राप्तिपूर्वकत्वात्प्रतिषेधस्य, तस्मात्तदेव बुद्धौ विपरिवर्त्तमानमत्रापि विकल्प्यते। 'समुन्न इति'। उन्दी क्लेदने, ईदित्त्वादिट्प्रतिषेधः, अनिदितामित्युपधालोपः, उभयत्र विभाषेयमित्याह। 'ह्री इत्येतस्येति'। 'विद विचारण इत्यस्येति'। रौधादिकस्य, उन्दिना रौधादिकेन साहचर्यात्, यद्यपि तौदादिकेन नुदिनापि साहचर्यं तथापि परसाहचर्यमेव व्यवस्थापकं विप्रतिषेधे परमित्यस्यैवमादावप्युपयोगात्, विचारणार्थस्य ग्रहणमित्येतदाप्तागमेन द्रढयति। 'एवं ह्युक्तमिति'। वित्तेर्द्धातो निष्ठान्तशब्दरूपं विदित इतीष्यते तस्य सेट्त्वात्, इह च रदाभ्यां निष्ठात इत्यनुवृत्तेः विद्यतेः सत्तार्थस्य विदेर्विन्न इतीष्यते तस्यानिट्त्वादिह च तस्याग्रहणात्। 'विन्तेरिति'। तिङन्तानुकरणात्षष्ठी। 'भोगवित्त इति'। एकार्थीभावाभावेपि भाष्यकारनिपातनात्सप्तमीसमासः,

भोगग्रहणमुपलक्षणं भोगप्रत्यययोरर्थयोः, विन्दतेस्तौदादिकस्य विदेर्वित्त इतीष्यते, अन्यत्र विन्न इति नत्वमेव भवति, न त्वयं विकल्प इत्यर्थे क्तो ऽत्र हेतुः ॥

"न ध्याख्यापॄमूर्छिमदाम्" ॥ 'मूर्त्त इति'। आदितश्चेतीट्प्रतिषेधः, राल्लोप इति छस्य लोपः । 'मत्त इति'। ईदित्त्वादिट्प्रतिषेधः ॥

"वित्तो भोगप्रत्यययोः" ॥ 'लाभार्थादिति'। ज्ञानार्थादिटा भाव्यं सत्ताविचारणार्थयोरपि न भोगप्रत्यययोर्वृत्तिः संभवतीति भावः, कथं पुनर्भोगे निपात्यमानो वित्तशब्दो धने भवतीत्यत आह । 'धनं हीति'। कर्मसाधनः सूत्रे भोगशब्द इत्यर्थः । एतेन प्रत्यय इति व्याख्यातम् । 'विन्न इति'। विभाषा गमहनविदविशामिति तौदादिकस्य क्वसौ विकल्पितेट्त्वादस्य विभाषेति निष्ठाया मिट्प्रतिषेधः ॥

"भित्तं शकलम्" ॥ 'शकलपर्यायोयमिति'। यथाशकलशब्दो जातिशब्दो न क्रियाशब्दस्तथा भित्तशब्दोपीत्यर्थः । नन्वयं भिदेर्धातोः व्युत्पाद्यमानः क्रियाशब्दः स कथं जातिशब्दस्य पर्यायो भवत्यत आह । 'अत्रेति'। सन्ति हि ते शब्दा येषु व्युत्पत्तिमात्रोपयोगिनी क्रिया, जातिरेव तु समुदायशक्त्या शब्दार्थः, यथा तैलं पिबतीति, तैलपायिकेति, किमर्थं पुनरेवमाश्रीयतइत्याह । 'भिदिक्रियाविवक्षायां हीति'। साम्यप्रतिपादनार्थं शकलग्रहणं यथा विदारणाविवक्षायां भिन्नं शकलमिति भवति तथा भिन्नं भित्तमित्येव प्रयोग इत्यर्थः। क्रियाशब्दत्वे तु भिन्नशब्देनैव क्रियाया उपात्तत्वाद्भित्तमित्यस्यैव प्रयोगो न स्यात्, अन्ये त्वाहुः । यथा विदारणक्रियया शकलं निवर्तते तदा तामङ्गीकरोत्येव भिन्नशब्दः, यत् शकलस्य सतो विदारणं तदा तत्प्रतिपादनाय भिन्नं भित्तमिति प्रयोग इति ॥

"ऋणमाधमर्ण्ये" ॥ 'ऋ इत्येतस्मादिति'। ऋ सृ गतौ, ऋ गतिप्रापणयोरिति वा । 'एतस्मादेवेति'। शौण्डादिव्यतिरेकेण सप्तमीसमास एव मृग्यः, प्रागेव सप्तम्यन्तोत्तरपद इति भावः । 'कालान्तरे-

त्यादि'। क्षणग्रहणकालापेक्षया कालान्तरत्वं, तच्च द्वेयं कालान्तरद्वेयं तत्र यो विनिमयो विपरिवर्त्तनं तदुपलक्षणार्थमाधमर्ण्यग्रहणं न तु स्वार्थप्रतिपादनार्थं, किं पुनः कारणमेवं व्याख्यायत इत्याह। 'उत्तमर्णे इत्यपि हीति'। एतच्च धारेरुत्तमर्ण इति निर्देशादवसितम्॥

"नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्त्तगूर्त्तानि छन्दसि"॥ नसत्तेत्यादीना-मनुकारणपदानां द्वन्द्वः। 'निषत्तमिति'। सदिरप्रतेरिति षत्वम्। 'अनुत्त मिति'। 'भाषायामिति'। नुदविदोन्दत्रेति विकल्पो न भवति एतन्निपा-तनारम्भसामर्थ्यादित्याहुः। 'प्रतूर्त्तमिति'। यदा त्वरतेः तदा ज्वरत्वरेत्या-दिना ऊठ्, यदा तु तुर्वी हिंसायामित्यस्य तदा राल्लोपः। 'उत्वमिति'। रपरत्वम् उरण् पर इत्येव सिद्धं परिभाषायामसिद्धप्रकरणे ऽपि प्रवृत्तेः॥

"क्विन्प्रत्ययस्य कुः"॥ 'क्विनः कुरिति वक्तव्ये इति'। नहि क्विन्प्रत्ययत्वं व्यभिचरतीति भावः। न चैवमुच्यमाने वेरपृक्तस्येति लोपं बाधित्वा क्विन एव वकारस्य कुत्वं घकारः प्राप्नोतीति शङ्कनीयं, तथा क्विन इति प्रत्ययग्रहणपरिभाषया तदन्तस्य ग्रहणे सति क्विनो वकारस्य लोपे कर्त्तव्ये सति कुत्वस्यासिद्धत्वात् राल्लोप एव भवति, तस्मिंश्च सति पश्चाद्वृषत्कुत्वं परिशिष्टस्य धातोरेव भविष्यति। स्यादेतत्। क्विबादिषु सावकाशं लोपं विशेषविहितं कुत्वमपवादो वचनप्रामाण्या-दिति न्यायेन बाधेतेति, तन्न, एवं हि वर्गग्रहणमनर्थकं स्यात्, अनेकस्य स्थानिनो ऽनेकादेशप्रसक्तिपत्तये हि वर्गग्रहणं, वकारस्यैव तु स्थानित्वे घकार एव निर्दिश्येत। 'वर्गाणां तृतीयचतुर्थौ इति'। शिक्षायां वका-रघकारयोर्गुणसाम्यप्रतिपादनात्, तस्मात् क्विनः कुरित्येव वक्तव्यम्। 'बहु-व्रीहिविज्ञानार्थमिति'। बहुव्रीहिश्चोपलक्षणे ऽपि भवति, यथा चित्रगु-रानीयतामिति गवामभावेपि चित्रगवीभिरुपलक्षितस्यानयनं भवति तद्वे-हाप्यसत्यपि क्विपि क्विनोपलक्षितस्य धातोः कार्यं भवतीति। 'अस्राक्; अद्राागिति'। सृजिदृशिभ्यां माङि लुङ्, तिप्, च्लेः सिच्, हल्ङ्यादि-लोपः, वदव्रजेति वृद्धिः, अत्र व्रश्चादिषत्वे प्राप्ते कुत्वं जस्य गः, गस्य खः, तस्यापि जश्त्वं, वावसानइति चर्त्वे ककारः, पूर्वत्रासिद्धमित्यसिद्धत्वं

सत्वे कुत्वस्य नास्ति प्रत्ययग्रहणसामर्थ्यात् सत्वापवादत्वात् कुत्वस्य । 'क्विबन्तस्यापीति' । वृद्धित्यादौ तु न भवति अपदान्तत्वात् । 'एवं च सतीत्यादि' । तथावदेव, दध्भ्यामिति कुत्वमुदाहृतम् । 'प्रतिविधानं कर्त्तव्यमिति' । प्रतिविधानं वचनमेव ॥

"नशेर्वा" ॥ जीवनाशहेतुत्वादाहुतिर्जीवनगित्युच्यते, संपदादित्वाद्भावे क्विप् ॥

"मो नो धातोः" ॥ 'नलोपो न भवतीति' ॥ नत्वं तु लोपार्थमेव स्यादिति मन्यते ॥

"ससजुषोरुः" ॥ 'सजूरिति' । पूर्ववद्भावे क्विप्, रुत्वे कृते र्वोरुपधाया इति दीर्घत्वं, बहुव्रीहौ सहस्य सभावः, सप्रीतिरित्यर्थः ॥

"अवयाः श्वेतवाः पुरोडाश्च" ॥ 'णिवनि कृतइति' । प्राप्तइत्यर्थः, श्वेतवहादीनां यत्र पदत्वं भावि तत्र णिवनो ऽपवादो डस् वक्तव्य इति हि तत्रार्थः, न पुनर्णिवनन्तानां पदत्वे सति डस् वक्तव्य इति । ननु श्वेतवोभ्यामित्यादिसिध्यर्थमवश्यं डस् वक्तव्यः स चेदुच्यते नार्थानेन, सान्तत्वात्पूर्वेणैव रुः सिद्धो दीर्घत्वमत्वसन्तस्येत्येव सिद्धं तत्राह । 'संबुद्धौ दीर्घार्थमिति' ॥

"अहन्" ॥ 'अहोभ्यामिति' । हशि चेत्युत्वम् । 'नलोपमकृत्वेत्यादि' । नलोपविधावेतद्व्याख्यातम् । 'लाक्षणिकत्वादिति' । अडागमेनाहश्चिति रूपलाभात् । 'ह्रस्वविधाविति' । समासे च लुमता लोपाद् रादेशे प्राप्ते रुत्वमुत्वार्थमुच्यते । 'अहोरूपमिति' । षष्ठीसमासः । गतमहोरूपं पश्येत्यसमासः । 'अहोरात्र इति' । अहःसर्वैकदेशेत्यादिनाच् समासान्तः, टकारलोपे कृतेप्येकदेशविकृतस्यानन्यत्वादुत्वं, रात्रग्रहणं तु न कृतं, गतमहो रात्रिरागतेत्यसमासेपि रुत्वार्थम् ॥

"रोऽसुपि" ॥ पूर्वस्यायमपवादः । र इत्यकार उच्चारणार्थः । 'अहर्द्ददातीति' । अत्यन्तसंयोगे द्वितीया । 'अह्नो रुविधाविति' । यथा चैतत्सूत्रेणैव सिद्धं तथा न लुमताङ्गस्येत्यत्रोक्तम् । 'दीर्घाहो निदाघ इति' । असुपीति प्रसज्यप्रतिषेधः, पर्युदासे तु सुप्सदृशो हल्परोस्तीति

Digitized by Google

स्यादेवात्र रेफः, प्रसज्यप्रतिषेधे तु प्रत्ययलक्षणेन प्रतिषेधे सति रुरेव भवति, ततश्च तन्निबन्धने यत्वोत्वे भवतः ॥

"अम्नरूधरवरित्युभयथा छन्दसि" ॥ नित्यं रुत्वे प्राप्ते पक्षे रोपि यथा स्यादित्ययमारम्भः । अम्नस्शब्द ईषदर्थे । अम्नरस्तमित इति यथा । अवो रत्नाम् । 'प्रचेता राजन्विति' । सकारस्य रेफः, तस्य रो रीति लोपः, ढ्रलोपे पूर्वस्य दीर्घोण इति दीर्घः । 'अहरादीनामित्यादि' । उभयत्राप्यादिशब्दः प्रकारे, इदमपि छन्दसि भाषायां च ॥

"भुवश्च महाव्याहृतेः" ॥ तिस्रो महाव्याहृतयः, पृथिव्यन्तरिक्षस्वर्गाणां वाचिकाः इह तु मध्यमाया ग्रहणम् । 'भुवो विश्वेषु [1]सवनेष्विति' । तिङन्तमेतत् भवतेश्छन्दसि लुङ्लङ्लिट इतिवर्त्तमाने लङ् सिप् शपि गुणाभावश्छान्दसः, बहुलं छन्दस्यमाङ्योगेपीत्यडभावः, लाक्षणिकत्वादेवास्याग्रहणे सिद्धे महाव्याहृतिग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थं, तेन ज्ञापयतीत्यादौ पुक् सिद्धो भवति ॥

"वसुस्रंसुध्वंस्वनडुहां दः ॥ 'स इति वर्त्ततइति' । अननुवृत्तौ तु तस्य विद्वानित्यादौ नकारस्य दत्वं प्राप्नोति । 'न तु स्रंसुध्वंसू इति' । विशेष्येते इति विपरिणामेनान्वयः । 'असंभवाच्चानडुहश्च इति' । न विशेष्यतइत्यन्वयः, इहेदं वसोर्दत्वं नाप्राप्ते विध्यन्तरे आरभ्यमाणं यथा विद्वद्भ्यामित्यादौ रुत्वं बाधते तथा विद्वानित्यादौ संयोगान्तलोपमपि बाधेतेत्यत आह । 'रुत्वे नाप्राप्त इति' । अथानड्वानित्यत्र नुमो दकारः कस्मान्न भवत्यत आह । 'नुमस्त्विति' । दत्वं यदि नकारस्य स्यात् नुमोनर्थको विधिर्हकारस्यापि दत्वेन ह्यनड्वादिति सिध्यति, यथैव तर्हि नुमो विधानसामर्थ्याद्दत्वं न भवति तथानड्वान् अत्रेत्यादौ दीर्घादटि समानपादइति रुत्वमपि न प्राप्नोति, यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते, दत्वं च प्रति नुमो विधिरनर्थकः, रुविधेः पुनर्निमित्तमेव ॥

---

१ भुवनेष्विति मु॰ मू॰ पु॰ ।

Digitized by Google

"सिपि धातो रुर्वा" ॥ 'धातुग्रहणमुत्तरार्थमिति' । इह तु सिपि परतो धातोरन्यस्यासंभवः । 'रुग्रहणं चेति' । उत्तरार्थमित्यनुषङ्गः, इह तु दत्वे विकल्पिते सान्तत्वादेव पक्षे रुः सिध्यति ॥

"दश्च" ॥ 'अभिनदिति' । तन्मध्यपतितस्य श्नमस्तद्ग्रहणस्य वाटस्तद्ग्रहणेन ग्रहणादत्र पदस्य धातुत्वम् ॥

"र्वोरुपधाया दीर्घ इकः" ॥ धातोः पदस्येत्युभयं समानाधिकरणं रेफवकाराभ्यांविशेष्यते, विशेषणेन च तदन्तविधिर्भवतीत्याह । 'रेफवकारान्तस्येति' । 'वग्रहणमुत्तरार्थमिति' । इह तु वकारान्तस्य पदस्य धातोरसंभवः । 'अभ्यासेकारस्य माभूदिति' । यदि स्यात्तस्यासिद्धत्वाद्ध्रस्व इति ह्रस्वो न स्यात् ॥

"उपधायां च" ॥ र्वोरुपधाया इत्यादि सर्वमनुवर्त्तते, इदमुपधाग्रहणं र्वोर्विशेषणं, षष्ठीद्विवचनस्य तु स्थाने सप्तम्येकवचनं, प्रकृतमुपधाग्रहणमिको विशेषणं, तच्च र्वपेक्षया पूर्वत्वं प्रतिपादयति, तेन वृत्तिकारोपदर्शितः सूत्रार्थो भवति । 'हूर्च्छितेति' । हुर्छा कौटिल्ये, मुर्छा मोहसमुच्छ्राययोः, राचोरहाभ्यामिति द्विर्वचनस्यासिद्धत्वाद्रेफस्योपधात्वे सति पूर्ववद्दीर्घत्वं, चिरिजिरी हिंसार्थौ । 'इह रियतुः चिक्यतुरिति' । रि गतौ, ची गत्यादिषु, लिट्, अतुस्, द्विर्वचने एरनेकाच इति यणादेशः, अत्राभ्यासेकारस्य दीर्घप्रसङ्गः, ततश्च तस्यासिद्धत्वाद्ध्रस्वो न स्यात्, तत्राह । 'रियतुरित्यादि' । 'यणादेशस्य स्थानिवद्भावादिति' । न च दीर्घविधौ स्थानिवद्भावप्रतिषेधः, *अलोपाजादेशत्वात्, एवमपि पूर्वत्रासिद्धे न स्थानिवदित्याशङ्क्य परिहारान्तरमाह । 'असिद्धत्वाच्चेति' । अङ्गाधिकारे विधानात्प्रत्ययाश्रयत्वाद्यणो बहिरङ्गत्वं, दीर्घस्य तु तदनपेक्षत्वादन्तरङ्गत्वम्, इह चतुर्यितेः क्यजन्तात्तृच् इट् अतो लोपे कृते क्यस्य विभाषेति यदा ऽयं लोपो न भवति तदा धातोरुपधाभूतो रेफो हल्परश्चेति दीर्घप्रसङ्ग इत्याशङ्कायामाह । 'चतुर्यितेत्यत्रापीति' । अत्राप्यन्तरङ्गत्वबहिरङ्गत्वे पूर्ववत्, इह प्रतिपूर्वाद्दिवेः कनिन्युवृषितक्षीति कनि-

* अङ्गाधिकारे विधानादिति पं॰ पु॰ पा॰ ।

Digitized by Google

न्त्ययान्तात्तृतीयैकवचने अल्लोपेन इत्यकारस्य लोपे प्रतिदीव्नेति दीर्घत्वमिष्यते, तच्च प्राप्नोति, वकारस्य धातुप्रत्यनुपधात्वादित्यत आह । 'प्रतिदीव्नेत्यत्रेति' । कथं पुनर्हलि चेति दीर्घत्वं यावताल्लोपस्य स्थानिवद्भावे सति हल्परो वकारो न भवतीत्यत आह । 'दीर्घविधाविति' । ननु माभूत्स्थानिवद्भावः, विभक्त्याश्रयत्वेनाल्लोपो बहिरङ्गस्तस्यासिद्धत्वाद्धल्परो न भवतीत्यत आह । 'असिद्धं बहिरङ्गमन्तरङ्ग इत्येतस्त्विति' । अनाश्रयणं त्वस्याः परिभाषाया अनित्यत्वात्, अनित्यत्वं च नलोपःसुप्स्वरेत्यत्र तुग्विधिग्रहणेन ज्ञापितम्, इह जीर्यतेः क्तिन् रश्च वः, जिव्रिः, कॄगॄभ्यां किः प्रत्ययः, किरिः, गिरिः, ताभ्यामोस् यणादेशः, किर्योर्गिर्योश्च हलि चेति दीर्घत्वं प्राप्नोति तत्राह । 'उणादयोऽव्युत्पन्नानीति' । उणादिषु नावश्यं व्युत्पत्तिकार्यं भवतीत्यर्थः । एतच्चातःकृकमिकंसेत्यत्र कमिग्रहणेनैव सिद्धे कंसग्रहणेन ज्ञापितं, क्वचित् व्युत्पत्तिकार्यं भवत्येव, यथा प्रतिदीव्नेति, किर्योरित्यत्र यणो बहिरङ्गत्वमनाश्रित्यायं परिहार उक्तः ॥

"न भकुर्छुराम् ॥ 'छुर्यादिति' । छुर छेदने, आशिषि लिङ् । 'प्रतिदीव्नेति' । योत्र वकारान्तो नासौ भसंज्ञको यश्च भसंज्ञो नासौ वकारान्तः, किं तर्हि नकारान्तः ॥

"अदसोऽसेर्दादु दो मः" ॥ असेरिति सकारे इकार उच्चारणार्थः, अमूभ्यामित्यत्र त्यदाद्यत्वे कृते सुपि चेति दीर्घत्वं, तत आन्तरतम्यादाकारस्य ऊकारः । ननु च सूत्रे ह्रस्वो निर्दिष्टः, भाव्यमानत्वाच्च सवर्णग्रहणमपि नास्ति, तत्कथमूकारो लभ्यतेऽत आह । 'भाव्यमानेनापीति' । एतच्च दिव उदिति तपरकरणेन ज्ञापितं, केचिदत्राप्युकारं दपरं पठन्ति उद्दो म इति, तेषामयमौत्पत्तिको दकारो मुखसुखार्थो न पुनस्तकारस्य जश्त्वं, तथा हि सति सवर्णग्रहणं न स्यात्, अदपरपाठस्तु भद्रः । 'अदस्यतीति' । ननु च पदस्येति वर्तते न चेदं पदं नः क्य इति नियमात्, एवं तर्ह्येतदेव ज्ञापयति अपदस्याप्यदस उत्वमत्वं भवतीति अमुममुयेति, अन्यथा यत्र स्वादौ पदं तत्रैव स्यादमुष्मै

Digitized by Google

अमूभ्यामिति। 'अनोश्च इति'। ओकारसकाररेफा न विद्यन्तेयस्य तस्येत्यर्थः। 'अदः कुलमिति'। विसर्जनीयस्यासिद्धत्वाद्रेफान्तमेतत्। 'तदर्थमिति'। ओकाररेफयोरपि प्रतिषेधार्थम्। 'अः सेर्येति'। कोऽर्थ इत्यत्राह। 'यचेति'। तेन किं सिद्धं भवतीत्याह। 'तेनेति'। 'कथमद्र्यादेश इति'। अस्मिन्विषये वक्तव्यमस्तीति प्रश्नस्तत्राह। 'अवसोद्रेरिति'। श्लोकस्य पूर्वार्द्धं व्याचष्टे। 'येरिति'। तृतीयं पादं व्याचष्टे। 'ये स्त्विति'। चतुर्थं पादं व्याचष्टे। 'येषां त्विति'। 'अमुमुयङ्ङिति'। अदोऽञ्चतीति ऋत्विगित्यादिना क्विन्, विष्वग्देवयोश्चेत्यदसष्टेरद्र्यादेशः, अदद्र्यञ्चितिस्थिते अदःशब्दस्याद्र्यादेशसम्बन्धिनो दकाररेफयोश्च मुत्वं, सो उगिदचामिति नुम्, हल्ङ्यादिसंयोगान्तलोपौ, क्विन्प्रत्ययस्य कुरिति कुत्वं नकारस्य ङकारः। 'अमुया अमुयोरिति'। अत्र यकारस्योत्वप्रसङ्गः॥

"एत ईद्बहुवचने"॥ 'अर्थनिर्द्देशोयमिति'। व्याप्तेर्न्यायात्। किं पुनः कारणमेवं व्याख्यायतइत्यत आह। 'पारिभाषिके[1] ह्येति'। तदा हि तस्मिन्निति निर्द्दिष्टे पूर्वस्येति परिभाषोपस्थानाद्बहुवचने परत एकारस्येत्वेन भवितव्यं, न चात्र बहुवचनं परम्॥

"वाक्यस्य टेः प्लुत उदात्तः"॥ अधिकारोऽधिकारान्तरनिवर्त्तक इति वाक्याधिकारेण पदाधिकारस्य निवृत्तिः प्राप्नोति, ततश्च भवन्नावित्यादावपदान्तस्यापि नकारस्य नश्छव्यप्रशानिति रुत्वं प्रसज्येतेत्याशङ्क्याह। 'पदाधिकारो ऽनुवर्त्ततएवेति'। नहि वाक्यग्रहणेन पदाधिकारः शक्यो निवर्त्तयितुं, यो हि वाक्यस्य टिः सन्नियोगतः पदस्यापि भवत्येव, अथ वाक्यग्रहणं किमर्थं, यावता वाक्यस्थस्यैव पदस्य प्रयोगो न केवलस्य तत्राह। 'वाक्यग्रहणमिति'। पदस्य टेरित्युच्यमाने वाक्ये यावन्ति पदानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति, इष्यते च वाक्यपदयोर्यष्टिस्तस्यैव यथा स्यादिति। 'टिग्रहणमित्यादि'। असति टिग्रहणे प्लुतश्रुत्या ऽच्परिभाषस्यानादचा तदन्तविधौ सति अजन्तस्यैव वाक्यस्या-

1 पारिभाषिकस्य हीति मु॰ मू॰ पु॰।

लोऽन्त्यस्य प्लुतः स्यात् यथा नपुंसकह्रस्वत्वं ग्रामणि कुलमित्यादौ भवति न पुनः सुवागित्यादौ तद्वत्, टिग्रहणे तु सति तदुपादानसामर्थ्याट्टिनाऽविशेष्यते, न त्वचा टिरिति हलन्तस्यापि प्लुतः सिध्यति ॥

"प्रत्यभिवादेऽशूद्रे" ॥ 'प्रत्यभिवादो नामेत्यादि'। गुरुरित्युपलक्षणं, त्रिवर्णपूर्वः श्रोत्रियो ऽभिवादमर्हति, अभिवाद्यमान आशिषं वाच्यमानो गुरुराशिषं प्रयुङ्क्त इति य स प्रत्यभिवादो न प्रत्युक्तिमात्रं तत्रैव लोके प्रसिद्धत्वात्, तद्यथा 'अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदु'रिति। 'तत्रेति'। आशीर्वादविषये कीदृशे अशूद्रविषये ऽशूद्रो विषयो यस्य स तथोक्तः, अभिवादने सति प्रत्यभिवाद इति तं तावदुदाहरति। 'अभिवादयइति'। नमस्कारपूर्वमाशिषं वाचयामीत्यर्थः, एवमभिवादितो गुरुः प्रत्यभिवदति। 'आयुष्मानिति'। आयुष्मत्त्वस्य विधेयत्वात्सम्बोधनविभक्त्यभावः। 'एधीति'। अस्तेर्लोटि सिपो हिः भवेत्यर्थः। 'आयुष्मान्भव सौम्येति विप्रोवाच्योऽभिवादन' इति मानवे, भवेत्यर्थग्रहणं तेन पर्यायैरपि प्रत्यभिवादो भवति। ननु च तत्र 'कारश्चास्य नाम्नान्ते वाच्यः पूर्वाक्षरः प्लुत' इत्युक्तं, स कस्मादिह न विधीयते। उच्यते। यदर्थाभिधानउपयुज्यते तदेव व्याकरणे वक्तव्यम्, अकारस्तु केवलमदृष्टार्थः प्रयुज्यते। नत्वस्य कश्चिदर्थोऽस्ति, अन्येतु मानवमन्यथा व्याचक्षते अस्याभिवादयितुर्नाम्नो ऽन्तेऽवसाने यो ऽकारः स प्लुतो वाच्यः, अकार इत्युपलक्षणं, पूर्वाक्षरश्च प्लुतो वाच्यः, हलन्तविषय मेतत्, अक्षर इत्यचमाह, हलन्तेष्वन्त्यात्पूर्वोच् प्लुतो वाच्य इत्युभाभ्यामिति ताभ्यां टेः प्लुत इत्युक्तं भवति। वयं तु ब्रूमः। पृथगेवाकारः प्रयोक्तव्य इति, कुतः, अक्षरार्थस्त्व[1]यं, किञ्च भरतशास्त्रे प्रसङ्गेन प्रत्यभिवादप्रकारे वर्ण्यमाने पृथगकारप्रयोगो दर्शितः, तस्मादयमत्र प्रत्यभिवादनप्रयोगः आयुष्मान् भव सौम्य देवदत्त ३ अ, अग्निचि३त् अ इति एजन्तेषु त्वेचोपगृह्यस्येत्यस्मिन्विधौ सत्यकारे परतस्तयोर्व्यावचि संहितायामिति यद्यपि भवति पिनाकपाणा३य हर३य शम्भ३व विष्ण३व इति, प्रत्यभिवादे शर्मवर्मशब्दयोः प्रयोगं नेच्छन्ति, शर्मान्तं ब्राह्मणस्य

१ तावदर्थमिति २ पु०।

Digitized by Google

अश्वमेधे प्राकाशावित्यनेनाध्वर्युभागबाधः। अधि० १९।

प्राकाशौ च तथेति चेत् ॥ ६३ ॥

क्वचिच्छ्रूयते, प्राकाशावध्वर्यवे ददातीति। अत्र प्राकाशो निखिलदक्षिणानिवर्तकौ धेनुवदिति पूर्वपक्षमाह। प्राकाशाविति। अयं भावः। अध्वर्युसंप्रदानकत्वविशिष्टदानमुद्दिश्य प्राकाशकर्मकत्वं विधीयते। अत्रोद्देश्यविशेषणसंप्रदानविवक्षणे वाक्यभेदभिया अविवक्षितम्। तथा च प्राकृतदानमात्रमुद्दिश्य प्राकाशविधानान्निखिलबाध इति ॥ ६३ ॥

अपि त्ववयवार्थत्वाद्विभक्तप्रकृतित्वाद्गुणे- दन्ताविकारः स्यात् ॥ ६४ ॥

सिद्धान्तमाह। अपि त्विति। अवयवार्थत्वात् ऋत्विजां मध्ये यः अवयव एकदेशः अध्वर्युः तदर्थत्वात्। तदर्थत्वेन श्रूयमाणत्वात्। प्रकृतयागस्य विभक्तप्रकृतित्वात्। विभक्ता विभागवती इदमध्वर्योरितिनिर्देशवती प्रकृतिः ज्योतिष्टोमो यस्य तस्मात्। प्रकृतौ गवादिरूपगुणे इदमध्वर्यवइति इदन्ता तद्विकारः इमौ प्राकाशावध्वर्यवइति विकारः स्यात्। अयं भावः। अध्वर्युपदवैयर्थ्यभिया तत्संप्रदानकप्राकाशद्वयकर्मकदानं विधीयते ऽपूर्वं, तेन वाक्यभेदः। तेनाध्वर्युदक्षिणामात्रबाध इति ॥ ६४ ॥

उपहव्ये अश्वेन कृत्स्नक्रतुदक्षिणाबाधः। अधि०। २०।

धेनुवच्चाश्वदक्षिणा स ब्रह्मणइति पुरुषापनयो यथा हिरण्यस्य ॥ ६५ ॥

क्वचिदश्वः श्यावो रुक्मललाटो दक्षिणा स ब्रह्मणे परिहरतीति। अत्र प्राकाशवद्ब्रह्मभागमात्रबाधक इति पूर्वपक्षे सिद्धान्तमाह। धेनुवदिति। ननु स ब्रह्मणे इत्यस्य का गतिरत आह। पुरुषेति। पुरुषापनयः ऋत्विगन्तरसंबन्धापनयो, यथा शतकृष्णलचरौ हिरण्यस्य ब्रह्मैकसंप्रदानत्वम् ॥ ६५ ॥

एके तु कर्तृसंयोगात्स्रग्वत्सस्य लिङ्गविशेषेण ॥ ६६ ॥

पूर्वपक्षमुत्थापयति। एके इति। एके दक्षिणैकदेशा निवर्तन्ते।

कर्तृसंयोगात् । कर्तुः कर्मकर्तुः ब्रह्मणः संयोगात् । स्रुग्वत् । स्रजमुद्गात्रे दृतिवत् । शेषं प्राग्वत् ॥ ६६ ॥

अपि वा तदधिकाराद्धिरण्यवद्विकारः स्यात् ॥ ६७ ॥

सिद्धान्तमाह । अपि वेति । तदधिकारात् । दक्षिणाधिकारात् । दक्षिणाया ऽन्वितत्वादिति यावत् । विकारः सर्वविकारः हिरण्यवत् । स्रग्वाक्यं ह्येकं तत्र वाक्यभेदभिया अपूर्वदानविधिः । अत्र वाक्यद्वयं श्रूयते । एकेन केवलदक्षिणाविधिः एकेन पुरुषापनय इति वैषम्यमिति भावः ॥ ६७ ॥

शतपेये सोमचमसेन कृत्स्नक्रतुदक्षिणाबाधः । अधि॰ २१ ।

तथा च सोमचमसः ॥ ६८ ॥

शतपेये श्रूयते, उदुम्बरः सोमचमसो दक्षिणा स ब्रह्मणे देय इति । तत्र पूर्ववत्संशये पूर्वपक्षमाह । तथेति । तथा प्राकाशवत् ॥ ६८ ॥

सर्वविकारो वा क्रत्वर्थे पशूनां प्रतिषेधात् ॥ ६९ ॥

सिद्धान्तमाह । सर्वेति । सर्वविकारः सर्वबाधकः क्रत्वर्थे दाने पशूनां प्रतिषेधात् । प्रतिषेधश्चैवं श्रूयते, ऋतं वै सोमो ऽनृतं पशवो यत्पशून्दद्यात् सो ऽनृतं कुर्यादिति । अनेन प्राकृतपशूननूद्य निषेधं कृत्वा चमसविधानात्सर्वबाध इति भावः ॥ ६९ ॥

ब्रह्मदाने ऽविशिष्टमिति चेत् ॥ ७० ॥

पूर्वपक्षमुत्थापयति । ब्रह्मेति । ब्रह्मणः ब्रह्मभागे अविशिष्टं निषेधोपपत्तिस्तुल्या इति ॥ ७० ॥

उत्सर्गस्य क्रत्वर्थत्वात्प्रतिषिद्धस्य कर्मत्वाद् न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ॥ ७१ ॥

सिद्धान्तमाह । उत्सर्गेति । उत्सर्गस्य दानस्य क्रत्वर्थत्वाद् ऋत्विगानतिद्वारा क्रत्वर्थत्वाज् ज्योतिष्टोमे ऋत्विगानतिद्वारा क्रतुसंबन्धिदक्षिणायां गवादिसमुदायस्यान्वयादेकैव दक्षिणा प्रकृते ऽपि दक्षिणयैव चमसान्वयाद्खिलबाध इति भावः । प्रतिषिद्धस्य निषिद्धस्य पशुसंघस्य

प्रकृतो दानकर्मत्वात् क्रतुसंबन्धिपशुत्वावच्छिन्नं निषिद्धम् । अतो ऽपि यावतां स्थाने चमसः । ननु निषेधो ब्रह्मभागविषयः सन्नपि चरितार्थ इत्युक्तं प्राक् । तत्रोत्तरमाह । न चेति । गौण्याः अमुख्यवृत्त्युपस्थाप्यो दक्षिणानामर्थः, चमसस्येति शेषः । प्रयोजनं स्यात् । चमसदक्षिणया ऋत्विगानतिं कुर्यादिति मुख्यवृत्तिज्ञानजन्यो बोधः । चमसस्यैकदेशबाधकत्वे चमसात्मकदक्षिणैकदेशेन ऋत्विगेकदेशानतिं भावयेदिति हि वाक्यार्थो लाक्षणिको वाच्यः । अयमयुक्त इति भावः ॥ ७१ ॥

यदि तु ब्रह्मणः तदूनं तद्विकारः स्यात् ॥ ७२ ॥

अस्य अधिकरणस्य फलज्ञापकं सूत्रद्वयम् । पूर्वपक्षफलमाह । यदीति । यदि तु चमसदानं ब्रह्मणः तदा क्रतुः तदूनं तेन ब्रह्मभागमात्रेण ऊनं प्राकृतदानजातं शेषदानमस्त्येव अतः तद्विकारः ब्रह्मभागस्य विकारः स्यात् ॥ ७२ ॥

सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ ॥

सिद्धान्ताभिप्रायमाह । सर्वं वेति । सर्वं निवर्तते । कुतः, तासां दक्षिणानां क्रतुप्रधानत्वात् । क्रत्वर्था सर्वा ऽपि दक्षिणा निवर्ततइति भावः । ननु क्रत्वर्था दक्षिणा सर्वेभ्यो देया कथं ब्रह्मणएवेति तत्राह । पुरुषापनयात् । वचनेन पुरुषान्तरविभागात् । ब्रह्मणएव दानमिति भावः ॥ ७३ ॥

वाजपेये रथस्य भागनियामकत्वम् । अधि· २२ ।

यजुर्युक्तो ऽध्वर्योर्दक्षिणाविकारः स्यात् ॥ ७४ ॥

अस्ति वाजपेये यजुर्युक्तं रथमध्वर्यवे ददातीति । अत्र अध्वर्योः शेषदक्षिणा निवर्तते उत अध्वर्योः पक्षे प्राप्तौ नियम इति संशये पूर्वपक्षमाह । यजुरिति । स्पष्टो ऽर्थः ॥ ७४ ॥

अपि वा श्रुतिभूतत्वात्सर्वासां तस्य भागो नियम्येत ॥ ७५ ॥

Digitized by Google

सिद्धान्तमाह । अपि वा श्रुतिभूतत्वादिति । सप्तदश रथाः सप्तदश निष्काः सप्तदश दास्यो दक्षिणेति श्रुतिभूतत्वात् । श्रूयमाणत्वात् । सप्तदशसु कश्चन रथो यजुर्युक्तः कश्चन ऋग्युक्तः कश्चन सामयुक्तः । एवं रथेषु अध्वर्योः यजुर्युक्तरथस्य पक्षे सर्वासां दक्षिणानां प्राप्तौ तस्य अध्वर्योः भागो रथविशेषो नियम्यते ॥ ७५ ॥

इति जैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

अग्न्यादौ नारिष्टहोमादिभिः नक्षत्रेष्ट्यादीनां समुच्चयः । अधि० १ ।

प्रकृतिलिङ्गासंयोगात् कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥

अस्मिन्पादे प्राकृतवैकृतानां समुच्चयश्चिन्त्यते । तत्र श्येने लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति । अत्र उपव्ययतत्त्यनेनोपवीतं प्राप्तम् । तत्रोपवीतकार्ये निवीतविधानात् उपवीतं बाध्यत इति बहिः पूर्वपक्षे सिद्धान्तमाह । प्रकृतीति । प्रकृतेः लिङ्गेन कार्येण संयोगाभावात् । कुतो योगाभावः, तत्र हेतुमाह । कर्मसंस्कारमिति । संस्कारमदृष्टफलकं कर्म यतः । अयं भावः । प्राकृतोपवीतजन्यमदृष्टं भिन्नं निवीतादृष्टं भिन्नमुभयोः परस्परकार्यकारित्वे प्रमाणाभावात् । अतः विकृतौ अधिकं समुच्चयः स्यात् ॥ १ ॥

चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् ॥ २ ॥

नन्वेवं शरैः कुशबाधो न स्यादित्याशङ्क्य तत्र वैषम्यं दर्शयति । चोदनेति । चोदनायां प्राकृतविधौ अव्यभिचरितं यल्लिङ्गं बर्हिर्वा वेदिं स्तृणातीतिवाक्यस्थवेदिस्तरणसाधनबर्हिःशब्दस्तत्संयोगेन तदन्वयेन । प्रकृतिसन्निधानात् । प्रकृतिविधिघटकशब्दसन्निधानात् । अयं चोदनालिङ्गसंयोगेन अत्र हेतुः । तद्विकारः कुशविकारः ॥ २ ॥

शरमयबर्हिषा कौशबर्हिर्बाधः । द्वितीयवर्णकम् । एवं वा ।

तत्रैवोदाहरणे युक्त्यन्तरेण पूर्वपक्षमाशङ्क्य निराकरोति । एवं

Digitized by Google

वेति। तदित्थं शरमयमित्यत्र मयटः प्राचुर्यार्थकत्वेन द्वयोः शरकुशयो-रबाधेनैवोपपत्तौ बाधो न युक्त इति पूर्वपक्षे सिद्धान्तमाह। चोदनेति। मयटो विकारार्थे प्रमाणान्तरबाधएव विकारान्यार्थत्वम्। तथा च विका-रार्थे तथात्वाभावात्। तादृशार्थकस्य चोदनालिङ्गेत्यादि पूर्ववत्।

वाजपेये रथघोषदुन्दुभिघोषाभ्यां दर्भमन्त्रयोरुभयोर्बाधः। तृतीयवर्णकम्। एवं वा।

उदाहरणान्तरे इमं सूत्रार्थमतिदिशति। एवं वेति। वाजपेये दुन्दुभिघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति, प्रकृतौ उपावर्तध्वमिति दर्भाभ्यां स्तोत्रमुपाकरोतीति। तत्र दुन्दुभिना दर्भबाधः द्रव्यत्वेन सादृश्याद् घोषेण मन्त्रबाधः शब्दत्वेन सादृश्यादिति पूर्वपक्षे सिद्धान्तमाह। चोदनेति। अस्मिन्पक्षे सूत्रे सकृदिति शेषः। चोद-नालिङ्गेन उपाकरोतिशब्देन सकृदन्वयाद् द्रव्यसंबन्धिघोषः एक एव द्वयोर्बाधकः। अयं भावः। दुन्दुभिश्च घोषश्चेति द्वन्द्वे दुन्दुभिना उपाकरोति घोषेण उपाकरोतीति द्विवारं चोदनालिङ्गसंयोगेन प्रत्येकं द्वयोर्बाधकं भवेत्। न द्वन्द्वः। एकवचनान्तत्वात्। षष्ठीतत्पुरुषे दुन्दुभि-विशिष्टघोषस्य करणत्वसबन्धेन सकृदेवान्वयः स्तोत्रोपाकरणे। अतो विशिष्टं द्वयोर्बाधकमिति ॥ २ ॥

बृहस्पतिसवादौ बार्हस्पत्यग्रहादिभिः प्राकृतैन्द्रवायवादिग्रहाणां समुच्चयः। अधि॰ २।

सर्वत्र तु ग्रहाम्नातमधिकं स्यात्प्रकृतिवत् ॥ ३ ॥

बृहस्पतिसवे श्रूयते, बार्हस्पत्यं ग्रहं गृह्णातीति। अत्र ग्रहं गृह्णा-तीत्यनेन चोदनालिङ्गेन बार्हस्पत्यमित्यस्य योगात् प्राकृतनिखिलग्रहबाध इति पूर्वपक्षे सिद्धान्तमाह। सर्वत्रेति। यत्रैवं श्रूयते तत्र सर्वत्र ग्रहाम्ना-तम् अधिकं प्राकृतग्रहादधिकं समुच्चय इति भावः। प्रकृतिवत्। यथा प्रकृतौ ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्यनयोस्तद्वत् ॥ ३ ॥

अधिकश्चैकवाक्यत्वात् ॥ ४ ॥

साधकान्तरमाह। अधिकश्चेति। चकार एकवाक्यत्वादित्यने-नान्वितः। वाजपेये सप्तदश प्राजापत्या ग्रहा गृह्यन्त इति वदत् सोमग-

Digitized by Google

हांश्च सुराग्रहांश्च गृह्णातीति अनेनैकवाक्यतापन्नप्राजापत्यग्रहवाक्यं न प्राकृतानुवादकं भवितुमर्हति । प्रकृतौ सुराऽभावात् । अतो ऽपि प्राकृतास्तत्र यथा ऽधिकं तथा ऽत्रापीति भावः ॥ ४ ॥

लिङ्गदर्शनाच्च ॥ ५ ॥

किं च विरप्शी वा एष यज्ञक्रतुर्यद्वाजपेय इति श्रूयते । अस्यार्थः । ज्योतिष्टोमाद्यपेक्षया ऽयं विरप्शी विस्तृत इत्यर्थः । अत्र विस्तारः समुच्चयलिङ्गमित्याह । लिङ्गेति ॥ ५ ॥

वाजपेये प्राजापत्यपशुभिः क्रतुपशूनां समुच्चयः । अधि॰ ३ ।

प्राजापत्येषु चाम्नानात् ॥ ६ ॥

अस्ति वाजपेये सप्तदश प्राजापत्यान्पशूनालभत इति । पूर्ववत्प्रा कृतपशुबाधक इति प्राप्ते सिद्धान्तमाह । प्रजापत्येष्विति । अधिक इति प्रपूर्वसूत्रान्मण्डूकप्लुत्या ऽनुवर्तते । आम्नानात् । ब्रह्मवादिनो वदन्ति नाग्निष्टोमो नोक्थ्यः इत्यारभ्य तान्पशुभिरेवावरुन्धे इत्यन्तेन स्पष्टं समुच्चयकथनात् ॥ ६ ॥

सांग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयः । अधि॰ ४ ।

आमने लिङ्गदर्शनात् ॥ ७ ॥

सांग्रहण्येष्ट्या आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोतीति । पूर्ववत् प्राकृतचित्त्वविशिष्टानूयाजबाधका इति पूर्वपक्षे सिद्धान्तमाह । आमन इति । अधिकमित्यनुवर्तते । लिङ्गदर्शनात् । लिङ्गमेवम् । आत्मा वै प्रयाजानूयाजा आत्मा देवता यत्प्रयाजानुयाजानां पुरस्ताद्वोपरिष्टाद्वा जुहुयाद्बहिरात्मानं सजातात्समादधीत यन्मध्यतो जुहोति मध्यत एव सजातानात्मन्धत्त इति ॥ ७ ॥

महाव्रते ऋत्विगुपगानस्य पत्न्युपगानेन समुच्चयः । अधि॰ ५ ।

उपगेषु शरवत्स्यात्प्रकृतिलिङ्गसंयोगात् ॥ ८ ॥

महाव्रते श्रूयते पत्न्य उपगायन्तीति । प्रकृतौ ऋत्विज उपगायन्तीति । अत्रोपगायन्तीतिप्रकृतिलिङ्गसंयोगाद् उपगेषु उपगानकर्तृषु शरवत्पत्न्यः ऋत्विजो बाधन्त इति पूर्वपक्षः ॥ ८ ॥

Digitized by Google

आनर्थक्यात्त्वधिकं स्यात् ॥ ९ ॥

सिद्धान्तमाह । आनर्थक्यादिति । आनर्थक्यात् पत्नय उपगायन्तीत्येतत्समीपे काण्डवीणाभिरुपगायन्तीत्यस्यानर्थक्यात् । शेषं स्पष्टम् ॥ ९ ॥

अञ्जनाभ्यञ्जने नवनीताभ्यञ्जनस्य गैग्गुलवाभ्यञ्जनादिभिः समुच्चयः । अधि० ६ ।

संस्कारे चान्यसंयोगात् ॥ १० ॥

सत्रे गैग्गुलवेन प्रातःसवने समञ्जते ऽभिवाञ्जतइति । प्रकृतौ दीक्षाकाले नवनीतेनाभ्यञ्जतइति । प्राकृताभ्यञ्जनमनूद्य गैग्गुलविधानान्नवनीतबाध इति पूर्वपक्षे सिद्धान्तमाह । संस्कारइति । संस्कारे अञ्जने ऽभ्यञ्जने च, अधिकं स्यादित्यनुवर्तते । कुतः, अन्यसंयोगाद् दीक्षासुत्यारूपभिन्नकालसंयोगात् ॥ १० ॥

प्रयाजवदिति चेन्नार्थान्यत्वात् ॥ ११ ॥

ननु तिष्ठन्तं पशुं प्रयजतीत्यत्रापि प्राकृतप्रयाजानां हविरासादनोत्तरकालिकत्वेन भिन्नकालसंयोगे ऽपि प्राकृतवैकृतयोः न समुच्चयः किं तु बाधः तथा ऽत्र स्यादित्याशङ्क्येमं हेतुं हित्वा हेत्वन्तरमाह । प्रयाजवदिति । अर्थान्यत्वं कार्यभेदः तस्मात् । नवनीतेन त्वचि मृदुता गैग्गुलेन शैत्यं भवतीति ॥ ११ ॥

महाव्रते ऽहतवाससः तार्प्यादिभिः समुच्चयः । अधि० ७ ।

आच्छादने त्वैकार्थ्यात्प्राकृतस्य विकारः स्यात् ॥ १२ ॥

महाव्रते श्रूयते । तार्प्यं यजमानं परिधापयतीति । घृताक्तकम्बलस्तार्प्यम् । प्रकृतावहतं वासः परिधत्तइति । अत्र शरीराच्छादनविषये द्वयोरेकार्थत्वात्प्राकृतवासोविकारः बाधकः स्यादिति पूर्वपक्षः ॥ १२ ॥

अधिकं वा ऽन्यार्थत्वात्* ॥ १३ ॥

सिद्धान्तमाह । अधिकं वेति । अधिकं समुच्चयः । अन्यार्थत्वात् । गुह्याच्छादनपृष्ठोदराद्याच्छादनरूपकार्यभेदात् ॥ १३ ॥

---

* एत उत्तरं, समुच्चयं च दर्शयति, इति सूत्रमधिकं भाष्ये दृश्यते ।

Digitized by Google

महाव्रते रथन्तरादिसाम्नां श्लोकादिसामभिः समुच्चयः । अधि० ८ ।

सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत ॥ १४ ॥

महाव्रते श्लोकेन पुरस्तात्सदसः स्तुवन्तीति श्लोकसाम्ना प्राकृताज्यादिसाम्नां बाधे प्राप्ते समाधत्ते । सामस्विति । सामसु श्लोकादिसामसु अविकारः प्राकृतसामभिः समुच्चयः । कुतः, अर्थान्तरेण पदार्थान्तरेणान्वयश्रुतेः । अयं भावः । सकृदुच्चरितः शब्दः तस्य यो ऽर्थः प्राकृतस्तुतिरूपः प्राप्तः स एकेन पुरस्तात्सदस इत्यर्थान्तरेणान्वितः श्लोकेनान्वेतुं नार्हति । प्राप्ते ऽर्थे अनेकगुणविधाने वाक्यभेदात् । अतो गुणद्वयविशिष्टं नवीना स्तुतिर्विधीयते । तथा च प्राकृतलिङ्गसंयोगाभावात्समुच्चय इति ॥ १४ ॥

विकृतिविशेषे प्राकृतसाम्नां कौत्सादिभिर्बाधः । अधि० ९ ।

अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारः स्यात् ॥ १५ ॥

क्व चिच्छ्रूयते कौत्सं भवतीति भर्गयशसी भवत इति । अत्र स्तुवतइति प्राकृतलिङ्गाभावात् समुच्चय इति पूर्वपक्षे सिद्धान्तमाह । अर्थे त्विति । अर्थे प्राकृतफले ऽश्रूयमाणे ऽपि प्राकृतस्य प्रकृतिसाम्नो विकारः बाधः स्यात् । शेषत्वात् । प्राकृतस्य वैकृतशेषत्वाविशेषात् । अयं भावः । साम्नः क्रतुमध्यविधिपाठात्क्रत्वङ्गत्वे तदुपकार्याकाङ्क्षायामङ्गत्वाविशेषेण प्राकृतसामोपकार्यमेवाकाङ्क्षानिवर्तकमिति तत्कार्यकारित्वात्तद्बाध इति ॥ १५ ॥

कौत्सादिभिर्व्यवस्थया एकादिबाधः । अधि० १० ।

सर्वेषामविशेषात् ॥ १६ ॥

उक्तोदाहरणे प्राकृतसाम्नां सर्वेषां बाधकमिति पूर्वपक्षमाह । सर्वेषामिति । स्पष्टो ऽर्थः ॥ १६ ॥

एकस्य वा श्रुतिसामर्थ्यात्प्रकृतेश्चाविकारात् ॥ १७ ॥

सिद्धान्तमाह । एकस्य वेति । श्रुतेः एकवचनश्रुतेः सामर्थ्यात् । साधकान्तरमाह । प्रकृतेश्चाविकारादिति । प्रकृतेः चोदकशास्त्रस्य अविकाराद् अबाधात् । श्रुतसंख्याकप्राकृतसामबाधेन विधिश्चरितार्थो ऽधिकं न बाधतइति ॥ १७ ॥

Digitized by Google

विवृद्धाविवृद्धस्तोमकक्रतुषु यथाक्रमं प्राकृतसामबाधाबाधौ । अधि० ११ ।

स्तोमवृद्धौ त्वधिकं स्यादविवृद्धौ द्रव्यविकारः स्यादितरस्याश्रुतित्वात् ॥ १८ ॥

यत्र साम्नां वृद्धिः श्रूयते तत्रापि प्राकृतबाधं कृत्वा वैकृतैरेव संख्यापूरणमिति पूर्वपक्षे सिद्धान्तमाह । स्तोमवृद्धाविति । स्तोमवृद्धौ अधिकं प्राकृतवैकृतसमुच्चयः स्यात् । इतरस्य केवलवैकृतसाम्नः श्रुतत्वात् । तत्र संख्यावृद्धिः श्रूयते सा च प्राकृतवैकृतैः समुच्चितैरुपपद्यतेति भावः । अविवृद्धाविति पूर्वाधिकरणसिद्धान्तानुवादः । द्रव्यस्य सामरूपद्रव्यस्य विकारो बाधकः । मीमांसकमते शब्दस्य द्रव्यरूपत्वे गमकमिदम् ॥ १८ ॥

पवमान एव विवृद्धाविवृद्धस्तोमकक्रतूनां सामावापोद्धापौ । अधि० १२ ।

पवमाने स्यातां तस्मिन्नावापोद्धापदर्शनात् ॥ १९ ॥

विवृद्धस्तोमके क्व चिदावापः क्व चिदुद्धापः श्रुतः । सो ऽविशेषेण यत्र क्व चन कार्य इति पूर्वपक्षे सिद्धान्तमाह । पवमानइति । पवमाने पवमानस्तोत्रे तौ स्याताम् । तस्मिन्पवमाने तयोर्दर्शनात् । श्रुतत्वात् । अत्र छन्दोवापवत्यत एवोद्धपन्तीति वाक्येन ॥ १९ ॥

वचनानि त्वपूर्वत्वात् ॥ २० ॥

ननु न्यायेनैव निर्णये वचनम् अत्र छन्देत्यादि व्यर्थमित्यत आह । वचनानि त्विति । अपूर्वत्वाद्न्यायाभावाद्वचनानि । तथा चान्यतरस्यैव निर्णायकत्वं शेषस्यानुवादकत्वमिति भावः ॥ २० ॥

वामादौ विधिशब्देनैव देवताभिधानम् । अधि० १३ ।

विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना ॥ २१ ॥

दर्शपूर्णमासे यदाग्नेयो ऽष्टाकपाल इति श्रूयते । यो ऽयं विधिवाक्ये श्रूयमाणो ऽग्निशब्दः स एव यार्गनिर्वापादिमन्त्रे योज्य इति न नियमः, किं तु वह्निशब्दो ऽपि । तेनाप्यर्थस्मरणादिति पूर्वपक्षे सिद्धान्तमाह । विधीति । मन्त्रत्वे मन्त्रसंबन्धिदेवतावाचकशब्दोच्चारणावश्यम्भावे विधिगताग्निशब्दस्य भावः उच्चारणं स्यात् । यतः तेन विधिशब्देन हविःसंबन्धेन चोदना आग्नेयं हविरिति अतः । अयं भावः ।

Digitized by Google

आग्नेयो ऽष्टाकपालो भवतीत्यत्र अग्निरूपगुणविशिष्टभावनाविध्यनन्तरमर्थापत्त्या कल्प्याग्निरूपदेवताया द्रव्येण संबन्धविधिवाक्यं द्वेधा संभवति। अग्निपदवाच्यमुद्दिश्य हविस्त्यजेदित्याकारः, एकश्चाग्निपदमुच्चार्य हविस्त्यजेदिति। एकस्य विधिकल्पने अपरमर्थसिद्धम्। तदपीत्यम्। अग्निपदार्थोद्देश्यकहविस्त्यागविधिकल्पने अग्नये इदं न ममेति शब्दोच्चारणमन्तरोद्देश्यत्वं न संभवतीति उच्चारणस्यार्थिकत्वमार्थिकस्यानङ्गत्वात् पर्यायेण येन केनापि शब्देनोद्देश्यनिर्देश इति पूर्वपक्षाभिप्रायः। सिद्धान्तस्य तु अग्निपदमुच्चार्य त्यजेदिति वाक्यं कल्प्यं श्रूयमाणाग्निशब्दकर्मकोच्चारणस्य विधिसंबन्धे शब्दस्यापि तत्संबन्धात्सर्वत्राग्निपदसंबन्ध एव। मन्त्रे तस्य शब्दस्य विधानेनाङ्गत्वात्। यादृशार्थवाचकशब्दस्य चतुर्थ्यन्तस्योच्चारणं तादृशार्थोद्देश्यत्वरूपं देवतात्वमर्थसिद्धमिति भावः॥ २१॥

शेषाणां वा चोदनैकत्वात्तस्मात्सर्वत्र श्रूयते॥ २२॥

साधकान्तरमाह। शेषाणामिति। सर्वत्र उत्तमप्रयाजस्विष्टकृदादिनिगदेषु चोदनैकत्वात्। पठनस्यैकरूपत्वात् तस्माच्छेषाणां शेषमन्त्राणां, विधिशब्दस्य भाव इति पूर्वसूत्रादनुवर्तते॥ २२॥

अतिदेशस्थले ऽपि विधिशब्देनैव देवताभिधानम्। अधि० १४।

तथोत्तरस्यां ततौ तत्प्रकृतित्वात्॥ २३॥

प्रकृतौ मन्त्रेष्वेकरूपपाठे नियमे ऽपि विकृतौ न नियम इति पूर्वपक्षे सिद्धान्तमाह। तथेति। तथा प्रकृतिवत्। उत्तरस्यां ततौ सौर्यादिविकृतिषु शब्दनियमः दर्शपूर्णमासप्रकृतित्वात्। नियमो ऽप्यतिदिश्यत इति भावः॥ २३॥

आधाने ऽग्नेः सगुणेनाभिधानम्। अधि० १५।

प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात्॥ २४॥

आधाने ऽग्नये पावकायाष्टाकपालमिति श्रुतम्। तत्र सिद्धान्तेनोपक्रमते। प्राकृतस्येति। प्राकृतस्याग्नेः गुणश्रुतौ पावकरूपगुणश्रवणात् सगुणेनाभिधानम्। अन्यथा गुणाभिधानं व्यर्थमिति भावः॥ २४॥

Digitized by Google

अविकारो वा ऽर्थशब्दानपायात्स्याद् द्रव्यवत् ॥ २५ ॥

पूर्वपक्षमाह । अविकारो वेति । अविकारः केवलाग्निप्रयोगः । अर्थस्य शब्देन केवलाग्निशब्देनानपायादत्यागात् । पाठवैयर्थ्यं दृष्टार्थत्वं दृष्टान्तेन द्रढयति । द्रव्यवदिति । यद्वा यथा वायव्यामालभेत भूतिकाम इत्यत्रोत्पत्तिवाक्ये वर्णादिरूपगुणविधाने ऽपि निगदेषु छागस्य वपाया मेदस इत्येव पाठो न तु गुणस्य तथा देवतास्थले ऽपीति भावः ॥ २५ ॥

आरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशासनमनर्थकं स्यात् ॥ २६ ॥

सिद्धान्तं व्यवस्थापयति । आरम्भेति । अर्थस्य अग्न्यादिपदस्य यो ऽर्थस्तस्य आरम्भे उत्पत्तिवाक्यस्थतिङ्वाच्यभावनायामसमवायाच्च चतुर्दशाधिकरणे सिद्धान्तभावप्रकटनावसरे उक्तरीत्या ऽनन्वयात् । मीमांसकैकदेशिमते शब्दस्य अग्नये पावकायेति शब्दस्यैव देवतात्वाङ्गीकारात्तादृश्याः केवलाग्निपदेन प्रत्यायनासंभवाच्च । चोदितेन उत्पत्तिवाक्ये श्रूयमाणेनाभिधानं तत्र तत्र निर्वापादौ देवतास्मरणम् । श्रुत्या उत्पत्तिवाक्येन समवायित्वात्सम्बद्धत्वात् । यदि चाग्न्याद्यर्थस्यैव चतुर्दशाधिकरणपूर्वपक्षरीत्या भावनासंबन्धमङ्गीकृत्य तत्र निर्वापादिमन्त्रे केवलाग्न्यादिप्रयोगः क्रियते तदा तदवचने गुणवाचकशब्दापाठे गुणशासनं गुणविधानमनर्थं व्यर्थं स्यात् ॥ २६ ॥

द्रव्येष्वारम्भगामित्वादर्थे विकारे सामर्थ्यात् ॥ २७ ॥

य उक्तो द्रव्यदृष्टान्तः तद्वैषम्यं दर्शयति । द्रव्येष्विति । द्रव्येषु द्रव्यविधिषु अर्थे अजादिशब्दार्थे आरम्भगामित्वाद् उत्पत्तिवाक्यभावनान्वितत्वाद् विकारे गुणरहितकेवलछागपदे सामर्थ्यात् । तदर्थबोधकशक्तिसत्त्वात् । अयमत्र भावः । नन्वर्थस्य देवतात्वं शब्दतः प्रतीयमानमुत्सृज्याप्रतिपन्नस्य अग्निशब्दोच्चारणस्य चोदनार्थता न युक्तेत्याशङ्क्य अर्थस्य विधिपक्षे दूषणकलापः तन्त्ररत्नटीकादौ प्रपञ्चितः । तद्दूषणानां द्रव्यस्याजादिपदार्थस्य विध्यन्वये अभावाद् अजापदार्थेन

Digitized by Google

यायं कुर्यादित्यर्थस्यैव विधिसंबन्धः । तथा बर्हिरूपगुणविशिष्टाजशब्दस्य विध्यसंस्पृष्टत्वेनानङ्गत्वात् छागस्य वपाया मेदस इत्यत्र मन्त्रस्थाने मन्त्रे पर्यायात्मकच्छागशब्दप्रयोगे वा गुणरहितच्छागशब्दप्रयोगे वा बाधकाभावात् गुणरहितच्छागादिपदोच्चारणं युक्तमिति ॥ २७ ॥

आधाने आज्ययोरग्नेर्निर्गुणेनाभिधानम् । अधि० १६ ।

वृधन्वान्पवमानवद्विशेषनिर्देशात् ॥ २८ ॥

पुनराधेये वृधन्वत्याग्नेयस्याज्यभागस्य पुरोनुवाक्या भवतीति श्रूयते । अत्र पूर्वपक्षमाह । वृधन्वानिति । उत्तमस्वाहाकारादिषु पूर्वाधिकरणसिद्धाग्निगुणपवमानोच्चारवद्वृधन्वान् उच्चार्यः विशेषनिर्देशात् ॥ २८ ॥

मन्त्रविशेषनिर्देशान्न देवताविकारः स्यात् ॥ २९ ॥

सिद्धान्तमाह । मन्त्रविशेषेति । स्पष्टो ऽर्थः । अयं भावः । वृधन्वतीति यदि देवताविशेषणं तर्हि भवेदुच्चारणम् । पुरोनुवाक्यारूपमन्त्रविशेषणम् । अतः पवमानवदितिदृष्टान्तासङ्गतिरिति ॥ २९ ॥

गवानुबन्ध्यपशुवपादानहोमयोर्विधिशब्दाभ्यामेव उस्राकनस्पतिशब्दाभ्यामभिधानम् । अधि० १७ ।

विधिनिगमभेदात्प्रकृतौ तत्प्रकृतित्वाद्विकृतावपि भेदः स्यात् ॥ ३० ॥

अस्ति ज्योतिष्टोमे गौरनुबन्ध्य इति । तस्याग्नीषोमपशुप्रकृतिकत्वात् प्रकृतौ उत्पत्तिवाक्ये पशुशब्दश्रवणे ऽपि निगदेषु पशुपदस्थाने छागस्य वपाया मेदसः प्रेष्येति पर्यायश्रवणादत्रापि निगदेषु उस्रादिपर्यायशब्दप्रयोगः इति भावेन पूर्वपक्षमाह । विधीति । प्रकृतौ विधिः उत्पत्तिवाक्ये श्रुतः पशुशब्दः निगमो मन्त्रस्थच्छागशब्दः तयोर्भेदात् । तत्प्रकृतित्वादित्यत्र बहुव्रीहिः । शेषं स्पष्टम् ॥ ३० ॥

यथोक्तं वा विप्रतिपत्तेर्न चोदना ॥ ३१ ॥

सिद्धान्तमाह । यथोक्तमिति । यथोक्तमुत्पत्तिवाक्ये यदुक्तं तदेव पदं योज्यं, यतः विप्रतिपत्तेर्विधिवाक्यश्रुतशब्दान्यस्य शब्दस्य न चोदना

Digitized by Google

न्यशब्दः पठितव्य इति न विधिरस्ति किं तु निगदे छागशब्दपाठे-नार्थास्सिद्धः नार्थिकस्य नातिदेशो ऽस्ति अतः ॥ ३१ ॥

अवभृथे अग्नीवरुणयोः स्विष्टकृच्छब्देनाभिधानम् । अधि॰ १८ ।

स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्तेत ॥ ३२ ॥

अवभृथे अग्नीवरुणौ स्विष्टकृतौ यजतीति । अत्र स्विष्टकृतौ प्राकृतस्विष्टकृत्कार्यकारिणौ अग्नीवरुणौ कार्यावित्यर्थतात्पर्येण पूर्वपक्षमाह । स्विष्टकृदिति । प्रकृतौ स्विष्टकृति देवता या ततो ऽन्यत्वेन एतद्वाक्यविहितदेवतायाः । स्विष्टकृत्पदस्येति शेषः । तच्छब्दत्वात् । प्राकृताग्निरूपार्थविशिष्टशब्दत्वात् । अग्निवाचकत्वादिति फलितं, द्वयोर्बाधान्निवर्तेत । प्रकृतौ स्विष्टकृद्गुणविशिष्टो ऽग्निर्देवता तस्यैवैकदेशेन स्विष्टकृच्छब्देनानुवादं कृत्वा तत्स्थाने ऽग्नीवरुणविधानात् प्राकृतस्य गुणस्याग्नेर्बाध इति भावः ॥ ३२ ॥

संयोगो वा ऽर्थापत्तेरभिधानस्य कर्मजत्वात् ॥ ३३ ॥

सिद्धान्तमाह । संयोगो वेति । संयोगः स्विष्टकृत्पदयोगः अग्नीवरुणयो स्विष्टकृतावावहेति कर्तव्यः स्विष्टं कृतवानिति व्युत्पत्त्या अर्थस्य योगार्थस्य आपत्तेः उपपत्तेः । उक्तार्थमेव विवृणोति । अभिधानस्य स्विष्टकृत्पदस्य कर्मजत्वात् । क्रियानिमित्तत्वात् । अयं भावः । यथा पाचक इति पाकक्रियानिमित्तैवं स्विष्टकरणनिमित्तेयं संज्ञेति ॥ ३३ ॥

अग्नीषोमीयपशौ सर्वत्रैव प्रयोगे निर्गुणेनाग्नेरभिधानम् । अधि॰ १९ ।

सगुणस्य गुणलोपे निगमेषु गुणस्थाने यावदुक्तं स्यात् ॥ ३४ ॥

अग्नीषोमीयपशुपुरोडाशे स्विष्टकृद्यागे स्विष्टकृद्गुणरहितो ऽग्निः श्रूयते अग्निं यजतीति । अत्र केवलयागे ऽन्वयः केवलाग्निशब्दस्य उत तद्घटितप्रयोगइति संशये पूर्वपक्षमाह । सगुणस्येति । प्रकृतौ सगुणस्य गुणस्थाने गुणलोपे प्राप्ते निगमेषु मन्त्रेषु मध्ये यावदुक्तं यावच्छ्रुतं तत्रैव नान्यत्र, प्रकृते यागे श्रुतत्वात्तत्रैव लोप इति ॥ ३४ ॥

सर्वस्य वैककर्म्यात् ॥ ३५ ॥

Digitized by Google

सिद्धान्तमाह । सर्वस्येति । सर्वस्य सर्वगुणस्थाने लोपः ऐककर्म्यात् । एककर्मप्रयोगरूपत्वात् ॥ ३५ ॥

अनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्मत्वम् । अधि० २० ।

स्विष्टकृदावापिको ऽनूयाजे स्यात् प्रयोजनवदङ्गानामर्थसंयोगात् ॥ ३६ ॥

दर्शपूर्णमासे तृतीयो ऽनूयाजः आरादुपकारकः इति पूर्वपक्षे सिद्धान्तमाह । स्विष्टकृदिति । अनूयाजे स्विष्टकृद् आवापिकः आज्यभागस्विष्टकृतोर्मध्यदेश आवापः तत्सम्बन्धी आवापिकः सन् प्रधानाग्नेः स्मरणद्वारा संस्काररूपप्रयोजनवान्स्यात् । कुतः, अङ्गानां समीपवर्तिनामर्थेन वाक्ये श्रूयमाणेनार्थेन संयोगात् । संबन्धात् । अयं भावः । आरादुपकारपक्षे अनूयाजस्य तृतीयस्य प्रकरणेन प्रधानापूर्वाङ्गत्वं, देवतासंस्कारपक्षे यागेनाग्निं स्विष्टकृतं यागेन संस्कुर्यादिति वाक्येन देवताङ्गत्वं, प्रकरणाद्वाक्यं बलीय इति ॥ ३६ ॥

दर्शपूर्णमासयोर्याज्यापुरोनुवाक्ययोः संस्कारकर्मत्वम् । अधि० २१ ।

अन्वाहेति च शस्त्रवत्कर्म स्याच्चोदनान्तरात् ॥ ३७ ॥

तिष्ठन्याज्यामन्वाहेति श्रुतं गुणकर्म प्रधानकर्म वेति संशये पूर्वपक्षमाह । अन्वाहेति । यथा शंसतीति शस्त्रविधिः प्रधानकर्म तद्वद् अन्वाहेति प्रधानकर्म स्यात् । चोदनान्तरात् । स्वतन्त्रचोदनाविहितत्वात् । यदि देवतास्मरणरूपं दृष्टफलं पाठस्य तदर्थत्वं लोकसिद्धमिति विधिव्यर्थः स्यादिति भावः ॥ ३७ ॥

संस्कारो वा चोदितस्य शब्दस्य वचनार्थत्वात् ॥ ३८ ॥

सिद्धान्तमाह । संस्कार इति । देवतासंस्कारः चोदितस्य विहितस्य वाचकशब्दस्य वचनार्थत्वाद् दृष्टार्थत्वसंभवाद् ॥ ३८ ॥

अवाच्यत्वान्नेति चेत् ॥ ३९ ॥

पूर्वपक्षी शङ्कते । अवाच्यत्वादिति । अवाच्यत्वाद्विधेरभावाद् दृष्टार्थत्वं नेति चेत् ॥ ३९ ॥

Digitized by Google

स्याद्गुणार्थत्वात् ॥ ४० ॥

विधेयं दर्शयति । स्यादिति । गुणार्थत्वाद् दृष्टार्थमेव पठनं स्यात् ॥ ४० ॥

मनोतायामूहाभावः । अधि० २२ ।

मनोतायां तु वचनादविकारः स्यात् ॥ ४१ ॥

त्वं ह्यग्ने प्रथमो मनोतेति प्रकृतौ श्रुतम् । वायव्यपशौ त्वं हि वायो इत्यूह इति पूर्वपक्षे सिद्धान्तमाह । मनोतायामिति । वचनात् । वचनमिदं, यत्राप्यन्यदेवत्यः पशुराग्नेय्येव मनोतेति । अतो ऽविकारः । अनूहः ॥ ४१ ॥

कण्वरथन्तरस्य स्वयोनौ गानम् । अधि० २३ ।

पृष्ठार्थे ऽन्यद्रथंतरात्तद्योनिपूर्वत्वादृचां प्रविभक्तत्वात् ॥ ४२ ॥

वैश्यस्तोमे कण्वरथंतरं पृष्ठं भवतीति । प्रकृतितः रथंतरबृहत्पृष्ठौ प्राप्तौ तत्रानेन वचनेन रथंतरबृहतोः साम्नोर्बाधे ऽपि तद्योनिभूतत्वचामबाधाद् बृहद्रथंतरयोनिभूतत्वचां मध्ये रथंतरयोनावेव गेयमिति पूर्वपक्षमाह । पृष्ठार्थ इति । पृष्ठार्थे पृष्ठस्तोत्रकार्ये रथंतरादन्यत् कण्वरथंतरं यद्विहितं तद् रथंतरयोनिकमिति शेषः । तद्योनिः रथंतरयोनिः पूर्वं यस्येति व्युत्पत्त्या ज्योतिष्टोमप्रकृतित्वादिति फलितम् । ननु ज्योतिष्टोमे बृहद्योनेरपि सत्त्वेन तद्योनिकत्वं किं न स्यादत आह । ऋचां बृहद्योनिभूतर्चां प्रविभक्तत्वात् । व्यावृत्तत्वात् । कण्वरथंतरमित्यत्र नामैकदेशेन रथंतरेणेति शेषः ॥ ४२ ॥

स्वयोनौ वा सर्वाख्यत्वात् ॥ ४३ ॥

पूर्वपक्षं दूषयति । स्वेति । स्वयोनौ कण्वरथंतरयोनौ ज्ञेयं सर्वाख्यत्वात् । कण्वरथंतरमिति विशिष्टसमुदायस्य सामविशेषे रूढत्वात् ॥ ४३ ॥

यूपवदिति चेत् ॥ ४४ ॥

Digitized by Google

पूर्वपक्ष्याशङ्कते । यूपवदिति । यथा यूपशब्दः संस्कारकत्वं निमित्तीकृत्य प्रवर्तते तथा प्राकृतरथंतरसंबन्धियाग्रहमेविशिष्टे रथंतरशब्दः प्रवर्तेत । अत्र योनिभेदे रथंतरशब्दो बाध्येतेति भावः ॥ ४४ ॥

न कर्मसंयोगात् ॥ ४५ ॥

सिद्धान्तं व्युत्पादयति । नेति । कण्वरथंतरशब्दो यूपवत्कर्मसंयोगात्, प्रवृत्त इति शेषः । किं तु हस्तिनखशब्दः पुरद्वारवत् सामविशेषे रूढ इति भावः ॥ ४५ ॥

कण्वरथंतरस्य स्वयोन्युत्तरयोर्गानम् । अधि॰ २४ ।

कार्यत्वादुत्तरयोर्यथाप्रकृति ॥ ४६ ॥

कण्वरथंतरसाम्न्येव एकं साम तृचे क्रियत इत्यनेन सामयोनिभूतचमपहायान्यदृग्द्वयमपेक्षते तत्रोत्तरयोर्गायतीत्यनेन स्वस्वयोन्युत्तरदृग्द्वयं प्राप्तं तत्र पूर्वपक्षमाह । कार्यत्वादिति । उत्तरयोः कार्यत्वात् । सामपरिपूर्त्तेः रथंतरबृहदन्यतरोत्तरयुगले यथाप्रकृति कृतं भवति । चोदकशास्त्रबाधो न भवतीति फलितम् । यदुत्तरयोः कार्यं तद्यथाप्रकृतीति सूत्रार्थः ॥ ४६ ॥

समानदेवते वा तृचस्याविभागात् ॥ ४७ ॥

सिद्धान्तमाह । समानेति । तृचस्य ऋक्त्रयस्य अविभागात् । भिन्नदेवताकत्वासंभवात् । समानदेवताकः तृचो भवतीति शास्त्रात् स्वयोन्युत्पन्न एव समानदेवताक इति चोदकबाधो युक्तः ॥ ४७ ॥

अग्निष्टुति स्तुतशस्त्रयोरविकारः । अधि॰ २५ ।

ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात् ॥ ४८ ॥

अग्निष्टुति आग्नेया ग्रहा भवन्तीति । तत्र प्रकृतितः प्राप्तस्तुतशस्त्रमन्त्रेषु अग्निरूह्य इति पूर्वपक्षे सिद्धान्तमाह । ग्रहाणामिति । ग्रहाणां स्तुतशस्त्रमन्त्रदेवतातो देवतान्यत्वे ऽपि अविकारः अनूहः स्तुतशस्त्रयोः कर्मत्वात् । प्रधानकर्मत्वात् । प्रधानकर्मत्वस्य द्वितीये व्यवस्थापितत्वादिति भावः ॥ ४८ ॥

Digitized by Google

Example—

"On a kingdom, the earth is the pith; of earth, a city; of a city, palaces; of palaces, beds; of bed, lovely women, the all in all of the Bodiless One (Cupid)."

(Here the excellence rising successively, reaches the very climax in the 'all in all'; and thus we have the Figure *Climax.*)

(44) The Asangati or Disconnection.

124 [*Page* 779.]—The simultaneous representation of two properties—being cause and effect—as locally separated, is Disconnection.

In ordinary experience the effect is seen to be produced in the place occupied by the cause, as Smoke, &c.; where, on the other hand, two properties—bearing the causal relation between themselves—appear, through some speciality, as occupying different positions, then we have *Disconnection*—so called from abandoning the natural accompaniment of the cause by the effect.

Example—

[*Page* 780.] "People say that to him is pain, who has the sore; but this is not true: the mark of teeth is on the cheek (of a woman) and the pain (consequent upon the cut) is to the co-wives."

This Figure is an exception to (a particular case of) *Contradiction*, and not *Contradiction* itself; since the contradiction perceived here, must necessarily reside in different substrates; contradiction proper, on the other hand, must be substrated in one locality;—and this, though not clearly mentioned (in the definition of Contradiction) yet is inferred therefrom.

This deduction is necessary, since it is only on abandoning the exception that the general rule can stand; and thus has Contradiction been exemplified.

(45) Samâdhi or Convenience.

125 (*contd.*)—[*Page* 781.] Convenience is that where a certain effect becomes easier through the help of other causes.

That where a certain effect, having been commenced, is completed by the doer, helped by other causes, is *Convenience.*

Example—

[*Page* 782.] "Fortunately has the cloud thundered, in order to help me—falling on her feet, in order to pacify her indignant feelings."

125 (*concld.*)—When a certain relation is comprehended as proper, it is the Equal.

(46) The Sama or Equal.

If a certain relation subsisting between fixed objects, be comprehended in such a way as 'this (relation) between these two (objects) is proper,' then it is the *Equal.* This is caused by the connection of (1) proper as also of (2) improper matters.

Example—

[*Page* 783.] (1) "This deer-eyed one is the test-stone, as it were, of the expertness of the creator; you too, are in appearance, unequalled, the support of Cupid. A proper connection of these two has been fortunately brought about, and thereby has been accomplished (in the universe) the undisputed sway of Eros."

(2) "Strange, strange, extremely strange is this,—that the creator fortunately has become the creator of proper phenomena—that the immense quantity of the fruits of the Nimba have to be tasted; and the appreciator of this too has been made the crow."

126-27.—(1) Where the relation of two things cannot attain to propriety on account of some dissimilarity; (2) where the fruit of the action accrues not to the doer, on the other hand (he comes across some extremely) undesirable thing; and (3) where the respective properties and actions of the effects are contradictory respectively to those of the cause,—this is called the Incongruous.

(47) Vishama or The Incongruous.

[*Page* 785.] (1) Where the connection between two objects is comprehended only when not manifest, owing to an extreme dissimilarity between them; (2) where the doer, having begun a certain action, does not only not attain the fruit thereof, but on the contrary comes across a certain undesirable misluck, and (3) and (4) even when the cause and effect are of similar properties, if theirqualities and actions become respectively contradictory,—(these four cases) constitute the fourfold *Incongruous*,—(so called) owing to the inversion of equality (or propriety).

Examples in order—

(1) "Where on one side, this large-eyed one with body softer than the Çirīsha, and on the other, this firelike (uxorious) harshness of Cupid?"

(Here the connection between the woman and the uxorious fire—two entirely dissimilar objects—is not manifest, and is comprehensible only by the implication of the word क्व.)

[*Page* 786.] (2) "सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः ।
ग्रसते साश्रयं तत्र तमन्यः सिंहिकासुतः" ॥

"The hare fearing the son of the lioness took shelter in the moon; him again swallowed together with his shelter, the son of Sinhikā (Rāhu)."

[Here the sense is that not only was the desired protection not obtained, but a further unlucky thing, the destruction of the shelter, was brought about].

(3) Strange it is that he is such that, touched by his hand, his sword, though black as the Tamāla, yet brings forth fame—the ornament of the three worlds—clear as the autumnal moon."

[Here the properties—*blackness and whiteness*—of two objects,—sword and fame, bearing the relation of cause and effect—are contradictory to each other.]

[*Page* 787.] (4) "O lotus-eyed one! Thou impartest extreme joy! The separation, however, brought about by thee, consumes my body."

Digitized by Google

[Here the *giving of joy*—the action of the cause—is opposed to *consuming*—that of the effect].

Similarly in the following may *Incongruity* be applied—

"By whose stomach were swallowed the worlds, at the end of the cycle—he again was swallowed, so to say, by the eyes of town woman, alone and intoxicated."

(48) The Adhika or the Exceeding.

128—Where the container and the contained of the vast contained and the container respectively, are represented as vaster, though really smaller, then it is the Exceeding (or Excess.)

[*Page* 789.] The *contained* is that which lies in the *container*, the substrate. In the case of these being vast, if the container and the contained respectively, though really smaller in comparison with it, be represented as vaster, in order to exalt the matter in hand, or the contrary,——these two kinds are called the *Exceeding*.

Respective examples—

"O Lord of the earth! the threefold universe is really vast which contains the collection of your fame—too vast to be contained."

(Here the delineation desired is that of *the vastness of the fame*, which is the contained; and the representation of the universe, though smaller in fact, as vaster, adds to the exaltation of the object described—*viz.* the fame.)—

"The Foe of Kaitabha could not contain within himself the flood of joy caused by the advent of the holy saint—He in whose person the worlds did freely abide, when at the end of the cosmic cycle, He had withdrawn within Himself all the created souls."

[*Çiçupālavadha*, Canto I.]

[Here the greater vastness of the contained, the joy, is described.]

129 [*Page* 790.]—The Hostile is that wherein is

(49) Pratipaksha or the Hostile.

described the insult or injury, by some one, of those related to the enemy, who is himself incapable of injury,—the insult ending in the exaltation of the enemy.

When an insult or injury is done to the person or thing connected with the enemy, by some one incapable of injuring an insulting enemy,—the injury only adding to the exaltation of the enemy,—then we have the Hostile,—so called on account of the enemy and his followers being taken as identical. As on the occasion of fighting an enemy, some one else, his representative, is fought; so here also on the occasion of the enemy being won over, some one else related to him, is won.

Example—

[*Page* 791.] "O beautiful one! You, have won the beauty of Cupid,—and she is attached (to you). Cupid presses her, through hatred as it were, simultaneously with his five arrows."

[Here Cupid's enemy to be subdued is the king; but he presses the woman attached to the king, unable to harm the King himself.]

Or again—

"Rāhu,—being unable to injure Vishnu, with whom his enmity was brought about by the cutting of the head,—even now troubles the moon, resembling Vishnu's beautiful face."

The moon is said to belong to Vishnu; by the relation of being related (by similarity) to the related (face).

130.—The Lost is that wherein some object is

(50) The Mīlita or the Lost.

concealed by another, by means of its own innate or forthcoming characteristic, common to the two.

Where some object is naturally concealed by another and a stronger one, through some characteristic, common to them, being innate or forthcoming,—this is said to be the twofold *Lost*.

Examples in order—

[*Page* 793.] "The eyes tremulous in the corners; voice sweet and artful; movement gracefully lascivious; the face extremely lovely—all these appearing naturally in the tender body of the deer-eyed one, the intoxication caused by drink though set in, is scarcely perceptible."

Here the *tremulousness, etc.* are characteristics naturally belonging to the body, and are also caused by intoxication, since these are seen there (in intoxication) as well.

[*Page* 794.] "Even experts are not able to perceive the terror of your incapacitated enemies—even though they bear horripilation as well as shivering—located as they are in the caves of the Himālaya, fearing an attack from you."

Here since the property—*coolness*—brought about by the power (of the mountain) is forthcoming, therefore the *horripilation* and *shivering* caused by it are also represented as forthcoming; and these are common to both, being seen as caused by fear (as well as by cold).

(51) Ekāvali or the Necklace.

131.—When the preceding object is either established (affirmatively) or negatived, by being qualified by the one following, and so on, it is the Necklace.

With regard to the preceding object, where the following becomes a qualification and thus brings about either affirmation or denial—it is the twofold *Necklace*.

Examples in order—

[*Page* 795.] (1) "The city where the houses are with women, the women having their bodies adorned with beauty, the beauty teeming with grace, and the graces the weapons of Cupid."

[*Page* 796.] (2) "It is no water, which is devoid of beautiful lotuses; neither is it lotus which contains not the black-bee; nor is that the black-bee which hums not; nothing is the humming if it captivates not the heart."

Digitized by Google

Here in the first example, the *women* are the qualifications of the *houses; beauty*, of the *women*, of which the *graces*, of these again, the *weapons*—thus there is a successive series of qualifications. The serial negation in the second example may similarly be traced.

(52) Smarana or Reminiscence.

132 (*contd.*)—The recollection of objects really experienced, on seeing a similar object, is Reminiscence.

A certain object, being in some form or other experienced, at some time; if this is similarly recollected on coming across a similar object capable of arousing an impression favouring recollection, then we have *Reminiscence*.

Example—

[*Page* 797.] "The celestial women were reminded of the sound made by the throat at the time of dalliance,—by the rippling of the waves against the deep navels of those tremulous-eyed ones."

[*Page* 798.] Or again—

"Bow to Krishna's horripilation, (caused by) the recollection of the Pānchajanya, on the occasion of holding, with his hands, with his lips attached to the nipple, Yasodā's breasts."

(53) Bhrāntiman or the Mistaker.

132 (*concld.*)—The Mistaker is the cognition of a certain object as something else, on seing an object similar to it.

Tad and *Anyat* refer to matters other than the one in hand; if similar to this is formed the matter in hand, then if this latter is known as the former,—it constitutes the *Mistaker*.

This is not *Metaphor*, nor is it the first form of *Atiçayokti;* since in these there is no real mistake; where as in the *Mistaker*, it is clearly expressed, as is denoted by its very name.

Example—

"The cat mistaking the moon rays on the forehead to be milk, laps them; the elephant mistaking them, as shooting through the breaks in the trees, to be the lotus stalks, catches hold of them;

Digitized by Google

the woman, taking them to be cloth at the close of dalliance, takes it up—how strange it is that the moon intoxicated with his resplendence, deludes the world!."

133.—The disregard of the object to be compared, and the assumption—causing disregard—of itself as the object compared to—constitute the Converse.

(54) The Pratipa or the Converse.

(1) When the object compared to is set aside as being useless owing to the capability of the compared object to perform its functions; and (2) where the object compared to is assumed—and thus disregarded—as the object compared on account of making another (the former object to be compared, the object in hand) the object compared to,—both these are called the *Converse*, on account of the objects compared being opposed to one another.

Examples in order—

[*Page* 801.] (1) "O Lord! when the Creator had already created you—the receptacle of beauty, glorious and respectful the foremost of givers, capable of bearing the weight of the Earth —why did he manufacture the Moon? Wherefore was the Sun brought about? Uselessly was the Chintā-jewel produced! And to no purpose were created these high mountains!"

(2) "O beautiful one! come here, lend me your ear and listen to a defamation: your face is compared by mean people to the moon."

Here the *moon*, with which the *face* is compared, being of a lesser degree of excellence, there can be no comparison; and this *disregard* of the moon is implied by the word '*defamation*" (and by '*by mean people*').

[*Page* 802.] Elsewhere a fulfilled comparison becomes a means of disregard or contempt—*e. g.*

"O beautiful girl! wherefore do you bear the pride on account of thy eyes? Here are many such blue lotuses all about in tanks."

Here the very comparison is a contempt to the lotuses.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम् ।

मूल्यम्

चित्रमीमांसा, अप्पयदीक्षितकृता पं॰ तै॰ रामशास्त्रिणा संशोधितः .. .. १)

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीमद्गङ्गाधरशास्त्रिणा संशोधितः .. .. ।=)॥

गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता .. .. १॥)

बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम् .. .. १॥)

प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम् .. .. १)

लघुकौमुदी, ... १)

लघुकौमुदी, श्रीयुतहाकरबालण्टेनाचार्येणाङ्गलदेशीयभाषायां कृता .. .. ४)

श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः =)

वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्येणाङ्गलदेशीयभाषायां कृतम् .. .. ४)

मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद .. .. .. ४)

शाश्वतधर्मदीपिका, ... १)

अमरकोशः सटीकः .. .. ४)

योगवार्त्तिकम् .. .. २॥=)

पीतपदार्थनिर्वचनम् .. .. ३)

वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामकोटिसूरिशास्त्रि-
संशोधिता .. .. ४)

काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः .. .. ३॥)

वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः .. .. .. १)

खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यदत्तटिप्पणीसहितम् ५॥)

श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-
शास्त्रिप्रणीतक्रोडपत्रविषमपदटिप्पणीसमेतः .. .. ७।)

तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् .. .. ६)

तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् .. .. ३=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः । .. .. ॥)

वेदपूर्त्तिः प्रथमोबिन्दुः सत्संप्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

वेदपूर्त्तिसहितो वेदार्थसंग्रहः .. .. २॥)

शास्त्रदीपिका .. .. ६।)

संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलिताटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥)

माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता, ... ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 505

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 521

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 537

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 553

Digitized by Google

काशीविद्यासुधानिधिः

HARVARD ... DEC 5 1898 CAMBRIDGE, MASS.

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 11.] November, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.] [*All rights reserved.*

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

HARVARD COLLEGE LIBRARY
DEC 5 1898
CAMBRIDGE, MASS.

अयं भावः यदि सत्त्वमसत्त्वञ्च मिथोविरुद्धं मन्यसे तदा तदभावयोरपि तथात्वं नान्तरीयकं यद्यपि परस्पराभावव्याप्यमापन्नानां शीतोष्णनीलपीतादीनां मिथोविरोधेऽप्युभयाभावः क्वचिन्न विरुद्धस्तेन दृष्टस्य दुरपह्नवत्वात्तथाऽप्युष्णत्वानुष्णत्वनीलत्वानीलत्वादीनामिव परस्पराभावात्मनोस्सत्त्वासत्त्वयोरेकत्रोभयसमुच्चयवदुभयव्यतिरेकोऽपि व्याहत एव यत्र सत्त्वन्तत्र नासत्त्वं यथा ब्रह्मणि यत्रासत्त्वं तत्र न सत्त्वं यथा कूर्म्मरोमणीतिवत् यत्र सत्त्वाभावस्तत्र नासत्त्वाभावः यथा खपुष्पे यत्र नासत्त्वाभावः तत्र न सत्त्वाभावः यथा ब्रह्मण्येवेति नियमस्य निर्व्याघातत्वादिति यदि समत्वं तर्हि त्वत्पक्षाय कुतस्तुष्यसि मत्पक्षाय किमिति कुप्यसीत्यर्शितप्रलिन्दिशक्तेरनुयोगे सत्त्वासत्त्वसमुच्चयपक्षस्य प्रत्यक्षाद्यानुगुण्यमाह । दृष्टत्वादिति । अनयोस्सहभावः क्व दृष्ट इत्यत्र सर्वत्रेत्यभिप्रायेणाह । क्वचिदपीति । सर्वरूपेण सर्वप्रकारेण कालतो देशतः स्वभावतश्च तत्रतत्र नियतं हि सत्त्वम् अन्यथा सर्वनित्यत्वसर्वविभुत्वसर्वाद्वैतवादानां प्रसङ्गादसत्त्वमपि तथैव अन्यथा सर्वशून्यत्वप्रसङ्गात् एतावत् सदसत्त्वमविरोधादङ्गीकुर्मः नान्यद्विरुद्धमिति चेत् सदसद्व्यतिरेकमप्येवं यथादर्शनमविरुद्धमेवाङ्गीकुरुष्व न तु विरुद्धं, सदसद्व्यतिरेकवादः शास्त्रेषु दृश्यत इति चेत् तथा सदसत्त्ववादोऽपि तत्रतत्र दृश्यत एव अन्यविषयोऽयमन्यपरश्चेति चेत् त्वत्प्रदर्शितोऽपि तथैवेति सदसद्विलक्षणशब्देन ब्रह्मतुच्छान्यत्वविवक्षायां दूषणान्तरमाह । न चेति । इह प्रपञ्चे ब्रह्मतुच्छान्यत्वस्यास्मदभिमतत्वात्तत्साधने सिद्धसाध्यत्वप्रसक्तिरिति भावः । एतेन

सत्त्वेन भ्रान्तिबाधौ स्तां नासत्त्वे ख्यातिबाधने ।
सदसद्भ्यामनिर्वाच्याविद्याविद्योस्सह भ्रमः ॥

Digitized by Google

इति डिम्भजम्भितं प्रत्यूढम् । यदपि तत्तन्निर्वचनखण्डनया सर्वमनिर्वाच्यमिति तदप्यनिर्वचनीयनिर्वचनखण्डनया सर्वं निर्वचनीयं भवेदिति प्रतिवक्तव्यं निर्वचनीयत्वानिर्वचनीयत्वखण्डनयाऽपि प्रपञ्चस्यानिर्वचनीयत्वं सिध्येदिति चेत् ब्रह्मतुच्छयोरपि तत्खण्डनया किन्तन्न सिद्ध्येत् सिध्यतु न ततः प्रस्तुतबाध इति चेन्न तृतीयसौगतसीमातिलङ्घनेन तुर्य्यसौगतगङ्गाप्रवेशप्रसङ्गात् ।

किञ्च निर्वनीयत्वखण्डनोत्थनिर्वृत्तितः ।
विश्वनिर्वचनीयत्वमखण्डितमपेत्यताम् ॥

एवन्त्वदभिमतानिर्वचनीयासंभवात् न तत्ख्यातिसाधने यतितव्यम् ।

इत्यनिर्वचनीयख्यातिभङ्गः ॥ १६ ॥

यदपि शुक्तिप्रदेशनियताविद्याशकलशबलिताद् ब्रह्मणः किमप्यनिर्वचनीयं रजतन्तदानीमुत्पन्नमिदं रजतमिति भातीति भावयन्ति तद्दूषयति । रूप्यमिति ।

मू० रूप्यं जातं तदा चेन्न रजतमिति धीरप्रमा
स्यादमुष्मिन् कार्य्यासामर्थ्यमात्रान्न तदिति
कथनं कल्पतेऽतिप्रसक्त्यै । शुक्तौ चेत-
त्तदात्वे कथमिव जनयेद् दुर्घटाऽनाद्यविद्या
नाशादिस्त्वर्थहेतुर्न च रजतमितिस्सा हि
तेनैव जन्या ॥ १७ ॥

टी० यदि सामग्रीविशेषात्तदोत्पन्नं रजतजातीयं रजतमिति गृह्येत तदाऽऽपणस्थरजतधीवदमुष्मिन्नपि रजतधीरप्रमा न

स्यात् अपि चामुष्मिन्नेदं रजतमिति बाधकधीरप्रमा स्यात् तथा च बाधायोगादबाधितस्य सत्यत्वसिद्धिः रजते च रजतान्यत्वमुल्लिखन्ती बुद्धिरन्यथाख्यातिरस्यात् । अथ नेदं रजतमिति बुद्धिश्शुक्तिविषयेत्युच्येत तदा *पूर्वसिद्धस्य रजतस्य कथं बाधः, न हि रजतसंसृष्टस्यापणादेरजतत्वबुद्ध्या रजतं बाध्येत अन्यथा तत्र रजते नेयं शुक्तिरिति बुद्ध्या शुक्तिरेव किन्न बाध्येत । ननु नेदं रजतमिति बुद्धिरध्यासाधिष्ठानं ब्रह्म रजतान्यत्वेन गृह्णती तत्रतत्र रजतात्मतां बाधतां तह्यरजतस्याधिष्ठानस्य रजतात्मताबुद्धिरन्यथाख्यातिरेवेति मुधा तत्प्रद्वेषः अधिष्ठानरजतयोर्भेदबुद्ध्या च न रजतबाधः किन्तु तदुभयनिष्ठापितं तादात्म्यमेव बाध्येत तथाऽप्यधिष्ठानस्य निषिध्यमानात्यन्ताभावाधिकरणत्वग्राहिणी निषेधबुद्धिस्तत्रत्यं रजतत्वमेव बाधत इति चेद्बाध्यतामधिष्ठाने तत्र रजतत्वं किमायातं तत्रोत्पन्नस्य तन्निष्ठरजतत्वस्य निषेधाभावात्, न हि रजतत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगित्वग्रहणेन सर्वत्र मिथ्या भवति । अपि चास्य रजतत्वस्य स्वाधिकरणतया प्रतिपन्ने निषेधाद्बाधः उत यत्किञ्चिन्निष्ठात्यन्ताभावबोधात् आद्येऽन्यथाख्यातिरनिवार्य्या तदनधिकरणे तदधिकरणत्वबोधात् द्वितीये विगीतस्य को विशेषः सर्वस्य सर्वनिष्ठत्वाभावात् ।

जाते च सदसद्ग्राह्ये सदसद्धीः क्रमात्सती ।
स्वच्छायामिव दुर्लङ्घ्यामन्यथाख्यातिमावहेत् ॥
अन्यथाख्यातिरस्तीति परबुद्धिं निषेधता ।
इष्टा तदन्यथाख्यातिरन्यथा किन्निषिध्यते ॥

* अनया पूर्वसिद्धस्येति ।

अथ स्यात् उत्पन्नमेव रजतं रजतकार्य्यानर्हतया नेदं रजतमिति निषिध्यते अगोप्ता राजा न राजेति न्यायादिति तत्राह । कार्य्यैरिति । अयमाशयः, न हि किंचिज्जातीयं कुतश्चिद् वैगुण्या-त्तज्जातीयकार्यानर्हत्वेनातज्जातीयमनृतं वा भवति अतिप्रसङ्गात् । अतस्तज्जातीयेऽप्यतज्जातीयत्वोपचारमात्रमिति न बाधसद्भावः । ननूपचारोऽपि बाधाविनाभूतः सत्यं, न तत्रोपचर्य्यमाणस्वभाव-बाधः किन्तूपचारशब्दमुख्यार्थबाधमात्रं तथाऽप्यरजतशब्दमुख्यार्थ-बाधे रजतं प्रामाण्येनेति । एवमप्यत्र योज्यं कार्यासामर्थ्ये सत्यपि तदिति कथनं नातिप्रसक्तये कल्पत इति । ननु समर्थासमर्थस्व-भावयोरैकजात्यासंभवादतज्जातीये कथं तदिति कथनम् । नैवम् अवान्तरवैजात्यकल्पनेऽपि तज्जातीयत्वानपायात् अन्यथा कथ-न्तत्राप रजतव्यवहारः तज्जातीयत्वव्यामोहादिति चेत् भ्रान्ति-तोऽपि तर्हि विपरीतख्यातिं, सारूप्यादिति चेन्न सरूपमिति बुद्धौ सारूप्यतिरस्कारेण किञ्चिदिति बुद्धौ चोपादित्साद्ययोगात् स्वरूपे तद्बुद्धिद्वारा सारूप्यस्य प्रवर्तकत्वे दत्तोत्तरत्वात्, अतोऽ-वान्तरवैषम्येऽपि रजतजातीयमेवोत्पन्नं वक्तव्यं न च तस्य बाध-स्सुवचः अबाधे कथं पश्चान्नानुवर्तेत इति चेत् स्वाभ्युपग-तात् प्रणाशादेवेति पश्य, नाशोऽपि बाध एवेति चेन्न तस्य प्रति-पन्नोपाधौ निषेधरूपत्वाभावात् बाधाभावे नाशोऽपि न स्यादिति चेन्न जातस्य हि ध्रुवो मृत्युरिति न्यायेन जातत्वादेव नाशो-पपत्तेः त्वया चानिर्वचनीयं रजतं जातमित्येव समर्थनादिति हेतुनिरूपणासंभवादप्यनिर्वचनीयरजतोत्पत्तिं दूषयति । शुक्ताविति कथमिव—न कथञ्चित् । अयं भावः न तावदहेतुकमिदं रजतं जायेत लोकायतमतप्रसङ्गात् हेतुश्च न तत्स्वरूपं व्याघातात्

Digitized by Google

न च तत्प्रागभावमात्रं तस्यानादित्वेन प्रागपि तज्जनकत्वप्रसङ्गात् अत एव न तत्सहकृतं तन्निरपेक्षं वा स्वरूपानाद्यविद्यामात्रम् अविद्यासन्तानपक्षे च सन्तानिनः कस्यचिद्रजतकारणत्वं किं दृष्टत्वादङ्गीक्रियते कुतश्चित् कल्प्यते वा, नाद्यः असिद्धेः न द्वितीयः कारणसंभवात् कार्यक्लृप्तिस्तया च तत्क्लृप्तिरिति मिथस्संश्रयात्, न ह्यत्र रजतमुत्पन्नमिति दृष्टं तद्बुद्धेरन्यथासिद्धतया न तयाऽपि तदुत्पत्तिक्लृप्तिः इदं सर्वमसृजतेति श्रुत्यसंकोचादिदङ्कारविषयस्य शुक्तिरजतस्यापि सृष्टिरवगम्यत इति चेन्न प्रमाणसिद्धविषयत्वात्तत्र यदिदं किञ्चेत्यनुवादस्य । ननु सत्यञ्चानृतञ्चेत्यनन्तरमेवाप्रामाणिकमप्युपात्तमिति चेन्न अनृतशब्दस्यात्र विकारिवस्त्वन्तरपरत्वात् अन्यथा सत्यमभवदित्यादिना समन्वयवैघट्यादिति दुर्घटेत्यनेन तत्स्वरूपाद्यसंभवं व्यञ्जयति स्वयं दुर्घटापि सती यदि दुर्निरूपं किञ्चित्कार्य्यं जनयेत् अन्यथाख्यातिमपि तथाभूतां किन्न जनयेत् परञ्च भ्रान्तितद्विषयजननात् उभयसम्मताप्रमाणख्यातिमात्रजननमिति च भाव्यम् । अनाद्यविद्यायास्तदातनकार्य्यजनकत्वं सहकारिवशात्स्यादित्यत्र संभावितान् सहकारिणो दूषयति । नाचाद्धिरिति । आदिशब्देन तद्दोषग्रहणम् । इन्द्रियाणि तावन्नार्थमुत्पादयन्ति क्वचिदप्यदृष्टेः तद्दोषाश्च तज्जन्यधीवैपरीत्यापादनेन चरितार्था नार्थविशेषजनकत्वेन कल्पनीया इति भावः । अस्तु रजतबुद्धेरेव सहकारित्वमित्यत्राह । न चेति । किमत्र पूर्वानुभूतरजतस्मृतिरेव रजतजनकतया शङ्क्यते उत स्वविषयेण सहाध्यस्यमाना आहोस्वित् आपणस्थरजतबुद्धिवद्विषयजन्येति विकल्पे प्रथमं दूषयति । न चेति । न हि धीः स्वविषयसजातीयमुत्पादयन्ती क्वचिद् दृष्टा अन्वयव्यतिरेकमहिम्ना त्वन्यथाख्यातिजनकत्वमागोपालं प्रसिद्ध-

Digitized by Google

मिति भावः । द्वितीयं दूषयति । चेति । अथ तेनेति सहयुक्ते तृतीया सविषयवृत्त्यध्यासवादिना त्वया विषयेण सह जायमाना या बुद्धिरिष्यते सा चेद्विषयं जनयेत् विपरिवर्तः किन्न स्यादिति भावः । तृतीयदूषणेऽप्येतदेव वाक्यमावर्तनीयम् अथ तेनेति कर्तरि तृतीया तज्जन्यायास्तदुत्पादकत्वे ह्यन्योन्याश्रयः प्रसज्येत । अथ स्यात् अस्ति सर्वथाविभूतं किमपि चैतन्यं तदेव रजतधीरूपेणापि विवर्तते तत्सहकृताविद्यया कालविशेषनियतरजतोत्पत्तिरिति अथा-प्येतदेव पठितव्यं तच तेनेति पदद्वयं या साक्षित्वेन तवाभि-मता संवित् साऽनादित्वात् नैव जन्या अतस्साऽपि तत्कालनियत-रजतं जनयितुं नार्हति सहकार्यन्तरस्य चान्वयव्यतिरेकादिमतः कस्यचिददृष्टेरिति भावः ।

इत्यनिर्वचनीयरजतोत्पत्तिभङ्गः ॥ १० ॥

संविद्व्यतिरिक्तं सर्वं सर्वथाविद्यमानं सत्प्रतिभातीति पक्षः प्रतिक्षिप्तः । अथ संविदपि तथेति पक्षः प्रतिक्षिप्यते । सत्त्वा-सत्त्वेति ।

मू० सत्त्वासत्त्वद्वयाख्यद्वयविरहचतुष्कोटिमुक्तञ्च
तत्त्वं व्याघाताद्यैर्विधूतं न यदि तव कथं सप्त-
भङ्गीनिषेधः । तुच्छालीकादिशब्दाः क्वचन
सति परं क्वाप्यसत्त्वे प्रवृत्ता बन्ध्यापुत्रादिश-
ब्दैर्भजति च समतां विद्युलीकादिवादः ॥१८॥

टी० यदाहुः ।

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुरिति ॥

अयमत्राभिसन्धिः सच्चेत् किञ्चित् न तद्बाध्यत सर्वदा सर्वत्र सर्वथा च स्यान्नान्यथा स्वभावपरित्यागायोगात् असच्चेत् न ख्या*येत न च कदाचित् कुत्रचित् कथञ्चिदपि स्यात् तत एव, नापि क्वचित्सत्त्वासत्त्वसमुच्चयः उक्तदूषणसमुच्चयात् व्याघाताच्च, उभयशून्यत्वञ्च तत्समुच्चयसमानदूषणम् । अतः सदादिरूपकोटिचतुष्टयविनिर्मुक्तं सर्वं निरधिष्ठानमेव संवृति यतया भाति इदमेव तत्त्वम् । अयमेव सर्वत्रोपदेशसारः शुश्रूषुबुद्धितारतम्यात् क्रमेण तद्बुद्ध्यारोहाय भिक्षुपादप्रसरणन्यायेन क्षणभङ्गादिनिबन्धनमिति एवं वदता स्वपक्षतत्प्रतीतिस्वागमतर्कतन्मूलतत्त्वनिर्णयजयादीनां सत्यत्वं प्रतिपाद्येत न वा पूर्वत्र सर्वमसत्यमिति स्वागमव्याघातः, स्वोक्तिव्याघातश्च, उत्तरत्र किन्तद्दूषणेन अदूषितस्ताह्यस्मत्पक्षस्सिध्येदिति चेन्न साधकाभावे दूषणानुक्तिमात्रेण सिद्ध्यसंभवात् संवृतिसत्त्वं स्वपक्षादिकमङ्गीकुर्म इति चेत् एवमपि तथाभूतपरपक्षादेरिव स्वपक्षादेरपि सिद्धिर्न स्यात् सत्यपि केनचिदकारेणाविशेषे सर्वसाधकतयेत्रास्मत्पक्षस्य विशेषस्सिध्यतीति चेत् मिथोविरुद्धयोर्बलाबलवैषम्याभावे किं कस्य बाधकं बाध्यं वा विधिनिषेधयोर्निषेधस्य प्रसक्तिसापेक्षत्वेन परत्वाद् बलीयस्त्वमिति चेन्न संवृतिदोषमूलत्वाविशेषे परत्वस्याकिञ्चित्करत्वात् अन्यथा चतुष्कोटिविनिर्मुक्तं तत्त्वं नास्तीत्यस्मदुक्तस्य निषेधस्य बल†वत्त्वेन त्वन्मतोन्मूलनप्रसङ्गात् असंजातविरोधिकालोत्पन्नतया वा पूर्ववृत्तविधिप्राबल्यं किन्न स्यात् निषेधसिद्धान्तस्यानादित्वात् न तत्पूर्वं किञ्चिदिति चेत् विधिसिद्धान्तस्याप्यनाद्यनन्ततया ततः परत्वं कस्यचिन्न स्यात् । यत्तु सतस्स-

* ज्ञायेतेति पा· ।

† बलीयस्त्वेनेति पा· ।

Digitized by Google

वेत्प्रकारसत्त्वं स्यात् अन्यथा स्वभावविरोधप्रसङ्गादिति तदसत् देश-कालादिनियततयैव तत्तद्वस्तुस्वभावसिद्धेः तस्य च स्वभावस्य कुतश्चिद्विरोधाभावात् तथाऽनभ्युपगमे स्वभावग्रहणस्यैवासंभवात् प्रसङ्गोऽपि निर्मूलः, एतेनासत्स्वभावस्य सर्वथैवासत्त्वं स्यादिति प्रस-ङ्गोऽपि प्रत्युक्तः खरशृङ्गादौ तथा व्याप्तिर्दृष्टेति चेन्न घटादिषु काला-दिनियतासत्त्वदृष्ट्या व्याप्तेर्दुर्ग्रहत्वात् माभूदसत्त्वमात्रं साध्यव्याप्तं खरशृङ्गादितुल्यं चासत्त्वं प्रसञ्जकमिति चेन्न तस्य विगीतेष्वस्माभि-रनभ्युपगमात् प्रसञ्जकप्रसञ्जनीययोरविशेषप्रसङ्गाच्च । एतेन यदसत् तत्सर्वथैवासत् यथा खरशृङ्गं विगीतञ्च तथा यत्पूर्वापरदेशकालयोर-सतन्मध्येऽप्यसत् यथा खपुष्पमिदञ्च तथेत्याद्यनुमानमपि निकृत्तमूलं ननु ह्रस्वत्वदीर्घत्वाणुत्वमहत्त्वान्यत्वानन्यत्वाद्यापेक्षिकधर्माणां स्वभावत्वे निरपेक्षत्वप्रसङ्गः, परसापेक्षत्वे च किञ्चित्प्रति स्वभावत्वन्न स्यात् न हि खपुष्पादेश्शून्यत्वं स्वभावः परसापेक्षः स्यात्, मैवं यथादृष्टि सर्ववस्तूनां सापेक्षनिरपेक्षस्वभावभेदस्य दुरपह्नवत्वात् यच्च ।

बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च द*र्शिताः ॥

इति तदप्यसत् तत्स्वभावानवधारणस्यापि स्वभावानवधा-रणाद् विपरीततापत्तेः तदेवमुक्तमनुक्तञ्च दूषणजातमभिप्रेत्योक्तम् । व्याघाताद्यैर्विधूतमिति ।

सर्वथाऽनुपपत्तेश्चेत्येवं सूचयता स्फुटम् ।
सर्वदोषाकरत्वञ्च पक्षस्यास्य प्रदर्शितम् ॥

* देशिता इति पा० ।

अविद्यां विश्वजननीमद्वैपक्षमरूपिणीम् ।
निवृत्तिपक्षमाकारां कल्पयन्तोऽप्यतः *हताः ॥

ननु व्याघातादयोऽप्यसत्याः सदसदादिविकल्पानुपपत्तिदुःस्थत्वात् अतस्ते नास्मत्पक्षं दूषयिष्यन्तीत्यत आह । न यदीति । सप्तभङ्ग्युपादानं सर्वस्य पक्षान्तरस्योपलक्षणं व्याघातादिभिरेव हि सप्तभङ्ग्यादिकं त्वयाऽपि दूष्यते चेत् त्वत्पक्षे न दोषाः त्वत्प्रतिपक्षेऽपि न दोषा भवेयुः अतः कथं त्वया तन्निषेधः कार्य इति भावः । अथ ब्रूषे तुच्छादिशब्दाः क्वचिद् व्युत्पन्ना न वा नेति तावन्नाङ्गीकरोषि व्युत्पन्नाश्चेद्विगीतेऽन्यत्र वा, विगीते चेदागतोऽसि मध्यमागमानां मार्गम्, अन्यत्र चेत्तद्दृष्टान्तेन विगीतेऽपि तुच्छत्वं साधयामः, यश्शब्दार्थस्स तुच्छः यथा त्वदिष्टोऽन्यः तथा च विगीतमिति तत्राह । तुच्छेति । क्वचिदन्यत्र विद्यमाने हि पदार्थे केवलं क्वचिन्निष्ठाभावप्रतियोगित्वापेक्षया तुच्छशब्दः अलीकमिथ्यानृतादिशब्दाश्च स्वाभावाधिकरणाध्यस्तत्वोपाधिकाः न तु निरुपाधिनिषेधमपेक्ष्य प्रवर्तन्ते यतस्त्वत्पक्षावकाश इति भावः । यदप्युच्यते द्विविधमलीकं विधिपदं निषेधपदञ्चेति आद्यं विगीतं, द्वितीयं बन्ध्यासुतादीनि एतद् दूषयति । बन्ध्यापुत्रेति । अयं भावः बन्ध्यासुतादेरपि न निषेधैकविषयत्वम् ।

एष बन्ध्यासुतो याति शशशृङ्गधनुर्द्धरः ।
मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः ॥

इत्यादिषु तदभावात्, विगीतस्यापि न विध्येकविषयत्वम् आकारभेदैरपि निषेधैस्सर्वेष निषेधस्य प्रसिद्धत्वात् त्वया च सर्वप्रकारतस्तन्निषेधात् अत ईदृशो विभागो नोपपद्यत इत्येवमविशेषापादनात् किन्त्वया लब्धमिति चेत् एवं विशेषवर्णनाच्च किन्त्वया

* अधःकृता इति पा० ।

Digitized by Google

लब्धं, व्यवहारविशेषव्यवस्थापनमिति चेत् तन्निषेधो मयाऽपि लभ्यत इति पश्य । एवं वाऽभिप्रायः विध्यलीकशब्दो न किञ्चिदर्थं बोधयति अयोग्यपदसमभिव्याहाररूपत्वात् निषेधालीकपदवदिति किञ्चिदिति हि विधिशब्दो बोधयेत् न किञ्चिदिति चालीकशब्दः कथन्तयो-स्सामानाधिकरण्यसंभवः यद्यपि अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि तथाऽपि वन्ध्यासुतशब्दार्थवद् विध्यलीकशब्दार्थ-स्याप्यसिद्धेर्विवक्षितासिद्धिरिति आदिशब्देन संवृतिसत्यव्यावहा-रिकसत्यादिप्रलापसंग्रहः संवृतिसत्यमिति तावत् किमुच्यते किं संवृतिरेव सत्यमुत संवृतिसंबन्धि किञ्चित् सत्यमिति नाद्यः संवृतिशब्दस्य मिथ्याऽर्थपरत्वे सत्यशब्दसामानाधिकरण्यायोगात् तदाहुः ।

संवृतेर्न तु सत्यत्वं सत्यभेदः कुतोऽन्वयम् ।
सत्या चेत् संवृतिः केयं मृषा चेत् सत्यता कुतः ॥

इति सत्यार्थपरत्वेऽपसिद्धान्तः प्रपञ्चमिथ्यात्वप्रयोजकत्वा-योगश्च, न द्वितीयः सत्यस्यासतः कुतश्चित् संवृतिसंबन्धात् सत्यत्वासिद्धेः, न हि किञ्चिज्जातीयं तद्विजातीयसंबन्धात्स्वयमत-ज्जातीयं दृष्टम् । अथ वस्तुतोऽसत्यमेवासत्यत्वसंवृत्या सत्यत्वेन भासमानं संवृतिसत्यमित्युच्यत तथा सति विशेषाग्रहनिबन्धनेयम-न्यथाख्यातिरेव कक्षीकृतेति न क्वचिदपि ख्यात्यन्तरकल्पनावकाशः एतेन संवृतिर्नाम भ्रान्तिरेव तया मिथ्याभूतमेव सत्यत्वेन भासितं संवृतिसत्यमित्यपि निरस्तम् । अथ शुक्तिकारजतमितिवत् संवृति-रूपाधिष्ठानाध्यस्तं सत्यं संवृतिसत्यमित्यभिमतं तथा सति निर-धिष्ठानभ्रमपरित्यागप्रसङ्गः, संवृतिमात्रे निरधिष्ठानं भ्रमं ब्रूम इति चेत् तद्वदेव संभवे किं प्रपञ्चस्य सत्यासत्यादिविकल्पासहसंवृतिरू-

पाधिष्ठानकल्पनेन। न च संवृतिरधिष्ठानं भवितुमर्हति शुक्तिवत् केनचिदाकारेण तद्भानादृष्टेः, अत एव संवृत्तिरपि संवृत्यन्तरेऽध्यस्तेति निरस्तं संवृत्तिसन्ततेरसन्ततानन्तसंवृत्तिवर्गस्य चानुपलम्भात्, सन्ततिपक्षे च पूर्वपूर्वसंवृतीनामुत्तरोत्तरसंवृत्तिकारणत्वमात्रं स्यात् न त्वधिष्ठानत्वम्, असमानकालत्वात् न हि नष्टे शुक्तिकादौ वर्तमानतया रजतमध्यस्यमानं दृष्टम् । असन्ततिपक्षे च सर्वसंवृतीनामनादित्वेन कल्पनासिद्धत्वायोगात् किमधिष्ठानेन, न ह्यकल्पितस्यापणस्थरजतादेरन्यदधिष्ठानमन्विष्यते एवं तैमिरिककेशस्तवकादिन्यायेन संवृत्याख्यदोषाध्यस्तं संवृतिसत्यमित्यप्यसारम् अतिदूरत्वात्यासन्नत्वसादृश्यतिमिरकाचपटलादिवत् संवृत्तिसंज्ञस्य दोषस्य कुतश्चित्प्रमाणादसिद्धेः, अलीकप्रकाशान्यथानुपपत्त्या तत्क्लृप्तिरिति चेत् किं संवृतिरलीकम् अप्रकाशमाना प्रकाशयति प्रकाशमाना वा, आद्ये अवगमाधीनसत्ताकत्वाभावात् स्वरूपसत्यत्वप्रसङ्गः । द्वितीये त्वसिद्धिः सर्वलोकानुपलब्धिबाधितत्वात्, न हि त्वयाऽपि तादृशी संवृत्तिः काचिदुपलभ्यते अलीकप्रप्रकाशाऽन्यथाऽनुपपत्तिप्रकाशिताऽपि विश्वं प्रकाशयतीति चेन्न अन्योन्याश्रयणात्तत्प्रकाशादलीकप्रकाशस्तन्मूलकल्पनया च तत्प्रकाश इति । अपि चालीकप्रकाशस्य दोषोऽपेक्ष्यत इति कुतावगतं संप्रतिपन्नभ्रमेष्विति चेत् तत्र तर्ह्यधिष्ठानदृष्टसादृश्यदोषाश्रयादिकमपि कारणत्वेन दृष्टमिति तान्यपि किन्न कल्प्यन्ते कल्प्यमानान्यपि तान्यकाल्पनिकान्येव सिद्ध्येयुरिति चेत्किमनया संवृत्यादिगणकल्पनया तद्वदेव प्रपञ्चो दोषादिनिरपेक्षः कल्पित इत्यङ्गीकुरुष्व तथाऽङ्गीकारे च संवृतिसत्यमिति रिक्तं वचः एवं व्यावहारिकसत्यशब्दोऽपि न क्वचिद्विवक्षितसाधकः कुतश्चिदपि प्रमाणादुपलभ्यमानसत्यत्वप्रतिषेधासिद्धेः न च व्यावहारिकशब्दो

Digitized by Google

मिथ्यापर्य्यायस्तथात्वे सत्यपि सामानाधिकरण्ये सत्यशब्दोऽन्वयवैयर्थ्यं वैयधिकरण्ये त्वदिष्टस्यासिद्धिः, न हि मिथ्यारजतादिसंबन्धिशुक्त्यादिकं मिथ्या भवति । अथ शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति न्यायात् व्यवहारजन्यविकल्पकल्पितं व्यावहारिकसत्यमिति मन्वीथाः, तदपि न प्रत्यक्षानुमानवेद्यस्य प्रपञ्चस्य शब्दकल्पितत्वाभावात् यच तु शशशृङ्गादौ शब्दकल्पितत्वं कथञ्चिदभ्युपगम्येत तचैव व्यावहारिकसत्यत्वं स्यात् न तु प्रत्यक्षादिसिद्धेष्विति स्वेष्टविपरीतापत्तिः । अतः प्रातीतिकसत्यस्य च व्यावहारिकसत्यत्वानभ्युपगमात् । अपि चेदमपारमार्थिकं सत्यं पारमार्थिकसत्यतया भातीत्यङ्गीकार्य्यम् । अन्यथा प्रवृत्त्यनुपपत्तेः तथा चान्यथाख्यात्यन*पायात् किं ख्यात्यन्तरेणेति ॥ १८ ॥

ननु प्रमेयसिद्धिः प्रमाणादेष्टव्या प्रमाणञ्चासिद्धं न साधकं भवति तत्सिद्धिश्च स्वतोऽन्यतो वा पूर्वचात्माश्रयः उत्तरचानवस्था अतः प्रमाणमाचस्यैवासंभवात् न किञ्चिदपि प्रमेयं न कश्चिदपि प्रमाता न काचिदपि व्यवहृतिरिति तचाह । व्याघातेति ।

मू० व्याघातादिप्रसङ्गौ प्रमितिपरिभवे मानतोऽमानतो वा मानाम्मानस्वसिद्धौ स्वतदितरपरित्राणमेकप्रवृत्त्या । साधीयानेष पन्थास्समयिभिरखिलैरर्थतां सार्थनीत्या नो चेदुच्छिन्नलोकव्यवहृतिनियमाः कामचाराः कथास्स्युः ॥ १९ ॥

---

* ख्यातनपनयादिति पा० ।

टी० अयं भावः प्रमाणस्य प्रतिषेधः प्रमाणतो वा स्यादप्रमाणतो वा पूर्वत्र व्याघातः प्रमाणस्य सर्वस्य प्रतिषेधात् तदर्थञ्च कस्यचित् प्रमाणत्वेनोपादानात् । ननूपक्रमापच्छेदपदाहवनीयादिन्यायेषु प्रमाणत एव प्रमाणबाधस्त्वयेष्यते, सत्यं, न प्रमाणमात्रं बाध्यते येन व्याघातः स्यात् किन्तु स्वेतरत् किञ्चित्प्रमाणं तथाऽपि प्रमाणस्य सतः कस्यचित्कथं बाध इति चेन्न तत्प्रामाण्यमात्रस्यानपहारात् प्रबलविरुद्धविशेषे हि प्रामाण्याभावस्समर्थ्यते इह पुनः कृत्स्नप्रमाणबाधाशक्यत्वमुच्यते उत्तरत्र व्याघातातिप्रसङ्गौ यदि ह्यप्रमाणतः प्रमाणं प्रतिषिध्येत तत्प्रतिषेधोऽपि तत एव प्रतिषेध्यः स्यात्, त्वत्पक्षस्य सर्वैस्सर्वैः प्रतिपक्षैः, रज्ज्वादिबुद्धिश्च सर्प्यादिभ्रमैः, कथन्तर्हि भूदलनबुद्ध्या रज्जुसर्पनिवृत्तिः, इत्थम् । उत्तरधियः पूर्वविपरीताकारावगाहित्वेन पूर्वभ्रमानुवृत्तिप्रतिरोधात्, न हि भूदलनबुद्धिबाधिततया तत्र सर्पस्य मिथ्यात्वव्यवस्थापनं तथा सति रज्जोरपि तत्प्रसङ्गात् । किन्तु प्रमाणभूतेनाधिष्ठानयाथात्म्यज्ञानेन बाधितत्वात् एवं प्रमाणस्याप्यप्रमाणबाधितत्वमात्रेण न मिथ्यात्वं स्यात् ।

अप्रमाणतयाऽभीष्टान्न बाधस्तर्कतः क्वचित् ।
अनुग्राह्यप्रमाणानामभावे परिगृह्यते ॥
प्रसञ्जनीयधर्मस्य मानसिद्धौ विपर्य्ययः ।
प्रमाणं भवति क्वापि प्रसञ्जकविपर्य्यये ॥

तदेवं प्रमाणतोऽप्रमाणतो वा प्रमितिपरिभवे व्याघातातिप्रसङ्गौ व्यवस्थिताविति प्रमाणसिद्धिः स्वतोऽन्यतो वेति विकल्पे तु यथादर्शनम् उभयथाऽपीति ब्रूमः स्वपरनिर्वाहकसमाधिना त्वात्माश्रयानवस्थयोरपसारणं तदे*तदाह । मानादिति । न हि वयमप्रमाणात् प्रमा-

* तदेवाहेति पा० ।

वास्यान्यथा वा सिद्धिं ब्रूमः किन्तु प्रमाणतस्तस्य व्यक्तिभेदे तु प्रमाणान्तरात्प्रमाणसिद्धिः यथा यत्तद्दृष्टमिदं द्रक्ष्यामीति यदा त्वीदृशी प्रमेति प्रमितिमात्रं गृह्यते ईदृशं वा प्रमितिकरणमिति प्रमाकरणमात्रं तदा पुनरेकहेलया स्वस्वेतरलक्ष्यसमुदायव्यवस्थापनात् नानवस्थाऽऽत्माश्रयो वा शब्दशब्दादिन्यायात् तर्ह्यप्रमाणादपि प्रमाणप्रतिक्षेपे स्वपरनिर्वाहकसमाधिना स्वात्मापि प्रतिक्षिप्यतामिति चेन्न अविरुद्धविषयत्वात् स्वपरनिर्वाहस्य, यथा ।

अहं सत्यं वदामीति स्वोक्तिः स्वपररक्षिणी ।
न कदाचिद्वदामीति वादस्तु स्वोक्तिबाधितः ॥
मानस्थापकमानस्य मानसंक्षोभकस्य च ।
गतिरेवमिति प्रेक्ष्य गहनां कुहनान्त्यज ॥

सर्वैरपि सिद्धान्तिभिरियं गतिरनतिलङ्घनीयेत्यभिप्रायेणाह । साधीयानिति । समयिभिरखिलैः प्रमाणस्थापकैरिव तद्दूषकैरपीति भावः । व्यावहारिकप्रमाणव्यवस्थापि हि क्वचित्क्वचित्स्वपरनिर्वाहकसमाधिमनुरुद्ध्यैव प्रवर्तेत मिथ्यात्वादिसाधकेषु च त्वयाऽभ्युपगम्यते तस्मादर्थ्यतामिष्यतामित्यर्थः सार्थनीत्या—यथा विपश्चित्प्रयुक्तस्सर्वशब्दस्सार्थ इति वाक्ये तदन्तर्गतपदानामपि सार्थकत्वमविशेषेण संप्रधार्यते । यद्वा त्वद्व्यापारस्सर्वोऽपि निरर्थकः सार्थको वा आद्ये किं स्वपक्षस्थापनपरपक्षदूषणादिप्रयासेन, द्वितीये तत्सार्थत्वं कस्यचित्प्रमाणस्यार्थः स्यान्न वा न चेन्न तत्सिद्धिः प्रमाणार्थश्चेत् तत्प्रमाणाभ्युपगमः । अथवा तीर्थयात्रादिप्रवृत्तस्सार्थः परस्परविरुद्धाभिप्रायवतां समवायेऽपि केनचिदाकारेणाभिप्रायसाम्यादन्योन्याविघातेन गन्तव्यं गच्छति तथा मिथोविरुद्धावष्टम्भेऽपि सिद्धान्तिभिः प्रमाणात्प्रमेयसिद्धिरित्यादिकं लौकिकपरीक्षक-

सेतुमभिन्दानैः प्रस्थातव्यमिति । एवमनभ्युपगमे बाधकमाह । नोचेदिति । कथाः वादजल्पवितण्डारूपाः उच्छिन्नलोकव्यवहारनियमतया कामचाराः स्यु—र्वक्तव्यावक्तव्यकर्तव्याकर्तव्यविभागरहिततया न तत्त्वनिर्णयादिफलपर्य्यन्ताः स्युरिति भावः । यद्वा कथास्वाथनदूषणाद्युक्तयः सदसद्भावानादरेण स्वच्छन्दतः स्युरिति । ननु सर्वलोपभङ्गस्य कथासंलोपप्रसङ्गेनापि किमनिष्टमापादितम् एवं वदतस्ते किञ्चिदनिष्टमस्ति वा न वा न चेत् न सन्नासदित्यादिना परपक्षो न दूष्यः, अस्ति चेत् त्वद्वाक्यमात्रेण त्वत्पक्षो दुष्ट इत्यनिष्टमापादितमेवेति ।

इति निरधिष्ठाननिरुपाधिकासत्ख्यातिभङ्गः ॥ १९ ॥

अथ नास्तिक्यमान्द्यात् संविदपलापे दुर्बलबुद्धीनां योगाचाराणामात्मख्यातिमपाकर्त्तुं प्रत्यक्षविरोधप्रतिपिपादयिषया बाह्यार्थसिद्धिं तावदाह । ज्ञानाकारेति ।

मू० ज्ञानाकाराधिकं हि प्रथितमिदमिति श्वेतपीतादि बाह्यं तादात्म्ये तस्य साध्ये सहमतिनियमाद्यन्यथैवात्र सिद्धम् । ग्राह्यात्मत्वान्मृषा स्यान्मतिरपि यदि वा ग्राह्यमप्यस्तु तथ्यं किञ्चान्योन्यं विरुद्धैर्युगपदवगतैर्धीरभिन्ना कथं स्यात् ॥ २० ॥

टी० ज्ञायत इदमिति वा जानामीदमिति वा बोधे क्रियारूपाया बुद्धेः कर्मत्वतया प्रसिद्धं श्वेतपीतादिवस्तुजातं बुद्धितत्त्वात् बाह्यमेव भवितुमर्हत्यन्यथा क्षणभेदसन्ततिभेदयोरपि केनचिज्ज्ञानेन गृहीतावगृहीतौ च क्षणभेदाद्यसिद्धिप्रसङ्गेन दत्तोत्तरत्वात् ततश्च

Digitized by Google

भेदमात्रापन्हवे त्वप्यन्तःकुदृष्टिवादस्य स्वीकारः, भिद्यमानापन्हवे तु माध्यमिकमतावतार इति भावः एतेन ।

अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥

इति प्रलपितं प्रत्युक्तं, श्वेतपीतादि बाह्यमिति वदतस्त्वायं भावः बुद्धिबोध्ययोरभेदं ब्रुवता विरुद्धधर्माध्यासेन भेदः कश्चिदङ्गीकृतो न वा न चेद्गतमेवोत्तरं सर्वभेदासिद्धिप्रसङ्ग इति अङ्गीकृतश्चेत् श्वेतपीताद्यनेकाकारग्राहिण्येकत्र ज्ञाने कथं मिथोविरुद्धश्वेतपीतादितादात्म्यसम्भवः मिथो विरुद्धयोरेकबुद्धिविषयत्ववदेकबुद्ध्याकारत्वमप्यविरुद्धमिति चेन्न दर्शनादर्शनाभ्यां विशेषात् एकत्वविरोधः एकदैकाश्रयत्वविरोधश्च श्वेतपीतादेर्दृष्टः न त्वेकधीविषयत्वविरोधः, त्वया तु श्वेतपीतादेर्बुद्ध्याकारत्वं वदता बुद्ध्यैक्यं बुद्धिधर्मत्वं वोच्येत द्वितयमपि व्याघातघटितम् अतो बुद्धिव्यतिरिक्तस्यार्थस्य बुद्धिवदबाधितोपलब्धिसिद्धत्वात् न तदभावस्साध्य इति । सूचितञ्चैतत् नाभाव उपलब्धेरिति । ननु भेदोपलम्भमात्रात् न भेदसिद्धिः द्विचन्द्रादावपि प्रसङ्गात् बाधात्तत्र तथेति चेन्न अविशेषात्, कथमविशेषः न हि प्रत्यक्षतो बोध्यबाधः नेदमस्तीति सार्वत्रिकनिषेधाभावात्, अनुमानादिकन्तु स्वोपजीव्यप्रत्यक्षप्रतिषेधक्षममिति चेन्न ज्वालैक्यादिप्रत्यक्षस्यानुमानादिना बाधाभ्युपगमात् तत्र प्रत्यक्षस्याचिरनिर्वापितारोपितप्रदीपन्यायेनान्यथासिद्धिशङ्कास्पदतया दौर्बल्यमिति चेन्न इहापि प्रतिबिम्बभेदोपलब्धिन्यायेनान्यथासिद्धिसम्भवात्, ततश्च ग्राह्यग्राहकयोरनुमानादभेदसिद्धिरित्यत्राह । तादात्म्य इति । तस्य वेद्यतयैव सिद्धस्य पदार्थस्य चित्तितादात्म्ये सिषाधयिषितेऽस्मिन्

स्याद्वर्मान्तं क्षत्रियस्य त्वित्यनेन नाम्न्यनन्तर्भूतयोरेव तयोः प्रयोग उक्तः, न तु नाम्न्यन्तर्भावः। 'तुषजक इति'। कुत्सिते कः, शूद्रस्य तु जुगुप्सितमिति वचनात् एवं विधं शूद्रनाम। 'स्त्रियामपीति'। अस्त्रीशूद्रयोरिति वक्तव्यमित्यर्थः। केचिदाहुः। न स्त्र्यभिवादयते पादोपसंग्रहणादेव तु करोतीति, अन्ये त्वाहुः। अभिवादयते न तु स्वं नाम गोत्रं वा गृह्णातीति, द्वयोरपि पक्षयोः स्त्रीप्रतिषेधो न विधेयः, ये तु स्त्रीणामपि नामगोत्राभ्यामभिवादप्रत्यभिवादाविच्छन्ति तन्मतेनायं प्रतिषेधः। असूयतीत्यसूयकः, अविनीतः, तस्मिंस्त्वित्यादिनाऽसूयके प्रतिषेधं प्रत्याचष्टे। यावदसावसूयकत्वेन ज्ञातो न भवति तावत्प्लुतं करोत्येव, यदा त्वसूयकोऽयं मामुपहसितुकाम इति जानाति तदा नैवाऽऽशीर्वादरूपं प्रत्यभिवादं प्रयुङ्क्ते प्रत्युत शापमेव ददातीति भाष्ये दर्शितमित्याह। 'तथा ह्युक्तमिति'। गुरुणा स्थालिशब्दं सञ्ज्ञां मत्वा प्लुते प्रयुक्तेऽसूयक आह नैषा मम संज्ञेति किं तु दण्डिन्यायो मया विवक्षितः, स्थालमस्यास्तीति स्थालीति, तदपि तत्त्वं मन्वानो गुरुः पुनरपि प्लुतरहितं प्रत्यभिवादनं कृतवान्। 'आयुष्मानेधि स्थालिन्निति'। पुनरसूयक आह न दण्डिन्यायो मया विवक्षितः, संज्ञैवैषा ममेति, ततोऽसूयकत्वं निर्ज्ञाय कुपितः सन् गुरुराह। 'असूयकस्त्वमित्यादि'। 'भिद्यस्वेति'। कर्मकर्त्तरि यक्। स्थालिन्निति पाठो न तु स्थालीवदिति। 'अभिवादवाक्ये यत् संकीर्तितमिति'। येन वाक्येनाभिवाद्यते तदभिवादनवाक्यं, नाम, संज्ञा, गोत्रमपत्यप्रत्ययान्तः शब्दः। वाक्यस्य टेः प्लुतविधानादेवमुक्तम्। 'तत्र प्लुति[1]रिष्यतइति'। इष्टिरेवेयमिति केचित्। अन्ये त्वाहुः। अभिवादनं तावन्नामगोत्राभ्यामिति समाचारप्राप्तं, प्लुतोप्ययं प्रधाने कार्यसंप्रत्ययात्तस्यैव वाक्यान्ते वर्त्तमानस्य भवति, पदस्य च प्राधान्यमर्थद्वारकं, प्रधानमर्थोऽभिवादयिता तदनुग्रहार्थत्वात्प्रत्यभिवादस्य, कुशलित्वादिकं तु तस्यैव संस्कारकम्, एवमेधीत्याख्यातव्याख्या साध्यरूपतया प्रधानभूतापि क्रिया संस्कारकत्वेन विवक्षितत्वादप्रधानमेव, तस्मात्प्रधानभूतस्याभिवादयितुर्यदुपस्थापकं पदं तस्य प्लुतः। तच्च

१ प्लुत इति मु॰ मू॰ पु॰।

नामगोत्रं चेति । 'भोराजन्यविशां वेति' । भो इति स्वरूपग्रहणम् । इतरयोस्तु तदाम्नां ग्रहणं, तत्र भोःशब्दस्यासंज्ञायोगशब्दत्वादप्राप्ते विभाषा, इतरत्र प्राप्ते, संज्ञाशब्दत्वात् ॥

"दूराद्धूते च"॥ दूरादिति दूरान्तिकार्थेभ्यो द्वितीया चेति पञ्चमी, हूतं ह्वानं भावे निष्ठा, दूरादित्युच्यते दूरं चानवस्थितं, तदेव हि किं चित्प्रत्यतिदूरं किं चित्प्रत्यन्तिकं भवति, एवं हि कश्चित्कं चिदाह य एष पार्श्वतः करकस्तमानयेति, स आह उत्थाय गृहाण, दूरे न शक्नोमि गन्तुमिति, अपर आह दूरं मथुरायाः पाटलिपुत्रमिति, स आह न दूरमन्तिकमिति, तदेवं दूरस्यानवस्थितत्वाच ज्ञायते कस्यामवस्थायां प्लुत्या भवितव्यमित्यत आह । 'दूरमित्यादि' । ह्वानं हूतं तदपेक्षया यद्दूरं तदिहाश्रीयते दूराद्धूतमित्यन्वयात्, इतिकरणो हेतौ, न तु देशमपेक्ष्य देशान्तरं दूरं भवति, किमिदं हूतापेक्षं दूरमित्यत आह । 'यत्रेति' । यत्र हूते, प्राकृतात्स्वभावप्रसिद्धात्, एवंविधे हूते देशद्वारकहूतापेक्षमपि दूरत्वमस्तीति भावः । 'हूतग्रहणं चेति' । येन पर आगमने नियुज्यते तद्धूतं, तच्च नान्तरेण संबोधनं संभवति, संबोधितो हि पुरुष आगमने पानादौ वा नियुज्यते, अतो नान्तरीयकत्वाद्धूतेन संबोधनमात्रं लक्ष्यते, उपलक्षणे प्रयोजनमाह । 'तेनेति' । इहायं प्लुतो दूरात्संबोधने विधीयते, एकश्रुतिरपि तत्रैव, एकश्रुति दूरात्संबुद्धाविति एकस्मिंश्च विषये प्राप्तानां बाधविकल्पसमुच्चयानामन्यतमेन भवितव्यं, तदिह को भवतीत्याह । 'अस्याश्चेति' । बाधस्तावद्विषयभेदे सति भवति, यथा काणोः, तत्र हि कस्य विशेषो विषयः, अणस्तु धातुसामान्यम्, इह तु नैवं विषयभेदोस्ति, विकल्पोपि सहप्राप्तयोर्भवति, यथा तव्यदादीनाम्, इह चैकश्रुतौ कर्तव्यायां प्लुतस्यासिद्धत्वात्सहप्राप्तिर्नास्ति, तस्मात्पारिशेष्यात्समावेश एव भवति, एकस्मिन्वाक्ये द्वयोरपि युगपत्प्रवृत्तिरित्येतावता चात्र समावेशवाचो युक्तिस्तत्त्वतस्तु वाक्यस्य टेः प्लुत उदात्तः, परिशिष्टस्यैकश्रुत्यमिति बाध एव ॥

"हैहेप्रयोगे हैहयोः" ॥ पूर्वेण हूयमानार्थस्य वाक्यान्तस्य पदस्य टेः प्लुतविधानाद्धतदर्थयोर्हैहयोर्न प्राप्नोतीति वचनम्। 'हैहयोरेवेति'। एवकारः पौनर्वचनिकः, हैहयोः प्रयोगे तयोरेव हैहयोरिति। अन्ये तु हैहयोरेव भवति न हूयमानार्थस्य वाक्यस्य टेरिति वर्णयन्ति, तदेतत्कथं लभ्यते, अपकृष्य विधानात् हूयमानार्थस्य प्लुते प्राप्ते तदर्थयोरेव तयोर्विधीयमानः प्लुतस्तं बाधते, सत्यपि संभवे बाधनं भवतीति न्यायात्, न चास्यासिद्धत्वम्, अपवादो वचनप्रामाण्यादित्युक्तत्वात्। 'है३ इति'। प्लुतावैच इदुतौ इति वचनादिकारभाग: प्लुतः। 'हे३इति'। एचोऽप्रगृह्यस्येत्यनेन प्लुतविकारो न भवति दूराद्धूतत्वात्। हैहयोरिति किमर्थं, हैहयोः प्लुतो यथा स्यात् अन्यथा ऽऽरम्भसामर्थ्यादनन्त्यस्य हूयमानवाचिन एव स्यात् देवदत्त है इत्यादौ, एवं तर्हि हैहयोरित्येवास्तु किं हैहेप्रयोगइत्यनेन, नह्यप्रयुज्यमानयोः प्लुतविधिः संभवति। उच्यते। प्रयोगइति तावद्वक्तव्यं, प्रयोगमात्रे यथा स्यात्, किं सिद्धं भवति, अनर्थकयोरपि ग्रहणं सिद्धं भवति, क्व च तावनर्थकौ, यत्र संबोधनवचनं प्राक् प्रयुज्यते तत्र तेनैवाभिमुख्यस्य द्योतितत्वात्त हैहयोर्द्योत्यमस्तीत्यनर्थक्यं, यत्र तु हैहयोः प्राक् प्रयोगस्तत्रानयोराभिमुख्यं द्योत्यमित्यर्थवत्त्वम्, एवमपि प्रयोगे हैहयोरित्येवास्तु, हैहयोः प्लुतो भवति प्रयोगे, कस्य हैहयोरेवेति श्रुतत्वात्, तस्मात्पुनर्हैहेग्रहणस्य प्रयोजनं वक्तव्यं तदाह। 'पुनरिति'। यदि तु प्रयोगग्रहणादेवानर्थकयोरिवानन्त्ययोरपि भविष्यतीत्युच्येत शक्यं पुनर्हैहेग्रहणमकर्तुम् ॥

"गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" ॥ 'अनन्त्यस्यापि टेरिति'। अनेनापिशब्देन प्रकृतष्टिः संमुच्चीयतइति दर्शयति, यदि तु गुरोः संनिधानात्स एवान्त्यः समुच्चीयेत गुरोरनन्त्यस्यान्त्यस्यापीति, ततो तेन यत्रान्त्यो गुरुस्तत्रैव पर्यायः स्यात्, लघौ त्वन्त्ये पूर्वेण तस्य स्यादनेन चानन्त्यस्य गुरोरिति द्वयोः प्लुतयोर्युगपत्प्रसवः प्राप्नोति, अनुदात्तं पदमेकवर्जमितिवचनाच्चास्ति यौगपद्यसंभवः, असिद्धः प्लुतस्तस्या-

सिद्धत्वाद्वियमो न प्राप्नोति, नैतदस्ति, कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपतिष्ठते वाक्यस्य टेः प्लुत उदात्तः गुरोरनृतः प्लुत उदात्तः, उपस्थितमिदं भवति अनुदात्तं पदमेकवर्जमिति, तस्मान्नास्ति यौगपद्यसंभवः, यस्तर्ह्यनुदात्तःप्लुतस्तस्यास्य च समावेशः प्राप्नोत्यभिपूजिते दूराद्धूते प्लुतो भवन्ननुदात्तं प्रश्नान्ताभिपूजितयोरिति टेरनुदात्तो भवति, शोभनः खल्वसि देवदत्त इति, तत्र तेन गुरोरुदात्तः प्लुतः स्यात्, तस्माट्टेरेव समुच्चेतव्यः, तत्रेह्यकैकस्येतिवचनात् यथा ऽनन्त्यस्य पर्यायो ऽयं भवति तथा ऽन्त्यस्य टेरपीति नास्ति यौगपद्यप्रसङ्गः । 'एकैकग्रहणं पर्यायार्थमिति' । अन्यथा ऽनन्तरोक्तेन प्रकारेणोदात्तानुदात्तयोः प्लुतयोः समावेशः स्यात्, क्वचित्पठ्यते प्रत्यभिवाद इत्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानिविशेष उच्यतइति, तस्यार्थः, नेदं स्वतन्त्रं प्लुतविधानं, किं तर्हि, प्रत्यभिवादे दूराद्धूते च यः प्लुतो विहितः स गुरोरनन्त्यस्यापि भवति अन्त्यस्यापि टेः पर्यायेणेति । तेन प्रत्यभिवाद्यमानार्थस्य हूयमानार्थस्य च शब्दस्येदं प्लुतविधानं न यत्र तत्र स्थितस्य गुरोरिति द्रष्टव्यम् । 'प्राचांग्रहणं विकल्पार्थमिति' । तेन पक्षे न कस्यचिदपि प्लुतो भवति । 'तदनेनेत्यादि' । तदिति वाक्योपन्यासे, अपीत्येषणो परस्य चेत्यत्र भाष्यकारेण यदेतदुच्यते सर्व एव प्लुत इत्यादि तदुपपन्नं भवतीत्यर्थः । ननु यत्र प्राचांग्रहणमस्ति स प्लुतो विकल्पतां सर्वस्य तु कथं विकल्पः, एवं तर्हि प्राचांग्रहणं सर्वत्रैव प्लुतविधौ संबन्धनीयं, शास्त्रत्यागः, साहसं, तेन शास्त्रमत्यजताप्यभियुक्तस्मरणात्सर्व एव प्लुतो विभाषा विधेय इत्यर्थः ॥

"ओमभ्यादाने" ॥ प्लुतश्रुत्या ऽचपरिभाषोपस्थानादच एव प्लुतः, मकारस्त्वर्धमात्र इति समुदायो ऽर्धचतुर्थमात्रः संपद्यते ॥

"ये यज्ञकर्मणि" ॥ 'ये यजामहइत्यत्रैवायं प्लुत इष्यतइति' । पित्र्यायां ये स्वधेत्यत्रापि भवति, एतत्स्थानापन्नत्वात्तस्य ॥

"प्रणवष्टेः" ॥ 'क एष प्रणवो नामेति' । इह शास्त्रे ऽपरिभाषितत्वात्प्रश्नः । 'पादस्येति' । शास्त्रान्तरप्रसिद्ध आश्रीयते देव-

तावत्, अक्षरमच् अन्त्यमचं गृहीत्वेत्यर्थः । 'तदाद्यक्षरशेषस्येति' । अक्षरं च शेषश्च हल् अक्षरशेषं, तदन्त्यमक्षरमादिर्यस्य तत्तदादि, तदादि च तदक्षरशेषं च तदाद्यक्षरशेषं तस्य टेरिति । 'त्रिमात्रमिति' । केचिन्मकारेण सह त्रिमात्रमिच्छन्ति, अन्ये भागमेव, तत्र ओंकारविधिः सामिधेन्यादिषु प्रसिद्धः, स्वरादिमृगन्तमोकारं त्रिमात्रं मकारान्तं कृत्वोत्तरस्या अर्धं ब्रूयादिति ओंकारविधिस्तु निगदे स्वरादिरन्त ओंकारश्चतुर्विनर्दे इति, आथर्वणिकास्तु सर्वत्र चानयोर्विकल्पमिच्छन्ति, तेषामेव चेदं सूत्रं पठितम् । 'जिन्वतोमिति' । जिवि: प्रीणनार्थः, लट्, तिप् । 'टेरिति वर्तमानइत्यादि'। असति टिग्रहणे अलोन्त्यस्येति वचनाट्टेर्यो ऽन्त्याल् तस्योकारः स्यात्, व्यभिचाराभावाद्धि प्रणवः प्लुतत्वेन न विशेष्यते, संज्ञया विधानेचाच्परिभाषाप्रवर्तते न तु वस्तुतस्त्रिमात्रविधाने, तस्माद्धल एव प्राप्नोति, अथाच्परिभाषोपस्थानार्थमेव प्लुतत्वेन प्रणवो विशेष्येत तथा ऽपि टेर्योच् तस्यैव स्यान्न तु सर्वस्य टेः, ओंकारस्त्वच्छलसमुदायत्वात्प्लुतो न भवतीति सर्वस्य टेः सिध्यति, वाक्यस्य टेरित्यधिकारात्, सत्यम्, टिस्थानिकस्यैव त्वोंकारस्य प्रणवसंज्ञत्वात् कथमन्त्यस्याचो वा प्रसङ्ग इति चिन्त्यम् ॥

"याज्यान्तः" ॥ 'याज्याकाण्ड इति' । यज्यानुवाक्याकाण्डमिति समाख्याने प्रकरणे । 'तेषामिति' । मन्त्राणाम्, तासामिति पाठे तासां याज्यानामन्तः । 'प्लवतइति' । त्रिमात्रतया वर्धतइत्यर्थः । 'अग्नये३इति' । चतुर्थ्येकवचनान्तस्याग्निशब्दस्यैचोप्रगृह्यस्येति प्लुतविकारः, इहेदमन्तग्रहणं टेरित्यस्य निवर्तकं वा स्याद्विशेषणं वा, पूर्वस्मिन् कल्पे प्लुतश्रुत्याच्परिभाषोपस्थानादजन्ते विशेषिते ऽजन्ताया एव याज्यायाः प्लुतः स्यात्, पक्षान्तरे त्वन्तग्रहणमनर्थकं टेरन्तत्वाव्यभिचारादित्यभिप्रायेणाह । 'अन्तग्रहणं किमिति' । इतरो ऽपि विविताभिप्राय आह । 'याज्या नामेति' ॥

---

१ इदं मु॰ मूलपुस्तके नास्ति ।

Digitized by Google

"ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः" ॥ पित्र्यायामनुस्वधेति संप्रेष्येत्यत्राऽपि अनुस्व३धेति प्लुतो भवति, ब्रूहिस्थानापन्नत्वात्स्वधा-शब्दस्य तथा ऽस्तु स्वधेति प्रत्याश्रवणमित्यत्रापि भवति, अस्तु स्वधेति श्रौषट्स्थानापन्नत्वात्, तथा च वषडित्येके समामनन्ति, वौषडित्येके, वाषडित्येके, वौखडित्येके, वाखडित्यके, वखाडित्यके इति षड्विध-स्यापि वषट्कारस्य प्लुतो भवति वषट्कारोपलक्षणत्वाद्वौषट्शब्दस्य । 'आवह देवान् यजमानायेत्येवमादिर्भवति' । आदिशब्देनावह जातवेदः, सुयजा यक्षेत्यादेर्ग्रहणम् ॥

"अग्नीत्प्रेषणे परस्य च" ॥ 'अत्रेवायं प्लुत इष्यतइति' । ओस्वधे-त्याश्रवणमित्यत्र तु तत्स्थानापन्नत्वाद्भवति । 'आ३ स्वधेति' । तथा चाश्वलायनः नित्याः प्लुतय इति उक्तुर, 'उक्तुरेति' । चापले द्विर्वचनम् ॥

"विभाषा पृष्टप्रतिवचने हेः" ॥ प्रतिवचनशब्दोयं विरुद्धेपि शब्दे वर्त्तते प्रतिशब्दस्य विरोधे प्रसिद्धेः प्रतिमल्लः प्रतिकुञ्जर इति, वचनं वचनं प्रतीति प्रतिवचनमिति वीप्सायामव्ययीभावेप्यस्ति, समाधाने-प्यस्ति अनेनाभिहितस्य मया प्रतिवचनं विहितमिति, पृष्टप्रतिवचनेपि वर्त्तते, तत्रासति पृष्टग्रहणे विवक्षितं प्रतिवचनं न गम्येत, उदाहरणे हिशब्दो ऽवधारणे ॥

"निगृह्यानुयोगे च" ॥ 'निगृह्येति' । ल्यबन्तमेतत् । 'स्वमता-दिति' । स्वपक्षात् प्रच्यावनमपनयः । 'तस्यैवेति' । यस्मादसौ प्रच्यावि-तस्तस्यैव स्वपक्षस्याविष्करणं शब्देन प्रकाशनम्, एवं किल त्वं निरुपप-त्तिकमात्थेति, सूत्रार्थमुदाहरणे दर्शयन्नेवोदाहरति । 'अनित्यः शब्द इति केन चित्प्रतिज्ञातमिति' । तमेवं वादिनमुपालिप्सुरुपालब्धु-कामो निगृह्य स्वमतात्प्रच्याव्य साभ्यसूयं सामर्षमनुयुङ्क्ते, आविष्कृतस्वमतं करोति, क्वचित्स्वयं मन्त्रो न पठ्यते, अन्ते तु पठ्यते, अद्यामावास्या इत्येवं वादी प्रच्याव्य स्वमतादेवमनुयुज्यतइति ॥

"आम्रेडितं भर्त्सने" ॥ उदाहरणेषु वाक्यादेरामन्त्रितस्येत्या-दिना द्विर्वचनं, वाक्यस्य टेरित्यधिकारेप्यत्रानन्त्यस्य भवति, वाक्यादेरेव

Digitized by Google

पदस्य भर्त्सने द्विर्वचनविधानात्। 'तदर्थमिति'। पर्यायेण पूर्वोत्तरयोर्भागयोः प्लुतो यथा स्यादित्येवमर्थम्। 'द्विरुक्तोपलक्षणार्थमिति'। द्विरुक्तसमुदाये भागद्वयोपलक्षणार्थमित्यर्थः। एतच्चाम्रेडितमात्रस्य भर्त्सने वृत्त्यसम्भवाल्लभ्यते, पर्यायस्य त्वेकैकस्येत्यनुवृत्तेर्लाभः॥

"अङ्गयुक्तं तिङाकाङ्क्षम्"॥ आकाङ्क्षतीत्याकाङ्क्षं, पचाद्यच्, इदानीं ज्ञास्यसि जाल्मेत्येष द्वयोरप्युदाहरणयोः शेषः, कूजनफलं व्याहारफलं कस्मिन्नेव क्षणे ज्ञास्यसीत्यर्थः। अङ्गशब्दोऽमर्षे प्रत्युदाहरणे त्वनुनये, अङ्ग देवदत्तेत्येतावदेकं वाक्यम्, एतच्च वाक्यं मिथ्या वदसीत्येतदपेक्षते॥

"विचार्यमाणानाम्"॥

'कोटिद्वयस्य विज्ञानं विचार इति कथ्यते।
विचार्यमाणस्तज्ज्ञानविषयीभूत उच्यते'॥

इह तु विचार्यमाणार्थविषयत्वाद्वाक्यानि विचार्यमाणानि। 'एहा३इइति'। एहेशब्दस्य पूर्ववत्प्लुतविकारः। 'अनुप्रहरेदिति'। अनुप्रहारः शायनं व्यत्ययेन कर्मणि कर्तृप्रत्ययः, शाय्येतेत्यर्थः, अथ वानुप्रहरेदित्यत्र यूपं यजमान इत्यस्याध्याहारः, किं यूपस्तिष्ठेत्किं वा यूपं यजमानः शाययेदिति विचारार्थः॥

"पूर्वं तु भाषायाम्"। पूर्वेणैव सिद्धे नियमार्थमेतत्, तुशब्दस्त्विष्टतोऽवधारणार्थः, यथैवं विज्ञायेत पूर्वमेव भाषायामिति, मैवं विज्ञायि पूर्वं भाषायामेवेति। पूर्वत्वं च प्रयोगापेक्षम्। उदाहरणे नुशब्दो वितर्के, लोष्टो मृत्पिण्डः॥

"प्रतिश्रवणे च"॥ 'प्रतिश्रवणमभ्युपगम इति'। अङ्गीकारः। 'प्रतिज्ञानमिति'। प्रार्थितस्य देयत्वेन संवादः, अत्रोभयत्रापि गतिसमासः, अर्थद्वयेऽपि प्रतिपूर्वः शृणोतिः प्रसिद्धः। 'श्रवणाभिमुख्यं चेति'। अत्र लक्षणेनाभिप्रती आभिमुख्य इत्यव्ययीभावः, उदरणानि तु व्युत्क्रमेण दत्तानि। 'किमात्थ३ इति'। किं ब्रूष इत्येतत्पृच्छति, अत्र च श्रवणाभिमुख्यं गम्यते। 'हन्त'ते ददामि३ इति'। अत्र प्रार्थितस्य संवादो गम्यते, देव-

१ अहं नदति मु॰ मू॰ पा॰।

दत्त भोरित्यामन्त्रितम् । स यदर्थमामन्त्रितस्तच्छ्रवणार्थं किमात्थ इति, गां मे देहि भोः, नित्यः शब्दो भवितुमर्हति, तस्मिन् तृतीये तूदाहरणे स्वाभ्युपगमो गम्यते ॥

"अनुदात्तं प्रश्नान्ताभिपूजितयोः" ॥ प्रश्नवाक्ये यच्चरमं प्रयुज्यते स प्रश्नान्तः, क्वचित्पठ्यते नानेन प्लुतो विधीयते किं तु दूराद्धूतादिषु विहितस्य प्लुतस्यानुदात्तत्वं गुणमात्रं विधीयतइति, तत्रैषा वचनव्यक्तिः, प्रश्नान्ते अभिपूजिते च यः प्लुतः सोऽनुदात्तो भवतीति, तत्राभिपूजिते दूराद्धूते चेति प्लुत इति । इतरत्र त्वनन्त्यस्यापि प्रश्नाख्यानयोरिति, अगमः पूर्वां ग्रामामित्येषां स्वरितः प्लुतः, अग्निभूते पटो इत्यन्यतरेण वाक्यपरिसमाप्तिर्भवति, तत्र यदा येन वाक्यपरिसमाप्तिस्तदा तस्यानेनानुदात्तः प्लुतः, स च पूर्वभागस्य, उत्तरभागस्य तूदात्ताविद्रुतौ भवतः ॥

"चिदिति चोपमार्थे प्रयुज्यमाने" ॥ इतिकरणः किमर्थः, अक्रियमाणे तस्मिन्नुपमानार्थे कस्मिंश्चिच्छब्दे प्रयुज्यमाने चिच्छब्दः प्लुत इति विज्ञायेत, इतिकरणे तु सति प्रयुज्यमान इत्येतच्चिच्छब्दस्य विशेषणं, प्लुतस्तु वाक्यस्य टेरित्यधिकारात्तस्यैव भवति । 'कथंचिदिति' । अत्र कष्टे[1] चिच्छब्दः । 'अग्निर्माणवको भायादिति' । अग्निरिव माणवको दीप्येतेत्यर्थः, अत्रोपमार्थस्य गम्यमानत्वादस्ति चिच्छब्दस्य प्रतीतिः, प्रयोगस्तु नास्ति, यद्यप्यन्येषामप्युपमानार्थानामिवादीनामस्ति प्रतीतिस्तथापि चिच्छब्दस्यापि तावदस्तीति स्यादेव प्लुतः, चकारोऽस्य प्लुतस्य समुच्चयार्थः, समुच्चयश्च भेऽधिष्ठान इति प्लुतान्तरमेवेदमाख्यातं भवति, अन्यथा पूर्वसूत्रवत्पूर्वेष्वेव प्लुतनिमित्तेष्वनुदात्तत्वगुणमात्रं विधीयतइति विज्ञायेत, एतदेव च ज्ञापकं पूर्वसूत्रे गुणमात्रं विधीयतइति ॥

"उपरि स्विदासीदिति च" ॥ अत्रापि विचार्यमाणानामिति विहितस्य प्लुतस्य गुणमात्रं विधीयते ॥

१ कच्छ्रे इति २ पु॰ पा॰ ।

"स्वरितमाम्रेडिते ऽसूयासंमतिकोपकुत्सनेषु" ॥ 'वावचनं कर्तव्यमिति'। सर्व एव प्लुत इतिवचनमन्यदीयमिति वार्त्तिककारेण तावदिदं पठितं वृत्तिकारो ऽपि तदेवापठत् ॥ .

"क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्" ॥ क्षिया आचारभेदः, आचारोल्लङ्घनम्, इष्टाशंसनमाशीः शब्देन व्यापारणं प्रैषः, क्वचिद्वृत्तावप्ययं ग्रन्थः पठ्यते। 'दीर्घं ते आयुरस्तु, अग्नीन्विहरेति'। क्षियायां तु न प्रत्युदाहृतं नित्यसाकाङ्क्षत्वात्, नहि स्वयं ह रथेन यातीत्येतावत्युक्ते आचारभेदो गम्यते, किं तर्ह्युपाध्यायं पदातिं गमयतीत्युक्ते। इह उपरि स्विदासीदिति चेत्यस्यानन्तरमङ्गयुक्तं तिङाकाङ्क्षमिति वक्तव्यं, ततः क्षियाशीःप्रैषेषु स्वरित इति, तत आम्रेडिते सूयासंमतिकोपकुत्सनेष्विति, एवं हि तिङाकाङ्क्षग्रहणं द्विर्न कर्तव्यं भवति, तथा तु न कृतमित्येव ॥

"अनन्त्यस्यापि प्रश्नाख्यानयोः" ॥ 'सर्वेषामेव पदानामिति'। नन्वन्त्यस्यानुदात्तं प्रश्नान्ताभिपूजितयोरित्यनुदात्तप्लुतेन भवितव्यं तत्कथमेव स्वरितः प्लुतो भवत्यत आह। 'अनन्त्यस्येति'। यद्यप्यत्र विकल्पो न श्रुतस्तथाप्यनेनापिशब्देनान्त्यस्याप्ययं स्वरितः प्लुतो भवति, ततश्चानुदात्तप्लुतः पाक्षिकःसंपद्यतइति भावः। ननु चापिशब्द आख्याने ऽन्त्यसमुच्चयेन चरितार्थः, ततः किं, प्रश्ने ऽन्त्यस्यानुदात्तस्य नित्यं प्लुतः प्राप्नोति, तत्र विकल्पाभावाच्चैव दोषः, प्रश्नेऽप्यपिशब्दस्य तात्पर्यं गम्यते सहनिर्दिष्टत्वात्, ततश्च प्रश्नान्ते स्वरितानुदात्तयोः प्लुतयोर्विकल्पो भविष्यति ॥

"प्लुतावैच इदुतौ" ॥ तत्रयान्तरयोरैचोः प्लुतप्रसङ्गे तदवयवयोरिदुतोः प्लुतार्थं वचनं, वचनसामर्थ्याद्गुणैकदेशयोरपीदुद्ग्रहणेन ग्रहणम्। 'ऐचः प्लुतप्रसङ्गइति'। केचिदाहुः। सूत्रे प्लुताविति प्लुतिशब्दात्सप्तमी, ऐचः प्लुतौ प्राप्तायामिति तदनेन दर्शितमिति, तदयुक्तं, प्लुताविति हि क्रियानिमित्तो ऽयं व्यपदेश इति प्रथमाद्विवचनान्तत्वेन व्याख्यास्यमानत्वात्, तस्मात्प्रकरणप्राप्तये तदुक्तम्, उदाहरणे दूराद्धूते गुरोरनृत इत्येव प्लुतः, यदि ऐकारौकारयोरवयवयोरिदुतोः प्लुतः

Digitized by Google

क्रियते, समुदायस्य चतुर्मात्रता ऽर्द्धचतुर्थमात्रता वा प्राप्नोति, कथमिमा-वैचौ समाहारवर्णौ मात्रावर्णस्य मात्रेवर्णोवर्णयोः । अपरे त्वाहुः । अर्द्ध-मात्रावर्णस्य अध्यर्द्धमात्रेवर्णोवर्णयोरिति, तत्र पूर्वस्मिन्कल्पे इदुतोरनेन प्लुते कृते तयोस्तिस्रो मात्रा अवर्णस्य चैका मात्रेति समुदायश्चतुर्मात्रः प्रा-प्नोति, पक्षान्तरे त्वर्द्धचतुर्थमात्रः प्राप्नोत्यत आह । 'अत्रेति' । ननु च त्रिमात्रस्यात्र: प्लुतसंज्ञा कृता तत्कथं द्विमात्राविदुतावनेन शक्येते कर्तुमत आह । 'प्लुताविति हीति' । अनेन प्लुताविति कर्तरि निष्ठा न संज्ञाशब्द इति दर्शयति । 'वृद्धिं गच्छत इत्यर्थ इति' । अनेकार्थत्वाद्धातूनां प्लवतिर्वृद्धावपि वर्तते, नन्वेवमपि न ज्ञायते कियती सा वृद्धिरित्यत आह । 'तावती चेति' । एवं मन्यते । प्रकृतमपि प्लुत-ग्रहणमत्र संबध्यते ततश्चायमर्थो भवति ऐचोऽवयवाविदुतौ तथा वर्द्धेते यथा ऐचौ प्लुतौ संपद्येते इति, तस्मादनभिमताया वृद्धेरप्रसङ्ग इति । 'अर्द्धतृतीयमात्राविति' । अर्द्धरूपा तृतीयमात्रा ययोस्तौ तथोक्तौ । 'इष्यते चतुर्मात्रः प्लुत इति' । चतुर्मात्रतया वृद्धिरिष्यत इत्यर्थः । अस्मिन्पक्षे चतुर्मात्रस्याप्लुत्वमपि भवति । तेन प्रत्यङ्कुतिकायन इति ङमुट् भवति, प्लो चातेत्यनचिचेति तकारद्विर्वचनं भवति ॥

"एचो ऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ" ॥ 'विषय-परिगणनं कर्तव्यमिति' । एतद्विवृणोति । 'प्रश्नान्तेति' । 'यथावि-षयमिति' । प्रश्नान्ते ऽनुदात्तः स्वरितो वा. शेषे तूदात्तः । 'इदुतौ पुन-रुदात्तावेवेति' । अनुवृत्तस्योदात्तग्रहणस्याभिसंबन्धात् । 'विष्णुभूते इति' । कथं पुनरिदं परिगणनस्योदाहरणं यावता सूत्रे वादूराद्धूत-इत्युच्यते ऽत आह । 'परिगणनं चेति' । अन्यार्थे ऽवश्यकर्तव्ये परिगणने तेनैव सिद्धत्वाददूराद्धूतइति न वक्तव्यं, ततश्चेदमपि परिगणनस्य प्रत्युदाहरणमुपपद्यतइति । 'गौरिति' । असर्वनामस्थानइतिप्रतिषे-धात्सौ परतः पूर्वं पदं न भवति, अथ यदा सावपि पदं भवतीति पक्षस्तदा कस्मान्न भवति, उक्तमेतद्वाक्यपदयोरन्त्यस्येति, विसर्जनीय-शब्दश्चात्र वाक्यान्तः, नन्वेवं पदान्तग्रहणमित्यत्र पदशब्देन वाक्यमु-

च्यते ऽन्वर्थग्रहणात्। पद्यते प्रतीयते ऽनेन हेतुनार्थ इति। एतच्च याज्यान्त इत्यतोन्तग्रहणानुवृत्त्या लभ्यते। अग्निभूता३इति अग्निभूतिशब्दस्य संबुद्धौ रूपम्। 'आमन्त्रितइति'। अप्राप्तएव प्लुते वचनम्॥

"तयोर्य्वावचि संहितायाम्"॥ किमर्थमिदमुच्यते। न इको यणचीत्येव सिद्धमत आह। 'इदुतोरसिद्धत्वादिति'। ननु सिद्धः प्लुतस्स्वरसंधिषु, कथं ज्ञायते प्लुतप्रगृह्या अचीति प्लुतस्य प्रकृतिभावविधानात्, यस्य हि विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, प्लुतस्य चासिद्धत्वे न तस्य स्वरसंध्याख्यो विकारः प्राप्नोति, अस्तु प्लुतः सिद्धः, किमायातमिदुतोः, उच्यते। प्लुतप्रकरणे यत्कार्यं तत्स्वरसंधिषु सिद्धमिति सामान्येन ज्ञापकमाश्रयिष्यते, ततश्चेदुतोरपि सिद्धत्वात्सिद्ध एव यणादेशोत आह। 'तथापि कथं चिदिति'। सामान्यपेक्षं ज्ञापकमित्यस्यार्थस्य दुर्ज्ञातत्वात्कथं चिदित्याह, यदीदं नोच्येत अग्ना३इ इन्द्रं, पटा३उ उदकमित्यत्र चाष्टिकं यणादेशं बाधित्वा सवर्णदीर्घत्वं स्यात्, अग्ना३याशेत्यादौ च इकोऽसवर्णे शाकल्यस्येति प्रकृतिभावः स्यादतस्तद्बाधनार्थमिदं वक्तव्यमेव। ननु च तन्निवृत्तये यत्नान्तरमस्ति, किं पुनस्तत्, इको यणचीत्यत्रोक्तम् इकः प्लुतपूर्वस्य यणादेशो वक्तव्यः सवर्णदीर्घनिवृत्त्यर्थं शाकलनिवृत्त्यर्थं चेति, तच्चावश्यं वक्तव्यं, य इक् प्लुतपूर्वः न च प्लुतविकारः। भो३इन्द्रं भो३यिद्रं गायतीति भोःशब्दस्य छान्दसः प्लुतः, ततः परस्येकारस्य निपातत्वात्प्रकृतिभावे प्राप्ते तं बाधित्वा यणादेशः, तदेवं तस्यावश्यकर्त्तव्यत्वात्तेनैव यण् सिद्धोत आह। 'तथापीति'। 'यण्स्वरनिवृत्त्यर्थमिति'। यणाश्रयः स्वरो यण्स्वरः, एतदेव विवृणोति। 'यणादेशस्येति'। उक्तमेवार्थं श्लोकाभ्यां संगृह्णाति। 'किन्त्विति'। इको यणादेशेन किं न सिद्धं रूपं यतो ऽयमाचार्यः इदुतोर्य्वौ विदधाति, तौ चेदुतौ स्वरसंधिषु सिद्धौ ममेति सूत्रकारेणेकीभूतस्य वचनम्, एवं चोदिते परिहरति। 'शाकलदीर्घविधी तु निवर्त्याविति'। शाकल्यस्येदं शाकलं कण्वादिभ्यो गोत्रइत्यण्। पुनश्चोदयति। 'इक् च परेति'। वार्तिककारोपि इकः प्लुतपूर्वस्य यणं विदधाति, स च प्रकृतिभावस्येव

Digitized by Google

शाकलदीर्घविध्योरप्यपवादः, ततश्च तेनैव यथा एतयोरपीतुतोः शाकलदीर्घौ न भविष्यत इति नार्थ एतेन, परिहरति। 'यणस्वरेति'। यणस्वरबाधनमेव हेतुः सूत्रारम्भस्येति ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यामष्टमस्य द्वितीयश्चरणः ॥

"मतुवसो रु संबुद्धौ छन्दसि" ॥ युवोरनाकावितिवन्मतुवसोरिति निर्देशो ऽनुबन्धपरित्यागेन वा सकारान्तस्य वसोर्ग्रहणं निपातनाच्चाल्पाच्तरस्य परनिपातः, इत्यविभक्तिको निर्देशः। 'मरुत्व इति'। झय इति वत्वं. तसौ मत्वर्थ इति भसंज्ञा। 'हरिवो मेदिनमिति'। छन्दसीर इति वत्वं, संयोगान्तलोपो रो रुत्वे सिद्धो वक्तव्य इति वचनादुशि चेत्युत्वम्। 'वन इति'। क्वनिब्वनिपोः सामान्येन ग्रहणम्। अनुबन्धानिर्देशादत्र तदनुबन्धकपरिभाषाया अनुपस्थानात् क्वनिपोपि ग्रहणम्। 'प्रातरित्व इति'। प्रातरेतीत्यन्येभ्योपि दृश्यन्त इति क्वनिपि ह्रस्वस्य तुक्। 'अवशब्दस्य चेति'। सर्वस्येति द्रष्टव्यम्, अनर्थके ऽलोन्त्यपरिभाषाया अभावात्, उपसंख्यानं प्रत्याचष्टे। 'निपातविज्ञानाद्वेति'। एतदेव विवृणोति। 'अघ वेति'। अवश्यं चैतन्निपातत्वमेव विज्ञेयमित्याह। 'असंबुद्धावपि हीति'। 'स्त्रियामिति'। 'भो ब्राह्मणीति'। विभक्तिनिमित्तेषु कार्येषु लिङ्गविशिष्टपरिभाषा नोपतिष्ठत इत्युक्तं न वा विभक्तौ लिङ्गविशिष्टाग्रहणादिति, तेन भवतीशब्दस्य रुत्वौत्वे न स्याताम्, अथापि स्यातामेवमीकारस्य रुत्वे अवशब्दस्य चोकारे रूपं न सिध्यति, तस्मादसंबुद्धौ स्त्रियां च दर्शनान्निपाता एवेति विज्ञेयं, निपातत्वं च विभक्तिस्वरप्रतिरूपकत्वेनेति, न त्वयमस्मिन्नुपसंख्याने भोरित्यादिकः शब्दो विभक्त्यन्तो नास्ति यत्प्रतिरूपका एते स्युः, तस्मात्सौत्रा एते निपाता भोभगोअघोइत्यत्र सूत्रे निर्दिष्टा चादिषु वा पठितव्याः, तदेवं प्रत्याख्यातमुपसंख्यानम्। अन्ये त्वाहुः। इतराभ्यो पि दृश्यन्त इति भवदादियोगे विधीयमानास्तसिलादयस्ततो भोरित्यादावपि यथा स्युरिति

वार्तिकारम्भ इति । अन्ये तु भवदादेरपरिगणितत्वाद् निपाता भो[1]इ-त्यादयो भविष्यन्तीति मन्यन्ते ॥

"अत्रानुनासिकः पूर्वस्य तु वा" ॥ पूर्वत्वमिदमापेक्षिकं, रुत्वं च संनिहितं, न च तदपेक्षं पूर्वत्वं संभवति रोरनुनासिकस्य च सहविधानात्, तस्माद्यस्य रुर्विधीयते तदपेक्षमेव पूर्वत्वं विज्ञायत-इत्याह । 'यस्य स्थानइति' । अथात्रग्रहणं किमर्थमत्र रुप्रकरणे यथा स्यात्, अधिकारादप्येतत्सिद्धम्, अधिकारे हि सति रुत्वानुनासिकयोः सहविधानाभावान्यत्र प्रसङ्गो ऽत आह । 'अत्रग्रहणमिति' । अवधारण-मत्र द्रष्टव्यं रुणैव सहेति । नन्वधिकारादप्येतत्सिद्धमित्युक्तमत आह । 'अधिकारेति' । असत्यत्रग्रहणे अनुनासिकाधिकारस्य परिमाणं न ज्ञायेत, एतावत्सु योगेष्वस्य व्यापार इति, ततश्च रुप्रकरणात्पर[2]त्रा-प्यस्याधिकारः संभाव्येतेत्यर्थः । तुशब्दः परस्मात्कार्यिणः पूर्वस्य विशे-षद्योतनार्थः, परस्य नित्यं रुत्वं पूर्वस्य तु वानुनासिक इति, वावचन-मनर्थकं ज्ञापकात्सिद्धं, यदयमुत्तरत्र सूत्रे यस्यानुनासिको न विहित-स्तस्माद्रोः पूर्वस्मात्परमनुस्वारं शास्ति. ततो ज्ञायते विकल्पेनायं भव-तीति, नहि नित्ये ऽस्मिन्विधौ स रोः पूर्वः संभवति, यस्यानुनासिको विहितः ॥

"आतोऽटि नित्यम्" ॥ 'केचिदिति'। तैत्तिरीयाः । 'अनुस्वार-मधीयतइति' । शुद्धादाकारात्परं, नित्यग्रहणमनर्थकमारम्भसामर्थ्यादेव नित्यो विधिः सिद्धः । अस्त्यारम्भे प्रयोजनं नियमो यथा स्यादात एवाटि अन्येषां तु नेति, कैमर्थ्यान्नियमो भवति विधेयं नास्तीति कृत्वा, इह चास्ति विधेयं, किं, नित्योनुनासिकः ॥

"अनुनासिकात् परोनुस्वारः" ॥ 'अन्यशब्दोत्राध्याहर्तव्य इति' । असत्यध्याहारे परशब्दस्य श्रुतत्वात्तदपेक्षयैवानुनासिकादित्येषा पञ्चमी स्यात्, परशब्दश्च दिग्वृत्तिरन्यार्थवृत्तिर्वा पूर्ववृत्तिर्वा, पूर्वस्मि-

१ भवदादय इति ह॰ पु॰ पा॰ ।
२ उत्तरसूत्रे ह॰ पु॰ पा॰ ।

Digitized by Google

न्कल्पे रोः पूर्वस्मादनुनासिकादेव परो ऽनुस्वारो विज्ञायेत, न च तस्मात्पर दृश्यते, इतरस्मिंस्त्वनुनासिकादन्यो ऽनुस्वारो भवतीत्यर्थो भवति, तत्र चानर्थकं परग्रहणं, यद्यनुस्वारो ऽनुनासिकापेक्षया ऽन्यत्वं व्यभिचरति, तस्मादन्यशब्दोऽध्याहार्यः, स च परशब्दापेक्षया पञ्चम्यन्तो ऽध्याहार्यः, पूर्वस्येत्येतदप्यत्रानुवृत्तं पर इत्यनेन योगात्पञ्चम्यन्तं विपरिणम्यते, एवं स्थिते यो ऽर्थः संपद्यते तं दर्शयति । 'अनुनासिकादन्य इति'। कः पुनरसावित्याह । 'यस्यानुनासिको न कृत इति'। 'अनुस्वार आगमो भवतीति'। टित्त्वाद्यागमलिङ्गाभावेपि परशब्देनानुस्वारस्य देशविशेषसंपादनादागमत्वं यथा न य्वाभ्यां पूर्वावैजिति ॥

"समः सुटि" ॥ मोनुस्वार इत्यनुस्वारे प्राप्ते वचनम्। 'संस्कर्ता'। संपर्युपेभ्यः करोतौ भूषणइति सुट्, समो मकारस्य रुत्वं, तस्य विसर्जनीयः, तस्य वा शरीति विकल्पे प्राप्ते यथा नित्यं सकारो भवति तथा दर्शितं, कथं पुनरस्मिन्सूत्रे सकारो निर्दिश्यतइत्याह । 'समः स्सुटीति द्विसकारको निर्देश इति'। स च सुटः सकारे संदेहाभावात्तद्व्यतिरेकेण द्विसकारकत्वं, वस्तुतस्तु त्रयः सकारा एको विभक्तिसंबन्धी, द्वितीय आदेश,स्तृतीयस्तु सुट्संबन्धी, यदि तर्हि सकारे आदेशो विधीयते अनुनासिको न प्राप्नोति, यस्मादत्रग्रहणं रुणा सह संनियोगप्रतिपत्त्यर्थमित्युक्तं, नैष दोषः । अत्र रुप्रकरणे यद्विधीयते तदुपलक्षणार्थं तत्र रुग्रहणम्, एतेन पूर्वसूत्रे रोः पूर्व इति व्याख्यातं, तदत्र सत्वे कृते यदा पूर्वस्यानुनासिकस्तदा सत्वस्यासिद्धत्वाद्रुत्वाभावादनचि चेति द्विर्वचने झरो झरीति पाक्षिके लोपे द्विसकारकस्त्रिसकारको वा प्रयोगः, यदा त्वनुस्वारस्तदा ऽयोगवाहानां अट्प्रत्याहारउपदेशचोदनात्तस्य च हल्त्वात्झरो झरीति वा लोपे द्विसकारक एकसकारको वा प्रयोगः, यदा त्वनुस्वारस्य हल्त्ववदच्त्वमपीष्यते तदा ततः परस्य द्विर्वचनपक्षे सकारत्रयमपि भवति, तदेवं पञ्च रूपाणि भवति, अनुनासिकपक्षे द्वौ सकारौ, त्रयो वा, अनुस्वारपक्षे द्वावेकस्त्रयो वा, पञ्चस्वपि पक्षेषु शरः खय इति वा ककारस्य द्विर्व-

-वचने कृते दश रूपाणि भवन्ति । 'समो वा लोपमेके' । एके आचार्याः समो विकल्पेन लोपमिच्छन्ति, अत्राप्यनुनासिकानुस्वारौ भवतस्तस्यापि रुप्रकरणे विधानात्तत्रानुनासिकपक्षे सकारस्यानचि चेति द्विर्वचने पाक्षिके च लोपे एकसकारत्वमपि कदाचिद्भवति, तत्रापि ककारस्य पक्षे द्विर्वचनमिति द्वादश रूपाणि भवन्ति ॥

"पुमः खय्यम्परे" ॥ पुंसः सकारादवशिष्टो यो भागस्तस्यायं निर्देशः, सकारस्य संयोगान्तलोपे कृते तस्यैव कार्यित्वात्, अमिति प्रत्याहारस्य ग्रहणं न द्वितीयैकवचनस्य, खया प्रत्याहारेण साहचर्यात् । 'पुंश्चलीति' । पचादौ चलडिति पाठान्ङीप्, पुंश्चलीति षष्ठीसमासः । 'पुंस्कामेति' । पुमांसं कामयत इति शीलिकामिभिक्ष्याचरिभ्यो ण इति णः । 'तस्मादत्र सकार एवादेशो वक्तव्य इति' । कुप्वोः ᳲकᳲपौ चेत्यत्रैतद्वक्तव्यम् । 'द्विसकारकनिर्देशपक्षे त्विति' । यदा पूर्वसूत्रे द्विसकारको निर्देश इति पक्षस्तदेत्यर्थः । 'स इत्यनुवर्त्तते इति' । ननु च रुरपि प्रकृतः सो ऽपि प्राप्नोतीत्यत आह । 'रुत्वं त्विति' । असंबन्धे कारणमाह । 'संबन्धानुवृत्तिस्तस्येति' । इतिकरणो हेतौ, यस्मादसौ स्वसंबन्धिना यः संबन्धस्तमनुवर्तते तं न जहाति तस्मादित्यर्थः, यद्वा संबध्यत इति संबन्धः, यस्मादिह स्वसंबद्धमेव तदनुवर्त्तते तस्मादित्यर्थः, रुत्वं खल्विहानुवर्त्तमानमपि मतुवसो रु संबुद्धाविति स्वेन संबन्धिना संबद्धमेवानुवर्तते, तस्य प्रयोजनं संबन्धान्तरेण रोः संबन्धो मा भूदिति, पुंदासादयः षष्ठीसमासाः । 'पुंगव इति' । गोरतद्धितलुकीति टच्समासान्तः, परग्रहणे क्रियमाणे खयि परतो यो ऽम् तत्रेत्यपि विज्ञायेत, ततश्च पुमचः पुमाचार इत्यत्रैव स्यात् तस्मात्परग्रहणम् ॥

"नश्छव्यप्रशान्" ॥ 'प्रशान्वर्जितस्येति' । सूत्रे त्वप्रशानिति षष्ठ्यर्थे प्रथमा, टीकृ[1] गतिमित्यर्थानुदात्तेत्, त्सरुः छद्मगमनप्रदेशस्तत्र कुशलः त्सरुकः, आकर्षादिभ्यः कन् ॥

१ टीकिरिति पा॰ ख॰ पु॰ ।

"दीर्घादटि समानपादे" ॥ एकपर्यायः समानशब्दः, समानपाद इत्युच्यते, तत्रेदं न सिध्यति, यजामहे यज्ञियान्हन्त देवान् ईळामहे यजाम्यिति, छान्दसत्वाद्विध्यति ॥

"नॄन्पे" ॥ नॄनिति षष्ठ्यर्थे प्रथमा, एवमुत्तरत्रापि परत्यकार उच्चारणार्थः, पकारमात्रं निमित्तम् ॥

"स्वतवान्पायौ" ॥ तु वृद्धौ सौत्रो धातुः, ततोऽसुन् स्वन्तवो यस्याऽसौ स्वतवान्, दृक्स्ववःस्वतवसां छन्दसीति नुम् ॥

"कानाम्रेडिते" ॥ कान्कानीतिप्रत्युक्ते आम्रेडितग्रहणं यत्र द्विर्वचनं तत्रैव यथा स्यादिह मा भूत्कान्कान् पश्यतीति, एकोऽत्र किंशब्दः प्रश्ने, द्वितीयः क्षेपे । 'समः सुटीत्यतो वा सकारोऽनुवर्त्ततइति' । यद्येवं पूर्वेष्वपि योगेषु स एव प्राप्नोत्यत आह । 'पूर्वेषु योगेष्विति' ।

"ढो ढे लोपः" ॥ अकार उच्चारणार्थः, ढकारमात्रं निमित्तं तेन लेढा लेढीत्यादावपि भवति, लीढमित्यादौ हो ढः, झषस्तथोर्धोऽधः, ष्टुत्वं, ततोऽनेन ढलोपः, ननु चासिद्धं ष्टुत्वं तत्कथमत्र लोपस्तत्राह । 'ष्टुत्वस्येति' । उच्यते चेदं ढे परतो ढस्य लोपो भवतीति तत्र ष्टुत्वस्यासिद्धत्वे निर्विषयमेतत्स्यात् । ननु च यत्रोत्पत्तिको ढकारः श्वलिड्ढौकतइत्यादौ सावकाशः स्यादत आह । 'श्वलिड्ढौकतइत्यत्रेति' । 'जश्त्वे कृतइति' । एकपदाश्रयत्वादन्तरङ्गत्वात्पूर्वत्रासिद्धमितिलोपस्यासिद्धत्वाद्वा पूर्वं जश्त्वं, ननु च निर्विषयत्वाड्ढलोपो जश्त्वं बाधेत, नेत्याह । 'न चेति' । कुत इत्याह । 'तस्य हीति' । कथं पुनर्लीढादिरवकाशः, यावता यथा श्वलिड्ढौकतइत्यत्र जश्त्वे कृते कार्यिणोऽभावस्तथा लीढादावपि ष्टुत्वस्यासिद्धत्वान्निमित्तस्याभावः, अथ तत्र वचनसामर्थ्यात् ष्टुत्वस्यासिद्धत्वं बाध्यते तदेतत्रापि जश्त्वं बाधनीयं, वक्तव्यो वा विशेषोऽत आह । 'तत्र हीति' । अयमभिप्रायः । लोपेन तावदसिद्धत्वम[1]वश्यं बाध्यं तत्र लीढमित्यादावेकमेव पूर्वत्रासिद्धमित्यसिद्धत्वमतस्तदेव

१ अवश्यमिति ना० २ पु०

चातुर्मास्येषु आज्यपशब्दस्य अविकारेण आवाहनम् । अधि· २६ ।

उभयपानात्पृषदाज्ये दध्नो ऽप्युपलक्षणं निगमेषु पातव्यस्योपलक्षणत्वात् ॥ ४९ ॥

चातुर्मास्ये पृषदाज्येनानूयाजान्यजतीति श्रुतम् । प्रकृतौ देवां आज्यपां आवहेति मन्त्रस्तस्मिन्नाज्यं पिबन्तीति व्युत्पत्त्या प्रयाजानूयाजदेवतानां व्यापकरूपेणानुगमः । स मन्त्रश्चोदकशास्त्रेण प्राप्तः । अत्र पूर्वपक्षमाह । उभयपानादिति । पृषदाज्ये हविषि सति निगमेषु उक्तमन्त्रेषु दध्नो ऽप्युपलक्षणं दधिपदयोगो ऽपि कार्यः, दध्याज्यपानिति । कुतः, उभयपानात् । अत्र द्रव्यद्वयपानात् । प्रकृतौ पातव्यस्योपलक्षणत्वात् । विहितद्रव्यपानकर्तृत्वेन देवताग्रहेण पातव्यद्रव्यस्य देवतालक्षणघटकत्वात् ॥ ४९ ॥

न वा परार्थत्वाद् यज्ञपतिवत् ॥ ५० ॥

अस्मिन्पक्षे दोषमुद्भावयन्पक्षान्तरमाह । न वेति । न वोभयं योज्यम् । यज्ञपतिवत् । यथा इडास्तुतौ ये यज्ञपतिं वर्धानित्यत्र ऋत्विजामपि वर्धकत्वे ऽपि यज्ञपतिमिति यजमानमात्रमुच्चारितम् । परार्थत्वात् । परप्रत्यायकत्वात् । अयं भावः । घटे कम्बुग्रीवादिमत्त्वं कपालजन्यत्वं द्वयमस्ति । तत्र केन चिद्रूपेण घटो ज्ञाप्यः । तत्रैकेन ज्ञानसंभवे उभयोरुच्चारणं व्यर्थम् । तथा यज्ञपतिवर्धकत्वेनेडाज्ञानसंभवे ऋत्विक्प्रवेशो व्यर्थः । तथा ऽन्यतरद्रव्यस्य मन्त्रे प्रवेशेन देवताज्ञानसंभवे द्रव्यद्वयप्रवेशो व्यर्थ इति ॥ ५० ॥

स्याद्वा आवाहनस्य तादर्थ्यात् ॥ ५१ ॥

उक्तं पक्षं दूषयन् प्रथमपक्षं द्रढयति । स्याद्वेति । स्याद्वा दधिपदप्रक्षेपः । आवाहनस्य तादर्थ्यात् । आवाहनमन्त्रस्य पातृपेयोभयस्मारकार्यत्वात् ॥ ५१ ॥

न वा संस्कारशब्दत्वात् ॥ ५२ ॥

Digitized by Google

सिद्धान्तपक्षमुद्भावयति । न वेति । न द्रव्यपलक्षणं संस्कारशब्द-त्वात् । पृषदाज्येन यजतीत्यत्र पृषत् चित्रितमाज्यं तेनेत्यर्थः । तेनाज्यस्य दध्ना चित्रीकरणरूपः संस्कारः श्रूयते न दधिद्रव्यमिति भावः ॥ ५२ ॥

स्याद्वा द्रव्याभिधानात् ॥ ५३ ॥

पुनः पूर्वपक्षमुत्थापयति । स्याद्वेति । दधिपदयोगः स्यात् । द्रव्या-भिधानात् । पृषदाज्यं गृह्णातीत्येतत्समीपे सर्पिश्चैव दधि च द्वन्द्वं वै मिथुनं प्रजननमिति । अनेन आज्यसमद्रव्याभिधानात् ॥ ५३ ॥

दध्नस्तु गुणभूतत्वादाज्यपा निगमाः स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ॥ ५४ ॥

इमं पक्षं निराकरोति । दध्नस्त्विति । आज्यपा इत्येव निगमाः स्युः दध्नस्तु गुणभूतत्वाद्गुणत्वम् आज्यस्य तु श्रुत्या प्राधान्यमतः । अयं भावः । पृषदाज्येन यजतीत्यत्र तृतीयाश्रुत्या यागाङ्गत्वं सिद्धं दध्नस्तु ग्रह-णविधिसन्निधौ तुल्यत्वेन पाठः । ग्रहणाङ्गत्वं प्रापयन्यागं प्रति नाज्येन समो भवितुमर्हतीति अत आज्यसंस्कार एवेति ॥ ५४ ॥

दधि वा स्यात्प्रधानमाज्ये प्रथमान्त्यसंयोगात् ॥ ५५ ॥

दध्न एव प्राधान्यं पुनर्व्यवस्थापयति । दधि वेति । दधि प्रधानं स्यात् । कुतः, आज्येन प्रथमान्त्यसंयोगात् । प्रथमान्त्ये उपस्तरणाभिघा-रणे ताभ्यां संयोगात् । उपस्तरणाभिघारवचनमेवं श्रूयते, यदि वसन्ते यजेत द्विरुपस्तृणीयात्सकृदभिघारयेदिति । पुरोडाशादावुपस्तरणाभिघा-रयोः प्रधानसंस्काररूपतायाः क्लृप्तत्वादिति भावः ॥ ५५ ॥

अपि वा ऽऽज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दः स्यात् ॥ ५६ ॥

सिद्धान्तं व्यवस्थापयति । अपि वेति । दधि न प्रधानमाज्यप्र-धानत्वात् । दधिप्राधान्यं पूर्वे दर्शितं परिहरति गुणेत्यादिना । गुणार्थे द्वित्वादिरूपगुणार्थे भक्त्या लक्षणया उपस्तरणशब्दस्य व्यपदेशे

अवदानार्थत्वे संस्कारशब्दः आज्यमवदानेन संस्कुर्यादित्यर्थः स्यात् । तद्वशायां बीजं श्रुतिसिद्धहोमसाधनत्वानुपपत्तिराज्यस्य ज्ञेयम् ॥ ५६ ॥

अपि वाऽऽख्याविकारत्वात्तेन स्यादुपलक्षणम् ॥ ५७ ॥

पूर्वोक्ताक्लिलक्षणं पक्षमुत्थापयति । अपि वेति । दधिसंसृष्टाज्यस्याख्याविकारत्वात् । संज्ञाभेदात् । तेन संज्ञाविशेषेण उपलक्षितो मन्त्रः कार्यः, देवान्पृषदाज्यपा आवहेति । अयं नानाद्रव्यसंयोगादेकं विलक्षणं द्रव्यमुत्पद्यते । तस्य संज्ञा भिन्ना यथा सुरेति । प्रकृते तद्वत् ॥ ५७ ॥

न वा स्याद्गुणशास्त्रत्वात् ॥ ५८ ॥

चरमं सिद्धान्ताभिप्रायमाह । न वेति । सुरावदिदं द्रव्यान्तरं न स्यात् । गुणशास्त्रत्वात् । अयं भावः । पृषदाज्येनानूयाजान्यजतीति श्रूयते । अत्र यथा सुराशब्दो द्रव्यविशेषे रूढः तथा नायं शब्दः । पृषच्छब्दः चित्रस्य वाचको लोके आज्यशब्दो घृते । समुदायस्य चित्राज्यमिति । चित्रत्वं च द्रव्यान्तरसंयोगेनेति द्रव्यान्तरसंयोगेन संस्कारः शब्दावगत इति ॥ ५८ ॥

इति जैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

एकदेशग्रहणे प्राथमिकानामेव ग्रहणम् । अधि० १ ।

आनुपूर्व्यवतामेकदेशग्रहणेष्वागमवदन्त्यलोपः स्यात् ॥ १ ॥

पञ्चमपादे प्राकृतधर्माणामेकदेशबाधश्चिन्त्यते । यथा द्यावापृथिव्यमेककपालं वैश्वं चिकपालमित्यादौ प्रकृतितः उपधानमन्त्राणामष्टानां प्राप्तौ अर्थाभावान्निवृत्तिः केषांचिद्भवति । सा यस्य कस्य चिद्भवति उतान्त्यानामेवेति संशये सिद्धान्तेनोपक्रमते । आनुपूर्व्यवतामिति । आनुपूर्व्यवतां नियतक्रमवतां मध्ये एकदेशग्रहणे विकृतौ आद्यानां ग्रहणमन्त्यस्य लोपः स्यात् । आगमवत् । यथा क्लृप्तसमाजेषु ये आगन्तवः ते उपविष्टाननुपमृद्यैव निविशन्ते तद्वत् । निर्णीतश्चायमागमन्यायः मुख्यं वा पूर्वचोदनाल्लोकवदिति सूत्रे पञ्चमे ॥ १ ॥

लिङ्गदर्शनाच्च ॥ २ ॥

साधकान्तरमाह । लिङ्गेति । आग्नेयं पञ्चकपालमुद्वासानीयमित्यत्र, लुप्येत वा एतत्षष्ठं कपालं यत्पञ्चकपालं निर्वपतीत्यत्र षष्ठकपाललोपप्रदर्शनं लिङ्गं धर्मनिवृत्तौ ॥ २ ॥

विकल्पो वा समत्वात् ॥ ३ ॥

पूर्वपक्षमारभते । विकल्पो वेति । स्पष्टार्थः ॥ ३ ॥

क्रमादुपसर्जनो ऽन्ते स्यात् ॥ ४ ॥

यथाऽऽगमवदिति दृष्टान्तः प्रदर्शितः तस्मिन्नसादृश्यं दर्शयति । क्रमादिति । क्रमात् क्लृप्तक्रमाद् उपसर्जनो ऽप्रधानो ऽन्ते स्यात् । प्रकृते न तथेति पूरणीयम् । अयं भावः । क्लृप्तक्रमस्थले तथैवास्तां, प्रकृते प्रथमो वाऽन्त्यश्चरमो वेति संशये ऽक्लृप्तक्रमआगमदृष्टान्तो विरुद्ध इति ॥ ४ ॥

लिङ्गमविशिष्टं संख्याया हि तद्वचनम् ॥ ५ ॥

लिङ्गदर्शनाच्चेति न भवत्साधकमित्याह । लिङ्गेति । अविशिष्टमविरुद्धम् । कथं, संख्यायाः पूरणे षष्ठमिति वचनम् । यथा षड्भ्रातृणां मध्ये कस्य चिददर्शने षष्ठो न दृश्यते इति तथोपपन्नमिति भावः ॥ ५ ॥

आदितो वा प्रवृत्तिः स्यादारम्भस्य तदादित्वाद्वचनादन्त्यविधिः स्यात् ॥ ६ ॥

सिद्धान्तं व्यवस्थापयति । आदित इति । प्रथमतः प्रवृत्तिः । आरभ्यस्य कपालोपधानस्य प्रारम्भ इत्युक्ते तत्रोपधानक्रियायां प्रकृतौ क्लृप्तप्रथममन्त्रकरणकत्वक्लृप्तत्वादादित्वस्यैवारम्भशब्दार्थत्वात् । अयं भावः । कपालोपधानप्रारम्भः कार्य इति विकृतौ ज्ञानवेलायां प्रकृतौ यन्मन्त्रकरणकोपधाने प्रारम्भः क्लृप्तः स एवात्रापि बुद्ध्यारूढः । तथा च तत्परित्यागे मानाभावः । एवमेव द्वितीयादिष्वपीति । नन्वनया दिशा ऽवभृथादौ चतुरः प्रयाजान्यजतीति अवशादन्त्यस्यैव लोपः स्यादत आह । वचनादिति । वचनात् । अपबर्हिषः प्रयाजान्यजतीति वचनादन्त्यस्य विधिः अलोपः ॥ ६ ॥

एकत्रिके आद्ये तृचे गानम् । अधि० २ ।

एकत्रिके तृचादिषु माध्यन्दिनश्छन्दसां श्रुतिभूतत्वात् ॥ ७ ॥

अस्त्येकत्रिकनामकः क्रतुः । तत्र माध्यन्दिनपवमाने प्रकृतिप्राप्तः प्रथमतृचः उच्चा ते जातमिति गायत्रीछन्दस्कः । द्वितीयः पुनानः सोमेति बृहतीछन्दस्कः । प्रतुद्रव इति तृतीयस्त्रिष्टुप्छन्दस्कः । एवं तृचत्रयं बाधित्वा एकः तृचो वचनेन प्राप्तः । अत्र तृचसंपत्तिः गायत्रीछन्दस्कछन्दस्कत्रयेण कार्या उत त्रिष्वपि आद्याम् ऋचं गृहीत्वा कार्यमिति संशये पूर्वपक्षमाह । एकत्रिकेति । एकत्रिके क्रतौ माध्यन्दिनः माध्यन्दिनपवमानः तृचादिषु तृचत्रयस्यादिषु स्यात् । छन्दसां गायत्रीबृहतीत्रिष्टुप्छन्दसां श्रुतिभूतत्वात् प्रकृतौ श्रुतत्वात् त्रिच्छन्दा वै माध्यन्दिनः पवमान इति । तद्बाधे प्रमाणाभावादिति भावः ॥ ७ ॥

आदितो वा तन्न्यायत्वादितरस्यानुमानिकत्वात् ॥ ८ ॥

सिद्धान्तमाह । आदितो वेति । आदितः आद्ये तृचे गानं कर्तव्यम् । तन्न्यायत्वात् कपालन्यायत्वात् । इतरस्य छन्दस्त्रितयसंबन्धस्यानुमानिकत्वात् । चोदकशास्त्रेण प्राप्तत्वात् । उभयोः क्रमत्रिच्छन्दोयोगयोः तुल्यबलत्वाच्चेति भावः । विनिगमनाविरहाभावो भाष्ये दर्शितः ततो ऽवगन्तव्यः ॥ ८ ॥

यथानिवेशं च प्रकृतिवत्संख्यामात्रविकारत्वात् ॥ ९ ॥

साधकान्तरमाह । यथेति । प्रकृतिवदित्यनेन यथासन्निवेशं प्रकृतिवत्सन्निवेशं क्रमः प्राप्नोति । तत्र प्रत्यक्षवचनस्याद्यमतृचद्वयेन सह तृचेषु त्रित्वं यत् प्रकृतौ स्थितं तावन्मात्रविकारत्वात् । बाधकत्वात् । क्रमबाधे प्रमाणाभाव इति भावः ॥ ९ ॥

एकस्यामपि धूर्गानम् । अधि० ३ ।

त्रिकस्तृचे धुर्ये स्यात् ॥ १० ॥

तस्मिन्नेव क्रतौ धूर्गानं क विहितं, तत्तृचे कार्यमुतैकस्यामृचीति

Digitized by Google

संदेहे पूर्वपक्षमाह । त्रिवेति । धुर्यं धूर्गानसंपाद्यस्तोत्रमध्ये यस्त्रिवृत्कः त्रिवृत्स्तोमकं तत्तत्रैव स्यात् ॥ १० ॥

एकस्यां वा स्तोमस्यावृत्तिधर्मत्वात् ॥ ११ ॥

सिद्धान्तमाह । एकस्यामिति । एकस्यामृचि कार्यं स्तोमसंपादनं स्तोमस्यावृत्तिधर्मत्वात् । आवृत्तं धूर्षु स्तुवतइति वचनेनावृत्तिः स्तुतेर्विशेषणं, तत्र ऋग्भेदे ऽर्थभेदेन स्तुतिर्भिद्यते । तथा सति श्रूयमाणावृत्तिर्बाध्येत । तस्मादेकस्यामृचीति भावः ॥ ११ ॥

द्विरात्रादिषु द्वादशाहस्य विध्यन्तानुष्ठानम् । अधि० ४ ।

चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात् ॥ १२ ॥

सन्त्यहर्गणा द्विरात्रादयः । तस्य प्रकृतिर्द्वादशाह इति पूर्वे स्थितम् । द्वादशाहस्य प्रथमचरमे अहनी प्रायणीयोदयनीयसंज्ञके । शेषाणां दशानां मध्ये षण्णां पृष्ठ्यसंज्ञा चतुर्णां छन्दोमसंज्ञा । एवं स्थिते द्विरात्रे कपालन्यायेन प्रथमस्य प्रथमधर्मः द्वितीयस्य द्वितीयधर्म इति पूर्वपक्षे सिद्धान्तमाह । चोदनेति । चोदनासु द्विरात्रेण याजयेदित्यादिविधिविहितासु द्वादशाहसंबन्धिप्रथमचरमयोरह्नोः अपूर्वत्वात् । प्रकृतित्वात् । लिङ्गेन द्विरात्रसंनिधौ दृष्टलिङ्गेन धर्मनियमः स्यात् । तच्च लिङ्गमित्थं, यत्प्रथमं तद् द्वितीयं यद् द्वितीयं तत्तृतीयं जगतीमन्तर्यन्तीति । अस्यार्थः । द्विरात्रस्य रात्रिद्वये रात्रिद्वयधर्मापेक्षा ऽस्ति । स धर्मः द्वादशाहरात्रिषु प्रथममारभ्य न, किं तु यद् द्विरात्रप्रथममहः स द्वादशरात्रस्य द्वितीयमहः । यद् द्वितीयं द्विरात्रे तत्प्रकृतिस्तृतीयं द्वादशाहे चतुर्थमहर्जगतीसंज्ञमन्तर्यन्ति त्यजन्ति रात्रिद्वयस्यैवापेक्षितत्वात् । यदि कपालन्यायेन प्रवृत्तिस्तर्हि तृतीयस्याह्नः त्यागः प्राप्तः जगतीमन्तर्यन्तीत्यसंगतम् । एवमेव लिङ्गं द्विरात्रन्यायः दशरात्रादिषु ज्ञेयः ॥ १२ ॥

प्राप्तिस्तु रात्रिसंबन्धात् ॥ १३ ॥

द्वादशरात्रादिधर्मप्राप्तौ बीजमाह । प्राप्तिरिति । प्राप्तिः धर्मप्राप्तिः । रात्रिसंबन्धात् । द्विरात्रं दशरात्रमिति उभयत्र रात्रिसंबन्धात् । रात्रियोग एव सादृश्यम् ॥ १३ ॥

Digitized by Google

सप्तभिराधुनोतीत्यनेनाग्नौ धूननार्थानां मन्त्राणामनियमेनोपादानम् । अधि॰ ५ ।

अपूर्वासु तु संख्यासु विकल्पः स्यात्सर्वासामर्थवत्त्वात् ॥ १४ ॥

महाग्निचयने, या जाता इत्याद्या बीजावापमन्त्राः चतुर्दशाधिकाः सन्ति । चतुर्दशभिर्वपतीति शेषत्यागः श्रुतः । ततः कपालन्यायेन चरममन्त्राणां त्यागे प्राप्ते सिद्धान्तमाह । अपूर्वास्विति । अपूर्वासु चोदकादनागतासु तत्प्रकरणपठितासु विकल्पः इच्छया संख्यापूरणं कार्यं सर्वासामर्थवत्त्वात् । तत्प्रकरणपाठस्य फलवत्त्वात् । अन्यथा चरममन्त्राणां तत्प्रकरणपाठवैयर्थ्यमिति भावः ॥ १४ ॥

त्रिवृदादिस्तोमवृद्धौ प्राकृतानां साम्नामागमः । अधि॰ ६ ।

स्तोमविवृद्धौ प्राकृतीनामभ्यासेन संख्यापूरणमविकारात्संख्यायां गुणशब्दत्वादन्यस्य चाश्रुतित्वात् ॥ १५ ॥

क्वचित् क्रतौ स्तोमवृद्धिः श्रूयते, एकविंशेनातिरात्रेण प्रजाकामं याजयेदिति । प्रकृतौ त्रिवृत्पञ्चदशसप्तदशस्तोमाः । एवं च प्राकृतसाम्नामतिदेशेन प्राप्तत्वात्तदावृत्त्या एकविंशतिसंख्यापूरणमुत आगन्तुकाप्राकृतसामभिरिति सन्देहे पूर्वपक्षमाह । स्तोमेति । स्तोमविवृद्धौ प्राकृतानां साम्नामभ्यासेन आवृत्त्या संख्यापूरणं स्यात् । अधिकारात् । सन्निधानात् । एकविंशतिरूपसंख्याया गुणशब्दत्वात् । प्राकृतसामगुणत्वेनैवोपपत्तेः । अन्यस्य अप्राकृतानामश्रुतत्वात् । अप्रास्तावीयत्वात् ॥ १५ ॥

आगमेन वा ऽभ्यासस्याश्रुतित्वात् ॥ १६ ॥

सिद्धान्तमाह । आगमेति । स्पष्टो ऽर्थः ॥ १६ ॥

संख्यायाश्च पृथक्त्वे निवेशात् ॥ १७ ॥

अश्रुतत्वसाम्ये विकल्पे प्राप्ते विनिगमकमाह । संख्याया इति । पृथक्त्वे व्यक्तिपृथक्त्वे निवेशात् । निवेशस्य स्वरसता व्यक्तिपृथक्त्वे एव । यथा गेहे अष्टौ सन्तीति भावः ॥ १७ ॥

Digitized by Google

पराक्शब्दत्वात् ॥ १८ ॥

हेत्वन्तरमाह । पराक्शब्दत्वादिति । पराग् बहिष्पवमानेन स्तुवीतेति । अत्र पराक्शब्दो ऽनभ्यासवाचकः ॥ १८ ॥

उक्ताविकाराच्च ॥ १९ ॥

उक्तेति । अविकारात् । अत्र अविकारो नाम पुनर्वचने निन्दाश्रवणं, जामि वा एतद्यज्ञस्य क्रियते यदेकं पुनः क्रियत इति निन्दा ऽभ्यासे श्रूयते ॥ १९ ॥

अश्रुतित्वादिति चेत् ॥ २० ॥

प्रथमसूत्रे अभ्याससाधकत्वेनोपन्यस्तं हेतुं पुनः दूषणार्थमनुवदति । अश्रुतीति ॥ २० ॥

स्यादर्थचोदितानां परिमाणशास्त्रम् ॥ २१ ॥

हेतुं दूषयति । स्यादिति । परिमाणशास्त्रमेकविंशेनेति संख्याविशेषपरिच्छेदशास्त्रमर्थेन अर्थापत्त्या चोदितानां प्राप्तानां, प्रापक इति शेषः । अयं भावः । साम्नां संख्याविधानमेकविंशतिव्याप्तिं विना न स्वरसं, प्रकृतौ न तावन्ति सामानि सन्ति, अत एकविंशतिसंख्यान्वयानुपपत्त्या प्रापितप्राकृतसामसु एकविंशेनेति वाक्यमेव प्रमाणमिति ॥ २१ ॥

आवापवचनं वा ऽभ्यासे नोपपद्यते ॥ २२ ॥

बाधकमभ्यासे दर्शयति । आवापेति । आवापवचनम् अत्र ह्येवावपन्तीति वाक्यम् अभ्यासे सर्वत्राभ्यासे नोपपद्यते । विहितस्य विषयाभावादिति भावः ॥ २२ ॥

साम्नां चोत्पत्तिसामर्थ्यात् ॥ २३ ॥

बाधकान्तरमाह । साम्नामिति । साम्नामप्राकृतसाम्नामुत्पत्तिः पाठः तत्सामर्थ्यात् । यदि सर्वत्र प्राकृतसामाभ्यासः तर्हि शेषसाम्नां कार्याभावात्पाठवैयर्थ्यमिति भावः ॥ २३ ॥

धुर्येष्वपीति चेत् ॥ २४ ॥

ननु घूर्गाने ह्युक्तयुतया प्रावाप्यः स्यादिति शङ्कते। पुर्वेष्वपीति ॥ २४ ॥

नावृत्तिधर्मत्वात् ॥ २५ ॥

समाधत्ते। नेति। आवृत्तं धूर्षु स्तुवतइति वचने तस्यावृत्तिधर्मत्वात्। वचनस्याये न युक्तिप्रवेश इति भावः ॥ २५ ॥

बहिष्पवमाने त्वृगागमः। अधि० ७।

बहिष्पवमाने त्वृगागमः सामैकत्वात् ॥ २६ ॥

बहिष्पवमाने स्तोमवृद्धौ आगन्तुकसामभिः संख्यापूरणमिति पूर्वपक्षे सिद्धान्तमाह। बहिरिति। उक्तस्थले ऋगागमेन संख्यापूरणं सामैकत्वात्। एकं हि तत्र सामेति वचनेन सामान्तरागमप्रतिषेधात् ॥ २६ ॥

सामिधेनीष्वविशिष्टानामागमेन संख्यापूरणम्। अधि० ८।

अभ्यासेन तु संख्यापूरणं सामिधेनीष्व-
भ्यासप्रकृतित्वात् ॥ २७ ॥

एकविंशतिमनुब्रूयादिति सामिधेनीवृद्धिः श्रूयते। तत्राभ्यासेन संख्यापूरणमुत यावदुक्तमभ्यस्य ऋगागमेन संख्यापूरणमिति संशये पूर्वपक्षमाह। अभ्यासेनेति। अभ्यासप्रकृतित्वादभ्यासः प्रकृतौ यस्य तत्त्वात्। तस्य एकविंशतिसामिधेनीकप्रयोगप्रकृतिभूतपञ्चदशसामिधेनीकप्रयोगे संख्यापूरणार्थं त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यभ्यासस्य दृष्टत्वादिति भावः ॥ २७ ॥ १

अविशेषान्नेति चेत् ॥ २८ ॥

अस्मिन् पक्षे शङ्कते। अविशेषादिति। अविशेषात्। पञ्चदशसामिधेनीकः प्रकृतिः अन्या तद्विकृतिरत्र नियामकाभावात् ॥ २८ ॥

स्यात्तद्धर्मत्वात्प्रकृतिवदभ्यस्येतासंख्यापूरणात् ॥ २९ ॥

प्रकृतिविकृतिभावे नियामकमाह। स्यादिति। पूर्वोक्ता प्रकृतिः

Digitized by Google

स्यात्। एकविंशस्य पञ्चदशधर्मत्वात्। अतः संख्यापर्याप्तिपर्यन्तं प्रकृतिवदभ्यासः ॥ २९ ॥

यावदुक्तं वा कृतपरिमाणत्वात् ॥ ३० ॥

सिद्धान्तमाह। यावदुक्तमिति। शास्त्रे यावदुक्तं तावदेवाभ्यसितव्यं, कृतपरिमाणत्वात्। त्रिः प्रथमां त्रिरुत्तमामित्यनेनाभ्यासस्य नियतपरिमाणत्वात् ॥ ३० ॥

अधिकानां च दर्शनात् ॥ ३१ ॥

अभ्यासनिवृत्तौ साधकान्तरमाह। अधिकानामिति। अग्नीषोमीयपशौ सप्तदशसामिधेनीके पृथुपाजाः तं सबाधइति ऋचोः अधिकयोर्दर्शनात् ॥ ३१ ॥

कर्मस्वपीति चेत् ॥ ३२ ॥

अतिप्रसङ्गं शङ्कते। कर्मस्विति। कर्मसु धूर्गानकर्मस्वपि आगमोऽस्त्विति चेत् ॥ ३२ ॥

न चोदितत्वात् ॥ ३३ ॥

वैषम्यमाह। न चोदितत्वादिति। आवृत्तं धूर्षु गायेदिति विहितत्वात् तत्राप्रवृत्तिरेव ॥ ३३ ॥

षोडशिनां प्राकृतत्वम्। अधि० ६।

षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात् ॥ ३४ ॥

यस्यैवं विदुषः षोडशी गृह्यतइति विहितः षोडशी ग्रहः प्राकृतो वैकृतो वेति संशये आद्यपक्षमाह। षोडशिन इति। तत्र कृत्स्नविधानात्। तत्र द्विरात्रादौ कृत्स्नस्य अङ्गकलापस्य विधानात् ॥ ३४ ॥

प्रकृतौ चाभावदर्शनात् ॥ ३५ ॥

साधकान्तरमाह। प्रकृताविति। अभावदर्शनात्। निषेधदर्शनात् ॥ ३५ ॥

Digitized by Google

अयज्ञवचनाच्च ॥ ३६ ॥

लिङ्गान्तरमाह । अयज्ञेति । क्वचिदर्थवादे अयज्ञो वावैष ज्योतिष्टोमो यत् षोडश्या हीन इति । यथा अयज्ञो वा एष यो ऽसामेत्यत्र असामत्वं क्लृप्तम् एवमेव षोडश्यभावः प्रकृतौ क्लृप्तः ॥ ३६ ॥

प्रकृतौ वा शिष्टत्वात् ॥ ३७ ॥

सिद्धान्तमाह । प्रकृताविति । षोडशी ग्रहो ज्योतिष्टोमे ऽस्ति । विकृतौ शिष्टत्वात् उपदिष्टत्वात् । अयं भावः । द्वितीये ऽहनि द्विरात्रस्य गृह्यतइति अन्यत्र निवर्त्तकं न, किं तु उपदेशशास्त्रं, परिसंख्याविधेर्दुष्टत्वात् । येन प्रकृतितो निवर्तकं भवेत् ॥ ३७ ॥

प्रकृतिदर्शनाच्च ॥ ३८ ॥

ननु ज्योतिष्टोमाङ्गत्वे केवलं प्रकरणं मानं द्विरात्राङ्गत्वे वाक्यं, तत्तु वाक्याद्दुर्बलमत आह । प्रकृतीति । प्रकृतौ अग्निष्टोमे राजन्यस्य गृह्णीयादिति वाक्यस्य दर्शनात् ॥ ३८ ॥

आम्नानं परिसंख्यार्थम् ॥ ३९ ॥

ननु चोदकशास्त्रेण द्विरात्रादौ प्राप्तत्वात्तत्र पुनः पाठवैयर्थ्यमत आह । आम्नानमिति । परिसंख्यार्थं प्रकृतौ राजन्यकर्तृकत्वे निमित्ते षोडशी ग्रहः अतिदेशशास्त्रेण चेत् स निमित्तएव प्राप्नुयात् तन्निमित्तपरिसंख्यार्थमाम्नानमिति भावः ॥ ३९ ॥

उक्तमभावदर्शनम् ॥ ४० ॥

उक्तमभावदर्शनं, विकल्पार्थमिति पूर्वोयम् ॥ ४० ॥

गुणादयज्ञत्वम् ॥ ४१ ॥

गुणादिति । पक्षे प्राप्तस्य षोडशिग्रहणस्य गुणात्स्तुतेः अयज्ञत्वमुपपन्नमिति शेषः ॥ ४१ ॥

Digitized by Google

आग्रयणादेव षोडशिग्रहणम् । अधि० १० ।

तस्याग्रयणाद् ग्रहणम् ॥ ४२ ॥

स षोडशी ग्रहः कस्माद्ग्राह्य इति प्रश्ने पूर्वपक्षमाह । तस्येति । तस्य षोडशिग्रहस्य सोमरसः । स्पष्टं शेषम् ॥ ४२ ॥

उक्थ्याच्च वचनात् ॥ ४३ ॥

उक्थ्याच्च द्वयोरित्यर्थः । आग्रयणाद्गृह्णाति उक्थ्याद्गृह्णातीति वचनात् ॥ ४३ ॥

तृतीयसवने एव षोडशिग्रहणम् । अधि० ११ ।

तृतीयसवने वचनात्स्यात् ॥ ४४ ॥

एतदधिकरणमसमाप्य मध्ये अन्यच्चिन्तयति । षोडशिग्रहस्य सवने सवने ऽभिगृह्णातीति वचनेन सवनत्रये प्राप्तौ सिद्धान्तमाह । तृतीयेति । वचनात् तृतीये सवने गृह्णीयात् सर्वेषु सवनेषु गृहीतः स्यादिति वचनात् । पूर्ववचनमेतत्स्तुत्यर्थमिति भावः ॥ ४४ ॥

अनभ्यासे पराक्शब्दस्य तादर्थ्यात् ॥ ४५ ॥

गतो ऽवान्तरविचारः । ननु यद्याग्रयणोक्थ्याभ्यां षोडशिग्रहणं तर्हि पराञ्चमुक्थ्याद्गृह्णातीत्यत्र द्विवाचकः पराक्शब्दो ऽनर्थक इत्यत आह । अनभ्यास इति । अनभ्यासे सकृद्ग्रहणे पराक्शब्दः न द्विपर्यायः शब्दस्य पराक्शब्दस्य तादर्थ्यात् । तादृशार्थे व्यवहारस्य दृष्टत्वात् । अपवर्गवचनश्चासौ न द्विशब्दयोगे पञ्चमीति भावः ॥ ४५ ॥

उक्थ्यविच्छेदवचनाच्च ॥ ४६ ॥

साधकान्तरमाह । उक्थ्येति । वचनमेवं, विच्छिन्दन्ति ह वा एतदुक्थ्यं यदुक्थ्यानि षोडशिनं च ततः प्रयायतीति । अस्यार्थः । यद्युक्थ्यात् षोडशिग्रहं न गृह्णीयात् तर्हि उक्थ्यानि उक्थ्यसामानि एतमुक्थ्यं षोडशिनं च विच्छिन्दन्ति अन्योन्यासंबद्धं कुर्वन्ति अतस्ततः उक्-

Digitized by Google

ध्यात्मग्रावति गृह्णातीति पूर्वपक्षार्थः । उक्थ्यषोडश्योः संबन्धबोधकं वचनं त्वस्मवचने ऽनुपपन्नमिति भावः ॥ ४६ ॥

आग्रयणाद्वा पराक्शब्दस्य देशवाचित्वा-
त्पुनराधेयवत् ॥ ४७ ॥

सिद्धान्तमाह । आग्रयणादिति । आग्रयणादेवेत्यर्थः । पूर्वोक्तपराक्शब्दस्य देशवाचित्वात् । यथा पराञ्चमभ्याधेयात् पुनरादधीतेत्यत्र उत्तरकालरूपदेशवाचकत्वं तथेहापीत्याह । पुनराधेयवदिति ॥ ४७ ॥

विच्छेदः स्तोमसामान्यात् ॥ ४८ ॥

ननु विच्छेदवचनस्य का गतिरत आह । विच्छेद इति । विच्छेदवचनं स्तोमसाम्यादुपपन्नं स्तोमसाम्यं च द्वयोरेकविंशस्तोमत्वेन । अस्य विस्तरस्त्वन्यतो ऽवगन्तव्यः ॥ ४८ ॥

षोडशिग्रहस्य सस्तोत्रशस्त्रत्वम् । अधि० ९२ ।

उक्थ्याग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात्सति
संस्थान्यत्वम् ॥ ४९ ॥

अयं षोडशी ग्रहः अस्तोत्रशस्त्रक उत ताभ्यां सहित इति विशये पूर्वपक्षमाह । उक्थ्येति । अयमस्तुतशस्त्रः उक्थ्याग्निष्टोमसंयोगात् सति स्तुतशस्त्रे संस्थान्यत्वं भिन्नसंस्थं स्यात् । अयं भावः । अग्निष्टोमे राजन्यस्य गृह्णीयादुक्थ्ये इति । अग्निष्टोमादिसंज्ञा तत्तत्साम्ना क्रतुनिमित्तीकृत्य प्रवृत्ता यदि षोडशी तद्युक्त तर्हि षोडशिसाम्ना समाप्तत्वात् षोडशीति संस्थान्तरमेव स्यात् । श्रूयते अग्निष्टोमादिसंज्ञा । तदभावे ताभ्यां रहितमिति ॥ ४९ ॥

सस्तुतशस्त्रो वा तदङ्गत्वात् ॥ ५० ॥

सिद्धान्तमाह । सस्तुतेति । तदङ्गत्वात् । ग्रहाङ्गत्वात् स्तुतशस्त्रयोः ॥ ५० ॥

लिङ्गदर्शनाच्च ॥ ५१ ॥

Digitized by Google

साधकान्तरमाह । लिङ्गदर्शनाच्चेति । कथमूर्ध्वा वा ऽन्ये यज्ञक्रतवः सन्तिष्ठन्ते तिर्यञ्चो ऽन्ये ये होतारमभिसन्तिष्ठन्ते तऊर्ध्वाः ये ऽध्वर्युमभि ते तिर्यञ्च इत्यनेन यज्ञक्रतूनामूर्ध्वतिर्यग्भेदेन द्वैविध्यं दर्शितम् । यद्यस्तुतशस्त्रं स्यात्तर्ह्यध्वर्युमभिसंतिष्ठेतेति तृतीयः । तथा सति द्वैविध्यदर्शनं विरुध्येतेति भावः ॥ ५१ ॥

वचनात्संस्थान्यत्वम् ॥ ५२ ॥

अथ स्तुतशस्त्रसत्त्वे संस्थान्तरं स्यादित्युक्तं तत्रोत्तरमाह । वचनादिति । दृष्टापत्तिरिति भावः । वचनं यथेच्छं कर्तुं शक्नोति ॥ ५२ ॥

आङ्गिरसां द्विरात्रे षोडशिनः परिसंख्या । अधि० १३ ।

अभावादतिरात्रेषु गृह्यते ॥ ५३ ॥

आङ्गिरसां द्विरात्रे वैखानसं पूर्वे ऽहन्साम भवति तेन जात्येनेति षोडश्युत्तरहरिति । अत्र षोडशिविधानमपूर्वमुतानुवाद इति संशये पूर्वपक्षमाह । अभावादिति । अतिरात्रेषु यः षोडशिग्रहः तस्याङ्गिरसां द्विरात्रे ऽतिरिक्ते ऽभावाद् आङ्गिरसद्विरात्रएव गृह्यते । अयमभिप्रायः । अतिरात्रे षोडशी ग्रहो वैकल्पिकः प्रसिद्धः ततः चोदकशास्त्रेण आङ्गिरसां द्विरात्रे प्राप्तो विकल्पेन । एवं सति अनारभ्यैकं वाक्यमस्ति उत्तरे ऽहनि द्विरात्रस्य गृह्यतइति । तेन चोदकप्राप्तं विकल्पं बाधते । अतः सर्वद्विरात्रे नित्यं प्राप्तः । एवं सति वैखानसं पूर्वे ऽहन् साम भवति षोडश्युत्तरहरिति वाक्यस्य अनारभ्याधीतेनोपसंहारे यद् द्विरात्रे षोडशिग्रहणं तदाङ्गिरसां द्विरात्रे नान्यत्रेति । एवं च पूर्वोक्तसूत्रार्थ उपपन्नः ॥ ५३ ॥

अन्वयो वा ऽनारभ्यविधानात् ॥ ५४ ॥

सिद्धान्तमाह । अन्वयो वेति । सर्वत्र द्विरात्रे ऽन्वयः षोडशिग्रहसंबन्धः अनारभ्य विधानात् ॥ ५४ ॥

नानाहीने षोडशिग्रहणम् । अधि० १४ ।

चतुर्थे चतुर्थे ऽहन्यहीनस्य गृह्यतइत्यभ्यासेन प्रतीयेत भोजनवत् ॥ ५५ ॥

Digitized by Google

षोडशिनं प्रकृत्य चतुर्थे चतुर्थेऽहन्यहीनस्य गृह्णाति इति श्रुतम् । तत्रैकस्मिन्नेवाहीने नवरात्रादौ चतुर्थदिवसे अष्टमदिवसे वाह्नमुताही-नान्तरसंबन्धिचतुर्थे दिवसइति संशये आद्यपक्षमाह । चतुर्थइति । एकस्मिन्नहीनएवाभ्यासेन द्विवारं त्रिवारं प्रतीयेत भोजनवत् । लोके चतुर्थे चतुर्थेऽहनि भुङ्क्ते इत्युक्ते पूर्वभोजनदिनावधिकं चतुर्थमहः प्रतीयते तद्वत् ॥ ५५ ॥

अपि वा संख्यावत्त्वान्नानाहीनेषु गृह्यते पक्षवदे-
कस्मिन् संख्यार्थभावात् ॥ ५६ ॥

सिद्धान्तमाह । अपि वेति । संख्यावत्त्वात् । चतुर्थे इति संख्याया वचने श्रुतत्वात् । नानाहीनेषु तत्संबन्धः । एकस्मिन्नेकाहीने एकदि-वसएव संख्यार्थभावात् । चतुर्थसंख्यायाः फलवत्त्वात् । अन्यचतुर्थस्या-हीनसंबन्ध्यहस्त्वादिति भावः । ननु वीप्सायाः का गतिरत आह । पक्षवदिति । यथा पञ्चम्यां पञ्चम्यां भुङ्क्ते इति वीप्साया एकपक्षे पञ्चमी-द्वयाभावात् पक्षान्तरं ज्ञापयति । तथा एकाहीनसंबन्धिचतुर्थदिनद्वया-भावाद् अहीनान्तरं ज्ञापयतीति भावः ॥ ५६ ॥

भोजने च तत्संख्यं स्यात् ॥ ५७ ॥

भोजनस्थले अगत्या युक्तमित्याह । भोजनेति । तत्संख्यं भोजन-दिनमारभ्य चतुष्ट्वसंख्यावत्त्वं स्यात् । किंसंबन्धिचतुष्ट्वमित्याकाङ्क्षापूरक-शब्दाश्रवणाद् इति भावः ॥ ५७ ॥

विकृतौ यज्ञायज्ञीयस्यागायत्त्वम् । अधि० १५ ।

जगत्साम्नि सामाभावादृक्तः साम तदाख्यं स्यात् ॥ ५८ ॥

यदि जगत्सामा ऽऽयज्ञायज्ञीयानिति ज्योतिष्टोमप्रकरणे श्रुतम् । अस्य प्रकृतावेव यथाकथंचिद्विवेश इति पूर्वपक्षे सिद्धान्तमाह । जगत्सा-म्नीति । जगत्साम्नि जगत्सामपदघटितपूर्वोक्तश्रुतौ ऋक्तः जगतीछन्दस्काया ऋचः संबन्धात् । तदाख्यं जगत्सामेति आख्या यस्य तादृशं स्यात् । सामाभावादखिलसामवेदे जगत्संज्ञकसामाभावात् । इत्थं च प्राकृत-

Digitized by Google

सामयोनिभूतर्क्षु कस्या अपि जगतीछन्दस्काया अभावाच्च प्रकृतौ समावेश इति पूर्वपक्षनिरासः पूरणीयः ॥ ५८ ॥

जगत्सामेति ग्रन्थेन विवृक्ता पक्षकम् । द्वितीयवर्णकम् । एवं वा ।

यद्वा जगत्सामेति रथंतरमेव । तद्योनौ ऋचि ईशानमस्य जगतः इति जगत्पदसत्त्वादिति पूर्वपक्षे सिद्धान्तमाह । जगदिति । सामा-भावात्तत्संज्ञकसामाभावात् । अस्मत्पक्षे जगदित्यस्य जगच्छन्दस्कयोनिके लक्षणा । परमते जगत्पदे जगदित्यस्य जगच्छब्दे प्रथमलक्षणा अनन्तरं तत्पदघटितऋग्योनिके पुनर्लक्षणेति लक्षितलक्षणाप्रसक्तिरूपो दोषः पूरणीयः । एतदभिप्रायेणैव वेति ॥ ५८ ॥

संभवे उपवत्यायिवत्योरभावः । अधि० १६ ।

उभयसाम्नि नैमित्तिकं विकल्पेन समत्वात्स्यात् ॥ ५९ ॥

प्रकृतौ पृष्ठस्तोत्रे बृहद्रथंतरसाम्नोर्विकल्पः । तत्तत्साम्नि निमित्त नैमित्तिकं च प्रकृतौ श्रुतं, रथंतरसाम्नि उपवती प्रथमा ऋग् बृहतो ऽयियवतीति । विकृतिविशेषे बृहद्रथंतराभ्यां यन्तीति समुच्चयः श्रूयते । तथा सत्युक्त निमित्तद्वयप्राप्तौ विरुद्धत्वेनोभयानुष्ठानासंभवाद् इच्छया यत्किंचिन्निमित्तमनुष्ठेयमथ वा रथंतरनिमित्तम् अथ प्राकृतान्यनिमित्तमिति संशये प्रथमपक्षं स्थापयति । उभयेति । समत्वात् । नियामकाभावात् ॥ ५९ ॥

मुख्येन वा नियम्येत ॥ ६० ॥

द्वितीयं पक्षमाह । मुख्येनेति । मुख्येन प्रथमेन उपवत्यवत्त्वं नियम्येत ॥ ६० ॥

निमित्तविघाताद्वा क्रतुयुक्तस्य कर्म स्यात् ॥ ६१ ॥

सिद्धान्तमाह । निमित्तेति । निमित्तविघातात् । निमित्तद्वयाभावात् । प्रकृतौ द्वयोः प्रतिपदोः निमित्तं प्रत्येकं पृष्ठकार्यविनियुक्तत्वमस्ति । इह तु तत्कार्यविनियुक्तोभयम् । अतो निमित्तद्वयाभाव इति भावः । क्रतुयुक्तं क्रतुनिमित्तं ततो ऽन्यदेव स्यात् ॥ ६१ ॥

ऐन्द्रवायवस्य सर्वादावप्रतिकर्षः । अधि० । १७ ।

ऐन्द्रवायवस्याग्रवचनादादितः प्रतिकर्षः स्यात् ॥ ६२ ॥

Digitized by Google

Similarly, in objects, having properties peculiar to themselves, and as such incapable of furnishing a comparison, if the previously-experienced object is yet made to furnish a comparison, then we have another kind of *Converse*—*e. g.*

[*Page* 803.] "O my friend, poison! do not be puffed up at the idea that you are the only chief of cruel objects,—since in this world there are the words of evil men, that quite vie with you."

[*Page* 804.] Here the comparison of *poison* though not possible, is yet mentioned.

(55) Sâmânya or Sameness.

134.—Where the uniformity or identity of the object in hand, through connection with another, is delineated, in order to represent the similarity of properties, it is Sameness.

Where the object in hand is represented as identical with *i. e.* not distinguishable from) another, the object not in hand,—on account of its connection with this latter, though not renouncing its own (specific) properties,—in order to be described as resembling it, though really dissimilar;—this constitutes *Sameness*, so called owing to the delineation of similar properties.

Example—

[*Page* 805.] "When the Hare-bearer brightens the Earth, the women repairing to the paramours, become undistinguishable, and thus go to their paramours pleasantly and fearlessly—the women having their body anointed with sandalwood paint,—adorned with new necklaces, having their faces shining through the white paintings, and having their sheen undimmed and lovely."

Here *whiteness* is the cause of identification (non-distinguishability) inasmuch as it is described as equal and identical in the object compared as well as the other; and as such they are not recognised as different.

Or again—

"The Champaka flowers—hanging, from the ear, on the cheeks of the young women, bright as the Vētra-bark—could not have been distinguished, had not the black-bees fallen on them."

[*Page* 806] Here the perception of difference, though due to other causes (the black-bees), is not able to set aside the previous perception of identity; since a perception once obtained cannot be set aside.

(56) Viçêsha or the Extraordinary.

135-36.—(1) The existence of the dependent without the well-known object on which it depends, (2) The uniform existence of a single object in many objects; (3) The performance of an action by some one doing another action—the performance of the former being in the same manner as that of the latter, though the former is incapable (of being performed by the same means),—thus is the Extraordinary said to be threefold.

[*Page* 807]. The first form of the *Extraordinary* is the delineation of the independent existence of an object, by neglecting its well-known substrate—*e. g.*

"Wherefore are the poets not to be revered, whose discourse—though they themselves have repaired to the heaven—graced with infinite beauties—delights the world until the end of the creation?"

(2) Where a single object exists uniformly in many places simultaneously, it is the second kind of the *Extraordinary—e. g.*

[*Page* 808.] "She occupies your heart, as also your eyes and talks! wherefore then, O handsome man! can there be room for us, sinful creatures?"

(3) Where some one having hastily commenced a work, happens by the same operation, to commence another action, it is the third kind of the *Extraordinary—e. g.*

"In creating you,—with your resplendent form, dazzling glory, and flawless learning,—the Creator created afresh as it were Cupid, the Sun and Brihaspati respectively."

[*Page* 809.] Or again—

"Wife, counsellor, confidante, and beloved disciple in the grace-

ful arts,—depriving me of these, what was I not deprived of, by unsympathetic Fate?" [*Raghuvança*, Canto VIII.]

Among all these examples of the *Extraordinary*, Hyperbole forms the life (the most important part); since without it there could have been no Figure—as is said (by Bhāmaha):

[*Page* 810.] "This peculiar allegation exists everywhere; by this is meaning ornamented; a poet must make attempts at this; without this what else can Figure be?"

(57) The Tadguṇa or Borrower.

137.—Where a certain object, through connection with an (object of) much more exalted properties, renounces its own properties and takes up those of the other, it is called the Borrower.

Where the object in hand, being connected (with the object not in hand, having more exalted properties) and having its own form disregarded (*i. e.* put in the back ground) by another object close to it, through the excellence of the properties of this latter, attains to the form thereof, it is the *Borrower*,—literally meaning that which has the properties of the object not connected with the subject.

Example—

[*Page* 811.] "The horses of the Sun having their colours changed by Aruṇa, his driver, were again brought to their original natural colour by the brightness of the emeralds, green like the fresh bamboo-sprout."

Here the sense conveyed is that *the colour of Aruṇa is brighter than that of the horses; and that of the emeralds brighter than that of the driver also.*

(58) The Atadguṇa or the Non-Borrower.

138 (*contd.*)—[*Page* 812.] If there is no borrowing of its properties, it is Non-Borrower.

If the object of inferior properties does not take in the properties of the other, even in the presence of connection, then occurs the Figure named the *Non-Borrower*.

Example—

"धवलोऽसि जहवि सुन्दर तहवि तुए मज्झ रञ्जिअं हिअअम् ।
राअभरिएवि हिअए सुहअ णिहितो ण रत्तोऽसि" ॥

"Though white, O beautiful man! yet you coloured (rendered affectionate) my heart. But though located in my red (affectionate) heart, you yourself are not red (affectionate)."

Here the Figure is the *Non-Borrower*, the meaning being—"though in connection with the extremely red heart you are not reddened."

[*Page* 813.] *Tad* (in the Kārikā) is the object not connected with the subject; *Asya* refers to that connected with the subject (*i. e.* the matter in hand); thus the Kārikā might be explained as—'that where the object in question does not in any way, take up the form of that not connected with the subject.'

To exemplify this—

"O Swan! even on dipping into the white water of the Gangā, as well as in the black water of the Yamunā, your whiteness only improves; it does not fade away."

(59) **Vyāghāta or Frustration.**

38-39 (*contd.*)—Some object being fulfilled by some person in a certain manner,—if it were, by the same means inverted by another person; then it will be (the Figure) Frustration.

The inversion by another person desiring to supersede the former doer of a certain purpose by the same means as by which it was fulfilled by the first man,—constitutes ***Frustration***, so called on account of the frustration of a fulfilled purpose.

Example—

[*Page* 814.] "We eulogise the women who revivify, by means of their glances, Cupid, who was burnt by means of the eye."

(60) **Sansrishti or Collocation.**

139 (*concld.*)—[*Page* 815.] The differentiated existence, in the same place, of these, is called Collocation.

Digitized by Google

The figures described above occurring as far as possible, independently of each other, in one place (in a word, meaning or in both), constitute *Collocation*, consisting of the connection (of various Figures) in the same place.

[*Page* 816.] To exemplify—

(1) The Collocation of Verbal Figures—

"वदनसौरभलोभपरिभ्रमद्भ्रमरसम्भ्रमसम्भृतशोभया ।
चलितया विदधे कलमेखला कलकलोऽलकलोलदृशान्यया" ॥

[*Çiçupālavadha*, Canto VI.]

["The sweet sound of the girdle-zone was produced by another (woman), with her eyes tremulous owing to the hanging locks, moving (here and there), and having her beauty perfected by her flurry caused by the black-bees wandering about, attracted by the sweet fragrance of her face."]

(2) The Collocation of Sense-Figures.—

" लिम्पतीव &c. " (*Text* p. 644.)

In the former of these we have the Collocation of *Alliteration* and *Chime*, and in the latter that of *Simile* and *Poetic Fancy*, existing independently of one another.

[*Page* 817.] (3) The Collocation of Verbal and Sense Figures.—

"सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णम् ।
तरुणाणं हिअअलुडिं परिसक्कन्तीं णिवारेइ" ॥

["There is none in this village who could restrain this young woman, the one capturer of young hearts, wandering about here and there, having her graceful beauty rejoicing in her as it were."]

Here we have *Alliteration* and *Metaphor* independent of each other. The Collocation of these two is due to their being together in a single sentence or a single stanza.

(61) The Saṅkara or Commixture.

140 (*contd*)—Where however there is a relation of mutual subserviency (subsisting among these Figures) incapable of maintaining themselves independently, there we have the Commixture.

[*Page* 818.] Where these very (Figures) not having attained to their independent forms, bear, among themselves, the relation of subserviency, then it is *Commixture*,—so called owing to the Figures having mixed themselves with one another.

Example—

"O king! of thy enemies' wives wandering in the forests, the foresters take not the pearl necklace reddened by the red reflection of the colour of their Bimba lips, mistaking it to be a string of berries—after they had taken away the emerald head-ornament, the golden ear-ring, and having snapped the girdle-zone, and taken away the jewelled anklets."

Here the *Mistaker* is produced, based on the *Borrower*, which again receives from the *Mistaker* its charm for poetic hearts; and thus these two become mutually subservient.

[*Page* 819.] Or again—

"The moon roves in the sky, as if it were in the crematorium—the moon, having his sheen yellowish like the knot of clotted hair, holding in his hand a string of beads, in the shape of the mark, white (clear) on account of the dispassion (having the redness disappeared) taken up on account of the destruction of separated persons (objects of sense), white as ash (or through ash); and the sky such as having its form marked by shells, in the shape of the groups of moving stars."

Here *Simile*, (in जटाभाभिः and पिशुनश्च), *Metaphor* (in कलङ्काक्षवलय and तारापरिकरकपाल), *Poetic Fancy* (in वियोगिव्यापत्तेरिव), and *Paronomasia* (in वैराग्यविशद), are as before, mutually subservient:—

[*Page* 820.] If we explain कलङ्काक्षवलयम् as a Metaphor, thus—"कलङ्क एव अक्षवलयम्"—then the means of establishing this Metaphor would be the करधृतत्व (*being held in hand* and *being held in the rays*). Since in making the above a Metaphor, the chief meaning implied is *the Aksha-Valaya, having concealed the mark (in the moon)*; and it is to the वलय alone that the fact of

being held by the hand is universally believed to apply. By the reflection of Paronomasia however, the fact of the mark being held in the कर, though really not existing, is yet so construed through superimponent Indication *(i. e.* by making कर indicate the *disc)*; since the mark is held by the moon only in his body the disc (not in the hand). In explaining कलङ्कग्राहवलयम् as a Simile—thus 'कलङ्कम् ग्राहवलयमिव'—कलङ्क would manifest itself as the principal member; and the fact of being held by the hand could not belong to this (Kalaṅka); thus we would be obliged to have recourse to Indication with regard to the principal member (the *kalaṅka*).

[*Page* 822.] This *Commixture* is seen to belong to Verbal Figures as well—*e. g.*

"राजति तटीयमभिहतदानवरासातिपातिसारावनदा ।
राजता च यूथमविरतदानवरा साऽतिपातिसारा वनदा" ॥

["This place is glorious—having the sports of the Rākshasas put down, adorned with fast-flowing and murmuring rivers. Similarly does the herd of elephants protect itself, glorious owing to the uninterrupted flow of the temple-juice, strong, and cutting the forest"—

Here we have the Commixture of *Chime* and the *Anulóma-pratilóma-Pictorial* (located in the two feet, the 2nd and the 4th), dependent upon one another.

Second Form of Commixture.

140 (*concld.*)—[*Page* 823.] Another kind of Commixture is due to the uncertainty of accepting any one Figure, in the absence of any reason either supporting or negativing the assumption of the contrary.

Where two or more Figures being contradictory cannot be simultaneously accepted, and where there is no ground in favour of accepting any one of them, nor any ground for disregarding another, by which only one could be accepted,—this want of certainty constitutes the second kind of *Commixture.* (The च of the Kārikā having a collective force connects this Kārikā with the word "*Commixture*" of the former).

Digitized by Google

Example—

[*Page* 824] "The ocean was not created sweet-watered by the Creator, as it was made deep, rich in gems, and clear."

Here there is a doubt as to whether this is an instance of Modal Metaphor on account of the implication of a certain object (a certain person) not connected with the subject, by the similitude of properties (depth, &c), when the ocean is the object directly described;—or that it is an instance of Indirect Description, inasmuch as it implies a particular person, through the description of the ocean, which is only a subordinate member of the comparison.

Or again—

"This disc of the moon, pleasing to the eye, shines; yet even now this darkness, pervading all over, is not destroyed."

Here there is a doubt as to the existence of various Figures —*e. g.* (1) Periphrasis on account of the implication by means of certain intonation, &c., that *season favourable to exciting lasciviousness is arrived;* or (2) Hyperbole on account of the imposition upon the face, of the quality of being the lunar disc; or (3) Metaphor owing to the imposition of the form of the *face* which is referred to by वतन्; or (4) the Illuminator due to the fact of both these (face and the disc) being taken together; or (5) Equal Pairing (by making both, the object described), or (6) Modal Metaphor by the implication of the face arising from the similitude of properties on the advent of night; or lastly, (7) Indirect Description on account of the brightness of the face being the object described. Where, however, we have reasons either supporting or negativing the acceptance of any one of the various Figures,—there one, out of the many, is definitely ascertained, and no ground for doubt is left.

Nyāya is that which supports, *i. e.* which is in favour of a certain theory, and *B'ādha* is that which sets aside, *i. e.* which contradicts it, and thus sets it aside. Of these, in—

"the brightness of smile adds grace to the face which is like moonlight,"—we have the *brightness of smile* as principally

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम्।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता श्री तै॰ रामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी, ...	१)
लघुकौमुदी, श्रीयुतडाक्टरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायां कृता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	३)
वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायां कृतम्	४)
मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद	५)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
षोडशपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)
श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतश्रुतप्रकाशिकाविषमपदटिप्पणीसमेतः	७।)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	३)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	१=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः।	२।)
श्रेयःपूर्त्तेः प्रथमो बिन्दुः सत्सम्प्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
श्रेयःपूर्तिसहितो वेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम्।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता, ...	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	३॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 561

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 577

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityānandapanta, Scholar, Sanskrit College, Benares. 593

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 609

Digitized by Google

काशीविद्यासुधानिधिः

HARVARD COLLEGE LIBRARY
... 1899
CAMBRIDGE, MASS.

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 12.] December, 1898. [Vol. XX.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1898.

Price Rs. 9-0 per annum.] [All rights reserved.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

Digitized by Google

सहोपलम्भनियमादि लिङ्गमन्यथैव सिद्धमित्यर्थः । यद्यपि स्वयम्प्रकाशवादे वित्तिवेद्ययोस्सहोपलम्भनिय*मस्सिद्धस्तथाऽपि न तावता तयोर्मिथस्तादात्म्यसिद्धिः भिन्नस्यापि वेद्यस्य स्वयम्प्रकाशसमकाले प्रकाशमानतया तेन सहोपलम्भोपपत्तेः । नियमस्तु स्थिरपक्षे दुर्वचः कालान्तरे पुरुषान्तरे चासहोपलम्भात्, अतस्सहोपलम्भनियमादभेदो नीलतद्धियोरिति त्वप्रयोजकादप्रयोज्यव्यपदेशः । ननु यद्यतो भिद्यते न तत्तेन सहोपलभ्यते यथा घटेन पट इति व्यतिरेकशुद्ध्या व्याप्तिसिद्धौ कथमप्रयोजकत्वम् इत्थं व्यभिचारेण व्यतिरेकस्याशुद्धत्वात् त्वत्पक्षे तावत्स्वसन्ततिपूर्वापरज्ञानानि सन्तत्यन्तरज्ञानानि च केनचिज्ज्ञानान्तरेणोपलभ्यन्ते अन्यथा कथन्तानि समर्थयेरन् ततश्च ग्राह्यग्राहकयोस्तत्र तादात्म्ये सर्वसंविदद्वैतप्रसङ्गः । भेदे तु व्यभिचारसिद्धिः, यदि मन्यसे सर्वज्ञानानां स्वस्वे काले स्वेनैव प्रकाशनात् स्वग्राहकज्ञानान्तरेण सहोपलम्भनियमो नास्तीति एवं सति नीलपीतादेरपि स्वग्राहकेणैकेन ज्ञानेन सहोपलम्भनियमो नास्ति स्थिरपक्षे कालादिभेदेन पुरुषभेदेन च नीलादेरनियतानेकोपलम्भविषयत्वसिद्धेः । न चैकस्य नीलस्यानेकस्वग्रहणतादात्म्यसम्भवस्त्वयाऽपि नेतत् संमन्यते प्रतिसंवेदनं नीलभेदान्नोपलम्भानियम इति चेन्न ज्ञानचयैक्यसिद्धौ प्रतिज्ञानं नीलभेदः तत्सिद्धौ च सहोपलम्भनियमात्तदैक्यसिद्धिरिति चक्रकापत्तेः । किञ्च सहभाव एव तावद् भेदसापेक्षः तदुपलम्भनियमस्त्वभेदगन्धं न सहते अतस्तेन कथन्तादात्म्यसाधनं ज्ञानेनार्थस्य नियतस्सहोपलम्भश्च अथ किं ज्ञानार्थगोचरमेकं ज्ञानान्तरमुत स्वप्रकाशस्वगोचरज्ञानानतिरिक्तप्रकाशः, नाद्यः ज्ञानोदयकाले ज्ञानार्थगोचरैकज्ञानान्तरादृष्टेः

* सहोपलम्भः सिद्ध इति पा० ।

अन्वयव्यतिरेकिविवक्षायां दृष्टान्ताभावाच्च । अस्ति द्विचन्द्रदृष्टान्त इति चेन्न अकल्पितस्य चन्द्रस्य कल्पितेन सहोपलम्भनियमाभावात् अन्यतरस्य सहोपलम्भनियमो विवक्षित इति चेत् हन्त तर्हि तदुभयतादात्म्यं निदर्शयतस्ते कथमसौ नियमस्तस्यैवास्ति च नास्ति चेति घटेत । केवलव्यतिरेकिविवक्षायां त्वन्यत्र साध्यसद्भावात् आभासत्वं, सिद्धौ हि स्वेन सहोपलम्भाभावेऽपि सर्वबोधानां स्वस्मादभेदः, यद्यप्यसौ न स्यात् सर्वे बोधाः स्वयमेव न स्युरिति माध्यमिकमतप्रसङ्गः । ननु ग्राह्यस्य स्वग्रहणतादात्म्यमिह साध्यं तच्च नान्यत्र क्वचिदस्तीति केवलव्यतिरेकित्वोपपत्तिः स्यात्, मैवं सर्वज्ञानानां स्वग्रहणरूपत्वाभ्युपगमेन स्वग्रहणतादात्म्यस्यापि सिद्धत्वात् व्यतिरेकश्चात्र दुर्वचः यत् स्वग्रहणतादात्म्यरहितं तत्सहोपलम्भनियमरहितमित्युदाहरणीयासम्भवात्, मन्यसे हि ग्रहणानामपि स्वग्रहणतादात्म्यम् आदिशब्देन संवेदनादिहेतुसंग्रहः संवेदने तावत् यद्येन संवेद्यते तत्तदभिन्नमित्यन्वयव्याप्तिर्नास्ति संविदन्तरसंवेदने व्यभिचारात् तदनभ्युपगमेऽपि चानिष्टस्योक्तत्वात् यद्यतो भिद्यते न तत्तेन संवेद्यते यथा च घटेन पटः, यथा वा घटमात्रज्ञानेन पटः, संवेद्यते च नीलज्ञानेन नीलमिति व्यतिरेकव्याप्तिरस्तीति चेत् न अन्वयतो व्यभिचारे व्यतिरेकाव्यभिचारस्याकिञ्चित्करत्वात् व्यतिरेकश्चात्र त्वया दुर्वचः घटपटोदाहरणस्याश्रयविकलत्वात् संविदात्मना घटादिरूपाश्रयभेदासिद्धेरिति चेत् अस्त्वेवं तथाऽपि पूर्ववद्व्यभिचारो दुर्वारः संविदन्तरस्य संविदन्तरेण व्यवस्थाप्यत्वस्थापनात् । एतेन भिन्नस्य ग्राह्यत्वेऽतिप्रसङ्गात् संयोगसमवायैकार्थसमवायकारणत्वादीनामव्याप्त्यादिदुःस्थतया ग्राह्यलक्षणत्वायोगाच्च परिशेषात्तादात्म्यमेव ग्राह्यलक्षणमास्थेयमित्यपि निरस्तम् । ज्ञानान्तरेषु ज्ञानान्तरेण गृह्यमाणेषु स्व-

Digitized by Google

ग्रहणतादात्म्यायोगादेव । किञ्च अतीतानागतग्राहिषु विज्ञानेषु यदि स्वग्राह्यतादात्म्यं तदा विज्ञानमेव स्वयमतीतमनागतं वा स्यात् किन्तदानीं तद्ग्राह्यं स्यात् । अथ नातीतोऽनागतो वा कश्चिद्विषयः किन्तु वर्तमानज्ञानेऽतीतत्वानागतत्वकल्पनामात्रमिति मन्यसे तथा सत्यतीतानागतविज्ञानग्राहिणि विज्ञानान्तरेऽप्येवं स्यादित्येकक्षणपरिशेषो वा नित्यैकज्ञानपरिग्रहो वा स्यात् । अपि च

ग्राह्यग्रहणतादात्म्यं खरशृङ्गाद्यग्रहे ।
अस्ति चेद् व्याहतिर्नो चेद्व्यभिचारस्तदुस्तरः ॥

तादात्म्यञ्च ग्राह्यलक्षणं व्यवस्थापयता लक्ष्यस्य लक्षणव्यापकत्वमभिसन्धाय किं यस्य येन तादात्म्यं तस्य तेन ग्राह्यत्वमिति नियमो विवक्षितः, उत लक्ष्यस्य लक्षणव्याप्यत्वमभिसन्धाय यस्य येन ग्राह्यत्वं तस्य तेन तादात्म्यमिति, न प्रथमः, स्वेनाभिन्नस्य घटस्य स्वेन ग्रहणाभावात् स्वसंवित्तादात्म्यात्तच्च स्वेन ग्रहणमिति चेन्न इतः पूर्वं संवित्संवेद्ययोस्तादात्म्यासिद्धेः । न द्वितीयः संवेदनहेतुदूषणनयेन दत्तोत्तरत्वात् । किञ्च ग्राह्यस्य स्वग्रहणाभिन्नत्वनियमे खरशृङ्गशुक्तिरजतादेरपि तथात्वं प्रसज्येत । न चेतदनुमन्तव्यं सत्यासत्ययोस्तादात्म्यायोगात् । योगे वा जैनवादविजयापातादिति तच्च व्याघातशमनमिच्छतामन्यतरस्वभावपरित्यागप्रसङ्गमाह । ग्राह्यात्मत्वादिति । मिथ्याभूतबोध्यतादात्म्यात् बुद्धेरपि मिथ्यात्वे माध्यमिकमनीषितसिद्धिः सत्यभूतबुद्धितादात्म्यात् बोध्यस्यापि सत्यत्वे खरशृङ्गकम्बुकलधौतादेरपि सत्यत्वापात इति भावः । उक्तहेतुद्वयस्य साधारणं श्वेतपीतादीत्यनेन पूर्वं सूचितं दूषणान्तरमाह । किञ्चेति । अयं भावः निर्विशेषवस्तुप्रकाशो नास्त्येवेति सिद्धे सर्वबुद्धीनां यत्किञ्चिदनेकग्राहित्वादनेकेषाञ्च मिथस्तादात्म्यायोगादने-

Digitized by Google

केस्तैरेकस्या बुद्धेरपि तादात्म्यमुपलम्भविरुद्धं न कथञ्चिदपि स्यादिति एकैकस्य क्रमेणावगतौ बुद्धिभेदात् परिहारः स्यात् तन्निवृत्त्यै युगपदित्युक्तम् । अथ मन्यसे बुद्धिबोद्धृतादात्म्यमुपदिशतो बुद्धस्यायमभिप्रायः बुद्धिव्यतिरिक्तस्य बोध्यस्य मिथ्यात्वात्तदव्यतिरेकोपचार इति यद्येवं बाह्यार्थमिथ्यात्वमिहाभिसंहितं तत्र सहोपलम्भनियमादयो न साधकाः । बुद्धोपदेशस्तु स्वदृष्टान्तेष्वेव शोभते ।

स्थूलास्थूलादिकोटीनां बाधकैर्बाह्यनिह्नवः ।
सुन्दोपसुन्दन्यायेन बाधकानां हतेर्हतः ॥

अपि च कृत्स्नबाह्यार्थापह्नवेऽनुमानानां स्वोपजीव्यप्रत्यक्षविरोधादनुत्थानमेव ।

बोध्यापह्नवयुक्तीनां निस्सारमनुपश्यता ।
बोद्ध्रपह्नवयुक्तिश्च सुतरां सुतरा भवेत् ॥

न तावद् बुद्धिमात्रं ज्ञाताहमर्थः तद्धर्मतयैव तत्प्रतीतेः, तथा च सूत्रं व्यतिरेकोऽगन्धवत्तथा च दर्शयतीति न च बुद्धावहन्त्वक्लृप्तिः बुद्धिरहमित्यवभासप्रसङ्गात् । नापि बुद्धेराश्रयतयाऽहमर्थकल्पना निरधिष्ठानकल्पनानङ्गीकारात् । अथ निराश्रयापि बुद्धिः साश्रयतया कल्प्यत इति मन्यसे तथा सत्यन्यथाख्यातिः स्याद् बाधे च सत्येवं वक्तव्यं न चाश्रयबाधकं किञ्चिदबाधितमस्ति बुद्ध्यन्यत्वादिकुतर्कैस्तद्बाधे बुद्धिरपि भासमानत्वादिमाध्यमिककुतर्कैर्बाध्येत, तस्माद् ग्राह्यग्राहकापह्नवे गृहीतिरप्यपह्नोतव्या तद्ग्रहे वा तयोरपि ग्रहणं स्यादेव तदिदं न भावोऽनुपलब्धेरिति सूत्राभिप्रेतम्, एवं दृग्दृश्यसंबन्धानुपपत्त्या दृश्यमिथ्यात्वमिति कुदृष्टिकल्पनाऽप्युन्मूलनीया । अथ ह्यनुपपद्यमानसंबन्धोपपादकतया वा दृश्यमि-

थ्यात्वं कल्प्यते उत सिद्धस्य संबन्धाभावस्य व्यापकतया नाद्यः, दृश्यमिथ्यात्वे सुतरां संबन्धायोगात्, न द्वितीयः दृश्यस्येव दृशोऽपि मिथ्यात्वकॢप्तिप्रसङ्गात् न च मेरुमन्दरयोरसंबन्धो नास्तीत्यन्यतरमिथ्यात्वमुभयमिथ्यात्वं वा कल्प्यते । असंबद्धयोः संबन्धित्वेन भानाद्विशेष इति चेत् तथा सति तत्संबन्धस्येव मिथ्यात्वं वाच्यं न तु तदुभयस्वरूपस्य तदसंबन्धस्य तेन वास्तवप्रकाश्यत्वायोगात् ततत्प्रकाश्यत्वस्य काल्पनिकतया प्रकाश्यस्वरूपासिद्धिरिति चेत् तर्हि काल्पनिकस्याप्यसंबन्धस्य कथन्तत्प्रकाश्यत्वमिति चिन्तय । मायामाहात्म्यादिति चेत् एवं सत्यस्यापि सामग्र्यादिमाहात्म्यादिति यथालोकमवलोकय । किञ्चासंबन्धस्य वास्तवप्रकाश्यत्वं न घटत इति वदता संबन्धस्यैव वास्तवप्रकाश इति नियमस्त्वया दृष्टः स्यात् अन्यथा तद्व्यतिरेके तद्व्यतिरेकनियमनिर्देशायोगात् यदि चासंबन्धस्य प्रकाशमानत्वमयुक्तं मन्यसे तर्हि दुरपह्नवस्य प्रकाशमानत्वस्य सिद्ध्ये संबन्ध एव कश्चित्कल्पयितुं युक्तः स तु संप्रतिपन्नसंबन्धेष्वन्तर्भूतश्चेत्तदन्यः कश्चिदित्येवाङ्गीकार्य्यः । अथ तेन तस्य प्रकाशमानत्वमेव नास्तीति पक्षस्तदा कस्यानिर्वचनीयत्वादि कल्प्येत । अपि च दृग्दृश्ययोरसंबन्धं प्रतिक्षिपता किं संबन्ध एव नास्तीत्यभिसंहितम् । उत क्वचित् सन्नप्यसौ प्रस्तुतयोर्नास्तीति नाद्यः, दूष्यदूषणादिसंबन्धविलोपे स्वव्याघातादिदोषगणोन्मेषात्, न द्वितीयः यथा संबन्धान्तरमन्तरेण क्वचिदसौ कस्यचित्सिद्धः तथा दृग्दृश्यभावरूपः संबन्धोऽपीति स्वीकर्तुमुचितः, । यच्च सविषयवृत्त्यध्यासात् दृश्यवद् दृशोऽपि मिथ्यात्वमिष्यत एवेति तदप्यसत् साक्षिणोऽपि स्वदृश्यमिथ्यात्वेन मिथ्यात्वप्रसङ्गात् अनादित्वात्तस्याकल्पिततया न मिथ्यात्वमिति चेन्न

Digitized by Google

अनादेर्भावरूपाज्ञानस्यापि तथात्वप्रसङ्गात्, अनादित्वस्य तद्वदेव न कल्पितत्वविरोधि । यदि च साविद्या न कल्पितत्वं स्यात् ब्रह्म-स्वरूपवत्तस्यापि नित्यत्वप्रसङ्गः, न चैवं स्वीक्रियते तद्विषयाविद्या-स्वरूपस्यापि नित्यत्वप्रसङ्गेन तन्मूलजगद्विवर्तस्यापि नित्यानुवृत्ति-प्रसङ्गादिति ॥ २० ॥

ननु बाह्यार्थ एव न संभवति यत्प्रत्यक्षबलादात्मख्याति-भङ्गं मन्यसे गुणानां तावद् द्रव्याश्रितत्वाश्रितेः, द्रव्याणां पृथिव्या-दीनामवयविसंघातादिविकल्पासहत्वादेन्द्रियकद्रव्याभावेऽतीन्द्रियस्य दूरनिरस्तत्वाच्चेत्यभिप्रायेण चोदयति । हन्तेति ।

मू० हन्त अप्यन्तपक्षे कणभुगभिमतो नावय-
व्यस्ति कश्चित् संघातो नांशतोऽन्यस्त-
दणुषु न भवेद् दृश्यतेत्यन्यचोद्यम् । संस-
र्गैर्विश्वमेतद् घटत इह यथादृष्टि दृश्याणु-
पक्षे नादृष्टं कल्पयामः परिणतिभिरसौ
दृश्यतादिः श्रुते स्यात् ॥ २१ ॥

टी० ॥ हर्षार्थोऽयं हन्तशब्दः वाक्यारम्भार्थो वा अवयवी तावत्सौगतैरिव चाप्यन्तवादिभिरपि नाङ्गीक्रियते संघातस्तु संघा-तिभ्यो नातिरिच्यते तत्संबन्धश्च स्वरूपातिरिक्तो न संभवति, संभ-वेऽपि संघातिनामप्रत्यक्षत्वे तत्संघातस्य प्रत्यक्षत्वं न स्यात् संघातिनाञ्चान्ततः परमाणुपरिशेषात्तेषाञ्चाप्रत्यक्षत्वादिति भावः । दूषयति । इत्यन्यचोद्यमिति । तत्त्वनिरीक्षणासामर्थ्यादन्यत्वोप-चारः । परमतेन तावत्परिहारमाह । संसर्गैरिति । अपरैरवयवा एव परमाणव इति पक्षे तत्संसर्गविशेषैरेव ह्रस्वत्वदीर्घत्वाद्यव-

Digitized by Google

तुरस्रवृत्तवक्रकुटिलत्वादिविचित्रसन्निवेशं विश्वमेतद्यथादर्शनं दृश्यं स्यादित्यर्थः । वयन्तु न त्रसरेणुव्यतिरिक्तं तदवयवादिकं कल्पयामः येन तदप्रत्यक्षतया विश्वाप्रत्यक्षत्वशङ्का स्यादित्यभिप्रायेणाह । नादृष्टमिति । ननु श्रुतेऽपि सूक्ष्मद्रव्ये प्रत्यक्षत्वादिकं न मन्यसे अतस्तदात्मकस्य प्रपञ्चस्य कथं प्रत्यक्षत्वादिकमित्यत्राह । परिस्ति-तिभिरिति । असाविति दुरपह्नवत्वाभिप्रायम्, आदिशब्देन तत्तदि-न्द्रियान्तरविषयत्वाभः तत्तत्कार्य्यविशेषहेतुत्वादिकञ्च संगृह्यते ।

रूपस्पर्शादिजननाद् दृश्यत्वस्पृश्यतादयः ।
तत्राज्ञातदभावस्य युज्येत श्रुतिचक्षुषामिति ॥ २१ ॥

एवं बाह्यख्यातेरसंभवं परिहृत्य स्वात्ममात्रख्यातेरनुपपत्ति-माह । आत्मख्याताविति ।

मू० आत्मख्यातौ मतीनाम्मिथ इतरतया संवि-
दन्या न सिध्येदन्योन्यार्थानभिज्ञाः कथ-
मिव च धियो वादजल्पादि कुर्य्युः । माना-
भासादिसीमा न कथमपि भवेद् ग्राह्यमि-
थ्यात्वसाम्यात् सर्वन्तत्संवृतेश्चेन्न खलु
सदितरा सापि तत्तन्नियन्त्री ॥ २२ ॥

टी० ॥ ग्राह्यस्य ग्राहकतादात्म्ये संविदन्तरासिद्ध्या मतान्त-रप्रसङ्गः प्राग् दर्शितः । तत्र स्वप्रवृत्तिविरोधञ्चाह । अन्योन्येति । वा-दिबुद्धिविषयादिकमनुल्लिखन्त्या प्रतिवादिबुद्ध्या कथन्तत्प्रतिषेधव्य-वहारः प्रवर्त्त्येतेति भावः । उपलक्षणमेतत् शिष्याचार्य्यादिसंव्य-वहाराणाम् प्रसङ्गान्तरमाह । मानाभासेति । आदिशब्देन तर्कतदाभा-

सघट्टनाघट्टनादिसंग्रहः । सर्वेष समाधानं शङ्कते । सर्वमिति । विकल्पाभिप्रायेण प्रतिविधत्ते । न खल्विति । अयं भावः संवृतिः संवित्स्वरूपादन्या वा अनन्या वा आद्ये कथन्तदन्यस्यास्तेन ग्राह्यत्वम् । अगृह्यमाणायाश्च स्वरूपसत्यत्वाभावात् संविदधीनसिद्ध्यभावाच्च कथम्मानतदाभासादिव्यवस्थापकत्वम् । न द्वितीयः, संविदनन्यया हि संवृत्या सिद्धं संविदेव सिद्धमित्युक्तं भवति तथा च त्यज्यतान्तन्मिथ्यात्वाभिसन्धिः, अन्यथा संवित्स्वरूपमेवापह्नुतं स्यात् तस्यास्तदभिन्नत्वादिति ॥ २२ ॥

अन्यानपि बौद्धोक्तान् बाह्यापह्नवप्रकारान् प्रत्याचष्टे । एकाकारेति ।

मू० एकाकारप्रतीतिर्न्निजमतिविहता नैव दृष्टे
गुरुत्वं व्यर्थोऽस्मिन् सम्मतिस्ते वहि-
रपि नियतं वक्ष्यते ग्राह्यलक्ष्म । व्याघातौ
लिङ्गसंख्यापरिमितिवचसां नास्त्युपाधिप्र-
भेदादेकं नानाकृतिः स्यान्निजगुणभिदया
बाधिते धीः स्वहेतोः ॥ २३ ॥

टी० ॥ यत्तवाहुः इदं नीलमित्यादिबुद्धौ नीलादिरेक एवाकार उपलभ्यते स चेत् स्वार्थस्य तर्हि निराकारा बुद्धिर्न प्रकाशेत तदप्रकाशे च कुतोऽर्थप्रकाशः, अतः प्रकाशमान एक आकारः प्रकाशमानस्य ज्ञानस्यैव स्यादिति । अत्र ब्रूमः एकाकारप्रतीतिः स्वमतिव्याहता ज्ञानार्थयोर्भिन्नाकारतयैव सर्वैरुपलब्धेः । अर्थो हि नीलाद्याकारः ज्ञानन्तु तत्प्रकाशाद्याकारमिति, न चार्थेनैव विशेषो हि निराकारतया धियामिति नियमः, भेदकान्तराभावदशाविषय-

Digitized by Google

त्वादेवं व्यपदेशस्य, अस्ति ह्याधारत आधेयतः कारणतः कार्य्यतश्च ज्ञानस्य विशेषः, अतः परस्परभिन्नाकारतयैव ज्ञानार्थयोरुपलम्भ इति तथाऽपि नीलादेर्ज्ञानाकारत्वकल्पनयैव सर्वव्यवहारसिद्धेः बाह्यार्थकल्पनायां गौरवप्रसङ्ग इत्यत्राह । नैवेति । यदि वयं सौत्रान्तिकवज्ज्ञानाकारवैचित्र्येणार्थस्वभावं कल्पयामः तदेवमनुयुज्येमहि दृष्टत्वादेव हि बाह्यार्थमभ्युपगच्छाम इति भावः । ननु विप्रतिपन्नो बाह्यार्थः ज्ञानन्तु संप्रतिपन्नम् । अतः प्रकाशमानो नीलादिराकारस्संप्रतिपन्नस्यैव भवितुमर्हति सिद्धसाध्ययोः सिद्धस्यैवावलम्बनीयत्वादिति तत्राह । व्यर्थेति । यदि वादिविप्रतिपत्त्या वस्त्वतिवर्त्तेत तदा हि तत्सम्मतिरन्वेषणीया न चैवमस्ति अन्यथा सर्ववादिनां परपक्षभङ्गस्यायत्नलभ्यतया साधनदूषणादिप्रयोगो निरर्थकः स्यात्, न च मत्सम्मतिविरहात् त्वत्पक्षं सर्वमसिद्धं मन्यस इति भावः । ननु बाह्यस्य नीलादेः प्रकाशमानत्वमौपाधिकमनौपाधिकं वा नाद्यः, अप्रकाशस्वभावस्योपाधिसहस्रेणापि प्रकाशापादनायोगात्, न द्वितीयः, अनौपाधिकप्रकाशस्य स्वयंप्रकाशत्वज्ञानत्वयोरवर्जनीयत्वात् ततश्च वित्तिवेद्यभेदासिद्धेस्तादात्म्यमेव ग्राह्यलक्षणं स्यादित्यत्राह । बहिरपीति । अयं भावः न तावन्नीलादेरौपाधिकप्रकाशत्वे प्रकाशासिद्धिः हेतुफलभावस्य त्वयाऽपि स्वीकारात् अन्यथा कथमसत्स्वभावस्य हेतुसहस्रेणापि सत्त्वापादनमिति माध्यमिकपर्य्यनुयोगे किं प्रतिवक्ष्यसि अतः प्रत्यक्षानुपलम्भप्रतिष्ठापितहेतुविशेषाधीनं प्रकाशमानत्वं बाह्यत्वेऽपि नीलादेरप्रतिक्षेप्यमिति स्थिते ग्राह्यस्य किन्नियामकेन लक्षणान्तरेण तदन्वेषणे च तस्यापि तथेत्यनवस्थापातात्, न हि वयं वैभाषिकसौत्रान्तिकादिवदैकसामग्रीप्रसूतत्वं स्वाकारसमर्प्पणक्षणहेतुत्वमन्यद्वा किञ्चिदनियतं ग्राह्यलक्षणं ब्रूमहे येना-

Digitized by Google

तिप्रसङ्गः स्यात् किन्तु सामग्रीनियतिबलात् सदसद्वा केनचित् किञ्चि- द्देव ग्राह्यम् एवमनभ्युपगमे किञ्चित् प्रति कस्यचिद्देव तदन्यस्य कार्य्यत्वं कथं वक्ष्यसि कारणादन्यस्य कार्य्यत्वेऽतिप्रसङ्गं च कथमप- नेष्यसि तदिह वैनाशिकसमयमुत्तीर्य्य सत्कार्य्यवादे स्थातुमिच्छसीति।

एवञ्च दूष्यशाख्यादेस्तादात्म्यं दूषणादिभिः ।
कल्पनीयमन्यथेति स्यात् स्वव्याघातादि रक्षतः ॥

नन्वव्यवस्थितस्वभावं न किञ्चिदपि तत्त्वं भवति अन्यथा- ऽतिप्रसङ्गात् । न च व्यवस्थितस्वभावं किञ्चिद्ग्राह्यम् एकमेव हि भिन्न- लिङ्गं व्यपदिश्यते नक्षत्रं तारका तिष्य इति एका योषिति दारा इति बहुवचनम् । एकमेव हि परिमाणमणुमहद्दीर्घह्रस्वात्मना विकल्प्यते अन्यदप्येवंप्रायम् अतो न बाह्ये क्वचिदपि तत्त्वव्यवस्थेत्य- त्राह ।व्याघात इति । उक्तेषु लिङ्गवचनाव्यवस्थितिस्तावन्न वस्तुव्य- वस्थामन्यथयति तत्तच्छब्दस्वभावप्रतिनियतत्वाद् व्यपदेशभेदस्य, न हि मनुष्यादौ दृष्टं नपुंसकत्वादि नक्षत्रादौ निर्दिश्यते न चैकां स्त्रियं दारा इति बह्वीमभिमन्यन्ते, परिमाणे व्यपदेशभेदस्तु प्रति- योग्युपाधिकस्तत्तदपेक्षया च तत्तद्रूपत्वं तस्य तात्त्विकमेव तथाऽन्य- दपि, एवमनभ्युपगमे त्वन्मतमपि निर्मूलं स्यात् बुद्धिरपि हि न सर्वं प्रति बुद्धिः सर्वस्याप्ययत्नतः सर्वज्ञत्वप्रसङ्गात्, सा च न सर्वं प्रति कार्यं कारणं वा अनभ्युपगमात् अनुपपत्तेश्च । न च सर्वत्र सदा सती विभुत्वनित्यत्वापातात्, न च सर्वं प्रतीष्टाऽनिष्टा वा वेद- नासाधारण्यप्रसङ्गात् रागद्वेषानुत्थानप्रसङ्गाच्च ।नापि नीलैकाकारा बुद्धिः पीतादिभिराकारैर्णी सर्वाद्वैतप्रसङ्गादिति भावः । अथ स्यान्नी- लमुत्पलं दीर्घः पट इत्यादिषु एकमनेकस्वभावं बाह्यार्थवादिभि- रङ्गीक्रियते तच्चायुक्तं नीलपीतादेरिवानेकस्य एकस्वभावत्वायोगादे-

Digitized by Google

कस्यानेकस्वभावत्वायोगाच्च अतो निःस्वभावमेव सर्वं बाह्यमिति तत्राह । एकमिति । न खल्वेकमेवानेकमिति वयं पश्यामः प्रतिजानीमहे वा येन विरोधः स्यात् किन्त्वेकमनेकसंबन्धीति न चैवं विरोधगन्धः तथापि विशेषमात्ररूपस्यैकस्य संवेदनस्य स्वेतरसर्वप्रतिसंबन्धितयाऽपि विरोधप्रसङ्गात् नीलोत्पलसंविदि च जातिगुणग्राहिण्यामाकारभेदस्यापरिहार्य्यत्वात् नीलपीतग्राहिण्यान्तु किं पुनः ।

किञ्च सर्वज्ञसंवित्तौ सर्वाकारानुबन्धतः ।
सर्वस्वभावता वा स्यान्निःस्वभावत्वमेव वा ॥

ननु च बाधितोऽपि द्वितीयचन्द्रादिः पुनरपि प्रकाशमानो दृश्यते न चात्र बाह्यं किञ्चिदप्यधिष्ठानं कारणं वा पश्यामः अतो ज्ञानस्यैवाधिष्ठानत्वं समनन्तरप्रत्ययस्य च कारणत्वं कल्पयितुं युक्तमित्यत्राह । बाधित इति । अयं भावः अन्वयव्यतिरेकावधारितं प्रथमभ्रमाधिष्ठानमेव बाधितानुवृत्तिभ्रमेऽप्यधिष्ठानं तत्कारणमेव चानुवृत्तं कारणमतो बहिरप्यधिष्ठानकारणयोस्सम्भवान्नान्तरत्वं कल्प्यमिति ।

इति स्वात्माकारख्यातिभङ्गः ।

अथानुमानतोऽपि बाह्यापलापमनूद्य दूषयति । धीत्वादिति ।

मू० धीत्वात्स्वान्यार्थशून्या विमतमतिरिति स्वोक्तिबुद्ध्यादि भग्नं ज्ञानज्ञानेऽतिचारः क्षणिकविविधधीसन्ततेः संमतत्वात् । दृष्टान्तस्साध्यशून्यो न च निरुपधिकासत्प्रतीतं क्वचिन्नस्तावन्मिथ्यात्वक्लृप्तौ न तु फलति तवाशेषबाह्यार्थभङ्गः ॥ २४ ॥

Digitized by Google

टी० ॥ एवं ह्याहुः यः प्रत्ययस्स निरालम्बनः यथा स्वप्नादिप्रत्ययः तथा च विमतिपदमिति तदेतदन्वयवादिषुः ।

स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्तथा हि यः ।
प्रत्ययस्स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा ॥

इति, तत्र स्वोक्तिबाधस्तावत् अयं प्रयोगो यदि न कञ्चित् प्रत्ययं साधयितुं प्रवृत्तस्तदा नैरर्थक्याद् भग्नः । अथ साधयितुं तदा सोऽपि प्रत्ययः पक्षीकृतो न वा, आद्ये स्ववाक्यजन्यबुद्धेः स्वेतरालम्बनाभावसाधनाद् बुद्ध्यन्तरस्य निरालम्बनत्वं न सिद्ध्येत्, अतस्तदर्थं वाक्यमतदर्थं भवतीति व्याघातः, बहिष्कारेऽपि सालम्बनत्वनिरालम्बनत्वविकल्पेन व्याप्तिभङ्गव्याघातौ स्यातां, स्वबुद्धिविरोधस्तु यद्यसौ बुद्धिः पक्षीकृतबुद्ध्यन्तराकारतया निरालम्बनत्वमवलम्बेत तर्हि सिद्धं बुद्धेः स्वेतरालम्बनत्वम् । अथ स्वाकारतयैव तथाऽपि बुद्ध्यन्तराणां निरालम्बनत्वासिद्धिः न च बुद्ध्यन्तराकारो बुद्ध्यन्तरस्य निरालम्बनत्वं सर्वबुद्धीनां सर्वाकारत्वप्रसङ्गेन व्याघातापसिद्धान्तमतान्तरोत्थानप्रसङ्गः । आदिशब्देन प्रवृत्तिसंग्रहः बुद्धिसिद्धान्तिनामपि प्रवृत्तिर्न निष्प्रयोजना अप्रवृत्तेरेव प्रसङ्गात् सप्रयोजनत्वे तु साधकबुद्ध्यारूढं तत्प्रयोजनं तदात्मकं ततोऽन्यद्वा आद्ये वर्तमानत्वभविष्यत्त्वविरोधः, द्वितीये तु बुद्धेः स्वेतरालम्बनत्वमपरिहार्य्यम् । अनैकान्तिकत्वमाह । ज्ञानेति । अयं भावः यदि ज्ञानान्तरगोचरं किमपि ज्ञानं न स्यात् क्षणिकबुद्धिसन्तानभेदाभ्युपगमो भज्येत अतस्संविदन्तरयोर्ह्यपि ज्ञाने स्वेतरालम्बनत्वं स्वीकृतं तस्य पक्षीकारे स्वमतविरोधः, अपक्षीकारे तु तत्रातिचार इति, विविधशब्देन आलयविज्ञानप्रवृत्तिविज्ञानचित्तचैत्तादिकल्पनाभेदसंग्रहः । स्वप्नादिदृष्टान्तस्य साध्यविकलत्वेन व्याप्त्यसिद्धिमाह । दृष्टान्त इति । इद-

Digitized by Google

मत्राकूतं न हि वयं स्वप्नादिधियां स्वविषयतादात्म्यमभ्युपगच्छामः । नापि बाह्यालम्बनशून्यत्वं तत्र वाऽन्यत्र वा सत एव स्वप्नादावपि भानात्, तिष्ठतु वा स्वप्नार्थसृष्टिपक्षः पक्षान्तरेऽपि ह्याहुः ।

जन्मन्येकत्र भिन्ने वा तथा कालान्तरेऽपि वा ।
तद्देशे वाऽन्यदेशे वा स्वप्नज्ञानस्य गोचरः ॥ इति

न च जागरज्ञानेषु तद्वदन्यथाख्यातिरूपत्वमपि साधयितुं शक्यं बाधाद्यभावात् तत्र च सूत्रं वैधर्म्याच्च न स्वप्नादिवदिति । नन्वसद्विषयत्वे साध्ये स्यादेव दृष्टान्तसिद्धिः अन्यथाख्यातिवादिभिरपि भ्रान्तेरंशतस्तथात्वस्वीकारादित्यत्राह । न चेति । निरुपाधिकासद्विषयत्वसाधने दृष्टान्तासिद्धिरेव भ्रमविषयसंसर्गतादात्म्ययोरपि सामान्यतः क्वचित्सिद्धत्वात् तदसिद्धौ च तद्भ्रमायोगात् निषिद्ध्यमानौ च तादात्म्यसंसर्गौ तत्तत्सत्यवस्त्ववच्छिन्नावेव निषेधविषयाविति भावः । सोपाधिकासद्विषयत्वसाधनन्तु निश्शेषबाह्यार्थनिह्नवायोगाद् बाधकासिद्धेश्च न युक्तम् । असद्विषयत्वमात्रन्तु सर्वेषां देशान्तरादावसत्त्वात् सिद्धमेवेत्यभिप्रायेणाह । तावदिति ।

इति निरालम्बनानुमानभङ्गः ॥ २४ ॥

निरुपाधिकासत्प्रतीत्यभावं हेतुदर्शनाभावतः प्रपञ्चयति । प्रत्यक्षमिति ॥

मू० प्रत्यक्षं संप्रयुक्ते स्मृतिरपि विदिते व्याप्तिसिद्धेऽनुमा स्याच्छाब्दी धीरन्वितादौ भवति तदनुगा भ्रान्तिधीः क्वाप्यसिद्धेः । व्योमाम्भोजादिशब्दोऽप्यनियतमतिकृत् स्यात्

Digitized by Google

पदार्थं त्यजेच्चेन्नो चेत्स्यादन्यथा धीर्ध्रुवमिह यदि वाऽनन्वितत्वाप्रतीतिः ॥ २५ ॥

टी० ॥ कार्य्यमपरोक्षज्ञानमन्वयव्यतिरेकावसितेन्द्रियसंप्रयोगविशेषिते विषये भवति यत्पुनराहुः स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनादिति तत्राह । स्मृतिरपीति । अनुभवविषयीकृते ह्यर्थे संस्कारप्रत्यासत्त्या स्मृतिर्भवति स्मृतिकालेऽतीतोऽनागतो वेति न स्वकालेऽप्यर्थो न स्यात्, न च न बाह्यः, तथैव हि स्मृतिरपि समुचितमर्थमवलम्बते न विरुद्धाकारान्तरस्थं स्वाकारं शून्याकारं वा स्वानुभवविरोधात् कालान्तरवर्तिवि षयत्वाद सन्निहिताबाह्यविषयत्वं युक्तमिति चेन्न अनुमेयातीतानागतसंविदामस्वात्मतायां ग्राह्यत्वस्य वा ऽभावप्रसङ्गात् तत्र च पूर्वस्मिन् सन्ततिकल्पना लुप्येत उत्तरत्र संविन्नित्यत्वप्रसङ्गः स्मृतेस्त्रिकालवर्त्याकारत्वात् अतः स्मृतेः कालान्तरवर्तिबाह्यविषयत्वं न विरुद्धम् । ननु सुगतमतवर्तिनामनुमानं न वस्तुतः प्रमाणम् अदूरविप्रकर्षमात्रेण तु प्रमाणत्वपरिगणना निपुणनिरूपणे कल्पितसामान्याकारावलम्बनत्वादिदमप्रमाणमेवेति कथं तन्निदर्शनेन स्मृतिरसद्विषया न स्यादित्यत्राह । व्याप्तीति । प्रत्यक्षादिसिद्धस्य लिङ्गस्य तथाविधाद्व्याप्तिबलात् सामान्यतः पक्षधर्मतया च विशेषतस्सिद्धेन व्यापकेनानुमितिर्विषयिणी, न चात्र कारणदोषो बाधकप्रत्ययो वेति प्रमितिरेवासौ तद्विषयश्च सन्नेव स्वकालेषु, अन्यथा सर्वसंविदां स्वमात्रप्रकाशरूपत्वे सन्तत्यन्तरस्य संविदन्तरस्य चानुमानाभावात् परस्परानभिज्ञतया सर्वाविद्भिस्सर्वैक्यं वा स्यात्, न ह्येका संवित् अहमस्मीति संविदन्तराय स्वात्मानं साधयति अनुमानप्रामाण्यतिरस्कारे च तद्विशेषतयाऽभिमतः स्वागमोऽपि तिर-

स्क्रियते माभूद्वस्तुतश्शब्दोऽपि प्रमाणं पदपदार्थयोरेव हि संबन्धो मृग्यः तद्द्वारा भवँस्तु वाक्यार्थसंबन्धो दूरनिरस्तः । अतो वाक्यवाक्यार्थप्रत्ययो स्वमात्रप्रकाशात्मानो कल्पितं किञ्चिदलीकं स्वाकारेणोपरञ्जयतः तेन वाक्यवाक्यार्थौ प्रमाणप्रमेयभावेनाभिमन्येते इति तथाह शाब्दीति । आदिशब्देन मतभेदादन्वयग्रहणम् । अयं भावः पदानि तावत्प्रत्यक्षसिद्धसद्भावानि विभक्त्यन्ततया व्याकृतानि नापह्नवमर्हन्ति पदार्थश्च संबन्धश्च तेषांमिथः संयोगाद्यसंभवेऽपि वाच्यवाचकभावरूपः सांव्यवहारिकः तदनभ्युपगमे कथानां दोषमात्रशेषत्वप्रसक्तेः ततश्च लौकिकेष्वलौकिकेष्वपि वाक्येष्वाकाङ्क्षादिपरिष्कृतेषु संसृष्टार्थविषया संसर्गविषया वा बुद्धिर्जायत एव, सा च बाधाद्यभावस्वार्थनियतेति स्वरूपत इव हेतुतो विषयतोऽपि नालीकभावमनुभवतीति तथाऽपि बाधितांशप्रतीतेरिन्द्रियादिकमसद्ग्रहणे हेतुः स्यादित्यत्राह । तदनुगेति । प्रत्यक्षादिविषयानुगेत्यर्थः, भ्रान्तावपि ह्यसंसृष्टानां संसृष्टतया बोधने संसर्गतादात्म्ययोरन्यत्र सामान्यतस्सिद्धयोः स्वाभावाधिकरणनिष्ठतयाऽऽप्यारोपेऽन्यथाख्यातिमात्रपरिशेषादलीकतुच्छाविद्यमानशब्दानामप्यन्यत्र विद्यमानमेव विषयः नित्याविद्यमानं निरुपाधिकावदित्यादिशब्दैरपि क्वचिदधिकरणे कस्यचित्स्वदेशादिसिद्धसत्ताकस्यासत्त्वं विवक्षितम् । नन्वङ्गुल्यग्रे हस्तियूथशतमित्यत्र संसर्गस्सत्योऽसत्यो वा आद्ये सर्वमुपपद्येत, द्वितीये त्वसद्ग्रहणं तद्धेतुश्च सिद्ध्यत इति मैवम् अयोग्यपदसमभिव्याहाराणामपि क्वचित्सिद्ध एवार्थस्तदभावाधिकरणे प्रतिभास्यते ।

इह त्वारोप्यसंसर्गिसंसर्गासत्त्ववर्णनम् ।
नासद्ग्रहणक्लृप्त्यै स्यात् प्रमाविषयसाम्यतः ॥

अदुष्टबुद्धौ तत्रैव संसर्गस्सन् विशेषकः ।
अन्यत्र सिद्धः प्रवासो दुष्टायां दोषवैभवात् ॥

अथ स्यात् खपुष्पवन्ध्यासुतादिशब्दास्तावन्न बुद्धिं जनयन्ति एष वन्ध्यासुतो यातीत्यादि त्वदिष्टोदाहृतिविरोधात् जनयन्तश्च न निर्विषयां तदनभ्युपगमात् सविषयामपि न प्रत्येकांशविषयां विशिष्टप्रतिभासविरोधात् बाधानुपपत्तेश्च अतोऽसदेव किञ्चिद्विशिष्टमन्यत्खपुष्पादिशब्दैरवभास्यत इति तत्राह । व्योमाम्भोजेति । न ह्यत्र संसर्गिद्वितयमनुपस्थाप्य तदुपहितविशिष्टभ्रमः अतिप्रसङ्गात्, न च खपुष्पवन्ध्यासुतशब्दयोर्बोध्यमसद्विशिष्टं शशशृङ्गादिभिर्वन्ध्यासुतविशेषणविरोधात् । द्वितीयं दूषयति । नो चेदिति । अवयवार्थानुरोधे ह्यन्यथा धीरेव सिद्ध्येत् अनन्वितेऽन्वयधीमात्रजननात् कथमत्रानन्वयग्रहेऽप्यन्वितभ्रम इति दोषमेव पृच्छ, किन्न पश्यसि चन्द्रैकत्वं बुद्ध्यमानोऽप्यङ्गुल्यवष्टम्भाच्चन्द्रे द्वित्वं निर्मुखमपि मुकुरमवधारयँस्तत्र मुखमिति । अख्यातिपक्षेण त्वाह । यदि वेति । अनन्वितत्वं न गृह्यते अनन्वितत्वाग्रहणविशिष्टसामग्रीविशेषात् तत्र विशिष्टव्यवहार इति भावः ।

इत्यसद्बाह्यख्यातिहेतुदर्शनादिभङ्गः ॥ २५ ॥

बुद्धेः स्वेतरालम्बननिषेधे दोषान्तरं विवक्षुर्दूष्यमनुभाषते । नेष्ट इति ॥

मू० नेष्टः स्वान्यग्रहश्चेत् क्वचिदपि न हि
धीर्धर्मिणी वः कृतान्ते बुद्ध्यात्मा वा स
नातो न च किमपि तयाऽपेक्षणीयं बहिःष्ठम् ।
धीसन्ताने त्वनादौ भवति च निखिला
वासनैकः क्षयास्तन्निश्शेषध्वंसिनी सा युग-
पदखिलमप्युद्वमेत् कल्पनौघम् ॥ २६ ॥

Digitized by Google

बाध्यते, स्वलिड्ढीकतरत्यत्र तु ढलोपस्य जश्त्वापेक्षया बहिरङ्गत्वात्पर-त्वाच्च द्विविधमसिद्धत्वमिति न तद्बाध्यते, ततो जश्त्वे कृते न श्रुतिकृ-तमानन्तर्यं नापि शास्त्रकृतं, जस्त्वस्यासिद्धत्वाभावादिति ढलोपस्याय-मविषय इति ॥

"रो रि" ॥ किमिदं सानुबन्धकस्य रोर्ग्रहणमाहोस्विद्रेफस्य, कुतः संशयः, तुल्याच संहिता, रोः रि, रः रीति, किं चातो यदि सानु-बन्धकस्य ग्रहणं सिद्धमिन्दूरथः, अग्नीरथः, इदं तु न सिध्यति नीरक्तं, दूरक्तमिति, अथ रेफस्य ग्रहणं सिद्धं नीरक्तं दूरक्तमिति, इदं तु न सिध्यति अग्नीरथः इन्दूरथ इति, निरनुबन्धकग्रहणे न सानुबन्धकस्येति। नैष दोषः। वर्णग्रहणेषु नैषा परिभाषा प्रवर्त्तते। 'पदस्येत्यत्र विशेषणे षष्ठीति'। एतच्च पदस्य पदादित्यत्रैव व्याख्यातं, तेन किं सिद्धं भवती-त्याह। 'तेनेति'। स्थानषष्ठ्यां तु रेफेण पदस्य विशेषणाद्रेफान्तस्य पदस्य लोपेन भवितव्यम्। 'अजर्घा इति'। एकाचो बशो भषित्यत्रे-तद् व्युत्पादितम्। 'अपास्पा इति'। स्पर्द्ध संघर्षे, यङ्लुकि दीर्घो-कित इति दीर्घः, लङि सिपि शपो लुक्, सिपो हल्ङ्यादिलोपः, जश्त्वं दश्चेति रुत्वम्॥

"खरवसानयोर्विसर्जनीयः" ॥ यद्यत्रापि पदस्येतिविशेषणषष्ठी स्यात्तदा चकर्ष कर्कश इत्यादावपदान्तस्यापि रेफस्य विसर्जनीयः स्यात्, स्थानषष्ठ्यां तु रेफेण पदे विशेषिते रेफान्तस्य पदस्यालोन्त्यस्य विसर्जनी-यविधानान्न कश्चिद्दोष इति मन्यमान आह। 'रेफान्तस्य पदस्येति'। 'खरि परतोऽवसाने चेति'। परत इत्येतत्खरैव संबध्यते नावसानेनासंभवात्, येन वर्णेन विरम्यते स एवावसानं स्याद्विरतिर्वर्णस्यानुच्चारणं, तत्र पदा-न्तस्य रेफस्य येन वर्णेन विरम्यते स तावत्परो न संभवति, इतरत्पुनर-वसानमभावरूपं, न चाभावेन पौर्वापर्यं सम्भवति, तस्मात् खरवसानयो-रित्येकापि सप्तमी विषयभेदाद्भिद्यते, खरि परसप्तमी अवसाने विषय-सप्तमीति, अपर आह। वर्णेष्वप्युच्चारितप्रध्वंसिषु बुद्धिविरचितं पौर्वाप-र्यमस्ति तत्त्वभावेनापि संभवति, तस्मादुभयत्रापि परसप्तमीति, उदाह-

रयोषु खरि विसर्जनीयस्य सत्वं चवर्गे श्चुत्वं टवर्गे ष्टुत्वम्। 'नार्पत्य इति'। पस्तु तरफद्राख्यः। 'वृद्धेर्बहिरङ्गलक्षणत्वादिति'। बहिर्भूततन्निमित्तापेक्ष-त्वाद्वृद्धेर्बहिरङ्गत्वम्। 'तदाश्रयस्य रेफस्येति'। तदाश्रयत्वं तु तया सह विधानात्, उरण् रपर इत्येतद्धि गुणवृद्धिविधिभिरेकतामापद्य रपरत्वं विधत्ते, तेन वृद्धेर्यन्निमित्तं तदेव रेफस्यापि, ततस्तस्यापि बहिरङ्गत्वं. विसर्जनीयस्तु खमात्रमाश्रित्य भवन्नन्तरङ्गः। ननु बहिरङ्गपरिभाषा वाह ऊहित्यत्र ज्ञापितत्वात्सिद्धा, ततः किं, तस्यां कर्तव्यायां विसर्जनीयः पूर्व-त्रासिद्धमित्यसिद्धः, सा कथमन्तरङ्गमपश्यन्ती बहिरङ्गस्यासिद्धत्वमापादय-ति। नैष दोषः। कार्यकालं संज्ञापरिभाषं, ततश्च परिभाषान्तरवद्बहि-रङ्गपरिभाषाया अत्र प्रकरणे प्रवृत्तिरविरुद्धा॥

"रोः सुपि" ॥ 'पयःस्विति'। यत्र सकारद्वयं पठ्यते तत्र वा शरीति विसर्जनीयस्य वा सकारः। 'सर्पिःष्विति'। यत्र विसर्ज-नीयः पठ्यते तत्र नुम्विसर्जनीयशर्व्यवायेऽपीति प्रत्ययसकारस्य षत्वं, षकारद्वयपाठे तु पूर्ववद्विसर्जनीयस्य सत्वं, परस्य पूर्ववदेव षत्वं, पूर्वस्य ष्टुत्वम्। 'सप्तमीबहुवचनं गृह्यत इति'। न प्रत्याहारः, खरीत्यनुवृत्तेः, नहि सप्तमीबहुवचनादन्यः सुप् खरादिरस्ति, तेन पयोभ्यामित्यादौ विध्यर्थं न भवति किं तर्हि नियमार्थं, यदाह। 'सिद्धे सत्यारम्भो नियमार्थ इति'। 'रोरेव सुपीति'। विपरीतस्तु नियमो न भवति रोः सुप्येवेति, हलो ऽनन्तराः संयोग इत्यादिनिर्देशात्॥

"भोभगोअघोअपूर्वस्य योऽशि ॥ उदाहरणेषु भोतो मार्ग्यस्य, हलि सर्वेषामिति च यलोपः, अष्टुवग्रहणमनर्थकमन्यत्राभावात्, अतो न्यः सम्भवति, तत्र च पूर्वत्रासिद्धमिति यत्वस्यासिद्धत्वाद्विसर्जनीयेन भाव्यं, कृते विसर्जनीये स्थानिवद्भावाद्रुग्रहणेन ग्रहणात्स्यात्प्रसङ्ग इति चेत्, अलस्थानिकत्वात्। अत्र हि रोर्यो रेफस्तस्य विसर्जनीयस्य स्थानी न पुना रुरेव, किं च यत्वस्याप्यस्य रोर्यो रेफः स एव स्थानी न पुना-रुरेव, तस्मादल्विधित्वादपि नास्ति स्थानिवद्भावः, संहिताधिकाराच्चा-वसाने यत्वं न भविष्यति, तस्मादष्टुवग्रहणमनर्थकमित्यत आह। 'अष्टुव-

Digitized by Google

ग्रहणमुत्तरार्थमिति'। एतदेव व्यनक्ति। 'हलि सर्वेषामिति'। 'वृश्च-वयतेरप्रत्ययइति'। स पुनर्विच् न क्विप्, क्विपि हि एकदेशविकृतस्यानन्यत्वाद्वयतिग्रहणेन ग्रहणाद्वकारस्य संप्रसारणं स्यात्। लोपो व्योर्वलीति वलोपः, स्थानिवत्त्वं च सोऽत्र क्वौ लुप्तत्वान्न विद्यते, विचि तु विलोपस्य स्थानिवद्भावाद्वलोपो नास्ति, संप्रसारणस्य त्वप्रसङ्ग एव, हलि सर्वेषामित्यनेन तु लोपे कर्तव्ये पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवत्त्वनिषेधात् वलोपः स्यादितिविशेष्यते। अथ ककारे परतो लोपो व्योरिति वलोपः कस्मान्न भवति, विलोपस्य स्थानिवद्भावो नास्ति, पदान्तविधौ प्रतिषेधात्, वकारस्य पदान्तत्वात्। नैष दोषः। भावसाधनस्त्वत्र विधिशब्दस्ततश्च पदान्ते विधीयमाने स्थानिवत्त्वनिषेधः, न च लोपः पदान्तस्तस्याभावरूपत्वात्। 'अथेति'। यदि हलि सर्वेषामित्यत्राश्ग्रहणस्य प्रयोजनं तत्रैव वक्तव्यं हशीति, तर्हि हल्ग्रहणं कृत्वा ऽश्ग्रहणेन तद्विशेष्यतामिति प्रश्नस्यार्थः। एवकारो भिन्नक्रमस्तत्र हश्ग्रहणमेव कस्मान्न कृतमिति। 'उत्तरार्थमिति'। यदि तत्र हश्ग्रहणं क्रियेत, मोऽनुस्वार इत्यत्र पुनर्हल्ग्रहणं कर्तव्यम्। 'हल्मात्रे यथा स्यादिति'। सर्वथोभाभ्यां ग्रहणाभ्यां न मुच्यामहइति भावः। तथाप्यश्ग्रहणानुरोधे प्रयोजनं वक्तव्यं तदाह। 'व्योर्लघुप्रयत्नतर इति'॥

“व्योर्लघुप्रयत्नतरः शाकटायनस्य”॥ अतिशयेन लघुप्रयत्नो लघुप्रयत्नतरः। वर्णोच्चारणहेतुरात्मधर्मः प्रयत्नः, उदाहरणेष्वान्तर्यतो वकारस्य वकारो यकारस्य यकारः, किं पुनरिदं लघुप्रयत्नतरत्वमित्याह। 'लघुप्रयत्नतरत्वमिति'। स्थानं ताल्वादि, जिह्वाया अग्रोपाग्रमध्यमूलानि करणानि, प्रयत्नस्य लघुत्वे तानि शिथिलानि लघूनि भवन्ति॥

“लोपः शाकल्यस्य”॥ 'अवर्णपूर्वयोरिति'। ओकारपूर्वस्य तूत्तरसूत्रेण नित्यं लोपो विधास्यते। 'शाकल्यग्रहणं विकल्पार्थमिति'[1]। ननु लोपो ऽप्युच्यते लघुप्रयत्नतरोऽपि, तावुभौ वचनाद्विधास्यतस्तत्किं विकल्पार्थेन शाकल्यग्रहणेनात आह। 'तेनेति'॥

---

१ विभाषार्थमिति मु॰ मू॰ पा॰।

Digitized by Google

"ओतो गार्ग्यस्य" ॥ 'ओकारादुत्तरस्य यकारस्येति'। वकारस्त्वस्मिन्विषये न संभवति। 'नित्यार्थोयमारम्भ इति'। विकल्पस्य पूर्वेणैव सिद्धत्वात्, किमर्थं तर्हि गार्ग्यग्रहणमित्याह। 'गार्ग्यग्रहणं पूजार्थमिति'। व्योरिह प्रकरणे लघुप्रयत्नतरोपि विहितो लोपोपि तत्कस्यायं नित्यो लोपो बाधकः, आनन्तर्याल्लोपविकल्पस्येत्याह। 'योयमिति'। 'केचित्त्विति'। यदस्मिन्प्रकरणे व्योः कार्यं तत्समुदायोऽपेक्ष्यते, न त्वनन्तरो लोपविकल्प इति तेषामभिप्रायः ॥

"उञि च पदे"। 'भूतपूर्वेण ञकारेणेति। मूलोदाहरणेपि भूतपूर्वेणैव ञकारेणोञिति प्रतिपत्तिः, अनुबन्धस्य प्रयोगे ऽसमवायात्। 'उत्तरार्थमिति'। ङमो ह्रस्वादचि ङमुण्नित्यमित्येव विधिरञादौ पदे यथा स्यात् इह मा भूद्दण्डिनेति। नैतदस्ति प्रयोजनं, पदस्येति वर्तते, इह तर्हि परमदण्डिमा, अत्र हि सुबन्तस्य समास इति पदत्वमस्ति, नास्ति, उक्तं हि उत्तरपदत्वे चापदादिविधाविति, तदेतत्पदग्रहणं तिष्ठतु तावत्, अयमपि नित्यार्थो योगः ॥

"हलि सर्वेषाम्" ॥ 'यकारस्य पदान्तस्येति'। वकारस्तु भोभगोअघोपूर्वो न संभवति, अवर्णपूर्वस्तु सम्भवति वृक्षव् करोतीति, तस्य तु लोपो न भवति, अशि हलीति विशेषणादित्युक्तं, तस्माद्यकारस्येत्युक्तं, ननु वृक्षव् हसतीत्यादौ संभवति, न संभवति। अनभिधानात्, नह्येवंविधमभिधानमस्ति, तथा च लणीत्यत्र भाष्यकार आह न पदन्ता हलोपः सन्तीति, एवं च वृक्षव् करोतीत्ययमपि प्रयोगश्चिन्त्यः ॥

"मोनुस्वारः ॥ अत्र पदस्येति स्थानषष्ठी, मकारेण पदस्य विशेषणान्मकारान्तस्य पदस्यान्त्यस्यानुस्वारो विज्ञायते तदाह। 'मकारस्य पदान्तस्येति' ॥

"नश्चापदान्तस्य झलि" ॥ 'आक्रंस्यतइति'। क्रमेर्लृट्, आङुद्गमनइत्यात्मनेपदम् ॥

"मो राजि समः क्वौ" ॥ 'सम्राडिति'। सत्सूद्विषेत्यादिना क्विप्, व्रश्चादिना षत्वम्। 'साम्राज्यमिति'। क्विबन्ताद्गुणवचनादित्वात्ष्यञ्,

Digitized by Google

अधिकसद्भावेपि क्विबन्तो राजतिस्तावदस्तीत्यत्रापि भवति, क्विबन्ताव स्थायामेव वा प्रागेव व्यञ उत्पत्तेर्मत्वम्। 'संपदिति'। गमः क्वावित्यत्र गमादीनामितिवचनाल्लोपः, ह्रस्वस्य तुक्। 'किंराडिति'। किं क्षेप इति समासः॥

"हे मपरे वा"॥ 'ह्मलयतीति'। ह्मल चलने, णिच्, ज्वलह्वलह्मलनमामनुपसर्गाद्वेति पक्षे मित्संज्ञा, मितां ह्रस्व इति ह्रस्वत्वम्। 'यवलपरइति'। यवलाः परे यस्माद्धकारात्स तथोक्तः, यवलाश्चैते भवन्त आन्तरतम्यादनुनासिका भवन्ति, वावचनात्पक्षेनुस्वारोपि भवति। परग्रहणं शक्यमकर्तुं, सप्तम्यैव तदर्थलाभात्, मकारे परतो यो हकारस्तत्रेति, विपर्ययस्तु न भवत्यसंभवात्, नहि मकारात्परो हकारः क्वचित्संभवति॥

"ङ्णोः कुक्टुक् शरि"॥ उदाहरणेषु चयो द्वितीयाः शरि पौष्करसादेरिति पक्षे ककारस्य खकारष्टकारस्य ठकारः। 'पूर्वान्तकरणमित्यादि'। किं पुनः कारणं पदादौ कुत्वं न सिध्यतीत्यत आह। 'शश्क्षोटीति'। 'विरप्शिन्निति'। महर्षामेतत्, विपूर्वाद्रपेरौणादिकः कर्मणि शिनिप्रत्ययः, यद्वि वा विरपणं विरप्, सोस्यास्तीति विरप्शः, शब्दितः, संकीर्तित इत्यर्थः। 'षत्वप्रतिषेधार्थमिति'। परादौ तु सकारः पदादिर्न स्यात्। 'ष्टुत्वप्रतिषेधार्थमिति'। परादौ तु टकारः पदान्तो न स्यात्॥

"डः सि धुट्"॥ उभयनिर्देशे पञ्चमी निर्देशो बलीयानिति ड इति पञ्चम्या सीति सप्तम्याः षष्ठी प्रकल्प्यतइति मत्वाह। 'डकारान्तादिति'। सप्तमीनिर्देशस्तु लाघवार्थः, उदाहरणेषु धुटि कृते चर्त्वे तकारस्तस्य पूर्ववत्पक्षे थकारः, अथ किमर्थं धुट् परादिः क्रियते न धुगेव पूर्वान्तः क्रियेत, एवं हि शि तुगित्यत्र तुग्ग्रहणं न कर्तव्यं भवति, एष धुक् तत्रानुवर्तिष्यते ऽत आह। 'परादिकरणमिति'। प्रक्रियालाघवार्थं तुडिति वक्तव्ये धुड्ग्रहणमुत्तरार्थं नश्चेति धुडन्यथा स्यात्तुगभूत्, किं च स्याद्बुवान्त्साय इत्यत्र नक्षत्र्यप्रशानिति षत्वं प्रसज्येत। नैत-

दस्ति । अम्पर इति तत्रानुवर्त्तते, किं च तुटोऽसिद्धत्वादपि रोरप्रसङ्गः, तस्मात्तुडेव वक्तव्यः ॥

“नश्च” ॥ अत्रापि परादित्वात्कुर्वन् सीदतीत्यादौ पदान्तस्येति णत्वप्रतिषेधो भवति । ‘धुटश्चर्त्वस्या[1]सिद्धत्वादिति’ । धुटो यच्चर्त्वं तस्यासिद्धत्वादित्यर्थः, यद्यपि धुडप्यसिद्धस्तथापि न तदुच्यते, सिद्धेऽपि तस्मिन्विना चर्त्वेन हत्वस्याप्राप्तेः । नन्वस्तु चर्त्वमसिद्धं तथापि नैव हः प्राप्नोति, अनम्परत्वात्, सत्यं, यस्त्वसौ धुट उकारस्तेन भूतपूर्वेणाम्परत्वमभ्युपेत्यैतदुक्तम्, अन्ये तु ग्रन्थमिमं न पठन्ति ॥

“शि तुक्” ॥ शीत्येषा सप्तम्यकृतार्था पूर्वसूत्रे कृतार्थायाः पञ्चम्याः षष्ठीं प्रकल्पयतीति तदाह । ‘नकारस्येति’ । अथ किमर्थमपूर्वः पूर्वान्तस्तुक् क्रियते न प्रकृतः परादिर्धुडेव विधीयेत, तत्रापि चर्त्वेन सिध्यत्येवात आह । ‘पूर्वान्तकरणमिति’ । पूर्वान्तस्यापूर्वस्य तुकः करणमित्यर्थः । ‘नकारस्य पदान्तत्वादिति’ । तुका पदान्ततायाः विहतत्वात्, परादौ तु पदान्तस्येति प्रतिषेधादद्दोषः । ‘तच्चेत्यादि’ । तच्च तुको यच्चुत्वं तदाश्रयात्सिद्धं भवति ॥

“ङमो ह्रस्वादचि ङमुण्नित्यम्” ॥ ङमो ङमुडित्युभयत्रापि प्रत्याहारग्रहणं, उडिति प्रत्येकं ङकारादिभिः संबध्यते, संज्ञायां हि कृतमागमलिङ्गं संज्ञिनां भवति, ह्रस्वादित्येतन्ङमो विशेषणं, सोऽपि ङम् पदस्य विशेषणं, विशेषणेन च तदन्तविधिर्भवति, पदस्येति प्रकृतं यद्यपि षष्ठ्यन्तं तथापि ङम इत्यनेन संबन्धात्पञ्चम्यन्तं विपरिणम्यते, उभयनिर्देशे पञ्चमी निर्देशो बलीयानिति ङम इति पञ्चम्या अचीति सप्तम्याः षष्ठी प्रकल्प्यते, सप्तमीनिर्देशस्तु लाघवार्थः, उत्तरार्थश्च, तदेतत्सर्वम्मनसि कृत्वाह । ‘ह्रस्वात्पर इति’ । संख्यातानुदेशश्च वेदितव्यः, आगमानामागमिनां च समत्वात्, परमदण्डिनेत्यादौ सुबन्तयोः समासः, तत्र समासार्थायां विभक्तौ लुप्तायामपि प्रत्ययलक्षणेन दण्डिन्नित्यस्य

१ धुटश्चर्त्वस्य चेति मु॰ मू॰ पाठः पदमञ्जरीसंमतः ।

Digitized by Google

पदत्वमस्तीति ङमुट् प्राप्नोतीत्याशङ्क्याह । 'इहेति' । समासे य उत्तरो भागस्तस्य पदत्वे कर्तव्ये प्रत्ययलक्षणं न भवति, अपदादिविधौ पदादिविधिं वर्जयित्वा, सात्पदाद्योरित्यत्र पदादिविधौ प्रत्ययलक्षणं भवत्येवेत्यर्थः, एतद्वार्तिककारमतेनोक्तं, सूत्रकारमतेनाप्याह । 'अथ वेति' ॥

"मय उञो वो वा" ॥ इको यणचीत्यनेनैव सिद्धत्वाद्वार्थोनेनेत्याशङ्क्याह । 'प्रगृह्यत्वादिति' । प्रगृह्यत्वं च निपात एकाजनाङिति, एवमपि इको यणचीत्यस्यानन्तरं मय उञो वेति वक्तव्यम्, एवं हि वचनद्वयं न कर्तव्यं भवति तत्राह । 'तस्यासिद्धत्वादिति' । यदा त्वितिपर उञ् भवति मयश्च परस्तदा उञ इति प्रगृह्यसंज्ञाया विकल्पः, ऊँआदेशश्च, तत्र यदा प्रगृह्यसंज्ञा न भवति तदानेन वत्वञ्च प्राप्नोति यणादेशश्च, तत्रास्य वत्वस्यासिद्धत्वाद्यणादेशे सत्यनुस्वारोऽपि भवति । किंविति । प्रगृह्यसंज्ञापक्षे त्वनेन वा वत्वं किम्विति, किमुइति, ऊँआदेशस्यापि स्थानिवद्भावादनेन पक्षे वकारो भवति, स चान्तरतमत्वादनुनासिकस्तच्चतुर्थं रूपम्, ऊँआदेशस्यैव वत्वाभावपक्षे श्रवणं तत्पञ्चमं रूपम् ॥

"विसर्जनीयस्य सः" ॥ इह खरवसानयोर्द्वयोरपि रेफस्य विसर्जनीय उक्तस्तस्येह निमित्तविशेषानुपादानात्खरीवावसानेऽपि सत्वं प्राप्नोति वृक्षः प्लक्ष इति, संहितायामिति वर्तते, न चावसाने संहितास्ति, परस्याभाभावात्, मा भूत्परः पूर्वेण या संहिता तदाश्रयं सत्वं प्राप्नोति, इको यणचीत्यादौ तु कार्यिनिमित्तयोर्द्वयोरप्युपात्तत्वात्तयोरेव परस्परं संहिताश्रीयत इति दधि अत्रेति पूर्वपराभ्यामियचोः संहितायां सत्यामपि कार्यं न भवति, परस्परमसंहितत्वात् । स्यादेतत् । सामान्यविहितासंहितासंज्ञा विशेषविहितावसानसंज्ञा, कार्ययोरेकवर्णविषयत्वात्कार्यार्थत्वाच्च संज्ञानां संज्ञयोरप्येकविषयत्वाद्बाध्यबाधकभावः, यद्वा सन्निकर्षः संहितेतीयता सिद्धे परग्रहणमतिशयप्रतिपत्त्यर्थं, प्रकृष्टो यः सन्निकर्षः, कश्च प्रकृष्टो यः पूर्वपराभ्यामुभाभ्यामपि, तदभावादवसानस्य संहितासंज्ञाया अभावः, यद्येवमणोऽप्रगृह्यस्यानुनासिके दोषः,

Digitized by Google

तत्र हि चावसानइति वर्त्तते, संहिताधिकारश्चोत्तरार्थोवश्यमनुवर्त्यः तोर्लीति परसवर्णो ऽसंहितायां मा भूत् अग्निचित् लुनातीति, ततश्च संहितावसानोभयाश्रयो ऽनुनासिको दधिँइत्यादौ न स्यादिति संहितावसानसंज्ञयोः समावेश एषितव्यः, ततश्चावसानेपि सत्वप्रसंगो ऽत आह। 'खरीत्यनुवर्त्ततइति'। तदनुवृत्तिश्च मण्डूकप्लुतिन्यायेन संबन्धानुवृत्त्या वा वेदितव्या, अन्यथा हि पूर्वत्रापि खरि कार्यं विज्ञायेत, किं पुनरत्र प्रमाणं खरीत्यनुवर्त्तते इति, उत्तरत्रशर्परइति वचनं, स हि बहुव्रीहिः, तस्यान्यपदार्थापेक्षाया यो विसर्जनीयात्परः संभवति स एवान्यपदार्थः, स च खरेव, अवसानस्य शर्परत्वासंभवात्, यद्वा यदि खरवसानयोर्द्वयोरपि सत्वं स्यात् विसर्जनीयविधानमनर्थकं स्यात्, खरवसानयोस्स इत्येव वाच्यं स्यात्, एवं हि विसर्जनीयस्येति न वक्तव्यं भवति, अवश्यं शर्परे विसर्जनीय इत्यस्य स्थानिनिर्द्देशार्थं विसर्जनीयस्येति वक्तव्यं, न वक्तव्यं, पुरस्तादपकर्षणाच्चैतत्सिद्धम्, एवं वक्ष्यामि, रो रि, खरवसानयोः सः, रोः सुपि, शर्परे विसर्जनीय इति, शर्परइत्यत्र र इति वर्त्तते न तु रोरिति, तेन सुगीःत्सरुकः पुरुषःत्सरुकः इत्यादौ सर्वत्र भवति, अथ भोभगोअघोइत्यादिसूत्रं कुत्र करिष्यसि, शर्परे विसर्जनीय इत्यस्यानन्तरं, यद्येवं स्वरत्र स्वर्नयतीत्यादावपि यत्वप्रसङ्ग इति पुनारुग्रहणं कर्त्तव्यमेवं, तर्हि रोः सुपीत्यस्यानन्तरं भोभगोइत्यादि रुस्थानिकादेशविधानार्थं पठित्वा शर्परे विसर्जनीय इत्यादिकं पठिष्यते, एवमपि पुनारुग्रहणं कर्त्तव्यं रुणा विच्छिन्नत्वात्। एवमपि यथान्यासे सति त्रीणि ग्रहणानि, द्वे विसर्जनीयग्रहणे तृतीयं सग्रहणम्, अन्यथान्यासे तु द्वे सग्रहणे रुग्रहणं च, तदेवं लघीयसा न्यासेन सिद्धे विसर्जनीयविधानसामर्थ्याच्च सर्वत्र सत्वं भविष्यति, एवमपि कुत एतत् खरि भवति न पुनरवसानइति, ज्ञापकात्, यदयं शर्परेखरि विसर्जनीयं विधत्ते तज्ज्ञापयति खरि तावदस्ति सत्वमिति, विपर्यये हि पुरुषःत्सरुक इत्यादौ सत्वाभावादस्त्येव विसर्जनीय इति तद्विधानमनर्थकं स्यात्, नैतदस्ति ज्ञापकम्। अस्त्येतस्य वचने प्रयोजनं, किं वासः क्षौममद्भिः प्सातमित्यादौ जिह्वामूलीयोपध्मा-

नीयौ माभूतामिति, नैतदस्ति, यद्येतावत्प्रयोजनं स्यात् कुप्वोः ≍क≍पौ चाशरीत्येव ब्रूयात्, तदेवं विधानसामर्थ्यात्खर्येवायं विधिः अनेन, चैवाभिप्रायेण खरीत्यनुवर्त्तत इत्युक्तम् ॥

"शर्परे विसर्जनीयः" ॥ शर्परो यस्मादिति बहुव्रीहिः, परग्रहणे ऽक्रियमाणे शर एव केवलस्य निमित्तता विज्ञायेत, न खरीत्यनुवृत्तेर्वा शरीत्यभिधानाच्च, विपर्ययस्तर्हि विज्ञायेत, खर्परे शरीति, नि[1]त्यः स्फोटः पुरुषः त्सरुरिति तस्मात्परग्रहणम् । अथ किमर्थं विसर्जनीय इत्युच्यते न नेत्येवोच्येत, सत्वे हि प्रतिषिद्धे विसर्जनीयः स्वेनैव रूपेणावस्थास्यते ऽत आह । 'विसर्जनीयस्येति' । सत्यं, पुरुषःत्सरुरित्यादौ सत्वनिषेधेनापि सिद्धं, यत्र तु कुपू शर्परौ वासःक्षौममद्भिःप्सातमिति तस्य विसर्जनीयस्य यो विकारो जिह्वामूलीयादिः स एव स्यात् विसर्जनीयग्रहणे तु सति विसर्जनीय एव भवति, । 'जिह्वामूलीयोपध्मानीयावपि[2] न भवत इति' । न केवलं सकार एवेत्यपि शब्दार्थः ॥

"वा शरि" ॥ 'वृक्षाः स्थातार इति' । लोपाभावपक्षे विसर्जनीयः सत्वं वा ॥

"कुप्वोः ≍क≍पौ च" ॥ 'विसर्जनीयश्चेति' । अनेन चकारो विसर्जनीयानुकर्षणार्थ इति दर्शयति, अथ वाग्रहणमेवानुवर्त्य जिह्वामूलीयोपध्मानीयौ कस्मान्न विकल्प्येते, एवं हि चकारो न कर्त्तव्यो भवति, नैवं शक्यम्, एवं ह्याभ्यां मुक्ते विसर्जनीयस्य स इति सत्वमेव स्यात्, तस्माच्चकारेणैवानुकृष्य विसर्जनीयो विधातव्यः, वाग्रहणं च नानुवर्त्यं, तदनुवृत्तौ हि त्रिभिरपि मुक्ते पक्षे सत्वं प्रसज्येत, सूत्रे ककारपकारसहितयोर्जिह्वामूलीयोपध्मानीययोरुच्चारणात्तथाभूतावेव विसर्जनीयस्यादेशाविति शङ्कमानं प्रत्याह । 'कपावुच्चारणार्थाविति' । ताभ्यां विना तयोरुच्चारयितुमशक्यत्वादिति भावः । कीदृशौ

[1] शब्दः स्फोट इति पाठ० इ० पु० ।
[2] मु० मू० अपीति नास्ति ।

तर्ह्यादेशाविद्याह । 'जिह्वामूलीयेति' । इह विसर्जनीयस्य स्थाने आदेशत्रयं विधीयते, ततश्च शर्परयोरेव कुप्वोः प्राप्नोति, वासःक्षौमं अद्भिःप्सातमिति, अत्र हि शर्परे विसर्जनीय इति विसर्जनीयो ऽस्ति न च तस्य वैयर्थ्यं, यत्र कुपुभ्यामन्यः शर्परः खरस्ति पुरुषःत्सरुक इत्यादौ तत्र सावकाशत्वात् अशर्परयोस्तु कुप्वोर्न स्यात्, नहि तस्य विसर्जनीयोऽस्ति, विसर्जनीस्य स इति सत्वेन निर्वर्तितत्वात्, किं पुनः कारणं सत्वमेव तावद्भवति, तत्र कर्तव्ये तस्य विधेरसिद्धत्वात्, तस्मादत्र सकारः स्थानी निर्दृष्टव्यः, यो विसर्जनीयस्य स इति सस्तस्य स्थाने कुप्वोरादेशत्रयं भवतीति, एवं हि शर्परयोः कुप्वोः सकारापवादो विसर्जनीयो विधीयत इति सकाराभावादादेशाप्रसङ्गः, केवलयोस्त्वादेशप्रसङ्गस्तस्मात्सस्येति वक्तव्यम् । यदा च वार्त्तिककारः । सकारस्य कुप्वोर्विसर्जनीयजिह्वामूलीयोपध्मानीयाः, विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसङ्ग इति । अत्र परिहारमाह । 'विसर्जनीयस्य स इत्येतस्मिन्निति' । अयमभिप्रायः । विसर्जनीयस्य स इति सकारस्य स्थानी विसर्जनीय उपात्तः, स च द्विविधः संभवति शर्परलक्षणः खरवसानलक्षणश्च, तत्र शर्परलक्षणस्यासिद्धत्वादितरः सकारस्य स्थानी स एव चेहानुवर्तते, ततश्च नाप्राप्ते स[१]त्वे इदमारभ्यते, सर्वस्य विषयस्य तेन व्याप्तत्वात्, शर्परे विसर्जनीय इत्येतत्तु शर्परयोः कुप्वोः प्राप्तं केवलयोस्त्वप्राप्तमिति न तं प्रत्यस्य बाधकलक्षणयोग इति । स्यादेतत्, माभूदपवादत्वं परत्वात्तु शर्परयोरपि कुप्वोरयमेव विधिः प्राप्नोति तत्राह । 'पूर्वत्रासिद्ध इति' । परिहारान्तरमाह । 'के पित्स्विति' । कुप्वोरित्येको योगः, अत्र शर्परे विसर्जनीय इति वर्तते, शर्परयोः कुप्वोः विसर्जनीय एव भवति न ≍क≍पाविति, किञ्च पूर्वसूत्रे नेति वक्तव्ये विसर्जनीयविधानं तद्विकारनिवृत्त्यर्थमित्युक्तं, तेन शर्परयोः कुप्वोरस्यविधेरप्रसङ्ग एव ॥

"सो ऽपदादौ" ॥ अपदादाविति कुप्वोरेतद्विशेषणं, व्यत्ययेन त्वेकवचनं, पूर्वस्यायमपवादः । 'पाशकल्पककाम्येष्विति' । संभवप्रदर्शनमेतत्

१ सकारेऽइति इं॰ पु॰ पाठः ।

न परिगणनम्, अन्यस्यासंभवात् । 'प्रातःकल्पमिति' । अधिकरणशक्तिप्रधानस्यापि प्रातःशब्दस्य वृत्तिविषये शक्तिमद्वाचित्वादीषदसमाप्त्या योगः, यथा दोषाभूतमहर्दिवाभूता रात्रिरित्यत्राभूततद्भावयोगः । 'रोः काम्ये नियमार्थमिति' । एतदेव विवृणोति । 'रोरेवेति' । 'गीः काम्यतीति' । उत्तरसूत्रेण षत्वं न भवति, यदि पुनस्तत्रैवेदमुच्येत, नैवं शक्यं, षत्वमात्रप्रतिषेधेऽप्यनेन सत्वं प्राप्नोति । 'उपध्मानीयस्य चेति' । अस्यैव विवरणं 'कवर्गे परत इति' । 'उब्जिर[2]थमित्यादि' । यथा पुनरयं वकारोपध एविनव्यस्तथा हयवरडित्यत्रोक्तम् ॥

"इणः षः" ॥ पूर्वेण सत्वे प्राप्ते तदपवादः षत्वं विधीयते । अत्र केचिदाहुः । योयं सोपदादाविति सकारः स एवोत्तरत्र सर्वत्र कुप्वोः प्रकरणे विधीयते, अनेन तु तस्यैव सकारस्येण उत्तरस्य षत्वं विधीयते न विसर्जनीयस्य, अपदादाविति चात्र न संबध्यत इति, स तर्हि सकारः स्थानी निर्देष्टव्यः, नेत्याह । प्रकृतोनुवर्त्तते सोपदादाविति । तस्येण इति पञ्चम्या षष्ठी प्रकल्प्यते, एवमपि वक्ष्यमाणैर्योगैर्विहितस्य सकारस्य षत्वं न प्राप्नोति, अस्मिन् कर्त्तव्ये तेषामसिद्धत्वात् । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न योगे योगोऽसिद्धः किं तर्हि प्रकरणे प्रकरणमसिद्धमिति, यदयमुपसर्गादसमासेपीत्यत्र समासेपिग्रहणं करोति, कथं कृत्वा ज्ञापकम्, अन्तरेणाप्यसमासेपिग्रहणं विशेषानुपादानात्समासासमासयोर्णत्वं भविष्यति, न च समासे पूर्वपदात्संज्ञायामग इति नियमाण्णत्वस्य निवृत्तिः, नियमे कर्त्तव्ये उपसर्गादित्यस्य णत्वस्यासिद्धत्वात्, पश्यति त्वाचार्यः प्रकरणे प्रकरणमसिद्धमिति ततोऽसमासेपिग्रहणं करोति, तदा हि सह नियमेन सर्वमेव णत्वप्रकरणमेकमिति नियमे कर्त्तव्ये उपसर्गादिति णत्वस्य सिद्धत्वान्नियमेन व्यावृत्तिः स्यादिति कर्त्तव्यं समासेपिग्रहणं, तदेवं सकारस्य षत्वं विधीयते न विसर्जनीयस्य, उत्तरत्र च सत्वमेवानुवर्त्तते न षत्वमिति, एवमपि पक्षो निर्दोष एव, किं तु षष्ठीप्रकल्पनं ज्ञापकाश्रयणं चेति प्रतिपत्तिगौरवप्रसङ्गाद्वृत्तिकारेण नाश्रितः, कस्तर्हि तस्य

२ अर्थमिति मु० मू० नास्ति ।

षत्वः, उत्तरत्र द्वयमप्यनुवर्तते, सकारः षकारश्चेति, यद्येवं सर्वत्र द्वयमपि प्राप्नोति, अथ सकारो वानुवर्तते इदुदुपधस्य चेत्यादौ यत्रेणः परो विसर्जनीयस्तत्रापि सकार एव प्राप्नोति, अथ षकार एवानुवर्तते नमस्पुरसोर्गत्योरित्यादौ यत्रानिणः परो विसर्जनीयस्तत्रापि षकार एव प्राप्नोति, नैष दोषः, इणः ष इति समुदायस्य स्वरितत्वं प्रतिज्ञायते। यदाह। 'इणः ष इति वर्तत इति'। ततः षत्वं तावदनिण्विषये न भविष्यति, एवमपि षत्वविषये सत्वमपि प्राप्नोति, न, षकारेण तस्य बाधनाच्चकाराकरणाच्च, यदि परमनुवृत्तिसामर्थ्यात्सत्वप्रसंगः, तदपि न, उत्तरार्थमप्यनुवृत्तिसंभवात्, तदिदमुक्तम्। 'य इणः परो विसर्जनीयस्तस्य षकार आदेशो भवत्यन्यस्य तु सकार इति'। किमर्थं पुनरिदमारभ्यते यावता सत्वमेवात्र प्रकरणे विधीयतां, तस्य त्वादेशसकारत्वादिण्कोरिति षत्वं भविष्यति, न सिध्यति, अपदान्तस्येति तत्र वर्तते, पदान्तार्थोयमारम्भः॥

"नमस्पुरसोर्गत्योः"॥ अतः प्रभृत्यपदादाविति निवृत्तं, नमःशब्दस्य साक्षात्प्रभृतीनि चेति विभाषा गतिसंज्ञा, पुरःशब्दस्य तु पुरोऽव्ययमिति। 'पुरः पश्येति'। पृ पालनपूरणयोः, भ्राजभासेत्यादिना क्विप्, तदन्ता च्चस्, अस्य तदन्ततां दर्शयितुं पूः पुराविवत्यनयोरुपन्यासः॥

"इदुदुपधस्य चाप्रत्ययस्य"॥ इदुतावुपधे यस्य स इदुदुपधः समुदायस्तस्य यो विसर्जनीय इति वैयधिकरण्येन संबन्धः, अप्रत्ययस्येत्येतदपि व्यधिकरणमेव। 'निर्दुर्बहिराविश्चतुष्प्रादुरिति'। अन्येषां संभवतां प्रतिषेधस्य वक्ष्यमाणत्वान्नेदं परिगणनं किं तर्हि संभवप्रदर्शनम्। 'चतुष्कपालमिति'। तद्धितार्थे द्विगुः, संस्कृतं भक्षा इत्यणो द्विगोर्लुगनपत्य इति लुक्। 'चतुष्क[1]पटकमिति' बहुव्रीहिः। 'मातुःकरोतीत्यादि'। बोध्यम्। अत्र हि मातृ अस् इति स्थिते ऋत उदित्युकारो भवन् यो द्वयोः स्थान इति न्यायेन रपरो भवति, ततश्च रात्सस्येति प्रत्ययसकारस्य लोपे कृते रेफस्य विसर्जनीयः, सोयमप्रत्ययविसर्जनीयो भवति, परिहरति। 'कस्कादिष्विति'। 'एकादेशनिमित्तादिति'। कर्मधारयः,

१ चतुष्कन्दर्मिति मु॰ मू॰ पाठः।

एकादेशरूपनिमित्तादित्यर्थः, एकादेशशास्त्रं वा निमित्तं यस्योकारस्य तस्मादित्यर्थः । 'पुम्मुहुसोरिति' । अव्युत्पन्नावेताविति प्रतिषेध उच्यते, तत्र पुंसः प्रतिषेधेन नार्थः, षत्वं कस्मान्न भवति, विसर्जनीयाभावात्, उक्तं हि संपुंकानां सत्वमिति, तत्र सत्वस्यासिद्धत्वाभावाद्विसर्जनीयाभावः, तच्चावश्यं सत्वं वक्तव्यं इविधौ विसर्जनीयस्य षत्वप्रतिषेधेऽपि कुप्वोॅकॅपौ चेत्येव विधिः प्राप्नोति, मुहुः कामो यस्याः सा मुहुःकामा, तत्र कुप्वोॅकॅपौ चेत्येव एव विधिर्भवति, क्व चित्तु मुहुस्कामेति सत्वं पठ्यते सोऽपपाठः, नह्यत्र सत्वसंभवः, सूत्रवार्त्तिकयोरनिबद्धत्वात् । 'नैष्कुल्यमिति' । ब्राह्मणादित्वात्ष्यञ् । 'निःष्कुलं दुःष्कुलमिति' । गुरोरनृत इत्यादिना प्लुतः । 'बहिरङ्गलक्षणयोरिति' । बहिर्भूतनिमित्तापेक्षत्वाद्वृद्धिर्बहिरङ्गा प्लुतोपि दूराद्धूतादिकमर्थं वाक्यं चापेक्षत इति बहिरङ्गः ॥

"तिरसोन्यतरस्याम्" ॥ तिरोन्तर्द्धाविति तिरःशब्दस्य गतिसंज्ञा । 'तिरःकृत्वेति' । अत्रान्तर्द्धेरविवक्षितत्वादगतित्वम् ॥

"द्विस्त्रिश्चतुरिति कृत्वोर्थे" ॥ उभयत्र विभाषेयं, चतुरित्यस्याप्रत्ययविसर्जनीयत्वादिदुदुपधस्य चेति प्राप्ते इतयोरप्राप्ते, इसुसोः सामर्थ्यइत्यनेन त्वत्र सिद्धिर्न शङ्कनीया, इसः प्रत्ययस्य तत्र ग्रहणात् । 'कृत्वोर्थइति किमिति' । सुजन्ताः कृत्वोर्थं न व्यभिचरन्तीति प्रश्नः । चतुःशब्दस्य सुजन्तत्वे प्रमाणं नास्तीत्युत्तरं, यदि तु साहचर्यं व्यवस्थापकं तदा तदर्थमपि कृत्वोर्थग्रहणं न कर्त्तव्यं, क्रियते च तज्ज्ञापकार्थम्, एतज्ज्ञापयति न सर्वत्र साहचर्यं व्यवस्थापकमिति, किं सिद्धं भवति, दीधीवेवीटामित्यत्र धातुसाहचर्येणाप्यागमस्येटो ग्रहणं भवति, द्विस्त्रिश्चतुरिति किं, पञ्चकृत्वः करोतीत्यत्र सत्वं माभूत्, नैतदस्ति प्रयोजनमित्याह । 'इदुदुपधस्येत्यस्यानुवृत्तौ सत्यामित्यादि' । कृत्वोर्थो विषयो यस्य तत्तथोक्तं, कृत्वोर्थे यत्पदं वर्त्तते तस्य यो विसर्जनीय इत्येवं विशेष्यमाणे इत्यर्थः, यदि तु कृत्वोर्थग्रहणेन विसर्जनीयो विशेष्येत तदा चतुरो न स्यात्, एतच्च श्लोकेषु व्यक्तीकरिष्यति, एवं श्लोक-

Digitized by Google

वार्तिककारमतेन द्विस्त्रिश्चतुरिति ग्रहणं प्रत्याख्यातं तानेव श्लोकानुदाहरति । 'कृत्वसुजर्थ इति' । कस्माद्धेतोः कृत्वसुजर्थे षत्वं ब्रवीति, कृत्वोर्थग्रहणस्य किं प्रयोजनमित्यर्थः । अत्र च वक्ष्यमाणोऽभिप्रायः । प्रयोजनमाह । 'चतुष्कपाल इति' । चोदयिता स्वाभिप्रायं प्रकाशयति । 'ननु सिद्धमिति' । नन्वित्यभ्युपगमे, भवत्वनेन चतुष्कपालेपि विभाषा तथापि नित्यं षत्वं सिद्धं, कथम्, अनेन मुक्ते इदुदुपधस्य चेति षत्वं भविष्यति । परिहरति । 'सिद्धे ह्ययमिति' सिद्धे प्राप्त इत्यर्थः, कथं प्राप्तिरित्याह । 'लुप्ते इति' । चतुरस् इति स्थिते रात्सस्येति सुचो लोपः, रेफस्य विसर्जनीयस्सोयमप्रत्ययविसर्जनीयो भवति, यदि सुचो रुत्वं पूर्वस्य रो रीति लोपः, रोर्विसर्जनीयस्तदा प्रत्ययविसर्जनीयो भवति, किं तु ढ्रलोप इति दीर्घः प्राप्नोति, रुत्वस्यासिद्धत्वात् पूर्वमेव च लोपेन भवितव्यम्, एवं च कृत्वोर्थग्रहणं कर्तव्यमित्युक्तम्, इदानीं तदाश्रयणेन द्विस्त्रिश्चतुरिति ग्रहणं प्रत्याचष्टे । 'एवं सतीति' । किं कार्यमिति' । न किंचिदित्यर्थः । कथमित्याह । 'अन्यो हीति' । इतरोऽसति द्विरादिग्रहणे दोषं दर्शयति । 'अक्रियमाण इति । 'विसर्जनीयो विशेष्येतेति' । तस्य कार्यित्वेन प्राधान्यादिति भावः । संभावने लिङ्, विशेष्यतां विसर्जनीयः, को दोष इत्यत आह । 'चतुरिति' । 'तथेति' । अनन्तरोक्ते विशेषणप्रकारे चतुरो न सिध्यतीति । कस्मादित्याह । 'रेफस्येति' । क्रियमाणे तु द्विरादिग्रहणे नायं दोष इत्याह । 'तस्मिंस्त्विति' । इतरयोर्विशेषाभावाच्चतुरो विशेषणं युक्तमित्युक्तं, प्रत्याख्यानवाद्याह । 'प्रकृतं पदमिति' । यदुक्तं कार्यित्वेन प्रधानभूतो विसर्जनीय इति तत्र सोऽपि प्रकृतस्य पदस्य विशेषणं तेन च तदन्तविधिः, विसर्जनीयान्तस्य पदस्य षत्वमिति, स त्वलोऽन्त्यस्येति विसर्जनीयस्य भवतीत्येतावत् पदमेव तु कार्यि, तदिदमुक्तम् । 'तदन्तमिति' । 'तस्यापीति' । अपिशब्दोऽवधारणे, तस्यैवेत्यर्थः, एवं श्लोकवार्तिककारेण प्रत्याख्याते द्विरादिग्रहणे वृत्तिकारः स्थापयितुमाह । 'एवमिति' । 'पूर्वेणेति' । इदुदुपधस्य चेत्यनेन । 'नित्यं षत्वं स्यादिति' । अस्य तु द्विस्त्रिःशब्दावकाशो, न च परत्वादयमेव विधिः सिध्यतीत्याह । 'पूर्व-

Digitized by Google

चासिद्धुरिति’ । श्लोकवार्त्तिककारस्य त्वयमभिप्रायः । प्रकरणे प्रकरणमसिद्धं न योगे योगः, तेनास्यासिद्धत्वं न भवतीति, अथ वा इदुदुपधस्य कृत्वोर्थे-वृत्तेर्नाप्राप्ते नित्ये[1] षत्वस्यारम्भादपवादत्वमित्यपवादत्वादेव वचनप्रामाण्याद्विति वा सिद्धत्वमिति, अथ सुच इत्येव कस्मान्नोक्तं, किमनेन महता प्रबन्धेन एवमुच्यमाने सुचि विसर्जनीयो विशेष्येत, सुचो यो विसर्जनीय इति, ततश्च चतुरो न स्यात्, एवं तर्हि सुजन्तस्येति वक्तव्यं, सुजन्तस्य यो विसर्जनीय इति, एवमपि पदस्येत्यनुवृत्तेर्यत्र सुजन्तं पदं तत्रैव स्यात् द्विष्करोतीति, इह तु न स्यात्परमद्विष्करोतीति, यत्पदं तत्र सुजन्तं तस्मात्सुचोऽविहितत्वात्, यच्च सुजन्तं द्विरिति न तत्पदम् । उत्तरपदत्वे चापदादिविधाविति पदसंज्ञायाः प्रतिषेधात् ॥

“इसुसोः सामर्थ्ये” ॥ ‘तिष्ठत्वित्यादि’ । अत्र सर्पिरित्यस्य तिष्ठत्वित्यनेन संबन्धः, पिबत्वित्यस्य तूदकमित्यनेनेति परस्परसंबन्धाभावादसामर्थ्यम् । ‘सामर्थ्यमिह व्यपेक्षेति’ । अवधारणमत्र द्रष्टव्यं व्यपेक्षैवेति । प्रयोजनमुत्तरत्र वक्ष्यते । ‘न पुनरेकार्थीभाव इति’ । अत्राप्यवधारणं द्रष्ट[2]व्यमेकार्थीभाव एव गृह्यतइति यत्तच्च व्यपेक्षैवेत्यर्थः । ननु च सामर्थ्यशब्दः सामान्यशब्दः, न च सामान्यशब्दः प्रकरणादिकमन्तरेण विशेषेऽवतिष्ठते, तत्कथं व्यपेक्षैव सामर्थ्यं गृह्यते न पुनरेकार्थीभाव इत्युच्यते, उभयं तु कस्मान्न गृह्यतेऽत आह । ‘उभयं वेति’ । नेत्येव, उभयमपि गृह्यतइति यत्तदपि नैवेत्यर्थः । अयं भावः । पदविधित्वादेव समर्थपरिभाषोपस्थानात्सामर्थ्ये लब्धे पुनः सामर्थ्यग्रहणादिष्टस्य व्यपेक्षालक्षणस्यैव सामर्थ्यस्य परिग्रहः, नेतरस्य, नाप्युभयोरिति ॥

“नित्यं समासेऽनुत्तरपदस्थस्य” ॥ ‘परमसर्पिष्कुण्डिकेति’ । ननु च अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः, जनेरुसिः, अर्तिपृयजितनिधनिवपिभ्यो नित्येवं सर्पिर्यजुरित्यादय इसुसन्ता व्युत्पाद्यन्ते, तत-

१ नित्येइति नास्ति ई॰ पु॰ ।

२ द्रष्टव्यमित्यस्यानन्तरमुभयं वेति हि वक्ष्यति इति पाठ ई॰ पु॰ ।

Digitized by Google

इह प्रत्ययग्रहणपरिभाषया सर्पिरादीनामेवेसुसन्तत्वं न परमसर्पिरादीनां, तत्कथमत्र प्रसङ्गः, अवश्यं चोणादीनामपि व्युत्पत्तिपक्ष एवाश्रयणीयः, अव्युत्पत्तिपक्षे ह्याश्रीयमाणे सर्पिषा यजुषेत्यादौ षत्वं न सिद्ध्यति, अप्रत्ययसकारत्वात्, तस्मादनर्थकमनुत्तरपदग्रहणमत आह । 'एतदेवेत्यादि'। ज्ञापनस्य प्रयोजनमाह। 'तेनेति'। अथ पूर्वसूत्रेण समासेऽपि विकल्पः कस्मान्न भवतीत्यत आह । 'व्यपेक्षा चेति'। के चित्तु नित्यं समासइत्येको योगः । अनुत्तरपदस्थस्येति द्वितीय इति योगविभागेन समासे सर्वो षत्वप्राप्तिरुत्तरपदस्थस्य प्रतिषिध्यतइति वदन्तः पूर्वत्र द्विविधेऽपि सामर्थ्ये समाश्रिते न दोष इत्याहुः ॥

"अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य" ॥ कृकमीति धातुग्रहणम्, इतरेषां स्वरूपग्रहणम् । 'अयस्कार इति' । कर्मण्यण् । 'अयस्काम इति'। शीलिकामीत्यादिना णप्रत्ययः, अयस्कंसादयः षष्ठीसमासाः,कंसग्रहणमनर्थकम्, कमिग्रहणेनैव सिद्धत्वात्, कंसशब्दो हि वृतुवदिहनिकमिभ्यः स इति कमेरेव व्युत्पाद्यते, ज्ञापनार्थं तु, एतत् ज्ञापयति उणादिषु नावश्यं व्युत्पत्तिकार्यं भवतीति। 'अयस्कुम्भीति'। कुम्भशब्दाज्जातिलक्षणो ङीष्। 'अयस्पात्रीति'। पात्र शब्दः ष्ट्रन्प्रत्ययान्तः, षित्त्वान्ङीष्।'अयस्कुशेति'। नात्रायोविकारो विवक्षितस्तेन ज्ञानपदेति सूत्रेण ङीष् न भवति। 'अयस्कर्णीति'। अय इव कर्णौ यस्याः सा अयस्कर्णी, नासिकोदरेत्यादिना ङीष्।'शुनस्कर्ण इत्ययं त्विति'। सूत्रे त्वीकारान्तस्य कर्णीशब्दस्य निर्देशादत्राप्रसङ्गः । 'भाःकरणमिति' । षष्ठीसमासः । 'भास्कर इत्ययं त्विति' । दिवाविभेत्यादिना टप्रत्ययः, जयादित्यस्तु तस्मिन्सूत्रे ऽवोवद्भास्कारान्तेति प्रत्ययसंनियोगेन सत्वं निपात्यतइति । 'स्वःकारः, पुनःकामइति' । घञन्तेन मयूरव्यंसकादित्वात्समासः ॥

"अधःशिरसीपदे ॥ 'इत्येतयोरिति' सूत्रे तु षष्ठीस्थाने प्रथमा, पदइति स्वरूपस्य ग्रहणं न सुप्तिङन्तस्य, तस्य समासाधिकारादेव सिद्धत्वात् तदाह । 'पदशब्दे परतइति'। 'मयूरव्यंसकादित्वात्समास इति'। अधस्पदमित्यत्र तु षष्ठीसमासः ॥

ऐन्द्रवायवाग्रान् गृह्णीयादिति विहितम् । अनेन सर्वाग्रता विधीयते उत धाराग्रहाग्रता इति संशये पूर्वपक्षमाह । ऐन्द्रेति । अग्रतावचनात् सर्वादितः प्रतिकर्षः योगः ॥ ६२ ॥

अपि वा धर्मविशेषाद्धर्माणां स्वस्थाने प्रकरणादग्रत्वमुच्यते ॥ ६३ ॥

सिद्धान्तमाह । अपि वेति । तद्धर्मविशेषात् । ऐन्द्रवायवप्रभृतिष्वविशेषात् । अयं भावः । नात्राग्रता विधीयते किं तु ऐन्द्रवायवाग्रानित्यनेन मैत्रावरुणाश्विनप्रभृतीन् सर्वान् ग्रहाननूद्य ग्रहणमात्रं विधीयते । ऐन्द्रवायवप्रभृतीनित्यस्य सर्वसाधारणत्वाद् इति । इत्थं च प्रकरणात् प्रकरणपाठात् स्वस्थाने स्वस्थानस्थऐन्द्रवायवे स्थितमग्रत्वमुच्यते अनूद्यते । अनुवादफलं मत्कृतविहारवापीतः ज्ञेयं भवति ॥ ६३ ॥

धारासंयोगाच्च ॥ ६४ ॥

धारेति । अथवा धारया गृह्णातीति श्रवणाद्धाराग्रहः प्रकृतः । अतो ये धाराग्रहाः तदग्रतैव स्याच्च तु सर्वाग्रतेति भावः ॥ ६४ ॥

कामसंयोगे ऽपि ऐन्द्रवायवस्याद्यावप्रतिकर्षः । अधि॰ १८ ।

कामसंयोगे तु वचनादादितः प्रतिकर्षः स्यात् ॥ ६५ ॥

ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति । अत्र कामसंयोगे सति वचनादुक्तवचनात् सर्वादितः प्रतिकर्षः संयोगः स्यात् । पूर्वपक्षसूत्रम् । पूर्ववदर्थकरणे तस्य नित्यत्वेन ततो ऽन्यैलक्षण्यं स्यात् । कामसंयोगो व्यर्थ इति भावः ॥ ६५ ॥

तद्देशानां वा ऽग्रसंयोगात्तद्युक्ते कामशास्त्रं स्यान्नित्यसंयोगात् ॥ ६६ ॥

सिद्धान्तमाह । तद्देशानामिति । तद्देशानामित्यस्य सः पूर्वोक्तः उपांश्वन्तर्यामान्तरः देशो यस्येति व्युत्पत्त्या पूर्वाधिकरणसिद्धस्वस्वदेशसंबद्धानामेव ग्रहाणामग्रतासंबन्धात् पूर्वाधिकरणवदेव तद्युक्ते स्वदे-

Digitized by Google

प्रयुक्ते काम्यशास्त्रं फलसंबन्धबोधको विधिः स्यात् । यच्चोक्तं नित्यत्वेन काम्यशास्त्रं व्यर्थमिति तत्रोत्तरमाह । नित्येति । नित्ये एव फलसंबन्धा-दुपपन्नं संयोगपृथक्त्वन्यायेनेति भावः ॥ ६६ ॥

आश्विनादीनां ग्रहाणां प्रतिकर्षः । अधि० १९ ।

परेषु वा ऽग्रशब्दः पूर्ववत्स्यात्तदादिषु ॥ ६७ ॥

शुक्राग्रान् गृह्णीत गतश्रीः प्रतिष्ठाकाम इति श्रुतम् । अत्र पूर्व-पक्षमाह । परेष्विति । परेषु ऐन्द्रवायवान्यग्रहेषु श्रूयमाणः अग्रशब्दः पूर्व-वत् पूर्वाधिकरणसिद्धान्तवत्तदादिषु तत्प्रभृतिषु स्यात् ॥ ६७ ॥

प्रतिकर्षो वा नित्यार्थेनाग्रस्य तदसंयोगात् ॥ ६८ ॥

सिद्धान्तमाह । प्रतिकर्षो वेति । ऐन्द्रवायवाच्च चतुर्थस्थाने स्थित-स्य शुक्रग्रहस्यैन्द्रवायवात्प्राक् प्रतिकर्षः प्रतिष्ठाफलाय विधीयते । कुतः, नित्यार्थः पाठक्रमेण नित्यं प्राप्तप्रथमस्थानः ऐन्द्रवायवः तेन, संबद्ध-स्येति शेषः । अग्रस्य अग्रतायाः तदसंयोगात्फलासंबन्धात् । अयं भावः । शुक्राग्रता वाक्ये श्रुता सा फलेन संबद्धा । न हि पूर्ववत् पाठेन प्राप्तानैन्द्रवायवाग्राननूद्य ग्रहणं विधीयतइति वक्तुं शक्यं, पाठक्रमेणा-ग्रताया अप्राप्तेः । अतः अग्रतैव फलाय विधेया । तथा च स्वस्थानभ्रंशो ऽवश्यं सिध्यतीति ॥ ६८ ॥

प्रतिकर्षं च दर्शयति ॥ ६९ ॥

लिङ्गमप्याह । प्रतिकर्षमिति । एवं श्रूयते धारयेयुस्तं यं कामाय गृह्णीयुरैन्द्रवायवं गृहीत्वा सादयेत्तम् इति । अस्यार्थः । यदि प्रतिष्ठा-कामनया शुक्राग्रान् गृह्णीयाद् यं ग्रहं प्रथमं गृह्णाति तं भूमावनासाद-यन् धारयन्नेवैन्द्रवायवं गृहीत्वा पश्चादासादयेदिति । इदमैन्द्रवाय-वाव्यवहितप्राक्प्रतिकर्षे लिङ्गम् ॥ ६९ ॥

आश्विनादीनां ग्रहाणामैन्द्रवायवस्य पुरस्तात् प्रतिकर्षः । अधि० २० ।

पुरस्तादैन्द्रवायवादग्रस्य कृतदेशत्वात् ॥ ७० ॥

नन्वेवमपि शुक्राग्रानिति अवयात्कृवोचत्वं प्राप्तमिति पूर्वपक्षे सिद्धान्तमाह । पुरस्तादिति । ऐन्द्रवायवात्पुरस्ताद्ग्रहणं न त्वुपांश्वन्त

र्योमतः । प्रयस्य क्लृप्तदेशत्वात् । क्लृप्तदेशत्वात् । धारावहाधिकारात्त-वदत्तैव सिध्यति न त्वधारावहायतेति भावः ॥ ७० ॥

तुल्यधर्मत्वाच्च ॥ ७१ ॥

क्लृप्तदेशत्वादिति यदुक्तं तत्र देशस्य क्लृप्तत्वे हेतुमाह । तुल्य-धर्मत्वाच्चेति । धारावहत्वेन तुल्यः धर्मो येषां तत्त्वात् । किमपेक्षया ऽप-त्वमित्याकाङ्क्षायां प्रकृतमेवाकाङ्क्षापूरकं न त्वप्रकृतमिति भावः ॥ ७१ ॥

तथा च लिङ्गदर्शनम् ॥ ७२ ॥

तथा चेति । प्रतिकर्षं च दर्शयतीत्यत्र यल्लिङ्गं तदेवात्र ॥ ७२ ॥

सादनस्यापि प्रतिकर्षः । अधि० २१ ।

सादनं चापि शेषत्वात् ॥ ७३ ॥

पूर्वोक्तस्थले ग्रहणस्यापकर्षे ऽपि सादनस्य नापकर्षः अश्रुतत्वा-दिति पूर्वपक्षे सिद्धान्तमाह । सादनमिति । विप्रकृष्यते इति शेषः । सादनस्य ग्रहणाङ्गत्वात् । अङ्गिसमभिव्याहृतमङ्गमिति न्यायात् ॥ ७३ ॥

लिङ्गदर्शनाच्च ॥ ७४ ॥

लिङ्गेति । लिङ्गमैन्द्रवायवं गृहीत्वा सादयेदिति प्राग् दर्शित-मेव ॥ ७४ ॥

प्रदानस्याप्रतिकर्षः । अधि० २२ ।

प्रदानं चापि सादनवत् ॥ ७५ ॥

ननु पूर्वोक्तस्थले आसादनवद्यागो ऽप्यपकृष्यतइति पूर्वपक्षमाह । प्रदानमिति । गतम् ॥ ७५ ॥

न वा प्रधानत्वाच्छेषत्वात् सादनं तथा ॥ ७६ ॥

सिद्धान्तमाह । नेति । न सादनसमं प्रदानं तस्य प्रधान-त्वात् ॥ ७६ ॥

त्र्यनीकायामैन्द्रवायवाग्रतोक्तेः क्रमार्थविध्यर्थत्वम् । अधि० २३ ।

त्र्यनीकायां न्यायोक्तेष्वाम्नानं गुणार्थं स्यात् ॥ ७७ ॥

द्वादशाहे प्रथमचरमदशमाहानि त्यक्त्वा शेषेषु नवसु त्र्यनीकेति संज्ञा । तत्र क्रमेणाग्रतैव श्रूयते । ऐन्द्रवायवाग्रं प्रथममहरथ शुक्राग्रमथा-

Digitized by Google

प्रयणार्थमिति प्रथमत्रिकवदेव अन्तिमत्रिकद्वयायतताक्रमः । द्वितीये ऽहनि प्रकृतित एव ऐन्द्रवायवाग्रतामाप्तौ अत्र अवणमर्थवाद इति पूर्वपक्षमाह । त्र्यनीकेति । न्यायोक्तेषु चोदकशास्त्रप्राप्तेषु आम्नानं पुनः कथनं गुणार्थं स्तुत्यर्थं स्यात् ॥ ७७ ॥

अपि वा ऽहर्गणेष्वग्निवत्समानं विधानं स्यात् ॥ ७८ ॥

सिद्धान्तमाह । अपि वेति । अहर्गणेषु द्वादशाहे त्र्यनीकेषु विधानं समानम् । यथा प्रकृतौ तथैव । अग्निवत् । अथातो ऽग्निमग्निष्टोमेन यजेत तं द्विं रात्रेणेत्यत्राग्निष्टोमे ऽग्निविधानाच्चोदकेन प्राप्तावपि द्विरात्रे पुनरग्निविधानं तद्वत् । पुनर्विधानफलं मत्कृतविहारवाप्यां ज्ञेयम् ॥ ७८ ॥

व्यूढद्वादशाहस्य समूढविकारत्वम् । अधि० २४ ।

द्वादशाहस्य व्यूढसमूढत्वं पृष्ठवत्समानविधानं स्यात् ॥ ७९ ॥

द्विविधो द्वादशाहः व्यूढः समूढश्चेति । पूर्वाधिकरणउदाहृतो ऽसौ समूढः । व्यूढस्तु ऐन्द्रवायवाग्रौ प्रथमचरमौ शेषाणां दशानां मध्ये ऐन्द्रवायवाग्रं प्रथममहस्तथ शुक्राग्रमथाग्रयणाग्रे तृतीयचतुर्थे । अनेनैव क्रमेण पुनरहश्चतुष्कं संपाद्य चरमे द्वे ऐन्द्रवायवाग्रे । एवं द्वैविध्ये उभयोस्तुल्यता उत प्रकृतिविकृतिभाव इति संशये पूर्वपक्षमाह । द्वादशाहस्येति । द्वादशाहस्य तत्सम्बन्धिव्यूढत्वसमूढत्वे पृष्ठवत् । प्रकृतौ बृहद्रथन्तरयोर्यथा समानविधित्वं तथा समानं स्यात् न प्रकृतिविकृतिभावः । प्रमाणाभावादिति भावः ॥ ७९ ॥

व्यूढो वा लिङ्गदर्शनात्समूढविकारः स्यात् ॥ ८० ॥

सिद्धान्तमाह । व्यूढो वेति । समूढविकारः व्यूढः स्यात् । लिङ्गदर्शनात् । लिङ्गमित्थम् । ऐन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहस्तस्मिन्नाग्रयणो ग्राह्य इति व्यूढे श्रुतम् । समूढे त्र्यनीकिन्यां चतुर्थमहः ऐन्द्रवायवाग्रत्वादायतनं तस्मिन्नाग्रयणो गृह्यतइति प्रकृत्यनुवादेन वैकृतकथनं लिङ्गम् ॥ ८० ॥

Digitized by Google

कामसंयोगात् ॥ ८१ ॥

कामेति । यः कामयेत बहु स्यां प्रजायेयेति व्यूढे कामसंयोगात् । काम्यं नित्यस्य विकार इति प्रसिद्धम् ॥ ८१ ॥

तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ ८२ ॥

एतदधिकरणफलं दर्शयति । तस्येति । तस्य द्वादशाहस्य ऐककर्म्यात् । अविशेषेणैकरूपत्वात् । द्विरात्रादिषु उभयथा उभयधर्मप्रवृत्तिः पूर्वपक्षफलम् । सिद्धान्ते यत्र लिङ्गं तत्रैव व्यूढधर्मप्रवृत्तिः शेषेषु समूढधर्मप्रवृत्तिः ॥ ७२ ॥

संवत्सरसत्रे ऽनीकानां विवृद्धिः । अधि॰ ३५ ।

एकादशिनीवत् त्र्यनीकाप्रवृत्तिः स्यात् ॥ ८३ ॥

गवामयने संवत्सरसाध्यकृतौ द्वादशाहविकृतौ त्र्यनीका चोदकप्राप्ता । तदावृत्त्या संवत्सरः पूरणीयः । तत्रावृत्तिविचारे पूर्वपक्षमाह । एकादशिनीवदिति । एकादशिनी आग्नेयादिवारुणान्ताः पशवः । तेषां यथा दण्डकलितन्यायेनावृत्तिस्तद्वत् । एकां त्र्यनीकां समाप्य पुनस्त्र्यनीकान्तरं प्रारब्धव्यम् । एवं वत्सरपर्यन्तं प्रवृत्तिः स्यात् ॥ ८३ ॥

स्वस्थानविवृद्धिर्वा अह्नामप्रत्यक्षसंख्यत्वात् ॥ ८४ ॥

सिद्धान्तमाह । स्वस्थानेति । स्वस्थानविवृद्धिः । अयमभिप्रायः । त्र्यनीकाया नवाहानि तेषु नव आयताः क्रमेण विहिताः । वत्सरस्य नवधा ऽहानि विभज्यैकस्मिन् भागे एकैकायतासंपादने स्वस्य प्रथमाया ऐन्द्रवायवायतायाः यत्स्थानं प्रथमाहः तस्य वृद्धिः एवमुत्तरत्रेति । ननु आयता अह्नामङ्गं श्रूयते ऐन्द्रवायवायं प्रथममहरिति । इत्थं च यस्मिन् अहनि ऐन्द्रवायवायता तदुत्तराहनि शुक्रायतायां वाक्यं समञ्जसम् । तव पक्षे विरुध्येतेत्यत आह । अह्नामप्रत्यक्षसंख्यत्वादिति । अह्नामहर्विधीनामदर्शनात् । अयं भावः । उक्तवाक्ये अहरविवक्षितम् । यदि विवक्ष्यते तर्हि वाक्यं भिद्येत, ऐन्द्रवायवायता कार्या सा चाहःसंबन्धिनीति । तस्मादैन्द्रवायवाद्यायतामात्रं क्रतुमुद्दिश्य अर्थेत्यनेन क्रमो

Digitized by Google

बोध्यते । इत्थं चैन्द्रवायवोत्तरत्वं शुक्रादे न तूत्तरदिवसे । स क्रमो मन्मते ऽबाधित इति ॥ ८४ ॥

पृष्ठयावृत्तौ चाग्रयणस्य दर्शनात्त्रयस्त्रिंशे परिवृत्तौ पुनरैन्द्रवायवः स्यात् ॥ ८५ ॥

पूर्वपक्षे लिङ्गानुपपत्तिमपि दर्शयति । पृष्ठेति । सूत्रार्थपरिज्ञानाय गवामयनस्याह्नां प्रवृत्तिं दर्शयामि । गवामयने एकषष्ट्यधिकत्रिशतमहानि । तन्मध्ये अशीत्युत्तरशतमहानि पूर्वपक्षः । तावन्त्येवोत्तरपक्षः । तयोर्मध्ये मध्यवंशस्थानापन्नं विषुवन्नामैकमहः । प्रथमपक्षे प्रथममहः प्रायणीयम् १ । द्वितीयं चतुर्विंशनामकम् २ । इदं द्वयं प्रत्यक्षवचनेनैन्द्रवायवाग्रम् । एत-दुत्तरं त्र्यनीकाप्रवृत्तिः । तत्र चत्वारो ऽभिप्लवाः । प्रत्येकं षडहसाध्याः २४ । ततः पृष्ठ्य इति षडहः साध्यः ६ । एवं च त्रिंशद्दिवसाः । एवमेव द्वितीय-तृतीयचतुर्थपञ्चममासाः १५० । षष्ठे मासि त्रयो ऽभिप्लवाः षडहाः १८ । एकः पृष्ठ्यः षडहः ६ । अभिजिदित्येकाहः । त्रयः स्वरसामसंज्ञका एका-हाः ३ । एवं चाद्याभ्यां सह १८० । ततः विषुवन्नामकमहः १८१ । अथो-त्तरपक्षे प्रथमं त्रयः स्वरसामानः । ततो विश्वजिदेकाहः । पृष्ठ्यः षडहः । अयं त्रयस्त्रिंशपरिवृत्तः । अस्यार्थः । अन्यत्र पृष्ठ्ये त्रिवृत्पञ्चदशः सप्तदश एकविंशः त्रिणवस्त्रयस्त्रिंश इति क्रमः । अयं त्रयस्त्रिंशमारभ्य परि-वृत्तः विपरीतक्रम इत्यर्थः । त्रयो ऽभिप्लवाः प्रत्येकं षडहाः २८ । पुनः पृष्ठ्यः षडहः । चत्वारो ऽभिप्लवाः प्रत्येकं षडहाः । एवं त्रिंशद्दि-वसाः । एवं पुनः त्रिरावृत्तौ उत्तरपक्षाद्यारभ्य अहानि १४८ । ततः त्रयो ऽभिप्लवाः प्रत्येकं षडहाः १८ । ततः आयुर्गौरिति द्वे २ । ततः द्वादशाह-प्रायणीयोदयनीयमध्यवृत्तीनि दशाहानि । ततो महाव्रतातिरात्राविति द्वे । १८० । ३६१ । एवं स्थिते सूत्रार्थो वर्ण्यते । त्रयस्त्रिंशे परिवृत्तौ त्रयस्त्रिंशमारभ्य त्रिवृदन्तं विपरीतानुष्ठानके पृष्ठ्यावृत्तौ उत्तरपक्षे स्वरसामविश्वजिदनन्तरं प्राप्तपृष्ठ्यावृत्तौ आग्रयणस्य आग्रयणाग्रताया दर्शनाच्च श्रवणात् । श्रुतिश्च जगतीमग्रउपर्यन्ति जगतीं वै छन्दांसि प्रत्यवरोहन्त्याग्रयणाग्रा ग्रहा बृहत्पृष्ठानि त्रयस्त्रिंशं स्तोमा इति । पूर्वपक्षे

ग्रयताया यः क्रमः तद्विपरीतक्रमेणोत्तरपक्षे अनुष्ठीयमाने सति उक्तषडहे छन्दांसि जगतीं प्रथमं कृत्वा प्रवर्तन्ते । आग्रयणं प्रथमं कृत्वा ग्रहाः प्रवर्तन्त इति । एतेनास्मिन्पृष्ठे आग्रयणाग्रता श्रुता । दण्डाकलितन्यायेनाह्नां पूरणे ऐन्द्रवायवः ऐन्द्रवायवाग्रता स्यात् । तथा हि । प्रायणीयचतुर्विंशाख्ये द्वे अहनी अपहाय चोदकशास्त्रेण त्र्यनीकावृत्तौ एकैकावृत्तेनेव दिवसा इति । एकोनविंशतिवारमावृत्तौ एकसप्तत्युत्तरं शतदिवसा जाताः । आवृत्तौ द्वौ । एवं सति पूर्वपक्षे सप्त दिवसाः शिष्टाः । पूर्वपक्षे ऽपि येन क्रमेण परिसमाप्तिः तस्यैवोत्तरपक्षे ऽपि प्रातिलोम्येनानुष्ठानम् । अत्र पूर्वपक्षे ऽपि त्र्यनीकापरिपूर्त्यभावेन प्रातिलोम्यप्राप्त्यभावादानुलोम्येनैवानुष्ठानं प्राप्तम् । तथा च विंशत्यामावृत्तौ नवदिवसपूर्तये विषुवन्नामकं मध्यममहः । एकमुत्तरपक्षआद्यस्वरसामसंज्ञकमेकमहरिति विंशतितमावृत्तिः पूर्णा । तत एकविंशत्यां परिवृत्तौ द्वितीये स्वरसामनि ऐन्द्रवायवाग्रं तृतीये स्वरसाम्नि शुक्राग्रं ततो विश्वजिति चतुर्थे ऽहनि आग्रयणाग्रं ततः पृष्ठ्यः षडहः प्राप्तः । तत्रैव त्रयस्त्रिंशस्तोममारभ्य विपरीतानुष्ठानम् । एतदहः प्रकृत्यैव जगतीमग्रतः कृत्वा छन्दांसि प्रकृतानि । आग्रयणमग्रतः कृत्वा ग्रहा इत्यनेनाग्रयणाग्रता श्रुतिसिद्धा । उक्तक्रमानुसरणे ऐन्द्रवायवाग्रता प्राप्तेति आग्रयणं ग्रहा इति लिङ्गविरोधः । सिद्धान्ते नव भागाः । एकैकभागस्य विंशतिदिवसाः । तावत्पर्यन्तं प्रथममहः आरभ्य ऐन्द्रवायवाग्रता विधेया । एवं सति प्रायणीयचतुर्विंशयोरैन्द्रवायवाग्रता प्रत्यक्षवचनसिद्धा ऽप्यविरुद्धा । अनयैव रीत्या नवभागवृद्धौ पूर्वपक्षे ऽपि त्र्यनीका परिपूर्णा । तस्यैवोत्तरपक्षे ऽपि प्रातिलोम्येनानुष्ठानं प्राप्तं प्रातिलोम्येनानुष्ठाने प्रथमं विंशतिदिनपर्यन्तम् आग्रयणाग्रं तदन्तःपातित्वाविरक्तषडहस्याग्रयणं ग्रहा इति लिङ्गमुपपन्नमित्यलमतिविस्तरेण ॥ ८५ ॥

वचनात्परिवृत्तिरैकादशिनेषु ॥ ८६ ॥

नन्वनया विशेकादशिनानामपि स्यानवृद्धिरेव स्यादत आह । वचनादिति । वचनं चेत्थं श्रूयते, वाक्यमन्तत:

Digitized by Google

पुनः पर्यावृत्तेषु आग्नेयमेव प्रथमे ऽहन्यालभेतेति । अस्यार्थः । ऐकादशिनानां प्रथम आग्नेयः चरमो वारुणः । चरमं वारुणमारभ्य पुनरावृत्तौ आग्नेयः प्रथमः कार्य इत्यनेन दण्डाकलितन्यायो वचनसिद्धः । सूत्रार्थः स्पष्टः ॥ ८६ ॥

लिङ्गदर्शनाच्च ॥ ८७ ॥

उक्तार्थे लिङ्गं चाह । लिङ्गेति । प्राणा वा ऐकादशिना यदेकादशिनीभिरीयुरह्नान्यतिरिच्येरन्निति । दण्डाकलितन्यायेन द्वात्रिंशत्कृत्व आवृत्तौ नवाहान्यतिरिच्यन्त इति लिङ्गमुपपन्नं स्यानवृत्तौ नातिरेकावसर इति भावः ॥ ८७ ॥

व्यूढे मन्त्राणां छन्दोव्यतिक्रमः । अधि० २६ ।

छन्दोव्यतिक्रमाद्व्यूढे भक्षपवमानपरिधिकपालमन्त्राणां यथोत्पत्ति वचनमूहवत्स्यात् ॥ ८८ ॥

व्यूढद्वादशाहे छन्दोव्यतिक्रमः श्रूयते । छन्दांसि वा अन्योन्यस्य लोकमभिध्यायन्ति । गायत्री त्रिष्टुभः त्रिष्टुब् जगत्याः जगती गायत्र्या इति गायत्र्याः स्थाने त्रिष्टुब् योज्या । एवमग्रे ऽपि । अत्र गायत्र्यादीनां क्वचिन्मुख्यवृत्तिः, यथा चतुर्विंशत्यक्षरादिमन्त्रेषु । गौणं क्वचिद्यथा भक्षानुवाके गायत्रच्छन्दस इन्द्रपीतस्य त्रिष्टुप्छन्दसः जगतीछन्दसः इति । पवमानमन्त्रे श्येनो ऽसि गायत्रच्छन्दा अनु त्वा ऽऽरभे सुपर्णो ऽसि त्रिष्टुप्छन्दाः सघा ऽसि जगतीछन्दा इति । परिध्यर्थवादे गायत्रो मध्यमः परिधिस्त्रैष्टुभो दक्षिणो जागत उत्तर इति । एवं कपालेषु यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनमिति । त्रैष्टुभं माध्यन्दिनं सवनं जागतं तृतीयसवनमिति । अत्र गौणमुख्यसाधारण्येन व्यत्यये प्राप्ते सिद्धान्तमाह । छन्दोव्यतिक्रमादिति । व्यूढे तत्संज्ञके छन्दोव्यतिक्रमात् । मुख्यच्छन्दसामेव व्यतिक्रमस्य श्रुतत्वात् । वचनं तत्तच्छन्दस्कमन्त्ररूपवचनमूहवद् विपर्यस्तं स्यात् । भक्षादिमन्त्राणामुक्तानां यथोत्पत्ति यथा पाठः तथैव पठितव्यमिति ॥ ८८ ॥

इति श्रीजैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य पञ्चमः पादः ॥ ५ ॥

Digitized by Google

रथन्तरादिसाम्नां तृचे गानम् । अधि॰ १ ।

एकर्क्स्थानानि यज्ञे स्युः स्वाध्यायवत् ॥ १ ॥

अस्मिन्पादे सामविषये प्राधान्येन बाधश्चिन्त्यते । अध्ययनवेलायां रथंतरादिसामैकस्यामृच्यभ्यस्यते । क्रतावपि तथैव योज्यमित्याह पूर्वपक्षम् । एकेति । एकर्क् स्थानमाश्रयो येषामीदृशानि यज्ञे स्युः सामानि अध्ययनवत् ॥ १ ॥

तृचे वा लिङ्गदर्शनात् ॥ २ ॥

सिद्धान्तमाह । तृचे वेति । ऋक्त्रये ज्ञेयं लिङ्गदर्शनात् । अष्टाक्षरेण प्रथमायामृचि प्रस्तौति द्व्यक्षरेणोत्तरयोरिति लिङ्गम् ॥ २ ॥

स्वर्दृक्शब्देन वीक्षणस्य कालार्थता । अधि॰ २ ।

स्वर्दृशं प्रति वीक्षणं कालमात्रं परार्थत्वात् ॥ ३ ॥

रथंतरे प्रस्तूयमाने संमीलयेत् स्वर्दृशं प्रति वीक्षेतेति । अस्यार्थः । रथन्तरस्तुतौ संमीलनं रथन्तरयोनिभूतायाम् अभि त्वा शूरेत्यृचि स्वर्दृक्शब्दो ऽस्ति तेन वीक्षेतेति अभिप्रायेण स्वर्दृक्पदस्य वीक्षणाङ्गत्वमिति पूर्वपक्षे सिद्धान्तमाह । स्वर्दृशमिति । स्वर्दृशं प्रतीति कालमात्रं काललक्षकं स्वर्दृगुच्चारणकाले वीक्षेतेत्यर्थः । कुतः, परार्थत्वात् । स्वर्दृक्शब्दस्य स्तुत्यर्थत्वात् । एकत्र स्तुतौ विनियुक्तस्य वीक्षणे विनियोगासम्भवादिति भावः ॥ ३ ॥

गवामयनिके पृष्ठ्यषडहे बृहद्रथन्तरयोर्विभागः । अधि॰ ३ ।

पृष्ठ्यस्य युगपद्विधेरेकाहवद् द्विसामत्वम् ॥ ४ ॥

इदमाम्नायते, पृष्ठ्यः षडहो बृहद्रथन्तरसामेति । अत्र पूर्वपक्षमाह । पृष्ठ्यस्येति । पृष्ठ्यस्य पृष्ठस्तोत्रस्य युगपद्विधेः बृहच्च रथन्तरं चेति एकसहितापरं द्वन्द्वसमासलभ्यं तस्यैककाले विधेः प्रत्येकमहनि द्विसामत्वम् । यथा एकाहविशेषे संसवउभे कुर्यादिति तथा ॥ ४ ॥

विभक्ते वा समस्तविधानात्तद्विभागे ऽप्रतिषिद्धम् ॥ ५ ॥

सिद्धान्तमाह । विभक्तइति । विभक्ते द्वन्द्वसमासशून्ये समुदाये समस्तविधानाद् बहुव्रीहिसमासविधानात् । बृहद्रथन्तरं साम यस्मिन्

पृष्ठे इति व्युत्पत्तौ न साहित्यलाभः। किं तु प्रत्येकमेव द्वयोर्लाभ इति तद्विभागे वृहद्रथन्तरविभागे अविप्रतिषिद्धं च अबाधितं, चोदकमिति शेषः। प्रकृतौ एकस्मिन् अहनि एकैकं पृष्ठमत्रापि तथा ऽनुष्ठाने चोदकानुग्रहो भवति। चोदकशास्त्रेण विकल्पेन प्राप्तौ बह्व्यहानि एकेन रथन्तरेणैव कर्तुरिच्छया प्राप्तं तन्माभूदितीदं वचनम् ॥ ५ ॥

प्रायणीयोदयनीययोरैकादशिनानां विभागः। अधि॰ ४।

समासस्त्वैकादशिनेषु तत्प्रकृतित्वात् ॥ ६ ॥

द्वादशाहे श्रूयते। ऐकादशिनान्प्रायणीयोदयनीययोरतिरात्रयोरालभेरन् इति। अत्र पूर्वपक्षसूत्रमाह। समास इति। प्रायणीयोदयनीययोरह्नोः प्रत्येकाहनि ऐकादशिनानां समासः कृत्स्नानुष्ठानं स्यात्। तत्प्रकृतित्वात्। अत्र तत्प्रकृतिरित्यस्य तत्प्रकृतिधर्मत्वे लक्षणा। तत्प्रकृतेर्ज्योतिष्टोमस्य ये धर्माः तद्वत्त्वात्। ज्योतिष्टोमे निखिलपशूनामेकस्मिन्नहन्यालम्भस्य दृष्टत्वादिति भावः ॥ ६ ॥

विहारप्रतिषेधाच्च ॥ ७ ॥

विहारेति। विहारः एकस्मिन्दिने ऐकादशिनसंबन्धियागानां परस्परसामानाधिकरण्यं तत्प्रतिषेधात्। तन्निषेधशास्त्रात्। द्वादशाहे प्रकृतित ऐकादशिनप्राप्तौ अन्वहमेकैकमालभतइति परस्परासामानाधिकरण्ये प्राप्ते प्रायणीयोदयनीययोरालभेतेति असामानाधिकरण्यं बाधते। अतो युगपदनुष्ठानमिति भावः ॥ ७ ॥

श्रुतितो वा लोकवद्विभागः स्यात् ॥ ८ ॥

सिद्धान्तमाह। श्रुतीति। श्रुतितः द्वित्वश्रुतितः। लोकवत्। यथा लोके चैत्रमैत्रयोः शतं देहीत्युक्ते विभज्यैव ददाति तद्वत् ॥ ८ ॥

विहारप्रकृतित्वाच्च ॥ ९ ॥

विहारेति। अन्वहमेकैकमालभेतेत्यनेन विहारस्य प्रकृतित्वाद् उपक्रान्तत्वात्। विभागः स्यात् ॥ ९ ॥

यावच्छक्यं तावद्विहारस्यानुग्रहीतव्यं विशये च तदासक्तिः ॥ १० ॥

Digitized by Google

ननु विभागे वा अन्वहमित्यस्योपपत्तिः कथमित्यत आह । याव-दिति । विहारस्य यावच्छक्यं तावदनुग्रहः कार्यः । विभागे यावत्पशूनां सामानाधिकरण्याभावादीषद्वा ऽनुगृहीतमिति भावः । विशये विभाग-निश्चयानन्तरं प्रायणीये कति यागा उदयनीये कतीति संशये तदा-सत्तिः प्रकृत्यासत्तिः मुख्येनानुगृह्येत ॥ १० ॥

त्रयस्तथेति चेत् ॥ ११ ॥

त्रयस्तथा प्रायणीये शेषा उदयनीयइति चेत् ॥ ११ ॥

न समत्वात् प्रयाजवत् ॥ १२ ॥

नेति । प्रयाजवत् । यथा एकादशमध्ये षडागन्तवः प्रयाजाः प्रथमोत्तमयोर्विकारभूताः साम्येन प्रविभज्यन्ते एवमिहापि यावत्सु साम्यं भवति तावतः साम्येन विभज्य अधिकमुदयनीये ॥ १२ ॥

विश्वजित्सर्वपृष्ठ इत्यत्रैकस्यैव पृष्ठदेशे निवेशः । अधि० ५ ।

सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य कृतदेशत्वात् ॥ १३ ॥

रथन्तरबृहद्वैरूपवैराजशाक्वररैवतानि सामानि विश्वजिति । वि-श्वजित्सर्वपृष्ठो भवतीति सर्वेषां विनियोगः श्रुतः । तत्र पूर्वपक्षमाह । सर्वे-ति । तेषां पूर्वोक्तसाम्नामेकदेशत्वं माध्यन्दिनपवमानादूर्ध्वं मैत्रावरुणसाम्नः प्राग् यो देशः स एव देशो येषां तत्त्वं स्यात् । पृष्ठशब्दात् तेन शब्देन निर्देशात् । पृष्ठस्य पृष्ठसाम्नः कृतदेशत्वात् । नियतदेशस्य क्लृप्तत्वात्साम्ना तद्धर्मातिदेशादिति भावः ॥ १३ ॥

विधेस्तु विप्रकर्षः स्यात् ॥ १४ ॥

सिद्धान्तमाह । विधेरिति । विधेः न्यायेनैकदेशप्राप्तावपि प्रत्य-क्षवचनाद्विप्रकर्षः देशभेदः स्यात् । प्रत्यक्षवचनं तु भाष्ये स्पष्टम् ॥ १४

वैरूपवैराजसाम्नोः पृष्ठकार्ये निवेशः । अधिः ६ ।

वैरूपसामा क्रतुसंयोगात् त्रिवृद्वदेकसामा स्यात् ॥ १५ ॥

Digitized by Google

अस्ति ज्योतिष्टोमसंस्थाविशेष उक्थ्य इति । तत्रैवं श्रूयते । उक्थ्यो वैरूपसामेति । वैरूपसामा क्रतुरुक्थ्यः एकसामा स्यात् । आदिनिखिलसामशून्यः निरुक्तैकसामा स्यात् । क्रतुसंयोगात् । क्रत्वन्वितत्वात् । यथा त्रिवृदग्निष्टोमः इत्यत्र त्रिवृन्मात्रस्तोमकत्वं क्रतोस्तथा ॥ १५ ॥

पृष्ठार्थे वा प्रकृतिलिङ्गसंयोगात् ॥ १६ ॥

सिद्धान्तमाह । पृष्ठेति । पृष्ठकार्यएव वैरूपं निविशते नान्यत्र प्रकृतिलिङ्गसंयोगात् । पृष्ठसामविधानवाक्ये रथन्तरसाम बृहत्साम वेति बहुव्रीहिसमासयोगः प्रतीयते इहापि तथात्वेन तस्यैव बुद्धिस्थत्वादिति भावः ॥ १६ ॥

त्रिवृद्वदिति चेत् ॥ १७ ॥

दर्शितदृष्टान्तं साधकत्वेनोपन्यस्यति । त्रिवृदिति ॥ १७ ॥

न प्रकृतावकृत्स्नसंयोगात् ॥ १८ ॥

दृष्टान्तवैषम्यं दर्शयति । नेति । अकृत्स्नसंयोगात् । प्रकृतौ प्रकृतौ सामविधायकानि यानि तेषु कृत्स्नेषु बहुव्रीहियोगो नास्ति किंतु क्व चिदेव पृष्ठस्तोत्रे अतः अकृत्स्नसंयोगरूपलिङ्गाद् यथा सामविशेषबाधः एवं त्रिवृति नेति योऽन्यम् । यथा एवमिति पूरणीयम् ॥ १८ ॥

विधित्वान्नेति चेत् ॥ १९ ॥

धेनुर्दक्षिणेत्यत्र कृत्स्नन्यायं गृहीत्वा शङ्कापूर्वपक्षसाधनानि सूत्रद्वयेनाह । विधित्वादित्यादिना । अग्रोत्तरसूत्रे तन्न्यायत्वाद्विशयइति तन्न्यायत्वाद् धेनुर्दक्षिणेति न्याय्यो यत्र प्रकृते तत्स्वाद् विशये संशये पूर्वपक्षमाह । विधित्वादिति । विधित्वाद् धेनुरिति तुल्यविधित्वादुक्तसिद्धान्तो नेति चेत् ॥ १९ ॥

न स्याद्विशये तन्न्यायत्वात् कर्माविभागात् ॥ २० ॥

नेति सिद्धान्तमाह । न स्यात् । धेनुरितिविधिसमो न स्यात् । धेनुदक्षिणाकर्मणः कार्यस्य अविभागात् । एकत्वात् । तत्र ऋत्विक्परिक्रयरूपं कार्यमेकमत्र सामभेदेन कार्ये भिन्नमिति वैषम्यमिति भावः ॥ २० ॥

Digitized by Google

प्रकृतेश्चाविकारात् ॥ २१ ॥

साधकान्तरमाह । प्रकृतेरिति । प्रकृतेः चोदकशास्त्रस्य सामान्तरे इति शेषः । अविकारारात् । अबाधात् ॥ २१ ॥

त्रिवृदग्निष्टोम इत्यत्र स्तोमगतसंख्याविकारः । अधि० ७ ।

त्रिवृति संख्यात्वेन सर्वसंख्याविकारः स्यात् ॥ २२ ॥

त्रिवृदग्निष्टोम इति । अत्र पूर्वपक्षमाह । त्रिवृतीति । त्रिवृति पदे संख्यात्वेन त्रैगुण्यरूपसंख्याबोधकत्वेन ज्योतिष्टोमसाधनद्रव्यपरिच्छेदकसंख्यायाः सर्वस्याः विकारो बाधः स्यात् । ज्योतिष्टोमे यत्र या संख्या तत्त्रिगुणसंख्याकमत्र कार्यमिति भावः ॥ २२ ॥

स्तोमस्य वा तल्लिङ्गत्वात् ॥ २३ ॥

सिद्धान्तमाह । स्तोमस्येति । स्तोमस्य ऋगनवकस्य वाचकः तल्लिङ्गात् । प्राकृतलिङ्गात् । प्रकृतौ त्रिवृद्बहिष्पवमान इति बहिष्पवमानस्तोत्रसामानाधिकरण्यं तथाऽत्र दर्शनादिति भावः ॥ २३ ॥

उभयसाम्नि बृहद्रथन्तरयोः समुच्चयः । अधि० ८ ।

उभयसाम्नि विश्वजिद्वद्विभागः स्यात् ॥ २४ ॥

संसवे बृहद्रथन्तरे उभे कुर्यादिति श्रुतम् । अत्र पूर्वपक्षमाह । उभयेति । उभयसाम्नि संसवे विश्वजिद्वत् । विश्वजित् सर्वपृष्ठो भवतीत्यत्र रैवतान्तानां षण्णां विधावपि एकं रथन्तरं पृष्ठकार्ये विनियुक्तं शेषाणां स्तोत्रान्तरेषु विनियोगस्तथा रथन्तरस्य बृहतो वा एकस्य पृष्ठकार्ये अपरस्य स्तोत्रान्तरेति विभागः स्यात् । भिन्नकार्ये विनियोगः स्यात् ॥ २४ ॥

पृष्ठार्थे वाऽतदर्थत्वात् ॥ २५ ॥

सिद्धान्तमाह । पृष्ठार्थेइति । पृष्ठार्थे पृष्ठकार्ये उभे भवतः । अतदर्थत्वात् । तस्य इतरस्तोत्रस्य अर्थः कार्ये तदर्थः । न विद्यते तदर्थो ययोस्तत्त्वात् । तदर्थत्वादिति पाठे सरल एवार्थः । रथन्तरसहितबृहता पृष्ठकार्यं साधयेदिति वाक्यार्थ इति भावः ॥ २५ ॥

Digitized by Google

लिङ्गदर्शनाच्च ॥ २६ ॥

लिङ्गमपि साधकमाह । लिङ्गेति । पूर्वाह्णो वै रथन्तरमपराह्णो बृहदिति एकेनाह्ना ऽभिसंबन्धादेकस्थानतां दर्शयति ॥ २६ ॥

मध्वशनघृताशनयोः षडहान्ते ऽनुष्ठानम् । अधि० ९ ।

पृष्ठे रसभोजनमावृत्ते संस्थिते त्रयस्त्रिंशे ऽहनि स्यात्स-दानन्तर्यात्प्रकृतिवत् ॥ २७ ॥

द्वादशाहे त्रिवृतमारभ्य त्रयस्त्रिंशान्तः षडहः । तत्रैव संस्थिते पृष्ठ्ये षडहे मध्वाशयेदिति । एवं सति द्वादशाहप्रकृतिकगवामयने त्रयस्त्रिंशमारभ्य त्रिवृदन्ता विपरीतप्रवृत्तिः । तत्र मध्वशने पूर्वपक्षमाह । पृष्ठ्य इति । रसभोजनं मध्वशनमावृत्ते प्रकृतितः विपरीतस्तोमके संस्थिते षडहे त्रयस्त्रिंशे ऽहनि यस्मिन्दिवसे त्रयस्त्रिंशस्तोमः तद्दिने प्रथमदिन इति फलितम् । प्रकृतौ तदानन्तर्यात् । आनन्तर्यश्रवणादिहापि प्रकृतिवत् ॥ २७ ॥

अन्ते वा कृतकालत्वात् ॥ २८ ॥

सिद्धान्तमाह । अन्तइति । अन्ते अन्तिमदिने मध्वशनं संस्थिते षडहइति वाक्येन चरमदिनाङ्गत्वं क्लृप्तमतः कृतकालत्वात् क्लृप्तकालत्वात् । त्रयस्त्रिंशाङ्गत्वं स्थानप्रमाणेन तत्समीपे प्रकृतावनुष्ठानेन वाच्यं, तच्च वाक्याद्दुर्बलमितिभावः ॥ २८ ॥

षडहावृत्तावपि मध्वशनघृताशनयोः सकृदनुष्ठानम् । अधि० १० ।

अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् ॥ २९ ॥

क्व चिदावृत्तं पृष्ठ्यं षडहमुपयन्तीति षडहावृत्तिः श्रुता । तत्र मध्वशने पूर्वपक्षमाह । अभ्यासइति । अभ्यासे षडहाभ्यासे तदभ्यासः मध्वशनावृत्तिः । कर्मणः षडहरूपकर्मणः पुनः प्रयोगात् पुनरनुष्ठानात् ॥ २९ ॥

अन्ते वा कृतकालत्वात् ॥ ३० ॥

सिद्धान्तमाह । अन्ते वेति । पूर्वं व्याख्यातम् । अयं भावः । संस्थितिर्नाम षडहसंबन्धिक्रियोपरमः । अयं चरमषडहएवेति तत्रैव मध्वशनमिति भावः ॥ ३० ॥

Digitized by Google

गवामयने मध्वशनभक्षताशनयोः प्रतिमासमावृत्तिः । अधि० ११ ।

आवृत्तिस्तु व्यवाये कालभेदात् ॥ ३१ ॥

गवामयने प्रथममेकं षडहः ततो ऽभिप्लवसंज्ञकान्यहानि पुनः षडहः । तत्रापि मध्वशनं सकृदिति पूर्वपक्षे सिद्धान्तमाह । आवृत्तिरिति । व्यवाये षडहमिथाहोभिः व्यवाये अन्तरिते षडहे मध्वशनस्यावृत्तिः । कालभेदात् । यथा एकपाकं कृत्वा मध्ये पूजा ततः पाके भेदः सर्वैर-नुभूयते तथा ऽत्रापीति । निमित्तभेदे नैमित्तिकमावर्ततइति भावः ॥ ३१ ॥

द्वादशाहे ऋत्विग्भिरपि मध्वशनम् । अधि० १२ ।

मधु न दीक्षिता ब्रह्मचारित्वात् ॥ ३२ ॥

सत्ररूपे द्वादशाहे सर्वेषामृत्विजां दीक्षितत्वेन ब्रह्मचर्यव्रतं प्राप्तम् । ब्रह्मचर्ये च मधुमांसभक्षणनिषेधाच्च तत्र ऋत्विजां मधुभक्षण-मिति पूर्वपक्षमाह । मध्विति । भक्षयेयुरिति सूत्रे शेषः । शेषं स्पष्टम् ॥ ३२ ॥

प्राश्येत वा यज्ञार्थत्वात् ॥ ३३ ॥

सिद्धान्तमाह । प्राश्येतेति । ब्रह्मचारिणो रागप्राप्तमधुन एव निषेधः । अयं क्रत्वर्थ इति निषेधाविषय इति भावः ॥ ३३ ॥

मानसस्य दशमाहाङ्गत्वम् । अधि० १३ ।

मानसमहरन्तरं स्याद् द्वादशाहे व्यपदेशात् ॥ ३४ ॥

द्वादशाहे प्राजापत्यं मनो गृह्णातीति श्रुतम् । इदं मानसयहाहः द्वादशाहसंबन्धिद्वादशदिवसभिन्नं त्रयोदशमहरिति पूर्वपक्षमाह । मान-सेति । व्यपदेशात् । तदर्थवादे वाक्ये द्वादशाहो मनो मानसमहरिति द्वादशदिनभिन्नत्वेन निर्देशात् । शेषं स्पष्टम् ॥ ३४ ॥

तेन च संस्तवात् ॥ ३५ ॥

साधकान्तरमप्याह । तेनेति । तेन मानसेनाह्ना द्वादशाहसंस्त-वात् । संस्तुतिवाक्यं, द्वादशाहस्य गतरसानि छन्दांसि तानि मानसेना-प्याययन्तीति ॥ ३५ ॥

अहरन्ताच्च परेण चोदना ॥ ३६ ॥

Digitized by Google

साधकान्तरमाह । अहरन्तादिति । अह्नामन्तश्चरमावयवः तस्मात्परेण परतः मानसग्रहचोदना यतः ततः भिन्नग्रहः । चोदनावाक्यं पत्नीः संयाज्य प्राञ्च उदेत्य मानसाय प्रसर्पन्तीति । द्वादशाहचरमावयवो हि पत्नीसंयाजात्मकं कर्म । यदि द्वादशाहान्तर्गतदशमाह्नो ऽङ्गं तदा पत्नीसंयाजानन्तरं मानसो ग्रहो वाच्यः । एवं सति पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्तइति वचनेन पत्नीसंयाजान्तत्वविरोध इति भावः ॥ ३६ ॥

पक्षे संख्या सहस्रवत् ॥ ३७ ॥

ननु त्रयोदशाहपक्षे द्वादशाहसंज्ञा बाधितेत्यत आह । पक्षइति । अस्मिन्पक्षे द्वादशसंख्या सहस्रवत् । अतिरात्रेण सहस्रसाध्येन यजेतेति अधिके ऽपि सहस्रात्सहस्रशब्दो दृष्टस्तथा ॥ ३७ ॥

अहरङ्गं वां ऽशुवच्चोदनाऽभावात् ॥ ३८ ॥

सिद्धान्तमाह । अहरिति । अह्नः दशमाह्नः अङ्गं न तु पृथक्कर्म अंशुवत् । यथा अंशुं गृह्णातीति सोमयागस्यैवाभ्यासरूपः सुत्यादिवसस्यैवाङ्गं तद्वत् पृथक्चोदनाऽभावात् ॥ ३८ ॥

दशमविसर्गवचनाच्च ॥ ३९ ॥

साधकं स्वमते दर्शयति । दशमेति । एष वै दशमस्याह्नो विसर्गो यन्मानसमिति वचनात् । विसर्गः चरमावयवः ॥ ३९ ॥

दशमे ऽहनीति च तद्गुणशास्त्रात् ॥ ४० ॥

दशमे इति । दशमे ऽहनि मानसाय प्रसर्पन्तीति तस्य दशमाह्नो गुणवाचकशास्त्रात् ॥ ४० ॥

संख्यासामञ्जस्यात् ॥ ४१ ॥

संख्येति । दशमाहाङ्गत्वे सिद्धे द्वादशाहइत्यत्र द्वादशत्वरूपसंख्या स्वरसा । अन्यथा गौण्या बोधनीया स्यात् ॥ ४१ ॥

पश्वतिरेके चैकस्य भावात् ॥ ४२ ॥

पश्विति । द्वादशाहे ऐकादशिनान्विधाय तदर्थेवादे शङ्कावाक्यं कथमेकादश पशवो द्वादशाहानीति पश्वतिरेके एकादशिन्यामेकस्य भावात् । एकस्यातिरिक्तत्वशङ्कातः ॥ ४२ ॥

referring to the *face*, and being thus supported (by the fact of the *face* being the object described); and thus we have a reason in support of making the above an instance of *Simile:* वक्त्रं शशीव; and the reason is not quite contradictory with reference to the moon, and thus there is no reason contradicting the existence of *Metaphor* (वक्त्रमेव शशी).

[*Page* 826.] In—

"that this another cool-rayed one should rise, in the presence of your face,"—the fact of *being another* quite fits in with the moon; nor is it contradictory with regard to the face, and thus there is a reason supporting the fact of its being a *Metaphor;* but it does not at the same time contradict its being a *Simile.*

[*Page* 827.] In—

"the Goddess of wealth firmly embraces you, the king-Nārāyana,"—the "embrace" sets aside all chance of its being a Simile; since the embrace of another's wife (Nārāyana's wife) is not possible with regard to one similar to Him.

"May the lotus feet of Ambikā ordain your prosperity—the feet lovely on account of the tingling of the manjīra."

Here *tingling* is contrary to the *lotus,* since it is impossible with reference to it; and thus *Metaphor* is set aside; nor can it be said to support its being a *Simile* on the ground of its being quite compatible with reference to the *feet;* since the negative (the fact of the *tingling* being incompatible with Metaphor) is recognised as more powerful than the affirmative (the supporting fact of the *tingling* being compatible with reference to the *feet*). The rule may be similarly applied by the intelligent to other cases.

141 (*contd.*)—[*Page* 828.] Where in one word alone two Figures—both verbal and ideal—are manifested, (it is the third kind of *Commixture*).

The third form of Commixture.

In the case where, in identical words, both verbal and ideal Figures, manifest themselves, we have another kind of Commixture.

Digitized by Google

Example—

[*Page* 829.]

" स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब-विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-बद्धान्धकारमधुपावलि संचुकोच " ॥

[*Haravijaya*, Canto XIX.

["This lotus of the day—having for its pericarp the sun with his clearly shooting rays for the filaments, and enveloping the bee-like Night embracing the eight quarters—has contracted itself."]

[*Page* 830.] Here in one word (a compound) (in the 1st two feet) are manifested both *Alliteration* and *Metaphor* (in किरणकेसरसूर्यबिम्बविस्तीर्णकर्णिक and दिग्दलकलाप···)

141 (*concld.*)—Thus this is said to be threefold.

Thus, in the above manner, Commixture is said to be threefold: (1) through the relation of mutual subserviency; (2) through doubt; and (3) through being located in a single word. This cannot be described in any other manner, owing to the infinite number of divisions.

Thus have the Figures been described as threefold, being located in Word, in Meaning, or in both.

Objection: All the Figures being equal, inasmuch as all impart grace to poetry, why should some be said to belong to Word alone, some to Meaning alone, and some to both?

The *reply* is—we have already said (Chapter IX.) that for the division of the Beauties and Defects of Poetry and the Figures of Speech, as being verbal and ideal, the only ground is invariable concomitance or non-concomitance, since no other reason can be assigned for such distinction. Thus a Figure, which depends upon the invariable concomitance or non-concomitance of one of these (Word or Meaning or both) is said to belong to it. Just as the *Semblance of Repetition* and the *Consequentional Metaphor*, both depending upon the invariable concomitance or non-concomitance of both (Word and Meaning), are said to belong to both.

So in the same manner, Transition, etc.—based on Word—may be understood (as belonging to both). But since in these latter more charm is seen to reside in the Meaning, therefore they are mentioned among Ideal Figures, disregarding the real state of things (the fact of their belonging to both). If you assume that 'a Figure is (to be named with reference to) that which it adorns or embellishes'—then too, you must have recourse to invariable concomitance and non-concomitance, without which there can be no qualified relation of the container and the contained. Thus then Figures must be accepted as depending upon the aforesaid grounds (invariable concomitance and non-concomitance,) and thereby differentiated from one another.

Defects in Figures.

142.—[*Page* 833]. The defects in connection with these (Figures) are included among those already mentioned, and hence they are not separately described.

Thus of *Alliteration* three defects are mentioned:—(1) the Absence of General Recognition, (2) Uselessness, and (3) Incompatibility of Diction; these three are respectively included in (1) the Contradiction of Popular Notions [p. 141], (2) Incomplete Sense [p. 145], and (3) Incompatible Letters [p. 116].

Examples in order.—

[*Page* 834.]

"चक्री चक्रारपंक्तिं, हरिरपि च हरीन्, धूर्जटिर्धूर्ध्वजान्तान्
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः, कूबराग्रं कुबेरः ।
रंहः संघः सुराणां, जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः" ॥

[*Sūryaçataka.*]

["May that chariot of the Sun give you joy,—whose axle is eulogised, for the world's good, by Vishnu, the horses by Indra, the foremost banners by Çiva, the wheels by the Moon, the driver Aruṇa by Varuṇa, the poles by Kuvēra, and the speed by the host of Gods."]

Digitized by Google

Here the nominatives and objectives of the 'eulogy' are made as such only for the sake of *Alliteration;* they are not so described in the Purāṇas; and thus this is contrary to generally recognised facts.

"अयि तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयमे ।
अनणुरणन्मणिमेखलम् अविरतशिञ्जानमञ्जुमञ्जीरम्
परिसरणमरुणचरणे रणरणकम् अकारणं कुरुते" ॥

["Oh young one, with face bright as the joyous moon, and capable of graceful conversation, with coloured feet,—at the time you go to your husband's place, your going, with the tingling girdle-zone and manjīra, produces, without any cause, a peculiar anxiety in my heart—tell me wherefore this is."]

Here nothing is found to add charm to the implied meaning; and as such the *Alliteration* comes under the fault of *Incomplete Meaning.*

In—

"अकुण्ठ" &c., (*Text* p. 368.)

the out-flush of harsh words in the Erotic is incompatible, as explained before. And thus the harsh Alliteration here found, is nothing more than the fault of Incompatibility of Diction, consisting of incompatibility of letters.

[*Page* 836]. The occurrence of *Chime* in the three feet of a Çloka is the fault of *Non-usage,* [p. 93 and 132]—*e. g.*

"भुजंगमस्येव मणिस्सदम्भाः ग्राहावकीर्णेव नदी सदम्भाः ।
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं सदम्भाः" ॥

["Deceitful people, though bearing testimony to their evil heart, yet attract the hearts of people—like the pure and bright hood-jewel of a serpent, and like clear-watered streams full of alligators."]

In a *Simile*, the faults consisting of the fact of the object compared to being inferior to, or exceeding, the object compared, with regard to species or degree, come under the *Improper*. The case of the attributive words being more and less, do not exceed the bounds of *Redundancy* [p. 121] and *Deficiency* [p. 121] respectively.

Examples in order :—

(1) Inferiority in Species.—

"You took a bold step *like Chandālas.*"

(2) Of Degree.—

"The Sun shines *as a spark of fire.*"

(3) Excess occurring in Species.—

"This Chakravāka shines sitting on the lotus seat,—*as the revered Creator* desiring to create the world, in the beginning of the Cycle."

(4) Excess in Degree.—

"Thy navel is like the nether world, thy breasts resembling mountains, the locks appearing like the flow of the Yamunā."

Here the description of the objects (the person, the Sun, &c.) by means of such words as "*Chandālas*" &c., as the secondary terms of comparison, is altogether disagreeable; and thus these become instances of *Improper Signification.*

[*Page* 338] "That Sage, marked with the Mauñjī and wearing the skin of the black deer, shone like the sun mixed up with pieces of clouds."

This is an instance of *Deficiency*, since there is no word implying the attribute (in the cloud) to tally with the *Mauñjī* of the object compared (the Sage).

"Krishna attained to an agreeable and furious form, with yellow cloth, holding the bow (Çarñga),—appearing like (a piece of nocturnal cloud, with the moon) bearing lightning and the rainbow."

This is an instance of *Redundancy*—since the mention of the *moon* becomes redundant, in the absence of (the mention of) a similar thing (the conch) in the object described (Krishna).

If the difference, of Gender and Number, between the two members of comparison, makes the common attribute of another form, then the common attribute can be construed with only one of them; and as such the implied common attribute would only signify either the *Upamāna* alone or the *Upamēya* alone, qualified (by that particular attribute); and consequently the object of delineation would be rendered futile; and this would come under the fault Violation of the Uniformity of Expression (p. 132),—*e. g.*

(1) *Difference in Gender.*

"चिन्तारत्नमिव च्युतासि करतो धिङ्मन्दभाग्यस्य मे" ॥

("You are fallen from my hands like the Chintāmani—woe to me, unlucky that I am!")

(Here the participle—च्युत—can only be construed with a particular person described, and not with रत्नम्).

(2) *Difference in Number.*

[*Page* 840] "सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव" ॥

("The clean barley meal was eaten like respectable women.")

(Here भक्षिताः cannot be construed with कुलवधूः)

But in instances where, though there is difference of Gender and Number, yet the common attribute or adjunct does not differ in form (in order to be construed with the different members),—the above faults do not apply; since in that case it is construable both ways.—*e. g.*

"गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः" ॥

("He is renowned through respectable qualities—as the ocean with gems.")

(Here the words गुणैः and रत्नैः though having their bases of the masculine and neuter gender respectively, do not differ in form).

[*Page* 841] "सद्वेषो ऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधतेस्म परां शोभां तदीया विभ्रमा इव" ॥

(" Her appearance was lovely as her graces—the appearance (and the graces) sweet, and unequalled by other women.")

(Here असदृशः and भृतः with only a slight change in the manner of breaking up of the compounds, can apply both to the singular and the plural.

The difference in Tense, Person, the Potential, and the Imperative, mars an unimpeded comprehension; and thus this also is included in Violation of the Uniformity of Expression [p. 132]—

e. g. "अतिथिंनाम काकुत्स्थात् पुत्रमाप कुमुद्वती ।
पश्चिमात् यामिनीयामात् प्रसादमिव चेतना" ॥

[*Raghuvança*, Canto XVII.]

(" Kumudvatī got, from the descendant of Kakutstha, a son named Atithi,—just as the intellect obtains enlightenment from the latter part of the night.")

[*Page* 842]. Here with reference to the Intellect, the verb must be in the Present tense, and as such the Past cannot apply to it; thus here we have difference in Tense.

"प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपप्रभवा लतेव" ॥ [*Ratnāvalī*, Act I.]

[" Worshipping the God with the fish as his insignia (Cupid), thou shinest like a creeper growing from a branch with fresh leaves—thou who hast thy body clean owing to the late bath, the cloth bright with the red colour of the Kusumbha."]

Here we have the difference in Person—since the affix से (of the Second Person) compatible with the person addressed, must be changed with reference to the *creeper*, which cannot be the object addressed.

Digitized by Google

[*Page* 843]. In—"may thy fame flow like the Gangā"—we have the difference of the Imperative, which has the characteristic of urging the inert (and as such cannot apply to Gangā which is already flowing) ;—hence प्रवहतु cannot apply to the Gangā; in which case it must be प्रवहति. There are similar differences of the Potential, &c., consequent upon the qualifications, &c. of the *Upamāna* not being construable (with the *Upamēya*.)

Objection: There can be no difference in Tense, etc.; since the described attribute can be construed with the *Upamēya*, on the *Simile* being based on other similar attributes, directly expressed or implied. Where the *Simile* is comprehended as based upon a common attribute directly expressed,—as in "He speaks the truth, as Yudhishthira"—in that case we shall explain this as—"this veracious person speaks the truth, like Yudhishthira."—And it cannot be objected that '*a veracious* person speaking the *truth*" is a repetition; since the meaning comprehended here is that 'the man resembles Yudhishthira by his veracity,'—as in the assertion—"he develops with a development of wealth."(*a*)

Reply: True: but this is defence of already existing instances, which cannot be said to be faultless; since it (clearly) mars the comprehension of the object depicted. And on this point the only judges are persons with poetic souls.

[*Page* 846.] The faults of Non-similitude and Improbability with regard to a *Simile*, finally end in *Improper Signification* only.—*e. g.*

"I shall string the Moon of Poetry with rays of ideas."

This is an instance of *Improper Signification*, since no *similitude* can ever be comprehended between 'Poetry and Moon,' and between 'ideas and rays.'

(*a*) According to the Kāçikā, &c., there is no repetition in the assertion "रैपोषम्पुष्यति" (Develops with a development of wealth), because the पुष in the latter word is a generic term (signifying *development in general*), whereas that in the former it is a specific term (signifying *a particular form of development as caused by wealth*). In the same manner the word सत्य occurring in the compound सत्यवादी is a specific term (signifying the *truth as spoken by a particular person*), whereas the word सत्य, following, is a generic term, signifying *truth in general*.

Digitized by Google

संस्कृतपुस्तकानां सूचीपत्रम्।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता श्री ते॰ रामशास्त्रिणा संशोधितः	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≈)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी,	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणेङ्गलण्डीयभाषायां कृता	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≈)
वैशेषिकसूत्रनिरूपणं, श्रीयुतगाफ़ाचार्य्येणेङ्गलण्डीयभाषायां कृतम्	४)
मानवधर्मप्रकाश, मनुस्मृति का हिन्दीभाषा में अनुवाद	५)
श्रावकधर्मदीपिका,	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥≈)
षोडशपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य सव्याख्या श्रीकामेश्वरशुक्लशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, रामशास्त्रिभागवताचार्येण परिशोधितः	३॥)
वेदान्तसिद्धान्तादर्शः, पं॰ मन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं, सटीकं श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५॥)
श्रीभाष्ये, प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः श्रीराममिश्र-शास्त्रिप्रणीतकाठिन्यविषमपदटिप्पणीसमेतः	७)
तथा श्रीभाष्ये प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम्	६)
तथा श्रीभाष्ये तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम्	३≈)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः।	७)
सेतुपूर्त्तिः प्रथमोबिन्दुः सत्संप्रदायाचार्य पं॰ स्वामिश्रीराममिश्रशास्त्रि-प्रणीतोनिर्विशेषाद्वैतनिराकरणपरः	१॥≈)
सेतुपूर्त्तिसहितोवेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
संकर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं॰ स्वामिश्रीराममिश्रशास्त्रि संकलितटिप्पणीसमेतम्।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्र विरचिता, भारद्वाजदामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
माधवीयाधातुवृत्तिः, नामधातुवृत्तिश्च, श्रीयुतमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता,	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)

Digitized by Google

CONTENTS.

Page.

TATTVAMUKTĀKALĀPAḤ WITH SARVĀRTHASIDDHI, Ed. Rāma Miśra Śāstrī, Professor, Sanskrit College, Benares. 617

KĀŚIKĀVYĀKHYĀ PADAMANJARĪ, Ed. Dāmodara Śāstrī, Professor, Sanskrit College, Benares. 633

JAIMINISŪTRAVṚITTIḤ OF ŚITIKAṆṬHABHAṬṬA, Ed. Nityânandapanta, Scholar, Sanskrit College, Benares. 649

KĀVYA-PRAKĀÇA, Ed. Gangānāth Jhā, M. A., Darbhanga. 665

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

3 2044 107 353 047

Digitized by Google